CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

869.
R

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

June. *1912.*

THE

CHOWKHAMBÂ SANSKRIT SERIES;

A COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 174.

धर्मशास्त्र ४६९

व्यवहार-बालंभट्टी

इति प्रसिद्धया लक्ष्मीनामिकया
पायगुण्डे इत्युपनामकेन बालंभट्टेन स्वपत्न्याः लक्ष्मीदेव्याः
स्मारकत्वेन तन्नाम्ना रचितया बृहत्या टीकया सहिता
मिताक्षरा
श्रीयुतगोविन्ददासमहाशयप्रदर्शितरीत्या
पर्वतीयनित्यानन्दपन्तेन परिष्कृत्य संशोधिता।

VYAVAHÂRA-BÂLAMBHATTI

THE EXTENSIVE COMMENTARY ON THE MITÂKSHARÂ
WITH THE ORIGINAL
BY
Bâlambhatta Páyagunde
EDITED BY
Pandit Nityanand Pant Parvatiya
Under the supervision of Shri Govinda Das.

FASCICULUS II.

LISHED AND SOLD BY THE SECRETARY.
CHOWKHAMBÂ SANSKRIT BOOK-DEPOT.
BENARES.
AGENTS:- OTTO HARRASSOWITZ LEIPZIG:
PANDITA JYESHTHARAMA MUKUNDAJI BOMBAY:
PROBSTHAIN & CO., BOOKSELLERS, LONDON.
Printed by Jai Krishna Dasa Gupta,
AT THE VIDYÂ VILÂSA PRESS
BENARES.
Price Rupee one.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ श्रीः ॥

-*-

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तबकः— १७४

१ अस्यां चौखम्बा-संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एकःस्तबको मुद्रयित्वा प्रकाश्यते। एकस्मिन् स्तबके एक एव ग्रन्थो मुद्र्यते ।

२ प्राचीना दुर्लभाश्चामुद्रिता मीमांसावेदान्तादिदर्शनव्याकरण धर्मशास्त्रसाहित्यपुराणादिग्रन्था एवात्र सुपरिष्कृत्य मुद्र्यन्ते ।

३ काशिकराजकीयप्रधानसंस्कृतपाठशालाऽध्यापकाः पण्डिता अन्ये च शास्त्रदृष्टयो विद्वांस एतत्परिशोधनादिकार्यकारिणो भवन्ति।

४ भारतवर्षीयैः, ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्च एतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम्-मुद्राः ७ आणकाः ८

५ अन्यैर्देयं प्रतिस्तबकम् ,, ,, १ ,, ०

६ प्रापणव्ययः पृथग् नास्ति ।

७ साम्प्रतं मुद्र्यमाणा ग्रन्थाः— मुद्रिताः स्तबकाः

(१) संस्कारत्नमाला । गोपीनाथभट्टकृता (संस्कारः)

(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः (व्याकरणम्) १

(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृत-न्यायरत्नाकराख्यया व्याख्यया सहितम् । सम्पूर्णम् । १

(४) भाष्योपबृहितं तत्त्वत्रयम् । विशिष्टाद्वैतदर्शनप्रकरणम् । श्रीमल्लोकाचार्य्यप्रणीतम् । श्रीनारायण तीर्थ विरचित भाष्टभाषा प्रकाशसहितम् । सं० (वेदान्त)

(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः सम्पूर्णः (ज्योतिषः)

(६) भाट्टचिन्तामणिः । महामहोपाध्याय-श्रीगागाभट्ट विरचितः । तर्कपादः (मीमांसा)

११०२८
१०३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विधाविद्यमानत्वव्यवच्छेदः। तेन पश्यत इत्यस्यार्थस्य लाभः। * विपन्ने, पूर्णे समाप्ते इति यावत्। * पूर्वोक्ते, सङ्केतिते। व्यवहारहानौ मुख्यहेतुमाह * उपेक्षालिङ्गेति। अन्यथा तद्विशेषणानर्थक्यमेवेति भावः। तथा च उक्तार्थे हेतुत्वमेवास्य वचनस्यानेनोपपादितमिति बोध्यम्। उपेक्षायां यानि लिङ्गानि जडत्वबालत्वादीनि तेषां यो ऽभावः तत्कृता तन्निमित्तैवेत्यर्थः। एवव्यवच्छेद्यमाह * न तु वस्त्वभावेति। पराक्रान्तत्वात्तत्सम्बन्धाभावकृततदभावेत्यर्थः। उपेक्षालिङ्गेष्वसत्सु एतावत्पर्यन्तं विपन्नवस्तुनः स्वीयत्वे किमित्यनेन व्यवहारो न कृत इति प्रत्यर्थिनोक्ते वादी निरुत्तरो भवतीत्येवं प्रकारेण व्यवहाराभावो नारदेनोच्यते। उपेक्षां कुर्वत इत्युक्तेः। अन्यथा तदानर्थक्यं स्पष्टमेव। अतो न तथा वस्तुनोऽभावकृतो व्यवहाराभावो वक्तुं शक्य इति तात्पर्यम्।

१२। साधकान्तरमाह *तथेति। *विषयश्चास्य भुज्यते इति। विषये चास्येति पाठान्तरम्। विषये चास्य भुञ्जते इति तृतीयपाठः। विषयो देशः। *अस्य, धनिनः। अजडश्चेदित्यादि।

यत्किञ्चिद्दश वर्षाणि सन्निधौ प्रेक्षते धनी।
भुज्यमानं परैस्तूष्णीं न स तल्लब्धुमर्हति॥ (मनु. ८।१४७)

इति पूर्वशेष इति मेधातिथिः। *तत्, धनिकरूपम्। *तद्धनं, तदुत्पन्नं फलरूपम्। *इति, इत्येवं प्रकारेण। प्रथमपक्षं निराचष्टे न वस्तुत इति। न तथा वस्त्वभावकृत इत्यर्थः।

१३। सर्वथा व्यवहारभङ्गे नानयोस्तात्पर्यम्, किन्तु वादिनिरुत्तरत्वे इति प्रतिपादयन्नाह *व्यवहारेति। भवतीतीत्यन्तेनान्वयः। वदतीत्यस्य उदास्ते इतीत्यत्रान्वयः। अजड इत्यादि उपलक्षणमन्येषामपीत्याह *अबाल इति। अस्येति अनन्तर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योगे षष्ठी । तत्सूचितमाह *सन्निधाविति । भुज्यते इति वर्तमानसामीप्ये लडित्याह *भुक्तमिति । चकारसमुच्चेयमाह *तत्रेति । *भुज्यते, भुक्तम् । *उदास्ते, उदासीनः । अस्य फलमाह *एवमिति ।

। अथास्यान्यथा व्याख्यानमाह *अथ मतमिति । तादृशोपभोगान्न भूम्यादेः तद्विषयव्यवहारस्य च हानिः । किं तु तस्य तादृशस्य व्यवहारहानिशङ्का स्यादिति तन्निवृत्त्यर्थमासेधो विधेय इत्यासेधस्यावश्यकर्तव्यतां विधत्ते इदं वचनमित्यर्थः । तदपि व्याख्यानं दूषयति *तच्च नेति । ननु तूष्णीं न स्थातव्यमित्युपदेशः किमदृष्टार्थः उत दृष्टार्थः । न तावदन्त्यः, असंभवात् । व्यवहारहानिशङ्कायां सत्यां तन्निवृत्त्यर्थमुपदेशो वाच्यः । सा च कारणे सत्येव भवति नासति । तच्च कारणं विंशतिवर्षपरिमिता भुक्तिरुतान्यत् । तत्र नान्त्यः । वचने ऽनुक्तेः । नाद्य इत्याह *स्मार्त्तेति । स्मरणविषयतायोग्यकालिकभुक्त्या व्यवहारहानिशङ्कैव नोत्पद्यते साक्ष्यादिसंभवादिति भावः । नाप्यदृष्टार्थ इत्याह *तूष्णीमिति । दोषद्वयप्रतिपादकोऽयं ग्रन्थः । अविवक्षितं स्यादित्यस्योभयत्रान्वयः । तथा चैतावन्मात्राभिधित्सायामविवक्षितमनुपपन्नं स्यादित्याद्यर्थः । तूष्णीं नेति उपदेशस्यादृष्टं फलं विधिबलात्कल्प्यं यद्यपि तथापि कल्पनैव तावद्गरीयसी । किं चादृष्टसत्त्वमेव न ।

बालाग्रशतभागोऽपि न कल्प्यो निष्प्रमाणकः ।

इति न्यायात् । किं च वक्ष्यमाणप्रकारेण गत्यन्तरसंभवे तदभावमूलकतत्कल्पना ऽसंगता । एवं चादृष्टकल्पनयैवास्य सार्थक्यकल्पनायां बीजाभावान्नास्यादृष्टार्थत्वमिति भावः ।

१५। अस्योपदेशस्यादृष्टार्थत्वमभ्युपेत्याप्याह । *विंशतीति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र तदविवक्षितमनर्थकं स्यादित्यर्थः । अस्योपदेशस्यादृष्टफलकत्वे तत्फलस्य विंशतिवर्षरूपमर्यादाऽनुक्तावपि तूष्णीं न स्थातव्यमिति निषेधमात्रेणापि सिद्धिरिति तदुपादानमनर्थकं स्यादिति भावः । यद्वा तदपि व्याख्यानं दूषयति *तच्च नेत्यादिना । असौ मदीयं क्षेत्रादिकं प्रतिग्रहादिकं विनोपभुङ्क्ते इति स्मरणयोग्यकालिकी या भुक्तिस्तस्या व्यवहारहानिशङ्कां प्रति कारणत्वाभावात्तन्निवृत्त्यर्थत्वस्यैतदुपदेशस्यासम्भवात्तूष्णीं नेत्येतावन्मात्रोपदेशे वाच्ये विंशतीत्यनर्थकं स्यात् दृष्टफलाभावेनादृष्टफलकल्पनायां विंशतिवर्षरूपमर्यादाऽनुक्तावपि सम्भवात् इति भावः ।

१६ । विंशतीत्यस्योक्तमानर्थक्यं निराचष्टे *अथोच्येतेत्यादिना । *ऊर्ध्वं, विंशतेरिति शेषः । पश्यत इत्यनेन तूष्णीं नेत्येवोपदिश्यते नाधिकं यद्यपि तथापि विंशतीति सार्थकम् । तथा हि । यदि विंशतिवर्षपर्यन्तं स्वामिकृतासेधाभावेन तद्रहितं तावत्कालं वस्तु कपटकृतलेख्यकमपि प्रत्यर्थिनोपभुक्तं तदा विंशतिवर्षोत्तरं तत्पत्रं निर्दोषमिति पत्रदोषोद्भावननिराकरणार्थत्वेन तत्सार्थकमितिभावः । अत्र प्रमाणमाह *यथाहेति । *शक्तस्य, निराकरणे समर्थस्य । संनिधावित्यनेनासांनिध्यव्यवच्छेदः । *लेख्येन, कपटकृतेन । विंशद्वर्षाणीत्यार्षम् । कालाध्वनोरिति द्वितीया । भुज्यते इति प्राग्वत् ।

१७ । इदमपि निराकरोति *तदपि नेति । तथा तस्य सार्थक्ये आध्यादिष्वपि उक्तन्यायस्य तुल्यत्वेनाग्रे आधिसीमोपेत्यादिमूलवचनेनापवादत्वोक्त्यसङ्गत्यापत्त्या मूलयोर्मिथो विरोधापत्तेरिति भावः । ननूक्तरीत्या पश्यत इत्यनेन सामान्यतो विंशतिवर्षोपभोगोत्तरं सर्वत्र पत्रेषु दोषोद्भावननिराकरणे प्राप्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

आधिसीमोपेत्यनेन विशेषवचनेन तद्विषये तथा न, किं तु तदुत्तरमपि तदुद्भावनं कर्त्तव्यमेवेति बोध्यते इति प्रागुक्तापवादत्वसम्भवेन तस्य कुतो विरोधो मिथ इति चेन्न। वचनान्तरविरोधेनैवं व्यवस्थायाः दुर्वचत्वात्। तदेतदभिप्रेत्य तद्वचनमाह *यथाहेति। तथा च तथा ऽङ्गीकारे कात्यायनादिविरोधोऽन्यथा मिथो विरोधः। सेयमुभयतःस्पाशा रज्जुरिति भावः। *अथेति। आधिसीमापत्रयोरपि तदुत्तरं दोषोद्भावनं न, अपि तु अदृष्टमेवेत्यस्यैतदुभयप्रतिपाद्यत्वेनैतद्विपरीततया मूलवचनयोर्व्यवस्थायामेतद्विरोधः। न चैतद्युक्तं, वक्ष्यमाणप्रकारेणाविरोधेनैवोपपत्तेरिति भावः। *सत्योऽर्थ इति। निर्दुष्टोऽर्थ इत्यर्थः। अन्योऽर्थ इति पाठान्तरम्।

१८। तमेव स्वाभिमतमाह *उच्यते इति। *इह, पश्यत इत्यत्र वचने। *विवक्षितेति। तात्पर्यत इति भावः। अत एवोपपादयति *तथाहीति। निराक्रोशमिति उपभोगक्रियाविशेषणम्। *फलेति। तावत्पर्यन्तं ततस्तेन लब्धेत्यादिः। ननु स्वल्पापराधे महदनिष्टमनुचितमत आह *अस्मादिति। पश्यत इति वाक्याच्चेत्यर्थः। अन्यथैतस्य वैयर्थ्यं स्पष्टमेव। पदकृत्यान्याह *परोक्षेति। *साक्रोशे इति। फलानुसरणं लभते एवेत्यस्यानुषङ्गः। अत्र हेतुमाह *अब्रुवत इति। यतोऽब्रुवत एव फलहानिरतो ब्रुवत आक्रोशं कुर्वतः फलमस्तीति भावः। *निराक्रोशे चेति। फलानुसरणमित्यस्यानुषङ्गः।

१९। इदमप्ययुक्तमिति शङ्कते *नन्विति। *फलस्येति। फलस्यापीत्यर्थः। *तद्धानिरिति। फलहानिरपीत्यर्थः। अस्तु स्वत्वं तथापि विषयाविशेषे फलहानिरुपपन्नैवेत्यर्द्धाङ्गीकारेण परिहरति *बाढमिति। क्व फलहानिर्नास्ति क्वास्तीत्याकाङ्क्षायां यत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

फलं विद्यते त्रत हानिर्न, विपरीते विपरीतमित्याह *तस्येति। फलस्येत्यर्थः। स्वरूपपदं स्पष्टार्थम्। यद्वा स्वरूपतः सर्वांशेनेत्यर्थः। *तदिति। क्षेत्रेत्यर्थः। पूगः क्रमुकः। एवं चायं पूर्वपक्षविषय इति भावः।

२०। प्रकृतवचनविषयमाह *यत्पुनरिति। यत्त्वित्यर्थः। यत्र पुनरिति पाठान्तरम्। *स्वत्वनाश इति। सम्बन्धिनः स्वरूपस्याभावात्सम्बन्धघटकस्वत्वस्य निवृत्तावपीत्यर्थः।*वचनेनेति। चौरेणापहृतं द्रव्यं स्वामिने दापयित्वा ततो यथा राज्ञा दण्डो गृह्यते तद्वत् तादृशोपभोक्तारं पापिष्ठं तं स्वामिने तद्दापयित्वा स्वयं राजा दण्डयेदिति तत्पूर्वकदण्डविधायकेन कात्यायनवचनेनेत्यर्थः। *अपोद्यते, बाध्यते। उक्तवचनबलात्फलमूल्यादिदाने प्राप्ते केवलं फलहानिस्तत्रानेन विधीयते इति तदपवादत्वमस्येति भावः। अत एवाह *राजदण्ड इति। तद्वचनबोधित इत्यर्थः। स्वत्वहेतुः प्रतिग्रहक्रयादिरागमः। वचने तत् क्रियाविशेषणम्। *अपवादेति। तद्वद् एतद्विषये ऽपवादाभावाच्चेत्यर्थः। स्वोक्तमुपसंहरति *तस्मादिति। अन्योपेक्षा नापराध इति सूचयन्नाह *स्वाम्युपेति। *नष्टमिति। स्वरूपत इति भावः। *व्याख्यातमिति। उक्तवत् तस्यापि फलहानिपरतया सुयोजत्वात्॥ २४॥

मि० अस्यापवादमाह।

या० आधिसीमोपनिक्षेपजडबालधनैर्विना।
तथोपनिधि राजस्त्रीश्रोत्रियाणां धनैरपि॥ २५॥

मि० आधिश्च सीमा च उपनिक्षेपश्च आधिसीमोपनिक्षेपाः। जडश्च बालश्च जडबालौ तयोर्धने जडबालधने। आधिसीमोपनिक्षेपाश्च जडबाल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धने च आधिसीमोपनिक्षेपजडबालधनानि। तैर्विना। उपनिक्षेपो नाम रूपसंख्याप्रदर्शनेन रक्षणार्थं परस्य हस्ते निहितं द्रव्यम्।

यथाह नारदः, (व्य० प० २।१)

स्वं द्रव्यं यत्र विस्रंभान्निक्षिपत्यविशाङ्कितः।

निक्षेपो नाम तत्प्रोक्तं व्यवहारपदं बुधैः॥ इति। उपनिधानमुपनिधिः। आध्यादिषु पश्यतोऽब्रुवतोऽपि भूमेर्विंशतेरूर्ध्वं धनस्य दशभ्यो वर्षेभ्य ऊर्ध्वमपि उपचयहानिर्न भवति।पुरुषापराधस्य तथाविधस्याभावात्। उपेक्षाकारणस्य तत्र तत्र संभवात्। तथाहि। आधेराधित्वोपाधिक एव भोग इत्युपेक्षायामपि न पुरुषापराधः। सीम्नश्चिरकृततुषाङ्गारादिचिह्नैः सुसाधत्वादुपेक्षा संभवति। उपनिक्षेपोपनिध्योर्भुक्तेः प्रतिषिद्धत्वात् प्रतिषेधातिक्रमोपभोगे च सोदयफललाभादुपेक्षोपपत्तिः। जडबालयोर्जडत्वाद्बालत्वादुपेक्षा युक्तैव। राज्ञो बहुकार्यव्याकुलत्वात्। स्त्रीणामज्ञानात् अप्रागल्भ्याच्च। श्रोत्रियस्याध्ययनाध्यापनतदर्थविचारानुष्ठानव्याकुलत्वादुपेक्षा युक्तैव। तस्मादाध्यादिषु सर्वत्रोपेक्षाकारणसंभवात् समस्तभोगे निराक्रोशे च न कदाचिदपि फलहानिः॥ २५॥

१। यथाश्रुतप्रकारद्वयेऽप्यनुपपत्तेराह *आधिश्चेत्यादिना। लघ्वक्षरत्वाज्जडस्य पूर्वनिपातः। अत्र द्वन्द्वस्वरूपप्रतिपादने तात्पर्यं न तु क्रमे। तथा च जडेत्यादि संसाध्य तेन सहोपनिक्षेपादिभिस्त्रिभिर्व्युत्क्रमेण त्रिवारं द्वन्द्वः कार्यः। यथाश्रुते तु आधिशब्दस्य घ्यन्तत्वात्पूर्वनिपातसम्भवेऽपि द्वितीयद्वन्द्वे जडेत्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देः पूर्वनिपातः स्यात्। अनित्यत्वं त्वगतिकगतिः। अत उक्तैव गतिन्र्याय्या। उपनिधिना उपनिक्षेपस्य भेदं दर्शयन्नेतदर्थमाह *उपनिक्षेपो नामेति। तथा च रूपसंख्ये अदर्शयित्वा रक्षणार्थं यद्दीयते स उपानिधिः। स्वमुद्राङ्कितग्रन्थिकरणमुभयत्र समानम्। अत एव तत्र भोगाभाव इति बोध्यम्। अत्र उपेत्यविवक्षितमिति सूचयन्नाह *यथाहेति। स्वामित्यस्य यदित्यादिः। *यत्र, परस्तहे। *विस्रम्भात्, विश्वासात्। अनेन रूपसंख्याप्रदर्शनं सूच्यते। अविशङ्कित इत्यनेन रक्षणार्थत्वं सूच्यते। तथोपनिधीति भिन्नं वाक्यम्। सामान्ये नपुंसकम्। विनायोगे द्वितीयैकवचनम्। तद्विना चेत्यर्थः। तद्रूढ्यर्थस्तु उक्तः। योगार्थमाह *उपनिधानमिति। अभ्यार्हितत्वाविवक्षया राजशब्दस्य पूर्वनिपातः। धनैरपीत्यत्र विनेत्यस्यानुषङ्गो बोध्यः। इदं च पूर्ववाक्येन पश्यत इत्यनेनान्वेति। तथा च तदेकवाक्यता शाब्दी।

२। अथ तात्पर्यार्थमाह *आध्यादिष्विति। अब्रुवत इति छेदः। अपिना ऽन्यसमुच्चयः। अग्रिमापिना प्राक्त्वसमुच्चयः। *उपचयेति। फलहानिर्न भवतीत्यर्थः।अत्र हेतुमाह *पुरुषेति। स्वामीत्यर्थः। स्वल्पसत्त्वेऽपि न दोष इत्याह *तथाविधेति। येनेदृशं फलं तादृशेत्यर्थः। अत्र हेतुमाह *उपेक्षेति। *तत्र तत्र, आध्यादिषु। *आधित्वोपाधिक एवेति। आधित्वनिमित्तक एवेत्यर्थः। आधिक्योपाधिक इति पाठान्तरम्। तत्र आधिक्यं वृद्धिः। *चिरकृतेति। पूर्वतरकृतेत्यर्थः। चिरधृतेति पाठान्तरम्। सुसाधत्वादिति पाठः। सुसाधनत्वादिति पाठान्तरम्। मौलक्रमबोधने तात्पर्यादाह *उपनिक्षेपेति। अन्यथाऽल्पाच्तरत्वात्पूर्वनिपाते वैपरीत्यं स्यात्। प्रतिषिद्धत्वादित्यस्योपेक्षोपपत्तिरित्यत्रान्वयः। निधानकाले तत्कृतं प्रतिषेधमुल्लङ्घ्य भो-

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गे क्रियमाणे आह *प्रतिषेधेति। षष्ठीतत्पुरुषपूर्वपदकतृतीयातत्पुरुषः। चो व्युत्क्रमे। फललाभाच्चेत्यर्थः। *व्याकुलत्वादिति। उपेक्षा युक्तैवेत्यस्यानुषङ्गः।एवमग्रेऽपि। *तदर्थेति। विचारानुष्ठानयोर्द्वन्द्वं कृत्वा तदर्थशब्देन षष्ठीतत्पुरुषं कृत्वा पुनस्त्रयाणां द्वन्द्वं कृत्वा तृतीयातत्पुरुष इति भावः। उपसंहरति *तस्मादिति। *कदाचिदिति। विंशतेः पूर्वं तदनन्तरं चेत्यर्थः॥ २५॥

मि० आध्यादिषु दण्डविशेषप्रतिपादनार्थमाह।

या० आध्यादीनां विहर्तारं धनिने दापयेद्धनम्।
दण्डं च तत्समं राज्ञे शक्त्यपेक्षमथापि वा॥ २६॥

मि० आध्यादीनां श्रोत्रियद्रव्यपर्यन्तानां चिरकालोपभोगबलेनापहर्तारं विवादास्पदीभूतं धनं स्वामिने दापयेदित्यनुवादः। दण्डं च तत्समं विवादास्पदीभूतद्रव्यसमं राज्ञे दापयेदिति विधिः। यद्यपि गृहक्षेत्रादिषु तत्समो दण्डो न सम्भवति तथापि—

मर्यादायाः प्रभेदे च सीमातिक्रमणे तथा। (याज्ञ. २।१५५)

इत्यादिवक्ष्यमाणो दण्डो द्रष्टव्यः अथ तत्समदण्डेनापहर्तुर्दमनं न भवति बहुधनत्वेन, तदा शक्त्यपेक्षं धनं दापयेत्। यावता तस्य दर्पोपशमो भवति तावद्दापयेत्। दण्डो दमनादित्याहुस्तेनादान्तान् दमयेदिति दण्डग्रहणस्य दमनार्थत्वात्। यस्य तु तत्सममपि द्रव्यं नास्ति सोऽपि यावता पीड्यते तावद्दाप्यः। यस्य पुनः किमपि धनं नास्ति असौ धिग्दण्डादिना दमनीयः।

तथाच मनुः, (अ० ८।१२९)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धिग्दण्डं प्रथमं कुर्याद्वाग्दण्डं तदनन्तरम्।
तृतीयं धनदण्डं तु वधदण्डमतः परम्॥

वधदण्डोऽपि शारीरो ब्राह्मणव्यतिरिक्तानां दशधा दर्शितः।

यथाह मनुः, (अ० ८।१२४।१२४)

दश स्थानानि दण्डस्य मनुः स्वायम्भुवोऽब्रवीत्।
त्रिषु वर्णेषु यानि स्युरक्षतो ब्राह्मणो व्रजेत्॥
उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम्।
चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च॥ इति।

एतेषां यन्निमित्तोऽपराधस्तत्रैवोपस्थादौ निग्रहः कार्य इति द्रष्टव्यम्। कर्म वा कारयितव्यो बन्धनागारं वा प्रवेशयितव्यः।

यथोक्तं कात्यायनेन,

धनदानासहं बुध्वा स्वाधीनं कर्म कारयेत्।
अशक्तौ बन्धनागारं प्रवेश्यो ब्राह्मणादृते॥ इति।

ब्राह्मणस्य पुनर्द्रव्याभावे कर्मवियोगादीनि प्रयोज्यानि।

यथाह गौतमः, कर्मवियोगविख्यापननिर्वासनाङ्ककरणादीन्यवृत्ताविति।

नारदेनापि, (व्य० प० १४। श्लो०८।९।१०)

वधः सर्वस्वहरणं पुरान्निर्वासनाङ्कने।
तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसः॥
अविशेषेण सर्वेषामेष दण्डविधिः स्मृतः।

इत्युक्त्वोक्तम्,

वधादृते ब्राह्मणस्य न वधं ब्राह्मणोऽर्हति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिरसो मुण्डनं दण्डस्तस्य निर्वासनं पुरात्।
ललाटे चाभिशस्ताङ्कः प्रयाणं गर्दभेन च॥ इति।
अङ्कने च व्यवस्था दर्शिता, (मनु० ९।२३७)
गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः।
स्तेये तु श्वपदं कार्यं ब्रह्महण्यशिराः पुमान्॥ इति।

यत्तु चक्षुर्निरोधो ब्राह्मणस्येत्यापस्तम्बेनोक्तम्, ब्राह्मणस्य पुरान्निर्वासनसमये वस्त्रादिना चक्षुर्निरोधः कर्तव्य इति तस्यार्थो, न चक्षुरुद्धरणम्। "अक्षतो ब्राह्मणो व्रजेत्" "न शारीरो ब्राह्मणे दण्ड" इत्यादिमनुगौतमवचनादिविरोधात्। इत्यलं प्रसङ्गेन॥२६॥

बा० १। *आध्यादिषु, अपह्रियमाणेषु। अव्यवहितग्रहणसम्भवे व्यवहितग्रहणे मानाभावादाह *श्रोत्रियेति। अपहारे निमित्तमाह *चिरेति। धनामित्यस्यार्थमाह *विवादेति। *अनुवाद इति। निह्नवे भावितो दद्यादित्यनेनैवास्यार्थस्य विहितत्वेन दानेनैव दापनस्याप्याक्षिप्तत्वादिति भावः।

२। तृतीयपादार्थमाह *दण्डं चेति। तत्सममित्यस्य व्याख्या *विवादेति। अनुषङ्गेणाह *दापयेदिति। *विधिरिति प्राड्विवाकादेरिति शेषः।

३। नन्वयमपि विधिर्न, निह्नवे इत्यत्र राज्ञे च तत्सममित्यनेनैव प्रकृतधनसमदण्डस्यापि विहितत्वादिति चेन्न। तस्य ऋणादानमात्रविषयत्वेनासर्वविषयत्वेन प्रकृतेऽप्राप्तेः। सर्वविषयत्वेऽपि तत्र तत्र विहितदण्डस्य राज्ञे च तत्सममित्यनेनानुवादात्। अतो न दोषः। प्रतिपादितमिदं तत्रैव। तदेतद्ध्वनयन्नेवाह *यद्यपीति। गृहान्तरादिरूपदण्डदानस्यासम्भवं नाशक्यत्वात्। यद्यपि शक्तस्यास्ति सम्भवस्तथापि साम्यं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्थटम् । तथाच आध्यादिसर्वविषयत्वमेतस्यानुपपन्नमिति भावः । आदिना—

क्षेत्रस्य हरणे दण्डा अधमोत्तममध्यमाः। (या.व.व्य.श्लो. १५५)

इत्युत्तरार्धपरिग्रहः । *दण्ड इति । तत्रेति शेषः । तथा च तत्सममित्यनेन तादृशे स्थले वक्ष्यमाण एव मूल्यसाम्यद्वारा दापनीयत्वेनास्य दण्डो विधीयते इति भावः । नन्वेवमत्राग्रे चैकस्यैवार्थस्य विधानादन्यतरस्याविधित्वं स्यादिति चेन्न।वक्ष्यमाणस्थले दण्डस्वरूपाविधिरत्र तु प्राप्तदण्डानुवादेन दापनविधिरित्येवमुभयत्र विधिसम्भवात् ।

४ । तुर्यपादार्थमाह *अथेति । बह्विति पूर्वान्वयि । शक्त्यपेक्षत्वस्य मर्यादामाह *यावतेति। एतल्लाभोपायमाह *दण्ड इति। *तेन, दण्डेन । *दण्डेति । अत्र गौतमीये दण्डग्रहणस्य दमनार्थत्वस्योक्तत्वात् इत्यर्थः । तथा च तस्य योगरूढत्वेन योगवशेन तल्लब्धमिति भावः । अनेनैवाधिकस्येव न्यूनस्यापि विनिगमकाभावात्तथोक्त्या संग्रह इत्याह *यस्य त्विति । एवमेवानेनैव लब्धं विशेषान्तरमाह * यस्य पुनरिति । यस्य त्वित्यर्थः । ननु धिग्दण्डादेर्दण्डत्वमेवादावसिद्धं, सिद्धेऽपि वा दण्डत्वे तद्विधिः कुतो ऽत्रगम्यते इत्यत आह * तथा चेति । धिग्दण्डो धिक् धिगिति कुत्सनम् । वाग्दण्डः परुषवाक्यवचनात्मकः । धनदण्डो धनापहारः । वधदण्डः शारीरो बन्धरोधादिर्जीवितवियोगान्तः ।

५ । एते च चतुर्विधा दण्डा व्यस्ता एकैकशः, समस्ता द्वित्रास्त्रिचतुरा वा अपराधानुसारेण प्रयोक्तव्याः । तदुक्तं—

मनुना, (अ. ८ । श्लो. १३० ।)

वधेनापि यदा त्वेतान्निग्रहीतुं न शक्नुयात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदैषु सर्वमप्येतत्प्रयुञ्जीत चतुष्टयम् ॥ इति ।

* वधेनापि, ताडनेनापि। अपिरन्यसमुच्चये । उक्तक्रमेण पूर्व-पूर्वासाध्ये उत्तरःउत्तरः प्रयोक्तव्यः। तथा चात्र प्रथमतदनन्तर-तृतीयातःपरशब्दा धिग्दण्डवाग्दण्डधनदण्डवधदण्डानां मध्ये पूर्वपूर्वापेक्षयोत्तरोत्तरस्याधिक्यप्रतिपादका न तु सर्वेष्वप्यपराधेषु प्रथमादिक्रमेण कर्त्तव्यताप्रतिपादका इति बोध्यम् । अयं पाठः प्रागुक्तस्य धिग्दण्डस्त्वथेति मूलस्य संवादी ।

६ । मेधातिथिना तु आद्ययोर्व्यत्ययेन पाठं धृत्वा यो गुण-वानीषत्प्रथममेवापराधं कृतवान् स वाचा निर्भर्त्स्यः, साधु गुणवानसि मा पुनरेवं कार्षीरिति । तथोच्यमानो यदि ततो न निवर्त्तते तदा धिग्दण्डेन कुत्साविशिष्टैः परुषवचनैर्निर्भर्त्स्यः। एवमग्रेऽपीति व्याख्यातम् ।

७ । नारदेन तु दण्डद्वैविध्यमुक्तम् । तथाहि,

शारीरश्चार्थदण्डश्च दण्डस्तु द्विविधः स्मृतः ।
शारीरस्ताडनादिस्तु मरणान्तः प्रकीर्त्तितः ॥
काकिण्यादिस्त्वर्थदण्डः सर्वस्वान्तस्तथैव च । इति ।

द्विविधोऽप्यपराधानुसारेणानेकधा भवति । आह स्म स एव,
शारीरो दशधा प्रोक्तो ह्यर्थदण्डस्त्वनेकधा । इति ।

इदं च दण्डकथनम् ब्राह्मणादिसर्वविषयम् । न च राज सर्वस्येष्टे ब्राह्मणवर्जमिति गौतमान्न ब्राह्मणा दण्ड्या इति वा

१ इमौ श्लोकौ नारदस्मृतौ परिशिष्टभागे उपलभ्येते । शारी श्चार्थदण्डश्चेत्यस्योत्तरार्धः शारीरो दशधा प्रोक्त इति अग्रे वर्तते ५३। ५४ श्लोकौ । शारीरस्ताडनादिरिति श्लोकेऽपि पूर्वार्धोत्तर र्धयोः विपर्यासो दृश्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च्यम् । तस्य प्रशंसार्थत्वात् । न चैवं षड्भिः परिहार्यो राज्ञेति प्रागुक्तस्वोक्तिविरोध इति वाच्यम् । अस्यैतदव्यवहितपूर्वतनेन स्वेनैव "स एष बहुश्रुतो भवति लोकवेदवेदाङ्गविद्वाकोवाक्येतिहासपुराणकुशलस्तदपेक्षस्तद्वृत्तिश्चाष्टाचत्वारिंशता संस्कारैः संस्कृतस्त्रिषु कर्मस्वभिरतः षट्सु वा सामयिकाचारिकेष्वभिविनीत" इत्यनेन प्रतिपादितबहुश्रुतविषयत्वेन ब्राह्मणमात्रविषयत्वाभावात् । प्रतिपादितमिदमधस्तात् व्याख्यातं च ।

८ । तदेतत् ध्वनयन्विशेषमाह *वधदण्डोऽपीति । *ब्राह्मणव्यतिरिक्तानां, ब्राह्मणव्यतिरिक्तानां तु । क्वचित्तथैव पाठः । अत्र क्वचिद्वधदण्डोऽपि शारीरो ब्राह्मणव्यतिरिक्तानां नवधा दर्शित इति पाठः । स च वक्ष्यमाणाद्यव्याख्यानानुकूलः । आद्यपाठस्तु द्वितीयव्याख्यानानुकूलो दश स्थानानीत्युक्तिस्वरससिद्धः । शारीरो दशधा प्रोक्त इति नारदसंवादी चेति बोध्यम्[१] । तत्र मानमाह *यथाहेति । त्रिषु क्षत्रियवैश्यशूद्रेषु वर्णेषु यानि दण्डस्य स्थानानि तानि दश सोऽब्रवीदित्यर्थः । इदमुपलक्षणमनुलोमादेरपि । तदेतत् ध्वनयन्नाह *अक्षत इति । शारीरसकलवधदण्डरहित इत्यर्थः । *व्रजेत्, राजगृहात् पुराद्वा । *पश्चमं,स्थानम् । अव्यवहितेनान्वेति । स्थानशब्दोऽत्र विषयपरः । तत्तत्प्रदेशे पीडनीय इति तात्पर्यम् । न च धनदण्डस्य पृथग्विहितत्वाच्छारीरभेदमध्ये तदुक्तिः पुनरयुक्ता ऽसम्बद्धा चेति वाच्यम् । धनकृतापराधे तद्दण्ड एव नान्य इत्येतदर्थं पुनस्तदुक्तेः । तन्मध्ये लेखस्तु तत्तुल्यत्वप्रतिपादनाय । यद्वा तत्पीडया शरीरपीडापरो ऽयमन्य एव ततो धनदण्डादिति प्रकारान्तरमत्र मेधातिथिनोक्तं, तत् तत एव बोध्यम् ।

१ एतच्चिह्नमध्यस्थः पाठः पुस्तकान्तरेऽस्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

९। अव्यवस्थानिरासायोक्तेस्तात्पर्यमाह *एतेषां चेति। उपस्थादीनां मध्ये इत्यर्थः। उपस्थमत्र स्त्रीपुंसयोः प्रजनोत्पादकम्। यत्र च दण्डविशेषो नाम्नातस्तत्र यस्य यत्कृतापराधस्स तत्रैव पीडनीयः। तत्रागम्यागमने उपस्थनिग्रहः। अभक्ष्यभक्षणे उदरनिग्रह आहारनिवृत्त्यादिना। वाग्दण्डपारुष्ये जिह्वायाः। स च छेदः। चौर्ये हस्तयोः। पादजे बलवद्व्यतिक्रमात् पादयोः। राजदारादिद्दक्षायां चक्षुषोः। तदनुलेपनाद्याजिघ्रतो नासिकायाः। राजादिरहस्यं भित्त्याद्यन्तरे शृण्वतः कर्णयोः। महापातकिनो मारणे देहस्येति बोध्यम्।

१०।ननु आध्याद्यपहारे महादोषे अकिञ्चनस्य धिग्दण्डाद्युक्तमयुक्तं, तस्य स्वल्पापराधविषयत्वात्, अतः तत्रैव पक्षान्तरमप्याह *कर्मेति। अत्र क्रमोऽप्येवमेव बोध्यः। मेधातिथ्युक्तेः, अग्रेऽशक्तावित्युक्तेश्च। अत्र मानमाह *यथोक्तमिति। *धनेति। सर्वथा धनदानाक्षमं ज्ञात्वा स्वाधीनं कर्म कारयेदित्यर्थः। *अशक्तौ, कर्मकरणाशक्तौ। ब्राह्मणादृते इति उभयोः शेष इति ध्वनयन्नाह *ब्राह्मेति। *पुनः, तु। अधिकरणस्य शेषत्वविवक्षया षष्ठी, प्रयोज्यानीत्यस्य कर्त्तव्यानीत्यर्थो वा। *अवृत्ताविति। अवृत्तौ दुराचारेऽन्यायिनि ब्राह्मणे स्वव्यापारनिरोधान्यायप्रख्यापनादीनि कर्त्तव्यानीत्यर्थः। ब्राह्मणे इति प्रकृतत्वाल्लब्धम्। *नारदेनापीति। उक्तोक्तमित्यत्रान्वयः। वधः प्राणवियोगानुकूलव्यापारः। निर्वासनेत्यस्य नित्यसापेक्षत्वेन पुरादिति विशेषणान्विततत्वेऽपि समासः। *तदङ्गेति। यदङ्गकृतोऽपराधस्तदङ्गेत्यर्थः। *वधादृते इति। एष दण्डविधिः स्मृत इत्यस्यानुषङ्गः। तदेव विशदयति *न वधमिति।

११। वधानुकल्पमाह *शिरस इति। अत एव—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मनुः, (अ. ८।)
अब्राह्मणः सङ्ग्रहणे प्राणान्तं दण्डमर्हति। (श्लो. ३५९।)
मौण्ड्यं प्राणान्तिको दण्डो ब्राह्मणस्य विधीयते।
इतरेषां तु वर्णानां दण्डः प्राणान्तिको भवेत्॥ (श्लो. ३७९)
न जातु ब्राह्मणं हन्यात्सर्वपापेष्ववस्थितम्।
राष्ट्रादेनं बहिः कुर्यात्समग्रधनमक्षतम्॥ (श्लो. ३८०।)
न ब्राह्मणवधाद् भूयानधर्मो विद्यते भुवि।
तस्मादस्य वधं राजा मनसाऽपि न चिन्तयेत्॥ इति।
श्लो. ३८१।

यमोऽपि,
सर्वेषामेव वर्णानामन्योन्यस्यापराधिनाम्।
शारीरं धनसंयुक्तं दण्डं धर्म्यं प्रकल्पयेत्॥
जगत्सर्वमिदं हन्यात् ब्राह्मणस्य न तत्समम्।
तस्मात्तस्य वधं राजा मनसाऽपि न चिन्तयेत्॥
अवध्यान् ब्राह्मणान् प्राहुः सर्वपापेष्ववस्थितान्।
यद्यद्विप्रेषु कुशलं तत्तद्राजा समाचरेत्॥ इति।
सुमन्तुरपि,
नाततायिवधे दोषोऽन्यत्र गोब्राह्मणवधादिति।
बृहस्पतिरपि,
महापातकयुक्तोऽपि न विप्रो वधमर्हति।
निर्वासनाङ्कने मौण्ड्यं तस्य कुर्यान्नराधिपः॥ इति।
वधादृते ब्राह्मणस्य दण्डो भवति कर्हिचित्।
अवध्या ब्राह्मणा गावो लोके ऽस्मिन्वैदिकी स्मृतिः॥
इति स्मृत्यन्तरमपि।
१२। *पुरादिति। अत एव—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मनुः (अ. ९। श्लो. २३८। २३९)
असम्भोज्या असंयाज्या असम्पाठ्याविवाहिनः।
चरेयुः पृथिवीं दीनाः सर्वधर्मबहिष्कृताः॥
ज्ञातिसम्बन्धिभिस्त्वेते त्यक्तव्याः कृतलक्षणाः।
निर्दया निर्नमस्कारास्तन्मनोरनुशासनम्॥ इति।
१३। *ललाटे चेति। अत एव
बृहस्पतिः,
हस्ताङ्घ्रिलिङ्गनयनं जिह्वा कर्णौ च नासिका।
ग्रीवा पादार्द्धसन्दंशं ललाटौष्ठं गुदं कटिः॥
स्थानान्येतानि दण्डस्य निर्दिष्टानि चतुर्दश।
ललाटेऽङ्को ब्राह्मणस्य नान्यो दण्डो विधीयते॥ इति।
१४। *प्रयाणमिति। अत एव—
यमः,
ब्राह्मणस्यापराधेषु चतुर्ष्वेव विधीयते।
शिरसो मुण्डनं दण्डः पुरान्निर्वासनं तथा॥
प्रख्यापनार्थं पापस्य प्रयाणं गर्दभेन च।
ललाटे चाङ्ककरणं कुर्याद्राजा यथाविधि॥ इति।
*दर्शितेति। मनुनेति शेषः। *गुर्विति।
ब्रह्महा च सुरापश्च स्तेयी च गुरुतल्पगः।
एते सर्वे पृथक् ज्ञेया महापातकिनो नराः॥ (अ. ९। २३५।
चतुर्णामपि चैतेषां प्रायश्चित्तमकुर्वताम्।
शारीरं धनसंयुक्तं दण्डं धर्म्यं प्रकल्पयेत्॥ २३६ इत्यादि।
*सुरेति। सुरासम्बन्धी यो ध्वजः स कार्य इत्यर्थः।
*श्वपदं, शुनः पदम्। अशिराः कबन्धः।
ब्राह्मणस्य च ब्रह्महत्यागुरुतल्पसुवर्णस्तेयसुरापानेषु क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्धभगश्वपद्ध्वजांस्तप्तेनायसेन ललाटेऽङ्कयित्वा विषयान्ते निर्वासनमिति बौधायनः।

ब्राह्मणस्यापराधेषु चतुर्ष्वङ्को विधीयते।
गुरुतल्पे सुरापाने स्तेये ब्राह्मणहिंसने॥
गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः।
स्तेये तु श्वपदं कृत्वा शिखिपित्तेन पूरयेत्॥
विशिराः पुरुषः कार्यो ललाटे द्विजघातिनः।
असम्भाष्यस्तु कर्त्तव्यस्तन्मनोरनुशासनम्॥ इति नारदः।
व्य. प. १८। श्लो. (४३। ४४। ४५।)

शिलाञ्जनं शिखिग्रीवमित्यमरः। अस्यापवादोऽपि मनुनोक्तः, (अ. ९। श्लो. २४०। २४१)

प्रायश्चित्तं तु कुर्वाणाः सर्वे वर्णा यथोदितम्।
नाङ्क्या राज्ञा ललाटे स्युर्दाप्यास्तूत्तमसाहसम्॥
आगःसु ब्राह्मणस्यैव कार्यो मध्यमसाहसः।
निर्वास्यो वा भवेत् राष्ट्रात्सद्रव्यः सपरिच्छदः॥ इति।

परिच्छदशब्देन पुत्रदारभृत्यहस्त्यश्वादिसम्पदुच्यते। सपरिग्रह इति पाठान्तरेऽप्येवम्। तदङ्गच्छेदोऽपि ब्राह्मणस्य नास्तीति प्रतिपादयन् विरोधं परिहरति *यत्त्विति। *आपस्तम्बेनोक्तमिति। आपस्तम्बवचनमिति पाठान्तरम्। *न चक्षुरुद्धरणमिति। न चक्षुषोरुद्धरणं तस्यार्थ इत्यर्थः। क्वचित्तथैव पाठः। मनुं प्रागुक्तमाह *अक्षत इति। गौतममाह *न शारीरो ब्राह्मणे दण्ड इति। प्रथमादिना प्रागुक्तमनुगौतमवचनान्तरपरिग्रहः। द्वितीयादिना—

न त्वङ्गभेदं विप्रस्य प्रवदन्ति मनीषिणः।
तपसा चेज्यया चैव ब्राह्मणः पूयते सदा॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति हारीतस्य,

सर्वत्र त्रयाणां वर्णानां धनहारको वधबन्धक्रियारूपयोगो महत्स्वपि पातकेषु विवासकरणं ब्राह्मणस्य प्रायश्चित्तानि वा शोधनम् अपीड्यो हि ब्राह्मण इति शङ्खलिखितयोः, प्रागुक्तस्मृतीनां च परिग्रहः। सर्वस्वहरणमपि ब्राह्मणस्य नास्ति। सद्रव्यः सपरिच्छद इत्यग्रे—

इतरे कृतवन्तस्तु पापान्येतान्यकामतः।
सर्वस्वहारमर्हन्ति कामतस्तु प्रवासनम्॥

इति मनूक्तेः। (अ. ९।२४२।)

त्रयाणां वर्णानां धनापहारवधबन्धनक्रियाविवासनाङ्ककरणं, न ब्राह्मणस्येति शङ्खोक्तेश्च। तत्र धनापहारः सर्वस्वापहारो विवक्षितो वधसाहचर्यात्। शारीरस्त्ववरोधादिरिति प्रागुक्तनारदीये वधसर्वस्वहरणयोः पाठाच्चेति। तस्मात् ब्राह्मणस्य शारीरः सर्वोऽपि दण्डो नास्ति कदाचिदपि। प्रागुक्तस्मृतिकदम्बात्।

आचार्यं च प्रवक्तारं पितरं मातरं गुरुम्।
न हिंस्यात् ब्राह्मणान् गाश्च सर्वांश्चैव तपस्विनः॥

(म. अ. ४। श्लो. १६२।)

इति मनूक्तेश्च। धनदण्डमध्ये सर्वस्वहरणं नास्ति। तदन्यधनदण्डस्त्वस्त्येव। समग्रधनमिति तु कृतसाहसविषयम्। ब्राह्मणे साहसः पूर्व इति मनूक्तमप्येवम्। तथा च धिग्दण्डवाग्दण्डौ मौण्ड्यं यत्किञ्चिदर्थदण्डो विवासनाङ्ककरणगर्दभप्रयाणानि च पर्यवसितानि। इदमपि प्रायश्चित्तानिच्छोः। तदिच्छोस्तु तदेव नैतत्। एवं बहुश्रुतस्यापि न किञ्चित्। किं तु स्वयमेव निष्कृतिं कुर्यात्। साऽपि स्वल्पा प्रायश्चित्तप्रकरणे स्फुटी भविष्यति। अत एवात्रापि साक्षिप्रकरणे मूले उक्तम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(या. अ. २ । श्लो. ८१ । ८२ ।)

पृथक् पृथक् दण्डनीयाः कूटकृत्साक्षिणस्तथा ।
विवादात् द्विगुणं दण्डं विवास्यो ब्राह्मणः स्मृतः ॥
यः साक्ष्यं श्रावितोऽन्येभ्यो निह्नुते तत्तमोवृतः ।
स दाप्योऽष्टगुणं दण्डं ब्राह्मणं तु विवासयेत् ॥ इति ।

स्तेयप्रकरणेऽपि, (या. अ. २ । श्लो. २७० ।)

सचिह्नं ब्राह्मणं कृत्वा स्वराष्ट्राद्विप्रवासयेत् ।

इत्युक्तम् । मनुनाऽप्युक्तं, (अ. ८ । श्लो. १२३ ।)

कौटसाक्ष्यं तु कुर्वाणांस्त्रीन्वर्णान्धार्मिको नृपः ।
प्रवासयेद्दण्डयित्वा ब्राह्मणं तु विवासयेत् ॥ इति ।

अस्यार्थोऽग्रे स्फुटीभविष्यति । अत्र प्रवासः ओष्ठच्छेदनं जिह्वाछेदनं प्राणवियोजनं चेति यथायथं बोध्यम् । विवासो निष्कासनं नग्नीकरणं वा गृहभङ्गो वेति यथायथं बोध्यम् । तत्रेयं व्यवस्था । लोभादिकारणविशेषपरिज्ञाने ऽनभ्यासे च ब्राह्मणस्यापि तत्र तत्रोक्तो ऽर्थदण्ड एव अभ्यासे त्वर्थदण्डो विवासनं च। तत्रापि जातिद्रव्यानुबन्धाद्यपेक्षया विवासनं नग्नीकरणं गृहभङ्गो देशान्निर्वासनं चेति व्यवस्था द्रष्टव्या । लोभादिकारणविशेषापरिज्ञाने ऽभ्यासे चाल्पविषये कौटसाक्ष्ये ब्राह्मणस्यापि क्षत्रियादिवदर्थदण्ड एव । महाविषये तु देशान्निर्वासनमेव । अत्राप्यभ्यासे सर्वेषामेव मनूक्तं बोध्यम् । अकिञ्चनस्य तु तस्य निमित्ततारतम्येन मौण्ड्याङ्ककरणगर्दभप्रयाणाधिग्दण्डवाग्दण्डाः क्रमेण बोध्या इति । न च समग्रधनमित्याद्युक्त्या ब्राह्मणस्यार्थदण्डो नास्तीति वाच्यम् । अर्थदण्डाभावे शारीरदण्डे च निषिद्धे स्वल्पेऽप्यपराधे सधनस्य नग्नीकरणगृहभङ्गाङ्ककरणविप्रवासनं दण्डाभावो वा प्रसज्येत यतः । चतुर्णामपीति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रागुक्तस्मृतेः,

सहस्रं ब्राह्मणो दण्ड्यो गुप्तां विप्रां बलाद् व्रजन् ।

इति स्मृतेश्चेति दिक् । एवं कर्मकारणबन्धनागारप्रवेशावपि ब्राह्मणस्य नेति सिद्धम् । तदेतदभिप्रेत्याह *इत्यलं प्रसङ्गेनेति ॥ २६ ॥

मि० स्वत्वाव्यभिचारित्वेन भोगस्य स्वत्वे प्रामाण्यमुक्तम् । भोगमात्रस्य स्वत्वव्यभिचारित्वात् कीदृशो भोगः प्रमाणमित्यत आह ।

या० आगमोऽभ्यधिको भोगाद्विना पूर्वक्रमागतात् ।

मि० स्वत्वहेतुः प्रतिग्रहक्रयादिरागमः । स भोगादप्यधिको बलीयान् । स्वत्वबोधने भोगस्यागमसापेक्षत्वात् ।

यथाह नारदः । (व्य० प० १ श्लो० ८५)

आगमेन विशुद्धेन भोगो याति प्रमाणताम् ।
अविशुद्धागमो भोगः प्रामाण्यं नैव गच्छति ॥ इति ।

न च भोगमात्रात्स्वत्वावगमः । परकीयस्याप्यपहारादिनोपभोगप्रसङ्गात् । अत एव—

भोगं केवलतो यस्तु कीर्तयेन्नागमं क्वचित् ।
भोगच्छलोपदेशेन विज्ञेयः स तु तस्करः ॥

इति स्मर्यते । (ना० व्य० प० १।८६)

अतश्च सागमो दीर्घकालो निरन्तरो निराक्रोशः प्रत्यर्थिप्रत्यक्षश्चेतिपञ्चविशेषणयुक्तो भोगः प्रमाणमित्युक्तं भवति ।

तथा च स्मर्यते,

सागमो दीर्घकालश्चाविच्छेदोऽपरवोज्झितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रत्यर्थिसंनिधानोऽपि परिभोगोऽपि पञ्चधा ॥इति।

क्वचिच्चागमनिरपेक्षस्यापि भोगस्य प्रामाण्यमित्याह *विना पूर्वक्रमागतादिति । पूर्वेषां पित्रादीनां त्रयाणां क्रमः पूर्वक्रमः तेनागतो यो भोगस्तस्माद्विना, आगमोऽभ्यधिक इति संबन्धः । स पुनरागमादभ्यधिकः आगमनिरपेक्षः प्रमाणमित्यर्थः । तत्राप्यागमज्ञाननिरपेक्षो न सत्तानिपेक्षः । सत्ता तु तेनैवावगम्यते इति बोद्धव्यम् । विना पूर्वक्रमागतादित्येतच्च अस्मार्तकालप्रदर्शनार्थम् । आगमोऽभ्यधिको भोगादिति च स्मार्तकालविषयम् । अतश्च स्मरणयोग्ये काले योग्यानुपलब्ध्या आगमाभावनिश्चयसंभवादागमज्ञानसापेक्षस्यैव भोगस्य प्रामाण्यम् । अस्मार्ते तु काले योग्यानुपलब्ध्यभावेनागमाभावनिश्चयासम्भवादागज्ञाननिरपेक्ष एव संततो भोगः प्रमाणम् । एतदेव स्पष्टीकृतम्—

कात्यायनेन,

स्मार्तकाले क्रिया भूमेः सागमा भुक्तिरिष्यते ।
अस्मार्तेऽनुगमाभावात्क्रमात्त्रिपुरुषागता ॥ इति ।

स्मार्तश्च कालो वर्षशतपर्यन्तः । शतायुर्वै पुरुष इति श्रुतेः । अनुगमाभावादिति योग्यानुपलब्ध्यभावेनागमाभावनिश्चयाभावादिति । अतश्च वर्षशताधिको भोगः संततोऽप्रतिरवः प्रत्यक्षश्चागमाभावे चानिश्चिते अव्यभिचारादाक्षिप्तागमः स्वत्वं गमयति। अस्मार्तेऽपि कालेऽनागमस्मृतिपरम्परायां सत्यां न भोगः प्रमाणम् । अत एव—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनागमं तु यो भुङ्क्ते बहून्यब्दशतान्यपि ।
चौरदण्डेन तं पापं दण्डयेत्पृथिवीपतिः ॥

इत्युक्तम् । न चानागमं तु यो भुङ्क्ते इत्येकवचननिर्देशाद् बहून्यब्दशतान्यपीति अपिशब्दप्रयोगात् प्रथमस्य पुरुषस्य निरागमे चिरकालोपभोगेऽपि दण्डविधानमिति मन्तव्यम् । द्वितीये तृतीये वा पुरुषे निरागमस्य भोगस्य प्रामाण्यप्रसङ्गात् । न चैतदिष्यते ।

आदौ तु कारणं दानं मध्ये भुक्तिस्तु सागमा ।

इति नारदस्मरणात् । (नोपलब्धम् ।)

तस्मात्सर्वत्र निरागमोपभोगे अनागमं तु यो भुङ्क्ते इत्येतत् द्रष्टव्यम् । यदपि—

अन्यायेनापि यद् भुक्तं पित्रा पूर्वतरैस्त्रिभिः ।
न तच्छक्यमपाहर्तुं क्रमात्त्रिपुरुषागतम् ॥

इति, तदपि पित्रा सह पूर्वतरैस्त्रिभिरिति योज्यम् । तत्रापि क्रमात् त्रिपुरुषागतमित्यस्मार्तकालोपलक्षणम् । त्रिपुरुषविवक्षायामेकवर्षाभ्यन्तरेऽपि पुरुषत्रयातिक्रमसम्भवात् द्वितीये वर्षे निरागमस्य भोगस्य प्रामाण्यप्रसङ्गात् । तथा सति—

स्मार्तकाले क्रिया भूमेः सागमा भुक्तिरिष्यते ।

इति स्मृतिविरोधः । अन्यायेनापि यद् भुक्तमित्येतच्च अन्यायेनापि भुक्तमपहर्तुं न शक्यम् किंपुनर्न्यायानिश्चये इति व्याख्येयम् । अपिशब्दश्रवणात् ।

यच्चोक्तं हारीतेन,

यद्विनाऽऽगममत्यन्तं भुक्तं पूर्वैस्त्रिभिर्भवेत् ।
न तच्छक्यमपाहर्तुं क्रमात्त्रिपुरुषागतम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति, तत्राप्यत्यन्तमागमं विनेति अत्यन्तमुपलभ्यमानमागमं विनेति व्याख्येयम्, न पुनरागमस्वरूपं विनेति । आगमस्वरूपाभावे भोगशतेनापि न स्वत्वं भवतीत्युक्तम् । क्रमात्त्रिपुरुषागतमित्येतत् उक्तार्थम् । ननु स्मरणयोग्ये काले भोगस्यागमसापेक्षस्य प्रामाण्यमनुपपन्नम् । तथाहि । यद्यागमः प्रमाणान्तरेणावगतस्तदा तेनैव स्वत्वावगमान्न भोगस्य स्वत्वे आगमे वा प्रामाण्यम् । अथ प्रमाणान्तरेणागमो नावगतः कथं तद्विशिष्टो भोगः प्रमाणम् । उच्यते । प्रमाणान्तरेणावगतागमसहित एव निरन्तरो भोगः कालान्तरे स्वत्वं गमयति । अवगतोऽप्यागमो भोगरहितो न कालान्तरे स्वत्वं गमयितुमलम् । मध्ये दानविक्रयादिना स्वत्वापगमसम्भवादिति सर्वमनवद्यम् ।

आगमसापेक्षो भोगः प्रमाणमित्युक्तम् । आगमस्तर्हि भोगनिरपेक्ष एव प्रमाणमित्यत आह ।

या० आगमेऽपि बलं नैव भुक्तिः स्तोकाऽपि यत्र नो॥२७॥

यस्मिन्नागमे स्वल्पाऽपि भुक्तिर्नास्ति तस्मिन्नागमे बलं सम्पूर्णं नैवास्ति । अयमभिसन्धिः । स्वस्वत्वनिवृत्तिः परस्वत्वापादनं च दानम् । परस्वत्वापादनं च परो यदि स्वीकरोति तदा सम्पद्यते नान्यथा । स्वीकारश्च त्रिविधः, मानसो वाचिकः कायिकश्चेति । तत्र मानसो ममेदमिति सङ्कल्परूपः । वाचिकस्तु ममेदमित्याद्यभिव्याहारोल्लेखी सविकल्पः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रत्ययः । कायिकः पुनरुपादानाभिमर्शनादिरूपोऽनेकविधः ।

तत्र च नियमः स्मर्यते,

दद्यात्कृष्णाजिनं पृष्ठे गां पुच्छे करिणं करे ।
केसरेषु तथैवाश्वं दासीं शिरसि दापयेत् ॥ इति ।

आश्वलायनोऽप्याह,

अनुमन्त्रयेत प्राण्यभिमृशेदप्राणि कन्यां चेति । तत्र हिरण्यवस्त्रादावुदकदानानन्तरमेवोपादानादिसम्भवात् त्रिविधोऽपि स्वीकारः सम्पद्यते । क्षेत्रादौ पुनः फलोपभोगव्यतिरेकेण कायिकस्वीकारासम्भवात् स्वल्पेनाप्युपभोगेन भवितव्यम् । अन्यथा दानक्रियादेः सम्पूर्णता न भवतीति फलोपभोगलक्षणकायिकस्वीकारविकल आगमो दुर्बलो भवति तत्सहितादागमात् । एतच्च द्वयोः पूर्वापरकालापरिज्ञाने । पूर्वापरकालपरिज्ञाने तु विगुणोऽपि पूर्वकालागम एव बलीयानिति ।

अथवा ।

लिखितं साक्षिणो भुक्तिः प्रमाणं त्रिविधम् इत्युक्तम् । एतेषां समवाये कुत्र कस्य वा प्राबल्यमित्यत्रेदमुपतिष्ठते,

आगमोऽभ्यधिको भोगाद्विना पूर्वक्रमागतात् ।
आगमेऽपि बलं नैव भुक्तिः स्तोकाऽपि यत्र नो ॥ इति

अयमर्थः । आद्ये पुरुषे साक्षिभिर्भावित आगमो भोगादभ्यधिको बलवान् । पूर्वक्रमागताद्भोगाद्विना । स पुनः पूर्वक्रमागतो भोगश्चतुर्थपुरुषालिखितेन भावि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तादागमाद् बलवान्। मध्यमे तु भोगरहितादागमात्स्तोकभोगसहितोऽप्यागमो बलवानिति।

एतदेव नारदेन स्पष्टीकृतम्,

आदौ तु कारणं दानं मध्ये भुक्तिस्तु सागमा।
कारणं भुक्तिरेवैका सन्तता या चिरन्तनी॥इति ॥२७॥

बा० १। अव्यवहितेन सङ्गत्यभावाद् व्यवहितेन सङ्गतिमाह *स्वत्वे इति। पश्यतो ब्रुवत इत्यत्रेति भावः।*भोगमात्रस्य, केवलभोगस्य। एवमग्रेऽपि। आद्यपादार्थं शाब्दं स्वत्वोपपादकहेतोरागमस्य भोगात्प्राबल्यरूपं विशिष्टभोगस्य स्वत्वे प्रामाण्यमभिप्रायतोऽभिधास्यन्नाह *स्वत्वेति। तत्र हेतुमाह *स्वत्वबोधेति। भोगस्य स्वत्वे प्रामाण्यस्य प्रतिग्रहादिसापेक्षतया प्रतिग्रहादेस्तु स्वत्वोत्पत्तौ भोगानपेक्षतया सापेक्षनिरपेक्षयोर्निरपेक्षं बलीय इति न्यायेनागमस्य प्रतिग्रहाद्यात्मकस्य ततो बलीयस्त्वमिति भावः। अत्र मानमाह *यथाहेति। यथाकथञ्चिदागमस्यापि न तद्धेतुत्वमित्याह *विशुद्धेनेति। कापट्यरहितेनेत्यर्थः। इदमेव व्यतिरेकमुखेन द्रढयति *अविशुद्धेति। तदेव विशदयति *न चेति। न हीत्यर्थः।एवं चेदमयुक्तमेवेति शङ्काशयः। समाधत्ते *परेति। तथा च तस्य तद्व्यभिचारित्वेन तत्त्वमिति तद्युक्तमेवेति भावः। अत्रापि नारदमेवाह *अत एवेति। स्मर्यते इत्यत्रान्वयः।*केवलतः, केवलम्। सार्वविभक्तिकस्तासिः। अस्यैव व्यवच्छेद्यमाह *नागममिति। *क्वचित्, क्वचिदपि। यद्वा क्वापि व्यवहारविषये। *भोगेति। भोगच्छलस्योपदेशेन कथनेनेत्यर्थः। छलापदेशेनेत्यपपाठः, पौनरुक्त्यापत्तेः। फलितमाह *अतश्चेति। तस्य ततो बलवत्वाच्चेत्यर्थः। तत्र तावत्सामान्यत आह *सागम इति। सागमः विशुद्धागमसहितः। *दीर्घेति। बहुव्रीहिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

एवमग्रेऽपि । अविच्छेदः निरन्तरः । अपरिवर्जितः निराक्रोशः। विच्छेदापरवोज्झित इति पाठे विच्छेदश्चापरवश्च ताभ्यामुज्झितः रहितः । श्वाविच्छेदोऽपरवोज्झित इति पाठस्तु युक्त एव । अपरव आक्रोशः । विच्छेदरहितो निरन्तरः । अपरवरहितो निराक्रोशः । *प्रत्यर्थीति । व्यधिकरणपदो बहुव्रीहिः । अपिः प्रकृतान्यसमुच्चायकः ।

२ । उक्तपञ्चविशेषणानां व्यवस्थार्थं पूर्वावतारितवचनस्यैव द्वितीयपादमभिप्रायतो व्याख्यातुमवतरणमाह *क्वचिच्चेति । कपिञ्जलाधिकरणन्यायेन वक्ष्यमाणवाक्यकदम्बानुरोधेन चाह *त्रयाणामिति । नित्यसापेक्षत्वाद्वृत्तिः । सम्भवत्येकवाक्यत्वे इति न्यायेनाह *आगम इति । तात्पर्यार्थमाह *स पुनरिति । स पूर्वक्रमागतो भोगस्त्वित्यर्थः । आगमादित्यादेस्तात्पर्यार्थमाह *आगमेति । शाब्दस्तु प्राग्वत् । अत्र आगमनैरपेक्ष्यं तज्ज्ञाननैरपेक्ष्यकृतं, न तु तत्सत्तानैरपेक्ष्यकृतमिति विशेषमाह *तत्रापीति । आगमनिरपेक्ष इत्यत्रापीत्यर्थः । बोद्धव्यमित्यत्रान्वयः । तत्रापि कश्चिदागमोऽस्तीत्यागमसद्भावज्ञानापेक्षा नतु अयमागम इति शृङ्गग्राहिकया तज्ज्ञानापेक्षेति भावः ।

३ । नन्वेवमपेक्षितसत्तासद्भावे किं मानमत आह *सत्तात्विति । *तेनैव, विशिष्टेनोपभोगेनैव । नन्वेवमन्योन्याश्रयप्रसङ्गः। तथाहि । प्रमाणभूतेन तादृशभोगेनागमसत्ताऽवगतिः आगमसत्ताऽवगतौ तत्सहकृतभोगस्य प्रामाण्यावधारणमिति । अत्राहुः। चिरकालोपभोगानुपपत्तिरूपार्थापत्त्याऽऽगमसत्तावगतिः। तस्यामवगतायां तत्सहकृतभोगस्य प्रामाण्यनिश्चय इति साक्षात्प्रमाणभूतेन भोगेनागमसत्ताया अनिश्चयान्नान्योन्याश्रयः । तेनैवेत्यस्य तु तद्द्वारकार्थापत्तिरूपप्रमाणेनैवेत्यर्थ इति नासङ्गतिः । तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आगमो ऽभ्यधिक इत्यत्र पादभेदेन द्विविधभोगस्य प्रामाण्यमभिमतं मुनेः । स्मार्तकालिकः अस्मार्त्तकालिकश्च सः ।

४ । तदुभयं विभज्य योग्यतया व्यवस्थार्थमपवादविषयनिर्णयं विना नोत्सर्गविषयनिर्णय इति व्युत्क्रमेणाह *विनेति । *प्रदर्शनार्थमिति । विषयेत्यादिः । तथा सति आद्यचकारस्तर्ह्यर्थे । अस्य तदपवादत्वे सतीति तदर्थः । अत एव सामान्यविशेषपर्यवसानेनाह *आगम इति । द्वितीयचकारस्त्वर्थे । *स्मार्त्तेति । स्मरणयोग्येत्यर्थः । अस्मार्तकालिको भोग आगमज्ञाननिरपेक्षः स्मार्त्तकालिकस्तु आगमज्ञानसापेक्ष इति भावः ।

५ । नन्वेकस्यैव भोगरूपप्रमाणस्य क्वचित्तत्सापेक्षत्वं क्वचिन्नेति कुतो ऽवगतमित्यतो मौलक्रमेण सान्निध्याद् व्युत्क्रमेण द्वितीयमेव सहेतुमाह *अतश्चेति । उभयोरुक्तरीत्या विषयभेदाच्चेत्यर्थः । वस्तुतः स्मृत्यभावेऽपि तत्त्वस्येष्टत्वादाह *योग्ये इति । अभावप्रत्यक्षे योग्यानुपलब्धेः कारणत्वस्य तन्त्रान्तरे प्रसिद्धत्वादाह *योग्यानुपेति । स्मरणयोग्ये काले प्रतिग्रहादिरूपस्यागमस्य प्रमितियोग्यत्वे सत्यपि तदभावादागमाभावनिश्चयः । सिद्धे च तस्मिन्केवलभोगस्य बलात्कारेणापि सम्भवेनाप्रामाण्यप्रसङ्गात्तत्सापेक्षत्वमावश्यकमिति भावः ।

६ । अथाद्यं तादृशमाह *अस्मार्त्तेत्विति । अस्मरणयोग्ये इत्यर्थः । एतद्विशेषणाभावेऽपि विशेषणान्तरसत्ता ऽपेक्षितैवेत्याह *सन्तत इति । निरन्तर इत्यर्थः । इदमुपलक्षणं दीर्घकालादेरपि । योग्यत्वे सत्यनुपलब्धिर्योग्यानुपलब्धिः । अस्मृतियोग्ये काले प्रतिग्रहादिरूपस्य प्रमायोग्यत्वाभावादेव योग्यानुपलब्ध्यभावः। अतस्तेनागमो नास्तीति निश्चेतुं न शक्यते। अभावग्राहकप्रमाणस्य योग्यानुपलब्धेरभावात् । एवं च पूर्वे तत आ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गमाभावनिश्चयेन यद्यपि भोगो न प्रमाणं मूलशैथिल्यात्, तथापि प्रकृते आगमाभावनिश्चयाभावात् मूलशैथिल्याभावेन तन्निरपेक्षत्वमिति तादृशो भोगः प्रमाणमित्यर्थः ।

७ । क्रिया प्रमाणम् । *अनुगमेति । तन्निश्चयज्ञानाभावादित्यर्थः । ये गत्यर्थास्ते ज्ञानार्था इति भावः । *क्रमात्, प्रपितामहादिक्रमेण । स्मार्त्तकालस्य परमावधिमाह *स्मार्तश्चेति । अनुगमस्य साकाङ्क्षत्वात्तां पूरयन् प्रागुक्तैकवाक्यतायै सप्रतीकं तत्पदं व्याचष्टे *अनुगमेति । * इति, अस्यार्थ इति शेषः ।

८ । विशेषं वक्तुं विना पूर्वेत्यस्य विषयं सविशेषमुपसंहरति *अतश्चेति । उक्तहेतोश्चेत्यर्थः । *वर्षेति । अनेन दीर्घकालत्वमुक्तम् । सन्ततो निरन्तरः । अप्रतिरवः निराक्रोशः । *प्रत्यक्षेति । प्रत्यर्थिन इत्यादिः । भोगस्य विशेषणान्तरमाह *आगमेति । उक्तरीत्येत्यादिः । *आक्षिप्तेति । बहुव्रीहिः । आक्षिप्तागम इति पाठः । ततश्च पञ्चविशेषणमध्ये सागमत्वं स्मार्तकालविषयम् । अन्यच्चतुष्टयं तदन्यविषयमिति व्यवस्था सिद्धा । तं विशेषमेवाह *अस्मार्तेऽपीति ।

९ । अत्र मानं मनुमाह *अत एवेति । तस्यां सत्यां तस्याप्रमाणत्वादेवेत्यर्थः । अन्यथा ऽनागमोपभोगे विशेषेण दण्डाविधानं मनूक्तमयुक्तं स्यादिति भावः ।

१० । ननु बहून्यब्देत्यत्र अपिः समुच्चये, तथा चोक्तम् अपिः सम्भावनानिवृत्त्यपेक्षासमुच्चयगर्हाशीःसमर्थभूषणप्रश्नेष्विति । तथा च बहून्यब्दशतान्यभिव्याप्यापि य उपभुङ्क्ते स दण्ड्य इत्यर्थेन एककर्तृकानेकवर्षोपभोगे एव समुच्चयस्य सम्भवो नान्यथेत्यपिशब्दबलादुपभोक्तुरेकत्वं प्रतीयते । तथा य इत्याद्येकवचननिर्देशादपि । तथा च य एकश्चिरकालमनागममुपभुङ्क्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दण्ड्य इत्येकस्यैव दण्ड्यत्वं न बहूनाम् । पितृपरम्परायातभोगे तु भोक्तॄणामनेकत्वादीदृशैकभोक्तुरभावेन प्रथममनागमेनोपभोक्तुरेकत्वेन तस्यैव चोरसदृशदण्डो न द्वितीयादेरिति, तत्र भोगस्य प्रामाण्यापत्त्या ऽनागमस्मृतिपरम्परायां भोगो न प्रमाणमिति यदुक्तं तदयुक्तमित्याशयेन शङ्कते *न चानागमं त्विति । यद्वा अपिशब्दः समर्थवाची, उक्तहेतोः । तथा चानागमचिरकालोपभोगे यः समर्थः स एव दण्ड्यो नान्य इत्यर्थेन प्रथमस्यैव समर्थत्वेन द्वितीयादेः परम्परायातभोगत्वे तादृशसामर्थ्याभावात्प्रथम एव दण्ड्य इत्याशयेनाशङ्कते *न चेति । *प्रयोगात्, प्रयोगाच्च । *प्रथमस्य, तस्यैव । इदमन्त्ये परम्परायातभोगविषयम् । अपिनैकमात्रकर्तृकानेकवर्षोपभोगसमुच्चयः । आद्येत्वस्य साधारणत्वात् अपिना तद्वदल्पकालोपभोगसमुच्चयः ।

११ । इष्टापत्तिं निराचष्टे *न चैतदिति । नहीत्यर्थः । कारणं क्रिया । प्रमाणमिति यावत् । *नारदेति । मध्येऽपि सागमाया एव भुक्तेः प्रामाण्यबोधकनारदवचनादित्यर्थः । य इत्यत्रोद्देश्यगतत्वेन एकत्वस्याविवक्षितत्वाच्चेत्यपि बोध्यम् । तथा च सर्वत्र सागमभुक्तेः प्रामाण्यमिति द्वितीयादावपि निरागमोपभोगे दण्डो दुर्निवार इत्यनागमस्मृतिपरम्परायां सत्यां भोगो नैव प्रमाणमिति सिद्धम् । तदेतदुपसंहरति *तस्मादिति । *सर्वत्र, आदौ मध्येऽन्ते चेत्यर्थः । एवं चापिः सम्भावने, न समुच्चये नापि समर्थे इति । बह्वब्दशतव्यापित्वेन यस्य भोगः सम्भाव्यते स चेन्निरागमस्तर्हि तादृशोपभोगवानपि पुरुषो दण्ड्यः किमुतानागमाल्पभोगवानिति तात्पर्यार्थः ।

१२ । नन्वस्मरणयोग्यकालिकस्य पूर्वक्रमायातस्यैव भोगस्यागमज्ञाननिरपेक्षस्य प्रामाण्यमिति यत्सिद्धान्तितं तदयुक्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म्। अन्यायेनापीति वाक्ये ऽन्यायेनापि पित्रा यद् भुक्तं तथा पूर्वतरैस्त्रिभिर्यद् भुक्तं तत्रोभयत्रापि प्रत्यपहारो न शक्य इत्युक्त्या ऽनागमोपभोगस्य स्मरणयोग्यकालिकस्यापि प्रामाण्यप्रतीतेरि- त्याशयेनाह *यदप्यन्यायेनापीति । अत्रान्यायेनापीति निरा- गमभोगस्य प्रामाण्यप्रतिपादकं, पित्रेति स्मरणयोग्यकालिकस्ये- ति भावः । स्मार्त्तकालिकोपभोगस्य तन्निरपेक्षस्य न प्रामाण्य- मिति प्रागुक्तरीत्यैव परिहरति *तदपि पित्रा सहेति । अयं भावः । पित्रा यद् भुक्तमिति न पृथगन्वयो, येन पित्रुपभोगस्य स्मार्त्तकालिकत्वेन तादृशनिरागमोपभोगस्य प्रामाण्यं स्यात्, अपि तु सहार्थयोगे इयं तृतीया । तथा च पित्रा सह पूर्वतर- पुरुषत्रयोपभोगे क्रमेणाविच्छिन्ने तादृशे जाते तत् क्षेत्रादिकं त- स्मादपहर्तुं न शक्यमिति प्रागुक्तैकवाक्यतया, सम्भवतीति न्या- येन च एकवाक्यत्वेऽनेकपुरुषोपभोगस्य चिरतरकालं विनाऽस- म्भवेनास्मार्त्तकालिकोपभोगस्य प्रामाण्यमुक्तमिति न निराग- मस्य स्मार्त्तकालिकोपभोगस्य प्रामाण्यमिति ।

१३ । ननु त्रिपुरुषागतमित्यनेनानेकपुरुषोपभोगलाभेऽपि कथमस्मार्त्तकालोपभोगलाभो ऽत आह *तत्रापि क्रमादिति लक्षणेति भावः । शक्यार्थत्यागे बीजमाह *त्रिपुरुषेति । पात्रा- दित्वात् स्त्रीत्वाभावस्तत्रात्र च । एवं पूर्वकातीयेऽपि । प्रसङ्गा- दिति पाठः । प्रसङ्ग इति पाठे यत इत्यादिः । इष्टापत्तिं निरा- चष्टे *तथा सतीति । नन्वस्तु अस्मार्तकालिको भोगः प्रमाणमि- ति, तथाऽपि तस्याप्यागमसत्तासापेक्षत्वेनान्यायेनापीत्युक्तिः कथ- मत आह *अन्यायेनापीति । चस्त्वर्थे । तत्र बीजमाह *अपी- ति । अन्यथा तदानर्थक्यं स्पष्टमेव ।

१४ । नन्वस्मार्त्तकालिकी भुक्तिरागमज्ञानं नापेक्षते तत्स-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वपेक्षतएवेत्युक्तमयुक्तं, यद्विनाऽऽगममिति वाक्ये ऽत्यन्तमित्युक्त्या सर्वात्मना भुक्तेस्तन्नैरपेक्ष्येण प्रामाण्यप्रतीतेरित्याशयेन शङ्कते *यच्चोक्तमिति । यदप्युक्तमित्यर्थः । अत्यन्तमागमं विनेत्यन्वयः। प्रागुक्तरीत्या परिहरति *तत्रापीति । उक्तवाक्येऽपीत्यर्थः । *इति, वाक्यम् । *अत्यन्तम्, अतिशयेन। उक्तहेतोः शेषमाह *उपेति । *पुनस्त्वर्थे । आगमस्वरूपमपि विनेत्यर्थः । व्याख्येयमित्यस्यानुषङ्गः। अत्र हेतुमाह *आगमेति । यत इत्यादिः । अयं भावः । सर्वात्मना ऽऽगमज्ञानस्यास्मार्तकालिकोपभोगे ऽपेक्षाया अभावादत्यन्तं सर्वात्मना आगमज्ञानं विना ऽस्मार्त्तकालिकोपभोगे सति यद् भुक्तं वस्तु तदपाहर्तुं न शक्यमित्येव वाक्यार्थो न तु वस्तुत आगमसत्तां विनाऽप्युपभोगात्स्वत्वमस्तीति, येन प्रागुक्तविरोधः स्यादिति । उक्तवद्विरोधमत्रापि परिहरति *क्रमादिति । *उक्तार्थमिति । अस्मार्त्तकालोपलक्षकत्वेनोक्तार्थकमित्यर्थः । तत्सिद्धमस्मार्तकालिक उपभोग आगमज्ञाननिरपेक्षः प्रमाणं स्मार्त्तकालिकस्तु तत्सापेक्षस्तथेति।

१५। तत्रान्त्यमाक्षिपति *नन्विति । *प्रामाण्येति । प्रामाण्यं यदुक्तं तदनुपपन्नमित्यर्थः । अनुपपत्तेः स्फुटतया ऽभासात्तामुपपादयति *तथा हीति । यमागममपेक्षते भोगः स किं प्रमाणान्तरेणावगतो ऽथ वा नेति विकल्पं हृदि निधायाद्ये दोषमाह *यद्यागम इति। *प्रमाणान्तरेण, भोगान्येन प्रत्यक्षादिना । *तेनैव, मानान्तरावगतागमेनैव । मानान्तरावगतत्वेनानुपयुक्तत्वादाह *आगमेवेति । तथा च मानान्तरप्रमिते उभयत्र ज्ञापकत्वासम्भवेनानुत्पादकत्वेन चाप्रामाण्यात्तत्सापेक्षो भोगः प्रमाणमिति दुर्वचमिति भावः । द्वितीये दोषमाह * अथेति । अनवगतागमेन वैशिष्ट्यासम्भवादिति भावः । प्रथमपक्षादरेऽपि का-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लविशेषे तदुपयोग इत्याह *प्रमाणान्तरेणेति । मानान्तरेणैवा गमावगमो यद्यपि तथापि तादृशागमविशिष्ट एव भोगः प्रतिग्र हाद्युत्तरभाविनि कालान्तरेऽपि स्वत्वबोधक इति भावः ।

१६ । ननु तथाऽवगतागमेनैव स्वत्वावबोधे किं भोगेने त्युक्तमेव अत आह *अवगतोऽप्यागम इति। *अलं,समर्थः ।उपसं हरति *इतीति । कुत इत्यत आह *मध्ये इति ।

१७ । अव्यवहितसङ्गतिमाह * आगमेति । प्रमाणमित्यस्य स्यादिति शेषः। स्तोकाऽपीत्यस्य व्याख्या *स्वल्पापीति । बल मित्यस्य व्याख्या *सम्पूर्णतेति । ननु अस्योदाहरणं किमत आह *अयमिति। द्वितीयचस्त्वर्थे । *तत्र, तेषां मध्ये। *सविक ल्पेति । स तु स्वीकारो मदीयमेतदित्याद्यभिवदनाविषयकस्तज्ज न्यो वा सविकल्पकज्ञानरूप इत्यर्थः। यद्वा स इति भिन्नं पदं, वा चिकस्तु स स्वीकारो यस्तादृशविकल्पात्मकज्ञानरूप इत्यर्थः *पुनः, तु। *तत्र च, उक्तरूपकायिकस्वीकारे च। *करे, शुण्डा दण्डे । *दापयेत्, दद्यात् । स्वार्थे णिच् । निवृत्तप्रेषणादि प्रकारो वा ।

१८ । *अनुमन्त्रयेतेति । प्रतिग्राह्यो यदा प्राणी बलवा वक्तुं समर्थस्तदा तं प्रतिग्राह्यं प्रतिग्रहीता अनुमन्त्रयेत, अमु त्वं मदीयोऽसीति । सोऽपि ब्रूयादहं भवदीयोऽस्मीति। यदा प्र तिग्राह्यमप्राणि अभिवदनानभिज्ञं गवादि प्राणिष्वपि कन्या तदुभयं प्रतिग्रहीता ऽभिमृशेत् स्पृशेत् उक्तस्थले इत्यर्थः। प्रकृ माह *तत्रेति । तेषां मध्ये इत्यर्थः । *पुनः, तु । *तत्सहित दिति । कायिकस्वीकारसहितागमापेक्षयेत्यर्थः ।

१९। ननूपभोगसहितागमापेक्षयोपभोगरहितस्यागमस्य दु लत्वे यत्रैकमेव क्षेत्रमेकस्याधीकृत्य पुनरन्यस्याधीकृत्य पुन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यस्याप्याधीकरोति तत्र यदि दैवात् पूर्वस्य भोगाभाव उत्तरस्य तु भोगोऽस्ति तत्रापि भोगरहितागमस्य दौर्बल्यं स्यात् । तथा चाधौ प्रतिग्रहे इति वचनाविरोधः स्यादत आह *एतच्चेति । सिद्धान्तितमुक्तरूपमित्यर्थः । इतीत्यस्य बोध्यमिति शेषः ।

२० । यद्यप्यागमोऽभ्यधिक इत्यस्य पूर्वमीषद्व्यवहितसङ्गत्या व्याख्यानं कृतं, तथाऽपि तन्न युक्तं, व्याख्याकृदुक्तार्थसङ्गतिलाभेऽपि मूलसङ्गत्यभावात् । किं च प्रतिपादितार्थस्य तात्पर्यविषयतया यथाकथञ्चित् योजनेऽप्यशाब्दत्वेन स्वारस्यानावहत्वात् । अतस्तत् प्रकारान्तरेण ततोऽपि व्यवहितसङ्गत्या शब्दमर्यादया व्याचष्टे *अथवेति । *समवाये इति । एतेषां लिखितादीनां समवाये मेलने इत्यर्थः । सर्वेषां सम्भवे इति यावत् । इदमर्थमाह *आगम इति । प्राग्वत् । द्वितीयपादार्थमाह *पूर्वेति । पूर्वक्रमायातभोगान्यभोगापेक्षयाऽऽगमो बलवानित्यर्थः । पूर्वक्रमागतभोगस्य विजातीयागमापेक्षया क्वचित् बलवत्त्वम् । तत्तात्पर्यविषयमाह *स पुनरिति । स त्वित्यर्थः । अत एव वचनेऽन्यथाक्रमसत्त्वेऽपि अत्रानुवादेऽन्यथा पठितम् । एतद्वचनक्रमेण द्वितीयार्धं तात्पर्यतो व्याचष्टे *मध्यमेत्विति । अपिर्बहुभोगसहितपरिग्राहकः । प्रतियोग्यन्तराभावेन स्वापेक्षया केवलस्वस्य प्राबल्यासम्भवेन च योग्यतयाऽभुक्तितो भुक्तेः प्राबल्यमनेन बोध्यते इति भावः । पूर्वार्धमेव समवायविषयमिति तात्पर्यम् । इतिः व्याख्यानसमाप्तौ ।

२१ । अत्र मानमाह *एतदेवेति । एतेन प्रागुक्तव्यवच्छेदः । चतुर्थपुरुषविषयमाह *कारणं भुक्तिरिति । एवेन प्रागुक्तागमव्यवच्छेदः । सन्तता निरन्तरा । चिरन्तनी दीर्घकाला । चिरन्तनेति पाठे आर्षत्वाट्टाप् ॥ २७ ॥

११०३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि० पश्यतो ऽब्रुवत इत्यत्र विंशतिवर्षोपभोगादूर्ध्वं भूमेः धनस्यापि दशवर्षोपभोगादूर्ध्वं फलानुसरणं न भवतीत्युक्तम्। तत्र फलानुसरणवद्दण्डानुसरणमपि न भविष्यतीत्याशङ्क्य पुरुषव्यवस्थया प्रामाण्य-व्यवस्थया च दण्डव्यवस्थां दर्शयितुमाह।

या० आगमस्तु कृतो येन सोऽभियुक्तस्तमुद्धरेत्।
न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी ॥२८॥

मि० येन पुरुषेण भूम्यादेरागमः स्वीकारः कृतः स पुरुषः कुतस्ते क्षेत्रादिकमित्यभियुक्तस्तमागमं प्रतिग्रहादिः इति लिखितादिभिरुद्धरेत् भावयेत्। अनेन चाद्यस्य पुरुषस्यागममनुद्धरतो दण्ड इत्युक्तं भवति। तत्सुतो द्वितीयोऽभियुक्तो नागममुद्धरेत्। किंतु आविच्छिन्नाप्रतिरवसमक्षभोगम्। अनेन चागममनु-द्धरतो द्वितीयस्य न दण्डोऽपितु विशिष्टं भोगमनुद्ध-रतो दण्ड इति प्रतिपादितम्। तत्सुतः तृतीयो नागमं नापि विशिष्टं भोगमुद्धरेदपितु क्रमागत-भोगमात्रम्। अनेनापि तृतीयस्य क्रमायातभोगानु-द्धरणे दण्डो नागमानुद्धरणे न विशिष्टभोगानु-द्धरणे चेत्यभिहितम्। * तत्र, तयोर्द्वितीयतृ-तीययोर्भुक्तिरेव गरीयसी। तत्रापि द्वितीये गुरुस्तृती-ये गरीयसीति विवेक्तव्यम्। त्रिष्वप्यागमानुद्धरणे-ऽर्थहानिः समानैव, दण्डे तु विशेष इति तात्पर्यार्थः।

उक्तं च हारीतेन,

आगमस्तु कृतो येन स दण्ड्यस्तमनुद्धरन्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न तत्सुतस्तत्सुतो वा भोग्यहानिस्तयोरपि॥इति॥२८॥

बा० १। एतस्य तत्सङ्गतत्वादेव तेन उत्तरसङ्गतिमाह*पश्यत इति। *उक्तमिति। सिद्धान्तमतेनेति भावः। *तत्र, तथा सति। अन्वये दृष्टान्तः। *दर्शयितुम्, अनेनैव तात्पर्यतः प्रतिपादयितुम्। अयं भावः। आद्येन पुरुषेण प्रतिग्रहादिकमेवोपन्यसनीयं, द्वितीयेनाविच्छिन्नाप्रतिरवसमक्षत्वादिविशेषणविशिष्टो भोग एवोपन्यसनीयः, तृतीयेन समक्षत्वादिविशेषणवैशिष्ट्यं विनापि क्रमागतभोगमात्रमुपन्यसनीयमिति नियमस्यानेन विधेर्नियमातिक्रमे दण्डविधानमप्यर्थसिद्धमेवेति दण्डव्यवस्थाप्रतिपादकत्वमुपपन्नमेव। एतेनात्र वचने दण्डव्यवस्थाविध्यभावादिदमयुक्तमित्यपास्तमिति।

२। *स्वीकार इति। प्रतिग्रहादिनेति भावः। *अभियुक्तः, परेण। क्षेत्रादिकमिति पाठः। तथा च प्रतिग्रहादिरिति तस्योत्तरमुक्त्वा तथा कार्यमिति भावः। प्रतिग्रहादेरितीति पाठे इत्युक्त्वा तमागममर्थात् प्रतिग्रहादिकमित्यर्थः। यथाश्रुतार्थासम्भवादाह *भावयेदिति। प्रतिपादयेदित्यर्थः। अङ्गीकारयेदिति वा। अस्य तात्पर्यार्थमाह *अनेन चेति।

३। न तत्सुत इत्यंशं शेषपूरणेन सानुषङ्गेण व्याचष्टे *तत्सुत इति। अत्र प्रागुक्तविशेषणचतुष्टयमध्ये दीर्घकालत्वमग्रे, तद्भिन्नमत्रेत्याह *अविच्छिन्नेति। *भोगमिति। उद्धरेदित्यस्यानुषङ्गः। एवमग्रेऽपि। *विशिष्टं भोगं, स्वोक्तम्।

४। तत्सुतो वेत्यत्र वा चार्थे इत्याशयेन तमंशं व्याचष्टे *तत्सुत इति। *नापि विशिष्टमिति। विशिष्टभोगानुद्धरणे चेति पाठः।

५। तुर्यपादमव्यवहितोभयशेषत्वेन व्याचष्टे *तत्रेति। अस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDE

व्याख्या *तयोरिति। तद्व्याख्या *द्वितीयेति। सर्वं वाक्यमिति न्यायेनाह *भुक्तिरेवेति। प्रकर्षस्य प्रतियोगिसापेक्षत्वेन त त्स्वारस्येन लब्धमाह *तत्रापीति। तयोर्मध्येऽपीत्यर्थः। परम तात्पर्यमाह *त्रिष्वपीति। अस्य पूर्वतः स्वरसतो ऽलब्धत्वादन मानमाह *उक्तं चेति। पादत्रयस्योक्त एवार्थः। *भोग्येति। अ र्थहानिस्तदनुद्धरणे द्वितीयतृतीययोरपीत्यर्थः। अपिनाऽऽद्यस समुच्चयः॥ २८॥

मि० अस्मार्तकालोपभोगस्यागमज्ञाननिरपेक्षस्य प्रामाण्यमुक्तं, विना पूर्वक्रमागतादित्यत्र।

तस्यापवादमाह॥

या० योऽभियुक्तः परेतः स्यात्तस्य रिक्थी तमुद्धरेत्।
न तत्र कारणं भुक्तिरागमेन विना कृता॥ २९॥

मि० यदा पुनराहर्त्रादिरभियुक्तोऽकृतव्यवहार निर्णय एव परेतः परलोकं गतो भवेत्तदा तस्य रिक्थ पुत्रादिस्तमागममुद्धरेत्। यस्मात् तत्र तस्मिन्व्यव हारे भुक्तिरागमरहिता साक्ष्यादिभिः साधिता न प्रमाणम्। पूर्वाभियोगेन भोगस्य सापवादत्वात्

नारदेनाप्युक्तम्, (व्य० प० १।९३)

तथाऽऽरूढविवादस्य प्रेतस्य व्यवहारिणः।
पुत्रेण सोऽर्थःसंशोध्यो न तं भोगो निवर्तयेत्॥इति॥२

बा०१। सङ्गतिमाह *अस्मार्तेति। *पुनः, तु। यदर्थमाह *आ हर्त्रादिरिति। आहर्त्रादिरभीति पाठः। अभियोगानिमित्तसूचन

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

याहर्तुरुपादानम् । तदसम्भवात् आदिना तत्पुत्रादिग्रहणम् । आर्थिकमाह *अकृतेति । परेत इत्यस्य परमित इति व्युत्पत्तिलभ्यमर्थमाह *परलोकमिति । तदः प्रकृतबुद्धिस्थपरामर्शित्वादाह *आगममिति । अत्रोत्तरार्द्धं हेतुरिति यस्मादितिशेषेण व्याचष्टे *यस्मादिति । तत्रेत्यस्य व्याख्या *तस्मिन्नित्यादि आगमेन विनेत्यस्य व्याख्या *आगमेति । कृतेत्यस्य व्याख्या *साक्ष्यादिभिरिति । *न प्रमाणमिति । अत इति शेषः । यस्मादित्यस्यार्थमाह *पूर्वेति । एवं चात्रागमज्ञानसापेक्षस्य तस्य प्रामाण्यमिति भावः ।

२ *तथाऽऽरूढेति । तथाशब्दः पूर्वसमुच्चये । आरूढविवादस्य प्राप्तविवादस्य व्यवहारिणः प्रेतस्य मृतस्य सम्बन्धिना पुत्रेण सोऽर्थो विवादास्पदीभूतः संशोध्यः आगमेन संसाध्यो यतस्तमर्थं भोगो न निवर्तयेत् प्रत्यावर्त्तयेत् । भोगस्तत्र प्रमाणं न भवतीति यावदित्यर्थः ॥ २९ ॥

मि० अनिर्णीतव्यवहारे व्यवहर्तरि प्रेते व्यवहारो न निवर्तते इति स्थितम् । निर्णीतेऽपि व्यवहारे स्थिते च व्यवहर्तरि वा व्यवहारः क्वचित्पुनः प्रवर्तते क्वचिन्न प्रवर्तते इति व्यवस्थासिद्धये व्यवहारदर्शिनां बलाबलमाह ॥

या० नृपेणाधिकृताः पूगाः श्रेणयोऽथ कुलानि च ।
पूर्वं पूर्वं गुरु ज्ञेयं व्यवहारविधौ नृणाम् ॥ ३० ॥

नृपेण राज्ञा अधिकृताः व्यवहारदर्शने नियुक्ताः "राज्ञा सभासदः कार्या" इत्यादिनोक्ताः । पूगाः समूहाः, भिन्नजातीनां भिन्नवृत्तीनाम् एकस्थाननिवा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिनां, यथा ग्रामनगरादयः । श्रेणयो नानाजातीनामेकजातीनामपि एकजातीयकर्मोपजीविनां संघाताः, यथा हेडावुकानां ताम्बूलिककुविन्दचर्मकारादीनां च । कुलानि ज्ञातिसबान्धिबन्धूनां समूहाः । एतेषां नृपाधिकृतादीनां चतुर्णां पूर्वं पूर्वं यद्यत्पूर्वं पठितं तत्तद् गुरु बलवज्ज्ञेयं वेदितव्यम्, नृणां व्यवहर्तॄणां व्यवहारविधौ व्यवहारदर्शनकार्ये । एतदुक्तं भवति । नृपाधिकृतैर्निर्णीते व्यवहारे पराजितस्य यद्यप्यसंतोषः कुदृष्टबुद्ध्या भवति तथापि न पूगादिषु पुनर्व्यवहारो भवति । एवं पूगनिर्णीतेऽपि न श्रेण्यादिगमनम् । तथा श्रेणिनिर्णीते कुलगमनं न भवति । कुलनिर्णीते तु श्रेण्यादिगमनं भवति । श्रेणिनिर्णीते पूगादिगमनम् । पूगनिर्णीते नृपाधिकृतगमनं भवतीति ।

नारदेन पुनर्नृपाधिकृतैर्निर्णीतेऽपि व्यवहारे नृपगमनं भवतीत्युक्तम्, (अ० १। श्लो० ७)

कुलानि श्रेणयश्चैव गणाश्चाधिकृता नृपः ॥
प्रतिष्ठा व्यवहाराणां गुर्वेषामुत्तरोत्तरम् ॥ इति

तत्र च नृपगमने सोत्तरसभ्येन राज्ञा पूर्वैः सभ्यैः सह सपणे व्यवहारे निर्णीयमाने यद्यसौ कुदृष्टवादी पराजितस्तदाऽसौ दण्ड्यः । अथासौ जयति तदाऽधिकृताः सभ्या दण्ड्याः ॥ ३० ॥

वा० १। अव्यवहितेन सङ्गतिमाह *अनिर्णीतेति ।*निवर्तते । साध्यते इति पाठान्तरम् । तेन नापगच्छति प्रवर्ततएवेत्यर्थः *व्यवेति।पुनरित्यादिः।क्वचित्तथा पाठ एव। मूले अथशब्दः चार्थे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नृपेणाधिकृता इति भिन्नमित्याशयेन वाक्यार्थज्ञानोपयोगितया आदौ पदार्थानाह *नृपेणेति। प्रकृतयोग्यतयाऽऽह *व्यवेति। ते के इत्यत आह *राज्ञेति। आकाङ्क्षाशान्तये ऽसाङ्कर्याय चाह *भिन्नेति। *नानेति। उभयोः सङ्घाता इत्यत्रान्वयः। इदमुभयं स्वरूपकीर्त्तनमिति सूचयन् आवश्यकम् उभयशेषमाह *एकजातीयेति। तत्राद्योदाहरणं, *हेडेति। देशाद्देशान्तरं गत्वा प्रस्थाप्य वा ऽश्वविक्रेतारो हेडाबुकाः। गुर्जरदेशे प्रसिद्धोऽयं तत्र शब्दः। द्वितीयोदाहरणं *ताम्बूलिकेति। तद्विक्रेतेत्यर्थः। कुविन्दस्तन्तुवायः। आदिना तक्षादयः। सङ्घाता इत्यस्यानुषङ्गः। सम्बन्धी जामात्रादिः।

२। अथ वाक्यार्थमाह *एतेषामिति। *चतुर्णां, मध्ये इति शेषः। पूर्वत्वं न कारणत्वादिकृतं किन्तु पाठकृतमित्याह *यद्यत्पूर्वं पठितमिति। कुत्रेत्याह *नृणामिति। प्रकृतयोग्यत्वादाह *व्यवेति। योग्यतया व्यवहारशब्दो दर्शनपरः कर्मक्तिप्रत्ययान्तो विधिशब्द इत्याह *व्यवहारेति।

३। अवतरणोक्तं स्पष्टयितुं तात्पर्यार्थमाह *एतदिति। कुदृष्टेत्यनेन वास्तवासन्तोषबीजनिरासः जातव्यवहारस्य यथार्थत्वं च सूचितम्। व्युत्क्रमेण व्यतिरेकमाह *कुलेति।

४। विशेषं स्वल्पमाह *नारदेति। *पुनः, तु। यद्यप्यत्र गणा इति पठितं, मूले च पूगा इति, अस्ति च तयोर्भेदः, तत्र पूगस्वरूपमुक्तं, सर्वेषां हीनवर्णानां सङ्घातो गणः, अत एव पूगश्रेणिगणादीनामिति प्राक् उक्तं, तथापि तत्स्थाने मुनिद्वयप्रामाण्यादुभयोर्विकल्पेन ग्रहणम्, अत एव चतुर्णामिति व्याख्याकृदुक्तिसङ्गतिः। यद्वा गणाश्चेति चेन तदग्रे पूगानां समुच्चयः। मूलेऽथशब्दस्य चार्थस्य पूगा इत्यत्रान्वयेन तदग्रे तेन तेषां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समुच्चय इति एकवाक्यतैव। नारदेन पुनरित्यादि वदता व्याख्याकृता प्रागुक्तचतुष्टयं नाभिमतमिति सूचितमेवेति बोध्यम्। नृप इति पाठः। *प्रतिष्ठा इति। व्यवहारदर्शनानां स्थानानीत्यर्थः।

५। तथा सति विशेषमाह *तत्र चेति। तेषां मध्ये इत्यर्थः *सोत्तरेति। सभायां साधुः सभ्यः उत्तरश्चासौ सभ्यश्च तत्सहि तेनेत्यर्थः। पूर्वसभ्यतो भिन्नोत्कृष्टसभ्ययुक्तेनेति यावत्। *सपणे इति। उभयकारितपणसहिते इत्यर्थः। अयमेव पूगाद्यर्थः पूर्वत्रापि ज्ञेयः॥ ३०॥

मि० दुर्बलैर्व्यवहारदर्शिभिर्दृष्टो व्यवहारः परावर्तते प्रबलदृष्टस्तु न निवर्तते इत्युक्तम्।

इदानीं प्रबलदृष्टोऽपि व्यवहारः कश्चिन्निवर्तते इत्याह॥

या० बलोपाधिविनिर्वृत्तान् व्यवहारान्निवर्तयेत्।
स्त्रीनक्तमन्तरागारबहिःशत्रुकृतांस्तथा॥ ३१॥

मि० बलेन बलात्कारेण उपाधिना भयादिना विनिर्वृत्तान्निष्पन्नान्व्यवहारान्निवर्तयेत्। तथा, स्त्रीभिः नक्तं रात्रावस्त्रीभिरपि अन्तरागारे गृहाभ्यन्तरे बहिः ग्रामादिभ्यः शत्रुभिश्च कृतान् व्यवहारान्, निवर्तयेदिति संबन्धः॥ ३१॥

बा० १। उपसंहरन्नव्यवहितसङ्गतिमाह *दुर्बलैरिति। *कश्चित् न सर्वः। बलं चोपाधिश्च ताभ्यां विनिर्वृत्तानिति व्युत्पत्तेः। *बलेनेति। उपधीति पाठान्तरम्। शत्रुशब्दान्तद्वन्द्वे कृतशब्दे शेषषष्ठ्या समासे आद्यन्तयोस्तत्र कर्तृत्वेनान्वयो मध्यमानामधिकरणत्वेन फलतीत्याह *तथा स्त्रीभिरिति। अपौनरुक्त्याय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह *अस्त्रीभिरपीति । मध्ये इत्यर्थकान्तरशब्देन षष्ठीसमासे राजदन्तादित्वात्परनिपात इत्याह *गृहाभ्यन्तरे इति । तथाऽर्थमाह *चेति । कृतांश्चेत्यर्थः। मध्यमणिन्यायेनान्वयादाह *निवर्तयेदिति ॥ ३१ ॥

मि० अपिच।

या० मत्तोन्मत्तार्तव्यसनिबालभीतादियोजितः ।
असंबद्धकृतश्चैव व्यवहारो न सिध्यति ॥ ३२ ॥

मि० मत्तो मदनीयद्रव्येण । उन्मत्त उन्मादेन पञ्चविधेन वातपित्तश्लेष्मसंनिपातग्रहसंभवेनोपसृष्टः। आर्तो व्याध्यादिना। व्यसनमिष्टावियोगोऽनिष्टप्राप्तिः तज्जनितं दुःखं तद्वान् व्यसनी । बालो व्यवहारायोग्यः। भीतोऽरातिभ्यः। आदिग्रहणात्पुरराष्ट्रादिविरुद्धः।

पुरराष्ट्रविरुद्धश्च यश्च राज्ञा विसर्जितः।
अनादेयो भवेद्वादो धर्मविद्भिरुदाहृतः ॥
इति मनुस्मरणात्।

एतैर्योजितः कृतो व्यवहारो न सिद्ध्यति । अनियुक्तासंबद्धकृतोऽपि व्यवहारो न सिद्ध्यतीति संबन्धः।

यत्तु स्मरणम्,
गुरोः शिष्ये पितुः पुत्रे दम्पत्योः स्वामिभृत्ययोः।
विरोधेऽपि मिथस्तेषां व्यवहारो न सिद्ध्यति॥ इति,

तदपि गुरुशिष्यादीनामात्यन्तिकव्यवहारप्रतिषेधपरं न भवति। तेषामपि कथंचिद्व्यवहारस्येष्टत्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्। तथाहि। "शिष्याशिष्टिरवधेन, अशक्तौ रज्जुवेणु
विदलाभ्यां तनुभ्याम्, अन्येन घ्नन् राज्ञा शास्य" इति
गौतमस्मरणात्, नोत्तमाङ्गे कथंचनेति मनुस्मरणात्
यदि गुरुः कोपावेशवशान्महता दण्डेनोत्तमाङ्गे ता
याति तदा स्मृतिव्यपेतेन मार्गेणाधर्षितः शिष्यो य
राज्ञे निवेदयाति तदा भवत्येव व्यवहारपदम्।

तथा,

भूर्या पितामहोपात्तेत्यादिवचनात् पितामहोपा
भूम्यादौ पितापुत्रयोः स्वाम्ये समाने यदि पिता वि
क्रयादिना पितामहोपात्तं भूम्यादि नाशयति त
पुत्रो यदि धर्माधिकरणं प्रवशयाति तदा पितापुत्र
योरपि भवत्येव व्यवहारः।

तथा, (याज्ञ. २।१४७)

दुर्भिक्षे व्याधिकार्ये च व्याधौ संप्रतिरोधके।
गृहीतं स्त्रीधनं भर्ता नाकामो दातुमर्हति॥

इति स्मरणात् दुर्भिक्षादिव्यातिरेकेण यदि स्त्री
धनं भर्ता व्ययीकृत्य विद्यमानधनोऽपि याच्यमा
न ददाति तदा दम्पत्योरपीष्यते एव व्यवहारः।

तथा। भक्तदासस्य स्वामिना सह व्यवहारा
वक्ष्यति। गर्भदासस्यापि गर्भदासादीनधिकृत्य—

यश्चैषां स्वामिनं कश्चिन्मोचयेत्प्राणसंशयात्
दासत्वात्स विमुच्येत पुत्रभागं लभेत च॥

इति नारदोक्तत्वात्(व्य.प.५।३०) तदमोचने पुत्रभ
गादाने च स्वामिना सह व्यवहारः केन वार्यते। तस्म
दृष्टादृष्टयोः श्रेयस्करो न भवति गुर्वादिभिर्व्यवह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति प्रथमं शिष्यादयो निवारणीयाः राज्ञा ससभ्येन, इति गुरोः शिष्य इत्यादेः श्लोकस्य तात्पर्यार्थः। अत्यन्तनिर्बन्धे तु शिष्यादीनामप्युक्तरीत्या प्रवर्तनीयो व्यवहारः। यदपि—

एकस्य बहुभिः सार्द्धं स्त्रीणां प्रेष्यजनस्य च।
अनादेयो भवेद्वादो धर्मविद्भिरुदाहृतः॥

इति नारदवचनम्। तत्रैकस्यापि—

गणद्रव्यं हरेद्यस्तु संविदं लङ्घयेच्च यः।(याज्ञ.२।१८७)

तथा, एकं घ्नतां बहूनां चेत्यादिस्मरणादेकार्थैर्बहुभिः सार्द्धं व्यवहार इष्यते एवेति भिन्नार्थैर्बहुभिरेकस्य युगपद्व्यवहारो न भवतीति द्रष्टव्यम्। स्त्रीणामित्यपि गोपशौण्डिकादिस्त्रीणां स्वातन्त्र्याद्व्यवहारो भवत्येवेति। तदन्यासां कुलस्त्रीणां पतिषु जीवत्सु तत्पारतन्त्र्यादनादेयो व्यवहार इति व्याख्येयम्। प्रेष्यजनस्य चेत्येतदपि प्रेष्यजनस्य स्वामिपारतन्त्र्यात् स्वार्थव्यवहारेऽपि स्वाम्यनुज्ञयैव व्यवहारो नान्यथेति योजनीयम्॥ ३२॥

बा० १।*अपि चेति।अन्योऽपि कश्चित्तादृशो व्यवहारो निवर्त्तते इत्याहेत्यर्थः। वाक्यार्थबोधायादौ पदार्थानाह *मत्त इत्यादि। आर्तादिभीतान्तद्वन्द्वं कृत्वा पुनस्तेन मत्तोन्मत्ताभ्यां कृत्वा बहुव्रीहितत्पुरुषौ कार्यौ। करणेऽनीयर्। पञ्चविधेनेत्यस्य व्याख्या वातेति। *सम्भवेनेति। ग्रहान्तपञ्चकजन्येनेत्यर्थः। कारणभेदेन कार्यभेदात्तस्य पञ्चविधत्वम्।*जनितामिति। एतदन्यतरजनितमित्यर्थः। *व्यवेति।न तु स्तनन्धयादिरेवेति भावः। राष्ट्रादी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यादिपदग्राह्यं वचने एव स्फुटम् । *पुरेति । पुरविरुद्धो रा
विरुद्धश्चेत्यर्थः । यः एवं स वादः तैरनादेय उदाहृतः कथि
भवेदित्युत्तरार्धार्थः । एवं च तस्यार्थिकी निवृत्तिर्बोध्या ।

२ । वाक्यार्थमाह *एतैरिति । असम्बद्धकृत इत्यंशम् अनि
क्तपदाध्याहारेण व्याचष्टे *अनियुक्तासम्बद्धेति । अनियुक्ते
नाप्रेषितत्वेन प्रकृतव्यवहारासम्बद्धो यस्तत्कृत इत्यर्थः । चा
माह *अपीति । इतिरर्थसमाप्तौ ।

३ । ननु मत्तादिकृतव्यवहारो न सिध्यतीत्यत्र मत्तादिग्र
णमुपलक्षणं न वा । आद्ये ऽन्यकृतव्यवहारासिद्धेरपि सं
इति न स्मृत्यन्तरविरोध इति फलं यद्यपि, तथाप्येवकारास
तिः । द्वितीये एवकारबलेनास्य नियामकत्वलाभेनैवकारस
तिरूपफलसत्त्वेऽपि वचनान्तरविरोध इति संशये श्रुतैवकार
लेनाद्यस्य दुर्वचत्वेन द्वितीयमेव वाच्यम् । यद्यप्याद्येऽप्यादि
तिरस्ति तथापि सर्वथा ऽनन्यगतिकसंग्रहेणैव तत्साफल्ये स
तिकसङ्ग्रहो नेति तात्पर्यार्थः । तथा सति वचनान्तरविरोध
तेनान्यकृतव्यवहारस्यासिद्धिप्रतिपादनेन नियमस्य दुर्वचत्वा
त्याशयेन शङ्कते ।

४ । यत्त्विति । विरोधे इति पूर्वान्वयि । मिथ इत्युत्तरा
यि । गुरोः शिष्ये विरोधे त्वित्यादौ सति तेषां गुरुशिष्यादी
मिथो व्यवहारो न सिध्यतीत्यर्थः । अपिनैतज्जातीयस्मृत्यन
समुच्चयः । त्वर्थे वा सः । आत्यन्तिकत्वं प्रतिषेधाविशेषण
*कथञ्चित्, केनचित्प्रकारविशेषेण । तथा च तत्र चार्थस्तुः
ध्यतीत्यग्रे योज्यः । तेन सिद्धिसमुच्चयः । तयोर्व्यवस्था तु
क्ष्यमाणप्रकारेण । यद्वा तुर्मिथ इत्यग्रे योज्यः । मिथस्तु मिथ
न सिध्यति किं तु व्यवहारदर्शिभिः सिध्यतीत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतद्वैलक्षण्यसूचकस्तुर्यथाश्रुत एव । तथा च मूलवाक्यस्थैवकारस्य न सिध्यतीत्यग्रे योजनं कृत्वा मत्तादिकृतो व्यवहारः सर्वात्मना न सिध्यत्येवेत्यर्थः । अयं तूक्तरीत्या कृतः सिध्यत्यन्यथा नेति । यद्वा यथाश्रुत एव सः । तदन्तं चावृत्त्या भिन्नं वाक्यम् । यद्यपि वक्ष्यमाणरीत्या न सिध्यति तथापि प्रबलविरोधपूर्वकदुराग्रहे तु सिध्यत्येवेत्यर्थः इति न कोऽपि दोष इति भावः ।

५ । नन्वयोग्यत्वादेतेषां व्यवहार एव नोचितो ऽसम्भवश्च तस्य अतस्तमुपपादयति * तथाहीति । तत्र तावत् गुरुशिष्ययोर्व्यवहारस्थलमाह *शिष्येति । स्मृतिव्यपेतमार्गप्रदर्शनाय हेतुद्वयमिदम् । शिष्टिः शिक्षा । * अवधेन,अताडनेन। अशक्तौ तथा कर्त्तुं शक्यते न चेत्तदा सूक्ष्मेण रज्जुखण्डेन वेणुखण्डेन च तच्छिक्षा कार्या । अन्येन उक्तभिन्नेन स्थूलेन रज्जुखण्डेन वेणुखण्डेन च घ्नन् ताडयन् गुरू राज्ञा शास्यः शिक्षणीय इत्यर्थः । यदीत्यनेनान्यथा व्यवहारपदत्वाभावः सूचितः । एवमग्रेऽपि ।

६ । पितापुत्रयोस्तदाह *तथेति ।

भूर्या पितामहोपात्ता निबन्धो द्रव्यमेव च ।
तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चैवहि ॥ (याज्ञ.२।१२१)

इति वक्ष्यमाणमूलवचनादित्यर्थः । साम्ये हेतुरयम् । समाने सतीति शेषः । * धर्मेति । धर्मनिर्णयस्थानमित्यर्थः ।

७ । दम्पत्योस्तदाह * तथेति । *सम्प्रतीति । सर्वस्वहरणं कृत्वा दुर्गादौ परबलैर्निरोधकरणं सम्प्रतिरोधकम् । * नाकाम इति । प्रागुक्तस्थलान्यतमे गृहीतं स्त्रीधनं पुनस्तस्यै दातुमनिच्छुश्चेन्न दद्यादित्यर्थः । व्यतिरेके हेतुरयम् । विद्यमानेत्यादिविशेषणद्वयेन तदभावे तदभावः सूचितः । अपिर्मिथः समुच्चये।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

८। दासभेदा वक्ष्यन्ते भक्तदासगर्भदासादयः, तत्राद्ये तयो स्तदाह *तथेति। भक्तमन्नम्। "भक्तमन्धोन्नमिति" अमरः द्वितीये तयोस्तदाह *गर्भेति। अयं द्विविध इत्यन्यत्र स्पष्टम् स्वामिना सहेत्यग्रेतनेनान्वयः। *यश्चैषामिति। एषां गर्भदा दीनां मध्ये यः कश्चिदित्यर्थः। *विमुच्यते, मोचनीयः। *ल प्रापयेत्। *तत्, तस्माद्दासत्वात्। नन्वेवं तस्य का गतिरत अ *तस्मादिति। प्रथममित्युक्तिस्वारस्यादाह *अत्यन्तेति। अ यस्करत्वे क्रोधादिनेष्टापत्त्यङ्गीकारे त्वित्यर्थः।

एवमन्यविरोधं परिहरति *यदप्येकस्येति। वाद इत्यस्य भिरन्वयःप्रागुक्तैकवाक्यतया। तत्राद्यस्यार्थमाह *तत्रैकेति तेषां त्रयाणां मध्ये इत्यर्थः। अपिनाऽनेकसमुच्चयः। एकार्थैरिति ग्रिमेणान्वयः। *गणेति।

सर्वस्वहरणं कृत्वा तं राष्ट्राद्विप्रवासयेत्। (याज्ञ. २।१८)

इत्युत्तरार्धम्। व्यवहारद्रष्टेति शेषः। स्मृत्यन्तर *तथेति। *एकमिति। यथोक्तात् द्विगुणो दम इति वचनं गणद्रव्यहार्यादेः सर्वस्वहरणादिविधानमेकहन्तॄणां बहूनां च गुणदण्डविधानं स्मृतावुक्तम्। इदमुभयमपि व्यवहारमुखेन ताद पराधवतामेव भवतीति व्यवहारोऽस्तीति भावः। प्रागुक्तमेव शेषमाह *एकार्थैरिति। अत एवोक्तनारदाभिप्रायमाह * कार्थैरिति। प्रागुक्तयुक्तेराह *युगपदिति। किं त्वीदृशवि क्रमेण व्यवहार इति भावः। द्वितीयतात्पर्यं प्रागनुक्तमाह * णामिति। इति व्याख्येयमित्यत्रान्वयः। गोपशौण्डिके वक्ष्यमाणयुक्तेराह *गोपेति। तत्रापि विशेषं सूचयन्हेतु *पतिष्विति। तथा च तदभावे तत्रापि व्यवहार उपादेय ए भावः। अयं च तस्याः पत्या साकं न किंत्वन्येनेतिबोध्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मग्रेऽपि। तृतीयतात्पर्यमाह * प्रेष्येति । इति योजनीयमित्याग्रिमेणान्वयः । * स्वार्थेति । भृत्यार्थेत्यर्थः अपिना तदर्थव्यवहारसमुच्चयः । तस्मादुक्त एवाशय इति न कोऽपि दोषइति तत्त्वम् ॥ ३२ ॥

मि० परावर्त्यं व्यवहारमुक्त्वा इदानीं परावर्त्यं द्रव्यमाह ।

या० प्रनष्टाधिगतं देयं नृपेण धनिने धनम् ।
विभावयेन्न चेल्लिङ्गैस्तत्समं दण्डमर्हति ॥ ३३ ॥

मि० प्रनष्टं हिरण्यादि शौल्किकस्थानपालादिभिरधिगतं राज्ञे समर्पितं यत् तत् राज्ञा धनिने दातव्यम्, यदि धनी रूपसंख्यादिभिर्लिङ्गैर्भावयति । यदि न भावयति तदा तत्समं दण्ड्यः । असत्यवादित्वात् । अधिगमस्य स्वत्वनिमित्तत्वात् स्वत्वे प्राप्ते तत्परावृत्तिरनेनोक्ता ।

अत्र च कालावधिं वक्ष्यति, (याज्ञ० २।१७३)
शौल्किकैः स्थानपालैर्वा नष्टापहृतमाहृतम् ।
अर्वाक्संवत्सरात्स्वामी हरेत परतो नृपः ॥ इति ।
मनुना— (अ० ८।३०)
पुनः संवत्सरत्रयमवधित्वेन निर्दिष्टम्,
प्रनष्टस्वामिकं रिक्थं राजा त्र्यब्दं निधापयेत् ।
अर्वाक् त्र्यब्दाद्धरेत्स्वामी परतो नृपतिर्हरेत् ॥ इति ।

तत्र वर्षत्रयपर्यन्तमवश्यं रक्षणीयम् । तत्र यदि संवत्सरादर्वाक् स्वाम्यागच्छेत्तदा कृत्स्नमेव दद्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदा पुनः संवत्सरादूर्ध्वमागच्छति तदा किञ्चिद्र रक्षणमूल्यं गृहीत्वा शेषं स्वामिने दद्यात् ।

यथाह, (मनु० ८।३३)

आददीताथ षड्भागं प्रनष्टाधिगतान्नृपः ।

दशमं द्वादशं वापि सतां धर्ममनुस्मरन् ॥ इति

तत्र प्रथमे वर्षे कृत्स्नमेव दद्यात् । द्वितीये द्वा शं भागं तृतीये दशमं चतुर्थादिषु षष्ठं भागं गृही त्वा शेषं दद्यात् । राजभागस्य चतुर्थोंऽशोऽधिगन्

दातव्यः । स्वाम्यनागमे तु कृत्स्नस्य धनस्य चतु र्थमंशमाधिगन्त्रे दत्त्वा शेषं राजा गृह्णीयात् ।

यथाह गौतमः,

प्रनष्टस्वामिकमधिगम्य संवत्सरं राज्ञा रक्ष्यम् र्ध्वमधिगन्तुश्चतुर्थोंऽशो राज्ञः शेषामिति ।

अत्र संवत्सरमित्येकवचनमाविवक्षितम् । राज त्र्यब्दं निधापयेदिति स्मरणात् । हरेत परं नृप इत्येतदपि स्वामिन्यनागते त्र्यब्दादूर्ध्वं व्ययी रणाभ्यनुज्ञा । ततः परमागते तु स्वामिनि व्ययीभू ऽपि द्रव्ये राजा स्वांशमवतार्य तत्समं दद्यात् । एत हिरण्यादिविषयम् । गवादिविषये वक्ष्यति, "पण नेकशफेदद्यात्" इत्यादिना ॥ ३३ ॥

बा० १ । प्रसङ्गसङ्गतिमाह *परावर्त्यमिति । प्रनष्टेति कर्मधार न तु पञ्चमीसमास इत्याह *प्रनष्टमिति । धनमित्यस्यार्थ *हिरण्यादीति । *शौल्किकेति । द्वन्द्वं कृत्वा बहुव्रीहिः कार्य असमर्पणे तेषां दण्डसत्त्वादाह *राज्ञे इति । उत्तरार्धसूचित र्थिकं पूर्वशेषमाह *यदीति । उत्तरार्धार्थं कथयन् चेदर्थमाह *

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेति । लिङ्‌र्थोऽविवक्षित इत्याह *भावयतीति । *तत्समं, प्रनष्टाधिगतद्रव्यसमम् । पूर्वं मदीयमेतादिति निवेद्य पश्चाद्यदि न साधयति तदा स दण्ड्य इत्यर्थः । तदेव ध्वनयन्नाह *असत्येति । ननु प्रनष्टाधिगतस्य परकीयत्वेनादेयत्वाद्देयमित्युपदेशो व्यर्थ एव अत आह *आधिगमस्येति।द्रव्यनाशानन्तरं तदलब्ध्वा स्वामिनो देशान्तरगमने विशेषमाह *अत्र चेति । प्रनष्टाधिगतस्य प्रतिदानविषये इत्यर्थः । अत्र सर्वत्र प्रनष्टेति दन्त्यपाठः । नशेरिति तन्निषेधात् । तदेव मूलोक्तमाह *शौल्किकैरिति । शुल्कं गृह्णन्ति ते शौल्किकाः । स्थानपालाः तन्मात्ररक्षकाः । *नष्टेति । नष्टं सत् अधिगतं राज्ञे समर्पितमित्यर्थः । यद्वा नष्टमपहृतं चाधिगत्य राज्ञे समर्पितमित्यर्थः ।

२ । अत्र विशेषमाह *मनुना पुनरिति । मनुना त्वित्यर्थः । मनुमेवाह *प्रनष्टेति । स्वामिनः सकाशात्प्रनष्टं प्रनष्टस्वामिकम् । राजदन्तादिः । स्वार्थे कः।अत एव पूर्वैकवाक्यता उत्तरार्द्धसङ्गतिश्चेति भावः । यद्वोक्तरीत्या तदनन्तरं देशान्तरगतस्वामिकमिति यथाश्रुत एवार्थः । हृतं नष्टं च लभ्यते इतिवत् प्रयोग इति न कोपि दोषः । एवं सति प्रसक्तविरोधपरिहाराय व्यवस्थां कथयन्नादौ मनुतात्पर्यमाह *तत्रेति । तथा सतीत्यर्थः । *अवश्यमिति । तन्मध्ये व्ययं न कुर्यादित्यर्थः । निधापयेदित्युक्तिस्वारस्यादिति भावः । *तत्र, तावत्पर्यन्तरक्षणीये।तास्मिन्सति मूलतात्पर्यमाह *यदीति । पुनस्त्वर्थे । अत्र मानमाह *यथाहेति । अस्य पक्षत्रयस्य व्यवस्थां कथयितुमादौ मूलोक्तमेवाह *तत्रेति । तेषां मध्ये इत्यर्थः। अन्यथा तदानर्थक्यं स्पष्टमेव । द्वादशभागमित्यादेर्गृहीत्वेत्यादिना अन्वयः । विशेषमाह * राजभागेति । * चतुर्थोऽश इति । अयं च विशेषो द्वितीयादौ न त्वाद्ये ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र राजभागस्यैवाभावात् । एतदर्थमेवैवमुक्तम् । अन्यथा च तुर्थोऽश इत्येव वदेत्।राजभागसंबन्धिचतुर्थांशदानमित्यर्थे तु आ ददीताथ षड्भागमिति वचनविरोधः स्यात् । तथा च प्रनष्टाधि गतं द्रव्यं यः शौल्किकादी राज्ञे समर्पयति तस्मै, राज्ञो यो भाग षष्ठादिरूपः तच्चतुर्थांशः तत्तुल्य उद्धृतषष्ठादिभागाद्धनादवशिष्ट द्दातव्यो दापनीयो न तु राज्ञोंऽशात् तद्विरोधापत्तेरित्यर्थं बोध्यः । उभयत्र तुर्यपादार्थतात्पर्यं वक्तुं विशेषमाह *स्वा म्यनेति । *अधिगन्त्रे, शौल्किकप्रभृतये । अत्र सर्वत्र मा नमाह * यथाहेति। *प्रनष्टेति। पूर्ववत् । *ऊर्ध्वमधिगन्तुरिति संवत्सरादिति शेषः । तथा च संवत्सरानन्तरं स्वामिन्यागते ऽधिगन्तुश्चतुर्थोऽशो भवति, शेषं राज्ञो भवतीत्यर्थः । तत्राधि गन्त्रे चतुर्थांशदाने इयान्भेदः, स्वामिन्यागते प्रागुक्तरीत्या रा षष्ठाद्यंशमुद्धृत्यावशिष्टधनाद्राज्ञः चतुर्थांशसमभागो देयः, अन गते तु तस्मिन्सर्वस्य धनस्य चतुर्थांशो देय इति । एवं राज्ञः शे मित्यत्रापि तस्मिन्नागते पूर्वोक्तरीत्या षष्ठादिभागरूपम्, अनाग तु तस्मिन्सर्वधनं दत्तचतुर्थांशकमिति भेदो बोध्यः ।एवं च रा इत्यस्य मध्यमणिन्यायेनान्वयो बोध्यः ।

३।मनुतात्पर्यविरोधं परिहरति *अत्रेति ।गौतमीये इत्यर्थ उद्देश्यविशेषणत्वादिति भावः । तथा सत्यनातिप्रसङ्गाय तन्म तदुक्तमेव हेतुमाह * राजेति ।

४ । नन्वेवं सर्ववचनानां व्यवस्थायां पादत्रयार्थलाभे मनुमूलयोस्तुर्यपादार्थस्य निर्विषयत्वापत्तिरेव, चतुर्थादिष्व अवशिष्टदानस्य स्वामिने प्रतिपादितत्वादित्यत आह *ह ति । अपिना मनूक्ततुर्यपादसमुच्चयः । यद्यप्यत्र संवत्सरादि प्रक्रान्तं तथाप्युक्तरीत्या मन्वेकवाक्यतयैवाह * त्र्यब्दा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्ति। तथा चात्र परत इत्यत्र त्र्यब्दादिति शेषो बोध्यः। ननु व्ययीकरणानन्तरं तदागमने कथं प्रागुक्ततद्दानसंभवोऽत आह *आगते त्विति। *अवतार्य, पृथक्कृत्य। तस्मिन्प्रक्षिप्य। *तत्समम्, अवशिष्टतत्तुल्यम्। तथा च राजा स्वांशं षष्ठाद्यंशं तथा कृत्वा तत्समं यावदधिगन्तृहस्ताद् गृहीतं तत्संख्याकं स्वामिने दद्यादित्यर्थः। तत्रापि न तज्जन्यवृद्धिं दद्यादपि तु मूलमात्रमेव।"हरेत परत" इत्यनेन व्ययवत् व्यवहारस्यानुज्ञानात्। तथा च व्ययीकरणे व्यवहारे सति वृद्धिद्रव्येण तत्समत्वं तदभावे स्वांशप्रक्षेपेण। ततोऽप्यपूर्त्तौ तत्समत्वं स्वकोशद्रव्येणैव, न त्वधिगन्त्रे यश्चतुर्थांशो दत्तस्तद्ग्रहणेनापि। तस्मै भृतिरूपेण दत्तत्वात्। भृतिरूपस्याप्यादाने कालान्तरे प्रनष्टाधिगतप्रत्यर्पणादिकं न स्यात्। स्वांशमवतार्येति विशेषोक्तेश्चेति बोध्यम्।

९। विशेषमाह *एतच्चेति। अत एव प्राक् तथैव व्याख्यातम्। सङ्कोचे मानमाह *गवादीति। मूलकृदेवेति भावः॥ ३३॥

मि० रथ्याशुल्कशालादिनिपतितस्य सुवर्णादेर्नष्टस्याधिगमे विधिमुक्त्वा अधुना भूमौ चिरनिखातस्य सुवर्णादेर्निधिशब्दवाच्यस्याधिगमे विधिमाह।

या० राजा लब्ध्वा निधिं दद्याद् द्विजेभ्योऽर्द्धं द्विजः पुनः।
विद्वानशेषमादद्यात्स सर्वस्य प्रभुर्यतः॥ ३४॥
इतरेण निधौ लब्धे राजा षष्ठांशमाहरेत्।
अनिवेदितविज्ञातो दाप्यस्तं दण्डमेव च॥ ३५॥

मि० उक्तलक्षणं निधिं राजा लब्ध्वा अर्द्धं ब्राह्म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णेभ्यो दत्त्वा शेषं कोशे निवेशयेत् । ब्राह्मणस्तु वि द्वान् श्रुताध्ययनसम्पन्नः सदाचारो यदि निधिं लभे तदा सर्वमेव गृह्णीयात् । यस्मादसौ सर्वस्य जगत प्रभुः । इतरेण तु राजविद्वद्ब्राह्मणव्यतिरिक्तेन अ विद्वद्ब्राह्मणक्षत्रियादिना निधौ लब्धे राजा षष्ठां शमधिगन्त्रे दत्त्वा शेषं निधिं स्वयमेवाहरेत् ।

यथाह वसिष्ठः,

अप्रज्ञायमानं वित्तं योऽधिगच्छेद्राजा तद्धरे षष्ठमंशमधिगन्त्रे दद्यादिति ।

गौतमोऽपि,

निध्यधिगमो राजधनं भवति, न ब्राह्मणस्या भिरूपस्य, अब्राह्मणोऽप्याख्याता षष्ठमंशं लभेतेत्ये इति ।

अनिवेदित इति कर्तरि निष्ठा । अनिवेदितश्चासं विज्ञातश्च राज्ञेत्यनिवेदिताविज्ञातः । यः कश्चिन्नि लब्ध्वा राज्ञे न निवेदितवान् विज्ञातश्च राज्ञा स स निधिं दाप्यो दण्डं च शक्त्यपेक्षया । अथ निधेर स्वाम्यागत्य रूपकसंख्यादिभिः स्वत्वं भावय तदा तस्मै राजा निधिं दत्त्वा षष्ठं द्वादशं वांश स्वयमाहरेत् ।

यथाह मनुः (अ. ८ श्लो० ३५)

ममायमिति यो ब्रूयान्निधिं सत्येन मानवः ।
तस्याददीत षड्भागं राजा द्वादशमेव वा ॥इति

अंशविकल्पस्तु वर्णकालाद्यपेक्षया वेदितव्यः॥३४॥

बा० १। अव्यवहितसङ्गतिं प्रसङ्गरूपामाह * रथ्येति । इदं नष्ट

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्याख्यानम्।एतेनप्राक्तनम् प्रनष्टपदमपि व्याख्यातम्।*एवम्,उक्तप्रकारेण।*उक्तेति। भूमौ चिरनिखातं सुवर्णादीत्यर्थः।तुर्यपादबलात् द्विजपदं ब्राह्मणपरमित्याह *ब्राह्मणेभ्य इति। एवमग्रेऽपि। फलितमाह *शेषमिति। पुनःशब्दार्थमाह *त्विति। विद्वानित्यस्य व्याख्या *श्रुतेति। न केवलया इत्यादिस्मृत्यन्तरादिदमुपलक्षणमित्याह *सदेति।पुनःशब्दानुषङ्गेण द्वितीयपद्यार्थमाह *इतरेणत्विति। इतरत्त्वमुभयापेक्षमित्याह *राजेति। शेषपूरणेन व्याचष्टे *अधिगन्त्रे इति। यद्यप्यत्र अषष्ठांशमिति छेदेन वाक्यपूर्तिः सिद्धा तथापि उपक्रमे वासिष्ठे च दद्यादित्युक्त्या दानशाब्दत्वस्यैवेष्टत्वेनात्रार्थिकत्वे तद्विरोधापत्तेः शेषपूरणापत्तेः, विद्वद्विप्रविषये सर्वस्येति हेतूक्त्याऽन्यविषये राज्ञः प्रभुत्वसूचनेन तत्रापि तदाहरणस्यार्थसिद्धत्वेन विध्यनुपयोगात्, अत एवानिवेदितेत्यनेन विप्रस्यापि वैपरीत्योक्तेः, अतएव च दानपूर्वकाहरणस्यैव विवक्षितत्वेन तदीयलाभापत्तेश्च, अतएवोपक्रमवाक्यं तथा व्याख्यातम्। अत इग्यण इतिसूत्रादिभाष्यसिद्धान्तमूलकेन प्रविश पिण्डीम् इत्यादिवद्वाक्यैकदेशन्यायेन तन्त्रादिना द्वितीयपादस्य शाब्दमर्थमाह *राजेति। यथाश्रुतार्थत्यागेन तथा व्याख्याने बीजमाह *यथाहेति। *अप्रज्ञायमानमिति। चिरनिखातमित्यर्थः। अनेन वित्तस्य निधित्वं सूचितम्। *तत्, अतः। *निध्यधिगम इति। अधिगम इति कर्मणि घञ्। कर्मधारयः। कडारादिः। अधिगम्यमानो निधिः राजधनं नाधिगन्तुः।*अभिरूपस्य, श्रुताध्ययनादिसम्पन्नस्य ब्राह्मणस्य तु स न राजधनम् अपि तु तस्यैव। एवंचेदं वाक्यत्रयं यथासंभवशेषानुषङ्गाभ्याम् इति बोध्यम्।*अब्राह्मणोऽपि विद्वद्ब्राह्मणभिन्नोऽप्याख्याता तत्कथयिता यदि तदा तस्य षष्ठमंशं लभेते-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्येके इत्यर्थः। अपिना विद्वद्ब्राह्मणसमुच्चयः । तथा च त स्यापि षष्ठांशमात्रप्राप्तौ प्रागुक्तविरोधोऽत आह *एके इति अनेन तदीयसर्वग्रहणेन सह षष्ठांशग्रहणस्य पुरुषभेदेन विकल्पः सूचित इति बोध्यम्।

२। नन्वनिवेदितविज्ञात इत्ययुक्तं, कर्मनिष्ठायां निध्यधिगन्त अन्येन वाऽनिवेदने राज्ञो ज्ञानाभावात्, किं च दाप्य इत्यनेन न्वयासम्भवात्, अत आह *अनिवेदित इतीति। गत्यर्थाकर्मकेत नेनेति भावः। पदार्थमुक्त्वा वाक्यार्थमाह *यः कश्चिदिति विद्वद्ब्राह्मणस्तद्भिन्नो वेत्यर्थः । तमित्यस्यार्थमाह *सर्वं नि धिमिति। विशेषानुक्तेः केवलार्थकैकशब्दस्वरसाच्चाह *शत पेक्षयेति । यदि निध्यधिगन्ता स्वयं निवेदने साक्षात्क प्रयोजको वा न भवति अपित्वन्यैर्निवेदितः सन् राज्ञा विज्ञा भवति तदा स तं निधिं दण्डं च यथाशक्ति दाप्य इति तात्पर्य

३। इतरेणेत्येतत्सूचितमेव विशेषमाह *अथेति। अपिः प्रा क्तप्रनष्टसमुच्चायकः । *भावयति, साधयति। अत्र मानमा *यथाहेति। *ममायमिति। *अनेन कर्मणा द्विकर्मकत्वं ब्रुव *सत्येन, रूपसंख्यादिकथनेन। *तस्येति। अवधेः सम्बन्धित विवक्षया षष्ठी । प्राग्वद् व्यवस्थामाह *अंशेति। *वर्णे सदसद्वर्णचिराचिरकालाद्यपेक्षयेत्यर्थः ॥ ३४ ॥ ३५ ॥

मि० चौरहृतं प्रत्याह ।

या० देयं चौरहृतं द्रव्यं राज्ञा जानपदाय तु ।
अददद्धि समाप्नोति किल्बिषं यस्य तस्य तत् ॥३६

मि० चौरैर्हृतं द्रव्यं चौरेभ्यो विजित्य जानपद स्वदेशनिवासिने यस्य तत् द्रव्यं तस्मै राज्ञा दात

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म्। हि यस्मात् अददत् अप्रयच्छन् यस्य तत् अपहृतं द्रव्यं तस्य किल्बिषमाप्नोति। तस्य चौरस्य च।

यथाह मनुः, (अ० ८ श्लो० ४०)

दातव्यं सर्ववर्णेभ्यो राज्ञा चौरहृतं धनम्।
राजा तदुपभुञ्जानश्चौरस्याप्नोति किल्बिषम्॥ इति।

यदि चौरहस्तादादाय स्वयमुपभुङ्क्ते तदा चौरस्य किल्बिषमाप्नोति। अथ चौरहृतमुपेक्षते तदा जानपदस्य किल्बिषम्। अथ चौरहृताहरणाय यतमानोऽपि न शक्नुयादाहर्तुं तदा तावद्धनं स्वकोशाद्दद्यात्।

यथाह गौतमः,

चौरहृतमवजित्य यथास्थानं गमयेत् कोशाद्वा दद्यादिति।

कृष्णद्वैपायनोऽपि,

प्रत्याहर्तुम् अशक्तस्तु धनं चौरहृतं यदि।
स्वकोशात्तद्धि देयं स्यादशक्तेन महीक्षिता॥ इति।

इति असाधारणव्यवहारमातृकाप्रकरणम्॥ ३६॥

बा० १। *चौरेति। प्रनष्टप्रसङ्गादित्येवेति भावः। ननु स्वयमलब्धं कथं देयम् अत आह *चौरेभ्य इति। ततः शासनपूर्वं गृहीत्वेत्यर्थः। जनपदे भवो जानपदः। अनतिप्रसङ्गाय तस्य च सम्बन्धिशब्दत्वादाह * स्वदेशेति। तथाप्यनतिप्रसङ्गायाह * यस्येति। अनेन वर्णसामान्यपरामर्शः। अत एव मन्वेकवाक्यता। तुः पादपूरणे। यस्येत्यन्तं भिन्नं वाक्यं, तस्येति च भिन्नं, तादित्यस्योभयत्रान्वयः, तदाह * हीति। अस्यार्थमाह *यस्मादिति। तदित्यस्य व्याख्या *अपहृतं द्रव्यमिति। यत्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दोर्मिथः साकाङ्क्षत्वाच्छेषं पूरयति *तस्येति । द्वितीयवाक्यार्थमाह *तस्य चौरस्य चेति । किल्विषमित्यादेरनुषङ्गः । यथाश्रुतार्थं विहाय एवं व्याख्याने मानमाह *यथाहेति । *तदुपभुञ्जा इति । तदुपयुञ्जान इति पाठान्तरम् । अत्र मनुमूलाभ्यां यथाश्रुत विरुद्धमुक्तम् । अतो मन्वेकवाक्यतयैव मूलस्य सम्भवात् वैपरीत्यासम्भवात् द्वेधा व्याख्यानं कृतमिति । तस्याप्रतिदाने राज्ञः तयोः उभयोः किल्विषमाप्नोतीत्युक्तं, तथा सति मनुवचने प्रा न्यूनतानिरासाय विषयव्यवस्थामाह *यदीति । अनेन मनुविषय प्रदर्शितः । मूलविषयमाह *अथेति । एवमपि मूलोत्तरार्धस्य सु जत्वात्तस्य व्यवस्थितत्वाद्वेति भावः । मनुमूलपूर्वार्द्धतात्पर्यार्थमाह

२। *अथेति । तावदित्यनेन न्यूनाधिकभावो निरस्तः । अ मानमाह *यथाहेति । *यथास्थानमिति । यस्य तद्धनं तं प्रा येदित्यर्थः । *कृष्णेति । व्यासोऽप्याहेत्यर्थः । *अशक्तस्तु, अ शक्त एव । राजा भवेदिति शेषः । *हि, तदा । द्विर्बद्धमिति न्या येन सत्यां शक्तौ तथा न कार्यमिति स्पष्टार्थमाह *अशक्ते नेति । *महीति । महीं क्षयति निवासयति गमयति वा, क्षि णोति हिनस्ति शास्ति दण्डयति वा महीक्षित् तेनेत्यर्थः ।

३। *इत्यसाधारणव्यवहारमातृकेति । इति साधारणासाधारणव्यवहारमातृकेति पाठान्तरम् । तस्य च पूर्वं तथा पाठाभा वक्ष्यमाणप्रकारो वा ऽभिप्रायः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ ऋणदानप्रकरणम् ॥ ३ ॥

मि० साधारणासाधारणरूपां व्यवहारमातृकामभिधायाधुनाऽष्टादशानां व्यवहारपदानामाद्यमृणादानपदं दर्शयति, "अशीतिभागो वृद्धिः स्यात्" इत्यादिना

"मोच्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने"

इत्येवमन्तेन। तच्च ऋणादानं सप्तविधम्। ईदृशमृणं देयम्, ईदृशमदेयम्, अनेनाधिकारिणा देयम्, अस्मिन् समये देयम्, अनेन प्रकारेण देयमित्यधमर्णे पञ्चविधम्। उत्तमर्णे दानविधिरादानविधिश्चेति द्विविधमिति। एतच्च—

नारदेन स्पष्टीकृतम्,　　　(व्य० प० १।१)

ऋणं देयमदेयं च येन यत्र यथा च यत्।
दानग्रहणधर्मश्च ऋणादानमिति स्मृतम्॥ इति।

तत्र प्रथममुत्तमर्णस्य दानविधिमाह। तत्पूर्वकत्वादितरेषाम्।

या० अशीतिभागो वृद्धिः स्यान्मासि मासि सबन्धके ॥
वर्णक्रमाच्छतं द्वित्रिचतुःपञ्चकमन्यथा ॥ ३७ ॥

मि०*मासि मासि, प्रतिमासम्। बन्धकं विश्वासार्थं यदाधीयते आधिरिति यावत्। बन्धकेन सहवर्त्तते इति सबन्धकः प्रयोगस्तस्मिन् सबन्धके प्रयोगे प्रयुक्तस्य द्रव्यस्य अशीतितमो भागो वृद्धिर्धर्म्या भवति। अन्यथा बन्धकरहिते प्रयोगे वर्णानां ब्राह्मणादीनां क्रमेण द्वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिचतुःपञ्चकं शतं धर्म्यं भवति । ब्राह्मणेऽधमर्णे द्वि
कं शतं क्षत्रिये त्रिकं वैश्ये चतुष्कं शूद्रे पञ्चकं, मासि
मासीत्येव । द्वौ वा त्रयो वा चत्वारो वा पञ्च वा द्वि
त्रिचतुःपञ्चाः अस्मिन् शते वृद्धिर्दीयते इति द्वित्रि
तुःपञ्चकं शतम् । तदस्मिन् वृद्ध्यायलाभशुल्कोप
दीयते इति संख्याया अतिशदन्तायाः कन् । तद
विधिश्चात्र द्रष्टव्यः ।

इयं च वृद्धिर्मासि मासि गृह्यते इति कालिका । इ
मेव वृद्धिर्दिवसगणनया विभज्य प्रतिदिवसं गृह्य
णा कायिका भवति ।

तथा च नारदेन, (व्य० प० १।१०२।१०३।१०४

कायिका कालिका चैव कारिता च तथा परा
चक्रवृद्धिश्च शास्त्रेषु तस्य वृद्धिश्चतुर्विधा ॥

इत्युक्त्वोक्तम्,

कायाविरोधिनी शश्वत्पणपादादिकायिका।
प्रतिमासं स्रवन्ती या वृद्धिः सा कालिका मता
वृद्धिः सा कारिता नामाधमर्णिकस्वयंकृता।
वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृता ॥ इति ॥ ३

बा० १। पूर्वोत्तरयोर्ग्रन्थसन्दर्भयोः सङ्गतिमाह*साधारणासा
णेति । प्रथमप्रकरणे साधारणमातृका ऽभिहिता, द्वितीयप्र
ऽसाधारणमातृका । एवं च प्रकरणद्वयस्य निरपेक्षस्योत्तरग्र
पयोगित्वेन ताभ्यामुत्तरग्रन्थसङ्गतिरिति भावः । यद्वा
रप्रकरणमेव साधारणासाधारणात्मकम् । देशाद्देशान्तरं याती
दिदुष्टलक्षणं सर्वसाधारणम्, छलं निरस्य भूतेनेत्यादिक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इतरदसाधारणम् । समाप्तावुभयात्मकत्वेन प्रकरणसमापनमिति भावः । *व्यवहारपदानां, मध्ये इति शेषः ।

२ । तत्र तावत् ऋणस्य अदानम् आदानं वा यस्मिन्निति व्युत्पत्तावपि योगरूढोऽयम् ऋणादानशब्दः । तदेतदभिप्रेत्याह *तच्चेति । तत्र तावत् अधमर्णसम्बन्धिभेदानाह * ईदृशमिति । याचनापूर्वकत्वादृणस्य तस्याश्च अधमर्णनिष्ठत्वात् मल्लग्रामादिवद्वेति भावः । एतेन सूचीकटाहन्यायेन वैपरीत्यमुचितमित्यपास्तम् । नारदवचनाच्च । अस्वतन्त्रैरपि स्त्र्यादिभिः कुटुम्बरक्षणार्थं यदृणं गृहीतं तद्देयम्, उक्तवैपरीत्येतु न देयं, पुत्रपौत्रादिरूपेणाधिकारिणा देयम्, अस्मिन्काले देयं, क्वचित्सवृद्धिकं देयं क्वचिदवृद्धिकमित्येतदन्यतरदित्येवमधमर्णे देयं पञ्चप्रकारम्, उत्तमर्णे द्विविधमित्यर्थः ।

३ । * एतच्चेति । उक्तभेदकथनेनास्य योगरूढत्वं चेत्यर्थः । येन देयमित्यधिकारिनिर्देशः । यत्र देयमिति कालनिर्देशः । यथाचेति प्रकारनिर्देशः । देयमित्यस्य सर्वत्रान्वयः । धर्मश्चेति पाठः । द्वन्द्वान्ते श्रूयमाणत्वात्प्रत्येकं सम्बन्धः । तदिति पाठे यदिति शेषः । वैपरीत्ये वैपरीत्यम् इति । यत् तदृणादानमित्यन्वयः ।

एवं स्मृत्यन्तरानुरोधेनास्य सप्तविधत्वमग्रिमोपयुक्तं प्रतिपाद्य अधुना मूलवचनमवतारयति *तत्रेति । तेषां मध्ये इत्यर्थः ।

४ । द्वयोरेवेतिभ्रमनिरासाय वीप्साद्विर्वचनेनाह *प्रतीति । *प्रयोगे, दाने । अत्र विशेषोल्लेखेऽनुपयोगात्फलेऽविशेषाच्चाह *द्रव्यस्येति । अशीतिपदं तत्संख्यापूरके लाक्षणिकं भागपदसाहचर्यादित्याह *अशीतितम इति । तथा च तत्र कर्मधारयो बोध्यः । शास्त्रविहितत्वादेवाह * धर्म्येति । लिङ्गर्थाविवक्षयाऽह *भवतीति । उत्तरार्धं व्याचष्टे *अन्यथेति । अस्य व्याख्या *बन्धकेति । सामान्येनोक्तं स्पष्टार्थं विशिष्याह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*ब्राह्मणे इति। शतमित्यस्याग्रे सर्वत्रानुषङ्गः। एवं भवतीत्यस्य पि। मासि मासीत्यनुवर्त्तते इत्याह *मासीति। तथा च प्र मासं ब्राह्मणादिक्रमात् तथा भवतीत्यर्थः।

५। ननु कथमुक्तार्थलाभस्तत इत्यत आह *द्वौवेति। संख्याऽव्ययेति बहुव्रीहिरिति भावः। * तदस्मिन्निति। तथा च सर्वत्र सम्बन्ध इति भावः। उक्तवृद्धेरुपाधिभेदान्मूलानुक्तं द्वैवि कथयन्नाह * इयं चेति। मूलोक्तेत्यर्थः।

६। मूलानुक्तमाह *इयमेवेति। मूलोक्तैवेत्यर्थः। विशेष ह *दिवसेति। मासस्येति भावः। अत्र मानमाह * त चेति। उक्तोक्तमित्यत्रान्वयः। *तस्य, ऋणस्य। उक्तेति ष:। *कायेति। तदविरोधिनी तदनुकूला यथा तस्य प्र दिनं वृद्धिस्तथा शरीरसत्त्वे प्रातिदिनं वृद्धिरिति तथा दीय नेत्यर्थः। यद्वा यया खेदेन शरीरनाशो न भवति तादृशी लपेत्यर्थः। अधिकदाने खेदेन देहस्यारक्षणेन नाशसंभवात् * शश्वत्, मुहुर्मुहुः प्रातिदिनमिति यावत्। * पणेति। प स्य पादश्चतुर्थांश इत्यर्थः। तथा च पणपादादिरूपा तदविरो नी प्रतिदिनं स्रवन्ती कायिकेत्यर्थः। *स्रवन्ती, आगच्छन्ती उभयत्र मत्वर्थीयष्ठन्। अधमर्णिके बह्वच इत्यनुकम्पादौ ठ ऋणिकेनेति पाठान्तरम्। तदा मत्वर्थीयष्ठन्॥ ३७॥

मि० ग्रहीतृविशेषेण वृद्धेः प्रकारान्तरमाह।

या० कान्तारगास्तु दशकं सामुद्रा विंशकं शतम्।

मि० कान्तारमरण्यं तत्र गच्छन्तीति कान्ता गाः। ये वृद्ध्या धनं गृहीत्वाऽधिकलाभार्थमतिग प्राणधनविनाशशङ्कास्थानं प्रविशन्ति ते दशकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दद्युः, ये च समुद्रगास्ते विंशकं शतं, मासि मासीत्येव। एतदुक्तं भवति । कान्तारगेभ्यो दशकं शतं सामुद्रेभ्यश्च विंशकं शतम् उत्तमर्ण आदद्यात् । मूलनाशस्यापि शङ्कितत्वादिति ।

मि० इदानीं कारितां वृद्धिमाह ।

या० दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु ॥३८॥

मि० सर्वे वा ब्राह्मणादयोऽधमर्णाः अबन्धके सबन्धके वा स्वकृतां स्वाभ्युपगतां वृद्धिं सर्वासु जातिषु दद्युः । क्वचिदकृतापि वृद्धिर्भवति ।

यथाह नारदः, (व्य० प० १।१०८)

न वृद्धिः प्रीतिदत्तानां स्यादनाकारिता क्वचित् ।
अनाकारितमप्यूर्ध्वं वत्सरार्द्धाद्धि वर्द्धते ॥ इति ।

यस्तु याचितकं गृहीत्वा देशान्तरं गतस्तं प्रति—
कात्यायनेनोक्तम्,

यो याचितकमादाय तमदत्त्वा दिशं व्रजेत् ।
ऊर्ध्वं संवत्सरात्तस्य तद्धनं वृद्धिमाप्नुयात् ॥ इति ।

यश्च याचितकमादाय याचितोऽप्यदत्त्वा देशान्तरं याति तं प्रति—

तेनैवोक्तम्,

कृत्वोद्धारमदत्त्वा यो याचितस्तु दिशं व्रजेत् ।
ऊर्ध्वं मासत्रयात्तस्य तद्धनं वृद्धिमाप्नुयात् ॥ इति ।

यः पुनः स्वदेशे स्थित एव याचितो याचितकं न ददाति तं याचनकालादारभ्य वृद्धिं दापयेद्राजा ।

२१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथाह,

स्वदेशेऽपि स्थितो यस्तु न दद्याद्याचितः क्वचित्।
तं ततोऽकारितां वृद्धिमनिच्छन्तं च दापयेत्॥ इति
अनाकारितवृद्धेरपवादो नारदेनोक्तः, (अ. २।३६)
पण्यं मूल्यं भृतिर्न्यासो दण्डो यश्च प्रकल्पितः।
वृथादानाक्षिकपणा वर्द्धन्ते नाविवक्षिताः॥ इति
अविवाक्षिता अनाकारिता इति॥ ३८॥

बा० १। *ग्रहीत्रिति। अथेत्यादिः। *दशकमिति। पूर्ववत् *विंशकमिति। डृवुन्नन्तम्। प्रकरणाद्विशेषपरत्वमित्याह *अरण्य मिति। कर्मणोऽधिकरणत्वविवक्षया सप्तमी *तत्रेति। ता त्यर्थः। परिखेतिवत् डः। अत एव तथैव पदार्थमुक्त्वा वाक्या र्थमाह *ये इति। तत्रापि अरण्यसामान्यं न विवक्षितमिति चयन्नाह *अतीति। अभ्यर्हितत्वात्प्राणस्य पूर्वनिपातः। वस्तु ऽविनाशस्थानेपि आह *शङ्केति। तत्रापि प्रकर्ष इत्याह *प्रा अपकर्षेणाह *दद्युरिति।

२। *ये च, ये तु। सामुद्रा इत्यत्रेदमर्थेऽणिति सूचय *समुद्रगा इति। दद्युरित्यस्यानुषङ्गः। मासि मासीत्यनुव सामर्थ्यादित्याह *मासीति।

३। ननु तथा सति यदि विनाशस्तावत्तद्दानमपि कथम तात्पर्यार्थमाह *एतदिति। आदावेवेति भावः। इदं चानन्त दवन्धकप्रयोगविषयम्। अत एवाह *मूलेति।

४। *कारितामिति। अत एव मूले वाशब्दो विकल्पार्थ तदाह *सर्वे इति। अस्य व्याख्या *ब्राह्मणेति। अत्र ब्राह्मणादीनामधमर्णत्वं प्रदर्शनमात्रं, हीनोत्तमभावमपरि य यथाकथं चिदुत्तमर्णत्वमधमर्णत्वं च भवतीत्यर्थः। सं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मानाभावादाह * अबन्धके इति । प्रयोगे इति शेषः । यथाश्रुतासंगतेराह * स्वाभ्युपेति । उद्देश्यस्याधिकरणत्वविवक्षया आह * सर्वास्विति ।

५। विशेषमाह *क्वचिदिति । *न वृद्धिरिति। वृद्धिं कुर्वन्तमधमर्णमुत्तमर्णः प्रयुङ्क्ते इति णिचि निष्ठायाम् आङा कारिताशब्दस्य समासे ततो नञा तस्य समास इति कश्चित् । अकृतेति स्वारस्यात् प्रार्थयन्तीतिवत् णिजिति तु तत्त्वम् । अत एव स्वकृतामित्युक्तं मूले। एवं रीतिः कारितेत्यत्रापि बोध्या। अत एव स्वयं कृतेत्येव तत्रोक्तम् । एवं चाकृता वृद्धिस्त्वं यथेच्छं व्यवहरेति दत्तानां क्वचिदपि न स्यात् । अत्र प्रीतिदत्तेत्यनेन ग्रहीतुर्याचनाभावः सूचितः। अत एव तत्र विशेषं वक्ष्यति ईदृशेऽपि स्थले । हिस्त्वर्थे। *वत्सरार्धाद्धि, वत्सरार्धात्तु। *ऊर्ध्वं, षण्मासोत्तरं तु । * अनाकारितमपि, अर्शआद्यजन्तं, धनं वर्धते इत्यर्थः । विवर्धते इति पाठान्तरम् । कश्चिन्मते ऽकृतेत्यर्थः स्वोक्ताविरुद्ध इति बोध्यम् । वर्द्धनप्रकारस्तु सबन्धाबन्धकप्रकारभेदकृतः प्रागुक्तो द्रष्टव्यः ।

६। विशेषान्तरमाह *यस्त्विति। याच्ञाप्राप्तं याचितकमित्यमरः। वृद्धिं विना प्रार्थनया गृहीतमित्यर्थः । *तं, तादृशमर्थं, विना याचनामिति शेषः । अत एव तत्र विशेषं वक्ष्यति ।

७। तृतीयं विशेषमाह *यश्चेति । योऽपीत्यर्थः । यातीति वर्त्तमानसामीप्ये इति भूते लट् ।

८। *तेनैव, कात्यायनेनैव। *कृत्वोद्धारमिति। याचितकरूपेणोद्धारमादायेत्यर्थः। कृतोद्धारमिति पाठे कर्मधारयः। गृहीतयाचितकमित्यर्थः। उधार इति भाषाप्रसिद्ध उद्धारः। कर्मणि घञ्। उदित्यस्य वृद्धिमुल्लङ्घ्येत्यर्थः। * तु, अपि। यद्वा य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यग्रे योज्यो यथाश्रुत एव। याचित इत्यत्र अपीति शेषः।

९। चतुर्थविशेषमाह *यः पुनरिति। यास्त्वित्यर्थः। *या-चितः,याचितोऽपि। *याचनेति। अधमर्णयाचनेत्यर्थः। * स्वदे- यस्तु स्वदेशे स्थितः सन् याचितोऽपि क्वचित्कदाचित्तन्न द- दित्यर्थः। क्वचिदिति देशविशेषणं वा। अनिच्छन्तं च त- तम् अकारिताम् अकृतामपि वृद्धिं प्रागुक्तरीत्या ततोऽधम- याचनकालादारभ्य राजा दापयेदित्युत्तरार्धार्थः।

१०। *अनाकारितेति। न वृद्धिः प्रीतीति नारदेनैव षड्मा- सानन्तरं प्रीतिदत्ते उक्ताया इत्यर्थः। *नारदेनेति। तेनैवेत्यर्थः। पण्यं विक्रेयं वस्तु। मूल्यं धान्यादि। भृतिर्वेतनम्। वृथादा- ति त्रयाणामितरेतरद्वन्द्वः। वृथादानं वन्दिचारणादिभ्यो द- नम्। आक्षिकं द्यूतजितम्। पणः व्यवहारे क्रियमाणनिबन्ध- न्यासान्यपण्यादिषु दास्यामीति दृढप्रतिज्ञायां कृतायां स- तावत्तेषां पण्यादीनां परकीयत्वेनाद्दानेऽनाकारितवृद्धिः प्राप्ता- नापोद्यते इति भावः।

११। न्यासपदेन तु न्यासविशेषो ग्राह्यः। तथा हि। विश्वस्ते पुरुषे रूपसंख्याप्रदर्शनेन द्रव्ये न्यस्ते स यदि मयैत- द्वहियते कालान्तरे एतत्संख्याकमेतज्जातीयं च द्रव्यं दास्- मीति स्वामिनः पुरस्तात् कथयति स च स्वामी तथैवाङ्गीकु- तादृशे न्यासे ऽकृता वृद्धिर्नास्तीत्यर्थः। षण्मासं वृद्ध्यभाव- सिद्धत्वात् स्वामिने ऽकथयित्वैव व्यहारे कृते सोदयस्य दे- त्वाच्चेति बोध्यम्। अविवाक्षिता इत्यत्र अर्शआद्यच्। त- *अनाकारिता इति ॥ ३८ ॥

मि० अधुना द्रव्यविशेषेण वृद्धिविशेषमाह।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या० सन्ततिस्तु पशुस्त्रीणां

मि० पशूनां स्त्रीणां च सन्ततिरेव वृद्धिः। पशूनां स्त्रीणाम् पोषणासमर्थस्य तत्पुष्टिसन्ततिकामस्य प्रयोगः सम्भवति । ग्रहणं च क्षीरपरिचर्यार्थिनः ।

२ अधुना प्रयुक्तस्य द्रव्यस्य वृद्धिग्रहणमन्तरेणापि चिरकालावस्थितस्य कस्य द्रव्यस्य कियती परा वृद्धिरित्यपेक्षिते आह ।

या० रसस्याष्टगुणा परा ।
वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परा ॥ ३९ ॥

मि० रसस्य तैलघृतादेर्वृद्धिग्रहणमन्तरेण चिरकालावस्थितस्य स्वकृतया वृद्ध्या वर्द्धमानस्याष्टगुणा वृद्धिः परा नातः परं वर्द्धते । तथा वस्त्रधान्याहिरण्यानां यथासङ्ख्यं चतुर्गुणा त्रिगुणा द्विगुणा च वृद्धिः परा ।

वसिष्ठेन तु रसस्य त्रैगुण्यमुक्तम्,

द्विगुणं हिरण्यं त्रिगुणं धान्यं धान्येनैव रसा व्याख्याताः पुष्पमूलफलानि च। तुलाधृतम् अष्टगुणमिति ।

मनुना तु— (अ० ८।१५१)

धान्यस्य पुष्पमूलफलादीनां च पञ्चगुणत्वमुक्तम्,
धान्ये शदे लवे वाह्ये नातिक्रामति पञ्चताम्। इति ।

शदः क्षेत्रफलं पुष्पमूलफलादि । लवो मेषोर्णाचमरीकेशादिः। वाह्यो बलीवर्दतुरगादिः । धान्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शदलववाद्यविषया वृद्धिः पञ्चगुणत्वं नातिक्राम
ति । तत्राधमर्णयोग्यतावशेन दुर्भिक्षादिकालवशे
च व्यवस्था द्रष्टव्या । एतच्च सकृत्प्रयोगे सकृदाह
णे च वेदितव्यम् । पुरुषान्तरसंक्रमणेन प्रयोगान्तर
करणे तस्मिन्नेव वा पुरुषे अनेकशः प्रयोगान्तरक
सुवर्णादिकं द्वैगुण्याद्यतिक्रम्य पूर्ववद्वर्द्धते । सकृत्प्र
योगेऽपि प्रतिदिनं प्रतिमासं प्रतिसंवत्सरं वा वृद्ध्युत्क
हरणेऽधमर्णदेयस्य द्वैगुण्यासम्भवात्पूर्वाहृतवृद्ध्या
द्वैगुण्यमतिक्रम्य वर्द्धते एव ।

यथाह मनुः, (अ० ८।१५१)

कुसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहिता ।

सकृदाहृतेत्यपि पाठोऽस्ति । उपचयार्थं प्रयु
द्रव्यं कुसीदं तस्य वृद्धिः कुसीदवृद्धिः द्वैगुण्यं नात्ये
ति नातिक्रामति, यदि सकृदाहित्ता सकृत्प्रयुक्ता
पुरुषान्तरसंक्रमणादिना प्रयोगान्तरकरणे द्वैगुण्यमत्ये
ति । सकृदाहृतेति तु पाठे शनैःशनैः प्रतिदिनं प्र
मासं प्रतिसंवत्सरं वा ऽधमर्णादाहृता द्वैगुण्यम्
तीति व्याख्येयम् ।

तथा गौतमेनाप्युक्तम्, चिरस्थाने द्वैगुण्यं
योगस्येति ।

प्रयोगस्येत्येकवचननिर्देशात्प्रयोगान्तरकरणे
गुण्यातिक्रमोऽभिप्रेतः । चिरस्थाने इति निर्देशात्
नैः शनैर्वृद्धिग्रहणे द्वैगुण्यातिक्रमो दर्शितः ॥ ३९

बा० १। *स्त्रीणां चेति। दासीनां नकुलस्त्रीणामित्यर्थः। त्वर्थ
*एवेति । एतत्प्रसङ्गमाह *पशूनामिति । *पुष्टीति । द्वन्द्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हुव्रीहिः । इदं दातुरुक्तम् । अथप्रतिग्रहीतुराह *ग्रहणं चेति । *क्षीरेति । द्वन्द्वोत्तरं तत्पुरुषः । यथासंख्यमुभयत्र बोध्यम् ।

२।*प्रयुक्तेति । वृद्धिलोभेनेति भावः । अत एवाह *वृद्धी-ति । ग्रहणं न तु करणम् । *वास्थितस्येति । विषये । तेषां मध्ये इति शेषः । स्थितत्वे इति पाठेपि तेषां मध्ये इति शेषः । अन्यथा नि-र्धारणे बहुवचनौचित्येन यथाश्रुतासम्बद्धत्वं स्पष्टमेव । *परा, उत्कृष्टा चरमेति यावत् । *तैलेति । घृततैलादेरित्युचितं, शाक-पार्थिवादिर्वा । तस्य लघ्वक्षरत्वात् । कारितवृद्ध्याभिप्रायेणाह *स्वेति । *परेत्यस्य तात्पर्यार्थमाह *नातः परमिति ।

३ । उत्तरार्धार्थमाह *तथेति । हिरण्यशब्देनात्र धनं द्रव्याप-पर्यायं सर्वम् ।

४ । पक्षान्तरं रसे आह *वासिष्ठेन त्विति । परत्वं वृद्धेरिति शेषः । अतिदिशति *धान्येनैवेति । *फलानिचेति । व्या-ख्यातानीति शेषः । *तुलेति । तुलायां धृतं निहितं त्रितयं हि-रण्यधान्यरसात्मकमदत्तं चिरकालस्थितमित्यर्थः ।

५ । धान्यपुष्पाद्यंशे पक्षान्तरमाह *मनुनात्विति । प्राग्वत् । आदिग्राह्यं वचने स्पष्टम् । पूर्वनिपातप्रकरणानित्यत्वात्पुष्पस्य पूर्वनिपातः । बलीवर्दस्याभ्यर्हितत्वात्सः । पदार्थानुक्त्वा वाक्या-र्थमाह *धान्येति । सर्वत्र विषयसप्तमीत्याह *विषयेति । पञ्च-तामित्यस्य लक्ष्यार्थमाह *पञ्चगुणत्वमिति । इतीत्यस्य अर्थ इति शेषः । एवं सति सम्भवात् तस्य दुष्टत्वाच्च विकल्पान्यप्र-कारेण विरोधं परिहरति *तत्रेति । तेषु पक्षेष्वित्यर्थः । रकीययोग्यतायास्तथ्यतः स्पष्टमज्ञानादाह *दुर्भिक्षेति ।

६ । विशेषमाह *एतच्चेति । एकस्मिन्नेव ऋणदानप्रयोगे एकदैव सवृद्धिकमूलग्रहणे चेत्यर्थः । एकस्मिन् ऋणदानप्रयोगे दश-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रूपकेषु दत्तेषु प्रतिदिनं प्रतिमासं प्रतिसंवत्सरं वा वृद्धौ णे कालविलम्बवशात् वृद्धेर्द्वैगुण्यातिक्रमेणापि वृद्धिः प्राप्ता सवृद्धिकमूलमेकदैव गृह्णन्नुत्तमर्णो मूलद्विगुणं तेन सह तिरूपकपरिमितं द्रव्यं गृह्णीयात् इत्यभिप्रायः।

७। आद्यस्य प्रत्युदाहरणमाह *पुरुषान्तरेति। अन्यस्मै य दानेनेत्यर्थः। प्रयोगान्तरकरणं द्वेधा, तत्रैकमुक्त्वा द्विती ह * तस्मिन्नेवेति। *अनेकशः, पुनः पुनः। अनेकश रेकसेकाभ्यामिति पाठे प्रयुक्तद्रव्यैकदेशग्रहणेन न्यूनीकरणं तत्रैव प्रक्षेपेणाधिकीकरणं सेकः। रिच वियोजनसम्पर्च षिच क्षरणे। तत्र तेन सर्वग्रहणादाह *सुवर्णेति। *पू अशीतिभाग इत्याद्युक्तप्रकारेण। अयं भावः। यदा तदेव तिसंख्याकं द्विगुणद्रव्यम् अन्यस्मै दीयते पूर्वं यस्मै दत्तं तस वा दीयते प्रयोगान्तरेण तथा वा क्रियते तदा पूर्वप्रयोगे णीभूतमिति कृत्वा पुनः क्रियमाणे प्रयोगान्तरे न वर्द्धते इति तदा दीयमानस्य तस्यैव मूलत्वेन वृद्धेरिष्टत्वात्। अत एव मप्रयोगे एव द्वैगुण्याद्यतिक्रमेण वृद्धिर्न, द्वितीयादिप्रयोगे गुण्याद्यप्यत्येतीति।

८। सकृदाहरणे चेत्यस्य प्रत्युदाहरणमाह *सकृदिति। यस्य, मूलस्य। असंभवस्त्वेवं, प्रतिदिनादिक्रमेण तद्दाने य दिने या वृद्धिर्दीयते तद्दिनात्पूर्वमभिवृद्धस्य धनस्य वि पुनरपि नूतनत्वेन वृद्धिः एवं च वस्तुतः प्रयोगान्तरमिव भ ति यावत् द्वैगुण्यं प्राप्नोति तावदविच्छेदेन वृद्धस्य द्रव्य वस्थित्यभाव इति।

९। अत्रोभयत्र मानमाह *यथाहेति। आहितेत्यस्ये शेषः। क्वचित्तथा पाठ एव। पाठभेदेन द्वयोर्लाभो नैकस्मादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*सकृदिति । तत्राद्यपाठेनाद्यलाभ इत्याह *यदीति । एतद्विशेषणतात्पर्यमाह *पुरुषान्तरेति । आदिना प्रागुक्तद्वितीयपरिग्रहः। द्वितीयेन द्वितीयलाभ इत्याह * सकृदिति । सकृदाहृतेतितुपाठे इति पाठः । यदि सकृदाहृता मूलसहिता वृद्धिरेकदैव गृहीतेत्यार्थः । एतत्तात्पर्यार्थमाह *शनैः शनैरिति । अन्यथेत्यादिः । शनैरित्यस्यैव व्याख्या *प्रतीति ।

१०। मानान्तरमाह *तथेति। तद्वदित्यर्थः। अत एव अपिना पौनरुक्त्यं न। स्थानं स्थितिः। प्रयोगस्य प्रयुज्यमानऋणस्य प्रतिदिनादिक्रमेण वृद्धिग्रहणं विना चिरकालस्थितौ सत्यां द्वैगुण्यं भवतीत्यर्थः। उक्तमित्यस्य ध्वनितमित्यर्थ इति सूचयन्नाह *प्रयोगेति । अनेनाद्यार्थलाभ उक्तः । द्वितीयस्य तमाह * चिरेति । *शनैरिति । उक्तरीत्येति भावः । *दर्शितः, अभिप्रेतः ॥३९॥

मि० ऋणप्रयोगधर्मा उक्ताः। सांप्रतं प्रयुक्तस्य धनस्य ग्रहणधर्मा उच्यन्ते ।

प्रपन्नं साधयन्नर्थं न वाच्यो नृपतेर्भवेत् ।
साध्यमानो नृपं गच्छेत् दण्ड्यो दाप्यश्च तद्धनम्॥४०॥

प्रपन्नमभ्युपगतमधमर्णेन धनं साक्ष्यादिभिर्भावितं वा साधयन्प्रत्याहरन् धर्मादिभिरुपायैरुत्तमर्णो नृपतेर्न वाच्यो निवारणीयो न भवति। धर्मादयश्चोपाया मनुना दर्शिताः, (अ. ८।४९)

धर्मेण व्यवहारेण छलेनाचरितेन च।
प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च ॥ इति ।

धर्मेण प्रीतियुक्तेन सत्यवचनेन । व्यवहारेण साक्षिलेख्याद्युपन्यासेन । छलेन उत्सवादिव्याजेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूषणादिग्रहणेन । आचरितेन भोजनेन । पञ्चमेनो
येन बलेन निगडबन्धनादिना । उपचयार्थं प्रयु
द्रव्यमेतैरुपायैरात्मसात्कुर्यादिति । प्रपन्नं साधय
न वाच्य इति वदन् अप्रतिपन्नं साधयन् राज्ञा
वारणीय इति दर्शयति । एतदेव स्पष्टीकृतं—

कात्यायनेन,

पीडयेद्यो धनी कश्चिद्दाणिकं न्यायवादिनम् ।
तस्मादर्थात्स हीयेत तत्समं चाप्नुयाद्दमम् ॥ इति

यस्तु धर्मादिभिरुपायैः प्रपन्नमर्थं साध्यमानो
च्यमानो नृपं गच्छेत् राजानमभिगम्य साधयन्तमभि
युङ्क्ते स दण्ड्योभवति शक्त्यनुसारेण, धनिने तद्
दाप्यश्च राज्ञा ।

दापने च प्रकारा दर्शिताः,

राजा तु स्वामिने विप्रं सान्त्वेनैव प्रदापयेत् ।
देशाचारेण चान्यांस्तु दुष्टान् संपीड्य दापयेत् ॥
रिक्थिनं सुहृदं वापि छलेनैव प्रदापयेत् । इति

साध्यमानो नृपं गच्छेदित्येतत् स्मृत्याचारव्यपेत
तेनेत्यस्य प्रत्युदाहरणं च बोद्धव्यम् ॥ ४० ॥

बा० १ । सङ्गतिमाह *ऋणप्रयोगेति । ऋणदानेत्यर्थः । प्रपन्नमपि
त्यस्य व्याख्या *अभ्युपगतमधमर्णेनेति । अर्थपदार्थो *द्रिव्य
मिति । व्याख्यानान्तरमाह *साक्ष्यादीति । अत एवान्यथा वेशे
पूरयति *धर्मादिभिरिति । लिङ्गार्थाविवक्षया आह *भवतीह *
२ । तानेवाह *धर्मादयश्चेति । तेत्वित्यर्थः । प्रकृतोपयोग्यानशास्त्रे
नाह *प्रीतीत्यादिना । तैर्भावितत्वादाह *उपन्यासेनेति । य
श्रुतार्थासम्भवाल्लक्ष्यार्थमाह *उत्सवेति । आचरितेनेत्यस्याह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*भोजनेनेति। तद्दानेनेत्यर्थः। अचरितेन अभोजनेनेति पाठान्तरम्। तस्य भोजनाभावेनेत्यर्थः। चर गतिभक्षणयोः। एतेषां सर्वेषामुपायत्वं सूचयन्नाह *उपायेनेति। बलेनेत्यस्य व्याख्या *निगडेति।

३। एवं पदार्थानुक्त्वा वाक्यार्थमाह *उपचयेति। एतैः पञ्चभिर्व्यस्तैः समस्तैर्वा यथासम्भवम्। इतीत्यस्य अर्थ इति शेषः।

४। ध्वनितमाह *प्रपन्नमिति। अप्रतिपन्नम् अनङ्गीकृतादि साधयन् प्रत्याहरन्, एतैरुपायैरिति शेषः। ध्वनितत्वेनास्पष्टत्वात् च्विः। ऋणिके मत्वर्थीयष्ठन्। * न्यायेति। यथार्थानङ्गीकारादिभाषिणमित्यर्थः। * दमं, दण्डम्।

५। उत्तरार्धार्थमाह *यास्त्विति। उपायैरित्यस्य साध्येत्यत्रान्वयः। कर्मणि लडित्याह *याच्येति। गमनमात्रेण नानिष्टम्, अतस्तस्य लक्ष्यार्थमाह *राजानमिति। लिङर्थाविवक्षया आह *अभियुङ्क्ते इति। अनेन गच्छन्नित्यपपाठ इति सूचितम्। विशेषाभावादाह * शक्त्यनुसारेणेति।

६। प्रपन्नसाधने उत्तमर्णस्य प्रागुक्तप्रकारवदत्रापि शेषसूचनाय तानाह * दापनेचेति। मनुनैवेति भावः। अधमर्णविशेषेणात्र प्रकारभेद इत्याह * विप्रमिति। एवं प्रागपि बोध्यम्। * सान्त्वेन, प्रीतियुक्तसत्यवचनेन। एवेनेतरव्यवच्छेदः। एवमग्रेऽपि। *देशेति। साक्षिलेख्याद्युपन्यासरूपव्यवहारेण भोजनादिरूपेण च विप्रान्यानित्यर्थः। अनेन प्रागुक्तद्वयसंग्रहः। तत्रैव विशेषमाह *दुष्टानिति। अयं प्रागुक्तपञ्चमः प्रकारः। तृतीयमाह * रिक्थिनमिति। विषयद्वयमत्र। एवं च सामादयो नीतिशास्त्रोक्ता उपाया एवात्र शब्दान्तरेणोक्ता इति बोध्यम्।

७। नन्वत्र व्यवहाराभावेन कथं दण्डादिदापनं राजकृतमत आह * साध्येति। अयं भावः। स्मृत्याचारेत्यनेन तादृशस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यवहारपदत्वमुक्तम्, अत्र तु तदविरुद्धमार्गेणाधर्षितत्वाद्रा
निवेदनीयम्, यदि निवेदयति तदा तन्निवेद्यमानं व्यवहारप
भवति। अत एव दण्डादिमात्रं विधीयते। तत्राप्यादौ द
पश्चात् तस्येति निःशङ्कमविचार्य तथा कार्यमिति तद्विप
दाहरणमेतदित्यर्थ इति ॥ ४० ॥

मि० बहुषूत्तमर्णिकेषु युगपत्प्राप्तेष्वेकोऽधम
कः केन क्रमेण दाप्यो राज्ञेत्यपेक्षिते आह।

या० गृहीतानुक्रमाद्दाप्यो धनिनामधमर्णिकः।
दत्त्वा तु ब्राह्मणायैव नृपतेस्तदनन्तरम् ॥ ४

मि० समानजातीयेषु धनिषु येनैव क्रमेण
गृहीतं तेनैव क्रमेणाधमर्णिको राज्ञा दाप्यः। भि
जातीयेषु तु ब्राह्मणादिक्रमेण ॥ ४१ ॥

बा० उत्तमर्णिके बह्वच इति अनुकम्पादौ ठच्। एवम
र्णिकेऽपि बोध्यम्। अव्यहितसङ्गतिरनेनोक्ता। * गृही
ग्रहणानुक्रमादित्यर्थः। धनिनामित्युद्देश्यस्य सम्बन्धत्वविव
षष्ठी। धनमिति शेषः। उत्तरार्धलब्धां व्यवस्थामाह *
नेति। सत्सु इति शेषः। तुरुक्तवैलक्षण्ये। तथा च नृपतेरि
लक्षणमग्रिमस्यापि ॥ ४१ ॥

मि० यदा पुनरुत्तमर्णो दुर्बलः प्रतिपन्नमर्थं ध
दिभिरुपायैः साधयितुमशक्नुवन् राज्ञा साधित
भवति तदाऽधमर्णस्य दण्डमुत्तमर्णस्य च भ
दानमाह।

या० राज्ञाऽधमर्णिको दाप्यः साधिताद्दशकं शत
पञ्चकं तु शतं दाप्यः प्राप्तार्थो ह्युत्तमर्णिकः॥४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि० अधमर्णिको राज्ञा प्रतिपन्नार्थात्साधिताद्दशकं शतं दाप्यः । प्रतिपन्नस्य साधितार्थस्य दशमांशं राजाऽधमर्णिकाद्दण्डरूपेण गृह्णीयादित्यर्थः । उत्तमर्णस्तु प्राप्तार्थः पञ्चकं शतं भृतिरूपेण दाप्यः । साधितार्थस्य विंशतितमं भागमुत्तमर्णाद्राजा भृत्यर्थं गृह्णीयादित्यर्थः । अप्रतिपन्नार्थसाधने तु दण्डविभागो दर्शितो निह्नवे भावितो दद्यादित्यादिना ॥ ४२ ॥

बा० १। अवतरणं ससङ्गतिकमाह *यदा पुनरिति। यदात्वित्यर्थः । अशक्तौ हेतुं सूचयन्नाह * दुर्बल इति । चस्त्वर्थे, व्युत्क्रमेण समुच्चये वा । * भृतिदानं, शब्दानुशासनमाचार्यस्येति वत्प्रयोगः ।

२। शब्दमर्थमाह *अधमर्णिक इति। साधितादित्यस्य साकाङ्क्षं प्रकृतं शेषमाह *प्रतीति। कर्मधारयः। *दशकमिति। पञ्चद्दशतौ वर्गे वेति पक्षे परिमाणार्थककन्नन्तम् । शतमित्यत्र प्रतीति शेषः, तत् प्रति दशसंख्यकमित्यर्थः । एवं पञ्चकं शतमित्यत्रापि बोध्यम् ।

३। तत्र शतग्रहणमुपलक्षणमिति प्रतीत्यत्र कर्मधारयम् अन्यस्मै दापनाविवक्षां च सूचयन्नस्य तद्दशमांशत्वसम्भवात्फलितमर्थमाह *प्रतीति। प्राग्वत् अर्थद्वयमाह क्रमेण *उत्तमर्ण इत्यादिना। मूलेतुर्व्युत्क्रमे इत्याह *उत्तमर्णस्त्विति। *प्राप्तेति। अनेनातथात्वे नैवमिति सूचितम् । एतत्सूचक एव हिः । भृतिर्वेतनम् । अत्रास्य तत्त्वासम्भवादेतस्यैव सम्भवादाह * विंशतीति ।

४। नन्विदमुभयमयुक्तं, भृतिदण्डयोरत्रानुक्त्या राज्ञस्तत्तदंशग्रहणमात्रप्रतीतेरिति चेन्न । ग्रहणप्रतीतेर्निर्विवादत्वेन तत्र हेतुपरामर्शे दृष्टे सति अदृष्टकल्पनाया अन्याय्यत्वेन तत्सम्भवे तदभा-

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेनाधमर्णे अङ्गीकृतार्थादानरूपापराधरूपस्य दृष्टहेतोः सत्त्वम्
नोत्तमर्णे ऽपराधाभावेन केवलाशक्तिसत्त्वेन गुरुत्वलघुत्वता
म्येनाधमर्णादपराधेन दण्डस्य ग्रहणमुत्तमर्णादशक्त्या भृतोस्य
तात्पर्यात् ।

८। ननु प्रपन्नार्थसाधने इदं सर्वमुक्तम् अप्रतिपन्ने
गतिरत आह *अप्रतीति। *दण्डेति। ससाधनप्रकार इत्या
तत्रापि वक्ष्यते इत्युक्तं स्थितं, तदत्रोक्तमेवेति बोध्यम्॥ ४

मि॰ सधनमधमर्णिकं प्रत्युक्तम्। अधुना नि
मधमर्णिकं प्रत्याह ।

या॰ हीनजातिं परिक्षीणमृणार्थं कर्म कारयेत्
ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयम्॥ ४

मि॰ ब्राह्मणादिरुत्तमर्णो हीनजातिं क्षत्रिय
जातिं पारिक्षीणं निर्धनमृणार्थं ऋणनिवृत्त्यर्थम्
स्वजात्यनुरूपं कारयेत् तत्कुटुम्बाविरोधेन ।
ह्मणः पुनः परिक्षीणो निर्धनः शनैः शनैः यथो
यथासम्भवमृणं दाप्यः। अत्र च हीनजातिग्र
समजातेरप्युपलक्षणम् । अतश्च समानजाति
परिक्षीणं यथोचितं कर्म कारयेत्। ब्राह्मणग्रह
श्रेष्ठजातेरुपलक्षणम्। अतश्च क्षत्रियादिरपि परिक्षी
वैश्यादेः शनैः शनैर्दाप्यो यथोदयम् ।

एतदेव मनुना स्पष्टीकृतम्। (अ. ८. श्लो. १७७
कर्मणापि समं कुर्याद्धनिकेनाधमर्णिकः ।
समोऽपकृष्टजातिश्च दद्याच्छ्रेयांस्तु तच्छनैः॥ इ
उत्तमर्णेन समं निवृत्तोत्तमर्णाधमर्णव्यपदेश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मानमधमर्णः कर्मणा कुर्यादित्यर्थः ॥ ४३ ॥

बा० १। हीनजातिमित्यत्र शूद्रादिरेव न विवक्षितः उत्तरार्धस्वा-
स्यादित्याह *ब्राह्मणेति । योग्यतयाऽऽह *उत्तमर्ण इति ।
रिक्षीणमित्यस्य व्याख्या अनतिप्रसङ्गाय योग्यतया * निर्ध-
मिति। मक्षिकार्थो धूम इतिवत् ऋणार्थमितीत्याह *ऋणानिवृ-
यर्थमिति । योग्यतयाऽनतिप्रसङ्गायाह *स्वेति । नन्वेवं
त्कुटुम्बविनाशः स्याद्रक्षणाभावादत आह * तादिति । तदु-
योगि सम्पाद्य अवशिष्टकाले इदं तेन कार्यमिति भावः ।

२। उत्तरार्धार्थमाह *ब्राह्मणइति । त्वर्थमाह *पुनरिति ।
नैरित्यत्र वीप्सान्तर्भाव इत्याह * शनैः शनैरिति । यथोद-
मित्यस्य प्रसिद्धार्थो नेत्याह * यथासंभवमिति ।

३। विशेषद्वयमाह * अत्र चेत्यादि । मूलवचने इत्यर्थः ।
पिना तस्यापि संग्रहस्तेन न सर्वथा न्यूनता । *समानजातिम-
,ब्राह्मणादिकम् । च्विः प्राग्वत् । *कर्मेति । समोऽपकृष्टजाति-
धमर्णिको धनिकेन सार्धमात्मानं कर्मणाऽपि समं तुल्यं कु-
त् । श्रेयांस्तु तद्धनं शनैर्दद्यादित्यर्थः । अपिनोक्तसमुच्चयः ।

४। तत्रास्पष्टांशमाह *उत्तमर्णेनेति । कर्मणा धनादिकृततु-
यत्वासंभवात्सममिति व्याचष्टे * निवृत्तोत्तमर्णेति । अयमुत्त-
र्णनिरूपिताधमर्णव्यपदेशस्तत्र यथा नास्ति एवं स्वस्मिन्नपीत्य-
: । यद्वा दृष्टान्तार्थमुत्तमर्णग्रहणम् । तयोर्मिथः ससंबन्धिकत्वा-
न्यतरनिवृत्तावपरस्यापि निवृत्तिः ॥ ४३ ॥

किञ्च ।

या० दीयमानं न गृह्णाति प्रयुक्तं यः स्वकं धनम् ।
मध्यस्थस्थापितं चेत्स्याद्वर्द्धते न ततः परम् ॥ ४४ ॥

मि० उपचयार्थं प्रयुक्तं स्वकीयं धनम् अधम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्णेन दीयमानमुत्तमर्णो वृद्धिलोभाद्यदि न गृह्णा
तदाऽधमर्णेन मध्यस्थहस्ते स्थापितं यदि स्यात्त
ततः स्थापनादूर्ध्वं न वर्द्धते । अथ स्थापितमपि य
च्यमानो न ददाति ततः पूर्ववद्वर्द्धते एव ॥ ४४ ॥

बा० १। किंचेति। उत्तमर्णेऽन्यदप्युच्यते इत्यर्थः। उत्तरार्धानु
धेनाह * उपचयेति । स्वकमित्यत्र स्वार्थे कनित्याह * स्वी
यमिति। योग्यतया आह *अधमर्णेनेति । य इत्यस्यार्थः *उत्त
र्णइति । अग्रहणे हेतुं पूरयति * वृद्धीति । तथैवाह * यदि
त्यादि । मध्यस्थपदं लाक्षणिकमित्याह *हस्ते इति । *त
धनम् । तत इत्यस्य व्याख्या * स्थापनादिति । परमिति व्या
चष्टे * ऊर्ध्वमिति ।

२। तुल्ययुक्त्या तदनुक्तं विशेषमाह * अथेति । * याच्यो
उत्तमर्णेनाधमर्ण इत्यर्थः । *ततः, तस्मात् । *पूर्ववत्, स्थाप
प्राग्वत् ॥ ४४ ॥

मि० इदानीं देयमृणं यदा येन च देयं तदाह।

या० अविभक्तैः कुटुम्बार्थे यदृणं तु कृतं भवेत्।
दद्युस्तद्रिक्थिनः प्रेते प्रोषिते वा कुटुम्बिनि ॥४५॥

मि० अविभक्तैर्बहुभिः कुटुम्बार्थमेकैकेन वा य
णं कृतं तदृणं कुटुम्बी दद्यात् । तस्मिन्प्रेते प्रो
वा तद्रिक्थिनः सर्वे दद्युः ॥ ४५ ॥

बा० १। एवमुत्तमर्णे प्रकारद्वयमुक्तम्, अथाधमर्णे आह *इद
मिति । यदेति कालनिर्देशः । येनेत्याधिकारिनिर्देशः । *तद
तयम् । अविभक्तैरित्यत्र बहुवचनबलाद्बहुत्वं विवक्षितम्
च समस्तैर्व्यस्तैर्वा तैरित्यर्थः । तुरुक्तवैलक्षण्ये, तत्फलि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*अविभक्तैरिति। कुटुम्बेत्यस्य मध्यमणिन्यायेनान्वयः। कुटुम्बार्थे इत्यव्ययं तत्रेत्याह * अर्थमिति। अस्योभयत्रान्वयः। तथा च बहुभिस्तैरेकैकेन वा कुटुम्बरक्षणार्थं यदृणं कृतमित्यर्थः। अनेन देयर्णं कथितम्। उत्तरार्द्धस्वारस्येन शेषं पूरयति *तदृणं कुटुम्बी दद्यादिति। अनेनाधिकारिकथनम्। *तस्मिन्, कुटुम्बिनि। *तदिति। तस्य कुटुम्बिनो ये रिक्थग्राहका इत्यर्थः। बहुवचनलभ्यमाह * सर्वे इति। अत्र प्रेते प्रोषिते वेति कालाभिधानं, तद्रिक्थिन इत्यपि अधिकारिप्रदर्शकमेवेति भावः॥ ४५॥

मि॰ येन देयमित्यत्र प्रत्युदाहरणमाह।

या॰ न योषित् पतिपुत्राभ्यां न पुत्रेण कृतं पिता।

दद्यादृते कुटुम्बार्थान्न पतिः स्त्रीकृतं तथा॥ ४६॥

मि॰ पत्या कृतमृणं योषिद्भार्या नैव दद्यात्। पुत्रेण कृतं योषिन्माता न दद्यात्। तथा पुत्रेण कृतं पिता न दद्यात्। तथा भार्याकृतं पतिर्न दद्यात्। कुटुम्बार्थादृते इति सर्वशेषः। अतश्च कुटुम्बार्थं येन केनापि कृतं तत् कुटुम्बिना देयम्। तदभावे तद्दायहरैर्देयमित्युक्तमेव॥ ४६॥

बा॰ १। *प्रत्युदाहरणमिति। पूर्ववचनेन कुटुम्ब्यादिभिराधिकारिभिर्ऋणं देयमिति येनेत्यंशोऽपि वृत्तः। तत्र योषिदादीनामपि कुटुम्ब्यादित्वेनाधिकारित्वेन तस्य देयत्वं यद्यपि प्राप्तं तथापि विषयविशेषे देयमिति पूर्वाभिहितम् ऋणस्य देयत्वं व्यावर्त्यते इति प्रत्युदाहरणत्वमित्यर्थः। तथाचानेनादेयमृणमुच्यते इति भावः।

२। कृतमित्यस्य पूर्वत्रापि संबन्धः। योषित्पदं योग्यतया र्थमिति पृथक् व्याचष्टे *पत्येति। पूर्वतोऽनुवृत्तेराह *ऋणमि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ति। सर्वमिति न्यायेनाह * नैवेति।

३। द्वितीयपादार्थमाह * तथेति।

४। तुर्यपादार्थमाह * तथेति। योग्यतया स्त्रीपदार्थ *भार्येति। न दद्यादित्यस्यानुषङ्गः।

५। अव्यवहितसंबन्धभ्रमनिरासायाह *कुटुम्बेति। सर्व इति पाठः। घञजपः पुंसीत्युक्तेः। शेषमिति पाठस्तस्य भा वादत्वेन। यद्वा सर्वस्य शेषः शेषत्वं यस्य तत्। अत एव त्मत्युदाहरणतया पूर्वैकवाक्यतेत्याह *अतश्चेति। *कृतम्, मिति शेषः। *तद्दायहरैः, यैः कैश्चित्।

नारदोऽपि, (व्य० प० ११६।१७)

न स्त्री पतिकृतं दद्यादृणं पुत्रकृतं तथा।
अभ्युपेतादृते यद्वा सह पत्या कृतं भवेत्॥
दद्यादपुत्रा विधवा नियुक्ता या मुमूर्षुणा।
यो वा तद्रिक्थमादद्याद्यत्र रिक्थमृणं ततः॥ इति।

कात्यायनोऽपि,

भर्त्रा पुत्रेण वा सार्द्धं केवलेनात्मना कृतम्।
ऋणमेवंविधं देयं नान्यथा तत्कृतं स्त्रिया॥
मर्तुकामेन वा भर्त्रा उक्ता देयमृणं त्वया।
अप्रपन्नाऽपि सा दाप्या धनं यद्याश्रितं तया॥ इति॥४

मि० पुत्रपौत्रैर्ऋणं देयमिति वक्ष्यति, तस्य पुरस्ता वादमाह।

या० सुराकामद्यूतकृतं दण्डशुल्कावशिष्टकम्।
वृथादानं तथैवेह पुत्रो दद्यान्न पैतृकम्॥ ४

मि० सुरापाणेन यत्कृतमृणं,कामकृतं स्त्रीव्यसन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्तं, द्यूते पराजयनिर्वृत्तं, दण्डशुल्कयोरवशिष्टं, वृथादानं धूर्तबन्दिमल्लादिभ्यो यत्प्रतिज्ञातम् ।

धूर्त्ते बन्दिनि मल्ले च कुवैद्ये कितवे शठे ।
चाटचारणचौरेषु दत्तं भवति निष्फलम् ॥

इति स्मरणात् । एतद्दृणं पित्रा कृतं पुत्रादिः शौण्डिकादिभ्यो न दद्यात् । अत्र दण्डशुल्कावशिष्टकमित्यवशिष्टग्रहणात्सर्वं दातव्यमिति न मन्तव्यम् ।

दण्डं वा दण्डशेषं वा शुल्कं तच्छेषमेव वा ।
न दातव्यं तु पुत्रेण यच्च न व्यावहारिकम् ॥

इत्यौशनसस्मरणात् ।

गौतमेनाप्युक्तं, मद्यशुल्कद्यूतकामदण्डाः पुत्रान्नाध्यावहेयुरिति । न पुत्रस्योपरि भवन्तीत्यर्थः । अनेनादेयमृणमुक्तम् ॥ ४७ ॥

बा० १। *तस्येति । अदेयप्रक्रमादिति शेषः । तथाचैतदर्थमेवमुक्तौ इतः परस्यापि पाठक्रमादिति न्यायेनार्थक्रमतः पूर्वभावादपवादत्वमिति न काचिदसंगतिरिति भावः ।

२।द्यूतान्तद्वंद्वस्य कृतशब्देन तृतीयातत्पुरुषः। तस्य च प्रत्येकं सबन्धः । सुरापदं च तत्पाने लाक्षणिकं साहचर्यादित्याह *सुरापाणेनेति । वा भावकरणयोरिति णत्वविकल्पः । कामो रत्यभिलाष इत्याह *स्त्रीति । बहुव्रीहिः । एवमग्रेऽपि । द्यूते द्वैविध्यसत्त्वेऽपि जये तदभावादाह *पराजयेति । लक्षणेति भावः । दण्डेत्यत्र द्वन्द्वोत्तरं षष्ठीतत्पुरुषः स्वार्थे कन् इत्याह *दण्डेति । रक्षानिर्वेशो राजभागः शुल्कम् । *वृथेति । वृथादानमित्यस्य वृथादीयमानमित्याद्यर्थे शाब्दे बाधात्पूर्ववत्तद्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिष्टमित्यर्थासंभवाच्चाह *धूर्त्तेति । तथा च तदनुकूलो व्या-
रोऽत्र प्रतिज्ञारूप एवेति भावः ।

३। धूर्त्तादिभ्यो दत्तस्य वृथादानत्वं समूलयति *धूर्त्ते इ
*कितवे, द्यूतकारिणि । *चाटे,विदूषके । अत्र निष्फलमित्यु
पारलौकिकफलाभावाद् वृथादानत्वं विवक्षितं, न तु दृष्टफला
वादिति भावः ।

४। पदार्थानुक्त्वा वाक्यार्थमाह *एतदिति । पैतृकमिति व्या-
चष्टे * पित्रेति । अयं फलितार्थः । आगत इत्यधिकारे वि-
र्येञ्चेति ठञ्विधानात् । उत्सर्गानुरोधेन पुत्रपदमुपलक्षणमित्या-
ह * पुत्रादिरिति । इहेति व्याचष्टे *शौण्डीति । तस्य तत्त्वावि-
क्षया तत्र सप्तमी ।

५। विशेषमाह * अत्रेति । वचने इत्यर्थः । * तु पुं-
पुत्रेण च । * व्यावहारिकमिति । न कुटुम्बोपयोगीत्यर्थः ।

६। *मद्येति । अत्र मद्यादिदण्डान्तपदैस्तदर्थं व्ययीकृता-
द्रव्याणि लक्ष्यन्ते । तानि पितृसंबद्धानि पुत्रान्नाध्यावहेयुरित्यर्थः
अभिभवेयुरिति पाठान्तरम् । पराभवेयुरिति उभयार्थः । तात्पर्य-
माह *न पुत्रस्येति । तथा च दण्डशुल्कावशिष्टकमित्यत्र त्रया-
समाहारद्वंद्वः । कन्स्वार्थे । अवशिष्टं चोपस्थितत्वात्तयोरेवे-
विवक्षितं न तु प्रागुक्तमिति अनेन सूचितामिति बोध्यम् । उ-
हरति *अनेनेति । उभयेनेत्यर्थः ॥ ४७ ॥

मि० न पतिः स्त्रीकृतं तथेत्यस्यापवादमाह ।

या० गोपशौण्डिकशैलूषरजकव्याधयोषिताम् ।

ऋणं दद्यात्पतिस्तेषां यस्माद् वृत्तिस्तदाश्रया ॥ ४

मि० गोपो गोपालः, शौण्डिकः सुराकारः, शै-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नटः, रजको वस्त्राणां रञ्जकः, व्याधो मृगयुः । एतेषां योषिद्भिर्यदृणं कृतं तत् पतिभिर्देयं, यस्मात्तेषां वृत्तिर्जीवनं तदाश्रया योषिदधीना । यस्माद् वृत्तिस्तदाश्रयेति हेतुव्यपदेशादन्येऽपि ये योषिदधीनजीवनास्तेऽपि योषित्कृतमृणं दद्युरिति गम्यते ॥ ४८ ॥

बा० १। गोपेति । अभ्यर्हितत्वात्पूर्वनिपातः । व्याधान्तद्वंद्वे योषिद्भिस्तत्पुरुषः । आदौ पदार्थानाह *गोप इति । अथ वाक्यार्थमाह *एतेषामिति । अनेन द्वंद्वः सूचितः । पतिरिति जातावेकवचनमित्याह * पतिभिरिति ।

२। तत्र बीजमाह *यस्मादिति । *तेषां, तत्पतीनाम् । अनेन तासामित्यपपाठ इति सूचितम् । नेदं परिगणनं किन्तूपलक्षणमित्यनेनैव सूचितमित्याह * यस्मादिति । * अन्येपि, एतद्भिन्नाः सर्वे ब्राह्मणादयोऽपि ॥ ४८ ॥

मि० पतिकृतं भार्या न दद्यादित्यस्यापवादमाह ।

या० प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतम् ।
स्वयं कृतं वा यदृणं नान्यत्स्त्री दातुमर्हति ॥ ४९ ॥

मि० मुमूर्षुणा प्रवत्स्यता वा पत्या नियुक्तया ऋणदाने यत् प्रतिपन्नं तत् पतिकृतमृणं देयम् । यच्च पत्या सह भार्यया ऋणं कृतं तदपि भर्त्रभावे भार्यया अपुत्रया देयम् । यच्च स्वयमेव कृतम् ऋणं तदपि देयम् । ननु प्रतिपन्नादित्रयं स्त्रिया देयमिति न वक्तव्यम् । संदेहाभावात् ।

उच्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(मनु० ८।४१६)

भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः।
यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनम्॥

इति वचनान्निर्द्धनत्वेन प्रतिपन्नादिष्वदान ङ्कायामिदमुच्यते, प्रतिपन्नं स्त्रिया देयमित्यादि। चानेन स्त्र्यादीनां निर्द्धनत्वमभिधीयते। पारतन्त्र्य मात्रप्रतिपादनपरत्वात्। एतच्च विभागप्रकरणे ष्टीकरिष्यते। नान्यत्स्त्री दातुमर्हतीत्येतत्तर्हि वक्तव्यम्। विधानेनैवान्यत्र प्रतिषेधासिद्धेः। उच्य

प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतम्।

इत्यनयोरपवादार्थमुच्यते, अन्यत् सुराका दिवचनोपात्तं प्रतिपन्नमपि पत्या सह कृतमपि देयमिति॥ ४९॥

बा० १। आद्यपादार्थमुक्तक्रमेण स्मृत्यन्तरानुरोधेनाह मूर्षुणेति। परलोकं गन्तुमिच्छता देशान्तरं गमिष्यता भर्त्रा ऋणदाने तद्विषये नियुक्तया प्रेरितया भार्यया यत्प्र यद्दानमङ्गीकृतं तत् तादृशं तया देयमित्यर्थः।

२। द्वितीयपादार्थमाह *यच्चेति। अनेन वा चार्थे इति तम्। एवमग्रेऽपि। अत्र पत्या सहेत्युक्त्या तस्याप्राधान्यं सूचि एवमप्युक्तरीत्या उभयोरभावे तस्या दानाधिकारादाह * भावे इत्यादि।

३। तृतीयपादार्थमाह *यच्चेति। मध्यमतो भेदाय सर्व न्यायेनाह * स्वयमेवेति।

तथा च नारदः,

न स्त्री पतिकृतं दद्यादृणं पुत्रकृतं तथा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभ्युपेतादृते यद्वा सह पत्या कृतं भवेत् ॥
दद्यादपुत्रा विधवा नियुक्ता या मुमूर्षुणा ।
यो वा तद्रिक्थमादद्याद्यत्र रिक्थमृणं ततः ॥ इति ।
कात्यायनोऽपि,
भर्त्रा पुत्रेण वा सार्धं केवलेनात्मना कृतम् ।
ऋणमेवंविधं देयं नान्यथा तत्कृतं स्त्रिया ॥
मर्तुकामेन वा भर्त्रा उक्ता देयमृणं त्वया ।
अप्रपन्नाऽपि सा दाप्या धनं यद्याश्रितं स्त्रिया ॥ इति ।

४। *त्रय एवेति । एवोऽप्यर्थे । एते त्रयोऽर्जितधना अपि अधना एव अस्वामिनो धने स्मृता इत्यर्थः । *यत्ते इति । ते भार्यादयो यत्किंचित्समधिगतधनमर्जयन्ति तद्धनं यस्य ते भार्यादयस्तस्य भवतीत्यर्थः । यस्य ते इति पाठः । यस्यैते इति पाठान्तरम् ।

५। नन्वनेन तस्या निर्धनत्वे प्रतीयमाने सति प्रतिपन्नमित्यादिवचनशतैर्देयत्वोक्तावपि कथं तया देयं निर्धनत्वादत आह * न चेति । नहीत्यर्थः । * अनेन, मनुवचनेन । अत एवाशङ्कायामिति प्राक् उक्तम् । *पारतन्त्र्येति । तन्मात्रप्रतिपादनतात्पर्यकत्वादित्यर्थः । तथा चानुज्ञां विना नाधिकारः स्वातन्त्र्येण यत्र कुत्रचिद्विनियोगे, सत्यां तु तस्यां सोऽस्तीति भावः।

६। नन्वत्र किं नियामकं, तथैवार्थः कुतो न, अयमपूर्वो विधिरस्तु,तथा चैतदन्यविषयत्वं तस्येति व्यवस्थासंभवाददोषोऽत आह *एतच्चेति ।

७। एवं सति तुर्यपादांशे एव शङ्कते *नान्यदिति । *सिद्धेरेति । अर्थादिति शेषः । प्राप्तेरेवाभावादिति भावः । यथाकथंचेत्स्वयं कृतस्यावश्यदेयत्वादाह *अनयोरिति । *सुरेति । सु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रापानादिव्यसनेनोपात्तं कृतमित्यर्थः। इतिरर्थसमाप्तौ। ए
तच्छेषविषयता प्रागुक्तनिषेधस्येति ध्वनयितुं पुनरुक्तं नान्या
व्याख्यानमपास्तम्। तथा पुष्टेरभावात्॥ ४९॥

पुनरपि यदृणं दातव्यं येन च दातव्यं यत्र
काले दातव्यं तत्त्रितयमाह।

पितरि प्रोषिते प्रेते व्यसनाभिप्लुतेऽपि वा।
पुत्रपौत्रैर्ऋणं देयं निह्नवे साक्षिभावितम्॥५

पिता यदि दातव्यमृणमदत्त्वा प्रेतो दूरदेश
तोऽचिकित्सनीयव्याध्याद्यभिभूतो वा तदा तत्
मृणमवश्यम् अपनेयं पुत्रेण पौत्रेण वा, पितृधना
वेऽपि पुत्रत्वेन पौत्रत्वेन च। तत्र क्रमोऽप्ययमेव पि
भावे पुत्रः पुत्राभावे पौत्र इति। पुत्रेण पौत्रेण
निह्नवे कृते आर्थिना साक्ष्यादिभिर्भावितमृणं
पुत्रपौत्रैरित्यर्थः। अत्र पितरि प्रोषिते इत्येतावदु
कालविशेषस्तु—
नारदेनोक्तो द्रष्टव्यः, (व्य० प० १।१४)

नार्वाक्संवत्सराद्विंशात्पितरि प्रोषिते सुतः।
ऋणं दद्यात्पितृव्ये वा ज्येष्ठे भ्रातर्यथापि वा॥१

प्रेतेऽप्यप्राप्तव्यवहारकालो न दद्यात्। प्राप्त
वहारकालस्तु दद्यात्।

सच कालस्तेनैव दर्शितः, (व्य० प० १३५।
गर्भस्थैः सदृशो ज्ञेय आऽष्टमाद्वत्सराच्छिशु
बाल आषोडशाद्वर्षात्पौगण्डश्चेति शब्द्यते
परतो व्यवहारज्ञः स्वतन्त्रः पितराद्वृते। इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यद्यपि पितृमरणादूर्ध्वं बालोऽपि स्वतन्त्रो जातस्तथापि नर्णभाग्भवति ।

यथाह, (ना० व्य० प० १।३१)

अप्राप्तव्यवहारश्चेत्स्वतन्त्रोऽपि हि नर्णभाक् ।
स्वातन्त्र्यं हि स्मृतं ज्येष्ठे ज्यैष्ठ्यं गुणवयःकृतम् ॥ इति ।

तथा आसेधाह्वाननिषेधश्च दृश्यते, (ना. अ० १।५४)

अप्राप्तव्यवहारश्च दूतो दानोन्मुखो व्रती ।
विषमस्थाश्च नासेध्या न चैतानाह्वयेन्नृपः ॥ इति ।

तस्मात्—

अतः पुत्रेण जातेन स्वार्थमुत्सृज्य यत्नतः ।
ऋणात्पिता मोचनीयो यथा न नरकं व्रजेत् ॥ इति,

पुत्रेण व्यवहारज्ञतया जातेन निष्पन्नेनेति व्याख्येयम् । श्राद्धे तु बालस्याप्यधिकारः । न ब्रह्माभिव्याहारयेदन्यत्र स्वधानिनयनादिति गौतमस्मरणात् । पुत्रपौत्रैरिति बहुवचननिर्देशाद् बहवः पुत्रा यदि विभक्ताः स्वांशानुरूपेण ऋणं दद्युः, अविभक्ताश्चेत्संभूयसमुत्थानेन, गुणप्रधानभावेन वर्तमानानां प्रधानभूत एव वा दद्यादिति गम्यते ।

यथाह नारदः, (व्य० प० १।२)

अत ऊर्ध्वं पितुः पुत्रा ऋणं दद्युर्यथांशतः ।
अविभक्ता विभक्ता वा यस्तामुद्वहते धुरम् ॥ इति ।

अत्र च यद्यपि पुत्रपौत्रैर्ऋणं देयमित्यविशेषेणोक्तं तथापि पुत्रेण यथा पिता सवृद्धिकं ददाति तथैव ऋणं देयम् । पौत्रेण तु समं मूलमेव दातव्यं न वृद्धिरिति विशेषोऽवगन्तव्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऋणमात्मीयवत्पित्र्यं देयं पुत्रैर्विभावितम्।
पैतामहं समं देयमदेयं तत्सुतस्य तु ॥

इति बृहस्पतिवचनात् । अत्र विभावितमि विशेषोपादानात्साक्षिविभावितमित्यत्र साक्षिग्र प्रमाणोपलक्षणम् । समं यावद् गृहीतं तावदेव देयं वृद्धिः । तत्सुतस्य प्रपौत्रस्यादेयमगृहीतधनस्य । चोत्तरश्लोके स्पष्टयिष्यते ॥ ५० ॥

बा० १। सिंहावलोकनन्यायादरेणाह *पुनरपीति । कंचिद्वि वक्तुमिति भावः । वक्ष्यमाणक्रममाह *पितेति । प्रागुक्तक्रमे *प्रेतइति । प्रोषिते इत्यस्यार्थो *दूरेति । सुरापानादिव्यस क्रान्तऋणस्यादेयत्वस्योक्तत्वात् व्यसनेत्यस्य व्याख्या *आ कित्सेति । आदिनाऽऽधिः । देयमित्यस्य व्याख्या *अव ति । आवश्यके कृत्ये इति भावः । द्वंद्वादुभाभ्यां युगपद्देया प्रतीयमानार्थनिरासायाह * पुत्रेणेति । बहुवचनं व्यक्त्यभि यम् । तत्त्वादेवाह *पित्र्येति । पितुरागतेत्यर्थः । पितृधनेति पा न्तरम् । *तत्र, दाने । तुर्यपादार्थमाह *पुत्रेणेति । वक्ष्यमाणरी साक्षिपदमुपलक्षणमित्याह *साक्ष्यादीति । सर्वस्यानुषङ्ग इ ह *ऋणमिति ।

२। अत्र छन्दोनुरोधेन यथाश्रुतोक्तिक्रमेणाद्ये विशेष *अत्रेति । *विंशात्, विंशतेः पूरणात् । तत्र पितरीत्युपलक्ष मिति सूचयन्नाह *पितृव्ये इति । कनिष्ठनिरासायाह * इति । इदं चाविभक्तत्वे तदीयधनग्रहणे चेति बोध्यम् । द्वि विशेषमाह *प्रेतेऽपीति । पितरीति शेषः । अग्रे पुत्रादि क्षेपः ।

३। *तेनैव, नारदेनैव । *आऽष्टमात्, आङभिव्याप्तौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मग्रेऽपि। तत्सादृश्ययुतस्यैव नाम शिशुरिति। षोडशादिति डङन्तम्। पौगण्ड इति बालस्यैव संज्ञान्तरम्। *शब्द्यते, कथ्यते। *परतः, षोडशवर्षादूर्ध्वम्। *पितराट्टते, तौ विना। तत ऊर्ध्वं स तयोरभावे स्वतन्त्र इत्यर्थः।

४। ननु षोडशवर्षानन्तरं तस्य तत्त्ववत्तयोरभावे स्वातन्त्र्यमिति नियमो वचनबोध्योऽयुक्तः। यतः पूर्वमपि पित्रोर्मरणे स्वातन्त्र्यसिद्धिः। तथा च तद्वत्तस्यापि तद्दानाधिकारित्वमित्यप्राप्तव्यवहारस्यापि ऋणं देयं स्यादिति, अन्यथा प्रागुक्तमयुक्तमित्यत आह *यद्यपीति। पित्रोर्मरणेत्यर्थः। अपिना शिशुसमुच्चयः। व्युत्क्रमेणोक्तिरियम्। *यथाहेति। यतः स एव आहेत्यर्थः। *अप्राप्तेति। अप्राप्तव्यवहारः षोडशवर्षातिक्रमरहितः। *चेत्, यदि। *हि, तदा। अनयोरभावात्स्वतन्त्रोऽपि ऋणभाक् न भवतीत्यर्थः। अपिना अस्वतन्त्रसमुच्चयः। ननु तत्र तद्वत्स्वातन्त्र्यमपि माऽस्तु अत आह *स्वातन्त्र्यमिति। हि यतः स्वातन्त्र्यं ज्येष्ठे स्मृतं न तु तत्रैवेत्यर्थः। ननु तद्वत्तदा तदपि न अत आह *ज्यैष्ठ्यमिति। तथा च तयोरभावादुभयकृतज्यैष्ठ्याभावात्तस्मिन् तत्त्वेन तत्त्वेपि वचनान्न तत्त्वमित्युक्तवचने तयोरभावाद्यः स्वतन्त्रः स परतो व्यवहारज्ञ इत्यन्वयो न तु परत इत्यस्याग्रेऽपीति न कोऽपि दोषः। अत एव तथैव प्रतिज्ञानम्।

५। तत्राप्राप्तव्यवहारत्वदृढीकरणेनोक्तार्थे युक्त्यन्तरमपि सूचयन्नन्यदप्याह *तथेति। उक्तनिषेधवदित्यर्थः। *आसेधेति। आसेधाह्वानयोर्निषेधोऽपीत्यर्थः। *विषमेति। सङ्कटस्थाश्चेत्यर्थः। अत्र पञ्चानां निषेधः।

६। एवं सति प्राप्तस्मृत्यन्तरविरोधं परिहरति *तस्मादिति। यतोऽप्राप्तव्यवहारो न ऋणभाक् उक्तवचनात् तस्मात्, *इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वचनम्, *इति एवं व्याख्येयमित्यर्थः। अन्यथा विरोधो दु
रिहर इति भावः। *अतः, पुत्रत्वात्। *यत्नतः, यत्नेन। तदे
*यथेति। तथा च जातमात्रेण पुत्रेण स ऋणान्मोच्य
नार्थः किं तु व्यवहारज्ञतया जातेन तदूर्ध्ववर्षकेण तेन स
मोच्य इत्यर्थः।

७। नन्वेवं तस्य श्राद्धेऽप्यधिकारो न स्यात् व्यवहारान
ज्ञतया वैदिकव्यवहारानभिज्ञत्वस्य सुतरां सत्त्वादत आह *
द्धेत्विति। तुरुक्तवैलक्षण्ये। अपिः प्राग्वत्। *न ब्रह्मेति।
वेदं नाभिभाषयेदन्येन बालः। स्वधा स्वधाकारः निनी
प्रणीयते ऽस्मिन् श्राद्धे तत्स्वधानिनयनं ततो ऽन्यत्र श्रा
दन्यत्र नाभिभाषयेदित्यर्थः। अयं भावः, श्राद्धे वेदोच्चा
कारयेद्यदि स्वयमनुपनीतः, उपनीतस्य स्वयमेवोच्चारणे
कारात्। एवं च बालस्यापि प्रयोजककर्तृत्वप्रतीतिबलाद
नताप्रतीतेरधिकारोऽस्तीति।

८। वस्तुतस्तु ब्रह्म वेदमन्य ऋत्विगादिः प्रयोजक
अनुपनीतं बालं नाभिव्याहारयेत् तं वेदोच्चारणे न प्रयो
त्स्वधानिनयनादन्यत्रेत्यर्थः।

मनुरपि,

न ह्यस्मिन्युज्यते कर्म किञ्चिदामौञ्जिबन्धनात्।
नाभिव्याहारयेत् ब्रह्म स्वधानिनयनादृते॥ इति।

एवं च कृतचूडस्यानुपनीतस्यापि श्राद्धे ऽधिकार
मुख्यत्वात्। एवं च तदुपयोगी तस्य मन्त्रपाठोऽपि भव
बोध्यम्।

कृतचूडस्तु कुर्वीत उदकं पिण्डमेव च।
स्वधाकारं प्रयुञ्जीत मन्त्रोच्चारं न कारयेत्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति व्याघ्रनाम्ना लिखितं वचनं यदि समूलं तदा मन्त्रविषये विकल्पो द्रष्टव्यः।

९। व्यक्त्यभिप्रायेण कृतबहुवचनस्य फलमाह *पुत्रपौत्रैरिति। पञ्चम्यन्तस्य गम्यते इत्यत्रान्वयः। * विभक्ता इति। तदेति शेषः। क्वचित् पाठ एव। एवमग्रेऽपि। *सम्भूयेति। मिलित्वा देयमिति सङ्केतेनेत्यर्थः, मिलित्वा एकीकरणेन वा। अंशतो दानमत्रापि। पूर्वं भेदेन दानमत्र तु मेलनेनेति विशेषः। अत एव नारदैकवाक्यता। दद्युरित्यस्यानुषङ्गः। इदमग्रे स्फुटीभविष्यति तद्विवादप्रकरणे। इदमपि समप्रधानभावविषयम्, अत एवाह *गुणेति। *वर्तमानानां, वर्तमानानां तु। *प्रधानेति। मुख्येत्यर्थः। उक्तत्रये मानमाह *यथाहेति। अतः पुत्रा ऊर्ध्वं पितुः तन्मरणाद्यनन्तरम् विभक्ता वेत्यन्त एकोऽन्वयः। यथांशत इत्यस्योभयत्रान्वयः। अनेन प्रकारद्वयमुक्तम्। तृतीयप्रकारमाह *य इति।

१०। विशेषमाह * अत्र चेति। पुत्रपौत्रैरित्यस्मिन्वचने इत्यर्थः। *समं, गृहीतसदृशम्। मूलमेवेत्येवव्यवच्छेद्यमाह *न वृद्धिरिति। एवमग्रेऽपि।

११। अत्र मानमाह * ऋणमिति। आत्मीयवदित्यनेन सवृद्धिकदानमुक्तम्। *सममिति। अर्थात्पौत्रेण। *तत्सुतस्येति। पौत्रसुतस्य प्रपौत्रस्येत्यर्थः।

१२। पुत्रपौत्रैरिति विशेषस्यानेन गुरुवाक्येन सामान्यपरेण

---

१ पुत्रपौत्रैरिति याज्ञवल्क्यवाक्ये साक्षिभावितमितिप्रमाणविशेषोपन्यासात्तस्य विशेषत्वम्। ऋणमात्मीयवदिति बृहस्पतिवाक्ये विभावितमिति प्रमाणविशेषानुपन्यासात् सामान्यत्वम्। तथापि तथा प्रकृते दुर्वचमित्यन्वयः। दुर्वचत्वे हेतुः सामान्यस्येत्यादिः दुर्बलत्वेनेत्यन्तः। दुर्वचमिति इत्यनन्तरं हेतोरिति शेषः। वैपरीत्येनेत्यस्य तन्त्रान्तरसिद्धन्यायवैपरीत्येनेत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सह प्राप्तविरोधपरिहारः सामान्यस्य विशेषे उपसंहार इति न्यायेन तन्त्रान्तरसिद्धेन कर्तुं यद्यप्युचितस्तथापि सामान्यस्याधिक-ग्राहकत्वेन सफलत्वेन प्रबलत्वाद्विशेषस्य न्यूनत्वेन दुर्बलत्वात् तथा प्रकृते दुर्वचमिति वैपरीत्येन विरोधं परिहरति * अत्रे बृहस्पतिवाक्ये इत्यर्थः। *अविशेषेति। सामान्येनेत्यर्थः। त्यत्र, मूलवाक्ये। *प्रमाणोपलक्षणमिति। प्रमाणमात्रोपलक्ष-मित्यर्थः। तथा च येन केनापि प्रमाणेन साधितमृणं पुत्रादि-देयमित्यर्थेन न वचनयोर्मिथो विरोध इति भावः। अत प्राक् तथा व्याख्यातम्।

१३। अस्योत्तरार्धार्थमाह *सममित्यादि। विशेषान्तर *तत्सुतेति। विशेषान्तरमाह *अगृहीतेति। नन्वत्र किं मान आह *एतच्चेति ॥ ५० ॥

मि० ऋणापाकरणे ऋणी तत्पुत्रः पौत्र इति त्रयः यो-तारो दर्शिताः। तेषां च समवाये क्रमोऽपि दर्शित

इदानीं कर्त्रन्तरसमवाये च क्रममाह।

या० रिक्थग्राह ऋणं दाप्यो योषिद्ग्राहस्तथैव
पुत्रोऽनन्याश्रितद्रव्यः पुत्रहीनस्य रिक्थिनः॥५

मि० अन्यदीयं द्रव्यमन्यस्य क्रयादिव्यतिरेकेण त्स्वीभवति तद्रिक्थम्। विभागद्वारेण रिक्थं गृह्णातीति रिक्थग्राहः। स ऋणं दाप्यः। एत भवति। यो यदीयं द्रव्यं रिक्थरूपेण गृह्णा स तत्कृतमृणं दाप्यो न चौरादिरिति। यो भार्यां गृह्णातीति योषिद्ग्राहः। स तथैव दाप्यः। यो यदीयां योषितं गृह्णाति स तत्कृत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दाप्यः। योषितोऽविभाज्यद्रव्यत्वेन रिक्थव्यपदेशानर्हत्वाद्भेदेन निर्देशः। पुत्रश्चानन्याश्रितद्रव्यः ऋणं दाप्यः। अन्यमाश्रितमन्याश्रितम् अन्याश्रितं मातृपितृसम्बन्धिद्रव्यं यस्यासावन्याश्रितद्रव्यः न अन्याश्रितद्रव्यः अनन्याश्रितद्रव्यः। पुत्रहीनस्य रिक्थिन ऋणं दाप्या इति सम्बन्धः। एतेषां समवाये क्रमश्च पाठक्रम एव। रिक्थग्राह ऋणं दाप्यस्तदभावे योषिद्ग्राहस्तदभावे पुत्र इति। नन्वेतेषां समवाय एव नोपपद्यते।

न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः।
(मनु० अ० ९।१८५)

इति पुत्रे सति अन्यस्य रिक्थग्रहणासम्भवात्। योषिद्ग्राहोऽपि नोपपद्यते। (मनु. अ. ५. श्लो. १६२.)

न द्वितीयश्च साध्वीनां क्वचिद्भर्त्तोपादिश्यते।

इति स्मरणात्। तथा ऋणं पुत्रो दाप्य इत्यप्ययुक्तम्। पुत्रपौत्रैर्ऋणं देयामित्युक्तत्वात्। अनन्याश्रितद्रव्य इति विशेषणमप्यनर्थकम्। पुत्रे सति द्रव्यस्यान्याश्रयणासम्भवात्। सम्भवे च रिक्थग्राहीत्यनेनैव गतार्थत्वात्। पुत्रहीनस्य रिक्थिन इत्येतदपि न वक्तव्यम्। पुत्रे सत्यपि रिक्थग्राही ऋणं दाप्य इति स्थितम्। असति पुत्रे रिक्थग्राही सुतरां दाप्य इति सिद्धमेवेति।

अत्रोच्यते। पुत्रे सत्यप्यन्यो रिक्थग्राही सम्भवति। क्लीबान्धबधिरादीनां पुत्रत्वेऽपि रिक्थहरत्वाभावात्। तथाच क्लीबादीननुक्रम्य "भर्तव्यास्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निरंशका" इति वक्ष्यति । तथा, सवर्णापुत्रो न्यायवृत्तिर्न लभेतैकेषामिति गौतमस्मरणात्। तश्च क्लीबादिषु पुत्रेषु सत्सु अन्यायवृत्ते च सव पुत्रे सति रिक्थग्राही पितृव्यतत्पुत्रादिः। योषिद्ग्रा यद्यपि शास्त्रविरोधेन न सम्भवति तथाप्यतिक्रा निषेधः पूर्वपतिकृतर्णापाकरणाधिकारी भवत्येव योषिद्ग्राहो यश्चतसृणां स्वैरिणीनामन्तिमां गृह्ण यश्च पुनर्भ्वां तिसृणां प्रथमाम् ।

यथाह नारदः, (व्य० प० १२।४५-५२)

परपूर्वाः स्त्रियस्त्वन्याः सप्त प्रोक्ता यथाक्रमम्
पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्विधा॥
कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता ।
पुनर्भूः प्रथमा नाम पुनःसंस्कारकर्मणा ॥
देशधर्मानवेक्ष्य स्त्री गुरुभिर्या प्रदीयते ।
उत्पन्नसाहसाऽन्यस्मै सा द्वितीया प्रकीर्तिता
उत्पन्नसाहसा उत्पन्नव्यभिचारा ।
असत्सु देवरेषु स्त्री बान्धवैर्या प्रदीयते ।
सवर्णाय सपिण्डाय सा तृतीया प्रकीर्तिता।
स्त्री प्रसूताऽप्रसूता वा पत्यावेव तु जीवति।
कामात्समाश्रयेदन्यं प्रथमा स्वैरिणी तु सा।
कौमारं पतिमुत्सृज्य या त्वन्यं पुरुषं श्रिता।
पुनः पत्युर्गृहं यायात्सा द्वितीया प्रकीर्तिता।
मृते भर्तरि तु प्राप्तान्देवरादीनपास्य या ।
उपगच्छेत्परं कामात्सा तृतीया प्रकीर्तिता॥
प्राप्ता देशाद्धनक्रीता क्षुत्पिपासातुरा च या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तवाहमित्युपगता सा चतुर्थी प्रकीर्तिता ॥
अन्तिमा स्वैरिणीनां या प्रथमा च पुनर्भुवाम् ।
ऋणं तयोः पतिकृतं दद्याद्यस्ते उपाश्रितः॥ इति।
(व्य० प० १।२४)

तथा, अन्योऽपि योषिद्ग्राह ऋणापाकरणेऽधिकारी तेनैव दर्शितः, (व्य० प० १।२१)

या तु सप्रधनैव स्त्री सापत्या वाऽन्यमाश्रयेत् ।
सोऽस्या दद्यादृणं भर्तुरुत्सृजेद्वा तथैव ताम् ॥

प्रकृष्टेन धनेन सह वर्तते इति सप्रधना, बहुधनेति यावत् । तथा— (ना० व्य० प० १।२२)

अधनस्य ह्यपुत्रस्य मृतस्योपैति यः स्त्रियम् ।
ऋणं वोढुः स भजते सैव चास्य धनं स्मृतम्॥ इति।

पुत्रस्य पुनर्वचनं क्रमार्थम् । अनन्याश्रितद्रव्य इति बहुषु पुत्रेषु रिक्थाभावे अंशग्रहणयोग्यस्यैव ऋणापाकरणेऽधिकारो नायोग्यस्यान्धादेरित्येवमर्थम्। पुत्रहीनस्य रिक्थिन इत्येतदपि पुत्रपौत्रहीनस्य प्रपौत्राद्यो यदि रिक्थं गृह्णन्ति तदृणं दाप्याः नान्यथेत्येवमर्थम् । पुत्रपौत्रौ च रिक्थग्रहणाभावेऽपि दाप्यावित्युक्तम् ।

यथाह नारदः, (व्य० प० १।४)

क्रमादव्याहतं प्राप्तं पुत्रैर्यन्नर्णमुद्धृतम् ।
दद्युः पैतामहं पौत्रास्तच्चतुर्थान्निवर्तते ॥

इति सर्वं निरवद्यम् ।

यद्वा । योषिद्ग्राहाभावे पुत्रो दाप्य इत्युक्तम् । पुत्राभावे योषिद्ग्राहो दाप्य इत्युच्यते, पुत्रहीनस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रिक्थिन इति । रिक्थशब्देन योषिदेवोच्यते । चास्य धनं स्मृतमिति स्मरणात् ।

यो यस्य हरते दारान् स तस्य हरते धनम् । इति

ननु योषिद्ग्राहाभावे पुत्र ऋणं दाप्यः, पुत्राभावे योषिद्ग्राह इति परस्परविरुद्धम् । उभयसद्भावे नः श्चिद्दाप्य इति । नैष दोषः । अन्तिमस्वैरिणीग्राहि प्रथमपुनर्भूग्राहिणः सप्रधनस्त्रीहारिणश्चाभावे पु दाप्यः, पुत्राभावे तु निर्धननिरपत्ययोषिद्ग्राही दा इति ।

एतदेवोक्तं नारदेन, (व्य० प० १।२३)

धनस्त्रीहारिपुत्राणामृणभाग् यो धनं हरेत् ।
पुत्रोऽसतोः स्त्रीधनिनोः स्त्रीहारी धनिपुत्रयोः ॥ इति

धनस्त्रीहारिपुत्राणां समवाये यो धनं हरते स णभाक् । पुत्रोऽसतोः स्त्रीधनिनोः—स्त्री च धनं स्त्रीधने ते विद्येते ययोस्तौ स्त्रीधनिनौ तयोः स्त्रीध नोरसतोः पुत्र एव ऋणभाक् भवति । धनिपुत्रयो सतोः स्त्रीहार्येव ऋणभाक् । स्त्रीहार्यभावे पुत्र ऋ भाक्, पुत्राभावे स्त्रीहारीति विरोधप्रतिभासप हारः पूर्ववत् ।

पुत्रहीनस्य रिक्थिन इत्यस्यान्या व्याख्या । एते धनस्त्रीहारिपुत्रा ऋणं कस्य दाप्या इति क्षायाम् उत्तमर्णस्य दाप्यास्तदभावे तत्पुत्रादेः । त त्राद्यभावे कस्य दाप्या इत्यपेक्षायामिदमुपातिष्ठ पुत्रहीनस्य रिक्थिन इति । पुत्राद्यन्वयहीनस्योत्त र्णस्य यो रिक्थी रिक्थग्रहणयोग्यः सपिण्डादिस्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रिक्थिनो दाप्याः।

तथा च नारदेन, (व्य० प० १।११२।११३)

ब्राह्मणस्य तु यद्देयं सान्वयस्य नचास्ति सः।
निर्वपेदस्य कुल्येषु तदभावे ऽस्य बन्धुषु ॥

इत्यभिधायाभिहितम्,

यदा तु न सकुल्याः स्युर्न च सम्बन्धिबान्धवाः।
तदा दद्याद्द्विजेभ्यस्तु तेष्वसत्स्वप्सु निक्षिपेत् ॥

इति ॥ ५१ ॥

बा० १। सङ्गतिं प्रसङ्गरूपामाह *ऋणापाकरणे इति। ऋणनिवारणे इत्यर्थः। *ऋणी, ऋणग्राही। *च समवायेइति। समवाये चेत्यर्थः। *कर्त्रन्तरेति। उक्तादन्येषां समवाये क्रमं चेत्यर्थः।

२। * अन्यदीयमिति। अन्यस्वामिकेत्यर्थः। अत एव च्विः। व्यतिरिक्तप्रकारमेवाह * विभागेति। एवमाद्यपादार्थमुक्त्वा तत्तात्पर्यार्थमाह * एतदिति। न चौरेति। तस्य स्तेयादिना तद्ग्राहकत्वेऽप्युक्तरीत्या रिक्थग्राहकत्वाभावादिति भावः।

३। द्वितीयपादार्थमाह *योषितमिति। अस्याभिमतार्थविशेषमाह *भार्यामिति। तथैव चेत्यस्य व्याख्या *ऋणमिति। यद्वा तद्देवेत्यर्थः। तस्यानुषङ्गः। अस्यापि तात्पर्यार्थमाह * यदीयामिति। ननु योषितोऽपि द्रव्यत्वेन रिक्थरूपत्वाद्रिक्थग्राह इत्यनेनैवेष्टसिद्ध्येदं न वाच्यमत आह * योषित इति। यद्यपि योषित् द्रव्यं भवति तथापि रिक्थशब्दवाच्यत्वं नास्ति तस्याः। विभागार्हद्रव्ये एव लोके रिक्थशब्दप्रयोगात्। योषितश्च विभागानर्हत्वादिति भावः। अविभाज्येति पाठः। ण्यदन्तत्वात्।

४। तृतीयपादार्थमाह *पुत्रश्चेति। न अन्यो ऽनन्य इत्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्यर्थान्तरनिरासाय तत्पदार्थमाह *अन्यमिति । तदर्थ
*मातेति ।

५। तुर्यपादार्थमाह *पुत्रहीनेति । रिक्थिन इति प्रथमा
वचनान्तमित्याशयेन सवचनविपरिणामेनानुषङ्गेणाह *ऋणमि

६। एवं कर्त्रन्तरे उक्तेऽपि क्रमो नोक्त इत्येतेषां रिक्थग्रा
दीनां मेलने केन क्रमेणैते ऋणं दाप्या इत्याकाङ्क्षाया अशा
रित्यवतरणासङ्गतिरत आह *एतेषामिति । तमेवाह *रि
ति । असति बाधके उपात्तवचनपाठक्रमत्यागे मानाभावादि
भावः । तुर्ये विशेषस्य वक्ष्यमाणत्वादत्रानुक्तिः ।

७। ननु रिक्थग्राहादीनां सति समवाये क्रमचिन्ता स
नास्तीत्याह *नन्वेतेषामिति । तमेव तदभावं क्रमेणोपपा
ति । *न भ्रातर इति । पितुः भ्रातरः पितरश्च न रिक्थ
अपि तु पुत्रा एव तथेति मनूक्तत्वात् पुत्रे सत्यन्यस्य त
सम्भवात्पुत्ररिक्थग्राहयोर्मेलनं नास्तीत्यर्थः । ननु मा
तयोः समवायः पुत्रयोषिद्ग्राहयोस्तु सम्भवत्येवेति चेन्न
भावादेव तयोस्तस्य दुर्वचत्वादित्याह *योषिदिति । अत्र
माह *न द्वितीय इति। द्वितीयभर्तृनिषेधादेव योषिद्ग्राहाभाव
भावः । पुत्र इत्यपि व्यर्थं पुनरुक्तं चेत्याह *तथा ऋणमि
तत्र हेतुमाह *पुत्रेति । तथाचास्यार्थस्य तेनैवोक्तत्वेन
रुक्त्यादत्र पुनः कथनमयुक्तमिति भावः । एवं विशेष्यानर्थ
मुक्त्वा विशेषणानर्थक्यं भेदेनाप्याह *अनन्येति । अत्रोप
माह *पुत्रे सतीति । अन्येनाश्रयणेत्यर्थः । तथा च तस्य
तस्यान्यागामित्वात्तद्व्यर्थमिति भावः। सत्यपि तस्मिन् तत्त्व
भ्युपेत्यापि दोषमाह *सम्भवे चेति । तत्र सत्यपि यदि
ग्राहोऽन्यः सम्भवति तदा केवलं पुत्रो न ऋणं दाप्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वनन्याश्रितद्रव्यः स्वयमेव तद्ग्राहस्तदेत्येवमत्र पक्षे तद्विशेषण-सार्थक्यमिति भावः । मूले यद्यप्यण्णन्तं तथाप्याविशेषात् णि-न्यन्तेनाह *रिक्थग्राहीति । वाऽसरूपन्यायेनेति भावः। रिक्थ-भागृणं दाप्य इति पाठान्तरम् । उक्तरीत्याऽत्र पक्षे विशेषण-साफल्येऽपि अस्यार्थस्याद्यपादेनैवोक्तत्वात् विशिष्टं निष्फलं पुनरुक्तं चेति भावः। तुर्यपादानर्थक्यमप्याह *पुत्रेति । तदा-शयमाह *पुत्रे इति । यत इत्यादिः । वचनपाठक्रमस्य प्राव-ल्यात् तत्र सत्यपि स दाप्यस्तदा किमु वाच्यमसति तत्र स ऋणं दाप्य इतीत्येवं कैमुतिकन्यायेनैवास्यार्थस्य सिद्धत्वादि-दमपि व्यर्थमिति भावः।

८। एवं सर्ववचनमाक्षिप्य क्रमेण परिहरति *अत्रोच्यते इत्यादिना । पुत्रे सत्यन्यस्य रिक्थग्रहणासम्भव इति यदुक्तं तत्राह *पुत्रे इति। अत्र मानमाह *तथा चेति । *वक्ष्यति, मूलकृत्। अन्यथापि सम्भवं प्रदर्शयन् तत्र मानान्तरमाह *त-थेति। *एकेषां, मते। यद्वा एकेषां साधुवृत्तानां पितॄणाम् । यद्वा एकेषां साधुवृत्तानामन्येषामसवर्णापुत्राणां समवाये। उपसंहर-ति *अतश्चेति ।

९ । उक्तदोषस्य दृढत्वाद्योषिद्ग्राहसद्भावस्य क्लिष्ट-त्वसूचनाय तत्सद्भावं शङ्कापूर्वकमाह *योषिदिति । शास्त्राविरो-धेनेति पाठः। नञ्घटितोऽपपाठः। शास्त्रेण भर्त्रन्तरनिषेधाद्यद्यपि स्त्रीणां द्वितीयः शास्त्रीयो नास्ति तथापि शास्त्रोल्लङ्घनकृतो यो-षिद्ग्राहत्वसम्भवात्तादृशस्स तत्पतिकृतऋणनिवारणे ऽधिकारी भवत्येवेत्यर्थः। नन्वेवं प्रकारेणास्तु तत्सम्भवः। तथापि तस्य स्मृत्यन्तरानुरोधेन तस्या अनेकविधत्वेनानेकविधत्वादनियमेन सर्वेपि किं ते तत्राधिकारिण इत्याशङ्कायां नियममाह *यश्चत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सृणामिति । निर्धारणे सर्वा षष्ठी । *प्रथमामिति । गृह्णातील
षज्यते । स्वैरिणीनां चातुर्विध्यं पुनर्भुवां च त्रैविध्यं तत्र च
द्वाह्ययोरेवाधिकार इत्येतत्सर्वं नारदोक्त्या प्रकाशयति *य
हेत्यादिश्रितइतीत्यन्तेन । *परेति । परः पतिः पूर्वो यासां
इत्यर्थः । *तासां, सप्तानाम् । कन्यैवेत्यस्य व्याख्या *अ
ति । एवेन व्यभिचारकृतदोषनिरासः । तर्हि किं प्रयुक्तोऽ
दोषोऽत आह *पाणीति । तेनैव दूषिता नान्येनेत्यर्थः ।
च इदमेवास्या दूषकताबीजं नान्यत्तदपि नाद्यं किं तु द्वि
मित्याह *पुनःसंस्कारेति । ईदृशी या सा तेन पुनर्भूः ।
प्रोक्तेत्यर्थः । *देशेति । दानसम्बन्धिन इत्यर्थः । *अ
द्वितीयस्मै सवर्णाय असपिण्डाय । प्रकृतेऽन्यसाहसासम्भव
*व्यभीति । अग्रे ऽकारप्रश्लेषः । *पत्यौ जीवत्येव, सति ।
मात्, स्वेच्छया । एवमग्रेऽपि । *अन्यं, यं कञ्चित् । *कौ
मिति । अपूर्वपतिं कुमारीमुपपन्नमित्यर्थः । *प्राप्तानिति ।
गविधिना प्राप्तान्देवरादीन्परित्यज्येत्यर्थः । *परम्, अन्यं
कञ्चित् । *प्राप्ता देशादिति । देशान्तरात्प्राप्ता सती या
क्रीता भवति सा, या च क्षुत्पिपासातुरा सती तवाहमि
प्राप्ता भवति सा च स्त्री चतुर्थी स्वैरिणी कथितेत्यर्थः । *
मेति । तासां मध्ये याऽन्तिमा तासां मध्ये च या प्रथमा
उपाश्रितौ तौ तयोः पतिकृतम् ऋणं दद्यातामित्यर्थः । *
तद्वत् उभयवत् । *अन्यः, उभयान्योऽपि । *तेनैव, नारदे
वा चार्थे । क्वचित् चपाठ एव । अनेन विशेषणद्वयेनान्या
आत्मादेर्धनस्य च रक्षणमात्रं निमित्तं न तु कामादिरिति
चितम् । पत्यौ मृते इति शेषः । अस्या भर्त्तुरित्यन्वयः । व्यव
नभिज्ञतया तया ऋणं न दत्तमिति भावः । *तथैव, यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मागता तथैव, कथमपि सर्वथाऽस्पृष्टामिति यावत्। प्रगतधनसहितेत्यर्थनिरासायाह * प्रकृष्टेनेति। अन्यमुचितमाह * तथेति। तदुक्तिरेवेयमपि। हिश्चार्थे। * वोढुः, पत्युः। अत्र हेतुमाह *सैवेति। चो ह्यर्थे।। * अस्य, पत्युः।

१०। तृतीयपादे दत्तदोषद्वयमुद्धर्तुमादौ विशेष्यसाफल्यमाह *पुत्रस्येति। पुत्रोऽनन्येत्यत्र पुत्रग्रहणम् उक्तयोरुभयोरभावे तेन ऋणं देयमित्येवंविधक्रमबोधनार्थं न तु तत्र तस्याधिकारप्रदर्शनार्थं, येन पौनरुक्त्यं स्यादित्यर्थः। विशेषणस्यापि सार्थक्यमाह *अनन्येति। तस्य तत्त्वेन तत्राधिकारो न पुत्रत्वमात्रेणेति अन्धादीनामन्याश्रितद्रव्यत्वेनान्धत्वादिदोषयुक्तत्वेन पितृरिक्थांशग्रहणायोग्यत्वेन नाधिकारस्तत्र किं त्वनन्धादीनामेव तत्त्वेनाधिकार इत्येतदर्थकतया विशेषणस्य सार्थक्यमिति भावः। तथा च योग्यपुत्रत्वेन तत्राधिकारो न पुत्रत्वमात्रेणेति सूचनार्थं तादिति तत्त्वम्। एवं च पुत्रत्वेनेत्यादि यत् पुत्रपौत्रैरित्यत्रोक्तं तदप्येवंपरतया व्याख्येयमिति न प्रागुक्ताविरोधोऽपीति बोध्यम्।

११। तुर्यपादे दत्तदोषमुद्धरति *पुत्रेति। पुत्रग्रहणं तत्रोपलक्षणमित्याह * पौत्रेति। पूर्वत्र द्वयोरेवोपात्तत्वान्नातिप्रसङ्गः। रिक्थिन इति प्रथमाबहुवचनान्तमेवेत्याह * प्रपौत्रादय इति। * तदर्णमिति। तदा प्रपितामहर्णमित्यर्थः। * अन्यथा, तदीयरिक्थग्रहणाभावे। रिक्थभाज एव प्रपौत्रादेस्तादृशप्रपितामहादेर्ऋणदानेऽधिकारो नान्यस्येत्येतत्प्रतिपादकतयेदमपि सफलमिति तात्पर्यार्थः।

१२। तद्धीनत्वनिवेशस्य फलमाह *पुत्रपौत्रौत्विति। योग्यावित्यर्थः। अत एव तत्र नातिप्रसङ्ग इत्युक्तमनुपदमेव। *इत्युक्तमिति। पुत्रपौत्रैर्ऋणं देयमित्यत्रेत्यर्थः। अत्र नान्यथेत्यत्र संवा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दमाह *यथाहेति। * अव्याहतं, निष्कपटम्। क्रमात्प्राप्तमित्यर्थ
व्याख्या * पुत्रैरिति। *तत्, ऋणम्। * चतुर्थात्, रिक्था
हिण इत्यर्थः। आरभ्येति शेषः।

१३। ननु स्वरसतो न ततस्तदर्थप्रतीतिः। किं च नारदवच
सामान्येनैव निषेधप्रतीतिः, तत्सङ्कोचे दृढतरमानान्तराभावश्च,
तस्तं तुर्यांशमन्यथा व्याचष्टे *यद्वेति। पुत्रस्तादृशः। *उक्ता
त्रयाणां क्रमः प्रागुक्त एवेति भावः। तत्र द्वितीयतृतीययोर्वै
त्यमपीत्याह * पुत्राभावेइति। अत्र पक्षे तत्र बहुत्वासम्भ
बहुवचनासङ्गते रिक्थिन इति पञ्चम्यन्तम्। विभक्तिलिङ्गवि
णामेन ऋणं दाप्य इत्यस्यानुषङ्गात् तस्य यो रिक्थी तस्म
दाप्यमित्यर्थः। तदेतत् ध्वनयन् फलितमाह * योषिद्ग्राह
ननु रिक्थिन इत्यतः कथमुक्तार्थलाभोऽत आह * रिक्थ
प्रकृते इति शेषः। अतो न पूर्वविरोधः। अन्यथाऽनुपपत्ति
उक्तवक्ष्यमाणप्रकाराभ्यां व्याख्यानसम्भवात्। अतोऽत्र साध
न्तरं प्रागुक्तनारदमेवाह * सैव चेति। साधकान्त
*य इति। अत्र यो यस्य दारान् हरते स तस्य धनमपि हर
न, विधिबोधकाभावात्। किं तु यतो दारा एव धनमत
यस्य दारान् हरते स तस्य धनमेव हरते इति। तद्दारान्
तद्व्यपदेशभागिव तद्धनहारीतिव्यपदेशभागपि भवतीत्य
अस्य चोपयोगः प्रायश्चित्तादौ बोध्यः।

१४। पुत्रस्तादृशः। *योषिद्ग्राह इति। ऋणं दाप्य इत्य
नुषङ्गः। * विरुद्धमिति। द्वितीयतृतीययोर्यः क्रमः प्रागु
द्विपरीतस्तुर्यस्य एवंव्याख्यायां प्रतीयते इति मिथः क्रमे वि
मित्यर्थः। दोषान्तरमाह * उभयेति। द्वयोः सत्त्वे मिथो
वोपलक्षितयोरेव तयोः तत्प्रदत्त्वानियमेनोपलक्षकाभावे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(७) न्यायरत्नमाला-श्रीपार्थसारथिमिश्र वि० सं० (मीमांसा २

(८) ब्रह्मसूत्रभाष्यम्-बादरायणप्रणीत-वेदान्तसूत्रस्य यतीन्द्र श्रीमद्विज्ञान-भिक्षुकृत व्याख्यानम्। सम्पूर्णम्। (वेदान्तः) ६

(९) स्याद्वादमञ्जरी-मल्लिषेणानिर्मिता सम्पूर्णा। (जैनदर्शनम्) २

(१०) सिद्धित्रयम्-विशिष्टाद्वैत-ब्रह्मनिरूपण-परम्-श्रीभाष्यकृतां परमगुरुभिः श्री ६ श्रीयामुनमुनिभिर्विरचितम्। सम्पूर्णम् (वेदान्तः) १

(११) न्यायमकरन्दः। श्रीमदानन्दबोधभट्टा-रकाचार्यसंगृहीतः। आचार्यचित्सुख-मुनिविरचितव्याख्योपेतः (वेदान्तः) ४

(१२) विभक्त्यर्थनिर्णयःन्यायानुसारिप्रथमादि-सप्तविभक्तिविस्तृतविचाररूपः म० म० श्रीगिरिधरोपाध्यायरचितः। सम्पूर्णः (न्यायः) ५

(१३) विधिरसायनम्। श्रीअप्पयदीक्षितकृतम्। सं० (मीमांसा) २

(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्ट-सोमेश्वरविरचिता। (मीमांसा) १६

(१५) शिवस्तोत्रावली। उत्पलदेवविरचिता। श्रीक्षेमराजविरचितवृत्तिसमेता। (वेदान्तः) २

(१६) मीमांसाबालप्रकाशः (जैमिनीयद्वादशाऽध्यायार्थसंग्रहः) श्रीभट्टनारायणात्मज-भट्टशङ्करविरचितः। (मीमांसा) २

(१७) प्रकरणपञ्चिका (प्रभाकरमतानुसारि-मीमांसादर्शनम्) महामहोपाध्यायश्रीशालिकनाथमिश्रविरचितं, श्रीशङ्करभट्टकृतो मीमांसासारसंग्रहश्च सम्पूर्णः (मीमांसा) ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः। पण्डितप्रवरश्रीसदानन्दव्यासप्रणीत-स्तत्कृतव्याख्यासमलङ्कृतश्च। (वेदान्त) ३

(१९) कात्यायनश्रौतसूत्रम्। महामहोपाध्यायश्रीकर्काचार्यविरचितभाष्यसहितम्। १३

(२०) ब्रह्मसूत्रभाष्यम्। श्रीभास्कराचार्यविरचितम् (वेदान्तः) १

(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम्। आनन्दपूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया (विद्यासागरी) ति प्रसिद्धया समेतम्। (वेदान्तः) १३

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता। १

(२३) श्रीलक्ष्मीसहस्रम्-बालबोधिनीव्याख्यया-ऽवतरणिकया च सहितम्। ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२४ ब्रह्मसूत्रवृत्तिः मरीचिका श्रीव्रजनाथभट्टकृता (वेदान्त)
२५ क्रोडपत्रसंग्रहः । अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्या व्यानुमानगादाधर्याः प्रत्यचानुमानमाथुर्या व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि : (न्यायः)
२६ ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम् । श्रीसुन्दरभट्टरचितसिद्धान्तसेतुकाऽभिधटीकासहितश्रीदे... प्रणीतसिद्धान्तजाह्नवीयुतम्
२७ षड्दर्शनसमुचयः । बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शन संक्षेपः । मणि... टीकया सहितः । हरिभद्रसूरिकृतः ।
२८ शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः । प्रमेयरत्नार्णवश्च
२९ अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्याजागदीशी टीका ।
३० वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा संस्कारप्रकाशात्मकः
३१ वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः
३२ स्मृतिसारोद्धारः विद्वद्वराविश्वम्भरत्रिपाठिसंकलितः ।
३३ वेदान्तरत्नमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्यकृता ।
३४ प्रस्थानरत्नाकरः । गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितः
३५ वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम् ।
३६ योगदर्शनम् । परमहंसपरिव्राजकाचार्य-नारायणतीर्थविरचित-योगसिद्धान्तचन्द्रि... व्यख्या संवलितम् ।
३७ वेदान्तदर्शनम् । परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वती स्वामिकृत ब्रह्माऽ... समाख्य व्याख्यासंवलितम् ।
३८ विश्वप्रकाशः । कोशः । विद्वद्वर श्रीमहेश्वरसुरिविरचितः ।
३९ श्रीसुबोधिनी । श्रीवलभाचार्यविनिर्मिता । श्रीमद्भागवतव्याख्या गोस्वामीश्रीविठ्ठलना... तविराचित टिप्पणीसहिता ।
४० वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः पुजाप्रकाशः ।
४१ वेदान्तसिद्धान्तसंग्रहः । श्रुतिसिद्धान्तापरनामकः । श्रीब्रह्मचारिवनमालिमिश्रविरचित... द्वैतदर्शनानुगतः ।
४२ स्वानुभवादर्शः । श्रीमत्परमहंसपरिव्राजकाचार्य नारायणाश्रमशिष्यमाधवाश्रम... स्वकृतटीकाविभूषितश्च ।
४३ याज्ञवल्क्यस्मृतिः । बालम्भट्टीसमाख्य वाख्यासमलङ्कृतमिताक्षरासहिता । व्यवहार...

पत्त्रादिप्रेषणस्थानम् } हरिदास गुप्तः, चौखम्बा, बनारस, सिटी.

११०३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

-XI

1912.

THE

HOWKHAMBÂ SANSKṚIT SERIES;

COLLECTION OF RARE & EXTRAORDINARY SANSKṚIT WORKS.

NO. 173.

व्यवहार- बालंभट्टी

इति प्रसिद्धया लक्ष्मीनाम्निकया
पायगुण्डे इत्युपनामकेन बालंभट्टेन स्वपत्न्याः लक्ष्मीदेव्याः
स्मारकत्वेन तन्नाम्ना रचितया बृहत्या टीकया सहिता
मिताक्षरा
श्रीयुतगोविन्ददासमहाशयप्रदर्शितरीत्या
पर्वतीयनित्यानन्दपन्तेन परिष्कृत्य संशोधिता ।

VYAVAHÂRA-BÂLAMBHATTI

THE EXTENSIVE COMMENTARY ON THE MITÂKSHARÂ
WITH THE ORIGINAL

BY

Bâlambhatta Páyagunde

EDITED BY

Pandit Nityanand Pant Parvatiya
Under the supervision of Shri Govinda Das.

FASCICULUS I.

PUBLISHED AND SOLD BY THE SECRETARY,

CHOWKHAMBÂ SANSKṚIT BOOK-DEPOT,

BENARES.

AGENTS:- OTTO HARRASSOWITZ: LEIPZIG:
PAṆDITA JYESHTHÂRAMA MUKUNDAJI BOMBAY:
PROBSTHAIN & CO., BOOKSELLERS, LONDON.

Printed by Jai Krishna Dasa Gupta
AT THE VIDYÂ VILÂSA PRESS
BENARES.

Price Rupee one.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ श्रीः ॥

-*-

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तबकः— १७३

१ अस्यां चौखम्बा-संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठ... सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एकः स्तबको मुद्रयित्वा प्रका... एकस्मिन् स्तबके एक एव ग्रन्थो मुद्र्यते ।

२ प्राचीना दुर्लभाश्चामुद्रिता मीमांसावेदान्तादिदर्शनव्याकरण... शास्त्रसाहित्यपुराणादिग्रन्था एवात्र सुपरिष्कृत्य मुद्र्यन्ते ।

३ काशिकराजकीयप्रधानसंस्कृतपाठशालाऽध्यापकाः पण्डिता... च शास्त्रदृष्टयो विद्वांस एतत्परिशोधनादिकार्यकारिणो भ...

४ भारतवर्षीयैः, ब्रह्मदेशीयैः, सिंहलद्वीपवासि...
देयं वार्षिकमग्रिमं मूल्यम्-...

५ अन्यैर्देयं प्रतिस्तबकम् „ „

६ प्रापणव्ययः पृथग् नास्ति ।

७ साम्प्रतं मुद्र्यमाणा ग्रन्थाः-

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता

(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः

(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृत-न्यायरत्नाकराख्यया व्याख्यया सहितम् । सम्पूर्णम् ।

(४) भाष्योपबृहितं तत्त्वत्रयम् । विशिष्टाद्वैतदर्शनप्रकरणम् । ...काचार्य्यप्रणीतम् । श्रीनारायण तीर्थ... भाषा प्रकाशसहितम् । सं० (वेदान्...)

(५) करणप्रक... श्रीब्रह्मदेवविरचितः सम्पूर्णः (ज्योतिष...)

(६) भाट्टचिन्ता... । महामहोपाध्याय- श्रीगागाभट्ट विरचितः । तर्कपादः (मीमांसा)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

July. 1912.

THE

CHOWKHAMBÂ SANSKRIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 175. धर्मशास्त्र १४८

व्यवहार- बालंभट्टी

इति प्रसिद्धया लक्ष्मीनामिकया
पायगुण्डे इत्युपनामकेन बालंभट्टेन स्वपत्न्याः लक्ष्मीदेव्याः
स्मारकत्वेन तन्नाम्ना रचितया बृहत्या टीकया सहिता
मिताक्षरा
श्रीयुतगोविन्ददासमहाशयप्रदर्शितरीत्या
पर्वतीयनित्यानन्दपन्तेन परिष्कृत्य संशोधिता ।

VYAVAHÂRA-BÂLAMBHATTI

THE EXTENSIVE COMMENTARY ON THE MITÂKSHARÂ
WITH THE ORIGINAL

BY

Bâlambhatta Páyagunde

EDITED BY

Pandit Nityanand Pant Parvatiya
Under the supervision of Shri Govinda Das.

FASCICULUS III.

PUBLISHED AND SOLD BY THE SECRETARY
CHOWKHAMBÂ SANSKRIT BOOK-DEPOT.
BENARES.

AGENTS:- OTTO HARRASSOWITZ LEIPZIG:
PANDITA JYESHTHARAMA MUKUNDAJI BOMBAY:
PROBSTHAIN & CO., BOOKSELLERS, LONDON.

Printed by Jai Krishna Dasa Gupta,
AT THE VIDYÂ VILÂSA PRESS
BENARES.

Price Rupee one.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ श्रीः ॥

-*-

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तबकः— १७५

१ अस्यां चौखम्बा-संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतं सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एकःस्तबको मुद्रयित्वा प्रकाश्यते एकस्मिन् स्तबके एक एव ग्रन्थो मुद्र्यते ।

२ प्राचीना दुर्लभाश्चामुद्रिता मीमांसावेदान्तादिदर्शनव्याकरण धर्मशास्त्रसाहित्यपुराणादिग्रन्था एवात्र सुपरिष्कृत्य मुद्र्यन्ते ।

३ काशिकराजकीयप्रधानसंस्कृतपाठशालाऽध्यापकाः पण्डिता अन्ये च शास्त्रदृष्टयो विद्वांस एतत्परिशोधनादिकार्यकारिणो भवन्ति ।

४ भारतवर्षीयैः, ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्च एतद्ग्राहकैः देयं वार्षिकमग्रिमं मूल्यम्–मुद्राः ७ आणकाः

५ अन्यैर्देयं प्रतिस्तबकम् „ „ १ „

६ प्रापणव्ययः पृथग् नास्ति ।

७ साम्प्रतं मुद्र्यमाणा ग्रन्थाः– मुद्रिताः स्तबकाः

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता (संस्कारः)

(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः (व्याकरणम्)

(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृत-न्यायरत्नाकराख्यया व्याख्यया सहितम् । सम्पूर्णम् ।

(४) भाष्योपबृंहितं तत्त्वत्रयम् । विशिष्टाद्वैतदर्शनप्रकरणम् । श्रीमल्लोकाचार्य्यप्रणीतम् । श्रीनारायण तीर्थ विरचित भाट्टभाषा प्रकाशसहितम् । सं० (वेदान्त)

(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः सम्पूर्णः (ज्योतिषः)

(६) भाट्टचिन्तामणिः । महामहोपाध्याय-श्रीगागाभट्ट विरचितः । तर्कपादः (मीमांसा)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

केनापि ऋणं न देयं स्यादित्यर्थः। इष्टापत्तिस्त्वत्र न।

यदा तु न सकुल्याः स्युर्न च सम्बन्धिबान्धवाः।
तदा दद्यात् द्विजेभ्यस्तु तेष्वसत्स्वप्सु निक्षिपेत्॥
(ना० व्य० प० १।११३)

इति तस्यावश्यदेयत्वप्रतिपादकस्मृतिविरोधापत्तेरिति भावः।

* नैष दोष इति। जातावेकवचनम्। प्रागुक्ताः प्रकृतोपयुक्ता अपि योषिद्ग्राहा अनेके यद्यपि तथापि कोटिद्वयं तेषां कार्यम्। अन्तिमस्वैरिणीग्राही प्रथमपुनर्भूग्राही सप्रधनस्त्रीग्राही चेत्येका कोटिः। निर्धननिरपत्यस्त्रीग्राहीति त्वन्या कोटिः। एवं सति व्यवस्थासम्भवान्न दोष इत्याशयेनाद्यकोट्याशयेनाद्यपक्षमाह *आन्तिमेति। यत इत्यादिः। एवं चैतत्कोट्यन्तर्भूतयोषिद्ग्राहाभावे पुत्र ऋणं दाप्य इति तस्यार्थ इति भावः। द्वितीयकोट्याशयेन द्वितीयपक्षमाह *पुत्राभावे त्विति। तथा च तदभावे एतद्बोध्ययोषिद्ग्राह ऋणं दाप्य इति तदर्थः। तथा च यदि सामान्येन तत्तदभावे स स दाप्य इत्युक्तं स्यात्तदोक्तदोषः स्यात्। तदेव न। किं तूक्तरीत्या ऽवान्तरभेदपुरस्कारेणेति न क्रमे विरोधो नापि तद्वचनविरोधोऽवश्यदेयत्वस्यैवानेन प्रतिपादनादिति भावः।

१९। ननु विनिगमकाभावे वैपरीत्यमेव कुतो न, अत आह *एतदेवेति। एवेन तद्व्यवच्छेदः। एवं च तदनुरोधेनैवमेवोक्तं न त्वन्यथा। तद्विरोधापत्तेरिति भावः। अभ्यर्हितत्वाद्धनस्य पूर्वनिपातः। पुत्रयोरितीति पाठः। धनस्त्रीहारिणौ च पुत्रश्चेति द्वन्द्व इत्याशयेन व्याचष्टे * धनेति। शेषमाह * समवायेइति। लिङ्गार्थाविवक्षया आह * हरते इति। क्वचिदत्रापि हरेदित्येव पाठः। * स्त्रीधनिनोरिति। अभ्यर्हितत्वाविवक्षया ऽल्पाच्तर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रत्वेन स्त्रीशब्दस्य पूर्वनिपातः । इन्यन्तेन द्वन्द्वेन इन्यन्तयोर्वि-
शेषेण वा इष्टार्थालाभादाह * स्त्री चेति । सर्वं वाक्यमिति न्या-
येन सानुषङ्गेणाह * पुत्र एवेति । एवमग्रेऽपि । अत्रापि प्रसङ्गं
प्राग्वत् विरोधं प्रागुक्तरीत्यैव परिहरति * स्त्रीति ।

१६। नन्विदमपि व्याख्यानमयुक्तं, उक्तस्मृतिभ्यां स्त्रियो ध-
त्वलाभेऽपि रिक्थत्वालाभात् । तत्रैव द्रव्ये तत्प्रयोगात् । लो-
प्रसिद्धितः शास्त्रप्रसिद्धेः प्राबल्यादत आह * पुत्रहीनस्येति
प्रतिज्ञातव्याख्यानान्तरमेवाभिधातुमादावाकाङ्क्षापूर्वकमर्थसिद्धं
किञ्चिदाह * एते इति । रिक्थेत्यादिना द्रव्य इत्यन्तेनो-
इत्यर्थः । ऋणं दाप्या इत्युक्तेः आकाङ्क्षोदयादिति भावः । अ-
पक्षे रिक्थिन इति संप्रदानस्य संबन्धत्वाविवक्षया षष्ठ्यन्तमि-
तदनुरोधेनाह * कस्येति । एवमग्रेऽपि । * उत्तमर्णे-
ति । आदौ तस्यैवोपस्थितेर्योग्यत्वाच्च । आदिना पौत्रादिग्रह-
म् । एवमर्थसिद्धमुक्त्वा तदाह * पुत्राद्यभावे इति । पुत्रपदमु-
क्षणमिति सूचयन्नर्थमाह *पुत्राद्यन्वयेति । अन्वयो वंशपरम्प-
ननु न सामानाधिकरण्यं बाधितार्थकत्वादत आह * यो रि-
थीति । तदसत्त्वेपि निर्वाहार्थमाह * योग्य इति । * तस्येति
तादृशस्य सपिण्डादेरेते रिक्थग्राहादयः पूर्वोक्तक्रमेण ऋ-
दाप्या इत्यर्थं वचनविपरिणामेनाह * दाप्या इति ।

१७। अत्र सर्वत्र मानमाह *तथा चेति । अग्रेऽन्वयः। तस्य
यद्देयं तत्सान्वयस्येत्यर्थः। *सः, यस्य देयं सः सान्वयो ब्राह्मण
एवमग्रेऽपि । चश्चेदर्थे । तदेति शेषः । * निर्वपेत्, प्रक्षिपे-
*कुल्येषु,तत्सकुल्येषु। क्वचित्तत्सकुल्येष्वित्येव पाठः। तद्दणमि-
शेषः। *अस्य, ब्राह्मणस्योत्तमर्णस्य।एवं प्रागपि।निर्वपेदित्यनु-
नुषङ्गोऽग्रे । सगोत्रसपिण्डाः सकुल्याः । असगोत्रसपिण्डा ब-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वः। सम्बन्धी उक्त एव। अनेन पुत्राद्यन्वयाभावे सपिण्डाद्यभावे च कस्य ते दाप्यास्तदित्यप्याकाङ्क्षा शान्तिं गता। अत्रैते धनेत्यादितत्पुत्रादेरित्यन्तेन उक्तार्थेऽर्द्धश्लोकः किञ्चिन्न्यूनो मानम्। पुत्राद्यभावे इत्यादिदाप्याइत्यन्तेनोक्तार्थे श्लोकद्वयं तावन्मात्रन्यूनं मानम्। स चार्थोऽनेनान्वयव्यतिरेकाभ्यां दृढीकृतः। तत्र निर्वपेदित्यन्तेनान्वयः। तदन्वयाभावे तत्सकुल्यादिषु निर्वपेदित्यन्वयमुखेनाभिधानात्। यदा तु न सेति व्यतिरेकः। तथा च सकुल्याद्यभावे एव द्विजादौ निक्षिपेदित्युक्त्या सत्सु तेषु द्विजादावृणदाननिषेधध्वननद्वारा प्रागुक्तार्थदृढीकरणमिति भावः॥ ५१॥

मि० अधुना पुरुषविशेषे ऋणग्रहणं प्रतिषेधन् प्रसङ्गादन्यदपि प्रतिषेधति।

या० भ्रातॄणामथ दम्पत्योः पितुः पुत्रस्य चैव हि।
प्रातिभाव्यमृणं साक्ष्यमविभक्ते न तु स्मृतम्॥५२॥

मि० प्रतिभुवो भावः प्रातिभाव्यम्। भ्रातॄणां दम्पत्योःपितापुत्रयोश्चाविभक्ते द्रव्ये विभागात्प्राक्प्रातिभाव्यमृणं साक्ष्यं च न स्मृतं मन्वादिभिः। अपि तु प्रतिषिद्धं, साधारणधनत्वात्। प्रातिभाव्यसाक्षित्वयोः पक्षे द्रव्यव्ययावसानत्वात्। ऋणस्य चावश्यप्रतिदेयत्वात्। एतच्च परस्परानुमतिव्यतिरेकेण। परस्परानुमत्या त्वविभक्तानामपि प्रातिभाव्यादि भवत्येव। विभागादूर्ध्वं तु परस्परानुमतिव्यतिरेकेणापि भवति।

ननु दम्पत्योर्विभागात्प्राक्प्रातिभाव्यादिनिषेधो न युज्यते। तयोर्विभागाभावेन विशेषणानर्थक्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विभागाभावश्चापस्तम्बेन दर्शितः, जायापत्यो-र्न विभागो विद्यते इति।

सत्यम्। श्रौतस्मार्ताग्निसाध्येषु कर्मसु तत्फले-च विभागाभावो न पुनः सर्वकर्मसु द्रव्येषु च। तथ हि। जायापत्योर्न विभागो विद्यते इत्युक्त्वा किमि ति न विद्यते इत्यपेक्षायां हेतुमुक्तवान्, पाणिग्रह णाद्धि सहत्वं कर्मसु तथा पुण्यफलेषु चेति। स्मात्पाणिग्रहणादारभ्य कर्मसु सहत्वं श्रूयते "जाया पती अग्निमादधीयाताम्" इति तस्मादाधाने सहाधि कारादाधानसिद्धाग्निसाध्येषु कर्मसु सहाधिकार तथा, कर्म स्मार्तं विवाहाग्नावित्यादिस्मरणाद्विवा सिद्धाग्निसाध्येष्वपि कर्मसु सहाधिकार एव। अ श्चोभयविधाग्निनिरपेक्षेषु कर्मसु पूर्तेषु जायापत्य पृथगेवाधिकारः संपद्यते। तथा, पुण्यानां फलेषु स गादिषु जायापत्योः सहत्वं श्रूयते, दिवि ज्योतिरज मारभेतामित्यादि। येषु पुण्यकर्मसु सहाधिकारस्ते षां फलेषु सहत्वमिति बोद्धव्यम्, न पुनः पूर्तान भर्त्रनुज्ञयाऽनुष्ठितानां फलेष्वपि।

ननु द्रव्यस्वामित्वेऽपि सहत्वमुक्तम्, द्रव्यपरि ग्रहेषु च न हि भर्तुर्विप्रवासे नैमित्तिके दाने स्तेय पदिशन्तीति।

सत्यम्। द्रव्यस्वामित्वं पत्न्या दर्शितमनेन, पुनर्विभागाभावः। यस्माद् द्रव्यपरिग्रहेषु चेत्युक्त्वा त्र कारणमुक्तम्। भर्तुर्विप्रवासे नैमित्तिकेऽवश्यकर्त दानेऽतिथिभोजनभिक्षाप्रदानादौ यस्मान्न स्तेयमु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिशन्ति मन्वादयस्तस्माद्भार्यायामपि द्रव्यस्वामित्वमस्ति। अन्यथा स्तेयं स्यादिति। तस्माद्भर्तुरिच्छया भार्याया अपि द्रव्यविभागो भवत्येव न स्वेच्छया।

यथा वक्ष्यति, (या० अ० २।११५)

यदि कुर्यात्समानंशान्पत्न्यः कार्याः समांशिकाः। इति ॥ ५२ ॥

बा० १। सङ्गतिमाह * अधुनेति। तुर्यपादस्य चरमव्याख्यानेन रिक्थ्येव ऋणं गृह्णीयान्नान्य इति नियमलाभेन रिक्थग्रहणायोग्यपुरुषविशेषस्य ऋणग्रहणनिषेधस्याप्यर्थाल्लाभेनार्थिकऋणग्रहणप्रतिषेधप्रसङ्गेन पुरुषविशेषे वक्ष्यमाणेऽन्यदपि प्रातिभाव्यादिकम् अवान्तरप्रकारभेदं वक्तुं प्रतिषेधतीत्यर्थः। अपिना ऋणग्रहणसमुच्चयः। अन्यथैतत्प्रकरणे एतदसङ्गतिः स्पष्टैवेति भावः। इदं च ऋणग्रहणप्रतिषेधप्रसङ्गादिति क्वाचित्कासम्बद्धपाठाभिप्रायेण व्याख्यातम्। वस्तुतस्तु ऋणग्रहणं प्रतिषेधन्प्रसङ्गादिति प्रचुरः पाठो युक्तश्चेति बोध्यम्। तदा अधुना अधमर्णीयपञ्चविधग्रहणधर्मादिकथनानन्तरं वक्ष्यमाणे पुरुषविशेषे ऋणग्रहणस्य प्रतिषेधं कुर्वन् तत्प्रतिषेधप्रसङ्गात्तदर्थं प्रातिभाव्यादिकमपि प्रतिषेधतीत्यर्थः। अपिः प्राग्वत्। तदसङ्गतिः स्पष्टैवेति भावः। मूलस्थम् अथेति सर्वादौ योज्यम्। उच्यते इति शेषः। एतदर्थ एवाधुनेत्यादिनोक्तः।

२। पदार्थमुक्त्वा वाक्यार्थमाह * भ्रातॄणामिति। चः पितापुत्रयोः समुच्चायक इत्याह * पुत्रयोरिति। सर्वसमुच्चायकत्वार्थमाह *चेति। अविभक्तइत्यस्य भावप्रत्ययान्तस्य न भ्रात्रादिधर्मपरत्वं, तस्य स्वत एव सिद्धत्वात्। द्रव्यद्वारकविभागग्रहणे क्लिष्टत्वमिति सूचयन् कर्मप्रत्ययेनाह * द्रव्ये इति। सत्सप्तमी। स्पष्टत्वायैतद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्थमाह * द्रव्ये इति । *ऋणं, तद्ग्रहणम् । * नेति । एवान्वयोऽ
तुसूचितव्यवच्छेद्यतात्पर्यार्थबोधकवाक्यान्तरमाह * अपि
ति । तैरेवेति भावः । तत्र हेतुमाह * साधारणधनत्वादिति
कर्मधारये हेतोर्वैयाधिकरण्यापत्तिः । अतः साधारणं समुदितं स
स्वत्वापन्नं धनं येषां भ्रात्रादीनां तेषां भावस्तत्त्वं तस्मादित्यर्थः

३। नन्वेतावतापि कुतस्तदभावोऽत आह * प्रातिभाव्ये
क्रमे तात्पर्यात्पूर्वनिपातः । * पक्षे, अधमर्णकृतदानाभावप
* द्रव्येति । द्रव्यव्ययस्य तद्दानस्यावसानं पर्यवसानं यये
त्वादित्यर्थः । तत्र यद्यपि दानप्रतिभुवि निःसन्दिग्धमिदं त
पि वक्ष्यमाणरीत्या दर्शनप्रत्ययप्रतिभुवोरिव साक्षिणोऽपि
स्तीति स्फुटीभविष्यति । साधारणेन धनेन तु इदमेकेन क
शक्यमिति तात्पर्यम् ।

४। अत एव विशेषमाह *एतच्चेति । *अविभक्तानां
भ्रात्रादीनाम् । नन्वेवमविभक्ते इति वाक्यार्थविशेषणं व्यर्थ
आह * विभागादिति । अपिना तस्या अपि समुच्चयः ।
द्विशेषबोधकमेव तदिति भावः ।

५। दम्पत्यंशे यत्प्रागुक्तं तद्विशेषणांशे आक्षिपति *नन्वि
*निषेधः,प्रागुक्तः। अत्र हेतुमाह *तयोरिति । तयोर्विभाग
वाभावेन तदंशेऽविभक्ते इति वाक्यार्थविशेषणानर्थक्यादित्य
तथा च तयोः सार्वकालिकतया निषेधे वाच्ये तथा निषेधो
रयुक्तेत्यर्थः । ननु तत्रैव किं मानमत आह *विभागाभावश्चे

६। अर्द्धाङ्गीकारेण परिहरति *सत्यमिति । आपस्तम्ब
माह *श्रौतेति । * न पुनः,न तु । विभागाभाव इत्यस्यानुषङ्ग
ननु तथैवार्थः कुतो न, अतो हेतुमाह *तथाहीति । *हि, यत
*तथा, उक्ताशयेनैव तमुक्तवानित्यर्थः । पाणीत्यादिव्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*यस्मादिति। ह्यर्थोऽयम्। क्वचित् हि यस्मादित्येव पाठः। पञ्चम्युपपत्तये आह *आरभ्येति। *सहत्वं, साहित्यम्। श्रुतिमाह *जायति। आकाङ्क्षाशान्तये पूरयति *तस्मादिति। *सहेति। तच्छ्रवणादित्यर्थः। *सहाधिकार इति। सिद्ध इति तयोस्तत्र विभागो नास्तीति शेषः।

७। श्रौते उक्त्वा स्मार्त्ते आह *तथेति। *अग्निसाध्येष्वपि कर्मस्विति। अग्निसाध्येषु कर्मस्वपीत्यर्थः। एवेन विभागव्यवच्छेद इति तल्लाभः।

८। एवमुभयत्र सहाधिकारविधिबलादर्थसिद्धमर्थमाह * अतश्चेति। * पूर्त्तेषु, तडागादिषु। पूर्तं खातादिकर्मणीत्यमरः। तथा-पुण्येति व्याचष्टे * तथेति। चार्थोऽयम्। तत्रत्यतथेत्यस्य तु तद्वदित्यर्थः। कर्मधारयनिरासायाह *पुण्यानामिति। दिवि द्युलोकादौ अजरं कारणभूतसुकृतनाशपर्यन्तमविनश्वरं जरारहितं वा ज्योतिः तेजःप्रधानं कलेवरमारभेतामित्यर्थः।

९। नन्वेवं सर्वत्र तत्त्वे सर्वकर्मसु तत्त्वापत्त्या पूर्तेष्वपि प्रागुक्तपृथगधिकारो न सिध्येत्, अतो निष्कृष्टार्थमाह * येष्विति। *पुनः, तु।

१०। द्रव्येषु चेत्यंशं द्रढयितुमाह * ननु द्रव्येति। यथा तद्बलादुक्तस्थले सहत्वं विभागाभावश्च तथा द्रव्यस्वाम्येऽपि सहत्वविधायकवचनबलात्सहत्वासिद्ध्या द्रव्यसाध्यपुत्रादिफलेष्वपि दम्पत्योः सहत्वापत्तिः। सहितयोरेव द्रव्यस्वाम्यात् द्रव्यस्याविभाज्यतापत्तिरपि। तथा च द्रव्येऽपि दम्पत्योर्विभागाभावात् प्रागुक्तदोष एवेति भावः। *उक्तम्, आपस्तम्बेन। तमेवाह *द्रव्येति। पाणिग्रहणाद्धि सहत्वमित्यनुवर्त्तते। तत आरभ्य द्रव्येषु परिग्रहेषु पुत्रादिजनेषु च सहत्वमेव दम्पत्योरित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र हेतुमाह *नहीति । भर्तुर्विप्रवासे विशेषेण प्रवासे सति भार्याया नैमित्तिकदानविषये हि यतो न स्तेयं चौर्यमुपदिश न्तीति । द्रव्यस्वाम्येऽपि सहत्वविधानात् तद्वत् द्रव्येऽपि विभागो नास्तीत्यर्थः ।

११। अर्द्धाङ्गीकारेण परिहरति *सत्यं द्रव्येति। *स्वामित्वं तन्मात्रम् । तथा च तन्मात्रमनेनोक्तं न तु तत्र सहत्वं ये विभागाभावः स्यादिति भावः ।

१२। इदमेव विशदयति *यस्मा।दितिस्यादितीत्यन्तेन ।य स्मादित्यस्य उक्तमित्यत्रान्वयः ।* द्रव्येति । अत्र मतेऽस्याय र्थः। द्रव्यार्जनेष्वपि सहत्वं दम्पत्योरिति हेतुस्वरसासिद्धोऽयं वार्थो न प्रागुक्तः । एतच्च सहत्वमौपचारिकं न मुख्यम् । न हि । यथाऽऽधानादिषु तयोरन्यतराभावे आधानादिस्वरूपा द्धिर्नैवं द्रव्यार्जनेऽपि तु पतिरर्जयिता पत्नी चार्जितं रक्षति योगक्षेमावुभाभ्यां क्रियेते इत्युभयानुसन्धानासिद्धत्वेन सह मिव । एवं च यत्राधानादिषु सहत्वं तत्र स्वत्वमस्तीत्यत्रा द्रव्यपरिग्रहेषु सहत्वप्रतीतेः स्वत्वमस्तीति । तदेतत् ध्वनय न्नाह * उक्ता तत्रेति । वचनं स्वरूपेणोक्तमिति अर्थत आ * भर्तुरिति । नित्यसङ्ग्रहायाह * अवश्येति । तथा च तदुप क्षणमिति न्यूनता प्रथमत्यागश्चेति भावः । यद्वा तत्रापि तत् सत्वात्तदुपलक्ष्यार्थमाह * अवश्येति। काकेभ्यो दधीत्यादिवा ति भावः । वचनस्थहेर्व्याख्या *यस्मादिति । क्वचित् हि यस्मा दित्येव पाठः । * भार्यायामपि। भार्याया अपीति पाठान्तरम् * अन्यथा, द्रव्यस्वामित्वाभावे। तथा च नेदं सहत्वं विधत्ते तु लोकसिद्धमेव तत् स्यात्। सहितयोरेव स्वाम्यात् । न विवाहात्प्रागर्जिते द्रव्ये पुरुषस्यैव स्वत्वं तत ऊर्ध्वमर्जिते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पतिपत्न्योरिति वाच्यम् । तथा सति पुत्रस्यापि स्वजन्मतः प्राक् पित्रार्जिते द्रव्ये स्वत्वाभावापत्तेरिति भावः ।

१३ । अत्र नैमित्तिके इत्युक्त्याऽन्यत्र स्तेयमस्त्येवेति सूचितम् । एतदेव तत्साम्येऽपि वैषम्यं, यत् पतिर्यथेष्टं विनियुङ्क्ते जाया त्वेतावदेवेति । नच पत्युर्जायानुमत्यपेक्षा ।

स्वतन्त्रत्वात् यथा राजा राष्ट्रे तद्वदसौ गृहे ।

अत एव तस्या एव स्तेयशङ्का न भर्त्तुः । एवं पुत्रादावपीति बोध्यम् ।

१४। सविशेषमुपसंहरति *तस्मादिति । एवेन तदभावव्यवच्छेदः । भर्त्तुरित्यस्य कृत्यमाह *न स्वेच्छेति । अत्र मानमाह *यथेति । कुर्यादित्यतस्तदिच्छाया एव प्रतीतेरिति भावः । इदं तत्रैव स्फुटीभविष्यति ॥ ५२ ॥

मि० अधुना प्रातिभाव्यं निरूपयितुमाह ।

या० दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते ।
आद्यौ तु वितथे दाप्यावितरस्य सुता अपि ॥ ५३ ॥

मि० प्रातिभाव्यं नाम विश्वासार्थं पुरुषान्तरेण सह समयः । तच्च विषयभेदात्त्रिधा भिद्यते । यथा दर्शने दर्शनापेक्षायाम्, एनं दर्शयिष्यामीति । प्रत्यये विश्वासे, मत्प्रत्ययेनास्य धनं प्रयच्छ नायं त्वां वञ्चयिष्यते, यतोऽमुकस्य पुत्रोऽयम् उर्वराप्रायभूरस्य, ग्रामवरो वाऽस्तीति । दाने यद्ययं न ददाति तदानीमहमेव दास्यामीति । प्रातिभाव्यं विधीयते इति प्रत्येकं संबन्धः । आद्यौ तु दर्शनप्रत्ययप्रातिभुवौ वितथे अन्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

थाभावे अदर्शने विश्वासव्यभिचारे च दाप्यौ राज्ञा प्रस्तुतं धनमुत्तमर्णस्य । इतरस्य दानप्रतिभुवः सुता अपि दाप्याः । वितथे इत्येव । शाठ्येन निर्धनत्वे वाऽधमर्णेऽप्रतिकुर्वति । इतरस्य सुता अपीति वदत पूर्वयोः सुता न दाप्या इत्युक्तम् । सुता इति वदत न पौत्रा दाप्या इति दर्शितम् ॥ ५३ ॥

बा० १। *अधुनेति । तन्निषेधकथनप्रसङ्गादिति भावः। तच्च तदवान्तरप्रकरणमिदामिति तात्पर्यम् । निरूपणं च लक्षण विशेषाभ्यां भवति । तत्रादौ मूलानुक्तं लक्षणमाह * प्राति भाव्यमिति । उत्तमर्णाधमर्णान्येनेत्यर्थः । अर्थात्तयोरिति भावः * समयः, सङ्केतः । स चार्थात्तत्कृत एवेति नातिप्र इति बोध्यम् ।

२। अथ मूलोक्तभेदानाह *तच्चेति । * विषयेति । अनेन त्रि विषयसप्तम्य इति सूचितम् । *मत्प्रत्ययेनेति । ममेति अस्मदि वा पाठान्तरम् । *अस्येति । प्राग्वत् । एवमग्रेऽपि । उर्वरा र्वसस्याढ्येत्यमरः । उर्वरायाः प्रायो बाहुल्यं यस्यां तादृशी रस्येत्यर्थः । तस्या दुर्लभत्वात्स्वस्यानिश्चयाच्च * प्रायेति । त्कृतमप्युत्कर्षमाह *ग्रामवर इति । ग्रामे श्रेष्ठ इत्यर्थः । *ददा ति । वर्त्तमानसामीप्ये इति लट् । दास्यतीत्यर्थः । समुदाय म्बन्धानन्तरसम्बन्धयोर्निरासायाह * प्रातिभाव्यमिति ।

३। उत्तरार्धार्थमाह *आद्यौ त्विति । तात्पर्यार्थमाह *अ न्यथेति । क्रमेण तस्यार्थद्वयमाह *अदर्शनेइति । शेषमा *राज्ञेति । *इत्येवेति । तत्पदमत्रानुवर्त्तते एवेत्यर्थः । तदर्थे त

१ संप्रदानस्य संबन्धत्वाविवक्षया अस्येति षष्ठी । पूर्वं संब त्वविवक्षया षष्ठ्याः प्रतिपादनात् एवमत्रोक्तिरिति बोध्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सम्भवादाह * शाठ्येनेति। दौर्जन्येन धनाभावेन वाऽधमर्णे उत्तमर्णाय धने अप्रतिकुर्वति अप्रयच्छति सति दानप्रतिभूर्दाप्य-इत्यर्थः।

४। सूचितं विशेषद्वयमाह *इतरस्येति। *न पौत्रा इति। तत्र अपिस्तु तत्समुच्चायक इति भावः॥ ५३॥

मि० एतदेव स्पष्टीकर्तुमाह।

या० दर्शनप्रातिभूर्यत्र मृतः प्रात्ययिकोऽपि वा॥

न तत्पुत्रा ऋणं दद्युर्दद्युर्दानाय यः स्थितः॥५४॥

मि० यदा दर्शनप्रातिभूः प्रात्ययिको वा प्रातिभूर्दिवं गतः तदा तयोः पुत्राः प्रातिभाव्यायातं पैतृकमृणं न दद्युः। यस्तु दानाय स्थितः प्रातिभूर्दिवंगतस्तस्य पुत्रा दद्युर्न पौत्राः। ते च मूलमेव दद्युर्न वृद्धिम्।

ऋणं पैतामहं पौत्रः प्रातिभाव्यागतं सुतः।
समं दद्यात्तत्सुतौ तु न दाप्याविति निश्चयः॥

इति व्यासवचनात्। प्रातिभाव्यव्यतिरिक्तं पैतामहमृणं पौत्रः समं यावद् गृहीतं तावदेव दद्यान्न वृद्धिम्। तथा तत्सुतोऽपि प्रातिभाव्यागतं पित्र्यमृणं सममेव दद्यात्। तयोः पौत्रपुत्रयोः सुतौ प्रपौत्रपौत्रौ च अप्रातिभाव्यायातं प्रातिभाव्यायातं च ऋणं यथाक्रममगृहीतधनौ न दाप्याविति।

यदपि स्मरणम्,

खादको वित्तहीनः स्याल्लग्नको वित्तवान्यदि।
मूल्यं तस्य भवेद्देयं न वृद्धिं दातुमर्हति॥ इति,

तदपि "लग्नकः प्रतिभूः" "खादकोऽधमर्णः"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लग्नको यदि वित्तवान्मृतस्तदा तस्य पुत्रेण मूल्यमे दातव्यं न वृद्धिरिति व्याख्येयम्। यत्र दर्शनप्रति प्रत्ययप्रतिभूर्वा बन्धकं पर्याप्तं गृहीत्वा प्रतिभूर्जा स्तत्र तत्पुत्रा अपि तस्मादेव बन्धकात् प्रातिभाव्य यातमृणं दद्युरेव।

यथाह कात्यायनः,

गृहीत्वा बन्धकं यत्र दर्शनेऽस्य स्थितो भवेत्

विना पित्रा धनात्तस्माद्दाप्यः स्यात्तदृणं सुतः॥इ

दर्शनग्रहणं प्रत्ययस्योपलक्षणम्। *विना पि पितरि प्रेते दूरदेशं गते वेति ॥ ५४ ॥

बा० १। पौनरुक्त्यं निराचष्टे *एतदिति। इतरस्येत्यादिना वेत्यर्थः। यत्रेति व्याचष्टे *यदेति। अपिसमुच्चयमाह *भार्या इति। मृत इत्यस्य व्याख्या *दिवं गत इति। दिष्टं गतः पाठान्तरम्। तत्र कालं गत इत्यर्थः। कालो दिष्टोऽप्यनेहाऽपीत रः। तथा चेदं न प्रोषिते इति बोध्यम्। तत्पुत्रा इत्यत्र द्वि नान्तेन समास इत्याह *तयोरिति। तयोरधमर्णत्वेन स्यानिषेधायाह *प्रातिभाव्येति। तेन प्राप्तमित्यर्थः।

२। अनुषङ्गेण तुर्यपादं व्याचष्टे *यस्त्विति। अत्रैकवचना न समास इत्याह *तस्येति। *पुत्राः, ते एव। अत ए *नपौत्रा इति।

३। विशेषमनुक्तमाह *ते चेति। दानप्रतिभुवः पुत्राश्चेत्य व्यासवचनं क्रमेण वाक्यत्रयेणोभयपरत्वेन क्लिष्टत्वात् व्या ष्टे *प्रातिभाव्येति। इदं विशेषणमर्थसिद्धार्थकथनपरम्। तत्र पामनधिकारात्। सममित्युभयशेष इत्याह *सममिति। माह *दद्युरिति। पौत्रा इत्युक्तेरिति भावः। क्वचित्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्याख्याने चैकवचनान्तपाठ एव पौत्र इति, तदा समं दद्यादित्युभयशेष इति न कोपि दोषः। अपिः समदानांशे प्रोक्तपौत्रसमुच्चायकः। एवेन वृद्धिव्यवच्छेदः। तत्सुतावित्यत्रापि द्विवचनान्तेन समास इत्याह *तयोरिति। तयोः स्वरूपे आह *प्रपौत्रपौत्रौइति।

४। पदार्थमुक्त्वा वाक्यार्थमाह * अप्रातिभाव्येति। समुच्चयवारणायाह *यथाक्रममिति। पौत्रसुतः प्रपौत्रोऽप्रातिभाव्यागतं ऋणं न दद्यात्, पुत्रसुतः पौत्रः प्रातिभाव्यागतं तन्न दद्यादित्यर्थः। तुसूचितं विशेषमाह *अगृहीतेति।

५। व्यासवाक्यस्यान्यविरोधमाह *यदपीति। व्यासवाक्येन दानप्रतिभूपुत्रस्य मूलदानमुक्तम्, अनेन तु लग्नकस्य प्रतिभुव एव मूलदानमुक्तमिति विरोधः। तं परिहरति * तदपीति। व्याख्येयमित्यत्रान्वयः। अप्रसिद्धत्वात्पदार्थमाह *लग्नक इति। अथ वाक्यार्थमाह *लग्नक इति। तदैक्याय [1]शेषद्वयमाह *मृत इति, पुत्रेणेति च। अनेन वृद्धिमित्यत्र तस्येत्यस्यानुषङ्गः। पुत्र इति शेष इति सूचितम्। *मूल्यमिति। मूलेन समं मूल्यं, नौवयोधर्मेत्यादिना यत्। तदेवेत्यर्थः। क्वचित् उभयत्र मूलमित्येव पाठः।

६। तयोः सुता न दाप्या इत्युक्तस्यापवादं क्वाचित्कं विशेषमाह *यत्रेति। यत्रत्वित्यर्थः। क्वचित्तथा पाठ एव। एवेनादानव्यवच्छेदः। अत्र तस्मादेवेत्यनेन बन्धकस्य कालवशेन ऋणापर्याप्तत्वेऽपि यावद् बन्धकं तावदेव देयं न तु ततोऽधिकं, यावदृणं तावत्स्वीयमपीति सूचितम्। *तस्मात्, तत एव धनात् बन्ध-

---

१ लग्नको वित्तवान् यदि इत्यत्र मृत इति मूल्यं तस्य भवेद्देयम् इत्यत्र च पुत्रेणेति शेषद्वयमित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कात् । न्यूनतया प्रतिज्ञातार्थासिद्धेराह *दर्शनेति । युक्तेस्तु
त्वादिति भावः । *प्रत्ययस्येति । तस्यापीत्यर्थः । अभिमेत
प्रक्रान्तमाह *पितरीति। अनेन पूर्वं मृत इत्युपलक्षणमिति मृ
तमिति केचित् । अत्रैव तथोक्तिस्वारस्यात्तथेत्यपरे ॥ ५४।

मि॰ यस्मिन्ननेकप्रतिभूसंभवस्तत्र कथं दातव्य
त्याह ।

या॰ बहवः स्युर्यदि स्वांशैर्दद्युः प्रतिभुवो धनम्।
एकच्छायाश्रितेष्वेषु धनिकस्य यथारुचि ॥ ५५।

मि॰ यद्येकस्मिन्प्रयोगे द्वौ बहवो वा प्रतिभुवः स्यु
दर्णं संविभज्य स्वांशेन दद्युः। एकच्छायाश्रितेषु-
स्याधमर्णस्य छाया सादृश्यं तामाश्रिताः एकच्छ
श्रिताः। अधमर्णो यथा कृत्स्नद्रव्यदानाय स्थितस्त
दाने प्रतिभुवोऽपि प्रत्येकं कृत्स्नद्रव्यदानाय स्थित
एवं दर्शने प्रत्यये च। तेष्वेकच्छायाश्रितेषु प्रति
सत्सु धनिकस्योत्तमर्णस्य यथारुचि यथाकामम्।अ
धनिको वित्ताद्यपेक्षायां स्वार्थं यं प्रार्थयते स एव
त्स्नं दद्यान्नांशतः। तेष्वेकच्छायाश्रितेषु यदि का
शान्तरं गतस्तत्पुत्रश्च संनिहितस्तदा धनिकेच्छय
सर्वं दाप्यः। मृते तु कस्मिंश्चित्ततः स्वापित्र्यंशमद्य
दाप्यः।

यथाह कात्यायनः,
एकच्छायां प्रविष्टानां दाप्यो यस्तत्र दृश्यते।
प्रोषिते तत्सुतः सर्वं पित्र्यंशं तु मृते समम्॥इति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बा० १। *अनेकेति। ते च सजातीया विजातीयावेति भावः। *इत्याह, इत्यत आह। तत्रादावुत्तरार्धानुरोधेन विजातीयस्थले आह *यद्येकस्मिन्निति। बहुत्वमनेकत्वोपलक्षणमित्याह *द्वाविति। *स्वांशेनेति। स्वस्वांशेनेत्यर्थः। क्वचित्तथैव पाठः। अत एव स्वांशैरिति बहुवचनोपपत्तिः। सजातीयस्थले उक्तम् *एकच्छायाश्रितेष्विति। तत्प्रतीकं धृत्वा पदार्थकथनपूर्वकं व्याचष्टे *एकेति। साहश्यं विशदयति *अधमर्णस्येति।

२। *एवमिति। स यथा दर्शनाय विश्वासाय च स्थित एवं तेऽपीत्यर्थः।

३। एष्वित्यस्य व्याख्या *प्रातिभूष्विति। *यथाकाममिति। दद्यादिति शेषः। रुचिबीजं कथयन् तात्पर्यार्थमाह *अतश्चेति। आदिना सत्यवाक्त्वाभिजात्यादि। *स्वार्थं, स्वधनम्। विशेषमाह *एकेति। तेषां मध्ये इत्यर्थः। *सः, सोपि। *सर्वं, सवृद्धिकम्।

४। *मृते तु कस्मिंश्चिदिति। तेषां मध्ये कस्मिंश्चित्प्रातिभुवि मृते इत्यर्थः। वैलक्षण्यसूचकस्तुः। *अंशमिति। अवशिष्टं तु अर्थादवशिष्टानां मध्ये यथारुचि दाप्य इति भावः। *एकेति। तेषां मध्ये स दाप्यः, यस्तत्र दृश्यते यो धनिकेच्छाविषयत्वेन ज्ञायते। तेषां मध्ये कस्मिंश्चिद्देशान्तरं गते सति तत्सुतोऽपि यदिच्छया सर्वं दाप्यः। तेषां मध्ये कस्मिंश्चिन्मृते तु तत्सुतः वापित्र्यमंशमेव दाप्यो न सर्वम्। तत्रापि समम्, अवृद्धिकमेवेत्यर्थः। पित्रंशमिति पाठः। पित्र्यंशमिति पाठे शकन्ध्वादित्वं बोध्यम्॥५९॥

मि० प्रातिभाव्ये ऋणदानविधिमुक्त्वा प्रतिभूदत्तस्य प्रतिक्रियाविधिमाह।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या० प्रतिभूर्दापितो यत्तु प्रकाशं धनिना धनम्।
द्विगुणं प्रतिदातव्यमृणिकैस्तस्य तद्भवेत् ॥ ५६।

मि० यद् द्रव्यं प्रतिभूस्तत्पुत्रो वा धनिकेनोपपी-
तः प्रकाशं सर्वजनसमक्षं राज्ञा धनिनां धनं दा-
न पुनर्द्वैगुण्यलोभेन स्वयमुपेत्य दत्तवान्,

यथाह नारदः,

यं चार्थं प्रतिभूर्दद्याद्धनिकेनोपपीडितः।
ऋणिकं तं प्रतिभुवे द्विगुणं प्रतिदापयेत् ॥

ऋणिकैरधमर्णैस्तस्य प्रतिभुवस्तद् द्विगुणं प्र-
तव्यं स्यात्। तच्च कालविशेषमनपेक्ष्य सद्य ए-
गुणं दातव्यम्। वचनारम्भसामर्थ्यात्। एतच्च
ण्यविषयम्। ननु इदं प्रतिभूवचनं द्वैगुण्यमात्रं
पादयति। तच्च पूर्वोक्तकालकलाक्रमाबाधेनाप्यु-
ते। यथा जातेष्टिविधानं शुचित्वाबाधेन। अ-
सद्यः सवृद्धिकदानपक्षे पशुस्त्रीणां सद्यः सन्त-
वान्मूलदानमेव प्राप्नोतीति। तदसत्।

वस्त्रधान्याहिरण्यानां चतुस्त्रिद्विगुणा परा।

इत्यनेनैव कालकलाक्रमेण द्वैगुण्यादिसिद्धे
ण्यमात्राविधाने इदं वचनमनर्थकं स्यत्। पशुस्त्री-
कालक्रमेण द्वैगुण्यादिक्रमपक्षेऽपि सन्तत्यभावे स-
दानमेव। यदा प्रतिभूरपि द्रव्यदानानन्तरं ता-
कालेनाधमर्णेन संघटते तदा सन्ततिरपि संभव-
यद्वा पूर्वसिद्धसन्तत्या सह पशुस्त्रियो दास्य-
न किंचिदेतत्। अथ प्रातिभाव्यं प्रीतिकृतम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिभुवा दत्तं प्रीतिदत्तमेव । नच प्रीतिदत्तस्य याचनात्प्राग्वृद्धिरस्ति ।

यथाह, (ना० व्य० प० १।१०९)

प्रीतिदत्तं तु यत्किंचिद्वर्द्धते न त्वयाचितम् ।
याच्यमानमदत्तं चेद्वर्द्धते पञ्चकं शतम् ॥ इति ।

अतश्चास्य प्रीतिदत्तस्यायाचितस्यापि दानदिवसादारभ्य यावाद्विगुणं कालक्रमेण वृद्धिरित्यनेन वचनेनोच्यते इति। तदप्यसत् । अस्यार्थस्यास्माद्वचनादप्रतीतेः । द्विगुणं प्रतिदातव्यमित्येतावादिह प्रतीयते । तस्मात्कालक्रममनपेक्ष्यैव द्विगुणं प्रतिदातव्यं वचनारम्भसामर्थ्यादिति सुष्ठूक्तम् ॥ ५६ ॥

बा० १ । सङ्गतिमाह *प्रातिभाव्ये इति । * प्रतिभूदत्तस्य प्रतिक्रियाविधिमिति। पलायनं कृत्वा पुनः परावृत्तस्याधमर्णस्येति भावः । यत्त्विति पाठं सूचयन्नाह *यदिति । धनमित्यस्य व्याख्या *द्रव्यमिति । ऋणमिति पाठान्तरम् । प्रतिभूग्रहणमुक्तरीत्योपलक्षणमित्याह * तत्पुत्र इति । विशेषमाह * धनिकेनेति । धनिनामिति प्राग्वत् षष्ठी । विशेषोक्तिव्यवच्छेद्यमाह * नपुनरिति । न तु इत्यर्थः ।

२। विशेषे मानमाह *यथाहेति । ऋणिके मत्वर्थीयष्ठन् । राजेति शेषः ।

३। उत्तरार्धार्थमाह *ऋणिकैरिति । भवेदित्यस्य व्याख्या * स्यादिति । विशेषमाह * तच्चेति । तच्च द्विगुणमित्यन्वयः । कालेत्यस्य व्याख्या *सद्य एवेति । *वचनेति । प्रतिभूरितिवचनेत्यर्थः । अन्यथैतदानर्थक्यं स्पष्टमेव । तथा तस्य प्रागेवोक्तत्वादिति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४। अनुपदं वस्त्रादौ विशेषस्य वक्ष्यमाणत्वादाह * एतां
ति। न वस्त्रधान्यादिविषयकमित्यर्थः।

५। वचनस्यान्यविषयतया तच्चेत्याद्युक्तविशेषमाक्षिपति-
*नन्विदमिति। उक्तवचनमित्यर्थः। मात्रपदेनोक्तविशेषः
वच्छेदः। * पूर्वोक्तेति। पूर्वोक्तः, काले मासादौ कला वृद्धिस्तस्य
क्रमः, तदबाधेनापीत्यर्थः। स्वकृतवृद्ध्यनुसारेण यदा कालान
द्वैगुण्यमेति धनं तदैव दत्तद्रव्याय प्रतिभुवे द्विगुणं दातव्यम
र्णेनेति द्वैगुण्यमात्रप्रतिपादकेनानेन वचनेन बोध्यते। अन्य
तु यावती वृद्धिस्तत्सहितं मूलधनं देयं न द्विगुणम्, इति
द्विगुणदानमयुक्तमिति भावः।

६। अबाधेनोपपत्तौ दृष्टान्तमाह *यथेति। चतुर्थे तृतीय
सप्तदशाधिकरणे द्वितीयवर्णकं, फलसंयोगश्चाचोदिते न स्या
योगस्याशेषभूतत्वादिति। वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे
इत्यादि श्रूयते। तत्र संशयः, पुत्रजन्मानन्तरमेवेयमिष्टिः कार्या
जातकर्मानन्तरमेवेति। निमित्तस्य पुत्रजन्मनो नियोज्यविशेष
त्वेन निमित्तानन्तरमेव कार्येति जातकर्मणः प्रागेवेति पूर्वपक्ष

७। सिद्धान्तस्तु न केवलं जन्म विशेषणं नियोज्यस्य, अपि
पुत्रगतपूतत्वादिकमपि। एवं च जन्मपूतत्वरूपनिमित्तयोः
लितयोरेव नियोज्यविशेषणत्वम्। पुत्रगतपूतत्वादिकं च पुत्रे
वत्यभिलषितं पितुर्न तद्वैपरीत्ये। जीवनं च स्तनपानादेव। स्त
पानं च जातकर्मणः प्राङ् निषिद्धम्। अतो जातकर्मानन्तरमेवे
एवं च जन्मानन्तरभाविन्या इष्टेर्जातकर्मानन्तरमुत्कर्षे आशौ
नन्तरमेव कार्या न जातकर्मानन्तरम्। कालशौचरूपाङ्ग
मानाभावात्। शुचिना कर्म कर्त्तव्यमित्यस्यापवादाभावादि

८। इदं च गुरुमतेनोक्तम्। भट्टमते तु संशयान्तं प्राग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निमित्तानन्तरं नैमित्तिकस्यावश्यं भावित्वाज्जन्मन एव निमित्तत्वाज्जन्मानन्तरमेवेति पूर्वपक्षः ।

९।सिद्धान्तस्तु वाक्यशेषश्रुतपुत्रगतपवित्रत्वादिफलकामनावान् वैश्वानरेष्टावधिकारी । तच्च फलं जीवत्येव पुत्रे ऽभीष्टम् । जीवनं च शिशोर्जातमात्रस्य स्तनपानायत्तमेव । तच्च स्तनपानं जातकर्मानन्तरमेव, न ततः प्राक् । अतः पुत्रगतपवित्रत्वादिफलावरोधेन जातकर्मानन्तरमेवेष्टिरिति ।

१०।एवं स्थिते तृतीयवर्णकेऽन्या चिन्ता, जातकर्मानन्तरमेवेष्टिरुताशौचापगमे इति । तत्रतूक्तरूपप्रयोजनवशाज्जन्मरूपप्रयोजनाभावात् निमित्तानन्तरं प्राप्ताऽपीयमिष्टिर्जातकर्मानन्तरमुत्कृष्टा । एवमुत्कृष्टायाः पुनराशौचानन्तरमुत्कर्षे प्रयोजनाभावात् जातकर्मानन्तरमेवेति पूर्वपक्षे, उच्यते । निमित्तानन्तर्यमिष्टेस्तावत् बाधितमेव । तद्गतोक्तप्रयोजनवशात् । बाधिते च निमितानन्तर्ये शुद्धकालप्रतीक्षया आशौचापगमे पौर्णमास्यादिके काले कार्या । शुद्धकालस्याप्यङ्गत्वात् । शुचिना कर्मेत्यस्यापवादाभावादिति । तथा च शुद्धकालरूपमङ्गमबाधित्वैव जातेष्टिविधानम् ।

११। तथा, अशीतिभाग इत्यादिना प्रागुक्तो यः कालक्रमेण वृद्धिक्रमस्तमबाधित्वैव द्वैगुण्यविधानमिति सद्यो न द्वैगुण्यमिति भावः । अत्र सद्यो द्वैगुण्यदानपक्षेऽग्रे ऽनुपपत्तिमप्याह *अपि च सद्य इति । द्विगुणवृद्धिसहितेत्यर्थः । सद्यो द्वैगुण्यं नाम सद्य एव वृद्ध्या सह द्वैगुण्यं न स्वरूपतः । वृद्धिस्तु पशुस्त्रीणां सन्ततिरेव । सन्ततिस्तु पशुस्त्रीणामित्युक्तत्वात् । तथा च सद्यस्तथाद्वैगुण्यदानपक्षे पशुस्त्रीषु सद्यः संतत्यभावान्मूलमात्रमेव देयं स्यादिति स्त्रीपशुष्वेवेति वक्ष्यमाणमनुपपन्नमित्यर्थः ।

१२। *वस्त्रेति। यत इत्यादिः। वस्त्रेत्यादिवचनारम्भसामर्थ्ये-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नैव तत्क्रमेण द्वैगुण्यादेः प्राप्तौ पुनरत्र तथा तद्विधिर्व्यर्थ इति वाऽप्राप्तं सद्यो द्वैगुण्यमेवागत्याऽवश्यं विधेयम्। दृष्टान्ते तु तं धिवाक्यस्यानर्थक्याभावाच्छुचिनेत्येतदबाधेनाप्युपपत्तिरिति शेष इति तद्वैषम्यमिति भावः।

१३। एवमाद्यदोषमुद्धृत्य द्वितीयदोषमुद्धरति *पशुस्त्वि त्विति। तथा च तत् संभवापेक्षं न तु नियतमिति भावः। आ पेत्येदम्। वस्तुतस्तदयुक्तमेवेति सूचयन् तदा तत्संभवम *यदेति। तावता कालेनेति पाठः। *संघटतेइति। तेन सह गतो भवतीत्यर्थः। सद्यः संघटनपक्षे आह *यद्वेति। *पूर्वं प्रतिभूकर्तृकद्रव्यदानात्पूर्वम् अधमर्णस्य पलायनदशायां मानतादशायां वा जातेत्यर्थः।

१४। अथास्य वचनस्य विषयविशेषपर्यवसानद्वारा का मेणैव द्विगुणदानविधिपरत्वाक्षेपाय तदुपयुक्तं किं चिदाह थेति। उच्येतेति शेषः। *नच, न हि। नारदमाह *यथा *यत्किंचित्, प्रतिभूदत्तं धनिकदत्तं वा। *पश्चकमिति। ग्वत्। तमेवाक्षेपमाह *अतश्चेति। *अस्य, प्रतिभूसंबन्धि यावद्द्विगुणमित्यव्ययीभावः। प्रीतिदत्तस्थले ऽयाचिते तद वस्योक्तत्वेन प्रतिभूदत्तस्यापि तादृशस्योक्तरीत्या तथात्वे द्ध्यभावे प्राप्ते तदपवादत्वेनायाचितस्यापि तस्येदं प्रतिपा इत्यर्थः।

१५। *अस्यार्थस्येति। वाक्यार्थो हि वाच्यो लक्ष्यो व्य वा भवेत्। तत्रायं नाद्यः। अप्रतीतेः। न द्वितीयः। मा भावात्। अत एव नान्त्य इत्यर्थः। तदाह *द्विगुणमिति। संहरति *तस्मादिति ॥ ५६ ॥

मि० प्रतिभूदत्तस्य सर्वत्र द्वैगुण्ये प्राप्तेऽपवादमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या० सन्ततिःस्त्रीपशुष्वेव धान्यं त्रिगुणमेव च।
वस्त्रं चतुर्गुणं प्रोक्तं रसश्चाष्टगुणस्तथा॥ ५७॥

मि० हिरण्यद्वैगुण्यवत्कालानादरेणैवस्त्रीपश्वादयः प्रतिपादितवृद्ध्या दाप्याः। श्लोकस्तु व्याख्यात एव। यस्य द्रव्यस्य यावती वृद्धिः परा काष्ठोक्ता तद्द्रव्यं प्रतिभूदत्तं खादकेन तया वृद्ध्या सह कालविशेषमनपेक्ष्य सद्यो दातव्यमिति तात्पर्यार्थः। यदा तु दर्शनप्रतिभूः संप्रतिपन्ने काले अधमर्णं दर्शयितुमसमर्थः तदा तदन्वेषणाय तस्य पक्षत्रयं दातव्यम्। तत्र यदि तं दर्शयति तदा मोक्तव्योऽन्यथा प्रस्तुतं धनं दाप्यः।

नष्टस्यान्वेषणार्थं तु दाप्यं पक्षत्रयं परम्।
यद्यसौ दर्शयेत्तत्र मोक्तव्यः प्रातिभूर्भवेत्॥
काले व्यतीते प्रतिभूर्यदि तं नैव दर्शयेत्।
निबन्धं दापयेत्तं तु प्रेते चैष विधिः स्मृतः॥

इति कात्यायनवचनात्। लग्नकाविशेषानिषेधश्च-तेनैवोक्तः,

न स्वामी न च वै शत्रुः स्वामिनाऽधिकृतस्तथा।
निरुद्धो दण्डितश्चैव संदिग्धश्चैव न क्वचित्॥
नैव रिक्थी न मित्रं च न चैवात्यन्तवासिनः।
राजकार्यनियुक्तश्च ये च प्रव्राजिता नराः॥
नाशक्तो धनिने दातुं दण्डं राज्ञे च तत्समम्।
जीवन्वाऽपि पिता यस्य तथैवेच्छाप्रवर्तक ः॥
नाविज्ञातो ग्रहीतव्यः प्रतिभूः स्वक्रियां प्रति। इति।

संदिग्धोऽभिशस्तः। अत्यन्तवासिनो नैष्ठिकब्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह्मचारिणः । इति प्रतिभूविधिः ॥

धनप्रयोगे विश्वासहेतू द्वौ, प्रतिभूराधिश्च।

यथाह नारदः, (ना० व्य० प० १।११७)

विस्रम्भहेतू द्वावत्र प्रतिभूराधिरेव च। इति।

तत्र प्रतिभूर्निरूपितः । इदानीमाधिर्निरूप्यते।

आधिर्नाम गृहीतस्य द्रव्यस्योपरि विश्वासर्थमधमर्णेनाऽधिक्रियते। आधीयते इत्याधिः। स च द्विविधः, कृतकालोऽकृतकालश्च। पुनश्चैकैकशो द्विविधः, गोप्यो भोग्यश्च।

यथाह नारदः, (ना० व्य० प० १।१२४।१२५)

आधिक्रियतइत्याधिः स विज्ञेयो द्विलक्षणः।

कृतकालोपनेयश्च यावद्देयोद्यतस्तथा ॥

स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव च।इ

*कृतकाले, आधानकाले एवामुष्मिन्काले दत्तसवादौ मयाऽयमाधिर्मोक्तव्योऽन्यथा तवैवाधिर्भविष्यतीति एवं निरूपिते काले, उपनेयः आत्मसमीपं नेतव्यो मोचनीय इत्यर्थः।देयं दानम्। देयमनतिक्रम्य यावद्देयम्। उद्यतो नियतः स्थापित इत्यर्थः।यावद्देयमुद्यतो यावद्देयोद्यतः, गृहीतधनप्रत्यर्पणावधिरनिरूपितकाल इत्यर्थः। गोप्यो रक्षणीयः॥ ५७॥

बा० १।*सर्वत्र, वस्त्रादावपि।अल्पाच्तरत्वात्स्त्रियाः पूर्वनिपाततेषु संततिरेवेत्यर्थः। प्रागुक्तरीत्यैवाह *कालानादरेणेति। वृद्ध्या सह आधिवर्जम्। सामान्यतः सर्वतात्पर्यमाह *यस्ये विशेषमाह—

२। *यदात्विति। *संप्रतिपन्नेइति। प्रतिज्ञाते प्राप्ते इ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*तत्र, पक्षत्रये।एवमग्रेऽपि। अत्र मानमाह *नष्टस्येति । *परम्, आधिकम् । *काले इति । परस्मिन्नपि काले यदि स न तथा कुर्यात् तदा तास्मिन्काले व्यतीते तु सति सः तं निबन्धं तमर्थं दापयेदित्यर्थः। उक्तप्रकारमन्यत्रातिदिशति *प्रेते चेति। अधमर्णे इत्यर्थः ।

३। विशेषान्तरमाह *लग्नकेति। प्रतिभूविशेषनिषेधोऽपीत्यर्थः। केषांचित् प्रतिभूत्वनिषेध इति यावत् । *तेनैव, कात्यायनेनैव। अत्र स्वामित्वादिकं स्वनिरूपितं ग्राह्यम् ।*क्वचित्, क्वापि । रिक्थी पुत्रादिः । * दातुं, धनमिति शेषः । * जीवन्निति । यस्य पिता जीवन् जीवति । व्यत्ययेन शता । आस्ते इति शेषो वा । सोऽपि चेत्यर्थः। *तथैवेच्छेति। स्वेच्छाचरणशील इत्यर्थः। *स्वक्रियेति । प्रातिभूत्वकरणमभिसमीक्ष्येत्यर्थः । प्रतिभूः स्वांक्रियामिति पाठान्तरम् । अत्र धनिकेन स्वादानाक्रियामभिसमीक्ष्येत्यर्थः । अन्यथा पौनरुक्त्यं स्पष्टमेव । इति प्रतिभूविधिः ॥

४ । प्रसक्तसाक्षिनिरूपणमकृत्वा आधिनिरूपणे सङ्गतिमाह * धनेति । तद्दाने इत्यर्थः। विस्रम्भो विश्वासः। * अत्र, धनप्रयोगे । * तत्र, तयोर्मध्ये । * इदानीमिति। तत्प्रसङ्गेऽपि ततोऽस्यान्तरङ्गत्वादिति भावः। निरूपणस्योभयरूपत्वेनात्र मूलानुक्तमुभयं वक्तुं तस्यादौ सामान्यलक्षणमाह * आधिर्नामेति । *द्रव्यस्योपरीति। उत्कृष्टविश्वासेत्यर्थः। यद्वा उपरीति लोकोक्तिः। तत्प्रतिनिधित्वेनेत्यर्थः । * अधीति । स्थाप्यते इत्यर्थः । एवं रूढिमुक्त्वा योगमाह * आधीति । अर्थः स एव । अत एव नारदवाक्ये तथोक्तम् । तेनोभयप्रदर्शनम्। अत एव तत्र तथोक्तम्।

५। अथ भेदमाह * स चेति । * द्विलक्षण इति । द्विस्वरूप इत्यर्थः । * सः, द्विविधोऽपि । संदिग्धत्वात् कृतेत्यादिपदत्रयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्रत्यं क्रमेण व्याचष्टे * कृतकाले इत्यादिना रक्षणीय इत्यन्तं * काले इति । अनेन कर्मधारयोत्तरं कृत्यैर्ऋणे इति सप्त समासः सूचितः । अस्यार्थमाह * आधानेत्यादिका त्यन्तेन । एवेनानन्तरकालव्यावृत्तिः । उपार्थमाह * आसे विशिष्टतात्पर्यार्थमाह * मोचनीय इति । अयमेव कृतका एतत्स्वरूपमुक्त्वा अकृतकालाख्यद्वितीयस्वरूपं निर्वक्ति यमिति । बहुलग्रहणात् भावे कृत्य इत्याह * दानमिति। व्ययीभावः पदार्थानतिवृत्तावित्याह * देयमनतिक्रम्येति द्यतपदार्थमाह * नियत इति । उभयोरन्तर्भावितण्य सूचनायाह * स्थापित इति । सुप्सुपेति समासमाह * दिति। तत्तात्पर्यार्थमाह*गृहीतेति। * प्रत्यर्पणं, दानम्। त तमाह * अनिरूपितकाल इति । आच्छाद्य इत्यर्थनिरा तत्स्वरूपमाह * रक्षणीयइति। भोग्यस्तु प्रसिद्ध इति भावः

मि० एवं चतुर्विधस्याधेर्विशेषमाह ।

या० आधिः प्रणश्येद्द्विगुणे धने यदि न मोक्ष्यते।
काले कालकृतो नश्येत्फलभोग्यो न नश्यति ॥५

मि० प्रयुक्ते धने स्वकृतया वृद्ध्या कालक्रमेण द्वि भूते यद्याधिरधमर्णेन द्रव्यदानेन न मोच्यते तद श्यति अधमर्णस्वं, धनप्रयोक्तुः स्वं भवति । का तः कृतकालः । आहिताग्न्यादिषु पाठात्काल स्य पूर्वनिपातः । स तु काले निरूपिते प्राप्ते न द्वैगुण्यात् प्राक् ऊर्ध्वं वा।फलभोग्यः-फलं भोग्यं सौ फलभोग्यः क्षेत्रारामादिः स कदाचिदपि न ति । कृतकालस्य गोप्यस्य भोग्यस्य च तत्काल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रमे नाश उक्तः, काले कालकृतो नश्येदिति। अकृतकालस्य भोग्यस्य नाशाभाव उक्तः, फलभोग्यो न नश्यतीति। पारिशेष्यात् आधिः प्रणश्येदित्येतत् अकृतकालगोप्याधिविषयमवतिष्ठते। द्वैगुण्यातिक्रमेण निरूपितकालातिक्रमेण च विनाशे चतुर्दशादिवसप्रतीक्षणं कर्तव्यम्। बृहस्पतिवचनात्।

हिरण्ये द्विगुणीभूते पूर्णे काले कृतावधेः।
बन्धकस्य धनी स्वामी द्विसप्ताहं प्रतीक्ष्य च॥

तदन्तरा धनं दत्त्वा ऋणी बन्धमवाप्नुयात्। इति।

नन्वाधिः प्रणश्येदित्यनुपपन्नम्। अधमर्णस्य स्वत्वानिवृत्तिहेतोर्दानविक्रयादेरभावात्। धनिनश्च स्वत्वहेतोः प्रतिग्रहक्रयादेरभावात्।

मनुवचनाविरोधाच्च। (अ. ८ श्लो. १४३)

न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रय इति।

कालेन संरोधः कालसंरोधश्चिरकालमवस्थानं तस्मात्कालसंरोधाच्चिरकालावस्थानादाधेर्न निसर्गोऽस्ति नान्यत्राधीकरणमस्ति, न च विक्रयः। एवमाधीकरणाविक्रयप्रतिषेधाद्धनिनः स्वत्वाभावोऽवगम्यते इति। उच्यते। आधीकरणमेव लोके सोपाधिकस्वत्वानिवृत्तिहेतुः, आधिस्वीकारश्च सोपाधिकस्वत्वाप्तिहेतुः प्रसिद्धः। तत्र धनद्वैगुण्ये निरूपितकालप्राप्तौ च द्रव्यदानस्यात्यन्तानिवृत्तेः अनेन वचनेनाधमर्णस्यात्यान्तिकी स्वत्वनिवृत्तिः उत्तमर्णस्य चात्यन्तिकं स्वत्वं भवति। न च मनुवचनाविरोधः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यतः (अ. ८ श्लो. १४३)

न त्वेवाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयात्

इति भोग्याधिं प्रस्तुत्य, इदमुच्यते—

न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः। इ

भोग्यस्याधेश्चिरकालावस्थानेऽप्याधीकरणविक्र निषेधेन धानिनः स्वत्वं न भवति। इहाप्युक्तम्, लभोग्यो न नश्यतीति। गोप्याधौ तु पृथगा मनुना, (अ. ८ श्लो. १४४)

न भोक्तव्यो बलादाधिर्भुञ्जानो वृद्धिमुत्सृजे

इति। इहापि वक्ष्यते, गोप्याधिभोगे नो वृद्धिरि आधिः प्रणश्येद्द्विगुणे इति तु गोप्याधिं प्रत्युक्त इति सर्वमविरुद्धम् ॥ ५८ ॥

बा० १। एवंचाधेश्चातुर्विध्यमनेनोक्तं, गोप्यः कृतकालोऽकृ लश्च एवं भोग्यो द्वेधेति। तदाह * एवमिति। उक्तप्रकारेणेत्य *मोच्यते इति। मोक्ष्यते इति पाठान्तरम्। तत्र मोक्ष मोक्षणे धातुर्बोध्यः। मोक्षते इति त्वपपाठः।

२। आद्यार्धार्थमाह * प्रयुक्ते इति। दत्ते इत्यर्थः। * द्वि भूते, सति। * अधमर्णस्वं, तदीयस्वत्वम्। क्वचिद्व्यस्तपा षष्ठ्यन्तमात्रपाठे स्वमित्यग्रिमस्यात्राप्यन्वयो बोध्यः। न तावदित्याह * धनेति।

३। तृतीयपादार्थं पदार्थपूर्वमाह * कालकृत इति। पूर्वानुक्तत्वभ्रमनिरासायाह * कृतेति। ननु एवं सति तदसं अन्यथा पूर्वविरोधापत्तिः अत आह * आहितेति। वैलक्षण्यायाह * सत्विति। शेषमाह * प्राप्ते इति। सतीत अत एव पूर्वेणागतार्थत्वमाह * द्वैगुण्यादिति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४। तद्वत् तुर्यपादार्थमाह * फलेति। उक्तसूत्रेणैव पूर्वनिपातस्तस्याकृतिगणत्वादित्याह * फलमिति। तृतीयासमासस्तु वक्तुमुचितः। * कदाचिदिति। द्वैगुण्ये काले च प्राप्ते सत्यपीत्यर्थः।

५। नन्वेवं वाक्यार्थत्रये त्रिषु विशेषलाभेऽपि तुर्ये तदलाभात्प्रतिज्ञाहानिः,अतोऽन्यथा दुर्वचत्वाद् व्युत्क्रमेण सर्वत्र तेषु विभज्य तमाह * कृतेत्यादि। इदमुभयपरं संकोचे मानाभावादित्याह * गोप्यस्येति। अत एवाह * अकृतेति। विशेषोक्तेराह * भोग्येति। * अवतिष्ठते, पर्यवस्यतीत्यर्थः।

६। कृतकालगोप्यभोग्याध्योः कृतकालातिक्रमे नाशः, अकृतकालगोप्याधेर्द्वैगुण्यातिक्रमे स इत्युक्तं, तत्र द्वैगुण्यतत्कालातिक्रममात्रयोरेव न सः,किं तु ततोऽप्यग्रे स्वल्पोऽवकाशोऽस्तीति प्राग्वत् विशेषमाह * द्वैगुण्येति। तदेवाह * हिरण्ये इति। बन्धकस्येति मध्यमणिन्यायेनान्वेति। प्रतीक्ष्य चेति पाठः। प्रतीक्षयेदित्यपपाठः। हिरण्ये द्विगुणीभूते सति कृतावधेर्बन्धकस्य काले पूर्णे च सति धनी उत्तमर्णः द्विसप्ताहं प्रतीक्ष्य बन्धकस्य स्वामी भवतीत्यर्थः। द्विः सप्त द्विसप्तास्तेषामह्नां समाहारो द्विसप्ताहं चतुर्दश दिनानि। प्रतीक्षाफलमाह * तदन्तरेति। चतुर्दशदिनमध्ये इत्यर्थः।

७। कृतकाले तथा प्रतिज्ञयोभयत्र नाशेऽप्यकृतकालगोप्याधौ स न संभवतीति पूर्वार्द्धोक्तमाक्षिपति * नन्विति। हेत्वन्तरमाह * मन्विति। तदेवाह * न चाधेरिति। तथा शब्दादप्रतीतेर्व्याचष्टे * कालेनेति। साधनं कृतेति समासः। बहुकालेनेत्यर्थः। संरोधः स्थितिः। तदाह * चिरेति। * न च विक्रय इति। अस्तीत्यस्यानुषङ्गः। नन्वेतावताऽपि नोक्तार्थलाभोऽत आह * एवमिति। चिरकालावस्थानेनेत्यर्थः। आधीत्यस्यान्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रेत्यादिः। अन्यथैतदसंगतिः स्पष्टैवेति भावः।

८। * सोपाधिकेति। सोपाधिका चासौ स्वत्वनिवृत्तिश्च
स्तत्र वा हेतुरित्यर्थः। एवमग्रेऽपि। स्वत्वनिवृत्तिस्वत्वाप्त्योः
भाविकत्वाभावेन सोपाधिकेत्युभयत्र विशेषणम्। प्रसिद्धत्वाद
यत्रान्वयः। नन्वस्त्वेवं लोकतः तथाप्यात्यन्तिकयोस्तयोरभा
दाधिनाशः कथमत आह * तत्रेति। तत्र तस्य तयोस्तद्धेतुत्वम्
चेत्यर्थः। * धनेति। अनेन बृहस्पतिवचनेन तयोस्तस्यात्यन्
वृत्तेस्तयोस्तदुभयं क्रमेण मूलवचनेन भवतीत्यर्थः। तदन्तरेण
वदता बृहस्पतिना तयोरनन्तरमपि चतुर्दशदिनमध्ये पूर्वद्रव्यं
नाशे इति सूचितम्। तथा च तदनन्तरमत्यन्तद्रव्यदाननिवृत्ति
भेन निवृत्ते द्रव्यदाने आधिः प्रणश्येदित्यनेनाधमर्णस्यात्यन्ति
स्वत्वनिवृत्तिः, उत्तमर्णस्य चात्यन्तिकी स्वत्वप्राप्तिरुपदिश्य
अन्यथा वचनवैयर्थ्यं स्पष्टमेवेति भावः।

९। एवमाद्यदोषमुद्धृत्य द्वितीयमुद्धरति *न चेति। *
पकारे, उपकारसहिते भोग्याधाविति यावत्। तत्राप्यकृत
इति बोध्यम्। कुसीदेन तदर्थद्रव्यप्रयोगेण कृता ताम्। अत
तथैव तत्तात्पर्यमाह * भोग्येति। * निषेधेनेति। तयोर्नि
नेत्यर्थः। *उक्तमिति। अत्रैव वचने इति भावः।

१०। नन्वेवं मनोर्न्यूनता गोप्याधिविषयानुक्तेः, अत
*गोप्येति। अत एव बलादित्युक्तम्। *वक्ष्यते, अव्यवहित
अत एवाविरोधं स्पष्टयन् प्रकृतमाह * आधिरिति॥ ५८

मि० किंच।

या० गोप्याधिभोगे नो वृद्धिः सोपकारे च हापि
नष्टो देयो विनष्टश्च दैवराजकृताद्दते॥ ५९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि० गोप्याधेस्ताम्रकटाहादेरुपभोगे न वृद्धिर्भवति, अल्पेऽप्युपभोगे महत्यपि वृद्धिर्हातव्या। समयातिक्रमात्। तथा सोपकारे उपकारिणि बलीवर्दताम्रकटाहादौ भोग्याधौ सवृद्धिके हापिते हानिं व्यवहाराक्षमत्वं गमिते, नो वृद्धिरिति संबन्धः। नष्टो विकृतिं गतः ताम्रकटाहादिश्छिद्रभेदनादिना, पूर्ववत्कृत्वा देयः। तत्र गोप्याधिर्नष्टश्चेत्पूर्ववत्कृत्वा देयः। उपभुक्तोऽपि चेद्वृद्धिरपि हातव्या। भोग्याधिर्यदि नष्टस्तदा पूर्ववत्कृत्वा देयः। वृद्धिसद्भावे वृद्धिर्हातव्या। विनष्टश्च— आत्यन्तिकं नाशं प्राप्तः सोऽपि देयो मूल्यादिद्वारेण। तद्दाने सवृद्धिकं मूलं लभते धनी। यदि न ददाति तदा मूलनाशः।

विनष्टे मूलनाशः स्याद्दैवराजकृतादृते।

इति नारदवचनात्। (व्य० प० १।१२६)

दैवराजकृतादृते— दैवमग्न्युदकदेशोपप्लवादि। दैवकृताद्विनाशाद्विना। तथा स्वापराधरहिताद्राजकृतात्। दैवराजकृते तु विनाशे सवृद्धिकं मूल्यं दातव्यम् अधमर्णेन, आध्यन्तरं वा।

यथाह,

स्रोतसाऽपहृते क्षेत्रे राज्ञा चैवापहारिते।
आधिरन्योऽथ कर्तव्यो देयं वा धानिने धनम्॥ इति।

तत्र स्रोतसाऽपहृते इति दैवकृतोपलक्षणम्॥५९॥

बा० १। किं चेति। विशेषान्तरमत्राहेत्यर्थः। नो इत्यस्य व्याख्या *नेति। ननु दोषाल्पत्वादयुक्तमेतत् अत आह *अल्पेऽपीति। समयः सङ्केतः। चार्थमाह *तथेति। अथेति तत्र पाठान्तरम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्थः स एव । उपकारस्य साहित्यं तत्कर्तृत्वेन नान्यथे
*उपकारिणीति । अस्य समयवशेन द्वैविध्यादाह *स
इति । अन्यथैतदसङ्गतिः स्पष्टैव । स्वरूपहानेरविवक्षित
*व्यवहारेति । उक्तहेतोरेवानुषङ्गमाह *नो वृद्धिरिति ।

२। उत्तरार्धं विवृण्वन् गोप्यभोग्याधिसाधारणं
*नष्टो विकृतिङ्गत इति । एतेन प्रसिद्धार्थनिरासः । अग्रिमे
नरुक्त्यापत्तेः । तृतीयान्तं पूर्वान्वयि । छिद्रं च, भेदनं वि
च, तदादीत्यर्थः । योग्यतया आह * पूर्ववदिति । उभ
धारण्यमेव विशदयति *तत्रेति । तयोर्मध्ये इत्यर्थः । *चे
दि । तदेति शेषः । एवमग्रेऽपि । अत एवाह *उपभुक्तो
अपिना नाशसमुच्चयः । * वृद्धिरपीति । प्रथमपादोक्त
अपिना पूर्ववत्करणस्य समुच्चयः । *वृद्धिः, वृद्धिरपि ।
पादोक्तत्वात् । वृद्धिर्वेति पाठे वाशब्दः समुच्चये । अ
तु तावन्मात्रमेवेति बोध्यम् ।

३। द्वितीयस्याप्युभयाधिविषयत्वं कथयन् तत्साधार
माह * विनष्ट इति । विपदलभ्यमाह *आत्यन्तिक
चार्थमाह *सोऽपीति । तत्स्वरूपस्यैवाभावादाह * मूल्या
* तद्दाने, धनिना तस्मिन्दत्ते स्वीयं तादृशं सर्वं स ल
*मूल्यं, मूलम् । एवमग्रे सर्वत्र । धनीत्यस्य मध्यमणिन्यायेन
यः । विशेषमाह *यदीति । *मूलनाश इति । तथा सति
वृद्धिनाश इति भावः । *विनष्टे, अदत्ते तथेति शेषः ।

४। अव्यवहितापवादत्वेन तुर्यपादं सप्रतीकं व्याचष्टे
वेति । अत एवाह *विनाशादिति । तत्रापि विशेषमाह

१ आधौ विनष्टे मूल्यादिद्वारेण अदत्ते च धनिनो मूलधन
वा इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राधेति। *राजकृतात्, विनाशाद्विनेत्यनुषज्यते। अनेन सूचितं तत्र विशेषमाह * दैवेति। ईदृशे स्थलेऽधमर्णस्यैव वस्तुनाशो नोत्तमर्णस्येति भावः। तदसम्भवे आह * आध्यन्तरं वेति।

८। * स्रोतसा, नद्यादिसम्बन्धिना। * राज्ञेति। अधिकृतद्वारेति भावः। अत एव णिच्। आधिशब्दो ऽव्यवहिततदानन्तर्ये। *धनं, सवृद्धिकम्। तत्र न्यूनतां निराचष्टे *तत्रेति। तयोर्मध्ये इत्यर्थः। द्वितीयस्य कण्ठत उक्तत्वादिति भावः। *दैवेति। दैवकृतमात्रेत्यर्थः॥ ५९॥

मि० अपिच।

या० आधेः स्वीकरणात्सिद्धी रक्ष्यमाणोऽप्यसारताम्।
यातश्चेदन्य आधेयो धनभाग्वा धनी भवेत्॥ ६०॥

मि० आधेर्भोग्यस्य गोप्यस्य च स्वीकरणादुपभोगादाधिग्रहणसिद्धिः भवति, न साक्षिलेख्यमात्रेण, नाप्युद्देशमात्रेण।

यथाह नारदः, (व्य० प० १।१३९)
आधिस्तु द्विविधः प्रोक्तो जङ्गमः स्थावरस्तथा।
सिद्धिरस्योभयस्यापि भोगो यद्यस्ति नान्यथा॥ इति।

अस्य च फलम्— (याज्ञ० २।२३)
आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा। इति।

या स्वीकारान्ता क्रिया सा पूर्वा बलवती, स्वीकाररहिता तु पूर्वाऽपि न बलवतीति। स चाधिः प्रयत्नेन रक्ष्यमाणोऽपि कालवशेन यद्यसारतामाविकृत एव सवृद्धिकमूलद्रव्यापर्याप्ततां गतस्तत आधिरन्यः कर्तव्यो, धनिने धनं वा देयम्। रक्ष्यमाणोऽप्यसारतामिति वदताऽऽधिः प्रयत्नेन रक्षणीयो धनिनेति ज्ञापितम्॥६०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बा० १। अपि चेति । अन्यदप्याधिविषये आहेत्यर्थः सङ्कोचे मानाभावादुभयसाधारण्येन व्याचष्टे *आधेरिति। एव गोप्यस्य स्वीकरणमात्रत्वनिर्वाहेऽपि भोग्ये ऽनिर्वाहा लक्षणमित्याह *उपभोगेति। तथा च यथासंख्यमन्वयः। साकाङ्क्षत्वादाह *आधीति । हेतुव्यवच्छेद्यमेवाह *न ति। मात्रपदेन विशिष्टस्य सिद्धिजनकत्वं सूचितम्। अत ए गवधारणानुक्तिः। उद्देशो वस्तुसङ्कीर्तनम् । उपदेशेति न्तरम्। भोग्यस्य भोगेनैव सिद्धिरित्यत्र मानमाह * यथा

२। यद्वा स्वीकरणादित्यस्य व्याख्या * उपभोगा भुज पालनाभ्यवहारयोरित्युक्तेर्गोप्याधावुपभोगः परि भोग्यस्याभ्यवहरणं फलाद्युपभोग इति यावत्। उपशब्दस् मीप्यसामर्थ्यव्याप्त्याचार्यकरणदोषख्यापनदाक्षिण्यवीप्सा पूजोद्योगकार्याहत्यमरणखादनानशनेषु वर्त्तते इति यथा योज्यः। अत्र पक्षे उभयत्र मानमाह * यथाहेति। *भोग उक्तद्व्यर्थकमिदम्। * अन्यथा, उक्तभोगाभावे, साक्ष्या त्रेण नेत्यर्थः।

३। ननु किमनेन प्रकृते साधितमत आह * अस्य आधेः स्वीकरणात्सिद्धिरित्यस्येत्यर्थः। * इतीति। इ र्थसिद्धिः फलमित्यर्थः । फलत्वमेव विशदयति * स्वीकारपदमुक्तार्थकम्।

४। रक्ष्यमाणोऽपीत्यादि व्याचष्टे * सचाधिरिति। इत्यर्थः। उक्तिसामर्थ्यादाह * प्रयत्नेनेति। अविरो *कालेति।चेदर्थमाह * यदीति। असारेत्यादिव्याख्या * कृत एवेति। विकृते प्रागुक्तत्वेनापौनरुक्त्यायेदमुक्तम्। * तदा। यद्वा तत इत्यस्यान्य इत्यत्रान्वयः। तदेति शेषः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाठान्तरम् । तदेति सूचितार्थमाह *रक्षणीयइति । अन्यथोक्ति-वैयर्थ्यं स्पष्टमेव ॥ ६० ॥

मि० आधिः प्रणश्येत् द्विगुणे इत्यस्यापवादमाह ।

या० चरित्रबन्धककृतं स वृद्ध्या दापयेद्धनम् ।
सत्यङ्कारकृतं द्रव्यं द्विगुणं प्रतिदापयेत् ॥ ६१ ॥

मि० चरित्रं शोभनचरित्रं चरित्रेण बन्धकं चरित्र-बन्धकं तेन यद्द्रव्यमात्मसात्कृतं पराधीनं वा कृत-म्, एतदुक्तं भवति— धनिनः स्वच्छाशयत्वेन बहु-मूल्यमपि द्रव्यमाधीकृत्याधमर्णेनाल्पमेव द्रव्यमात्म-सात्कृतम्; यदि वाऽधमर्णस्य स्वच्छाशयत्वेनाल्पमू-ल्यमाधिं गृहीत्वा बहु द्रव्यमेव धनिनाऽधमर्णाधीनं कृतमिति, तद्धनं स नृपो वृद्ध्या सह दापयेत् । अय-माशयः । एवंरूपं बन्धकं द्विगुणीभूतेऽपि द्रव्ये न न-श्यति किं तु द्रव्यमेव द्विगुणं दातव्यमिति । तथा, स-त्यङ्कारकृतं— करणं कारः । भावे घञ् । सत्यस्य कारः सत्यङ्कारः । कारे सत्यागदस्येति मुम् । सत्यङ्कारेण कृतं सत्यङ्कारकृतम् । अयमभिसन्धिः । यदा बन्ध-कार्पणसमये एवेत्थं परिभाषितं द्विगुणीभूतेऽपि द्रव्ये मया द्विगुणं द्रव्यमेव दातव्यं नाधिनाश इति तदा तत् द्विगुणं दापयेदिति ।

अन्योऽर्थः । चरित्रमेव बन्धकं चरित्रबन्धकम् । च-रित्रशब्देन गङ्गास्नानाग्निहोत्रादिजनितमपूर्वमुच्यते । यत्र तदेवाधीकृत्य यद्द्रव्यमात्मसात्कृतं तदा तत्र त-देव द्विगुणीभूतं दातव्यं नाधिनाश इति । आधिप्रस-

११०३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ङ्गादन्यदुच्यते, सत्यङ्कारकृतमिति। क्रयविक्रयादिव्यवस्थानिर्वाहाय यदङ्गुलीयकादि परहस्ते कृतं तद् व्यवस्थातिक्रमे द्विगुणं दातव्यम्। तत्रापि येनाङ्गुलीयकाद्यर्पितं स एव चेद्व्यवस्थामतिवर्तते तेन तदेव हातव्यम्। इतरश्चेद्व्यवस्थातिवर्ती तदा तदेवाङ्गुलीयकादि द्विगुणं प्रतिदापयेदिति ॥ ६१ ॥

बा० १। * इत्यस्येति। इतिपूर्वार्द्धोक्तस्याकृतकालगोप्याधिविषयकस्य तन्नाशस्येत्यर्थः। * शोभनेति। सदाचरणमित्यर्थः। सुप्सुपा साधनं कृतेति समासौ क्रमेणाह * चरित्रेणेत्यादिना। विनिगमकाभावादाह * पराधीनमिति।

२। एवं पदस्य शाब्दमर्थमुक्त्वा तात्पर्यार्थमाह * एतदिति। तत्रात्मसात्कृतमाह * धनिन इति। द्वितीयमाह * यदिवेति। * बहिति। तदर्थमव्ययं भिन्नं पदं वा।

३। एवं पदार्थमुक्त्वा वाक्यार्थमाह *तद्धनमिति। चरित्रबन्धककृतमित्यर्थः। स इत्यस्य व्याख्या *नृप इति। सहयुक्ते तृतीयेत्याह * सहेति।

४। तदपवादत्वं स्पष्टयितुमाह * अयमाशय इति। *एवंरूपमिति। चरित्रहेतुकमित्यर्थः।

५। उत्तरार्धं व्याचष्टे *तथेति। तत्रादौ सत्यमितिपदार्थार्थान्तरस्यानुपयोगिनो निरासायाह * करणमित्यादि। *सत्यंकार इति। समयकरणमित्यर्थः। शपथकरणमिति यावत्। सूत्रे कार इति घञन्ताणन्तयोस्तन्त्रेण निर्देश इति भावः। शब्दस्य वाक्यार्थस्यास्फुटत्वादाह * अयमिति। आशय इत्यर्थः। *तत्, सत्यंकारकृतं द्रव्यम्।

६। संभवादाह *अन्योऽर्थ इति। चरित्रेति पद्यस्येति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वः । विशेषणसमासमाह *चरित्रमिति । अत्र पक्षे चरित्रशब्देन सदाचरणं नोच्यते किं तु तज्जन्यं फलमित्याह *चरित्रेति । अग्रे समासः प्राग्वदेवेति सूचयन्वाक्यार्थमाह *यत्रेति । *तदेव, चरित्ररूपबन्धकमेव । * तदेव, आत्मसात्कृतं द्रव्यमेव ।

७। प्रकृतासंबद्धत्वादाह * आधीति। पदार्थः प्रागुक्त एवेति वाक्यार्थमाह * क्रयेति । आदिना दानप्रतिग्रहादि । निमित्ताभावे तथाकरणानौचित्यादाह * व्यवस्थातीति । विशेषमाह * तत्रापीति । तयोर्मध्येऽपीत्यर्थः । *व्यवस्थामिति। तामुल्लङ्घ्य वर्त्तते इत्यर्थः । तदेति शेषः । *इतरः, ग्रहीता ॥ ६१ ॥

मि० किंच ।

या० उपस्थितस्य मोक्तव्य आधिः स्तेनोऽन्यथा भवेत् ।
प्रयोजकेऽसति धनं कुले न्यस्याधिमाप्नुयात् ॥ ६२ ॥

मि० धनदानेनाधिमोक्षणायोपस्थितस्याधिर्मोक्तव्यो धनिना, न वृद्धिलोभेन स्थापयितव्यः । अन्यथा अमोक्षणे स्तेनः चौरवद्दण्ड्यो भवति । असन्निहिते पुनः प्रयोक्तरि कुले तदाप्तहस्ते सवृद्धिकं धनं निधायाधमर्णः स्वीयं बन्धकं गृह्णीयात् ॥ ६२ ॥

बा० १। *किं चेति। प्राग्वत्। योग्यतया आह * धनेति। अधमर्णस्येति भावः । एतत्तात्पर्यार्थमाह * न वृद्धीति । अन्यथेत्यस्य व्याख्या * अमोक्षणे इति । तावन्मात्रे इष्टापत्तेरतिदेशपरतया लभ्यं तात्पर्यार्थमाह * चौरवदिति ।

२। असतीति च्छेदेन नाशाविवक्षया द्वितीयाधर्थमाह *असन्निहितेइति। *पुनः, तु । प्रयोजके इत्यस्य व्याख्या * प्रयोक्तरीति। ऋणस्येति शेषः । धनदातर्युत्तमर्णे इत्यर्थः । यथाश्रुतार्थ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बाधादितो लक्ष्यार्थमाह * तदाप्तेति । अर्थादाह * सवृद्धीति न्यस्येत्यस्य व्याख्या * निधायेति । अर्थादाह * अधमर्ण इति आधिमित्यादेरर्थमाह * स्वीयमिति ॥ ६२ ॥

मि० अथ प्रयोक्ताऽप्यसन्निहितस्तदाप्ताश्च धनस्य ग्रहीतारो न सन्ति, यदि वा असंनिहिते प्रयोक्तर्याधिविक्रयेण धनदित्साऽधमर्णस्य, तत्र किं कर्तव्यमित्यपेक्षिते आह ।

या० तत्कालकृतमूल्यो वा तत्र तिष्ठदवृद्धिकः ।

मि० तस्मिन्काले यत्तस्याधेर्मूल्यं तत्परिकल्प्य तत्रैव धनिनि तमाधिं वृद्धिरहितं स्थापयेत्, न ततः ऊर्ध्वं विवर्द्धते । यावद्धनी धनं गृहीत्वा तमाधिं मुञ्चति, यावद्वा तन्मूल्यद्रव्यमृणी न प्रवेशयति ।

मि० यदा तु द्विगुणीभूतेऽपि धने द्विगुणं धनमेव ग्रहीतव्यं न त्वाधिनाश इति विचारितमृणग्रहणकाल एव तदा द्विगुणीभूते द्रव्ये असन्निहिते चाधमर्णे धनिना किं कर्तव्यमित्यत आह ।

या० विना धारणिकाद्वापि विक्रीणीत ससाक्षिकम् ॥ ६३

मि० धारणिकादधमर्णाद्विना अधमर्णे असन्निहिते साक्षिभिस्तदाप्तैश्च सह तमाधिं विक्रीय तद्धनं गृह्णीयाद्धनी । वाशब्दो व्यवस्थितविकल्पार्थः । यदर्णग्रहणकाले द्विगुणीभूतेऽपि धने धनमेव ग्रहीतव्यं न त्वाधिनाश इति न विचारितं तदा आधिः प्रणश्येद्द्विगुण इत्याधिनाशः । विचारिते त्वयं पक्ष इति ॥ ६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बा० १। उत्तरावतरणमाह * अथेति। शङ्कायामयम्। शङ्कान्तरमाह * यदि वेति। *दित्सा, तद्दानेच्छा। षष्ठ्यन्तस्य पूर्वान्वयः। * तत्र, उभयत्र। वक्ष्यमाणवचने वाशब्देनार्थद्वयसूचनाच्छङ्काद्वयमत्र। फलतो व्याचष्टे * तस्मिन्निति। मोक्षणोद्यमकाले इत्यर्थः। षष्ठ्यर्थे बहुव्रीहिः, उभयत्राधिरन्यपदार्थ इति शब्दार्थः स्पष्ट एवेति सूचयन्नाह *यत्तस्येति। तत्रेत्यस्य व्याख्या सर्वं वाक्यमिति न्यायेन * तत्रैवेति। तस्याप्यर्थमाह *धनिनीति। अस्यापि तात्पर्यमाह * न तत इति।

२। स्थितेरवधिं सूचयन् अथ प्रयोक्तेत्याद्यशङ्कोत्तरं वाशब्दसूचितमाह * यावद्धनीति। वाशब्दसूचितं तं कथयन्नेव यदिवेत्यादिद्वितीयशङ्कोत्तरमाह * यावद्वेति। विक्रयेच्छात आह *तन्मूल्येति। * ऋणी नेति। अधमर्णस्तदन्तिकं न प्रापयतीत्यर्थः।

उ० ३। उत्तरावतरणमाह * यदा त्विति। उत्तरानुरोधेनोत्तमर्णस्यैवेदामित्याह * ग्रहीतव्यमिति। त्वयेति शेषः। *विचारितमिति। अधमर्णेनेति भावः। असान्निहिते चेति पाठः। वेति पाठे स चार्थे। धारणकादिति पाठे बाहुलकात्कर्त्तृल्युडन्तात्स्वार्थे कः। आधिं धारयतीति धारणकस्तस्मात्। यद्वा धारणं करोतीति णिजन्तात् ण्वुल्। धारणिकादिति पाठे आधेर्धारणं यस्यास्तीति मत्वर्थे ठन् इति केचित्। तदर्थमाह *अधमर्णादिति। मरणनिरासायाह * अधमर्णेऽसन्निहिते इति। अपीत्यस्य ससाक्षिकमित्यत्रान्वयेन तत्समुच्चितमाह * तदाप्तैश्चेति। विक्रीणीतेत्यस्य तात्पर्यार्थमाह * विक्रीयेति।

४। यथाश्रुतविकल्पस्य प्राग्वदसंभवात् वाशब्दस्याशयमाह * वाशब्दइति। तत्त्वमेवाह * यदर्णेति। * तदा, तस्मिन्काले एवे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यर्थः । * धनमेव, तावत् । * ग्रहीतव्यमिति । त्वयेति शेषः। *अयमिति । विनाधारणिकादितिप्रकृतवचनोक्त इत्यर्थः। तथा च सिंहावलोकनन्यायेन व्यवहितमपि तत् बुद्धिस्थीकृत्य पक्षान्तरत्वेनेदमुक्तमित्यर्थः ॥ ६३ ॥

मि० भोग्याधौ विशेषमाह ।

या० यदा तु द्विगुणीभूतमृणमाधौ तदा खलु ।
मोच्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धनं ॥६४॥

मि० यदा प्रयुक्तं धनं कृतया वृद्ध्या द्विगुणीभूतं तदाऽऽधौ कृते तदुत्पन्ने आध्युत्पन्ने द्रव्ये द्विगुणे धनिनि प्रविष्टे धनिनाऽऽधिर्मोक्तव्यः। यदि वा, आदावेव आधौ दत्ते, "द्विगुणीभूते द्रव्ये त्वयाऽऽधिर्मोक्तव्य" इति परिभाषया कारणान्तरेण वा भोगाभावेन यदा द्विगुणीभूतमृणं तदाऽऽधौ भोगार्थं धनिनि प्रविष्टे तदुत्पन्ने द्रव्ये द्विगुणे सत्याधिर्मोक्तव्यः । अधिकोपभोगे तदपि देयम् । सर्वथा सवृद्धिकमूलर्णापाकरणार्थाध्युपयोगविषयमिदं वचनम् । तमेनं क्षयाधिमाचक्षते लौकिकाः । यत्र तु वृद्ध्यर्थ एवाध्युपभोग इति परिभाषा तत्र द्वैगुण्यातिक्रमेऽपि यावन्मूलदानं तावदुपभुङ्क्ते एवाधिम् । एतदेव स्पष्टीकृतं—

बृहस्पतिना,

ऋणी बन्धमवाप्नुयात् ।
फलभोग्यं पूर्णकालं दत्वा द्रव्यं च सामकम् ॥
यदि प्रकर्षितं तत्स्यात्तदा न धनभाग्धनी ।
ऋणी च न लभेद् बन्धं परस्परमतं विना ॥ इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्यार्थः। फलं भोग्यं यस्यासौ फलभोग्यः। बन्ध आधिः। स च द्विविधः, सवृद्धिमूलापाकरणार्थो वृद्धिमात्रार्थापाकरणार्थश्च। तत्र सवृद्धिमूलापाकरणार्थं तं बन्धं, पूर्णकालं—पूर्णः कालो यस्यासौ पूर्णकालस्तम् आप्नुयादृणी। यदा सवृद्धिकं मूलं फलद्वारेण धनिनः प्रविष्टं तदा बन्धमाप्नुयादित्यर्थः। वृद्धिमात्रापाकरणार्थं तु बन्धं सामकं दत्त्वाऽऽप्नुयादृणी। समं मूलं सममेव सामकम्।

अस्यापवादमाह—

यदि प्रकर्षितं तत्स्यात्—

तद् बन्धकं प्रकार्षितमतिशायितं वृद्धेरप्याधिकफलं यदि स्यात्, तदा न धनभाग्धनी—सामकं न लभेत धनी। मूलमदत्त्वैवर्णी बन्धमाप्नुयादिति यावत्। अथ तु अप्रकार्षितं तद् बन्धकं वृद्धयेऽप्यपर्याप्तं तदा सामकं दत्त्वापि बन्धं न लभेताधमर्णः। वृद्धिशेषमपि दत्त्वैव लभेतेत्यर्थः। पुनरुभयत्रापवादमाह, परस्परमतं विना। उत्तमर्णाधमर्णयोः परस्परानुमत्यभावे यदि प्रकर्षितमित्याद्युक्तं, परस्परानुमतौ तूत्कृष्टमपि बन्धकं यावन्मूलदानं तावदुपभुङ्क्ते धनी, निकृष्टमपिमूलमात्रदानेनैवाधमर्णो लभेतेति॥ ६४॥

इति ऋणादानप्रकरणम्॥

बा० १। तुसूचितमाह *भोग्याधाविति। प्रयुक्तम्, उत्तमर्णेन केवलं ऋणत्वेन दत्तम्। *कृतया, स्वकृतया। क्वचित्तथैव पाठः। *तदा, द्विगुणीभवनकाले। *आधौ कृते, सति। तन्निर्वाहार्थमिति भावः। कृते इति शेषपूरणम्। तदुत्पन्ने इत्यस्य व्याख्या *आधी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ति। फलभूते इत्यर्थः। धनिन इति शेषोऽयम्। अधिकरणस्य शे त्वविवक्षायां षष्ठी। *प्रविष्टे, सति। ऋणत्वेन केवलं प्रयुक्ते ध वृद्ध्या सह द्विगुणे जाते पश्चादाधिर्दत्तो भोगार्थो यदा त आधेः सकाशादुत्पन्ने धने द्विगुणे धनिनि प्राप्ते सति आधिर्मो व्यस्तेनेत्यर्थः।

२। संभवात् व्याख्यानान्तरमाह *यदि वेति। *आदाने ऋणग्रहणकाले एव। भोगाभावे परिभाषारूपं हेतुमाह *द्वि णीभूते इति। भोक्तव्य इति पाठः। न इत आरभ्येति भावः ऋणग्रहणकाले एवाधिं ददद्धमर्णः एवं ब्रवीति—यदा द्र वृद्ध्या द्विगुणीभूतं तदा आधिर्भोक्तव्य इति, उत्तमर्णोऽपि तथ नुजानीते इत्येवं परिभाषया बाधेन पूर्वं भोगाभावेन द्विगु जाते ततो भोगे प्रारब्धे स्वीयद्विगुणधनलाभानन्तरमाधेरुप गाभावः किं तु मोचनम् इत्यर्थः। कारणान्तरेण भोगाभावस वादाह *कारणान्तरेण वेति। उत्तमर्णस्य स्वच्छाशयत्वे लुब्धत्वेन च धने द्विगुणे ऽहमाधिं भोक्ष्ये नेत आरभ्येति प्र ज्ञायाम् अधमर्णेन तथा कुर्वित्यङ्गीकृते उत्तमर्णस्य सत्यवचनत्व पकारणान्तरेण बाधेन पूर्वं भोगाभावेनेत्याद्यर्थः। स्वरूपतः प्र शस्य पूर्वमेव सत्त्वादाह *भोगार्थमिति। *तदपि, अधिक भुक्तमपि। अपिना ऽऽधिसमुच्चयः। तात्पर्यार्थमाह *स ति। पक्षद्वयेऽपीत्यर्थः। *आध्युपयोगेति। तदपाकरण य आध्युपभोगस्तद्विषयकमित्यर्थः। उपभोगेत्येव पाठो वा *क्षयाधिमिति। तादृशऋणनाशकाधिमित्यर्थः। तथा च पक्ष ऽपि द्वैगुण्ये सति भोगे कृते स्वीयद्विगुणलाभे एवाधिर्मोक्त

१ आधिदानकालादारभ्य न भोक्तव्यः किंतु वृद्ध्या द्विगुणी नोत्तरमेव भोक्तव्य इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न ततः प्रागिति सिद्धम् ।

३। विशेषमाह * यत्र त्विति । पूर्वानुषङ्गार्थमाह । *ऋणीति । स्वरसतोऽर्थद्वयाप्रतीतेराह * अस्यार्थ इति । वाक्यार्थबोधोपयुक्तमादावाह * फलमिति । मात्रपदेन मूलव्यवच्छेदः । वाक्यार्थमाह *तत्रेति । तयोर्मध्ये इत्यर्थः । अस्याप्यर्थमाह *यदेति । एवं चेदं प्रागुक्तार्थकमेव । धनिन इति प्राग्वत् । द्वितीयमाह * वृद्धीति । चार्थमाह * त्विति । सममित्यस्यार्थो * मूलमिति । स्वार्थेऽण्कावित्याह * सममेवेति ।

४। *अस्यापवादमिति । बृहस्पतिरेव दत्त्वा द्रव्यं च सामकमिति स्वोक्तमपवदतीत्यर्थः । प्रतीकमाह *यदीति । व्याचष्टे * तदिति । न धनभाग्धनीत्यस्य व्याख्या * सामकं न लभेत धनीति । तत्तात्पर्यमाह * मूलमिति । ऋणी च न लभेद् बन्धमित्यंशं व्याचष्टे * अथ त्विति । अप्रकर्षितमित्यस्य व्याख्या * वृद्धयेऽपीति । अपिना मूलसमुच्चयः। अनुषङ्गेणाह * सामकमिति । चोऽप्यर्थ इत्याह * अपीति । व्युत्क्रमे इति भावः । सर्वथा लाभाभावो न प्रतिपाद्य इत्याह * वृद्धिशेषमिति । अपिना मूलशेषसमुच्चयः ।

५। * पुनरुभयत्रेति । यदि प्रेत्याद्यर्धोक्तम् ऋणी चेत्यंशं च स एवापवदतीत्यर्थः । मतमित्यत्र भावे क्त इत्याह * अनुमत्यभावेइति । * उक्तमिति । इत्याद्युभयमुक्तमित्यर्थः । *यावन्मूलेति । वृद्धिदानमत्रोभयत्र न । अत एवाग्रे * मात्रेति । *विकृष्टम्, अपकृष्टम् । विप्रकृष्टमिति पाठान्तरम् । विगतप्रकर्षकमिति तदर्थः । निकृष्टमिति पाठः सुगम एव ॥ ६४ ॥

इति ऋणादानप्रकरणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ उपनिधिप्रकरणम् ॥ ४ ॥

मि० उपनिधिं प्रत्याह ।

या० वासनस्थमनाख्याय हस्तेऽन्यस्य यदर्प्यते।
द्रव्यं तदौपनिधिकं प्रतिदेयं तथैव तत् ॥ ६५॥

मि० निक्षेप्यद्रव्यस्याधारभूतं द्रव्यान्तरं वास करण्डादि तत्स्थं वासनस्थं द्रव्यं रूपसङ्ख्यादिवि शेषमनाख्याय अकथयित्वा मुद्रितमन्यस्य हस्ते रक्ष णार्थं विस्रम्भादर्प्यते स्थाप्यते तद् द्रव्यमौपनिधिकमु च्यते ।

यथाह नारदः, (नोपलब्धम्)

असङ्ख्यातमविज्ञातं समुद्रं यन्निधीयते ।
तज्जानीयादुपनिधिं निक्षेपं गणितं विदुः ॥ इति

प्रतिदेयं तथैव तत्— यस्मिन् स्थापितं तेन यथ पूर्वं मुद्रादिचिह्नितमर्पितं तथैव स्थापकाय प्रतिदेयं त्यर्पणीयम् ॥ ६५ ॥

बा० १। * उपनिधिमिति। तत्सम्बन्धिनमित्यर्थः। उद्देशक्र दिति भावः। निक्षेपोपनिध्योः स्वल्प एव भेद इति सूचय *निक्षेप्येति। आदिना सम्पुटकादिः। वासनस्थं द्रव्यमिति ठः। यत् द्रव्यमिति पाठे तदिति शेषः। अनाख्याने कर्मा क्षत्वादाह * रूपेति। तद्रूपविशेषमित्यर्थः। तस्याप्यर्थमाह * द्रितामिति। अर्पणे फलहेतू आह * रक्षणेति। अनेनोपनि यते इति निक्षिप्यते इति च व्युत्पत्तिः सूचिता। औपनिधिक त्यत्र विनयादित्वात्स्वार्थे ठगिति भावः।

२। * असंख्यातम्, अगणितम्। * अविज्ञातम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तः । अत एवाह * समुद्रमिति । निक्षेपपदार्थमाह * निक्षेपमि- ति । * गणितं, संख्यातम् ।

३। तुर्यपादं व्याचष्टे * प्रतीति । * अर्पितं, स्थापकेन॥६५॥

मि० प्रतिदेयमित्यस्यापवादमाह ।

या० न दाप्योऽपहृतं तं तु राजदैवकतस्करैः ।

मि० तमुपनिधिं राज्ञा दैवेनोदकादिना तस्करैर्वाऽपहृतं नष्टं न दाप्योऽसौ यस्मिन्नुपहितम् । धनिन एव तत् द्रव्यं नष्टं, यदि जिह्मकारितं न भवति ।

यथाह नारदः, (व्य० प० २।९)

ग्रहीतुः सह योऽर्थेन नष्टो नष्टः स दायिनः ।
दैवराजकृते तद्वत् नचेत् तत् जिह्मकारितम् ॥

इति ।

मि० अस्यापवादमाह ।

या० भ्रेषश्चेन्मार्गितेऽदत्ते दाप्यो दण्डं च तत्समम् ॥६६॥

मि० स्वामिना मार्गिते याचिते यदि न ददाति तदा तदुत्तरकालं यद्यपि राजादिभिर्भ्रेषो नाशः संजातस्तथापि तद्द्रव्यं मूल्यकल्पनया धनिने ग्रहीता दाप्यो, राज्ञे च तत्समं दण्डम् ॥ ६६ ॥

१। बा० तं तु राजदैवकतस्करैरिति पाठः।स्वार्थे कः । दैविकेति पाठे प्राग्वत् स्वार्थे ठक् । तदाह * तमिति । असावित्यस्यार्थमाह * यस्मिन्नुपहितमिति । विशेषं कथयन् तात्पर्यार्थमाह * धनिन एवेति । तदेति शेषः । * जिह्मेति । कपटप्रयोजितमपहरणमित्यर्थः। जिह्मस्य प्रयोजकत्वात् णिच् । * ग्रहीतुरिति । ग्रहीतुरर्थेन धनेन सह य उपनिध्यादिर्नष्टः स दायिनो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धनस्वामिन एव नष्टो नोपनिध्यादिरक्षकस्येत्यर्थः । एतच्च तस्करापहारविषयमित्याशयेनाह * दैवराजकृते तद्वदिति । दैवराजभ्यां कृते ऽपहारे उक्तवदेवेत्यर्थः । ग्रहीतुरर्थेन सहेति नाशस्य सत्यत्वप्रतिपादनपरं न स्वार्थपरमिति सूचयन् त्रिय यशेषमाह * न चेदिति । * तत्, अपहरणम् ।

उ० २। अदत्ते इति छेदः। भूतत्वमविवक्षितम्, सतिसप्तमीति सूचयन्नाह * यदि न ददाति तदेति । सतिसप्तम्या सूचितमाह * तदुत्तरेति । क्रियाविशेषणमेतत् । चेदर्थमाह * यद्यपीति । साकाङ्क्षत्वादाह * तथापीति । तस्याभावादाह * मूल्येति ॥ ६६ ॥

मि० भोक्तारं प्रति दण्डमाह ।

या० आजीवन् स्वेच्छया दण्ड्यो दाप्यस्तं चापि सोदयम्

मि० यः स्वेच्छया स्वाम्यननुज्ञयोपानिहितं द्रव्यम् जीवत्युपभुङ्क्ते, व्यवहरति वा प्रयोगादिना लाभार्थम्, असौ उपभोगानुसारेण लाभानुसारेण वा दण्ड्यः तं चोपानिधिं सोदयम् उपभोगे सवृद्धिकं व्यवहारे सलाभं धनिने दाप्यः । वृद्धिप्रमाणं च—

कात्यायनेनोक्तम्,

निक्षेपं वृद्धिशेषं च क्रयं विक्रयमेव च ।
याच्यमानं न चेद्दद्याद्वर्द्धते पञ्चकं शतम् ॥ इति

एतच्च भक्षिते द्रष्टव्यम् । उपेक्षाऽज्ञाननष्टे तु तेनैव विशेषो दर्शितः,

भक्षितं सोदयं दाप्यः समं दाप्य उपेक्षितम् ।
किञ्चिन्न्यूनं प्रदाप्यः स्यात् द्रव्यमज्ञाननाशितम्
इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किञ्चिन्न्यूनमिति चतुर्थांशहीनम् ।

मि० उपनिधेर्धर्मान् याचितादिष्वतिदिशति ।

या० याचितान्वाहितन्यासनिक्षेपादिष्वयं विधिः ॥६७॥

मि० विवाहाद्युत्सवेषु वस्त्रालङ्कारादि याचित्वाऽऽनीतं याचितम्। यत् एकस्य हस्ते निहितं द्रव्यं तेनाप्यनु पश्चादन्यहस्ते स्वामिने देहीति निहितं तत् अन्वाहितम् । न्यासो नाम गृहस्वामिनेऽदर्शयित्वा तत्परोक्षमेव गृहजनहस्ते प्रक्षेपो, गृहस्वामिने समर्पणीयमिति । समक्षं तु समर्पणं निक्षेपः । आदिशब्देन सुवर्णकारादिहस्ते कटकादिनिर्माणाय न्यस्तस्य सुवर्णादेः, प्रतिन्यासस्य च परस्परप्रयोजनापेक्षायां त्वयेदं मदीयं रक्षणीयं मयेदं त्वदीयं रक्ष्यते इति न्यस्तस्य ग्रहणम् ।

यथाह नारदः, (व्य० प० २।१४)

एष एव विधिर्दृष्टो याचितान्वाहितादिषु ।
शिल्पिषूपनिधौ न्यासे प्रतिन्यासे तथैव च ॥ इति ।

एतेषु याचितादिष्वयं विधिः उपनिधेर्यः प्रतिदानादिविधिः स एव वेदितव्यः ॥ ६७ ॥

इति उपनिधिप्रकरणम् ॥

बा० १। यद्यपि सोदयोपनिधिदानरूपविशेषोऽपि वक्ष्यमाण इति "अथ भोक्तारं प्रत्याह" इत्येवोचितं तथापि पूर्वं तद्दानस्य मुख्यत्वं दण्डस्य गौणत्वमिति पश्चादुपात्तदण्डप्रसङ्गेन वक्ष्यमाणेन वैपरीत्यं तत्र तथैव पाठादिति तेनैव सङ्गतिर्न तु तेनेति सूचयन्नाह * भोक्तारमिति । उक्तदण्डप्रसङ्गादिति भावः । *दण्डं, तत्सहितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२। तदनुज्ञायामपि स्वेच्छायाः सत्त्वात्तात्पर्यार्थमाह * स्वाम्य-ननुज्ञयेति। प्राग्वदाह * उपनिहितमिति। आजीवन्निति लक्ष-णहेत्वोरिति शतेत्याह * आजीवतीति। तदर्थमाह * उपभु-क्ते इति। अत्तीत्यर्थः। यत्र नास्य संभवस्तत्राह * व्यवहारे वा प्रयोगादिना लाभार्थमिति। एवं च व्यवस्थितविकल्पो बो-ध्यः। विशेषानुक्तेराद्ये आह * उपभोगेति। द्वितीये आह * लाभेति। वेति पाठः। चः पादपूरणे इत्याह * तं चेति। प्राग्वत् सोदयमित्यस्यार्थद्वयमाह * उपभोगे इति। * दाप्यः दाप्योऽपि। अपेरत्र सम्बन्धः।

३। नात्र प्रागुक्ता वृद्धिरित्याह * वृद्धिप्रमाणं चेति। चस्त्वर्थे * वृद्धिशेषम्, अवशिष्टा वृद्धिः। * क्रयं, क्रीतसम्बन्धिद्रव्यम् * विक्रयं, विक्रीतरूपद्रव्यम्। याच्यमानमिति पाठः। अस्या वृद्धेः सर्वत्र प्राप्तौ विशेषमाह * एतच्चेति। उक्तवृद्धिप्रमाणं चे-त्यर्थः।

४। * उपेक्षेति। उपेक्षा च अज्ञानं च ताभ्यां नष्टेत्वित्यर्थः * तेनैव, कात्यायनेनैव। व्यासोऽप्येवमानुपूर्वीक एव। अन-वस्थां निराचष्टे * किञ्चिदिति।

५। तत्रादौ याचितादिपदार्थानाह * विवाहाद्युत्सवेष्वित्या-दिना तथैव चेतीत्यन्तेन। आनीतमिति छेदः। तत्र हेतुमाह *स्वामिने इति। गृहस्वामिनेऽदर्शयित्वेत्यत्राकारप्रश्लेषः। पर-पक्षेऽप्येवम्। सा प्राग्वत्। * तादिति। गृहस्वामीत्यर्थः। * नि-क्षेपो, न्यसनम्। तत्र हेतुमाह * गृहेति। इतिर्हेतौ। * सम-मिति। दर्शनपूर्वकामित्यर्थः। अत एव निक्षेपं गणितं विदुरिति प्रागुक्तनारदैकवाक्यतेति बोध्यम्। द्वितीयमाह * प्रतिन्यासश्-चेति। तत्स्वरूपमाह * परस्परेत्यादिना न्यस्तस्येत्यन्तेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

६। आदिशब्देनोभयग्रहणे मानमाह * यथाहेति । *एष एवेति ।

रहोदत्ते निधौ यत्र विसंवादः प्रजायते ।
विभावकं तत्र दिव्यमुभयोरपि च स्मृतम् ॥

इति प्रागुक्तरूप एवेत्यर्थः । *दृष्टइति । दिष्ट इति पाठान्तरम् । आदिना निक्षेपग्रहणम् । बहुवचनं व्यक्त्यभिप्रायम् । * शिल्पिषु, तन्न्यासेषु ।

७। एवं पदार्थानुक्त्वा वाक्यार्थमाह * एतेष्विति । मूलोक्तेषु इत्यर्थः । अयं विधिरित्यस्य व्याख्या * उपनिधेर्यइति ॥ ६७ ॥

अथ साक्षिप्रकरणम् ॥ ५ ॥

प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितम्—इत्युक्तम् । तत्र भुक्तिर्निरूपिता । साम्प्रतं साक्षिस्वरूपं निरूप्यते । साक्षी च साक्षाद्दर्शनाच्छ्रवणाच्च भवति ।

यथाह मनुः, (अ.८. श्लो.७४.)

समक्षंदर्शनात्साक्ष्यं श्रवणाच्चैव सिद्ध्यति । इति ।

स च द्विविधः कृतोऽकृतश्चेति । साक्षित्वेन निरूपितः कृतः, अनिरूपितोऽकृतः । तत्र कृतः पञ्चविधोऽकृतश्च षड्विध इत्येकादशविधः ।

यथाह नारदः, (व्य० प० १।१४९)

एकादशविधः साक्षी शास्त्रे दृष्टो मनीषिभिः ।
कृतः पञ्चविधो ज्ञेयः षड्विधोऽकृत उच्यते ॥ इति ।

तेषां च भेदस्तेनैव दर्शितः, (व्य० प० १।१५०)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लिखितः स्मारितश्चैव यदृच्छाऽभिज्ञ एव च।
गूढश्चोत्तरसाक्षी च साक्षी पञ्चविधः कृतः॥ इति

लिखितादीनां च स्वरूपं कात्यायनेनोक्तम्,

अर्थिना स्वयमानीतो यो लेख्ये संनिवेश्यते।
स साक्षी लिखितो नाम स्मारितः पत्रकादृते॥ इति

स्मारितः पत्रकादृते इत्यस्य विवरणं तेनैव कृतम्,

यस्तु कार्यप्रसिद्ध्यर्थं दृष्ट्वा कार्यं पुनः पुनः।
स्मार्यते ह्यर्थिना साक्षी स स्मारित इहोच्यते॥ इति

यस्तु यदृच्छयाऽऽगतः साक्षी क्रियते स यदृच्छाऽभिज्ञः। अनयोः पत्रानारूढत्वेऽपि भेदः—

तेनैव दर्शितः,

प्रयोजनार्थमानीतः प्रसङ्गादागतश्च यः।
द्वौ साक्षिणौ त्वलिखितौ पूर्वपक्षस्य साधकौ॥ इति

तथा,

अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटम्।
यः श्रावितः स्थितो गूढो गूढसाक्षी स उच्यते॥ इति

तथा,

साक्षिणामपि यः साक्ष्यमुपर्युपरि भाषते।
श्रवणाच्छ्रावणाद्वापि स साक्ष्युत्तरसंज्ञितः॥ इति

षड्विधस्याप्यकृतस्य भेदो—

नारदेन दर्शितः, (व्य० प० १।१५१।१५२)

ग्रामश्च प्राड्विवाकश्च राजा च व्यवहारिणाम्॥
कार्येष्वधिकृतो यः स्यादर्थिना प्रहितश्च यः।
कुल्याः कुलविवादेषु विज्ञेयास्तेऽपि साक्षिणः॥ इति

प्राड्विवाकग्रहणं लेखकसभ्योपलक्षणार्थम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लेखकः प्राड्विवाकश्च सभ्याश्चैवानुपूर्वशः ।
नृपे पश्यति तत्कार्यं साक्षिणः समुदाहृताः ॥ इति ।
ते साक्षिणः कीदृशाः कियन्तश्च भवन्तीत्यत आह ।

या० तपस्विनो दानशीलाः कुलीनाः सत्यवादिनः ।
धर्मप्रधाना ऋजवः पुत्रवन्तो धनान्विताः ॥ ६८ ॥
त्र्यवराः साक्षिणो ज्ञेयाः श्रौतस्मार्त्तक्रियापराः ।
यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृताः ॥ ६९ ॥

मि० तपस्विनस्तपःशीलाः । दानशीला दाननिरताः । कुलीना महाकुलप्रसूताः ।सत्यवादिनः सत्यवदनशीलाः । धर्मप्रधानाः नत्वर्थकामप्रधानाः । ऋजवोऽकुटिलाः । पुत्रवन्तो विद्यमानपुत्राः । धनान्विता बहुसुवर्णादिधनयुक्ताः । श्रौतस्मार्तक्रियापराः नित्यनैमित्तिकानुष्ठानरताः । एवंभूताः पुरुषाः त्र्यवराः साक्षिणो भवन्ति । त्रयः अवराः न्यूना येषां ते त्र्यवराः । त्रिभ्योऽर्वाङ् न भवन्ति, परतस्तु यथाकामं भवन्तीत्यर्थः । जातिमनतिक्रम्य यथाजाति । जातयो मूर्द्धावसिक्तादयः, अनुलोमजाः प्रतिलोमजाश्च । तत्र मूर्द्धावसिक्तानां मूर्द्धावसिक्ताः साक्षिणो भवन्ति । एवमम्बष्ठादिष्वपि द्रष्टव्यम् । वर्णमनतिक्रम्य यथावर्णम् । वर्णा ब्राह्मणादयः । तत्र ब्राह्मणानां ब्राह्मणा एवोक्तलक्षणा उक्तसंख्याकाः साक्षिणो भवन्ति । एवं क्षत्रियादिष्वपि द्रष्टव्यम् ।

तथा, स्त्रीणां साक्ष्यं स्त्रिय एव कुर्युः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथाह मनुः। (अ. ८. श्लो ६८.)

स्त्रीणां साक्ष्यं स्त्रियः कुर्युरिति।

सजातिसवर्णासंभवे सर्वे मूर्द्धावसिक्तादयो ब्राह्मणादयश्च सर्वेषु मूर्द्धावसिक्तादिषु ब्राह्मणादिषु यथासंभवं साक्षिणो भवन्ति।

उक्तलक्षणानां साक्षिणामसंभवे प्रतिषेधरहितानामन्येषामपि साक्षित्वप्रतिपादनार्थम् असाक्षिणो वक्तव्याः। ते च पञ्चविधा—

नारदेन दर्शिताः, (व्य० प० १।१५७)

असाक्ष्यपि हि शास्त्रेषु दृष्टः पञ्चविधो बुधैः।

वचनाद्दोषतो भेदात्स्वयमुक्तिर्मृतान्तरः॥ इति

के पुनर्वचनादसाक्षिण इत्यत आह, (श्लो० १५८)

श्रोत्रियास्तापसा वृद्धा ये च प्रव्रजितादयः।

असाक्षिणस्ते वचनान्नात्र हेतुरुदाहृतः॥ इति

तापसा वानप्रस्थाः। आदिशब्देन पित्रा विवदमानादीनां ग्रहणम्।

यथाह शङ्खः,

पित्रा विवदमानगुरुकुलवासिपरिव्राजकवानप्रस्था निर्ग्रन्थाश्चासाक्षिण इति।

दोषादसाक्षिणो दर्शिताः, (श्लो० १५९)

स्तेनाः साहसिकाश्चण्डाः कितवा वञ्चकास्तथा

असाक्षिणस्ते दुष्टत्वात्तेषु सत्यं न विद्यते॥ इति

चण्डाः कोपनाः। कितवा द्यूतकृतः।

भेदादसाक्षिणां च स्वरूपं—

तेनैव दर्शितम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साक्षिणां लिखितानां च निर्दिष्टानां च वादिना ।
तेषामेकोऽन्यथावादी भेदात्सर्वे न साक्षिणः॥इति।
तथा स्वयमुक्तिस्वरूपं चोक्तम्, (श्लो० १६१)
स्वयमुक्तिरनिर्दिष्टः स्वयमेवैत्य यो वदेत् ।
सूचीत्युक्तः स शास्त्रेषु न स साक्षित्वमर्हति॥इति।
मृतान्तरस्यापि लक्षणमुक्तम्, (श्लो० १६२)
योऽर्थः श्रावयितव्यः स्यात्तस्मिन्नसति वाऽर्थिनि ।
क्व तद्वदतु साक्षित्वमित्यसाक्षी मृतान्तरः॥इति।

येनार्थिना प्रत्यर्थिना वा साक्षिणां योऽर्थः श्रावयितव्यो भवेत् यूयमत्रार्थे साक्षिण इति तस्मिन्नर्थिनि प्रत्यर्थिनि वाऽसति मृते अर्थे वाऽनिवेदिते साक्षित्वं कस्मिन्नर्थे कस्य वा कृते साक्ष्यं वदत्विति मृतान्तरः साक्षी न भवति ।

यत्र तु मुमूर्षुणा सुस्थेन वा पित्रा पुत्रादयः श्राविताः " अस्मिन्नर्थेऽमी साक्षिण " इति, तत्र मृतान्तरोऽपि साक्षी ।

यथाह नारदः,
मृतान्तरोऽर्थिनि प्रेते मुमूर्षुश्राविताहते ।
तथा, (ना० व्य० प० १।९६)

---

१ अस्य श्लोकस्य स्थाने (व्य. प. १ । श्लो. १६०)
राज्ञा परिगृहीतेषु साक्षिष्वेकार्थनिश्चये ।
वचनं यत्र भिद्येत ते स्युर्भेदादसाक्षिणः ॥
इति श्लोकः एतत्समानार्थकः नारदस्मृतौ उपलभ्यते ।
२ अस्यार्धस्य स्थाने - (व्य. प. १ । ९४)
अन्यत्र श्रावितादस्मात् स्वयमासन्नमृत्युना । इत्यर्धो दृश्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रावितोऽनातुरेणापि यस्त्वर्थो धर्मसंज्ञितः।
मृतेऽपि तत्र साक्षी स्यात् षट्सु चान्वाहितादिषु

इति ॥ ६८ ॥ ६९ ॥

बा० १। अथ साक्षिनिरूपणस्य अव्यवहितसङ्गत्यभावाद्व्यवहि सङ्गतिकथनपूर्वकमुपयुक्तं मूलानुक्तमुपोद्घातरूपमाह * प्रमा णमित्यादिसमुदाहृताइतीत्यन्तेन । *तत्रेति । तेषां मध्ये । दृ ज्ञानसामान्यार्थत्वेन साक्षाद्द्रष्टरीतिसूत्रसिद्धमेवार्थमाह *स क्षादिति । *समक्षं दर्शनात्साक्ष्यमिति । समक्षमित्यस्य श्रव ऽपि सम्बन्धः । समक्षदर्शनादिति पाठे तत् लुप्तविभक्त्यन्तं पृथ पदम् । तथा च साक्षाद्दर्शनात्साक्षात् श्रवणाच्च साक्ष्यं सिध्य त्येवेत्यर्थः । साक्षादित्यनेन परम्पराव्यावृत्तिः ।

नारदोपि, (व्य० प० १।१४७)

सन्दिग्धेषु तु कार्येषु द्वयोर्विवदमानयोः।
दृष्टश्रुतानुभूतत्वात्साक्षिभ्यो व्यक्तदर्शनम् ॥ इति ।

* निरूपितः, प्रतिपादितः । * इतीति । मिलित शेषः । * एकादशेति ।

२। बृहस्पतिना तु द्वादशविध उक्तः,

लिखितो लेखितो गूढः स्मारितः कुल्यदत्तकौ।
यादृच्छिकश्चोत्तरश्च कार्यमध्यगतो ऽपरः ॥
नृपोऽध्यक्षस्तथा ग्रामः साक्षी द्वादशधा स्मृतः । इ

अर्थिना पत्रे निवेशितो लिखितः । प्रत्यर्थिना ऽर्थि णया निवेशितो लेखितः । कुड्यादिव्यवधानेन श्रावितो गूढ पुनः पुनः कार्ये स्मार्यमाणः स्मारितः । यदृच्छयैवागतः स क्रियमाणो यादृच्छिकः । श्रवणाच्छ्रावणाद्वा साक्षिणाम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भाषमाण उत्तरः । अध्यक्षः प्राड्विवाकादिः । अन्यत् स्पष्टम् । अत्र मूलमनुपदमेव स्फुटीभविष्यति । अत्र लेखितो ऽधिकः ।

३। * तेषां चभेदः, तेषां भेदश्च । * तेनैव, नारदेनैव । *यदृच्छाऽभिन्न इति । यदृच्छया स्वेच्छया अभिन्नः संश्रितः प्राप्त इति यावत् । यदृच्छाऽभिज्ञ इति पाठान्तरम् । तत्र यदृच्छया तत्पूर्वकप्राप्त्याऽभिज्ञायते स्मार्यते स इत्यर्थः । आतश्चेति कर्मण्यङ् । अत एव—

यदृच्छास्मारितः कुल्यास्तथा चोत्तरसाक्षिणः ।

इति बृहस्पतिः । पञ्चविधः कृत इतीति पाठः । * लिखितादीनां च स्वरूपमिति । तेषां स्वरूपं त्वित्यर्थः । * संनिवेश्यतेइति । वर्तमानसामीप्ये इति भूते लट् । संनिवेशित इत्यर्थः। * पत्रकात्, पत्रसन्निवेशात् । पौनरुक्त्यं परिहरति * स्मारित इति । * तेनैव, कात्यायनेनैव । एवमग्रेऽपि । पुनः पुनः कार्ये दृष्ट्वा कार्यप्रसिद्ध्यर्थं यः स्मार्यते इत्यन्वयः । वचने स्मारित इति पाठे मतिबुद्धीति वर्तमाने क्तः । * इह, व्यवहारे । आगत इति शेषः । * अनयोः, स्मारितयदृच्छाभिज्ञयोः । * भेद इति । मिथ इत्यादिः । * द्वाविति । तथा च तदैक्येऽप्याकारणानाकारणाकृतो भेद इति भावः । चतुर्थमाह स एवेत्याह * तथेति। एवमग्रेऽपि । * अर्थिनेति । अर्थिना साध्यवता स्वार्थसिद्ध्यर्थं प्रत्यर्थिनो वचनं स्फुटं यथा भवति तथा, गूढः स्थितः कुड्यादिव्यवहितः प्रत्यर्थिना ऽविज्ञातः सन् स्थितो, यः पुमान् श्राव्यते स गूढसाक्षीत्युच्यते इत्यर्थः । * तथा साक्षिणामपीति । साक्षिणामप्युपरि ऊर्ध्वं यः पुमान् श्रवणात् श्रावणाद्वा साक्ष्यमुपरि उत्तानमुत्कृष्टं भाषते इत्याद्यर्थः । अत एव षष्ठीसङ्गतिः, अन्यथा द्वितीयापत्तिः स्फुटैव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४। एवम् आद्यभेदं सस्वरूपमुक्त्वा द्वितीयभेदमात्रं स्वरूपस्फुटत्वादाह * षड्विधस्यापीति। अकृतस्यापीत्यर्थः। चतुर्थमाह * व्यवहारिणामिति। व्यवहारिणां कार्येष्वधिकृतो यः स्यादित्यर्थः। पञ्चमं दूताख्यमाह। *आर्थिनेति। अर्थिप्रेरणया प्रत्यर्थिना संनिवेशित इत्यर्थः। कुल्या इत्यस्य विषयविशेषमाह * कुलेति। * तेऽपीति। प्रागुक्ताः सर्वेऽपीत्यर्थः। यद्यपि सभ्यस्य पूर्वनिपात उभयथोचितस्तथापि कात्यायनोक्तक्रमविवक्षयाऽऽह * लेखकेति। तयोरपीत्यर्थः। अत्र हेतुं कात्यायनवचनमाह *लेखक इति। *समुदाहृता इतीति। सहपाठादिति शेषः। राजनि तत्कार्यं पश्यति सति ते लेखकादयः,अनुपूर्वशः "स्थानेशम्" क्रमेण पूर्वाभावे परः परः इतिवत् अत्र साक्षिण इत्यर्थः।

५। एवमुपोद्घातमुक्त्वा मूलमवतारयति * ते साक्षिण इति। कीदृशा इति स्वरूपप्रश्नः। कियन्त इति संख्याप्रश्नः। * धर्मप्रधानाइति। पुरुषार्थानां त्रयाणां मध्ये इति भावः।

व्यासोऽपि,

धर्मज्ञाः पुत्रिणो मौलाः कुलीनाः सत्यवादिनः।
श्रौतस्मार्त्तक्रियायुक्ता विगतद्वेषमत्सराः॥
श्रोत्रिया न पराधीनाः सूरयश्चाप्रवासिनः।
युवानः साक्षिणः कार्या ऋणादिषु विजानता॥ इति।

श्रोत्रिया न पराधीना इत्यत्र नेति पूर्वोत्तरान्वयि। अतो वक्ष्यमाणविरोध इति बोध्यम्। पक्षान्तरमाह * सर्वे इति। अ

---

१ एतच्छ्लोकव्याख्याने एव-
श्रोत्रियास्तापसा वृद्धा ये च प्रव्रजितादयः।
असाक्षिणस्ते वचनात् नात्र हेतुरुदाहृतः॥
इतिवक्ष्यमाणनारदवचनविरोध इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्र्यवरा इति संख्याप्रश्नोत्तरम्, अन्यत्सर्वमन्यस्य।

६। नित्ययोगे विनिरित्याह * तपःशीला इति। शील-पदार्थमाह * निरता इति। कुलात्त्व इति सिद्धविशिष्टतात्पर्यार्थमाह * महेति। ताच्छील्ये णिनिरित्याह * वदनशीला इति। मोक्षसङ्ग्रहाय व्यतिरेकमाह * नत्वर्थेति। नार्थेति पाठान्तरम्। वर्त्तमानसत्तायां मतुबुत्पत्तेराह * विद्यमानपुत्राइति। विशिष्ट-सामर्थ्यलभ्यमाह * बाह्विति। काम्यस्याकरणे प्रत्यवायाभावा-त्तदभावायाह *नित्येति। एवं पदार्थानुक्त्वा वाक्यार्थमाह *एवं भूता इति। शाब्दमुक्त्वा तात्पर्यार्थमाह * त्रिभ्य इति। यथा-वर्णमित्यनेनापौनरुक्त्यायाह *मूर्द्धेति। तत्तात्पर्यार्थमाह *तत्रे-ति। तेषां मध्ये इत्यर्थः। एवमग्रेऽपि। इदमग्रेऽतिदिशति *एवमम्बष्ठादिष्वपीति। न्यूनतां निराचष्टे *तथेति।*मनुरिति।

द्विजानां द्विजसत्तमाः।
शूद्राश्च सन्तः शूद्राणामन्त्यानामन्त्ययोनयः॥

इति वचनशेषः। कात्यायनोऽप्येवम्।

नारदोऽपि, (व्य० प० १।१५५)

श्रेणीषु श्रेणिपुरुषाः स्वेषु वर्गेषु वर्गिणः।
बहिर्वासिषु बाह्याः स्युः स्त्रियः स्त्रीषु च साक्षिणः॥ इति।

वर्गिण आह कात्यायनः,

लिङ्गिनः श्रेणिपूगाश्च वणिग्जातास्तथाऽपरे।
समूहस्थाश्च ये चान्ये वर्गास्तानब्रवीत् भृगुः॥
दासचारणमल्लानां हस्त्यश्वरथवाजिनाम्।
प्रत्येकैकसमूहानां नायका वर्गिणः स्मृताः॥ इति।

७। सर्वे इति पक्षान्तरं व्याचष्टे * सजातीति। सजाति-सवर्णयोरसम्भवे इत्यर्थः। तयोः प्रक्रान्तत्वात्। सर्वेषां युगप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दसम्भवादाह * यथासम्भवमिति ।

मनुरपि, (अ० ८ । श्लो० ६१।६२।६३)

यादृशा आर्थिभिः कार्या व्यवहारेषु साक्षिणः ।
तादृशान्संप्रवक्ष्यामि यथा वाच्यमृतं च तैः ॥
गृहिणः पुत्रिणो मौलाः क्षत्रविट्शूद्रयोनयः ।
अर्थ्युक्ताः साक्ष्यमर्हन्ति न ये केचिदनापदि ॥
आप्ताः सर्वेषु वर्णेषु कार्याः कार्येषु साक्षिणः ।
सर्वधर्मविदोऽलुब्धा विपरीतांस्तु वर्जयेत् ॥ इति ।

ऋतं सत्यम् । मौलाः प्रसिद्धकुलोद्भवा इति कल्पतरुः

८। अथ मूलमवतारायितुं प्राग्वत् तदुपोद्घाततयोद्ग्रन्थेना क्षिस्वरूपमाह * उक्तलक्षणेत्यादिना साक्षी न भवतीत्यन्ते वक्तव्यत्वे हेतुमाह * प्रतिषेधेति । प्रतिषिद्धेति पाठेऽपि क्तः । अपिः कृतसाक्षिसमुच्चायकः । पञ्चम्यन्तत्रये ऽसा इति शेषः । अग्रे उभयत्र असाक्षीति शेषः । वचनादसा स्वरूपं नारदेनैवोक्तमित्याह * के पुनरिति । * श्रोत्रिया अत्र विरोधः परिहृतः । यद्यपि तापसा इति तपस्विन इ तुल्यार्थं तथापि तदविरोधायैवाह * वानप्रस्थाइति । अत्र शब्दग्राह्यं सूचयन्नुभयत्र मानमाह * यथाह शङ्ख इति । गु लेत्यनेनोभयोरपि ग्रहणम् । *निर्ग्रन्था इति । पाखण्डिन इ * दर्शिता इति । नारदेनैवेति शेषः । * साहसिकाइति विचारितकारिण इत्यर्थः । * वञ्चकाः, प्रतारकाः । दोष * तेष्विति । * तेनैव, नारदेनैव । एकेन चेन मिथः सम ऽन्येन अन्येषाम् । *वादिनामिति । भाषमाणानाम् । * अनेकेषां मध्ये इत्यर्थः । वादिनेति पाठस्तु युक्त एव । तु नारदनैवोक्त इत्याह *तथेति । *अनिर्दिष्टः, साक्षि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शेषः । * सूची, सूचकः ।

अनिर्दिष्टस्तु साक्षित्वे स्वयमेवेत्य यो वदेत् ।
स्वयमुक्तः स शास्त्रेषु न च साक्षित्वमर्हति ॥

इति पाठान्तरम् । अनेन स्वयमेवोक्तिर्यस्येति योगार्थोऽपि दर्शितः । * उक्तमिति । नारदेनैवेति भावः । * योऽर्थ इति । योऽर्थः श्रावयितव्यस्तस्मिन् असति मध्यमणिन्यायेनान्वयात् अर्थिनि वादिनि प्रतिवादिनि वाऽसति तत् अङ्गीकृतं साक्षित्वं क्क कस्मिन्विषये साक्षी वदतु इति हेतोः सोऽसाक्षी मृतान्तर इति शब्दोऽर्थः । तत्फलितं शेषपूरणेनाह * येनेति । अर्थिनीत्यस्य प्रागुक्तव्युत्पत्त्या साध्यवतीत्यर्थकत्वेनोभयपरत्वादाह * प्रत्यर्थिना वेति । अत एव—

कात्यायनः,

अर्थी यत्र विपन्नः स्यात्तत्र साक्षी मृतान्तरः ।
प्रत्यर्थी वा मृतो यत्र तत्राप्येवं प्रकल्पयेत् ॥ इति ।

तदाकारमाह * यूयम् इति । श्रावितादृते तत्साध्यादिविशेषपरिज्ञानस्य तेषामसम्भवादिति भावः । तच्छब्देनात्र त्रयाणां परामर्श इत्याह * अर्थिनीत्यादि । असतीत्यस्य व्याख्या * मृते इति । अस्याग्रेऽप्यन्वयः । वासूचितं पक्षान्तरमाह * अर्थे वा ऽनिवेदिते इति । निवेदितेऽर्थे ऽसति मृते वेत्यर्थः । असाक्षित्वे हेतुं सूचयन्नाह * क्केति । अस्योक्तपक्षभेदेनार्थद्वयं मूलानुरोधेन व्याख्याव्युत्क्रमेणाह * कस्मिन्निति । साक्ष्यमित्यस्य तादित्यादिः, तस्य चाङ्गीकृतमित्यर्थः । इतिर्हेतौ । अनेन मृतः उक्तान्यतमः अन्तरे साक्ष्यस्य स्वीकारभाषणयोर्मध्ये यस्य स मृतान्तर इति व्युत्पत्तिः सूचिता । एवमसाक्षिस्वरूपं प्रतिपादितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

९। अनेन मृतान्तरस्य सर्वत्रासाक्षित्वे प्राप्ते प्रतिप्रसवमा
*यत्र त्वित्यादिना चान्वाहितादिष्वितीत्यन्तेन। *अस्मिन्नि
इदं द्रव्यमियत् एतया वृद्ध्या ऽस्मिन्काले देवदत्ताय दत्तमित्यत्र
इत्यर्थः। अन्यथा तेषां साध्यादिविवेकासंभवादिष्टसिद्धिर्न स्या
दिति भावः। तत्रादावाद्ये मानमाह *यथाहेति। मुमूर्षुश्रा
विनाऽर्थिनि प्रेते सति साक्षी मृतान्तर इति कथ्यते इत्यर्थ
मुमूर्षुणा श्रावितश्चेन्मृतान्तरोऽपि साक्षी भवतीति भावः। द्विती
पि स एव मानमित्याह * तथेति। * अनातुरेण, स्वस्थे
अपिर्मुमूर्षुसमुच्चायकः। * धर्मसंज्ञित इति। धर्माख्य इत्यर्थः
तत्स्वरूप इति यावत्। धर्मज्ञानविषयो वा। धर्मसंहित इति
ठान्तरम्। धर्मयुक्त इत्यर्थस्तदा। *तत्रेति। तस्मिन्दैवान्मृते
तत्रार्थे मृतान्तरोऽपि एतेषु षट्सु साक्षी स्यादित्यर्थः॥६८॥६

मि० तानेतानसाक्षिणो दर्शयति।

या० स्त्रीबालवृद्धकितवमत्तोन्मत्ताभिशस्तकाः
रङ्गावतारिपाखण्डिकूटकृद्विकलेन्द्रियाः॥ ७०
पतिताप्तार्थसंबन्धिसहायरिपुतस्कराः।
साहसी दृष्टदोषश्च निर्धूताद्यास्त्वसाक्षिणः॥ ७१

मि० स्त्री प्रसिद्धा। बालोऽप्राप्तव्यवहारः। वृ
ऽशीतिकावरः। वृद्धग्रहणं वचनानिषिद्धानामन्ये
षामपि श्रोत्रियादीनामुपलक्षणार्थम्। कितवोऽक्षदे
मत्तः पानादिना। उन्मत्तो ग्रहाविष्टः। अभिशस्तो
ऽभियुक्तो ब्रह्महत्यादिना। रङ्गावतारी चारणः। पा
खण्डिनो निर्ग्रन्थप्रभृतयः। कूटकृत् कपटलेख्यादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

री । विकलेन्द्रियः श्रोत्रादिरहितः । पतितो ब्रह्महादिः । आप्तः सुहृत् । अर्थसबन्धी विप्रतिपद्यमानार्थसंबन्धी । सहाय एककार्यः । रिपुः शत्रुः । तस्करः स्तेनः । साहसी स्वबलावष्टम्भकारी । दृष्टदोषो दृष्टवितथवचनः । निर्धूतो बन्धुभिस्त्यक्तः । आद्यशब्दादन्येषामपि स्मृत्यन्तरोक्तानां दोषादसाक्षिणां भेदादसाक्षिणां स्वयमुक्तेर्मृतान्तरस्य च ग्रहणम् । एते स्त्रीबालादयः साक्षिणो न भवन्ति ॥ ७० ॥ ७१ ॥

बा० १। एवमुपोद्घातमुक्त्वा सांप्रतं मूलमवतारयति * तानेतानिति । वक्तव्यान्नारदोक्तानित्यर्थः। पाषण्ड्यादिद्वन्द्वं कृत्वा पुना रङ्गावतारिणा सह, एवम् आप्तादिद्वन्द्वं कृत्वा पुनः पतितेन सहेति बोध्यम्। * अप्राप्तेति । व्याख्यातमिदम् । * अशीतिकेति । अशीतिः परिमाणमस्य सः अवरो यस्येति विग्रहः । ततोऽर्वाक् न भवति तदारभ्य भवतीत्यर्थः । वैषम्ये बीजाभावात्तदेकवाक्यतया च न्यूनतां निराचष्टे * वृद्धेति । * पानादिनेति । आदिना भक्षणग्रहणम् । * अभियुक्त इति । तत्सम्बन्धारोपमात्रं यस्येत्यर्थः । * लेख्यादीति । आदिना भोगादिग्रहणम् । व्यवहारे श्रुतेः प्राधान्यादाह * श्रोत्रादीति । योगनिरासायाह * सुहृदिति । यत्किञ्चिदर्थसम्बन्धित्वस्य सर्वत्र सत्त्वादाह * विप्रतिपद्यमानार्थसंबन्धीति । * एकेति । बहुव्रीहिः । पुत्रादिरित्यर्थः । * स्वबलावष्टम्भकारीति । तेन करोति न तु विचारेण । अविचारितकारीत्यर्थः । दोषाणां बाहुल्ये पि अत्र प्राधान्यादाह * वितथेति । * बन्धुभिरिति । ग्रामराजकुलश्रेण्यादिभिर्निस्सारित इति कल्पतरुः । नारदैकवाक्यत्वायाह * आद्येति । एवं पदार्थानुक्त्वा वाक्यार्थमाह * एते इति ॥ ७० ॥ ७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि० त्र्यवराः साक्षिणो ज्ञेया इत्यस्यापवादमाह

या० उभयानुमतः साक्षी भवत्येकोऽपि धर्मवित्।

मि० ज्ञानपूर्वकं नित्यनैमित्तिकधर्मानुष्ठायी धर्मवित् स एकोऽप्युभयानुमतश्चेत्साक्षी भवति। अपिशब्दाद्द्वावपि। यद्यपि श्रौतस्मार्तक्रियापरा इति त्र्यवराणामपि धर्मवित्त्वं समानं तथापि तेषामुभयानुमत्यभावेऽपि साक्षित्वं भवति, एकस्य द्वयोर्वोभयानुमत्यैव साक्षित्वं भवतीत्यर्थवत् त्र्यवरग्रहणम्।

मि० तपस्विनो दानशीला इत्यस्यापवादमाह।

या० सर्वः साक्षी संग्रहणे चौर्यपारुष्यसाहसे ॥ ७२॥

मि० संग्रहणादीनि वक्ष्यमाणलक्षणानि, तेषु सर्वे वचननिषिद्धास्तपःप्रभृतिगुणरहिताश्च साक्षिणो भवन्ति। दोषादसाक्षिणो भेदादसाक्षिणः स्वयमुक्तिश्चात्रापि साक्षिणो न भवन्ति। सत्याभावादितिहेतोरत्रापि विद्यमानत्वात्।

मनुष्यमारणं चौर्यं परदाराभिमर्शनम्।
पारुष्यमुभयं चेति साहसं स्याच्चतुर्विधम्॥

इति वचनात् यद्यपि स्त्रीसंग्रहणचौर्यपारुष्याणां साहसत्वं तथापि तेषां स्वबलावष्टम्भेन जनसमक्षं क्रियमाणानां साहसत्वम्, रहसि क्रियमाणानां संग्रहणादिशब्दवाच्यत्वमिति तेषां साहसात्पृथगुपादानम् ॥ ७२ ॥

बा० १। श्रौतस्मार्तेत्येकवाक्यतया आह * ज्ञानेति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च विदेर्ज्ञानपूर्वकतदनुष्ठाने लक्षणेति भावः । अत एवोक्तं—

पठकाः पाठकाश्चैव ये चान्ये शास्त्रचिन्तकाः ।
सर्वे व्यसनिनो मूर्खा यः क्रियावान् स पण्डितः ॥ इति ।

२।*उभयेति । आर्थिप्रत्यर्थीत्यर्थः । * द्वावपीति । तादृशौ चेमौ साक्षिणौ भवतः इत्यर्थः ।

३। ननु एवं धर्मवित्त्वं सर्वत्र तुल्यं, तथा च तत्र त्र्यवरपदमनर्थकं व्यावर्त्याभावात् अपिना तेषामपि सङ्ग्रहादित्याशङ्कते *यद्यपीति * इतीति । इत्युक्तेरित्यर्थः । धर्मवित्त्वप्रयुक्तवैलक्षण्याभावेऽप्युभयानुमतत्वप्रयुक्तवैलक्षण्यमित्याशयेन समाधत्ते * तथापीति । * द्वयोर्वा, द्वयोर्वातु । * अर्थवत्, सफलम् ।

उ० ४। प्रत्यासत्तेः स्त्रीबालेत्यस्यैवोपस्थितेराह * तपस्वीति । * इत्यस्येति । इत्यस्यापीत्यर्थः । क्वचित्तथैव पाठः । अपिना-स्त्रीबालेत्यादिनिषिद्धसङ्ग्रहः । अत एव व्याख्यानाविरोधो नेति बोध्यम् । चौर्येत्यादिः समाहारद्वन्द्वः । * सङ्ग्रहणादीनि, चत्वारि । सर्वशब्दस्य बुद्धिस्थबहुसंख्याकावयवारब्धसमुदाये शक्त्या तस्यानुद्भूतावयवभेदत्वेन यद्यपि सर्वलोक इतिवत् मूले एकवचनं तथापि स्पष्टार्थमुद्भूतावयवपरतया व्याचष्टे * सर्वे इति । तदर्थमेव व्युत्क्रमेणाह * वचनेति । मौलस्त्रीबालेत्यादिवचनेत्यर्थः । नन्वेवमतिप्रसङ्गोऽत आह * दोषादिति । एते त्रय इत्यर्थः । * अत्रापि, स्त्रीसंग्रहणादिष्वपि । ननु पूर्वं तेषामसाक्षित्वे उक्तेपि अस्य तदपवादत्वेनात्र तेषां साक्षित्वं स्यादेव अत आह *सत्याभावादितीति । एवं च येन हेतुना तत्रासाक्षित्वं तस्य अत्रापि सत्त्वं तुल्यमिति तदनपगमेन तेषामत्रापि अतत्त्वमेवेति भावः । एवं च स्वयमुक्तिश्चेति चेनान्येषामपीदृशानां ग्रहणम् ।

तदाह नारदः, (व्य. प. १ । १८८ । १९०)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

असाक्षिणो ये निर्दिष्टा दासनैकृतिकादयः ।
कार्यगौरवमासाद्य भवेयुस्तेऽपि साक्षिणः ॥
तेषामपि न बालः स्यान्नैकोन स्त्री न कूटकृत् ।
न बान्धवो न वाऽरातिर्ब्रूयुस्ते साक्ष्यमन्यथा ॥ इति ।

नैकृतिको बिम्बकः ।

व्यासोऽप्याह,

साक्षिदोषाः प्रवक्तव्याः संसदि प्रतिवादिना ।
पत्रेऽभिलिख्य तान् सर्वान्वाच्याः प्रत्युत्तरं तु ते ॥
प्रतिपत्तौ न साक्षित्वमर्हन्ति तु कदाचन ।
अतोऽन्यथा भावनीयाः क्रियया प्रतिवादिना ॥
अभावयन् दमं दाप्यः प्रत्यर्थी साक्षिणां स्फुटम् ।
भाविताः साक्षिणो वर्ज्याः साक्षिधर्मनिराकृताः ॥
जितः स विनयं दाप्यः शास्त्रदृष्टेन कर्मणा ।
यदि वादी निराकाङ्क्षः साक्षिसत्ये व्यवस्थितः ॥ इति

पत्रे लिखितान्साक्षिदोषानभिलक्षीकृत्य उत्तरमुत्तरं त द्विषयं परिहारं ते साक्षिणः सभ्यैर्वाचनीया इत्यर्थः । पत्रे तान् र्वानभिलिख्य उत्तरमुत्तरं ते दोषा वाच्या इति कल्पतरुः । अ ऽन्यथा असम्प्रतिपत्तौ भावनीयाः अङ्गीकारयितव्याः । क्रिय प्रमाणेन स्फुटं यथा स्यात्तथा अभावयन्नित्यन्वयः ।

५ । ननु संग्रहणादित्रयाणामपि साहसशब्दवाच्यत्वा देनोक्तिर्मूले ऽयुक्तेत्याशङ्कते * मनुष्येति । * उभयं, वाक्पा दण्डपारुष्यं च । पारुष्यत्वेनैक्यादाह * चतुर्विधमिति । उ क्रमविवक्षयाऽऽह * स्त्रीसंग्रहणेति । समाधत्ते * तथापी जनसमक्षं स्वबलावष्टम्भेन यत्करणं तेनोपाधिना क्रोडी तानामेषां साहसपदवाच्यत्वम् । एकान्ते यत्करणं तद्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाधेरैक्येऽपि विषयभेदेन भिन्नत्वात्तत्तद्विषयभेदघटितरहः-करणोपाधिभेदात्सङ्ग्रहणादिशब्दवाच्यत्वमिति भावः । *तेषां, त्रयाणाम् । *साहसात्पृथगिति । साहसात्प्रागुक्तेति पाठान्तरम् । तत्र ततोऽग्रे उपादाने सामान्यविशेषभावेनान्वयसम्भवेन त्रयाणामेव ग्रहणं स्यादिति तथेति भावः ॥ ७२ ॥

मि० साक्षिश्रावणमाह ।

या० साक्षिणः श्रावयेद्वादिप्रतिवादिसमीपगान् ।

मि० अर्थिप्रत्यर्थिसन्निधौ साक्षिणः समवेतान् । नासमवेताः पृष्टाः प्रब्रूयुरिति गौतमवचनात् । वक्ष्यमाणं श्रावयेत् । तत्रापि—

कात्यायनेन विशेषो दर्शितः,

सभान्तः साक्षिणः सर्वानर्थिप्रत्यर्थिसन्निधौ ।
प्राड्विवाको ऽनुयुञ्जीत विधिनाऽनेन सान्त्वयन् ॥
देवब्राह्मणसान्निध्ये साक्ष्यं पृच्छेदृतं द्विजान् ।
उदङ्मुखान्प्राङ्मुखान्वा पूर्वाह्णे वै शुचिः शुचीन् ॥
आहूय साक्षिणः पृच्छेन्नियम्य शपथैर्भृशम् ।
समस्तान् विदिताचारान् विज्ञातार्थान्पृथक्पृथक् ॥

इति ।

तथा ब्राह्मणादिषु श्रावणे—

मनुना नियमो दर्शितः, (अ. ८ श्लो. ११३)

सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः ।
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः ॥ इति ।

ब्राह्मणम् "अन्यथा ब्रुवतः सत्यं ते नश्यतीति" शापयेत् । क्षत्रियं, वाहनायुधानि तव विफलानीति । गो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बीजकाञ्चनादीनि तव विफलानि भविष्यन्तीति वै
श्यम्। शूद्रम् अन्यथा ब्रुवतस्तव सर्वाणि पातकानि
भविष्यन्तीति शापयेत्। अत्र चापवादः—
तेनैव दर्शितः, (मनु० अ० ८ श्लो० १०२)

गोरक्षकान् वाणिजकांस्तथा कारुकुशीलवान्।
प्रेष्यान्वार्धुषिकांश्चैव विप्रान् शूद्रवदाचरेत्॥इति

विप्रग्रहणं क्षत्रियवैश्ययोरुपलक्षणार्थम्। कुशी
लवा गायकाः। प्रतिवादिना साक्षिदूषणे दत्ते प्रत्य
क्षयोग्यदूषणेषु बाल्यादिषु तथैव निर्णयः। अयोग्ये
तु तद्वचनाल्लोकतश्च निर्णयो न साक्ष्यन्तरेणेति नान
वस्था। यदि साक्षिदोषमुद्भाव्य साधयितुं न शक्नो
प्रतिवादी तदाऽसौ सारानुसारेण दण्ड्यः। अथ सा
धयति तदा न साक्षिणः।

यथाह,

असाधयन् दमं दाप्यो दूषणं साक्षिणां स्फुटम्।
भाविते साक्षिणो वर्ज्याः साक्षिधर्मनिराकृताः॥इति

उद्दिष्टेषु च सर्वेषु साक्षिषु दुष्टेष्वर्थी यदा क्रिया
न्तरनिरपेक्षस्तदा पराजितो भवति।

जितः स विनयं दाप्यः शास्त्रदृष्टेन कर्मणा।
यदि वादी निराकाङ्क्षः साक्षिसभ्यैरवस्थितः

इति स्मरणात्। साकाङ्क्षश्चेत्क्रियान्तरमवलम्ब
त्यभिप्रायः।

मि० कथं श्रावयेदित्याह।

या० ये पातककृतां लोका महापातकिनां तथा॥७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अग्निदानां च ये लोका ये च स्त्रीबालघातिनाम्।
स तान्सर्वानवाप्नोति यः साक्ष्यमनृतं वदेत् ॥ ७४ ॥
सुकृतं यत्त्वया किञ्चिज्जन्मान्तरशतैः कृतम्।
तत्सर्वं तस्य जानीहि यं पराजयसे मृषा ॥ ७५ ॥

मि० पातकोपपातकमहापातककारिणामग्निदानां स्त्रीबालघातिनां च ये लोकास्तान् सर्वानसावाप्नोति यः साक्ष्यमनृतं वदेदिति। तथा जन्मान्तरशतैर्यत्सुकृतं कृतं तत्सर्वं तस्य भवति, यस्ते अनृतवदनेन पराजितो भवतीति श्रावयेदिति सम्बन्धः। एतच्च शूद्रविषयं द्रष्टव्यम्। शूद्रं सर्वैस्तु पातकैरिति शूद्रे सर्वपातकश्रावणस्य विहितत्वात्। गोरक्षकादिद्विजातिविषयं च। गोरक्षकान् वाणिजकानित्युक्तत्वात्। अन्यानेकजन्मार्जितसुकृतसंक्रमणस्य महापातकादिफलप्राप्तेश्चानृतमात्रेणानुपपत्तेः साक्षिसन्त्रासार्थमिदमुच्यते।

यथाह नारदः, (व्य० प० १।२००)
पुराणैर्धर्मवचनैः सत्यमाहात्म्यकीर्तनैः।
अनृतस्यापवादैश्च भृशमुत्त्रासयेदिमान् ॥इति॥७३ ॥ ७४ ॥ ७५ ॥

बा० १। श्रावणे तद्विधिसामीप्यमात्रं विवक्षितं न तु तद्गमनमित्याह * संनिधाविति। विशेषमाह *समवेतानिति। मिलितानित्यर्थः। अत्र मानमाह * नासमवेता इति। पृष्टा अपि असमवेता नेत्याद्यर्थः। कर्माकाङ्क्षायामाह * वक्ष्यमाणमिति। मूलकृतेति भावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२। *तत्रापि,श्रावणेऽपि । *सभान्तः,सभामध्ये । *स
न्, उक्तोऽर्थः । अत एव समस्तानिति सफलम् । * अनुयु
त, पृच्छेत् । नियुञ्जीतेति पाठान्तरम् । तत्र मेलयेदित्य
विधिमेवाह *देवेति । *समस्तान्, मिलितान् पृथक्पृथक्
ज्ञातार्थानित्यर्थः ।

३। तत्रापि विशेषमाह * ब्राह्मणादिष्विति।*ब्राह्मणदिषु, त्रि
*नियम इति। विशेषमध्ये इति भावः । शूद्रे तु न नियम इ
*शूद्रमिति । अत एव तु ब्राह्मणमित्यस्य शापयेदित्यत्रा
स्तस्य चाग्रे उभयत्रानुषङ्गः। अन्यथा ब्रुवत इत्यस्य सम्पुटी
न मध्येऽप्युभयत्र सम्बन्धो ध्वनितः ।

४। तत्रापि विशेषमाह * अत्र चेति । सत्येन शापये
त्रार्थे चेत्यर्थः। सम्बन्धिनोऽधिकरणत्वविवक्षया सप्तमी। *
व, मनुनैव । कारुः शिल्पी । युक्तितौल्यादाह *विप्रग्रहण
तयोरपीत्यर्थः । एतच्च साक्षिसन्त्रासार्थमेव ।

यथाह नारदः, (व्य० प० १।२००)

पौराणैर्धर्मवचनैः सत्यमाहात्म्यकीर्त्तनैः ।

अनृतस्यापवादैश्च भृशमुत्त्रासयेदिमान् ॥ इति ।

सत्येन त्रासयेद्विप्रमित्यप्यपकृष्टब्राह्मणविषयं न
णमात्रविषयम् । तस्य गौतमेन शपथस्य निषिद्धत्वादि
ल्पतरुः ।

५। ननु प्रतिवादिना साक्षिदोषे उक्ते तन्निर्णयाय
न्तरापेक्षायामनवस्था स्यात् । तदुक्तम्—

व्यासेन,

अन्यैस्तु साक्षिभिः साध्ये दूषणे पूर्वसाक्षिणाम् ।

अनवस्था भवेत् दोषस्तेषामप्यन्यसम्भवात् ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतो विशेषमाह *प्रतिवादिनेति। *दत्ते, सति। *बाल्यादिषु, सत्सु। चापल्यादिष्वित्यपपाठः। *तथैव, प्रत्यक्षेणैव। *अयोग्येषु, दूषणेषु सत्सु। *तद्वचनात्, साक्षिवचनात्।

तदुक्तं व्यासेनैव,

सभासदां प्रसिद्धं यल्लोकसिद्धमथाऽपि वा।
साक्षिणां दूषणं ग्राह्यमसाध्यं दोषवर्जनात्॥ इति।

असाध्यं साधनानर्हम्। *दोषवर्जनात्, अनवस्थादिराहितत्वात्।

६। विशेषान्तरमाह *यदीति। सारो बलम्। *साक्षिण इति। ते इत्यादिः। क्वचित्तथा पाठ एव। कात्यायनमाह *यथाहेति। *असाधयन्निति। अभावयन्निति पाठान्तरम्। अर्थोऽभिन्नः। साक्षिणां दूषणं स्फुटं यथा तथाऽसाधयन्नित्याद्यन्वयः। *भाविते, साधिते सति। *साक्षिधर्मेति। साक्षित्वानर्हा इत्यर्थः।

७। विशेषान्तरमाह। *उद्दिष्टेष्विति। कथितेष्वित्यर्थः। *दुष्टेषु, सत्सु। *क्रियान्तरेति। प्रमाणान्तरेत्यर्थः। व्यासं मानमाह *जित इति। यदि वादी साक्षिसभ्यविषये निराकाङ्क्षोऽवस्थितः सम्पन्नस्तदा जितः पराजितः सन् स वादी शास्त्रोक्तविधिना विनयं दमं दाप्य इत्यर्थः। साक्षिसभ्येष्ववास्थित इत्यत्र साक्षिसत्ये व्यवस्थित इति पाठान्तरम्। अर्थस्तद्वत्। सूचितार्थमाह *साकाङ्क्ष इति।

उ० ८। वक्ष्यमाणमित्युक्तमेव वक्तुमाह *कथमिति। वाक्यमिति शेषः। *इत्याह, इत्यत आह। क्वचित्तथैव पाठः। सर्वानिति स्पष्टार्थम्। स तान् इत्येकवचनबहुवचनाभ्यामेव तदर्थलाभात्।

९। एवं सामान्येनोक्त्वा विशिष्याह *सुकृतमिति। मूले पातकशब्देन वक्ष्यमाणभिन्नानां ग्रहणमित्याह *पातकोपेति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्राप्यनेन वक्ष्यमाणाभिन्नसर्वग्रहणमिति बोध्यम् । स इत्यस्य र्थोऽसाविति । इतिर्वाक्यार्थसमाप्तौ ।

१०। अत एवाह *तथेति । किं चेत्यर्थः । वदति तथेति प वदति किं च भवतीत्यर्थः । *सुकृतं, पुण्यम् । *तस्य, तदी म् । तदर्थमाह *यस्ते इति । तवानृतवाक्येनेत्यर्थः । तवे पाठान्तरम् । अस्य त्वत्र कर्मत्वमित्याह *इति श्रावयेदिति ।

११। मन्वविरोधायाह *एतच्चेति । तमेवाह * शूद्रमि तदेकवाक्यतयैवाह *गोरक्षेति । ननु स्वल्पतरानृतवदनरूप षात्तादृशपापोत्पत्तावपि कथमतिबहुलमीदृशं फलमत अ *अन्यानेकेति । स्वयम् अनेकजन्मभिरर्जितं यत्सुकृतं तस्या त्र संक्रमणस्येत्यर्थः । मूले कृतशब्दोऽर्जितपरः, शतशब्दोऽ पर इति भावः । * उच्यते इति । इदमित्यादिः । क्वचि पाठः । तथा चार्थवादोऽयमिति भावः । अत एवाह * यथे *धर्मेति । स्मृतीत्यर्थः । सत्यसम्बन्धिमाहात्म्यस्य कीर्त त्याग्रिमार्थः । * भृशमिति । तथा चानृतवदनाभावे त यम् ॥ ७३ ॥ ७४ ॥ ७५ ॥

मि० यदा तु श्राविताः साक्षिणः कथञ्चिन्न स्तदा किं कर्तव्यमित्यत आह ।

या० अब्रुवन्हि नरः साक्ष्यमृणं सदशबन्धकम् ।
राज्ञा सर्वं प्रदाप्यः स्यात् षट्चत्वारिंशकेऽहनि ॥७

मि० यः साक्ष्यमङ्गीकृत्य श्रावितः सन् कथञ्चिन्न ति स राज्ञा सर्वं सवृद्धिकमृणं धनिने दाप्यः । द शबन्धकं, दशमांशसाहितम् । दशमांशश्च राज्ञो भव राज्ञाऽधमर्णिको दाप्यः साधितादृशकं शत इत्युक्तत्वात् । एतच्च षट्चत्वारिंशकेऽहनि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साति वेदितव्यम् । ततोऽर्वाग्वदन्न दाप्यः । इदं च व्याध्याद्युपप्लवरहितस्य ।

यथाह मनुः, अ (८. श्लो. १०७.)

त्रिपक्षादब्रुवन् साक्ष्यमृणादिषु नरोऽगदः ।

तदृणं प्राप्नुयात्सर्वं दशबन्धं च सर्वशः ॥ इति ।

अगद इति राजदैवोपप्लवविरहोपलक्षणम् ॥७६॥

बा० १। कथंचित्,कारणेन। *सः,नरः। सर्वमित्यस्य योग्यत्वादिना पूर्वार्द्धे ऽन्वय इत्याह *सर्वमिति। तदर्थमाह * सवृद्धिकमिति। योग्यत्वादेवाह *धनिने इति। यद्यपि सदशेति ऋणविशेषणं तथापि धन्ययोग्यमिति तद्वाक्यात्पृथक् व्याचष्टे * सदशेति । दशबन्धकेन सहितं तथा। दशशब्दो दशमपरः। बन्धशब्दोंऽशपरः। स्वार्थे क इत्याह *दशमांशसहितेति। उक्तहेतोरेवाह * दशमांश इति। चस्त्वर्थे। ननु अयमपि वचनाद्धनिन एवास्तां किमित्येवं व्याख्यानं वैरूप्यापादकमत आह * राज्ञेति। तन्न्यायेनेत्यर्थः। तथा च तदेकवाक्यत्वतस्तल्लाघवमूलकमेव व्याख्यानमुचितमिति भावः।

२। अस्य कालनियममाह * एतच्चेति । मन्वनुरोधेनैवाह *प्राप्ते सतीति। एतत्तात्पर्यमाह * ततोऽर्वागिति। पक्षत्रयमध्ये इत्यर्थः। अत एव मूलवचने हिः प्रयुक्तः। स हि तत्रावदनस्य तद्धेतुत्वं प्रतिपादयति।

३। विशेषमाह * इदं चेति। इदमपीत्यर्थः। आदिना राजदैवग्रहणम् । * त्रिपक्षादिति। त्रयः पक्षा यस्मिन्निति बहुव्रीहिः। ल्यब्लोपे इति कर्मणि पञ्चमी। ऋणादिविषये सार्द्धमासमभिव्याप्य साक्ष्यमब्रुवन् अगदो ऽपीडितशरीरो नरस्तदृणं सर्वं सवृद्धिकं प्राप्नुयात् दद्यात्। दशबन्धं च दशमं भागं च सर्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शः सर्वस्य, राज्ञे दद्यादित्यर्थः। सर्वत इति पाठान्तरम्। संख्या वाचिनः परो बन्धशब्दो दण्डविशेषांशमात्रवचनः। नरग्रह सर्वतोग्रहणं श्लोकपूरणार्थमिति मेधातिथिः। युक्तिसाम्याद *अगद इति। विरहस्यापीत्यर्थः॥ ७६॥

मि० यस्तु जानन्नपि साक्ष्यमेव नाङ्गीकरोति दौ रात्म्यात्तं प्रत्याह।

या० न ददाति हि यः साक्ष्यं जानन्नपि नराधमः।

स कूटसाक्षिणां पापैस्तुल्यो दण्डेन चैव हि॥७७

मि० यः पुनर्नराधमो विप्रतिपन्नमर्थं विशेषतो जानन्नपि साक्ष्यं न ददाति नाङ्गीकरोति स कूटसाक्षि तुल्यः पापैः दण्डेन च। कूटसाक्षिणां च द वक्ष्यति। कूटसाक्षिणश्च दण्डयित्वा पुनर्व्यवहा प्रवर्तनीयः। कृतोऽपि कूटसाक्ष्ये विदिते निवर्तनी

यथाह मनुः (अ. ८. श्लो. ११७.)

यस्मिन् यस्मिन् विवादे तु कूटसाक्ष्यं कृतं भवेत्

तत्तत्कार्यं निवर्तेत कृतं चाप्यकृतं भवेत्॥ इति॥७

१।बा० *जानन्निति। विप्रतिपद्यमानमर्थमित्यादिः। *नाङ्गीक तीति। एवो व्युत्क्रमे। नाङ्गीकरोत्येवेत्यर्थः। ह्यर्थमाह *पुनरि स त्वर्थे। *नराधम इति। अस्यैवार्थो दौरात्म्यादित्यनेनो साकाङ्क्षत्वादाह *विप्रतिपन्नमिति। विवादास्पदमित्यर्थः। द्वि ह्यर्थमाह *विशेषतइति।लक्ष्यार्थमाह*नाङ्गीति। *तुल्यइति।तु एवेत्यर्थः। एवस्यात्रान्वयात्। तत्प्रयोजकधर्मावाह * पापैरि ननु को दण्डस्तेषाम् अत आह *कूटेति। *च दण्डं, दण्डं च। कूटसाक्ष्यपरिग्रहः। अत एव विशेषमाह * कूटेति। इदमक्षर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वहारविषयम् । अत एवाह * कृतोऽपीति । व्यवहार इत्यस्यानुषङ्गः । पूर्वं तेषु तत्त्वाज्ञानात् । अतएवाह * कूटेति । कौटेति पाठान्तरम् । तत्र समस्ताद्भावप्रत्ययः । आद्ये तदन्तेन समासः । एवमग्रेऽपि । अकृतविषये उक्त्वा कृताविषये आह * कृतं चापीति ॥ ७७ ॥

मि० साक्षिविप्रतिपत्तौ कथं निर्णय इत्यत आह ।

या० द्वैधे बहूनां वचनं समेषु गुणिनां तथा ।
गुणिद्वैधे तु वचनं ग्राह्यं ये गुणवत्तमाः ॥ ७८ ॥

मि० साक्षिणां द्वैधे विप्रतिपत्तौ बहूनां वचनं ग्राह्यम् । समेषु समसंख्येषु द्वैधे ये गुणिनस्तेषां वचनं प्रमाणम् । यदा पुनर्गुणिनां विप्रतिपत्तिस्तदा ये गुणवत्तमाः श्रुताध्ययनतदर्थानुष्ठानधनपुत्रादिगुणसंपन्नास्तेषां वचनं ग्राह्यम् । यत्र तु गुणिनः कतिपये इतरे च बहवस्तत्रापि गुणिनामेव वचनं ग्राह्यम् ।

उभयानुमतः साक्षी भवत्येकोऽपि धर्मवित् ।

इति गुणातिशयस्य मुख्यत्वात् । यत्तु भेदादसाक्षिण इत्युक्तं, तत् सर्वसाम्येनागृह्यमाणविशेषविषयम् ॥ ७८ ॥

बा० १। * साक्षीति। नन्वित्यादिः। योग्यतया साकाङ्क्षत्वादाह * साक्षिणामिति । वचनं ग्राह्यमित्यस्य सर्वत्र सम्बन्धादाह * वचनमिति। उत्तरार्धोपात्तस्य पूर्वार्धेऽपि सम्बन्धादाह *ग्राह्यमिति । समत्वं संख्याकृतमेवेत्याह * समसंख्येष्विति । अनुषङ्गेणाह * द्वैधे इति । तन्निष्ठद्वैधे इत्यर्थः । त्वर्थमाह *पुनरिति । प्रकर्षमाह * श्रुतेति । शेषमाह * तेषामिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२। विशेषमाह * यत्र त्विति । * इति, इत्यनेन । * ख्यत्वात्, तत्त्वप्रतिपादनात् ।

३। ननु प्राक् भेदादसाक्षिण इत्युक्तं, इदानीं तु भे ऽपि साक्षिण इत्युच्यते द्वैधे इत्यनेनेति मिथो विरोधो ऽत * यत्त्विति । *तत् सर्वेति । यत्र संख्यागुणादिभिः सर्वैः म्यं तत्र विशेषाभावाद्भेदादसाक्षित्वं, यत्र तु संख्यागुणादि षम्यं तत्र भेदेऽप्यनेन प्रकारेण साक्षित्वं भवत्येवेतिभावः॥७८

मि० साक्षिभिश्च कथमुक्ते जयः कथं वा पराज इत्यत आह ।

या० यस्योचुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेत्
अन्यथावादिनो यस्य ध्रुवस्तस्य पराजयः ॥ ७९ ॥

मि० यस्य वादिनः प्रतिज्ञां द्रव्यजातिसंख्या विशिष्टां साक्षिणः सत्यां वदन्ति, सत्यमेव जा मो वयमिति, स जयी भवति । यस्य पुनर्वादिनः तिज्ञामन्यथा वैपरीत्येन मिथ्यैतदिति वदन्ति त पराजयो ध्रुवो निश्चितः । यत्र तु प्रतिज्ञार्थस्य विस्म रणादिना भावाभावौ साक्षिणो न प्रतिपादय तत्र प्रमाणान्तरेण निर्णयः कार्यः । न च राज्ञा क्षिणः पुनः पुनः प्रष्टव्याः । स्वभावोक्तमेव व ग्राह्यम् ।

यथाह—

स्वभावोक्तं वचस्तेषां ग्राह्यं यद्दोषवर्जितम् ।
उक्ते तु साक्षिणो राज्ञा न प्रष्टव्याः पुनःपुनः ॥ इति ॥

१। बा० साक्षिभिरिति । नन्वित्यादिः । साक्षिभिरुक्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कथमित्याद्यन्वयः । तद्वचनस्यातादृशस्यापि सम्भवात् । अत एव वक्ष्यति, यत्र त्वित्यादीति भावः । कथमित्यस्य पुनरुक्तिः स्पष्टार्था । यस्येत्यस्य व्याख्या * वादिन इति । अस्य न साक्षिण इत्यत्रान्वय इत्याह * प्रतिज्ञामिति । सा च पत्रारूढा न केवलेत्याह * द्रव्येति । लिङर्थो न विवक्षित इत्याह * वदन्तीति । तदाकारमाह * सत्यमेवेति । एवेनासत्यत्वव्यवच्छेदः । * स इति । तदिष्टसिद्धेरिति भावः । प्राग्वदाह । *भवतीति ।

२। उत्तरार्द्धार्थमाह * यस्येति । पुनस्त्वर्थे । वैलक्षण्याय शेषपूरणमिदम् । साक्षिण इत्यस्यानुवृत्तिः । अन्यथावादिन इत्येकं पदम् । यस्य तु वादिनो ऽन्यथा प्रतिज्ञाविरुद्धार्थं वदन्ति तादृशाः साक्षिणो भवन्ति तस्येत्यादिः शाब्दोऽर्थः । तत्फलितमाह * प्रतिज्ञामिति । सर्वथा यस्येत्यस्य प्रतिज्ञादावन्वयो न साक्षिण इत्यत्रेति तात्पर्यम् । अत एव द्वितीयान्ततया पदद्वयेन चोक्तिः ।

३। विशेषमाह * यत्रात्विति । * प्रतिज्ञार्थेति । तद्रूपस्यार्थस्येत्यर्थः । प्रतिज्ञातार्थस्येति पाठान्तरम् । आदिना मोहादिः । * तत्र, तादृशे स्थले । तस्येति पाठान्तरम् । *प्रमाणान्तरेणेति । प्रकृतसाक्षिभिन्नेनेत्यर्थः । अत्र हेतुमाह * न चेति । न वर्हीत्यर्थः । राज्ञेत्युपलक्षणमन्येषामपि । अत्र हेतुमाह * स्वभावोक्तमिति । यत इत्यादिः । मनुकात्यायनावाह * यथेति । * तेषां, साक्षिणाम् । अत्र हेतुमाह *यद्दोषेति । यतो दोषवर्जितमित्यर्थः । दोषविवर्जितमिति पाठेऽपि हेतुगर्भं विशेषणम् । अत एवाह * उक्तेत्विति । स्वभावोक्ते तु सतीत्यर्थः । दोषसम्भवादिति भावः ॥ ७९ ॥

३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि० अन्यथावादिनो यस्य ध्रुवस्तस्य पराजयः
इत्यस्यापवादमाह ।

या० उक्तेऽपि साक्षिभिः साक्ष्ये यद्यन्ये गुणवत्तमाः ।
द्विगुणा वाऽन्यथा ब्रूयुः कूटाः स्युः पूर्वसाक्षिणः ॥

मि० पूर्वोक्तलक्षणैः साक्षिभिः साक्ष्ये स्वामि- ये प्रतिज्ञातार्थवैपरीत्येनाभिहिते यद्यन्ये पूर्वेभ्यो गु- वत्तमाः द्विगुणा वा अन्यथा प्रतिज्ञातार्थानुगुण्येन क्ष्यं ब्रूयुस्तदा पूर्वे साक्षिणः कूटा मिथ्यावादिनो भवे-

नन्वेतदनुपपन्नम् । अर्थिप्रत्यर्थिसभ्यसभाप- भिः परीक्षितैः प्रमाणभूतैः साक्षिभिर्निगदिते प्र- णान्तरान्वेषणेऽनवस्थादोषप्रसङ्गात् ।

निर्णिक्ते व्यवहारे तु प्रमाणमफलं भवेत् ।
लिखितं साक्षिणो वापि पूर्वमावेदितं न चेत् ॥
यथा पक्केषु धान्येषु निष्फलाः प्रावृषो गुणाः ।
निर्णिक्तव्यवहाराणां प्रमाणमफलं तथा ॥
इति नारदवचनाच्च । अ. १ । ६२ । ६३ ।

उच्यते । यदाऽर्थी प्रतिज्ञातार्थस्यान्तरात्मस- त्वेनानाविष्कृतदोषाणामपि साक्षिणां वचनम- संवादित्वेनाप्रमाणं मन्यमानः साक्षिष्वपि दो- ल्पयति तदा प्रमाणान्तरान्वेषणं केन वार्यते । च, यस्य च दुष्टं करणं यत्र च मिथ्येति प्रत्य- एवासमीचीन इति । यथा चक्षुरादिकरणदोषा- वसायेऽप्यर्थाविसंवादात्तज्जनितस्य ज्ञानस्य अ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णयेन करणदोषकल्पना, तथेहापि। साक्षिपरीक्षातिरेकेण तद्वाक्यपरीक्षोपदेशाच्च।

साक्षिभिर्भाषितं वाक्यं सह सभ्यैः परीक्षयेत्।

इति।

कात्यायनेनाप्युक्तम्,

यदा शुद्धा क्रिया न्यायात्तदा तद्वाक्यशोधनम्।
शुद्धाच्च वाक्याद्यः शुद्धः स शुद्धोऽर्थ इति स्थितिः॥

इति। क्रिया साक्षिलक्षणा, नार्थसंबान्धिनो नाम्ना इति न्यायाद्यदा शुद्धा तदा तद्वाक्यशोधनं साक्षिवाक्यशोधनं कर्तव्यम्। वाक्यशुद्धिश्च सत्यार्थप्रतिपादनेन। सत्येन शुद्ध्यते वाक्यमिति स्मरणात्। एवं शुद्धायाः क्रियायाः शुद्धाच्च वाक्याद् यः शुद्धोऽवगतोऽर्थः स शुद्धः तथाभूत इति स्थितिः ईदृशी मर्यादा न्यायविदाम्। करणदोषबाधकप्रत्ययाभावे सति अवितथ एवार्थ इत्यर्थः।

ननु स्वयमर्थिना प्रमाणीकृतान् साक्षिणोऽतिक्रम्य कथं क्रियान्तरं प्रमाणीक्रियते। नैष दोषः।

यतः,

क्रियां बलवतीं मुक्त्वा दुर्बलां योऽवलम्बते।
स जयेऽवधृते सभ्यैः पुनस्तां नाप्नुयात्क्रियाम्॥

इति कात्यायनेन जयावधारणोत्तरकालं क्रियान्तरपरिग्रहनिषेधाद् जयावधारणात्प्राक् क्रियान्तरपरिग्रहो दर्शितः।

---

१ एतत्समानार्थकः– (ना० अ० २।३९)
शुद्धेषु साक्षिषु ततः पश्चात्साक्ष्यं विशोधयेत्। इत्यर्धो दृश्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नारदेनापि—

निर्णिक्ते व्यवहारे तु प्रमाणमफलं भवेत्।

इति वदता जयावधारणोत्तरकालमेव प्रमाणान्तरं निषिद्धं, न प्रागपि । तस्मादुक्तेऽपि साक्षिसाक्ष्ये अपरितुष्यता क्रियान्तरमङ्गीकर्तव्यमिति स्थितम् । एवं स्थिते यद्याभिहितवचनेभ्यः साक्षिभ्यो गुणवत्तमाः द्विगुणा वा पूर्वनिर्दिष्टा असन्निहिताः साक्षिणः सन्ति तदा ते एव प्रमाणीकर्तव्याः ।

स्वभावेनैव यद् ब्रूयुस्तद् ग्राह्यं व्यावहारिकम्

इत्यस्य सर्वव्यवहारशेषत्वात् । (मनु० ८।७८)

निर्णिक्ते व्यवहारे तु प्रमाणमफलं भवेत्।

लिखितं साक्षिणो वाऽपि पूर्वमावेदितं न चेत्

इति नारदवचनाच्च । पूर्वनिर्दिष्टानामसंभवे अनिर्दिष्टा अपि तथाविधा एव साक्षिणो ग्राह्याः दिव्यम् ।

संभवे साक्षिणां प्राज्ञो वर्जयेद्दैविकीं क्रियाम्

इति स्मरणात् । (ना० अ० २।२९)

तेषामसंभवे दिव्यं प्रमाणीकर्तव्यम् । अतः परितुष्यताऽप्यर्थिना न प्रमाणान्तरमन्वेषणीयम्, नुवचनादिति परिसमापनीयो व्यवहारः ।

यत्र तु प्रत्यर्थिनः स्वप्रत्ययविसंवादित्वेन साक्षिवचनस्याप्रामाण्यं मन्यमानस्य साक्षिषु दोषारोपणेनापरितोषस्तत्र प्रत्यर्थिनः क्रियोपन्यासावसराभावात्सप्ताहावधिकदैविकराजिकव्यसनोद्भवेन साक्षिपरीक्षणं कर्तव्यम् । तत्र च दोषावधारणे साक्षि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विवादास्पदीभूतमृणं दाप्याः। सारानुसारेण दण्डनीयाश्च। अथ दोषानवधारणं तदा प्रत्यर्थिना तावता संतोष्टव्यम्।

यथाह मनुः। (अ० ८ श्लो० १०८)

यस्य दृश्येत सप्ताहादुक्तवाक्यस्य साक्षिणः।
रोगोऽग्निर्ज्ञातिमरणमृणं दाप्यो दमं च सः॥इति।

एतच्च—

यस्योचुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेत्-

इत्यस्यापारितुष्यत्प्रत्यर्थिविषयेऽपवादो द्रष्टव्यः।

केचित्—उक्तेऽपि साक्षिभिः साक्ष्ये इत्येतद्वचनम्, अर्थिना निर्दिष्टेषु साक्षिषु अर्थ्यनुकूलमभिहितवत्सु यदि प्रत्यर्थी गुणवत्तमान् द्विगुणान्वाऽन्यान् साक्षिणः पूर्वोक्तविपरीतं संवादयति तदा पूर्वस्य वादिनः साक्षिणः कूटा इति व्याचक्षते। तदसत्। प्रत्यर्थिनः क्रियानुपपत्तेः।

तथाहि। अर्थी नाम साध्यस्यार्थस्य निर्देष्टा। तत्प्रतिपक्षः तदभाववादी प्रत्यर्थी। तत्राभावस्य भावसिद्धिसापेक्षसिद्धित्वाद्भावस्य चाभावनिरपेक्षसिद्धित्वाद्भावस्यैव साध्यत्वं युक्तम्। अभावस्य स्वरूपेण साक्ष्यादिप्रमेयत्वाभावात्। अतश्चार्थिन एव क्रिया युक्ता। अपि चोत्तरानुसारेण सर्वत्रैव क्रिया नियता स्मर्यते,

प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत्क्रियाम्।
मिथ्योक्तौ पूर्ववादी तु प्रतिपत्तौ न सा भवेत्॥इति।

न चैकस्मिन्व्यवहारे द्वयोः क्रिया।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न चैकस्मिन्विवादे तु क्रिया स्याद्वादिनोर्द्वयोः।

इति स्मरणात्। तस्मात्प्रतिवादिनः साक्षि गुणवत्तमा द्विगुणा वाऽन्यथा ब्रूयुरित्यनुपपन्नम्।

अथ मतम्– द्वावपि भावप्रतिज्ञावादिनौ मदीमिदं दायादप्राप्तं मदीयमिदं दायादप्राप्तमिति पूर्वपरकालविभागानाकलितमेव वदतः तत्र द्वयोः साक्षिषु सत्सु कस्य साक्षिणो ग्राह्या इत्याकाङ्क्षायां–

द्वयोर्विवदतोरर्थे द्वयोः सत्सु च साक्षिषु।
पूर्वपक्षो भवेद्यस्य भवेयुस्तस्य साक्षिणः॥

इति वचनेन (ना० व्य० प० १।१६३)

यः पूर्वं निवेदयति तस्य साक्षिणो ग्राह्या इति शि

तस्यायमपवाद, उक्तेऽपि साक्षिभिः सा इति। अतश्च पूर्वोत्तरयोर्वादिनोः समसंख्येषु स गुणेषु साक्षिषु सत्सु पूर्ववादिन एव साक्षिणः प्र व्याः। यदा तु उत्तरवादिनः साक्षिणो गुणवत्त द्विगुणा वा तदा प्रतिवादिनः साक्षिणः प्रष्टव्याः। च नाभावस्य साध्यता उभयोरपि भाववादित्वा चतुर्विधोत्तरविलक्षणत्वाच्च प्रकृतोदाहरणे न क्रिया वस्था। एकस्मिन्व्यवहारे यथैकस्यार्थिनः क्रिया परमते तथा वादिप्रतिवादिनोः क्रियाद्वयेऽप्यवि इति।

तदप्याचार्यो नानुमन्यते। उक्तेऽपि साक्षि साक्ष्ये इत्यतः शब्दादर्थात्प्रकरणाद्वाऽस्यार्थस्यान मात् इत्यलं प्रसङ्गेन ॥ ८० ॥

वा० १। पूर्वोक्तलक्षणैरित्यनेन साक्षिपरीक्षा उक्ता।आनी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तपस्वित्वादिगुणविशिष्टैरिति तदर्थः। स्वाभिप्रायविषये साक्ष्ये प्रतिज्ञातार्थवैपरीत्येनाभिहितेऽपीत्यन्वयः। यद्वा, अत्र साक्षी नामार्थी अभिमतार्थस्य सम्यक् ज्ञाता तस्य भावः साक्ष्यं तदेव स्वस्यार्थिनोऽभिप्रायस्तात्पर्यविषयः। एवं च साक्ष्यपदस्यैव व्याख्या स्वाभिप्राये इति यथाश्रुत एवान्वयः। यद्वा स्वाभिप्राये इत्यस्य व्याख्या * प्रतिज्ञातेति। पूर्वेभ्य इत्यस्य मध्यमणिन्यायेनान्वयः। अग्रेऽपि तथा। अर्थिनैव निर्दिष्टा इति भावः। * प्रतिज्ञातार्थानुगुण्येनेति। सत्यमेतदितीत्यर्थः। समासान्तराश्रमायाह * पूर्वे इति।

२। क्रमस्य विवक्षितत्वादाह * अर्थीति। परीक्षात एवाह * प्रमाणेति। प्रमाणभूत इतिवत्प्रयोगः। अत एव च्विर्न। * निगदिते, साक्ष्ये उक्ते। निगदे दत्ते इति पाठे सभ्यादिजनसमक्षमुच्चैर्निःसन्दिग्धं भाषणं निगदस्तस्मिन्दत्ते कृते सतीत्यर्थः। स्मृत्यन्तराविरोधमप्याह * निर्णिक्ते इति। शोधिते इत्यर्थः। * प्रमाणं, प्रमाणान्तरम्। तदेवाह * लिखितमिति। अपिना श्रुक्तिसमुच्चयः। तत्र विशेषमाह * पूर्वमिति। उक्तमेवार्थं दार्ढ्याय सदृष्टान्तमाह * यथेति। * पक्वेषु, पूर्णेषु पुष्टेषु। * प्रावृषइति। वर्षणरूपगुणा इत्यर्थः। निर्णिक्तव्यवहाराणामिति बहुव्रीहिः। * प्रमाणं, प्रमाणान्तरान्वेषणम्।

३। * अन्तरात्मेति। स्वात्मेत्यर्थः। बहुव्रीहिरयम्। विसंवादित्वे हेतुरयम्। * अनाविष्कृतेति। शास्त्रप्रकटितदोषशून्यानामपीत्यर्थः। प्रसिद्धदृष्टदोषराहितानामपीति यावत्। स्वोपन्यस्तानामपीति भावः। * अर्थविसंवादित्वेनेति। स्वार्थविरुद्धत्वेनेत्यर्थः। अपिना वचनसमुच्चयः। प्रतिज्ञातार्थस्य सत्यत्वेन स्वान्तःकरणेनासावर्थ एवमेवेति दृढतरप्रतीत्युत्पत्तेस्तदन्यथानु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पपत्त्या साक्षिष्वपि दोषः कल्प्यते, न दृष्टप्रसिद्धदोषस्तेषु
तथा च परिकल्पितदोषदुष्टत्वेन प्रमाणान्तरान्वेषणाद्युपपन्नमेव
अङ्गीकृते च प्रमाणान्तरे व्यवहारदर्शिभिरपि व्यवहारः प्रव
नीय एव। छलं निरस्य भूतेनेत्युक्तेरिति भावः। तथा च त
ऽपरितुष्यतोऽर्थिनोऽयं साक्ष्यन्तरान्वेषणोपदेश इति नानव
नापि स्मृत्यन्तरविरोध इति बोध्यम्।

४। ननु स्वप्रमित्या साक्षिष्वदृष्टदोषकल्पनं कथम्।अतो दृ
न्तमुखेनोपपादयति *उक्तं चेति। गौतमेनेति भावः। यस्य
संप्रत्ययस्य करणं चक्षुरादिकं दुष्टं काचकामलदोषयुक्तं, यत्र
इदं रजतमित्यादिज्ञानविषये नेदं रजतमित्यादिबाधकप्रत्य
स एव द्विविधः प्रत्ययो ज्ञानरूपोऽसमीचीन इति दृष्टान्तवा
र्थः। तं प्रकृते योजयति * यथेति। अनध्यवसायेऽपि का
कामलादिप्रसिद्धदोषाणामनिश्चयेऽपि, एवं सत्यापि अर्थस्य
क्तिरजतादेर्विसंवादादन्यथात्वात् तज्जनितस्येदं रजतमिति ज्ञा
स्याप्रामाण्येन चक्षुरादिगतदोषकल्पना यथा तथेहापि दा
न्तिकेऽपीत्यर्थः।

५। न केवलं युक्तितः प्रमाणान्तरान्वेषणसाधनम् अपि
वचनबलादपीत्याह * साक्षिपरीक्षेति। साक्षिपरीक्षोपदे
भेदेन तद्वाक्येत्याद्यर्थः। तमेवाह * साक्षिभिरिति।

उपस्थितान्परीक्षेत साक्षिणो नृपतिः स्वयम्।

इति अस्य नारदस्य पूर्वार्धम्। न केवलं साक्षिवचनमा
निर्णयोऽपि तु तद्वचनपरीक्षयाऽपि। तथा च तस्यां क्रियमा
यां यदि तद्वचनमबाधितं तदा तस्य प्रामाण्यम् अन्यथा तु
साक्षिष्वपि दोषकल्पना स्यादेवेति तत्परीक्षाविधिबलादम्य
अन्यथा तदानर्थक्यं स्यष्टमेवेति भावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

६। अन्यदप्याह * कात्यायनेनेति। स्फुटमितस्तदर्थाप्रतीतेः कात्यायनोक्तं व्याचष्टे * क्रियेत्यादि । क्रियेत्यस्य व्याख्या *साक्षीति । निषेधाविषयत्वमेव न्याय इति तं मनूक्तमेवाह *नार्थेति ।

इत्थं च मनुः, (अ० ८ । ६३ । ६४ । ६५ । ६६ । ६७)

सर्वधर्मविदोऽलुब्धा विपरीतांस्तु वर्जयेत् ॥
नार्थसंबन्धिनो नाप्ता न सहाया न वैरिणः ।
न दृष्टदोषाः कर्त्तव्या न व्याध्यार्त्ता न दूषिताः ॥
न साक्षी नृपतिः कार्यो न कारुककुशीलवौ ।
न श्रोत्रियो न लिङ्गस्थो न सङ्गेभ्यो विनिर्गतः ॥
नाध्यधीनो न वक्तव्यो न दस्युर्न विकर्मकृत् ।
न वृद्धो न शिशुर्नैको नान्त्यो न विकलेन्द्रियः ॥
नार्तो न मत्तो नोन्मत्तो न क्षुत्तृष्णोपपीडितः ।
न श्रमार्त्तो न कामार्त्तो न क्रुद्धो नापि तस्करः ॥ इति ।

आध्यधीनो बन्धके धृतः । * शुद्धेति । तद्दोषरहितेत्यर्थः । *वाक्यशुद्धिश्चेति । चस्त्वर्थे। उत्तरार्धार्थमाह *एवमिति। उक्तप्रकारेणेत्यर्थः । पूर्वार्द्धाविरोधाय न्यूनतानिरासाय च शुद्धाद्वाक्याच्चेत्यन्वयेन चसमुच्चेयमाह * शुद्धाया इति । *च वाक्यादिति । वाक्याच्चेत्यर्थः । * य इति । योऽर्थःशुद्धोऽवगतो निश्चित इत्यर्थः । * स शुद्ध इति । शुद्धपदस्य व्याख्या * तथाभूत इति।सत्य इत्यर्थः ।एवं तदुक्तेः शाब्दार्थमुक्त्वा प्रकृतसंगतये तात्पर्यार्थमाह * करणेति । करणदोषश्च बाधकप्रत्ययश्च तयोरभावे सति अर्थोऽवितथ एव सत्य एवेत्यर्थः । *इत्यर्थ इति । इति तात्पर्यार्थ इत्यर्थः । अत्र यदा शुद्धेति पूर्वार्द्धेन साक्षिलक्षणक्रियारूपकरणगतदोषाभाव उच्यते । शुद्धाच्चेत्युत्तरार्द्धेन तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बाधकप्रत्ययाभाव इति बोध्यम् ।

७। स्वयं, स्वयमेव।तथा च विरोधः स्पष्ट एव । *स दु सभ्यैस्तयैव क्रियया तस्य जयेऽवधृते निश्चिते सति स दु क्रियाऽवलम्बी पुनस्तां बलवतीं क्रियां नाप्नुयादित्यर्थः। उ कालमिति निषेधक्रियाविशेषणम् । *निषेधात्, तत्कथनात्। दर्शने हेतुः । कात्यायनः कर्त्ता ।

८। *नारदेनापीति। इति वदता नारदेनापीत्याद्यर्थः यान्तस्य निषिद्धमित्यत्रान्वयः । एवव्यवच्छेद्यमाह * न पीति । अपिनोत्तरसमुच्चयः। * उक्तेऽपीति । मूलतात्पर्या संहरति *तस्मादिति । *अपरितुष्यता, अर्थिना ।

९। विशेषमाह *एवं स्थिते इति। *असन्निहिताइति। साक्षिणो ऽसंनिहिताः सम्भवन्तीत्यर्थः। * ते एवेति। पू र्दिष्टा एवेत्यर्थः । एवेनाभिहितवचनानिरासः। ननु तेषामेव क्तो न प्रश्नो ऽतो मनुमाह * स्वभावेनैवेति । साक्षिणो व्य हारिकं व्यवहारागतं यत् वचनं स्वभावेनैव ब्रूयुस्तत् ग्राह्यमित्य

अस्योत्तरार्द्धम्, (अ० ८।७८)

अतो यदन्यत् विब्रूयुर्धर्मार्थं तदपार्थकम् । इति ।

साक्षिप्रकरणस्य व्यवहाराविशेषप्रकरणापाठादाह * व्यवहारेति। तथा चात्रापि व्यवहारः समापनीयः। तेन अ स्वीयप्रतिज्ञाया अन्यथाभावमज्ञात्वैव प्रथममेवान्येषामपि स त्वेन निर्दिष्टत्वात्स्वभावेनैव प्रकृते तेषां वचनस्य सत्वा भावः। नारदमपि साधकत्वेनाह * निर्णिक्ते इति । पूर्वा ततो व्यवहारशुद्धौ प्रमाणान्तरमफलं, तदशुद्धौ तु प्रमाण रम् । इदमपि गुणवत्तमादीनां पूर्वावेदनाभावे। तच्छुद्धत्वे व्यवहारशुद्धिप्राप्तावप्युक्तरीत्या तेषामप्रामाण्येन पूर्वमुभया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सामान्यलाभेन विशेषाणामसंभवेन तेनैव निर्वाह इति भावः ।

१०। *पूर्वनिर्दिष्टा इति सफलयन्विशेषान्तरमाह *पूर्वनिर्दिष्टानामिति । * तथाविधाः, ततो गुणवत्तमा द्विगुणा वा । एवव्यवच्छेद्यमाह *न दिव्यमिति । मनुमाह *सम्भवे इति । ततोऽपि विशेषमाह * तेषामिति । साक्षिणामित्यर्थः । * असम्भवे, भवेत् । अन्यथाऽनुपपत्त्येति भावः ।

११ पूर्वपक्षे उक्तमनवस्थारूपदोषमेवं सति प्राप्तं परिहरति *अतः परमिति ।

१२। स्वप्रत्ययबलादपरितुष्यता अर्थिना प्रमाणान्तरमङ्गीकार्यमित्युक्तं, नैवं प्रत्यर्थिन इति विशेषान्तरमाह *यत्र त्विति। मन्यमानस्येति प्रत्यार्थिविशेषणम् । *अवसरेति । प्रसङ्गेत्यर्थः । मिथ्या क्रिया पूर्ववादे इत्युक्तेरिति भावः । अवतारेति पाठान्तरम् । * व्यसनोद्भवेनेति । दुःखनिष्पत्त्येत्यर्थः । * कर्तव्यमिति । पूर्ववत्प्रमाणान्तरान्वेषणाभावेनागत्या प्रत्यर्थ्यपरितोषपरिपालनायेति भावः । * तत्र च, सप्तसु दिनेषु । तावतैव अगतेरिति भावः । सप्ताहादिति ल्यबलोपे पञ्चमी। सप्ताहमभिव्याप्येत्यर्थः। अर्वागित्यध्याहार इति तु मेधातिथिः। उक्तवाक्यस्येति बहुव्रीहिः । साक्षिविशेषणम् । रोगादेर्विकल्पो बोध्यः । * सः, साक्षी । रोगो ऽत्यन्तपीडाकरः। अग्निर्गेहधनदाहः । पुत्रदारादिप्रत्यासन्नमरणं ज्ञातिमरणम्। इदं च तस्य कूटसाक्षित्वे लिङ्गम् ।

१३। एवं सति प्रसक्तं मनुयाज्ञवल्क्ययोर्विरोधं परिहति * एतच्चेति । यस्य दृश्येतेत्येतन्मनूक्तं च यस्योचुरिति मूलस्यापवाद इत्यर्थः । कस्मिन्विषये इत्याशङ्कायामाह *अपरितुष्यदिति । एवेन विषयान्तरव्यवच्छेदः। साक्षिभिः वाद्यभिमते एव साक्ष्ये उक्ते यदि प्रत्यर्थी परितुष्यति तदा मूलवाक्योक्तः अ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्थिजयः प्रत्यर्थिपराजयः। तदा सप्ताहं साक्षिपरीक्षणाभावा यदा तु प्रत्यर्थिनो ऽपरितोषेण तत्परीक्षणावश्यकतया त साक्षिदोषावधारणेन ते दोषवन्तस्तदा यस्येति मनुवाक्येन वाक्यमपोद्यते इति प्रत्यर्थिनो जयोऽर्थिनः पराजय इति भा इदं च ऋणं गृहीत्वा याचनावस्थायां दत्तं नैव वा गृहीतमि क्त्वा विपरीतं धर्मस्थानं प्रविशति तद्विषयकं बोध्यम्।

१४।उक्तेऽपीति मूलवाक्यस्यैकदेशिव्याख्यानं दूषयितुमनुव *केचिदिति। व्याचक्षते इत्यत्रान्वयः।अस्य द्विकर्मकत्वादेकं *वचनमित्यन्तेन। द्वितीयमाह *अर्थिनेत्यादीतीत्यन्तेन। * नुकूलमिति। अर्थ्यर्थानुकूलमित्यर्थः। अर्थ्यनुकूलमिति पा सुगम एव। * विपरीतामिति। अर्थ्यर्थविपरीतं स्वानु इत्यर्थः। अत्र पक्षे मूले पूर्वसाक्षिण इत्यत्र षष्ठीतत्पुरुष ह * पूर्वस्येति। तदर्थमाह * वादिन इति।

१५। दूषयति *तदसदिति। *क्रियेति। क्रियाया एव पत्तेरित्यर्थः। सामान्योक्तां तां विविच्य दर्शयितुमादावर्थि र्थिस्वरूपं प्रागुक्तमपि दार्ढ्यायाह * तथाहीति। अर्थ्यते र्थः साध्यं तदस्यास्तीति व्युत्पत्तेराह * साध्यस्येति। प्र माह * तत्प्रतिपक्ष इति। * तदभावेति। साध्याभावेत्य ननु भवतु तदभाववादित्वं प्रत्यर्थिनः तथापि क्रियानु तस्य किमायातमत आह। *तत्राभावस्येति। तयोर्मध्ये इत्य अयम्भावः। न भावो ऽभाव इति व्युत्पत्त्या भावाधीनत्व वस्वरूपस्य, तथा अभाव इत्युक्ते कस्येत्याकाङ्क्षायां घटस्येत प्रयोगेण तस्य सप्रतियोगिकत्वात्प्रतियोगिभूतघटादिनि धीननिरूपणत्वं, प्रतियोग्यधिकरणाभ्यामभावो निरूप्यते अत एव तन्त्रान्तरे उक्तं, प्रध्वंसाभावस्यापि भावस्वरूपसि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्तरकालिकत्वमिति । सर्वथा भावसिद्धिसापेक्षसिद्धित्वमभावस्य । भावस्य त्वेतद्वैपरीत्यात्तच्छरीरे तदप्रवेशात्स्वातन्त्र्येण सिद्धिर्न त्वभावापेक्षया सिद्धिरिति अभावसिद्धिनिरपेक्षसिद्धिकत्वं भावस्य । एवं च सापेक्षनिरपेक्षसिद्धिकयोरभावभावयोर्मध्ये निरपेक्षसिद्धिकत्वेन भावस्यैव साध्यत्वं युक्तमिति । ननु अभावस्य सापेक्षसिद्धिकत्वेऽपि साध्यता कुतो नास्ति इत्यत आह * अभावस्येति । भावस्य साक्षात्साक्ष्यादिरूपप्रमाणप्रमेयत्वम् अभावस्य तु न साक्षात्, अपि तु भावद्वारा । तथा च साक्षात्प्रमेयस्यैव साध्यत्वं नातिभूयस्या परम्परया प्रमेयस्येति भावः। फलितमाह *अतश्चेति । एवं च प्रत्यर्थिनस्तदंनुपपत्तिस्तु सिद्धेति भावः ।

१६। वाचानिकोऽप्ययमर्थ इत्याह *अपिचेति। *सर्वत्रैव, न केवलमत्रैव । नन्वेवमपि व्यवहारभेदवदत्राप्युभयोरप्यत्र क्रिया आस्तामिति न दोषो ऽत आह *न चैकास्मिन्निति । नापीत्यर्थः । कातीयमाह * न चैकस्मिन्निति । दूषणमुपसंहरति * तस्मादिति ।

१७। पूर्वोक्तस्याशयान्तरवर्णनद्वारा तस्यार्थान्तरप्रतिपादकप्रागुक्तैकदेश्युक्तिमेव दूषयितुमनुवदति *अथ मतमिति । सामान्योक्तं विशिष्याह *मदीयमिति । तत्र कालविशेषोक्तौ तत एव निर्णयस्य प्रागुक्तरीत्या सम्भवादाह * पूर्वापरेति । प्राप्तौ तद्राहित्यमेवानाकलनम् । ननु एवमपि साक्षिभिस्तत्र निर्णयः स्यादत आह * तत्रेति । अत एवाह * कस्येति । नारदमाह *द्वयोरिति । व्याख्यातमिदं प्राक् । प्रतिज्ञायां कालानुक्तेराह * यः पूर्वं निवेदयतीति।प्राप्तिपूर्वत्वाज्ञानेऽपि निवेदनपूर्वत्वज्ञानेन तत्र निर्णय इति भावः । * स्थिते इति । सिद्धान्ते इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्यायमपवाद इत्युक्तं, तत्र क्वायमपवाद इत्याशङ्कामपाकुर्वन्
कल्प्यचेति न्यायेन परिशेषादपवादविषयं वक्तुमादावुत्सर्गवि
षयमाह * अतश्चेति । अस्य तदपवादत्वाच्चेत्यर्थः । समेत्या
दिना ऽपवादविषयता सूचिता । अपवादविषयमाह * यदा
त्तरेति । अयमेव प्रतिवादी । तथा चास्मिन्नेव विषये ऽपवाद
मिति भावः । एवं व्याख्याने प्रागुक्ताद्यदोषाभावमाह *
चेति । ईदृशविषयकत्वाङ्गीकारे चेत्यर्थः । ननु एवमपि पूर्वो
रयोर्वादिनोः साक्षिणां समत्वे पूर्ववादिनः साक्षिणः प्रष्ट
इत्याद्युक्त्या एकस्मिन्विवादे द्वयोः क्रियाप्रसङ्गलाभेन प्राङ्न्या
येति न चैकस्मिन्विवादे इति च कात्यायनविरोध इत्यग्रिमदो
षद्वयं तदवस्थमेव, अतआह * चतुर्विधोत्तरेति । चोऽन्ते
ज्यः । सत्यमिथ्याकारणप्राङ्न्यायोत्तरेष्वेव क्रियाव्यवस्था
दिप्रतिवादिनोर्द्वयोः क्रियाऽभावश्च, प्रकृतोदाहरणे तु द्वयोरपि
तिज्ञावादित्वेन तद्विलक्षणत्वान्न क्रियाव्यवस्था द्वयोः क्रिया
वश्चेति न द्वितीयतृतीयदोषाविति भावः । तृतीयदोषं प्रति
न्द्या युक्त्यन्तरेणापि खण्डयन्नाह * एकस्मिन्निति । स्थलविशे
प्रागुक्ते इत्यर्थः । * परमते, सिद्धान्तिमते । * तथेति ।
पक्षे इति शेषः । यथा सिद्धान्तिमते साक्षिभिः साक्ष्ये उक्ते
ति यत्र प्रतिज्ञातार्थस्यान्यथात्वेन स्वान्तःकरणप्रत्ययाभावा
माणान्तराङ्गीकरणम् एवमस्मिन्मतेऽपि वादिप्रतिवादिनोः
याद्वयम्, नारदवचने जाग्रत्यपि यथा स्वान्तः करणप्रत्ययविसं
दित्वेनोक्तरीत्या तत्र मते प्रमाणान्तराङ्गीकरणं तथाऽस्मिन्म
न चैकस्मिन्नितिकात्यायनवचने जाग्रत्यपि उक्तरीत्यैकत्र वि
दे तयोः क्रियाद्वयमिति भावः । इतिर्मतसमाप्तौ ।

१८। इदमपि दूषयति * तदपीति । * आचार्यः, विश्वरू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्थः।विश्वरूपविकटोक्तिविस्तृतिसंहारात्मकत्वेनास्य ग्रन्थस्य तदनुयायित्वात् । * इत्यतः शब्दादिति । अस्माद्वचनादित्यर्थः । एवं शाब्दत्वं निरस्य व्यङ्ग्यत्वं निराचष्टे * अर्थादिति । प्रयोजनादित्यर्थः । * प्रकरणं, वक्तृश्रोतृबुद्धिस्थता । किं च प्रकृतोदाहरणे ताभ्यां तथोक्तावपि साक्षिणां साम्येऽपि प्रागुक्तरीत्या कालादिनिश्चयद्वारा निर्णयसम्भवेन न तदर्थमस्योपयोगः । किं च नैकमुदाहरणमिति न्यायेन सामान्यशास्त्रप्रणयनानर्थक्यमिति तथैवोचितमिति दिक् । तदाह *इत्यलमिति ॥ ८० ॥

मि० कूटसाक्षिणो दर्शिताः, तेषां दण्डमाह ।

या० पृथक्पृथग्दण्डनीयाः कूटकृत् साक्षिणस्तथा ।
विवादाद् द्विगुणं दण्डं विवास्यो ब्राह्मणः स्मृतः ॥ ८१ ॥

मि० यो धनदानादिना कूटान् साक्षिणः करोतीति स कूटकृत् साक्षिणश्च ये तथा कूटाः ते विवादाद्विवादपराजये यो दण्डस्तत्र तत्रोक्तः तं दण्डं द्विगुणं पृथक्पृथक् एकैकशः दण्डनीयाः। ब्राह्मणस्तु विवास्यो राष्ट्रान्निर्वास्यो न दण्डनीयः । एतच्च लोभादिकारणविशेषापरिज्ञाने अनभ्यासे च द्रष्टव्यम् । लोभादिकारणविशेषपरिज्ञाने अभ्यासे च—

मनुनोक्तम्, (अ० ८ श्लो० १२०।१२१)

लोभात्सहस्रं दण्ड्यः स्यान्मोहात्पूर्वं तु साहसम् ।
भयात् द्वौ मध्यमौ दण्ड्यो मैत्र्या पूर्वं चतुर्गुणम् ॥
कामात् दशगुणं पूर्वं क्रोधात्तु त्रिगुणं परम् ।
अज्ञानाद् द्वे शते पूर्णे बालिश्याच्छतमेव तु ॥ इति ।

तत्र लोभोऽर्थलिप्सा । मोहो विपर्ययज्ञानम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भयं संत्रासः । मैत्री स्नेहातिशयः । कामः स्त्री तिकराभिलाषः । क्रोधोऽमर्षः । अज्ञानमस्फुटं ज्ञानं बालिश्यं ज्ञानानुत्पादः । सहस्रादिषु ताम्रिकाः प गृह्यन्ते ।

तथा, (मनु० अ० ८. श्लो० १२३.)

कौटसाक्ष्यं तु कुर्वाणांस्त्रीन्वर्णान्धार्मिको नृपः
प्रवासयेद्दण्डयित्वा ब्राह्मणं तु विवासयेत् ॥

एतच्चाभ्यासविषयम् । कुर्वाणानिति वर्तमान लनिर्देशात् । त्रीन्वर्णान् क्षत्रियादीन् पूर्वोक्तं द यित्वा प्रवासयेत् मारयेत् । अर्थशास्त्रे प्रवासशब्द मारणे प्रयोगात् । अस्य चार्थशास्त्रस्वरूपत्वात् त्रापि प्रवासनमोष्ठच्छेदनं जिह्वाच्छेदनं प्राणवियो च कौटसाक्ष्यविषयानुसारेण द्रष्टव्यम् ।

ब्राह्मणं तु दण्डयित्वा विवासयेत् स्वराष्ट्र ष्कासयेत् । यद्वा । वाससो विगतो विवासः वि ससं करोतीति णिचि कृते णाविष्ठवत्प्रातिपदि ति टिलोपे रूपम् । नग्नीकुर्यादित्यर्थः । अथवा । त्यस्मिन्निति वासो गृहं विवासयेत् भग्नगृहं कुर्या ति । ब्राह्मणस्यापि लोभादिकारणविशेषापरि अनभ्यासे च तत्र तत्रोक्तो दण्ड एव । अभ्यासे र्थदण्डो विवासनं च । तत्रापि जातिद्रव्यानुबन्ध पेक्षया विवासनं नग्नीकरणं गृहभङ्गो देशान्निर्वा चेति व्यवस्था द्रष्टव्या । लोभादिकारणविशेषा ज्ञाने अनभ्यासे चाल्पविषये कौटसाक्ष्ये ब्राह्मण पि क्षत्रियादिवदर्थदण्ड एव । महाविषये तु दे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्वासनमेव । अत्राप्यभ्यासे सर्वेषामेव मनूक्तं द्रष्टव्यम् । न च ब्राह्मणस्यार्थदण्डो नास्तीति मन्तव्यम् । अर्थदण्डाभावे शारीरदण्डे च निषिद्धे स्वल्पेऽप्यपराधे नग्नीकरणगृहभङ्गाङ्ककरणविप्रवासनं दण्डाभावो वा प्रसज्येत ।

चतुर्णामपि वर्णानां प्रायश्चित्तमकुर्वताम् ।
शारीरं धनसंयुक्तं दण्डं धर्म्यं प्रकल्पयेत् ॥

इति स्मरणाच्च । (मनु० ९।२३६)

तथा, (मनु० अ० ८ श्लो० ३७८)

सहस्रं ब्राह्मणो दण्ड्यो गुप्तां विप्रां बलाद् व्रजन् ।

इति स्मरणात् ।

यत्तु शङ्खवचनम्,

त्रयाणां वर्णानां धनापहारवधबन्धक्रिया विवासनाङ्ककरणं ब्राह्मणस्येति,

तत्र धनापहारः सर्वस्वापहारो विवक्षितो वधसाहचर्यात् ।

शारीरस्त्ववरोधादिर्जीवितान्तः प्रकीर्तितः ।
काकिण्यादिस्त्वर्थदण्डः सर्वस्वान्तस्तथैव च ॥ इति-

वधसर्वस्वहरणयोः सहपाठात् ॥ (ना० परि० ५४)

यदप्युक्तम्, (मनु० ८।३८० उ०)

राष्ट्रादेनं बहिः कुर्यात्समग्रधनमक्षतम् । इति,

तत् प्रकृतसाहसविषयं, न सर्वविषयम् । शारीरस्तु ब्राह्मणस्य न कदाचिद्भवति ।

(अ० ८ श्लो० ३८० पू०)

न जातु ब्राह्मणं हन्यात्सर्वपापेष्वपि स्थितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति सामान्येन मनुस्मरणात् ।

तथा, (मनु. अ. ८. श्लो. ३८१)

न ब्राह्मणवधाद्भूयानधर्मो विद्यते भुवि ।
तस्माद्स्य वधं राजा मनसाऽपि न चिन्तयेत्॥इति॥

बा० १। *दर्शिता इति । अनुपदमेवेति भावः। अन्येऽपि ऽन्यत्र स्पष्टाः। यद्यपि कूटकृतश्च ते साक्षिणश्चेति व्याख्यानं संभ तथापि तथेत्यस्यावैयर्थ्याय भेदेन व्याचष्टे *य इति। आदि सामादिपरिग्रहः। कूटान्साक्षिण इति पाठः । मिथ्याभूता तदर्थः। साक्षिण इति विशेष्यस्य प्रकरणाल्लाभः। अत ए * साक्षिणश्चेति । तथेत्यस्य व्याख्या *कूटा इति। *ते, क्ताः सर्वे । विवादादित्यस्य सांनिध्यात् द्विगुणमित्यत्रान तदास्पदद्रव्यादित्यर्थे तस्यानियमेन अनियतदण्डापत्तिः, स्वल्पत्वेन च बहुदण्डापत्तिः, अतोऽन्यथा व्याचष्टे * वि दिति। हेतौ पञ्चमी। पराजये तस्य लक्षणा। पूर्वत्रापि त सत्त्वेनात्राविशेषात्। दण्डे चान्वयः। तदाह *विवादपराजये सतीति शेषः। गर्गदण्डनन्यायेन समुदाये दण्डविश्रान्तिवा याह *पृथगिति। इदं द्वितीये सफलम्। दण्डं दण्डनीया धनपेषं पिनष्टीतिवत् प्रयोगः। लक्षणा वा।

२। तुर्यपादार्थमाह * ब्राह्मणास्त्विति। तुर्वैलक्षण्ये। निर्व बहिष्कारः। अत एव विवासव्यतिरेकमाह। *न दण्ड्य उक्तदण्डविषयो नेत्यर्थः।

३। मन्वविरोधाय संकोचेन विषयविशेषपरत्वमाद्यार्ध

१ पृथक् पृथक् दण्डनीया इति कथनं द्वितीये साक्षिविषयार्थकम्। तेषां बहुत्वात्। न तु श्लोके प्रथमोक्ते कूटकृति। त्वात् इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह * एतच्चेति। पादत्रयोक्तं चेत्यर्थः। तत्र आद्ये आह *लोभादिति। दण्ड्य इत्यस्याग्रे ऽनुषङ्गः। *पूर्वं तु साहसं, सार्द्धपणशतद्वयम्। भयात् द्वौ मध्यमौ दण्ड्य इति पाठः। साहसावित्यर्थः। पणसहस्रमिति यावत्। भयाद्वै मध्यमो दण्ड्या इति त्वपपाठः। असम्बद्धत्वात्। * पूर्वं, पूर्वसाहसम्। *चतुर्गुणं, पणसहस्रम्। एवमग्रेऽपि। *परम्, उत्तमसाहसम्। *त्रिगुणम्, पणसहस्रत्रयम्। पूर्वापेक्षया परो मध्यमसाहसस्तस्मिन् त्रिगुणे पञ्चदश शतानि संपद्यन्ते इति कल्पतरुः। पौनरुक्त्याभावाय हेतून् व्याचष्टे *लोभ इत्यादि। मैत्र्या इति पाठ इत्याह * मैत्रीति। मैत्र्यादिति पाठान्तरम्। ष्यञन्तो ऽञन्तश्चायम्। व्यतिकरः संबन्धः। नञो ऽल्पार्थत्वेनाह *अस्फुटमिति। एतेन व्यवहारकाले एव विपरीतं ज्ञानमिति कल्पतरूक्तमपास्तम्। मोहेन पौनरुक्त्यापत्तेः। *बालिश्यं ज्ञानेति। तदुत्पत्तिप्रागभाव इत्यर्थः। बालिश्यमत्राप्राप्तमात्रयौवनत्वं न बाल्यम्। तस्य साक्ष्यनिषेधादिति मेधातिथिकल्पतर्वादयः। पूर्वाध्यायान्तोक्तावष्टम्भेनाह *सहस्रादिष्विति। तथा च पणानां सहस्रमित्याद्यन्वयः।

४। एवं लोभादिकारणविशेषपरिज्ञाने दण्डमुक्त्वा कौटसाक्ष्याभ्यासे दण्डविशेषं तदुक्तमेवाह *तथेति। शब्दतस्तद्विषयत्वाप्रतीतेस्तत् स्पष्टयति * एतच्चाभ्यासेति। यद्यपि सकृदपराधे पूर्वमुक्तत्वात् अर्थादेवेदमभ्यासविषयं दण्डाधिक्योक्त्या परिशिष्यते, तथापि शाब्दत्वमप्यस्येति सूचनायाह *कुर्वाणानितीति। वर्त्तमानार्थकलट्स्थानिकशानजादिनिर्देशादित्यर्थः। अयंभावः। अनभ्यासे एकदैव कृतत्वेन भूतार्थकक्तवत्वन्तेन कृतवत इति निर्देष्टव्ये वर्त्तमानार्थकलट्स्थानिकशानजन्तेन कुर्वाणानित्युक्त्या क्रियायाः प्रारब्धापरिसमाप्तत्वरूपवर्त्तमानत्वेन पुनः पुनः कौट-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साक्ष्याभिधानस्यापरिसमाप्तत्वाद्वर्त्तमानत्वमेव तस्येत्यभ्यासवि यत्वस्यैवास्य सूचनादिति । अत्र यतः कौटसाक्ष्यं तत एव पुनरभिधानं न तु पुनःपुनः प्रश्नपूर्वकमिति न पूर्वविरोध बोध्यम् ।

५। इदं व्याचष्टे विशेषं वक्तुं *त्रीन्वर्णानिति । ब्राह्मण दण्डान्तरविधानादाह * क्षत्रियादीनिति । दण्डस्यात्रानुक्त दाह * पूर्वोक्तमिति ।

एतानाहुः कौटसाक्ष्ये प्रोक्तान्दण्डान्मनीषिभिः ।
धर्मस्याव्यभिचारार्थमधर्मनियमाय च ॥

इतिश्लोकमात्रव्यवहितेन लोभादित्यादिनोक्तमित्यर्थः । तु प्रवासयेदित्यस्य कथमयमुक्तोऽर्थोऽत आह * अर्थ *प्रवासेति । उपसर्गान्तरासंसृष्टस्येत्यर्थः । अतः—

सचिह्नं ब्राह्मणं कृत्वा स्वराष्ट्राद्विप्रवासयेत्–(याज्ञ०२।

इतिस्तेयप्रकरणस्थमूलविरोधो नेति बोध्यम् । न धर्मशास्त्रत्वेन कथं तथा, अत आह *अस्य चेति । कौटसाक्ष्य वचनस्येत्यर्थः । एतदन्तर्गतमपि तदस्तीति प्राक् प्रतिपादि

६। मारणमेव केवलं सर्वत्र नार्थः किं त्वन्योऽपीति नेकविधत्वमाह * तत्रापीति । अर्थशास्त्रेऽपीत्यर्थः । *कौ क्ष्यविषयेति । तद्भेदेनेत्यर्थः ।

७। एतच्चतुर्थपादार्थमाह *ब्राह्मणं त्विति । विवासन लेऽप्युक्तत्वेनाभ्यासे आधिक्यस्यापेक्षितत्वेन मध्यपाति यित्वेत्यस्य मध्यमाणिन्यायेनान्वयादाह * दण्डयित्वेति ।

८। अर्थान्तरमाह *यद्वेति । एवमग्रेऽपि । बहुव्रीहिल त्तत्पुरुषमाह । *वासस इति । *वासो गृहमिति । हलश्चे करणे घञ् । अग्रे प्रक्रिया पूर्ववत् । इतिः मन्वर्थसमाप्तौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

९। ननु मूलेन विवासनस्य तस्योक्तत्वेन ब्राह्मणस्य किं सर्वत्र साक्ष्यविषये विवासनमेव नार्थदण्ड इति चेन्न, सोऽपि हि अस्तीत्याह * ब्राह्मणस्यापीति। प्रकृतमूलविषयत्वाभावादाह * तत्र तत्रोक्त इति। * अभ्यासे त्विति। लोभादिकारणविशेषपरिज्ञाने इत्यादिः। अत्रापि एतदविषयत्वादव्यवहितमनूक्तमाह *अर्थदण्डो विवासनंचेति। तदुक्तार्थदण्ड इत्यर्थः।

१०। अत एव विशेषं प्रागुक्तमेवाव्यवस्थया व्यवस्थितमाह *तत्रापीति। विवासनांशेऽपीत्यर्थः। अनुबन्धो गुणः। नग्नीकरणमिति पाठः।

११। एवं तत्परिज्ञाने उक्त्वा तदपरिज्ञाने आह *लोभादीति। अत्र कस्यापि प्रागुक्तस्याप्राप्तेर्विशिष्यानुक्तत्वाच्चाह * क्षत्रियादिवदिति। एवेन मूलोक्तविवासननिरासः। विषयस्याल्पत्वात्तद्दण्डस्य महत्त्वात्।

१२। नन्वेवं मूलतुर्यपादस्य निर्विषयतापत्तिरत आह *महाविषयेत्विति। उक्तानिमित्ते एवेति भावः। विषयभेदमात्रम् अन्यत्सर्वं प्राग्वत्। *निर्वासनमेवेति। मूलेन तस्यैवोक्तत्वात्। मनूक्ताविषयत्वात्। विशिष्य दण्डानुक्तत्वात् सामान्योक्तस्यानेन बाधाच्चेति भावः। एवेनार्थदण्डनिरासस्तथासतीति तात्पर्यम्।

१३। *अत्रापीति। लोभादिकारणविशेषापरिज्ञाने महाविषयेऽपीत्यर्थः। *सर्वेषां, ब्राह्मणादीनाम्। एवेन दण्डांशे वैलक्षण्यनिरासः। अन्याविषयत्वादाह * मनूक्तमिति। कौटसाक्ष्यमित्यनेनोक्तमित्यर्थः। यद्वा। मनूक्तत्वेन साम्यादुभयांशेऽप्यवैलक्षण्यं बोध्यम्। यद्वा एवो व्युत्क्रमे। मनूक्तमेवेत्यर्थः। अन्याविषयकत्वसूचक एवकार इति बोध्यम्।

१४। न चेति। समग्रधनमक्षतमित्याद्युक्तेर्विध्यनुपलम्भाच्चेति भा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वः। तथा च मानवे दण्डयित्वेति पूर्वान्वय्येवेति बोध्यम्। तत्र
दौ युक्तिमाह *अर्थदण्डाभावे इति। यत इत्यादिः। *नि
इति। न शारीरो ब्राह्मणस्य दण्ड इति गौतमादिनेति भावः।
मूलस्य मनुतुल्यार्थकत्वेन तत्प्राप्तमाह * नग्नीकरणेति। अ
त्राङ्कनस्याप्युक्तत्वादाह *अङ्ककरणेति। समाहारद्वंद्वः। एतद
तममित्यर्थः। ननु दण्डस्य महत्त्वेनापराधस्याल्पत्वेन वैषम्ये
योग्यतया कथमेतत्प्रसक्तिरत आह *दण्डाभावो वेति। अन्यद
स्यानुक्तत्वात्। न चेदं युक्तं, दण्ड्यादण्डने राज्ञो दोषस्यो
त्वात्। अधर्मवृद्ध्यापत्तेश्चेति भावः।

१५। ननु धिग्दण्डवाग्दण्डावुक्तावेवेति तौ यथासंभवं तत्र
विष्यतोऽत आह * चतुर्णामिति। मनूक्तिरियम्। अत्र शा
मिति क्षत्रियादिपरम्। धनसंयुक्तमिति साधारणम् इति भा
धर्मादनपेतं धर्म्यम्।

१६। ननु—

ब्रह्महा च सुरापश्च स्तेयी च गुरुतल्पगः।
एते सर्वे पृथक् ज्ञेया महापातकिनो नराः॥
चतुर्णामपि चैतेषां प्रायश्चित्तमुकुर्वताम्।

शारीरमित्यादिः तत्र पाठो दृश्यते। एवं चाब्राणपर
ऽप्युपपत्तिरस्य। अत एव शारीरं धनसंयुक्तमित्यस्य स्वरस
गतिः। तस्य च दश स्थानानि उपस्थमुदरमित्यादिनोक्तमि
इति नेदं साधकम्। अत एव—

यमस्मृतिरपि,

सर्वेषामेव वर्णानामन्योन्यस्यापराधिनाम्।
शारीरं कारयेदिति। तादृशानां क्षत्रियादिवर्णानां सर्वे
ब्रह्महननादिष्वित्याद्यर्थः। अधिकरणस्य संबन्धित्वेन वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या षष्ठी । एवोऽप्यर्थे । अत आह *सहस्रमिति । स्त्रीसंग्रहप्रकरणे मनूक्तिरियं च । *स्मरणादिति । स्मरणाच्चेत्यर्थः । आदौ तथेति पाठे ऽत्रापपाठः ।

१७। नन्वेवं शङ्खविरोधः।तत्र त्रयाणां क्षत्रादीनां धनापहारादित्रयमुक्त्वा ब्राह्मणस्य विवासनाङ्ककरणयोरेवोक्तत्वात् । तथा च स्थलेविशेषे तथा सत्त्वेऽपि सामान्येनार्थदण्डस्तस्य नैव युक्तोऽत आह * यत्तु शङ्खेति । *त्रयाणां, क्षत्रियादीनाम् । *धनापहारेति । वधश्च बन्धक्रिया च ते।धनापहारश्च ते च ता इत्यर्थः। विवासनेति समाहारे द्वंद्वः । * सर्वस्वेति । तथा च तथोक्त्या ब्राह्मणस्य सर्वस्वहरणं तात्पर्यतो निषिध्यते, नार्थदण्डमात्रमिति भावः । ननु प्रकृते वधशब्दसान्निध्येऽपि सर्वस्वहरणस्य तत्साहचर्यस्यान्यत्रादृष्टत्वात् प्रकृते तत्सहपाठमात्रेण कथं तस्य तत्परत्वमत आह * शारीरस्त्विवाति । मानवमेवेदम् । *जीवितान्तः, तद्ग्रहणान्तः । एवमग्रेऽपि । प्रकीर्त्तित इत्यस्योभयान्वयो मध्यमणिन्यायेन । तथा च अर्थदण्डस्तु तदादिस्तदन्तः प्रकीर्तितः । * च, किञ्चायं * तथैव, तत्सदृश एवेत्यर्थः ।

१८। मनुविरोधं परिहरति * यदप्युक्तमिति । *प्रकृतेति । स्त्रीसङ्ग्रहणाख्यप्रक्रान्तसाहसविषयकमित्यर्थः । प्रकरणादेवेति भावः ।

१९। ननु सहपाठेन तथा साधनवत् शारीरस्यापि ब्राह्मणस्य प्राप्तिः स्यादत आह * शारीरास्त्विवाति । * कदाचित्, कदाचिदपि । राष्ट्रादित्यस्य प्राचीनं मानवमाह * न जात्विति । सर्वपापेषु स्थितमपि ब्राह्मणं कदाचिदपि न हन्यादित्यर्थः । *सामान्येनेति । पातकसामान्येनेत्यर्थः ।

२०। अक्षतमित्यग्रिममपि मानवं हेत्वन्तरतया आह *तथेति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समुच्चयेऽयम्। * भूयान्, अधिकः।* इतीति। सामान्येन स्मरणादित्यस्यानुषङ्गः। प्रपञ्चितमिदं प्राक् तत एव बोध्यम्।

मि० अपिच।

या० यः साक्ष्यं श्रावितोऽन्येभ्यो निह्नुते तत् तमोवृतः।
स दाप्योऽष्टगुणं दण्डं ब्राह्मणं तु विवासयेत्॥ ८१

मि० यस्तु साक्षित्वमङ्गीकृत्यान्यैः साक्षिभिः साक्ष्यं श्रावितः सन् निगदकाले तमोवृतो रागाद्याक्रान्तचित्तः तत् साक्ष्यम् अन्येभ्यः साक्षिभ्यो निह्नुते नाहमत्र साक्षी भवामीति,

स विवादपराजये यो दण्डस्तं दण्डमष्टगुणं दाप्यः। ब्राह्मणं पुनरष्टगुणद्रव्यदण्डदानासमर्थं विवासयेत्। विवासनं च नग्नीकरणगृहभङ्गदेशनिर्वासनलक्षणं विषयानुसारेण द्रष्टव्यम्। इतरेषां त्वष्टगुणद्रव्यदण्डासंभवे स्वजात्युचितकर्मकरणनिगडबन्धनकारागृहप्रवेशादि द्रष्टव्यम्।

एतच्च पूर्वश्लोकेऽप्यनुसर्तव्यम्। यदा सर्वे साक्ष्यं निह्नुवते तदा सर्वे समानदोषाः। यदा तु साक्ष्यमुक्त्वा पुनरन्यथा वदन्ति तदाऽनुबन्धाद्यपेक्षया दण्ड्याः।

यथाह कात्यायनः,
उक्त्वाऽन्यथा ब्रुवाणाश्च दण्ड्याः स्युर्वाक्छलान्विताः
इति।

न चान्येनोक्ताः साक्षिणोऽन्येन रहस्यनुसर्तव्याः।
यथाह नारदः, (व्य० प० १। १६५)
न परेण समुद्दिष्टमुपेयात्साक्षिणं रहः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भेदयेन्नैव चान्येन हीयेतैवं समाचरन्॥इति॥८२॥

बा० १।*अपिचेति ।साक्षिणामुक्तदोषान्यदोषे दण्डान्तरमाहेत्यर्थः। अत एव तुरुक्तवैलक्षण्ये।न ददातीतिप्रागुक्तमूलापौनरुक्त्यायाह* अङ्गीकृत्येति । ल्यबन्तस्य निह्नुते इत्यत्रान्वयः । अन्यैरित्यादेरुत्तरेणान्वयः । * साक्ष्यमिति । यदित्यादिः । *निगदकाले, भाषणकाले। इदमर्थलब्धम् । तेषां तमःकार्यत्वादाह * रागादीति। हेतुगर्भविशेषणमिदम् । तदित्यस्यार्थं प्रक्रान्तत्वादाह * साक्ष्यमिति । प्रकृतत्वादेवान्यशब्दार्थमाह * साक्षिभ्य इति । निह्नवमेवाह * नाहमिति । विवादादित्यस्योक्तार्थकस्यानुवृत्तेराह * विवादेति । ननु यः स इति सामान्योक्त्या पादत्रयोक्तदण्डस्य सर्ववर्णविषयत्वं सकृदपराधे नाभ्यासे, तद्गमकाभावात्। तमोवृत इति हेतूक्त्या तत्रापि लोभादिकारणसामान्यपरिज्ञानविषयत्वेऽपि न तद्विशेषपरिज्ञानविषयत्वम् । गमकाभावात्। एवं साक्ष्याङ्गीकारादिपूर्वकानिह्नवदोषस्य पूर्वत आधिक्येन द्विगुणदण्डादष्टगुणदण्डोक्तावपि तद्वदस्याप्यर्थलोभादिविषयत्वं न महाविषयत्वम् । एवं सति अत्र तुर्यपादेन सामान्यप्राप्ताष्टगुणदण्डापवादेन विप्रस्य कथं विवासनाविधिः । न हि पूर्वदण्डोऽपि महाविषयक एवेति वक्तुं शक्यम् । तत्र विवासनस्यैव व्यवस्थापितत्वात् अत आह * ब्राह्मणमिति ।

२। त्वर्थमाह * पुनरिति। स्वल्पे ऽपराधे बहुदण्डस्यायोग्यत्वात् ब्राह्मणेऽर्थदण्डस्यानुपदमेव व्यवस्थापितत्वादाह * अष्टगुणेति । अयं भावः। यद्यपि सामान्येनार्थदण्ड उपदिष्टो योगिना तथापि तद्दानसमर्थं प्रत्येवायमुपदेशो नासमर्थं प्रतीत्यवश्यं वक्तव्यम्।अन्यथा मुनेर्भ्रान्तत्वापत्तिः।तथाच ब्राह्मणस्यापि तत्सामर्थ्ये तद्विषयेऽयमेव मुख्यः। एतदसम्भवेऽनुकल्पो विवासनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतद्वैलक्षण्यसूचक एव तुः । सर्वथा तस्य शारीरदण्डाभा
सेवादिनिषेधेन च अनुकल्पान्तरस्यासम्भवात् सर्वथा दण्डा
राज्ञो दोषश्रवणात् प्रागुक्तविवासनमेव तस्यानुकल्प इति।
प्रधानक्रियानिरूपितवैलक्षण्यसूचकतुशब्दविरोधात् अष्टगुण
दि चिन्त्यमिति वीरमित्रोदयोक्तमपास्तम् ।

३। पुनः स्पष्टार्थमाह * विवासनं चेति । एतत्त्रितयस्य
मित्यर्थः ।

४। नन्वेवं क्षत्रादेरपि तदसम्भवेऽनुकल्पो वाच्योऽन्य
चानुक्तत्वात्, अतः प्रागुक्तरीत्या न्यूनतां निराचष्टे *
त्विति । क्षत्रियादीनामित्यर्थः ।

५। सिंहावलोकनन्यायेन तत्रापि न्यूनतां निराचष्टे * एतं
विप्रस्य दण्डदानासमर्थस्य विवासनं क्षत्रादीनां तदसम
कर्मकरणादीति यदुक्तं तदित्यर्थः ।

६। य इत्याद्युक्तेरेकस्यैवेदम् इति भ्रमनिरासायाह * यदेति।
मानेति। प्रागुक्तरीत्या पृथक् पृथक् दण्ड्या इत्यर्थः। तथा च
सुपलक्षणं, ग्रहं संमार्ष्टीतिवत् उद्देश्यविशेषणमेकत्वमवि
वेति न न्यूनतेति भावः ।

७। विशेषमाह *यदात्विति । *तदाऽनुबन्धेति । जाति
गुणाद्यपेक्षयेत्यर्थः । *उक्त्वेति । उक्तेति पाठे समस्तम्
हेतुमाह * वागिति । वाचश्छलमन्यथात्वं तदन्विता इत्य

८। विशेषान्तरमाह *न चेति । नापीत्यर्थः । प्रकार
मपि न कार्यमित्याह * भेदयेदिति । स्वयं रहसि अग
अन्यद्वारा भेदोऽपि न कारणीय इत्यर्थः । अत एव च
मूले रह इत्यव्ययम् । एतत्फलमाह * हीयेतैवमिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि० साक्षिणामवचनमसत्यवचनं च सर्वत्र प्रतिषिद्धं, तदपवादार्थमाह ।

या० वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेत् ।

मि० यत्र वर्णिनां शूद्रविट्क्षत्रविप्राणां सत्यवचनेन वधः संभाव्यते तत्र साक्ष्यनृतं वदेत्, सत्यं न वदेत् । अनेन च सत्यवचनप्रतिषेधेन साक्षिणः पूर्वप्रतिषिद्धमसत्यवचनमवचनं चाभ्यनुज्ञायते। यत्र शङ्काभियोगादौ सत्यवचने वर्णिनो वधोऽनृतवचने न कस्यापि वधस्तत्रानृतवचनमभ्यनुज्ञायते । यत्र तु सत्यवचनेऽर्थिप्रत्यर्थिनोरन्यतरस्य वधोऽसत्यवचने चान्यतरस्य वधस्तत्र तूष्णींभावाभ्यनुज्ञा, राजा यद्यनुमन्यते। अथ राजा कथमप्यकथने न मुञ्चति तदा भेदात् असाक्षित्वं कर्तव्यम् । तस्याप्यसंभवे सत्यमेव वदितव्यम् । असत्यवचनेन वर्णिवधदोषोऽसत्यवचनदोषश्च । सत्यवचने तु वर्णिवधदोष एव । तत्र च यथाशास्त्रं प्रायश्चित्तं कर्तव्यम् ।

मि० तर्ह्यसत्यवचने तूष्णींभावे च शास्त्राभ्यनुज्ञया प्रत्यवायाभाव इत्यत आह ।

या० तत्पावनाय निर्वाप्यश्चरुः सारस्वतो द्विजैः ॥८३॥

मि० तत्पावनाय अनृतवचनावचननिमित्तप्रत्यवायपरिहाराय सारस्वतश्चरुर्द्विजैरेकैकशो निर्वाप्यः कर्तव्यः । सरस्वती देवता अस्येति सारस्वतः । अनवस्रावितान्तरूष्मपक्वौदने चरुशब्दः प्रसिद्धः ।

इहायमभिसन्धिः । साक्षिणामनृतवचनमवचनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च यन्निषिद्धं तदिहाभ्यनुज्ञातम्। यत्तु नानृतं वदे

अब्रुवन्विब्रुवन्वापि नरो भवति किल्बिषी।

इति च सामान्येनानृतवचनमवचनं च निषिद्ध
दातिक्रमनिमित्तमिदं प्रायश्चित्तम्। न च मन्तव्यम्
क्षिणामनृतवचनावचनाभ्यनुज्ञानेऽपि साधारणा
वचनावचनप्रतिषेधातिक्रमनिमित्तप्रत्यवायस्य ता
स्थ्यात् अनृतवचनावचनाभ्यनुज्ञावचनमनर्थकमि

यतः साक्ष्यनृतवचनावचनयोर्भूयान्प्रत्यवायः
धारणानृतवचनावचनयोरल्पीयान्, इत्यर्थवद
ज्ञावचनम्। यद्यपि भूयसः प्रत्यवायस्य निवृत्त्या
नुषङ्गिकस्याल्पीयसः प्रत्यवायस्य निवृत्तिरन्यत्र
थापीहाभ्यनुज्ञावचनात्प्रायश्चित्तविधानाच्च भू
निवृत्त्याऽल्पीयानप्यानुषङ्गिकोऽपि प्रत्यवायो न
र्तते इति गम्यते। एतदेवान्यत्र प्रश्नेषु वर्णिवध
ङ्कायां पान्थादीनामनृतवचनावचनाभ्यनुज्ञानं वे
व्यम्। न च तत्र प्रायश्चित्तमस्ति। प्रतिषेधान्तरा
वात्। निमित्तान्तरेण कालान्तरेऽर्थतत्त्वावगमे
साक्षिणामन्येषां च दण्डाभावोऽस्मादेव वचना
गम्यते इति ॥ ८३ ॥

इति साक्षिप्रकरणम् ॥

बा० १। उपस्थितेरुक्तव्युत्क्रमेणाह * अवचनमिति।
व्यवहारे। पूर्वोक्तमूलाभ्यामिति भावः। अग्रे एकस्यैवोत
दाह * तदपवादार्थमिति। अन्यथा ऽपवादमित्येव ब्रूयात
र्णशब्दस्य धर्मपरत्वस्यापि सत्त्वादाह * वर्णिनामिति।
न्तराभ्रमायाह * शूद्रेति। अत्र प्रातिलोम्येन कथनं हीन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(७) न्यायरत्नमाला-श्रीपार्थसारथिमिश्र वि० सं० (मीमांसा २

(८) ब्रह्मसूत्रभाष्यम्-बादरायणप्रणीत-वेदान्तसूत्रस्य यतीन्द्र श्रीमद्विज्ञान-भिक्षुकृत व्याख्यानम् । सम्पूर्णम् । (वेदान्तः) ६

(९) स्याद्वादमञ्जरी-मल्लिषेणानिर्मिता सम्पूर्णा । (जैनदर्शनम्) २

(१०) सिद्धित्रयम्-विशिष्टाद्वैत-ब्रह्मनिरूपण-परम्-श्रीभाष्यकृतां परमगुरुभिः श्री ६ श्रीयामुनमुनिभिर्विरचितम् । सम्पूर्णम् (वेदान्तः) १

(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टा-रकाचार्यसंगृहीतः। आचार्यचित्सुख-मुनिविरचितव्याख्योपेतः (वेदान्तः) ४

(१२) विभक्त्यर्थनिर्णयःन्यायानुसारिप्रथमादि-सप्तविभक्तिविस्तृतविचाररूपः म० म० श्रीगिरिधरोपाध्यायरचितः। सम्पूर्णः (न्यायः) ५

(१३) विधिरसायनम् । श्रीअप्पयदीक्षितकृतम् । सं० (मीमांसा) २

(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्ट-सोमेश्वरविरचिता । (मीमांसा) १६

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता । (वेदान्तः) २

(१६) मीमांसाबालप्रकाशः (जैमिनीयद्वादशा-ऽध्यायार्थसंग्रहः) श्रीभट्टनारायणात्मज-भट्टशङ्करविरचितः । (मीमांसा) २

(१७) प्रकरणपञ्चिका (प्रभाकरमतानुसारि-मीमांसादर्शनम्) महामहो-पाध्यायश्रीशालिकनाथमिश्रविरचितं, श्रीशङ्करभट्टकृतो मीमांसा-सारसंग्रहश्च सम्पूर्णः (मीमांसा) ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीसदानन्दव्यासप्रणीत-स्तत्कृतव्याख्यासमलङ्कृतश्च । (वेदान्त) ३

(१९) कात्यायनश्रौतसूत्रम् । महामहोपाध्यायश्रीकर्का-चार्यविरचितभाष्यसहितम् । १३

(२०) ब्रह्मसूत्रभाष्यम् । श्रीभास्कराचार्यविरचितम् (वेदान्तः) १

(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम् । आनन्दपूर्ण-विरचितया खण्डनफक्किकाविभजनाख्यया व्या-ख्यया (विद्यासागरी) ति प्रसिद्धया समेतम्। (वेदान्तः) १३

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता । १

(२३) श्रीलक्ष्मीसहस्रम्-बालबोधिनीव्याख्यया-ऽवतरणिकया च सहितम् । ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२४ ब्रह्मसूत्रवृत्तिः मरीचिका श्रीव्रजनाथभट्टकृता (वेदान्त)
२५ क्रोडपत्रसंग्रहः । अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्र
त्यक्षानुमानगादाधर्योः प्रत्यक्षानुमानमाथुर्यो व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य
शक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि : (न्यायः)
२६ ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम् । श्रीसुन्दरभट्टरचितसिद्धान्तसेतुकाऽभिधटीकासहितश्रीदेवाचार्य
प्रणीतसिद्धान्तजाह्नवीयुतम्
२७ षड्दर्शनसमुच्चयः । बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शन संक्षेपः । मणिभद्र
टीकया सहितः । हरिभद्रसूरिकृतः ।
२८ शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः । प्रमेयरत्नार्णवश्च
२९ अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्याजागदीशी टीका ।
३० वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा संस्कारप्रकाशात्मकः ।
३१ वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः
३२ स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरत्रिपाठिसंकलितः ।
३३ वेदान्तरत्नमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्यकृता ।
३४ प्रस्थानरत्नाकरः । गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितः
३५ वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम् ।
३६ योगदर्शनम् । परमहंसपरिव्राजकाचार्य-नारायणतीर्थविरचित-योगसिद्धान्तचन्द्रिका
ख्यया संवलितम् ।
३७ वेदान्तदर्शनम् । परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वती स्वामिकृत ब्रह्मामृत
समाख्य व्याख्यासंवलितम् ।
३८ विश्वप्रकाशः । कोशः । विद्वद्वर श्रीमहेश्वरसुरिविरचितः ।
३९ श्रीसुबोधिनी । श्रीवलभाचार्यविनिर्मिता । श्रीमद्भागवतव्याख्या गोस्वामीश्रीविठ्ठलनाथदीक्षि
तविरचित टिप्पणीसहिता ।
४० वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः पुजाप्रकाशः ।
४१ वेदान्तसिद्धान्तसंग्रहः । श्रुतिसिद्धान्तापरनामकः । श्रीब्रह्मचारिवनमालिमिश्रविरचितः ।
द्वैतदर्शनानुगतः ।
४२ स्वानुभवादर्शः । श्रीमत्परमहंसपरिव्राजकाचार्य नारायणाश्रमशिष्य
स्वकृतटीकाविभूषितश्च ।
४३ याज्ञवल्क्यस्मृतिः । बालम्भट्टीसमाख्य व्याख्यासमलङ्कृतमिताक्षरासहित

पत्रादिप्रेषणस्थानम् } हरिदास गु
चौखम्बा, बनारस

११०३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

August 1912.

THE

CHOWKHAMBÂ SANSKRIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 176.

धर्मशास्त्र १५०

व्यवहार- बालंभट्टी

इति प्रसिद्धया लक्ष्मीनामिकया
पायगुण्डे इत्युपनामकेन बालंभट्टेन स्वपत्न्याः लक्ष्मीदेव्याः
स्मारकत्वेन तन्नाम्ना रचितया बृहत्या टीकया सहिता
मिताक्षरा
श्रीयुतगोविन्ददासमहाशयप्रदर्शितरीत्या
पर्वतीयनित्यानन्दपन्तेन परिष्कृत्य संशोधिता ।

VYAVAHÂRA-BÂLAMBHATTI

THE EXTENSIVE COMMENTARY ON THE MITÂKSHARÂ
WITH THE ORIGINAL

BY

Bâlambhatta Páyagunde

EDITED BY

Pandit Nityanand Pant Parvatiya
[U]nder the supervision of Shri Govinda Das.

FASCICULUS IV.

[PUBL]ISHED AND SOLD BY THE SECRETARY
CHOWKHAMBÂ SANSKRIT BOOK-DEPOT,
BENARES.
AGENTS:- OTTO HARRASSOWITZ LEIPZIG:
PANDITA JYESHTHÂRAMA MUKUNDAJI BOMBAY:
PROBSTHAIN & CO., BOOKSELLERS, LONDON.
Printed by Jai Krishna Dasa Gupta,
AT THE VIDYÂ VILÂSA PRESS
BENARES.
Price Rupee one.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ श्रीः ॥

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तबकः— १७६

१ अस्यां चौखम्बा-संस्कृतग्रन्थमालायां प्रतिमासं पृथ
सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्त्रेषु एकः स्तबको मुद्रयित्वा प्रका
एकस्मिन् स्तबके एक एव ग्रन्थो मुद्र्यते ।

२ प्राचीना दुर्लभाश्चामुद्रिता मीमांसावेदान्तादिदर्शनव्याकरण
शास्त्रसाहित्यपुराणादिग्रन्था एवात्र सुपरिष्कृत्य मुद्र्यन्ते।

३ काशिकराजकीयप्रधानसंस्कृतपाठशालाऽध्यापकाः पण्डिताः
च शास्त्रदृष्टयो विद्वांस एतत्परिशोधनादिकार्यकारिणो भव

४ भारतवर्षीयैः, ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्च एतद्
देयं वार्षिकमग्रिमं मूल्यम्–मुद्राः ७ आणा

५ अन्यैर्देयं प्रतिस्तबकम् " " १ "

६ प्रापणव्ययः पृथग् नास्ति ।

७ साम्प्रतं मुद्र्यमाणा ग्रन्थाः– मुद्रिताः स्त

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता (संस्कार

(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः (व्याकरणम्

(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृत–न्यायरत्नाकराख्यया व्याख्यया सहितम् । सम्पूर्णम् ।

(४) भाष्योपबृंहितं तत्त्वत्रयम् । विशिष्टाद्वैतदर्शनप्रकरणम् । श्रीमल्लोकाचार्य्यप्रणीतम् । श्रीनारायण तीर्थ विरचित भाट्टभाषा प्रकाशसहितम् । सं० (वेदान

(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः सम्पूर्णः (ज्योतिष

(६) भाट्टचिन्तामणिः । महामहोपाध्याय-श्रीगागाभट्ट विरचितः । तर्कपादः (मीमांसा)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वधो गर्हितः किमु उत्कृष्टस्येत्यन्यत्राप्येवं बोध्यम् इति ज्ञापनार्थम् । हिंसूचितमाह * सत्येति । तदानीं तस्याभावादाह * संभाव्यते इति ।

२ । अन्यसंग्रहाय तात्पर्यार्थमाह * सत्यमिति । तदेवाह *अनेन चेति । चो वाक्यालंकारे । प्रागुक्तक्रमेणाह * असत्यवचनमिति ।

३ । उभयाभ्यनुज्ञाने उक्तेऽपि कुत्र किमित्याशङ्कायां तयोर्व्यवस्थां दर्शयितुमुक्तक्रमेणैवादावसत्यवचनाभ्यनुज्ञाविषयमाह * यत्र शङ्केति । एतत्स्वरूपमादावुक्तम् ।

४ ।अवचनाभ्यनुज्ञाविषयमाह * यत्र त्विति । * असत्यवचने च, तत्रापि । तत्र विशेषमाह * राजेति । यदीत्यस्य तात्पर्यमाह * अथेति । कथमपि न मुञ्चतीत्यन्वयः । साक्षिण इति शेषः ।

५ । * तस्यापि, भेदस्यापि । तत्र बीजमाह * असत्यवचनेनेति । ननु तत्र दोषैक्येऽपि दुष्टत्वं तदवस्थमेव अत आह *तत्र चेति । तद्दोषनिरासार्थं चेत्यर्थः ।

उ० ६ । * तर्हीति । उभयाभ्यनुज्ञायामित्यर्थः । किमिति शेषोऽग्रे नान्वित्यादिः । तच्छब्देन तयोरुक्तक्रमेण परामर्श इत्याह *अनृतेति । द्विजैरित्यनेन शूद्रनिरासः, तस्याग्निसाध्यत्वात् । तस्य तु प्रायश्चित्तं विष्णुनोक्तं, शूद्रश्चैकाहिकं गोदशकस्य ग्रासं दद्यादिति । एकेति एकादिनभक्षणपर्याप्तम् इत्यर्थः । ब्राह्मणभोजनन्यायेनाह * एकैकश इति । सरस्वद्देवताकत्वनिरासायाह *सरस्वतीति । अत्र शास्त्रे ऽपरिभाषणादाह * अनवस्राविततेति ।

७ । ननु साक्ष्यनृतवचनावचनयोः स्थलविशेषे शास्त्राभ्यनुज्ञाने यदि प्रत्यवायाभावस्तर्हि प्रायश्चित्तोक्तिरफला, अथ प्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यवायस्तर्ह्यभ्यनुज्ञानं व्यर्थमिति मिथो विरुद्धमिदम्, अत
* इहायमभिसंधिरिति । अभिप्राय इत्यर्थः । अनृतवचनाव
ननिषेधौ द्विविधौ, साधारणावसाधारणौ च । तत्राद्यौ ना
वदेदित्यनारभ्याधीतः, अब्रुवन्विब्रुवन्वेत्यादिकौ । द्वितीयौ
* स तान्सर्वानवाप्नोति यः साक्ष्यमनृतं वदेत् ।
इति, अब्रुवन् हि नरः साक्ष्यमिति च । एवं सति प्रकर
द्वितीययोरेव शास्त्राभ्यनुज्ञावशात्तयोर्न प्रायश्चित्तम्, आद्य
र्व्यवहितत्वात्तयोरव्यवहितत्वादित्याह * साक्षिणामिति ।
दिहेति । अत्र मूले पूर्वार्धेनेति भावः ।

८। नन्वेवं प्रायश्चित्तविधानं व्यर्थमिति चेन्न।साधारण
षेधापवादाभावात् तत्राभ्यनुज्ञानाभावात्तदतिक्रमजन्यदोष
हारायास्य साफल्यात्, तच्छब्देन बुद्धिस्थवाचिना तयोः
मर्शसंभवादित्याह * यत्त्विति ।

९। नन्वेवं वर्णिनामित्यभ्यनुज्ञापरवचनमनर्थकं, सामा
निषिद्धानृतवचनावचनातिक्रमजन्यदोषयोस्तथाप्यवास्थितत्व
त्याह * न च मन्तव्यमिति । * निमित्तेति । निमित्तकेत्य
पूर्वं मूले तथा क्रमस्य सत्त्वात्तदनुरोधेनात्र सर्वत्रानृतवच
पूर्वनिपातः । * प्रत्यवायस्येति । जातावेकवचनम् । एवमग्रे
तत्र प्रत्येकाभिप्रायं वा । हेतुमाह * यत इति । साधारणनि
तिक्रमजन्यप्रत्यवाययोर्भूयस्त्वाभावप्रतिपादकतया तस्य
क्यमिति भावः ।

१०। ननु ब्रह्महत्याविचारे पापं भवति, तथोद्योगे
धिकं, तद्धनने कृते तु महत्पापमिति पूर्वपूर्वापेक्षयोत्तरो
पातकस्याधिक्येऽपि हत्यानिमित्तकमहाप्रायश्चित्ते कृते
ङ्गिकविचारोद्योगादिजन्यानामल्पीयसामपि पापानां यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्तिस्तथेहापि तस्याभ्यनुज्ञावचनेन महतः प्रत्यवायस्य निवृत्ते-रनुषङ्गसिद्धसाधारणानृतवचनावचननिषेधातिक्रमजन्यस्वल्पप्र-त्यवाययोरपि निवृत्तिः स्यादिति तदर्थं प्रायश्चित्तोपदेशो व्यर्थ एवेत्याशयेन शङ्कते *यद्यपीति। *प्रत्यवायस्य, तस्यापि। *त-थापीहेति। वचनद्वयकरणादिह तथा न, अन्यथाऽन्यतरवैयर्थ्यं स्पष्टमेव। अभ्यनुज्ञावचनात्तथासिद्धावेव प्रायश्चित्तवचनादेत-त्सिध्यतीत्युभयोरुल्लेखः।

११। साक्षिग्रहणमुपलक्षणमित्याह *एतदेवेति। स्वान्तन्त्र्ये-णानुक्तत्वात्। *अन्यत्र, साक्षिभिन्नेषु। *अनृतेति। सामा-न्यवचननिषिद्धेत्यादिः। अत एव तत्र प्रत्यवायाभावात् एवं तौल्येऽपि कश्चन विशेषमाह *न चेति। मूलोक्तं तु साक्षि-विषयकमिति भावः। प्रकृतवैषम्यमाह *प्रतिषेधेति। ननु भव-दुक्तरीत्या तदभावः तथाप्यनृतवचनादिप्रयुक्तो राजदण्डस्तु स्यादेव, अत आह *निमित्तान्तरेणेति। *अन्येषां च, पान्थादी-नाम्। *अस्मादेव, अभ्यनुज्ञावचनादेव। अपराधे सति दण्ड-शास्त्रतस्तदभ्यनुज्ञानेऽपराधाभावेन तदभावः। यदि तु दण्डः स्यात्तदा तद्धेत्वपराधकल्पना स्यादिति वचनवैयर्थ्यं तदवस्थ-मेवेति भावः॥ ८३॥

इति साक्षिप्रकरणम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ लेख्यप्रकरणम् ॥ ६ ॥

मि० भुक्तिसाक्षिणौ निरूपितौ। सांप्रतं लेख्यं निरूप्यते। तत्र लेख्यं द्विविधं, शासनं जानपदं चेति। तत्र शासनं निरूपितं, जानपदमभिधीयते। तच्च द्विविधम्, स्वहस्तकृतमन्यकृतं चेति। तत्र स्वहस्तकृतमसाक्षिकम्, अन्यकृतं ससाक्षिकम्। अनयोश्च देशाचारानुसारेण प्रामाण्यम्।

यथाह नारदः, (व्य० प० १।१३५)

लेख्यं तु द्विविधं ज्ञेयं स्वहस्तान्यकृतं यथा।
असाक्षिमत्साक्षिमच्च सिद्धिर्देशस्थितेस्तयोः ॥ इति।

तत्रान्यकृतमाह।

या० यः कश्चिदर्थो निष्णातः स्वरुच्या तु परस्परम्।
लेख्यं वा साक्षिमत् कार्यं तस्मिन्धनिकपूर्वकम् ॥८४॥

मि० धनिकाधमर्णयोर्योऽर्थो हिरण्यादिः परस्परं स्वरुच्या इयता कालेन एतावद्देयम् इयती प्रतिमासं वृद्धिरिति निष्णातो व्यवस्थितः तास्मिन्नर्थे कालान्तरे विप्रतिपत्तौ वस्तुतत्त्वानिर्णयार्थं लेख्यं साक्षिमत् उक्तलक्षणसाक्षियुक्तं धनिकपूर्वकं धनिकः पूर्वो यस्मिंस्तत् धनिकपूर्वकं धनिकनामलेखनपूर्वकमिति यावत् कार्यं कर्तव्यम्। उक्तलक्षणाः साक्षिणो वा कर्तव्याः।

कर्त्रा तु यत्कृतं कार्यं सिद्ध्यर्थं तस्य साक्षिणः।
प्रवर्तन्ते विवादेषु स्वकृतं वाऽथ लेख्यकम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति स्मरणात् ॥ ८४ ॥

बा० १।व्यवहितसङ्गतिं प्रदर्शयन् स्वल्पमुपोद्घातमाह * भुक्ति
ति। * तत्र,निरूपणीये लेख्ये। तत्र शासनमिति पाठः। तयोर्मि
इत्यर्थः। * तच्च, जानपदं च। अन्यकृतमिति पाठो नारदाद्
धात्। * तत्र, तयोर्मध्ये। * असाक्षिकं, साक्षिनिरपेक्षम्। दे
व्यवहाराविरोधाय व्यवस्थामाह * अनयोश्चेति। क्रमस्य वि
क्षितत्वात् स्वहस्तेत्यस्य पूर्वनिपातो द्वन्द्वे, मध्यमपदलोपिसमा
वा। यथेति पाठः। लेख्यं तु यथा स्वहस्तकृतमन्यकृतं चे
द्विविधं ज्ञेयं, तथा यथाक्रमम् असाक्षिमत्साक्षिमच्चेत्येवं तद्
ज्ञेयमित्यर्थः। तथेति पाठे पूर्वत्र तथेतिवत् यथेत्यस्याध्याहारे
एवार्थः। * सिद्धिरिति। तयोर्देशास्थितेस्तदाचारात्प्रामाण्य
त्यर्थः। अथ मूलमवतारयति *तत्रेति। तयोर्मध्ये इत्य
तस्य प्रामाण्यस्य बहूपायसाध्यत्वादादावुक्तिः।

२। * यः कश्चिदिति। उक्तनारदाद्वक्ष्यमाणमूला
अन्यकृतपरत्वम्। काश्चिदर्थमाह * हिरण्येति। तामेवाह *
ति। रुच्यन्तरमाह *इयतीचेति। निष्णात इत्यस्य व्या
*व्यवस्थित इति। तस्मान्नित्यस्य व्याख्या * अर्थे
विषयसप्तमीयं, विप्रतिपत्तावन्वयः। यथाश्रुतेऽनुपपत्तेः
*कालान्तरे इति। *विप्रतिपत्तौ, सम्भावितायाम् इति
लेख्ये साक्षियुक्तत्वं तन्नामवैशिष्ट्येन। अत एवाग्रेऽपि यथा
सम्भवादाह *नामेति। कार्यमित्यस्य व्याख्या * कर्तव्य
लेख्यं वेतिवाशब्दसूचितं लाघवाद्विशेषपक्षान्तरमाह * उ
क्षणा इति। ते एव वेत्यर्थः। नारदमेवाह * कर्त्रा
*विवादेषु, सत्सु। पक्षान्तरमाह * स्वकृतामिति। *
अथवा ॥ ८४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपिच ।

या० समामासतदर्धाहर्नामजातिस्वगोत्रकैः ।
सब्रह्मचारिकात्मीयपितृनामादिचिह्नितम् ॥ ८५ ॥

मि० समाः संवत्सरः । मासश्चैत्रादिः । तदर्धः पक्षः, शुक्लः कृष्णो वा । अहस्तिथिः प्रतिपदादिः । नाम धनिकाधमर्णयोः । जातिर्ब्राह्मणत्वादिः । स्वगोत्रं वासिष्ठादिगोत्रम् । एतैः समादिभिश्चिह्नितम् । तथा सब्रह्मचारिकं बह्वृचादिशाखाप्रयुक्तं गुणनाम बह्वृचः कठ इति । आत्मीयपितृनाम धनिकर्णिकापितृनाम । आदिशब्दात् द्रव्यजातिसंख्यावारादेर्ग्रहणम् । एतैश्च चिह्नितं, लेख्यं कार्यमिति गतेन संबन्धः ॥८५॥

बा० १। नैतावन्मात्रेण तस्य पूर्त्तिरित्याह *अपि चेति। अत्र समादीनां व्याप्यव्यापकभावः । अत एव क्रमस्य प्रतिपाद्यत्वात्तस्य प्रागुक्तिः। एवं क्रमो नामादावपि बोध्यः । समाशब्दः स्त्रीलिङ्गो बहुवचनान्त इत्याह *समा इति । तदर्द्धः पक्ष इति पाठः । अक्लीबत्वादेकदेशिसमासाभावात्षष्ठीतत्पुरुषः। अविनिगमकत्वादाह *कृष्णोवेति । अहःशब्दोऽत्राहोरात्रपर इत्याह *तिथिरिति।प्राग्वदाह *धनिकेति । स्वार्थे क इत्याह *वासिष्ठादीति । अयं द्वन्द्वः, तदाह *एतैरिति । अग्रे सत्त्वादत्रापि अध्याहरति *चिह्नितमिति । अन्यदप्याह *तथेति । सब्रह्मेत्यस्य तत्साधारणमित्यर्थः । तदाह *बह्वृचेति । बह्वृचादेर्या शाखा तदध्ययनप्रयुक्तमित्यर्थः । अत एवाह *गुणेति । प्राग्वदाह *धनिकेति । एतैश्चिह्नितमिति पाठः । वाक्यपूर्त्तये आह *लेख्यमिति ॥ ८६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि० किञ्च ।

या० समाप्तेऽर्थे ऋणी नाम स्वहस्तेन निवेशयेत्।
मतं मेऽमुकपुत्रस्य यदत्रोपरि लेखितम् ॥ ८६ ॥

मि० धनिकाधमर्णयोर्योऽर्थः स्वरुच्या व्यवस्थित- स्मिन्नर्थे समाप्ते लिखिते ऋणी अधमर्णो नाम आत्मी- स्वहस्तेनास्मिल्लेख्ये यदुपरि लेखितं तत् ममामुक- त्रस्य मतमाभिप्रेतामिति निवेशयेत्पत्रे लिखेत् ॥ ८

व्या० १। प्राग्वदाह * किञ्चेति । अर्थोऽत्र प्रागुक्त एवेत्य- * धनिकेति । यथाश्रुतासङ्गतेराह * लिखिते इति । अत्रेत्य- व्याख्या * आस्मिन्निति । प्रकृतत्वादाह * लेखितमिति । अ- कपुत्रस्येत्यार्षम् । एवमग्रेऽपि । * इतीति । एवं प्रकारेण निवेशयेदित्यर्थः । यथाश्रुतासङ्गतेराह * लिखेदिति ॥ ८

मि० तथा ।

या० साक्षिणश्च स्वहस्तेन पितृनामकपूर्वकम् ।
अत्राहममुकः साक्षी लिखेयुरिति ते समाः ॥८७

मि० तस्मिल्लेख्ये ये साक्षिणो लिखितास्तेऽ- त्मीयपितृनामलेखनपूर्वकमास्मिन्नर्थेऽहममुको देव- साक्षीति स्वहस्तेनैकैकशो लिखेयुः । ते च समा- ख्यातो गुणतश्च कर्तव्याः । यद्यधमर्णः साक्षी लिपिज्ञो न भवति तदाऽधमर्णोऽन्येन साक्षी च क्ष्यन्तरेण सर्वसाक्षिसन्निधौ स्वमतं लेखयेत् ।

यथाह नारदः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अलिपिज्ञ ऋणी यः स्यात्स्वमतं तु स लेखयेत्।
साक्षी वा साक्षिणाऽन्येन सर्वसाक्षिसमीपतः॥
इति ॥ ८७ ॥

बा० १। प्राग्वदाह * तथेति। साक्षिमति पत्रे प्रतिपादितमर्थमाह * तस्मिन्निति। चार्थमाह * तेऽपीति। स्वार्थे कः। लिखने नामपूर्वत्वाभावादाह * लेखनेति। अत्रार्थमाह * अस्मिन्निति। समुदायनिरासायाह * अमुक इति। अमुक इत्युक्तिस्वारस्यादाह *एकैकश इति।

२। वैषम्यस्य प्रागुक्तत्वादत्र विषये विशेषमाह *ते चेति। विनिगमनाविरहादाह *संख्यात इति। एतेन असमा इत्यकारप्रश्लेष इत्यपास्तम्।

३। उभयत्र स्वहस्तेनेत्यंशे विशेषमाह * यद्यधमर्ण इति। * साक्षीवा साक्षिणेति। अलिपिज्ञ इति भावः। स्वमतमित्यादेरनुषङ्गः। * समीपतः, समीपे॥ ८७॥

मि० अपि च।

या० उभयाभ्यर्थितेनैतन्मया ह्यमुकसूनुना।
लिखितं ह्यमुकेनेति लेखकोऽन्ते ततो लिखेत् ॥८८॥

मि० ततो लेखको धनिकाधमर्णिकाभ्यामुभाभ्यां प्रार्थितेन मयाऽमुकेन देवदत्तेन विष्णुमित्रसूनुना एतत् लेख्यं लिखितमित्यन्ते लिखेत्॥ ८८॥

बा० १। प्राग्वदाह *अपि चेति। *ततः, साक्षिलिखनान-

---

१ एतत्समानार्थकः अर्धः- (व्य० प० १।१६७)
आत्मनैव लिखेज्जानन् न चेदन्येन लेखयेत्।
इति नारदस्मृतौ उपलभ्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्तरम् । * अन्ते, सर्वाधः । नतूपरि ॥ ८८ ॥

मि० साम्प्रतं स्वकृतं लेख्यमाह ।

या० विनाऽपि साक्षिभिर्लेख्यं स्वहस्तलिखितं तु यत्
तत्प्रमाणं स्मृतं लेख्यं बलोपधिकृतादृते ॥ ८९ ॥

मि० यल्लेख्यं स्वहस्तेन लिखितमधमर्णेन, तत् सा-
क्षिभिर्विनाऽपि प्रमाणं स्मृतं मन्वादिभिः । बलोपधि-
कृतादृते–बलेन बलात्कारेण, उपधिना छललोभक्रो-
धभयमदादिलक्षणेन यत्कृतं तस्माद्विना ।

नारदोऽप्याह, (व्य० प० १।१३७)

मत्ताभियुक्तस्त्रीबालबलात्कारकृतं च यत् ।
तदप्रमाणं लिखितं भयोपाधिकृतं तथा ॥ इति

तच्चैतत्स्वहस्तकृतं परहस्तकृतं च यल्लेख्यं दे-
शाचारानुसारेण सबन्धकव्यवहारेऽबन्धकव्यवहारे
युक्तम् अर्थक्रमापारिलोपेन लिप्यक्षरापरिलोपेन च
लेख्यमित्येतावत्, न पुनः साधुशब्दैरेव । प्रातिस्विक-
देशभाषयाऽपि लेखनीयम् ।

यथाह नारदः, (व्य० प० १।१३६)

देशाचाराविरुद्धं यद्व्यक्ताधिविधिलक्षणम् ।
तत्प्रमाणं स्मृतं लेख्यमविलुप्तक्रमाक्षरम् ॥ इति

विधानं विधिः आधेर्विधिराधिविधिराधिक-
तस्य लक्षणं गोप्याधिभोग्याधिकालकृतमित्यादि
द् व्यक्तं विस्पष्टं यस्मिंस्तद् व्यक्ताधिविधिलक्षणम्
अर्थानां क्रमः, क्रमश्चाक्षराणि च क्रमाक्षराणि अवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्तानि क्रमाक्षराणि यस्मिंस्तद् अविलुप्तक्रमाक्षरम्। तदेवंभूतं लेख्यं प्रमाणम्। राजशासनवत् न साधुशब्दानियमोऽत्रेत्यभिप्रायः॥ ८९॥

बा० १। *विनापीति। तुरुक्तवैलक्षण्ये। यत् लेख्यं स्वहस्तलिखितं तत्तु लेख्यं साक्षिभिर्विनाऽपि प्रमाणं स्मृतं मन्वादिभिरित्यन्वयः। लेख्यमित्यस्य पुनरुक्तिः स्पष्टार्था। अग्रे तत्र सर्वमिति पाठस्तु युक्त एव। तदाह * यदिति। मुख्यमुपधिशब्दार्थमाह * छलेति। न्यूनतानिरासायेदमुपलक्षणम् इत्याह * लोभेति। एतत्सूचनार्थमेव नारदमाह *नारद इति। * मत्तेति। अत्र स्त्र्यादेर्द्वन्द्वं कृत्वा पुनः सः। * मत्तः, पानादिना। * अभियुक्तः, आक्षिप्तः। चः त्वर्थे। प्रागुक्तमेव सविशेषमुपपादयन्नाह * तच्चैतादिति। तदेतच्चेत्यर्थः। इदमेव प्रत्यासत्त्या व्युत्क्रमेणाह * स्वहस्तेति। * अबन्धकव्यवहारे च युक्तमिति। तत्र च यथाक्रमं नियतं सम्बन्ध्यम् इत्यर्थः। अग्रेऽन्वयः। इत्येतावदिति व्याचष्टे *नपुनरिति। साधुशब्दैरेवेति। किन्त्विवति शेषः। * प्रातिस्विकेति। प्रतिनियतेति पाठान्तरम्। अपिना तेषामपि समुच्चयः। व्यक्ताधीति विशेषमेव व्याकर्त्तुं कर्मप्रत्ययेऽर्थासङ्गतेराह * विधानमिति। भावे किरिति भावः। गोप्याधीति समाहारद्वन्द्वः। आदिनाऽकालकृतादिपरिग्रहः। सबन्धकव्यवहारविषयमिदम्। स्पष्टं बन्धकप्रकारलक्षणं यत्र तत् तथेति तु कल्पतरुः। क्रमस्य साकाङ्क्षत्वादाह * अर्थानामिति। अविलुप्तेति व्याचष्टे * क्रमश्चेति। एवं पदार्थमुक्त्वा वाक्यार्थमाह * तदेवमिति। नारदतात्पर्यार्थं प्रागुक्तमेवाह * राजेति। व्यतिरेके दृष्टान्तः॥ ८९॥

मि० लेख्यप्रसङ्गेन लेख्यारूढमप्यृणं त्रिभिरेव दे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यमित्याह ।

या० ऋणं लेख्यकृतं देयं पुरुषैस्त्रिभिरेव तु ।

मि० यथा साक्ष्यादिकृतमृणं त्रिभिरेव देयं त
लेख्यकृतमप्याहर्तृतत्पुत्रतत्पुत्रैस्त्रिभिरेव देयं, न च
र्थादिभिरिति नियम्यते ।

ननु पुत्रपौत्रैर्ऋणं देयमित्यविशेषेण ऋणम
त्रिभिरेव देयमिति नियतमेव । बाढम् । अस्यैवो
र्गस्य पत्रारूढर्णविषये स्मृत्यन्तरप्रभवामपवादश
मपनेतुमिदं वचनमारब्धम् ।

तथा हि । पत्रलक्षणमभिधाय—

कात्यायनेनाभिहितम्,

एवं कालमतिक्रान्तं पितॄणां दाप्यते ऋणम्॥
इत्थं पत्रारूढमृणमतिक्रान्तं कालमपि पितॄणां संब
दाप्यते । अत्र पितॄणामिति बहुवचननिर्देशात्काल
तिक्रान्तमिति वचनाच्च चतुर्थादिर्दाप्यते इति प्रतीय

तथा हारीतेनापि,

लेख्यं यस्य भवेद्धस्ते लाभं तस्य विनिर्दिशेत्॥
अत्रापि यस्य हस्ते लेख्यमस्ति तस्य ऋणलाभ
सामान्येन चतुर्थादिभ्योऽप्यृणलाभोऽस्तीति प्रती
ते । अतश्चैतदाशङ्कानिवृत्त्यर्थमेतद्वचनमिति युक्त
वचनद्वयं च योगीश्वरवचनानुसारेण योजनीयम्।

मि० अस्यापवादमाह ।

या० आधिस्तु भुज्यते तावद्यावत्तन्न प्रदीयते ॥९

मि० सबन्धकेऽपि पत्रारूढे ऋणे त्रिभिरेव देय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नियमात् ऋणापाकरणानधिकारेण आध्याहरणेऽप्य-
नधिकारप्राप्ताविदमुच्यते । यावत् चतुर्थेन पञ्चमेन
वा ऋणं न दीयते तावदेवाधिर्भुज्यते इति वदता
सबन्धकर्णापाकरणे चतुर्थादेरप्यधिकारो दर्शितः ।
नन्वेतदप्युक्तमेव, फलभोग्यो न नश्यति इति । स-
त्यम् । तदपि एतस्मिन् अपवादवचनेऽसति पुरुषत्र-
याविषयमेव स्यादिति सर्वमनवद्यम् ॥ ९० ॥

बा० १।सङ्गतिमाह *लेख्येति । प्रागुक्तं दृष्टान्तयति *यथेति ।
एवंच तत्सजातीय एवायमर्थो नत्वपूर्व इति भावः । अतएवा-
ह * आहर्त्रिति । एवव्यवच्छेद्यमाह * न चतुर्थादिभिरिति ।
एवोक्तिं सफलयति * नियम्यतइति ।

२। अतएवाह* नन्विति । *अविशेषेणेति । साक्षिलेख्य-
साधारण्येनेत्यर्थः । * नियतं, नियमितम् । क्वचित्तथैव पाठः ।
* अस्यैव, पुत्रपौत्रैरित्युक्तस्यैव सामान्यस्य । *प्रभवां, जन्या-
म् । * इदम्, ऋणंलेख्यकृतामिति ।

३।तदेव स्मृत्यन्तरं प्रकरणशुद्धिपूर्वकमाह *तथाहीत्यादि-
ना । तद्याचष्टे * इत्थमिति । एवमित्यस्य व्याख्येयम् । एतदर्थ-
मेव तदुक्तं प्राक् । अतिक्रान्तं कालमपीति पाठः।कालम् अति-
क्रान्तमपीत्यर्थः । क्वचित्समस्तपाठः । अव्यवहितान्वयनिरासा-
याह * सम्बन्धीति । * दाप्यते, राज्ञेति शेषः । दापयेदिति
पाठान्तरमुभयत्र ।

४। इतो यथा तदाशङ्का तामाह * अत्रेति । तदुक्तावित्य-
र्थः । प्रतीयते इत्यत्रान्वयः । पत्रारूढऋणविषये पुत्रपौत्रैरेव दे-
यमिति नास्यार्थः । किं तु बहुवचनात् अवरतः ऋणे त्रितयस-
म्बन्धित्वे सति देयत्वप्रतीत्या ऽर्थात्प्रपौत्रादिभिरेव देयमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतीयते। तथा पौत्रे मृते तत्पुत्रस्य तेनादातृत्वप्राप्तावपि आ... न्तामित्युक्तेस्तेषां दातृत्वप्राप्तिर्भवतीति भावः।

८। * तथा, तद्वत्। अभिहितमित्यस्यानुषङ्गः। प्राग... *अत्रापीति। प्रतीयते इत्यत्रान्वयः। सामान्योक्त्यैवात्र प्राग... वधारणमित्याह * चतुर्थादिभ्योऽपीति। आक्षेपसमा... क्तमुपसंहरति * अतश्चेति। नन्वेवं हारीतकात्यायनयो... गतिरत आह * वचनद्वयंचेति। चस्त्वर्थे। आद्ये पितृप... बहुत्वमविवक्षितम्। उद्देश्यगतत्वात्। कालातिक्रमस्यापि... त्पर्यन्तस्यैव सम्भवेन ग्रहणं नत्वग्रिमस्य। द्वितीयमपि... त्परमेवेति भावः।

उ० ६। नन्वेतदभावे कथं पूर्वप्राप्तिरतआह *सवन्धे... आपिना द्वितीयसमुच्चयः। अस्य नियमेऽन्वयः। अथो... याह * क्रमेणेति। ऋणापाकरणेति। चतुर्थादेरित्यादिः। तावताऽपि स्फुटं न तत्त्वप्रतीतिः, अतः अपवादत्वमुप... *यावदिति। अस्यार्थमाह * चतुर्थेनेति। दिक्प्रदर्शना... तत्पदार्थमाह * ऋणमिति। सर्वमिति न्यायेनाह * ता...

६। प्राग्वत्प्राप्तपौनरुक्त्यं निराचष्टे * नन्वित्यादि... * स्यादिति। अत इदमप्यावश्यकं तस्य तत्प्राप्त्य... भावः॥ ९०॥

मि० प्रासाङ्गिकं परिसमाप्य प्रकृतमेवानुसर...

या० देशान्तरस्थे दुर्लेख्ये नष्टोन्मृष्टे हृते तथा।
भिन्ने दग्धेऽथवा छिन्ने लेख्यमन्यत्तु कारयेत्॥

मि० व्यवहाराक्षमे पत्रे पत्रान्तरं कुर्यादिति... यते। व्यवहाराक्षमत्वं चात्यन्तव्यवहितदे...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थे पत्रे, दुर्लेख्ये-दुष्टानि संदिह्यमानानि अवाचकानि वा लेख्यानि लिप्यक्षराणि पदानि वा यस्मिंस्तत् दुर्लेख्यं तस्मिन्दुर्लेख्ये, नष्टे कालवशेन, उन्मृष्टे मषीदौर्बल्यादिना मृदितालिप्यक्षरे, हृते तस्करादिभिः, भिन्ने विदलिते, दग्धे प्रज्वलिते, छिन्ने द्विधाभूते सति भवति। एतच्चार्थिप्रत्यर्थिनोः परस्परानुमतौ सत्याम्। विमत्यां तु व्यवहारप्राप्तौ देशान्तरस्थपत्रानयनाय अध्वापेक्षया कालो दातव्यः। दुर्गदेशावस्थिते नष्टे वा पत्रे साक्षिभिरेव व्यवहारनिर्णयः कार्यः।

यथाह नारदः, (व्य. प. १ । १४२)

लेख्ये देशान्तरन्यस्ते शीर्णे दुर्लिखिते हृते।
सतस्तत्कालकरणमसतो द्रष्टृदर्शनम्॥ इति।

सतो विद्यमानस्य पत्रस्य देशान्तरस्थस्यानयनाय कालकरणं कालावधिर्दातव्यः। असतः पुनरविद्यमानस्य पूर्वं ये द्रष्टारः साक्षिणस्तैर्दर्शनं व्यवहारपरिसमापनं कार्यम्। यदा तु साक्षिणो न सन्ति तदा दिव्येन निर्णयः कार्यः।

अलेख्यसाक्षिके दैवीं व्यवहारे विनिर्दिशेत्।
इति स्मरणात्।

एतच्च जानपदं व्यवस्थापत्रम्। राजकीयमपि व्यवस्थापत्रमीदृशमेव भवति। इयांस्तु विशेषः,

राज्ञः स्वहस्तसंयुक्तं स्वमुद्राचिह्नितं तथा।
राजकीयं स्मृतं लेख्यं सर्वेष्वर्थेषु साक्षिमत्॥इति।

तथाऽन्यदपि राजकीयं जयपत्रकं वृद्धवसिष्ठेनोक्तम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथोपन्यस्तसाध्यार्थसंयुक्तं सोत्तरक्रियम्।
सावधारणकं चैव जयपत्रकमिष्यते ॥
प्राड्विवाकादिहस्ताङ्कं मुद्रितं राजमुद्रया।
सिद्धेऽर्थे वादिने दद्याज्जयिने जयपत्रकम् ॥ इ
तथा, सभासदोऽपि मतं मेऽमुकपुत्रस्येति स्व
दद्युः ।

सभासदश्च ये तत्र स्मृतिशास्त्रविदः स्थिताः
यथा लेख्यविधौ तद्वत्स्वहस्तं दद्युरेव ते ॥
इति स्मरणात् ।

सभासदां च परस्परानुमतिव्यतिरेकेण न व्य
हारो निःशल्यो भवति ।

यथाह नारदः, (अ. ३ । १७)

यत्र सभ्यो जनः सर्वः साध्वेतदिति मन्यते।
स निःशल्यो विवादः स्यात्सशल्यस्त्वन्यथा भ
इति ।

एतच्च चतुष्पाद्व्यवहारे एव ।

साधयेत्साध्यमर्थं यत् चतुष्पादान्वितं च
राजमुद्राङ्कितं चैव जयपत्रकमिष्यते ॥
इति स्मरणात् ।

यत्र तु हीनता, यथा, (ना. अ. २ । ३३)
अन्यवादी क्रियाद्वेषी नोपस्थाता निरुत्तरः
आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः ॥

तत्र न जयपत्रकमस्ति, अपि तु हीनपत्रक
तच्च कालान्तरे दण्डप्राप्त्यर्थम् । जयपत्रं तु प्रा
यविधिसिद्ध्यर्थमिति विशेषः ॥ ९१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बा०१। संगतिमाह*प्रासङ्गिकमिति। नष्टोन्मृष्टे इति समाहारद्वंद्वः । नन्वत्र देशान्तरस्थादि उद्दिश्य पत्रान्तरकरणविधिः प्रतीयते। तत्र किं तेषां प्रत्येकं निमित्तत्वमुत समुदायस्य । तत्र न तावदाद्यः । तथाशब्दासंगतेः । सकृच्छ्रुतस्य विधेयस्य सर्वैरन्वयासंभवाच्च । नचावृत्त्या तथा । प्रधानानुरोधेन गुणावृत्तावपि वैपरीत्यस्य सकलतन्त्राविरुद्धत्वात् । वाक्यभेदापत्तेश्च । न द्वितीयः । अथवेत्यस्यासंगतेः । स्मृत्यन्तरविरोधेनापसिद्धान्ताच्च । अतआह * व्यवहाराक्षमेइति । * पत्रे, पूर्वपत्रे सति । अन्यथानुपपत्त्या सकलसाधारणानुगतधर्माक्षेपेणास्योद्देश्यत्वं, न तस्येति न कोऽपि उक्तदोष इति भावः । णिजर्थाविवक्षयाऽऽह *कुर्यादितीति। पादत्रयार्थस्यैवं सति अन्वयं कथयन्व्यवहाराक्षमत्वमेव विशदयति * व्यवहाराक्षमत्वंचेति । एतेन तदेव कथमिति शङ्का निरस्ता ।*अक्षमत्वं च, अक्षमत्वं तु। अस्य भवतीत्यत्रान्वयः। क्रमेण निमित्तानि व्याचष्टे *अत्यन्तेति। निकटे आनयनस्य सुकरत्वाल्लक्ष्यार्थोऽयम् । पत्रे इत्यस्याग्रे सर्वत्रान्वयः । दुष्टानीत्यस्यार्थद्वयं, लेख्यानीत्यस्यापि।तयोः यथासंख्यमन्वयः। नष्टादेरौपाधिकभेदमाह * कालेत्यादि । आदिना जलपातादिना । * विदलिते, संचूर्णिते । * दग्धे प्रज्वलिते । दग्धेऽग्निनेति पाठान्तरम्। सर्वपाठोऽपि क्वचित्स्पष्टार्थः।एतेषामपि विकल्पो बोध्यः । अतएव अथवेत्यस्य संगतिः । तथेतितु सादृश्ये, न तु समुच्चये ।

२। नारदविरोधं मूलस्य परिहरन् विशेषमाह * एतच्चेति। पत्रान्तरकरणं चेत्यर्थः। तत्र तस्यावश्यकत्वादाह * व्यवहारप्राप्ताविति । तादृशे स्थले आह * देशान्तरेति । * दुर्गदेशावस्थितेइति । दुःखेनापि गन्तुमशक्यदेशेत्यर्थः । दुर्देशेति पाठा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्तरम् । अयं प्रकारोऽन्यत्रापीत्याह * नष्टे वेति । वा चार्थे तेनान्येषामपि समुच्चयः । उत्तरार्द्धं व्याचष्टे * सत इति । ते मध्ये इत्यादिः । तत्पदार्थमाह * आनयनायेति । समास संबन्धसामान्यषष्ठ्या कार्यस्तत्र । * पुनः, तु । अन्यनिरा याह * पूर्वमिति । तत्कर्मकं दर्शनमिति नार्थ इत्याह * तै ति । लक्ष्यार्थमाह * व्यवहारपरिसमापनमिति ।

३। विशेषान्तरमाह * यद्वात्विति । कात्यायनमाह * लेख्येति । लेख्यसाक्ष्युभयरहिते व्यवहारे इत्यर्थः । * दै क्रियाम् ।

४। विशेषान्तरं वक्तुमुक्तमेवाह * एतच्चेति । जानपदं लौकिकमित्यस्यैव नामान्तरम् ।

लौकिकं राजकार्यं च लेख्यं कुर्यात् द्विलक्षणम् ।

इति वसिष्ठोक्तेः,

राजकीयं जानपदं लिखितं द्विविधं स्मृतम् ।

इति संग्रहोक्तेश्च । अत्रोभयत्र राजकार्यं राजकीयं त्याभ्यां प्रत्येकं त्रयाणां ग्रहणमिति न न्यूनता । अतए *राजकीयमपीति । कात्यायनमाह * राज्ञ इति ।

५। तथेति समुच्चये ।

राजकीये तथा राजा स्वहस्तेन लिखेत्स्वयम् ।

मतं मेऽमुकपुत्रस्य ह्यमुकस्य महीपतेः ॥

इति व्यासः ।

अर्थेष्विति विषयसप्तमी । साक्षिमदिति साधार क्तिः । * यथोपन्यस्तेति । येन प्रकारेणोपन्यस्तो यः साध्य प्रतिज्ञातार्थस्तेन संयुक्तम् । अनेनाद्यपादप्रदर्शनम् । उत्तरं च क्रि च ताभ्यां सहितं, क्रिया पत्रादिरूपा । अनेन द्वितीयतृती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दप्रदर्शनम् । अवधारणं निर्णयस्तेन सहितम्। स्वार्थे कः। अनेन तुर्यपादप्रदर्शनम् । * हस्ताङ्कं, तदक्षराङ्कम् । एवमग्रेऽपि। *वादिनेइति ।

पूर्वोत्तरक्रियावादनिर्णयान्ते यदा नृपः ।
प्रदद्याज्जयिने लेख्यं जयपत्रं तदुच्यते ॥

इति बृहस्पत्युक्तेरिदमुपलक्षणम् ।

६ । अत्रादिग्राह्यं सूचयन्नेवाह * तथेति । कात्यायनमाह * सभासदश्चेति। * तत्र, व्यवहारे । * यथेति । क्रियमाणे राजकीयव्यवस्थापत्रे यथा तद्वज्जयपत्रेऽपीत्यर्थः । एवेन तस्यावश्यकता सूचिता ।

७ । व्यवहारस्य निःशल्यत्वोपायं प्रतिपादयन्नत्र हेतुभूतं विशेषान्तरमाह * सभासदांचेति । चेनान्येषामपि तत्रत्यानां समुच्चयः । * यत्र, निर्णेयविवादे ।

८। विशेषान्तरमाह * एतदिति । जयपत्रम् इत्यर्थः । कात्यायनमाह * साधयेदिति । साध्यार्थसाधकं तदन्वितं च यद् व्यवहारस्वरूपं यत् यतोऽतस्तदेव तदाङ्कितं तदिष्यते इत्यर्थः। चेनान्यसमुच्चयः । यद्यपीदं सभासदां चेत्यतः प्रागुचितं तथापि सभासदां प्रसङ्गात्तद्विषयकं तद् आदावुक्तम् । एवव्यवच्छेद्यमाह *यत्रत्विति । तस्योपयोगमाह *तच्चेति । हीनपत्रं चेत्यर्थः । *विशेषः, हीनपत्रतः ॥ ९१ ॥

मि॰ लेख्यसन्देहे निर्णयनिमित्तान्याह ।

या॰ सन्दिग्धलेख्यशुद्धिः स्यात्स्वहस्तलिखितादिभिः ।
युक्तिप्राप्तिक्रियाचिह्नसंबन्धागमहेतुभिः ॥ ९२ ॥

मि॰ शुद्धमशुद्धं वेति सन्दिग्धस्य लेख्यस्य शु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्धिः स्वहस्तलिखितादिभिः स्यात् । स्वहस्तेन लिखि
तं यल्लेख्यान्तरं तेन शुद्धिः । यदि सदृशान्यक्षरा
णि भवन्ति तदा शुद्धिः स्यादित्यर्थः । आदिशब्दा
त्साक्षिलेखकहस्तलिखितान्तरसंवादाच्छुद्धिरिति
युक्त्या प्राप्तिर्युक्तिप्राप्तिः । देशकाले पुरुषाणां द्रव्ये
सह संबन्धः प्राप्तिः । अस्मिन्देशेऽस्मिन्कालेऽस्य पु
रुषस्येदं द्रव्यं घटते इति युक्तिः । क्रिया तत्साक्ष्यु
न्यासः । चिह्नमसाधारणं श्रीकारादि । संबन्धः अ
र्थिप्रत्यर्थिनोः पूर्वमपि परस्पराविश्वासेन दानग्रहणा
दिसंबन्धः । आगमोऽस्यैतावतोऽर्थस्य संभावितः प्रा
प्त्युपायः । एते एव हेतवः । एभिर्हेतुभिः सन्दिग्ध
लेख्यशुद्धिः स्यादित्यर्थः । यदा तु लेख्यसन्दे
निर्णयो न जायते तदा साक्षिभिर्निर्णयः कार्यः ।

यथाह कात्यायनः,

दूषिते पत्रके वादी तदारूढांस्तु निर्दिशेत् । इ
साक्षिसंभवविषयमिदं वचनम् । साक्ष्यसं
भवविषयं तु—

हारीतवचनम्,

न मयैतत्कृतं पत्रं कूटमेतेन कारितम् ।
अधरीकृत्य तत्पत्रमथ दिव्येन निर्णयः ॥ इति

बा० १ । संशयकोटिद्वयमाह * शुद्धमिति । कृत्रिमम
वेत्यर्थः ।

तथाच नारदः, (व्य. प. १ । १४३ । १४४)

यस्मिन्स्यात्संशयो लेख्ये भूताभूतकृते क्वचित् ।
तत् स्वहस्तक्रियाचिह्नयुक्तिप्राप्तिभिरुद्धरेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लेख्यं यच्चान्यनामाङ्कं हेत्वन्तरकृतं भवेत् ।
विप्रत्यये परीक्षेत संबन्धागमहेतुभिः॥ इति ॥

*विप्रत्यये, विप्रतिपत्तौ। लिखितमिति कर्मणि भूते निष्ठा। तेनेदानींतनव्यावृत्तिः । तदाह * स्वहस्तेनेति । तत्त्वस्यात्रापि सत्त्वादाह * लेख्यान्तरमिति । पत्रान्तरमित्यर्थः । ननु द्वयोर्भेदेन तेनास्य कथं शुद्धिः, अत आह * यदीति। * साक्षीति।साक्षिलेखकयोर्ये स्वहस्ताभ्यां लिखितान्तरे एतदपेक्षया भिन्ने लिखिते तत्संवादात् एतल्लेख्यीयाक्षरस्य तदक्षरसादृश्यादेतत्पत्रस्य शुद्धिरित्यर्थः । तथाचेदमन्यकृतविषयम्। श्रौतं तु स्वकृतविषयमिति भावः। इतिः पूर्वार्धार्थसमाप्तौ ।

२। देशकाले इति समाहारद्वंद्वात्सप्तमी। कालपुरुषाणामिति पाठे समस्तत्रयाणां तेन सम्बन्ध इति यावत्। तदेवाह * अस्मिन्निति। युक्तिपदार्थमाह * घटतेइति। योग्यं भवतीत्यर्थः। सम्भवतीति यावत्। कल्पतरुरप्येवम्। युक्तिरर्थापत्तिः, प्राप्तिर्द्वयोरेकत्रावस्थानमित्यन्ये । *तत्साक्षीति। प्राप्तिसाक्ष्युपन्यास इत्यर्थः। अतएव वक्ष्यमाणविरोधो न। कल्पतरुरप्येवम्। संव्यवहारः क्रियेत्यन्ये। श्रीकारादीति आदिना स्वस्तिकमुद्रादिपरिग्रहः । * पूर्वमिति । विवादात्प्रागित्यर्थः। * दानेति । धनस्येत्यादिः। आदिनाऽऽध्यादिपरिग्रहः * । *अर्थस्य, धनस्य । आगमः क्रयादिरित्यन्ये । आगमान्तद्वन्द्वस्य हेतुशब्देन कर्मधारय इत्याह * एते एवेति । उत्तरार्धस्य क्रियान्तराध्याहारेणान्वयभ्रमनिरासायाह * एभिरिति । सोऽप्येवं, हेतुरनुमानमित्यन्ये ।

३। विशेषमाह * यदात्विति । * तदारूढांस्त्विति। पत्रारूढान्साक्षिणस्त्वित्यर्थः। पत्रके इत्यत्र स्वार्थे कन् ।

---

१ संदिग्धलेख्यशुद्धिः स्यादितिमूलवचनोपात्तम् इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४। अस्य वक्ष्यमाणविरोधं परिहरति * साक्षिसंभवा यमिति। *इदं, कातीयम्। तदेवाह * न मयैतादिति। * अन्येन केनचित्। अतएवाह * कारितमिति। * तत्पत्रं तत्पत्रं प्रमाणत्वेनानाश्रित्य अथ अनन्तरं दिव्येन नि कार्य इत्यर्थः। अथ दिव्येनेति पाठः। अर्थे इति पाठे इत्यर्थः॥ ९२॥

मि० एवं शोधिते पत्रे ऋणे च दातव्ये प्राप्ते यदा त्स्नमेव दातुमृणमसमर्थस्तदा किं कर्तव्यमित्यत आ

या० लेख्यस्य पृष्ठेऽभिलिखेद्दत्त्वा दत्त्वर्णिको धन
धनी वोपगतं दद्यात्स्वहस्तपरिचिह्नितम्॥ ९३

मि० यदाऽधमर्णिकः सकलमृणं दातुमसमर्थ दा शक्त्यनुसारेण दत्त्वा पूर्वकृतस्य लेख्यस्य पृष्ठे लिखेत्, एतावन्मया दत्तमिति। अधमर्णो वा उ प्राप्तं धनं तस्यैव लेख्यस्य पृष्ठे दद्यादभिलिखेत्, वन्मया लब्धमिति। कथं, स्वहस्तपरिचिह्नि स्वहस्तलिखिताक्षरचिह्नितम्। यद्वा उपगतं शपत्रं स्वहस्तलिखितचिह्नितमधमर्णायोत्तमर्णो द द्यात्॥ ९३॥

बा० १। अवतरणमाह* एवमिति। *दातुमिति। युग शेषः। एवमग्रेऽपि। आर्थिकमाह * शक्त्यनुसारेणेति। धर्थमाह *उत्तमर्णो वेति। स्वहस्तशब्दो लाक्षणिक * लिखितेति। तथाच क्रियाविशेषणमिदमिति भावः।

२। अत्र पक्षे तत्पृष्ठभागे तल्लिखने ऐच्छिकविकल्पो स च न युक्तः। तस्याष्टदोषदुष्टत्वात्। प्रकारान्तरेणोच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साफल्ये तथोक्तेरयुक्तत्वात्। लक्षणाद्यापत्तेश्च। अत आह * यद्रोपगतमिति । भावक्तान्तादर्शआद्यजित्याह *प्रवेशपत्रमिति । परः उत्कर्ष इतरव्यावर्तकत्वरूपो यस्यास्तीति परि, लिखनं स्वहस्तस्य परि, तेन चिह्नितमिति पत्रविशेषणं, तादृशं लेख्यान्तरं कृत्वेति भावः । तदाह * स्वहस्तालिखितेति । भावे क्तः । * उत्तमर्ण इति । प्राप्ताल्पधन इति भावः । तथाचात्र न लक्षणा क्वापि ।

३ । लेख्यासन्निधिविषयं चेदम् ।

तदाह विष्णुः, असमग्रदाने लेख्यासन्निधाने चोत्तमर्णः स्वहस्तलिखितं दद्यादिति ।

नाव्यवहितमात्रविषयमिदं, किन्तु साधारणमिति ॥ ९३ ॥

मि० ऋणे तु कृत्स्ने दत्ते लेख्यं किंकर्तव्यमित्यत आह ।

या० दत्त्वर्णं पाटयेल्लेख्यं शुद्ध्यै वाऽन्यत्तु कारयेत् ।

मि० क्रमेण सकृदेव वा कृत्स्नमृणं दत्त्वा पूर्वकृतं लेख्यं पाटयेत् । यदा तु दुर्गदेशावस्थितं लेख्यं नष्टं वा तदा शुद्ध्यै अधमर्णत्वनिवृत्त्यर्थमन्यल्लेख्यं कारयेदुत्तमर्णम् अधमर्णः । पूर्वोक्तक्रमेणोत्तमर्णो विशुद्धिपत्रमधमर्णाय दद्यादित्यर्थः ।

मि० ससाक्षिके ऋणे कृत्स्ने दातव्ये किं कर्तव्यमित्यत आह ।

या० साक्षिमच्च भवेद्यद्वा तद्दातव्यं ससाक्षिकम् ॥ ९४॥

यच्च ससाक्षिकमृणं तत् पूर्वसाक्षिसमक्षमेव द-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यात् ॥ ९४ ॥

इति लेख्यप्रकरणम् ॥

बा० १। सान्निध्याद् व्युत्क्रमेणाह * क्रमेणेति । द्वितीया व्याचष्टे*यदात्विति । वा चार्थे । तेनान्येषामपि संग्रहः । मे स्तु विकल्पे एव । अधमर्णत्वेति । स्वाधमर्णत्वेत्यर्थः *अन्यत्, पूर्वकृतात् भिन्नम् । णिजर्थमाह * उत्तमर्णम् इ उत्तमर्णेनेति पाठान्तरम् । हृक्रोरिति वा कर्मत्वम् । तात्पर्यं ह * पूर्वोक्तेति । प्रागुक्तरीत्येत्यर्थः ।

उ० ३। एवं लेख्यस्थले उक्त्वा साक्षिमात्रप्रमाणकऋणग्रहण षये आह * ससाक्षिके इति । साक्षिणां सर्वदा सांनिध्याभा वादिदं यौगपद्यविषयकमित्याह * कृत्स्ने इति । चस्य क्र मान्वयादाह * यच्चेति । यत्त्वित्यर्थः । क्वचित्तथैव पाठः । ति बहुव्रीहिः । तत्साक्षिसमक्षमित्यर्थः । क्वचिदेवमेव पाठः एवार्थे व्युत्क्रमे चेत्याह * एवेति ॥ ९४ ॥

इति लेख्यप्रकरणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ दिव्यप्रकरणम् ॥ ७ ॥

मि० लिखितसाक्षिभुक्तिलक्षणं त्रिविधं मानुषप्रमाणमुक्तम्। अथावसरप्राप्तं दिव्यं प्रमाणमभिधास्यन् तुलाग्न्याप इत्यादिभिराद्यैः पञ्चभिः श्लोकैर्दिव्यमातृकां कथयति। तत्र तावद्दिव्यान्युपदिशति।

या० तुलाग्न्यापो विषं कोशो दिव्यानीह विशुद्धये।

मि० तुलादीनि कोशान्तानि पञ्च दिव्यानीह धर्मशास्त्रे विशुद्धये संदिग्धस्यार्थस्य संदेहनिवृत्तये दातव्यानीति।

ननु अन्यत्रान्यान्यपि तण्डुलादीनि दिव्यानि सन्ति।

घटोऽग्निरुदकं चैव विषं कोशस्तथैव च।
तण्डुलाश्चैव दिव्यानि सप्तमस्तप्तमाषकः॥

इति पितामहस्मरणात्। अतः—

कथमेतावन्त्येवेत्यत आह।

या० महाभियोगेष्वेतानि

मि० एतानि महाभियोगेष्वेव नान्यत्रेति नियम्यते, न पुनरिमान्येव दिव्यानीति। महत्त्वावधिं च वक्ष्यति। नन्वल्पाभियोगेऽपि कोशोऽस्त्येव। कोशमल्पेऽपि दापयेदिति स्मरणात्। सत्यम्। कोशस्य तुलादिषु पाठो न महाभियोगेष्वेवेति नियमार्थः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किंतु सावष्टम्भाभियोगेऽपि प्राप्त्यर्थः । अन्यथा
ङ्काभियोगे एव स्यात् ।

अवष्टम्भाभियुक्तानां घटादीनि विनिर्दिशेत्।
तण्डुलाश्चैव कोशश्च शङ्कास्वेव न संशयः ॥

इति स्मरणात् ।

महाभियोगेषु शङ्कितेषु सावष्टम्भेषु चाविशे
प्राप्तावपवादमाह ।

या० शीर्षकस्थेऽभियोक्तरि ॥ ९५ ॥

मि० एतानि तुलादीन्यभियोक्तरि शीर्षकस्थे
युक्तस्य भवन्ति । शीर्षकं शिरः, व्यवहारस्य चतु
पादो जयपराजयलक्षणः। तेन च दण्डो लक्ष्यते।
तिष्ठतीति शीर्षकस्थः । तत्प्रयुक्तदण्डभागित्यर्थः।

बा० १। सङ्गतिमाह * लिखितेति। अभ्यार्हितत्वात्प्रवृत्ति
स्य विवक्षितत्वाच्चास्य पूर्वनिपातः। अथेत्यस्य कथयतीत्यन्व
यः। प्रतिबन्धकाशिष्यजिज्ञासानिवृत्तौ सत्यामवश्यवक्तव्य
रूपावसरसङ्गतिप्राप्तमित्यर्थः । दिव्यमिति जातावेकवचनं
लाधारणेत्यादिना। *दिव्यमातृकां, दिव्योपोद्घातम् । तत्रा
श्लोकमवतारयति * तत्रेति । दिव्यमातृकायां कथनीयाया
त्यर्थः। * तावत्, आदौ । नाम्ना वस्तुसंकीर्तनमुद्देशः।
त्वस्य विवक्षितत्वात्तुलाशब्दस्य पूर्वनिपातः । त्रयाणामितरे
द्वन्द्वः । समासान्तविधेरनित्यत्वान्न सः । विशुद्धिपदार्थ
*संदिग्धस्येत्यादिचतुर्थ्यन्तेन। नित्यसापेक्षत्वादाह *सन्दे
हवृत्तयेइति । योग्यतयाऽऽकाङ्क्षाशान्तये आह * दातव्यानि
२। एतान्येव दिव्यानीत्याशयेनावतरणमाह * नन्वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*धट इति । धटः स्यात्तु तुलाकाष्ठमिति कोशः । *पितामहेति ।
बृहस्पतिरपि,
धटोऽग्निरुदकंचैव विषं कोशश्च पञ्चमः ।
षष्ठं च तण्डुलाः प्रोक्ताः सप्तमं तप्तमाषकः ॥
अष्टमं फाल इत्युक्तं नवमं धर्मजं स्मृतम् ।
दिव्यान्येतानि सर्वाणि निर्दिष्टानि स्वयंभुवा ॥ इति ।
अतएव शङ्कायां बहुवचनसङ्गतिः । * एतावन्ति, पञ्च।

यद्यपि त्रेधा नियमः सम्भवति, अपराधविशेषे दिव्यस्वरूपे उभयत्रापि, तद्यथा महाभियोगरूपापराधेष्वेव दिव्यानीत्याद्यः, इयन्त्येव दिव्यस्वरूपाणीति द्वितीयः, मिलितस्तृतीयः, तथाप्याद्य एव नियमः स्वीक्रियते, न द्वितीयतृतीयौ, पितामहोक्तिविरोधादित्याह * एतानीति । तुलेत्यत्र निर्दिष्टानि दिव्यानि महाभियोगेष्वेवेति नियम इत्यर्थः। नपुनरित्यनेनार्थात्तृतीयस्यापि निरासः । पुनःशब्देन तन्निरास इतित्वयुक्तम् । उदक्षरत्वात् । * नपुनरिति । नत्वित्यर्थः । अनेन शङ्का समाहिता । नियम्यते इत्यस्यानुषङ्गः । ननु महत्त्वस्य सावधिकत्वेनानियमापत्तिरत आह * महत्त्वेति । नासहस्रादित्यादिनेति भावः । तथाच नानियम इति बोध्यम् ।

३। स्मृत्यन्तरविरोधापत्त्या प्रोक्तनियमो न घटते इत्याशङ्क्य परिहरति * नन्वल्पेत्यादि । पितामहमाह * कोशमल्पेऽपीति । *सत्यमिति । उक्तवचनाविरोधाय विधिनियमयोर्विधेर्ज्यायस्त्वेन तथैव स्वीक्रियते, न तु तस्य नियमशरीरे प्रवेशः। तथाच तस्य तैः सह पाठो न तदर्थोऽपितु यथा तुलादीनि सावष्टम्भाभियोगेषु एवमयमपीत्येवमर्थ इति भावः । * सावष्टम्भेति । अवष्टम्भेन सहितः सावष्टम्भः । स्वोपरि दण्डाङ्गीकारश्चावष्टम्भः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निश्चयः स इति कल्पतरुः । * अन्यथा, मूले कोशस्यानुपा[illegible]
ने । कोश इति शेषः । मूलानुक्तत्वात्स्मृत्यन्तरमाह *अवष्ट[illegible]
ति । सावष्टम्भेति पाठान्तरम् । पितामहोक्तिरियम् । *घटादी[illegible]
चत्वारि । *शङ्कास्वेवेति । शङ्कास्वेतानि योजयेदिति पाठान्तर[illegible]

४। तथाच महाभियोगो महाभिशापः । स च द्विविधः, [illegible]
ङ्कितः सावष्टम्भश्च। स्वोपरि दण्डमङ्गीकृत्य लापितः सावष्टम्भः
एवमल्पाभियोगेऽपि बोध्यम् । अत एवाह *महाभियोगेष्विति
तद्भेदमाह *शङ्कितेष्विति।उभयाविधमहाभियोगेष्वविशेषेण प्रा[illegible]
तृतीयपादे विशेषानादरेणैतेषां तुलादिचतुर्णां प्राप्तावित्य[illegible]
अनुवृत्त्या आह*एतानीति । चत्वारीत्यर्थः । अर्थादाह *अ[illegible]
युक्तस्येति । शक्यार्थमाह *शिर इति । प्रकृते व्यवहारपुरु[illegible]
तदाह * व्यवहारस्येति । स्पष्टार्थं पुनस्तत्स्वरूपमाह *जये[illegible]
प्रकृते तु पराजय एव विवक्षितः । अतएव तत्संबन्धाल्लक्ष[illegible]
माह *तेनचेति । तिष्ठतिरत्र अहानौ । समये तिष्ठ सुग्रीवेति[illegible]
अङ्गीकृतदण्डनं न जहातीत्यर्थः । अतएवाह * तदिति । [illegible]
जयेत्यर्थः । *इत्यर्थइति । तस्मिन्सतीत्यादिः । अभिशापदा[illegible]
शीर्षकस्थे पराजयहेतुकदण्डभाजि सत्येव एतानि भवन्ति। [illegible]
नेनेदं न कृतं स्यात्तदा मह्यं दण्डो देय इति वादी शीर्षकस्थ[illegible]
दृशे तस्मिन्सतीत्यर्थः । तथाच सावष्टम्भेष्वेव तेषु [1]एतेन शी[illegible]
ष्विति विशेषोक्त्या तदपवादत्वमित्यर्थः ॥ ९९ ॥

मि० ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधन[illegible]
इति भावप्रतिज्ञावादिन एव क्रियेति व्यव[illegible]
दर्शिता । तदपवादार्थमाह ।

या० रुच्या वाऽन्यतरः कुर्यादितरो वर्तयेच्छिरः ।

१ अस्य विशेषोक्त्या इत्यत्रान्वयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि० रुच्या ऽभियोक्त्रभियुक्तयोः परस्परसंप्रतिपत्त्याऽन्यतरोऽभियुक्तोऽभियोक्ता वा दिव्यं कुर्यात्। इतरोऽभियुक्तः शिरः शारीरमर्थदण्डं वा वर्तयेदङ्गीकुर्यात्। अयमभिसन्धिः। न मानुषप्रमाणवद्दिव्यं प्रमाणं भावैकगोचरम्, अपितु भावाभावावविशेषेण गोचरयति। अतश्च मिथ्योत्तरे प्रत्यवस्कन्दने प्राङ्न्याये वाऽर्थिप्रत्यर्थिनोरन्यतरस्येच्छया दिव्यं भवतीति।

मि० अल्पाभियोगे महाभियोगे शङ्कावष्टम्भयोरप्यविशेषेण कोशो भवतीत्युक्तम्। तुलादीनि विषान्तानि तु महाभियोगेष्वेव सावष्टम्भेष्वेवेति च नियमो दर्शितः। तत्रावष्टम्भाभियोगेष्वेवेत्यस्यापवादमाह।

या० विनापि शीर्षकात्कुर्यान्नृपद्रोहेऽथ पातके ॥९६॥

मि० राजद्रोहाभिशङ्कायां ब्रह्महत्यादिपातकाभिशङ्कायां च शिरःस्थायिना विनाऽपि तुलादीनि कुर्यात्, महाचौर्याभिशङ्कायां च।

यथाह,

राजभिः शङ्कितानां च निर्दिष्टानां च दस्युभिः।
आत्मशुद्धिपराणां च दिव्यं देयं शिरो विना॥ इति।

तण्डुलाः पुनरल्पचौर्यशङ्कायामेव।

चौर्ये तु तण्डुला देया नान्यत्रेति विनिश्चयः।

इति पितामहवचनात्। तप्तमाषस्तु महाचौर्याभिशङ्कायामेव।

चौर्यशङ्काभियुक्तानां तप्तमाषो विधीयते।

११०४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति स्मरणात् । अन्ये पुनः शपथा अल्प विषयाः ।

सत्यवाहनशस्त्राणि गोबीजकनकानि च ।
देवतापितृपादांश्च दत्तानि सुकृतानि च ॥
स्पृशेच्छिरांसि पुत्राणां दाराणां सुहृदां तथा ।
अभियोगेषु सर्वेषु कोशपानमथापि वा ॥
इत्येते शपथाः प्रोक्ता मनुना स्वल्पकारणे ।

इति नारदादिस्मरणात् । यद्यपि मानुषप्रमा निर्णयस्य निर्णायकं यत् तद्दिव्यमिति लोकप्रसिद्ध शपथानामपि दिव्यत्वं तथापि कालान्तरनिर्णयनि त्तत्वेन समनन्तरानिर्णयानिमित्तेभ्यो धटादिभ्यो भ्यो भेदेन व्यपदेशो ब्राह्मणपरिव्राजकवत् । कोश तु शपथत्वेऽपि धटादिषु पाठो महाभियोगविषय नावष्टम्भाभियोगाविषयत्वेन च धटादिसाम्यात् समनन्तरानिर्णयानिमित्तत्वेन । तण्डुलानां तप्तमा च समनन्तरानिर्णयानिमित्तत्वेऽप्यल्पाविषयत्वेन विषयत्वेन च धटादिवैलक्षण्यात्तेष्वपाठ इति ष्टव्यम् ।

एतानि च दिव्यानि शपथाश्च यथासंभवम्पूर्णा विवादेषु प्रयोक्तव्यानि ।

यत्तु पितामहवचनम्,

स्थावरेषु विवादेषु दिव्यानि परिवर्जयेत् ।

इति, तदपि लिखितसामन्तादिसद्भावे दिव्य परिवर्जयेदिति व्याख्येयम् । ननु विवादान्तरे प्रमाणान्तरसंभवे दिव्यानामनवकाश एव । स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऋणादिषु विवादेषु उक्तलक्षणसाक्ष्युपन्यासे अर्थिना कृतेऽपि प्रत्यर्थी यदि दण्डाभ्युपगमावष्टम्भेन दिव्यमवलम्बते तदा दिव्यमपि भवति । साक्षिणामाश्रयदोषसंभवात्, दिव्यस्य च निर्दोषत्वेन वस्तुतत्त्वविषयत्वात्, तल्लक्षणत्वाच्च धर्मस्य ।

यथाह नारदः,

तत्र सत्ये स्थितो धर्मो व्यवहारस्तु साक्षिणि ।
दैवसाध्ये पौरुषेयीं न लेख्यं वा प्रयोजयेत् ॥इति ।

स्थावरेषु विवादेषु प्रत्यर्थिना दण्डावष्टम्भेन दिव्यावलम्बने कृतेऽपि सामन्तादिदृष्टप्रमाणसद्भावे न दिव्यं ग्राह्यमिति विकल्पनिराकरणार्थं स्थावरेषु विवादेष्वित्यादिपितामहवचनं, नात्यन्तिकदिव्यनिराकरणार्थम् । लिखितसामन्ताद्यभावे स्थावराविवादेष्वनिर्णयप्रसङ्गात् ॥ ९६ ॥

बा० १। यद्यप्यव्यवहितसङ्गतिस्तत्र विकल्पमाहेत्येवं सम्भवति तथापि विशेषप्रतिपादनाय व्यवहितसङ्गतिमाह * तत इति । वस्तुतस्तदपवादत्वाभावादाह * तदपवादार्थमिति । तदर्थमुक्तापेक्षया विकल्पमाहेत्यर्थः। रुचिरत्र न प्रसिद्धेत्याह * अभियोक्त्रभियुक्तयोरिति । अन्यतरः इत्यत्र अल्पाचूतरमितिवत्स्वार्थे तरप् । उक्तादन्य इत्यर्थः। तदाह *अभियोक्ता वा दिव्यं कुर्यादिति । मौलविकल्प एवायम् । अतएवाह *इतरोऽभियुक्तइति । दण्डविकल्पमाह * अर्थदण्डं वेति । एतेन तरपो यथाश्रुतत्वेन तस्याभियोक्ताऽभियुक्तो वेति व्याख्यानम् अग्रेचैवमेवेति क्वचिदुपलभ्यमानमयुक्तं वेदितव्यम् ।

२। ननु दिव्यतत्त्वे शीर्षकस्थे इत्यनेनाभियोक्तुः शिरोवर्त्ति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वाभिधानादाभियुक्तस्य दिव्यमित्युक्तं, रुच्येत्यनेन तु अभि शिरोवर्त्तिनि तदिच्छया अभियोक्तुरपि दिव्यमुच्यते इत्युक्त ति तथैव कुतो नोक्तम्, अत आह * अयमभिसंधिरिति। भिप्राय इत्यर्थः। * भावैकेति। भावमात्रेत्यर्थः। इतिः न मात्तौ। अयं भावः। अयं च विकल्पोऽभियोक्त्रिच्छायां तदनिच्छायां त्वभियोज्यस्यैव दिव्यम्।

न कश्चिदभियोक्तारं दिव्येषु विनियोजयेत्।
अभियुक्ताय दातव्यं दिव्यं दिव्यविशारदैः॥

इति दिव्यतत्त्वे कातीयोक्तेरिति।

उ० ३। उत्तरपद्यमवतारयितुमुक्तसर्ववचनसिद्धमर्थमनुव * अल्पाभियोगेइति। यथाक्रमं कोशमल्पेऽपीत्यनेन, महाभि ष्वेतानीत्यनेन, शङ्कास्वेव न संशय इत्यनेन, तुलाग्न्याप तुलादिसहपाठेन च चतुर्षु स इत्युक्तमित्यर्थः। यथासंख्याभ व्यासस्समासाभ्यामुक्तिः। एतत्सूचक एव अपिः। * इति। जातावेकवचनम्। चो व्युत्क्रमे, दर्शितश्चेत्यर्थः। त महाभियोगेष्वेतानीत्यनेन, शीर्षकस्थे इत्यनेन द्वितीयो इति बोध्यम्। शङ्कास्वेवेत्येवकारस्तु तण्डुलान्वयाशयक बोध्यम्। * तत्र, तयोर्मध्ये।

४। मूले अथशब्दः समुच्चये पातकपदं महापातक त्याह * ब्रह्महत्यादीति। शीर्षकादित्यस्य व्याख्या * स्थायिनेति। तथाच राजद्रोहमहापातकयोः शङ्कायामपि दीनि कार्याणीति तदपवादत्वमिति भावः। अथसमुच्चये ह * महाचौर्याभिशङ्कायामिति। तन्मध्ये तत्रचेत्यर्थः। पिताम रदावाह * यथाहेति। साजात्यादेकवचनम्। * राजाभि अत्र राजभिरिति शङ्कामुपक्रम्यात्मशुद्धिपराणां च दिव्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेन निरवष्टम्भाभियोगे च दिव्यदानस्योपसंहारात्तन्मध्यपाति-निर्दिष्टानामित्यस्यापि शङ्काविषयत्वं बोध्यम् ।

दिव्यतत्त्वे कालिकापुराणे,

परदाराभिशापे च चौर्यागम्यागमेषु च ।
महापातकशस्ते च स्याद्दिव्यं नृपसाहसे ॥
विप्रतिपत्तौ विवादे अवर्णास्थापने कृते ।
तत्रैव दापयेद्दिव्यं शिरःपूर्वं महीपतिः ॥
परदाराभिमर्शे च बहवो यत्र वादिनः ।
शिरोहीनं भवेद्दिव्यमात्मनः शुद्धिकारणात् ॥ इति ।

*अगम्याः, परदाराभिन्नाः साधारणवेश्याद्याः । *शस्ते, अभिशस्ते । साहसं बलादन्यायः । विप्रतिपत्तौ परदाराभिशापादिविषयायाम् । विवादे ऋणादानादिविषये । अवर्णा निन्दा । परेति विशेषणमविवक्षितम् । अभिशापस्यानुवाद्यत्वात् । एवं बहव इत्याद्यपि । परदाराभिमर्शेचेति चौर्यादीनामप्युपलक्षणम् । तेन वाद्यभावेऽपि सर्वाभिशापे दिव्यं भवति । अत एव शुद्धिकारणादिति हेतूक्तिः, विनापीति मौलसामान्योक्तिश्च सङ्गच्छते ।

विष्णुरपि,

राजद्रोहे साहसेषु विनापि शीर्षकार्पणमिति ।

नारदोपि, (व्य० प० १।२७०)

आशिरांसि च दिव्यानि राजा भृत्येषु दापयेत् ।
अभियोगाभियुक्तानामन्येषां तु यथाक्रमम् ॥ इति ।

८। शङ्कास्वेवेत्येवकारं सफलयन्विरोधपरिहाराय विशेषमाह *तण्डुलाः पुनरिति । तण्डुलास्त्वित्यर्थः । *चौर्येत्विति । यद्यप्यत्र चौर्ये इत्येवोक्तं तथापि तण्डुलरूपाल्पादिव्यानुरोधेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निमित्तस्याप्यल्पत्वकल्पनमिति भावः ।

६। प्राग्वदाह * तप्तेति । * चौर्यशङ्केति पितामहोक्तिः
यद्यप्यत्र चौर्यशङ्केत्यविशेषेणोक्तं तथापि तप्तमाषस्य तीक्ष्ण
महादिव्यत्वान्नैमित्तिकतप्तमाषानुसारेण निमित्तस्य चौर्यश
महत्त्वं युक्तमिति भावः। इदं च तृतीये व्यक्तीभविष्यति।

७। *अन्ये, उक्तेभ्यः। *पुनः, तु। *वाहनम्, अश्वा
*बीजं, धान्यम्। देवता च पिता च तयोश्चरणान्। *दत्ता
भूम्यादीनि। *सुकृतानि, सदाचरणानि। स्पृशेदित्यस्य
त्रान्वयः। *सह्येषु, सहनयोग्येषु। स्वल्पेष्विति यावत्।*
शपानम्, कोशस्य जलविशेषस्य भक्षणम्।

८। ननु तुलादीनां दिव्यत्वमुक्तं मूलादौ, सत्यादीनां
शपथत्वमुक्तं नारदेन, तदयुक्तं, तेषामपि दिव्यलक्षणाक्रा
न्त्वादित्याशङ्कते * यद्यपीति। दिव्यलक्षणमाह * मानु
* अनिर्णेयस्य, अर्थस्य। लोकेत्यनेन शास्त्रोक्तत्वव्यव
उक्तलक्षणं दिव्यं द्विविधं, तत्कालनिर्णायकं कालान्तरनि
यकं च। तत्राद्यं तुलादि, द्वितीयं सत्यादि। तत्राद्यस्य
मान्तरत्वेऽपि द्वितीयस्य नामान्तरं शपथ इति। एवं सति
नोक्तिर्विशेषधर्मानिमित्तिकेत्याशयेन समाधत्ते * तथापि
निर्णयनिमित्तेत्यादिः षष्ठीतत्पुरुषः। गोबलीवर्दन्याय
सत्त्वादाह * ब्राह्मणेति। ब्राह्मणानामन्त्रयस्वेत्युक्तेऽपि
स्य तत्राविशिष्टत्वात्तदामन्त्रणेऽपि प्राप्ते पुनः परिव्राज
मन्त्रयस्वेति कथनं तत्प्राधान्यप्रतिपादनार्थं यथा तथा
दीनां सत्यादीनां च दिव्यत्वे तुल्येऽपि ततस्तेषां भेदेन
कालान्तरनिर्णयनिमित्तत्वद्योतनार्थम् इत्यर्थः। यथा तत्र
फलान्तरानुरोधेनैवमत्रापीति यावत्। यद्वा ब्राह्मणाना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परिव्राजकं चेत्युक्ते प्रोक्तरीत्या सिद्धे पुनस्तदुक्त्या यथा तस्य तदन्यपरत्वं तथाऽत्रापीत्यर्थः ।

९। ननु यदि कालान्तरनिर्णयनिमित्तानि शपथास्तर्हि कोशस्य सद्योनिर्णयनिमित्तेषु तुलादिषु पाठोऽनुपपन्नः, तस्य तदन्तर्गतत्वात्, अतः प्रागुक्तमनुस्मृत्यैवाह *कोशस्यत्विति । *विषयत्वेन चेति साम्ये हेतुः । *निमित्तत्वेनेति । घटादिसाम्यादित्यनुषज्यते ।

१०। ननु एवमपि तण्डुलतप्तमाषयोः सद्योनिर्णयनिमित्तत्वेन मूले तुलादिषु पाठः स्मृत्यन्तरवदुचितोऽत आह *तण्डुलानामिति । * अल्पेति । अल्पाभियोगेत्यर्थः । नन्वैकरूप्यमेव सर्वत्रोचितं न तु क्वचित् किञ्चित्कृतं वैलक्षण्यं क्वचित् किञ्चित् कृतं साम्यमिति वैरूप्यम्, अत आह * सन्तोष्टव्यमिति । सिद्धस्य गतिश्चिन्तनीयेति भावः । कोशस्याल्पशङ्कोभयविषयत्वेऽपि तन्मात्राविषयकत्वाद्युक्तस्तेषु पाठ इति तात्पर्यम् ।

११। विशेषं वक्तुं प्रतिजानीते *एतानि चेति । चो वाक्यालङ्कारे । *ऋणादिष्विति । ऋणादानादिरूपाष्टादशविवादेष्वित्यर्थः। नन्विदमयुक्तं, पितामहाविरोधादित्याशङ्क्य प्रागुक्तरीत्यैव परिहरति *यत्त्वित्यादि । स्थावरेष्विति विषयसप्तमी । सामन्तास्तत्राग्रे स्फुटीभविष्यन्ति । *व्याख्येयमिति । स्थावरविवादेषु नात्यन्तिकदिव्यनिषेधार्थमिदम् ।दृष्टप्रमाणाभावेऽनिर्णयप्रसङ्गात् । किन्त्वर्थिनो दृष्टप्रमाणसत्त्वे प्रत्यर्थिनि दण्डावष्टम्भेन दिव्यमवलम्बत्यपि दृष्टेन अदृष्टेन वा निर्णय इति प्रागुक्तरीत्या प्राप्तविकल्पनिरासेन दिव्यनिषेधार्थं, विवादान्तरे तु विकल्प एवेति भावः ।

१२। इदमेव ध्वनयन्स्थावरपदानर्थक्यमुक्तयुक्तेस्तुल्यत्वात्मा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मं परिहर्तुं शङ्कते *नान्विति । * विवादान्तरेष्वपीति । स्थाव
विषयान्येष्वपीत्यर्थः । *प्रमाणेति । दिव्यान्यमानुषप्रमाणे
र्थः । ऋणादिष्विति विषयसप्तमी । * दण्डाभ्युपगमेति
दण्डाङ्गीकारनिश्चयेनेत्यर्थः । अपिना तस्यापि समुच्चयः ।
सम्भवतीतिन्यायविरोधोऽत आह *साक्षिणामिति।आशयोऽ
करणम् । हेत्वन्तरमाह *दिव्यस्यचेति । चोऽन्ते योज
हेत्वन्तरमाह *तल्लक्षणत्वादिति । धर्मस्य वस्तुतत्त्वविषयक
ज्ञेत्यर्थः ।

१३। अत्र हेतौ मानमाह *यथाहेति । *तत्र, दिव्ये ।
त्ये, तद्रूपे । *साक्षिणि व्यवहारस्तु, तन्मात्रं तु । * दैवसा
तदेकसाध्ये । *पौरुषेयीं, क्रियां साक्षिरूपाम् । नेत्युभया
यि । अयं च दोषसम्भावनामात्रेण साक्ष्यादिनिषेधो, न
स्तव इति बोध्यम् ।

१४। एवमन्यत्रोक्त्वा स्थावरेषु कथयन् स्थावरपदसा
तत्राह *स्थावरेष्विति । *सामन्तादिदृष्टेति । तद्रूपदृष्टेत्य
नेत्युत्तरान्वयि । * विकल्पेति । स्थावरेषु मानुषदिव्यप्र
योर्न विकल्प इति विकल्पनिराकरणार्थः स्थावरशब्द
भावः । *आत्यन्तिकेति । सर्वथेत्यर्थः । निषेधे हेतुमाह
खितेति ॥ ९६ ॥

मि० किंच ।

या० सचैलस्नातमाहूय सूर्योदयउपोषितम् ।
कारयेत्सर्वदिव्यानि नृपब्राह्मणसन्निधौ ॥ ९७

मि० पूर्वेद्युरुपोषितमुदिते सूर्ये सचैलस्नातं दिव्य
हिणमाहूय नृपस्य सभ्यानां च ब्राह्मणानां स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वाणि दिव्यानि कारयेत्प्राड्विवाकः।
त्रिरात्रोपोषिताय स्युरेकरात्रोषिताय वा।
नित्यं दिव्यानि देयानि शुचये चार्द्रवाससे॥

इत्युपवासविकल्पः पितामहेनोक्तो बलवदबलवन्महाकार्याल्पकार्यविषयत्वेन व्यवस्थितो द्रष्टव्यः। उपवासनियमश्च कारयितुः प्राड्विवाकस्यापि।

दिव्येषु सर्वकार्याणि प्राड्विवाकः समाचरेत्।
अध्वरेषु यथाऽध्वर्युः सोपवासो नृपाज्ञया॥

इति पितामहवचनात्। अत्र च यद्यपि सूर्योदये इत्यविशेषेणोक्तं तथापि शिष्टसमाचाराद्भानुवारे दिव्यानि देयानि। तत्रापि—

पूर्वाह्णेऽग्निपरीक्षा स्यात्पूर्वाह्णे च धटो भवेत्।
मध्याह्ने तु जलं देयं धर्मतत्त्वमभीप्सता॥
दिवसस्य तु पूर्वाह्णे कोशशुद्धिर्विधीयते।
रात्रौ तु पश्चिमे यामे विषं देयं सुशीतले॥

इति पितामहोक्तो विशेषो द्रष्टव्यः। अनुक्तवेलाविशेषाणां तण्डुलतप्तमाषप्रभृतीनां पूर्वाह्णे एव प्रदानम्।

पूर्वाह्णे सर्वदिव्यानां प्रदानं परिकीर्तितम्।

इति सामान्येन नारदस्मरणात्॥ (व्य. प. १।२६८)

अहनि त्रिधा विभक्ते पूर्वो भागः पूर्वाह्णो मध्यो मध्याह्नः उत्तरोऽपराह्णः। तथाऽपरोऽपि कालविशेषो विधिप्रतिषेधमुखेन दर्शितः।

विधिमुखस्तावत्—

अग्नेः शिशिरहेमन्तौ वर्षाश्चैव प्रकीर्तिताः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शरद्ग्रीष्मे तु सलिलं हेमन्ते शिशिरे विषम् ॥
चैत्रो मार्गशिरश्चैव वैशाखश्च तथैव च।
एते साधारणा मासा दिव्यानामविरोधिनः ॥
कोशस्तु सर्वदा देयस्तुला स्यात्सार्वकालिकी॥

कोशग्रहणं सर्वशपथानामुपलक्षणम्। तण्डु-
नां पुनर्विशेषानभिधानात्सार्वकालिकत्वम्।

प्रतिषेधमुखोऽपि, (ना. व्य. प. १ । २५९)

न शीते तोयशुद्धिः स्यान्नोष्णकालेऽग्निशोधनम्।
न प्रावृषि विषं दद्यात्प्रवाते न तुलां तथा॥
नापराह्णे न सन्ध्यायां न मध्याह्ने कदाचन। ३२०॥

न शीते तोयशुद्धिः स्यादित्यत्र शीतशब्देन हे-
मन्तशिशिरवर्षाणां ग्रहणम्, नोष्णकालेऽग्निशो-
मित्यत्रोष्णकालशब्देन च ग्रीष्मशरदोः। विधानल-
स्यापि पुनर्निषेध आदरार्थः। प्रयोजनं तु वक्ष्यते॥

बा० १।* किञ्चेति। दिव्यस्य कालाद्युच्यते इत्यर्थः।
चैलस्नातमिति बहुव्रीहिः। सचैलं स्नातमिति पाठान्त-
भूतप्रत्ययादिसूचितमाह * पूर्वेद्युरिति। अर्धबिम्बनिरास
*उदिते इति। सूर्योदये इति बहुव्रीहिरिति भावः। ब्राह्म-
पदार्थमेवाह * सभ्यानां चेति। नृपस्योक्तत्वेनार्थादाह *
डिति। अत्रोपोषित इति सामान्येनोक्तावपि पितामहोक्त-
शेषमाह * त्रिरात्रोपोषितायेति। * शुचये, कृतस्नानाय। *
वाससे, सचैलस्नानाय। त्रिरात्रोपोषिताय अथवा एकरात्रो-
षिताय नित्यमवश्यं दिव्यानि देयानि स्युरित्यर्थः। नित्यमि-
अदाने प्रत्यवायः सूचितः। त्रिरात्रोपोषितायैवह्येकेति पाठान्त-
एकरात्रोपोषिताय त्रिरात्रोपोषिताय वा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति मयूखादिधृतपाठस्तु मुनिशैलीविरुद्धत्वादुपेक्ष्यः । ननु बलवदिति न युक्तं, कार्यतारतम्येऽपि तथापत्तेः । अत आह * महेति ।

२। विशेषमाह * उपवासनियमश्चेति । चेनार्द्रवासस्त्वादिसमुच्चयः। तदाह नारदः,

प्राड्विवाकस्ततो विप्रो वेदवेदाङ्गपारगः ।
श्रुतवृत्तोपसम्पन्नः शान्तचित्तो विमत्सरः ॥
सत्यसन्धः शुचिर्दक्षः सर्वप्राणिहिते रतः ।
उपोषितश्चार्द्रवासाः कृतदन्तानुधावनः ॥

सर्वासां देवतानां च पूजां कृत्वा यथाविधि । इति ।

* शिष्टेति । वस्तुतस्तु सूर्यस्य तद्वारस्योदयो यत्रेति, सूर्ये तद्वारे उदयेऽर्थाद्रवेरिति वाऽर्थ इति स्मार्त्तमेवेदमिति बोध्यम् ।

३ । * तत्रापि, भानुवारेऽपि । विशेष इत्यत्रान्वयः । दिवसस्येत्यस्य सर्वत्र सम्बन्धः । स्पष्टार्थं विषान्यदिव्यमात्रे दिवसस्य प्राधान्यसूचनार्थमिदं विशेषणम् । सुशीतले इति हेतुगर्भं यामविशेषणम् । तु शीतले इति पाठान्तरम् । सुशीतलमिति पाठस्त्वयुक्तः ।

४ । विशेषमाह * अनुक्तेति । एतेन न्यूनता निरस्ता । कालस्योक्तत्वादाह * वेलेति । प्रभृतिशब्देन फालादिग्रहणम् । * पूर्वाह्णे इति ।

अहोरात्रोषिते स्नाते त्वार्द्रवाससि मानवे–(ना.व्य.प.१।२६८)
इति अस्य पूर्वार्द्धम् । पूर्वाह्णादीनामनेकत्वादाह * अहनीति ।

५ । पितामहोक्तमेव विशेषान्तरमाह * तथेति । मासादिरित्यर्थः । * मुखेन, तदुभयद्वारा । * विधीति । तत्रेत्यादिः । बहुव्रीहिः । एवमग्रेऽपि । शिशिरहेमन्तावि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यार्षम् । ऋतुनक्षत्राणामानुपूर्व्येणेत्युक्तेः । एवं शरद्ग्रीष्मे ... पि बोध्यम् । अतएवाग्रे तथैव प्रयोगद्वयम् । अन्त्ये समा... द्वन्द्वः । वर्षाण्येवेति कल्पतरुधृतोऽपपाठः । तस्य स्त्रीत्वात् । कीर्तित इति पाठे काल इत्यस्य विशेष्यत्वं बोध्यम् ।

यो यस्य विहितः कालो विधिर्यस्य च यो यथा ।
तं प्रवक्ष्यामि तत्त्वेन वादिनश्च बलाबलम् ॥

इति इतः प्रागुक्तेः । अतएव—

अग्निः शिशिरहेमन्तवर्षासु परिकीर्तितः ।

इति मयूखधृतपाठोऽप्ययुक्तः । * कोशस्त्... अस्य स्थाने—

घटः सर्वर्तुकः प्रोक्तो ऽवाते वाति विवर्जयेत्— इति कल्पतर्वादौ । इदं नारदीयमिति केचित् ।

६ । न्यूनतां निराचष्टे * कोशेति । चतुर्णां दिव्यानां ... मुक्तत्वात्तन्मध्यपाठसत्त्वादिति भावः । तत्रापाठात् ... * तण्डुलेति । अतएव पुनस्त्वर्थः । * विशेषेति । अग्न्यादी... भावः । शङ्काविषयतया सहपाठाच्चेत्यपि बोध्यम् । तत्समा... चैत्रादिरेव काल इति बोध्यम् ।

७ । द्वितीयमाह * प्रतिषेधेति । * नशीते इति ।

विचार्य धर्मनिपुणैर्धर्मशास्त्रविशारदैः ।
धर्मे सर्वर्तुकं प्रोक्तं पण्डितैर्घटधारणम् ॥ (२६०)
वर्षासु समये वह्निर्हेमन्ते शिशिरे तथा ।
ग्रीष्मे सलिलमित्युक्तं विषं काले तु शीतले ॥ (२...

इति इतः प्राक् नारदोक्तिः । * प्रवाते, प्रकृष्टे वा...

---

१ न शीते इत्यनन्तरं विचार्यधर्मनिपुणैरिति श्लोक उपल... वर्षासुसमये इति तु श्लोकचतुष्टयव्यवहितं पूर्वमुपलभ्यते । त...
वर्षासु वह्निरित्युक्तः शिशिरेतु घटः स्मृतः—इति पूर्वार्धं ...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ति। न मध्याह्ने इति निषेधो जलान्यपरः। अतः प्रागुक्तपितामहविरोधो न।

८। विध्येकवाक्यतायै विरोधनिरासाय चाह * नशीते इत्यादि। * हेमन्तेति। मार्गशीर्षान्येत्यादिः। * उष्णकालशब्देन च, उष्णकालशब्देनापि। * ग्रीष्मशरदोः, ग्रहणमित्यनुषज्यते। एवं प्रावृट्शब्दो ग्रीष्मशरदोरप्युपलक्षणमिति बोध्यम्।

अव्यवस्थितमर्यादं विषं प्रावृषि जायते। इति पितामहः।

९। ननु ग्रीष्मादिकालविधेरेवान्यकालनिवृत्तौ सत्यां पुनर्निषेधोऽफलोऽतआह * विधानलब्धस्यापीति। निषेधविषयकालस्येत्यर्थः। यथाश्रुतेऽनुपपत्तिः स्पष्टैव।

१०। ज्योतिःशास्त्रे विशेष उक्तः,

सिंहस्थे मकरस्थे च जीवे चास्तमिते तथा।
मलमासे न कर्त्तव्या परीक्षा जयकाङ्क्षिणा॥
रविशुद्धौ गुरोश्चैव न शुक्रेऽस्तं गते पुनः।
सिंहस्थे च रवौ नैव परीक्षा शस्यते बुधैः॥
नाष्टम्यां न चतुर्दश्यां प्रायश्चित्तपरीक्षणम्।
न परीक्षाधिवासश्च शनिभौमदिने भवेत्॥
नो शुक्रास्तेऽष्टमार्के गुरुसहितरवौ जन्ममासेऽष्टमेन्दौ।
विष्टौ मासे मलाख्ये कुजशनिदिवसे जन्मतारासु चाथ॥
नाडीनक्षत्रहीने गुरुरविरजनीनाथताराविशुद्धौ।
प्रातः कार्या परीक्षा द्वितनुचरग्रहांशोदये शस्तलग्ने॥

इति। * वक्ष्यतइति। अनुपदमेव कालान्तरे त्वित्यादिना॥९७॥

मि० अधिकारिव्यवस्थामाह।

या० तुला स्त्रीबालवृद्धान्धपङ्गुब्राह्मणरोगिणाम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अग्निर्जलं वा, शूद्रस्य यवाः सप्त विषस्य वा॥९८

मि० स्त्री स्त्रीमात्रं जातिवयोऽवस्थाविशेषानादरे बाल आषोडशाद्वर्षाज्जातिविशेषानादरेण। वृद्धोऽ तिकावरः। अन्धो नेत्रविकलः। पङ्गुः पादविक ब्राह्मणो जातिमात्रम्। रोगी व्याधितः। एतेषां धनार्थं तुलैवेति नियम्यते। अग्निः फालस्तप्तमा क्षत्रियस्य। जलमेव वैश्यस्य। वाशब्दोऽवधारणे षस्य यवा उक्तपरिमाणाः सप्तैव शूद्रस्य शोध भवन्ति। ब्राह्मणस्य तुलाविधानात्, शूद्रस्य सप्त विषस्य वेति विषविधानात्, अग्निर्जलं क्षत्रियवैश्यविषयं युक्तम्। एतदेव स्पष्टीकृतम्-

पितामहेन,

ब्राह्मणस्य धटो देयः क्षत्रियस्य हुताशनः।
वैश्यस्य सलिलं प्रोक्तं विषं शूद्रस्य दापयेत्॥

यत्तु स्त्र्यादीनां दिव्याभावस्मरणम्, (ना. प. १। २५६)

सव्रतानां भृशार्तानां व्याधितानां तपस्विनाम्
स्त्रीणां च न भवेद्दिव्यं यदि धर्मस्त्वपेक्षितः॥

तद् रुच्या वाऽन्यतरः कुर्यादिति वि निवृत्त्यर्थम्। एतदुक्तं भवति। अवष्टम्भा गेषु स्त्र्यादीनामभियोक्तृत्वेऽभियोज्यानामेव दि म्, तेषामभियोज्यत्वेऽप्यभियोक्तृणामेव दि परस्पराभियोगे तु विकल्प एव। तत्रापि तुलैव वचनेन नियम्यते। तथा, महापातकादिशङ्काभि स्त्र्यादीनां तुलैवेति। एतच्च वचनं सर्वदिव्यसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णेषु मार्गशिरश्चैत्रवैशाखेषु स्त्र्यादीनां सर्वदिव्यसमवधाने नियामकतयाऽर्थवत्। न च सर्वकालं स्त्रीणां तुलैवेति।

स्त्रीणां च न विषं प्रोक्तं न चापि सलिलं स्मृतम्।
घटकोशादिभिस्तासामतस्तत्त्वं विचारयेत्॥

इति विषसलिलव्यतिरिक्तघटकोशाग्न्यादिभिः शुद्धिविधानात्। एवं बालादिष्वपि योजनीयम्। तथा, ब्राह्मणादीनामपि न सार्वकालिकस्तुलादिनियमः।

सर्वेषामेव वर्णानां कोशशुद्धिर्विधीयते।
सर्वाण्येतानि सर्वेषां ब्राह्मणस्य विषं विना॥

इति पितामहवचनात्। तस्मात्साधारणे काले बहुदिव्यसमवधाने तुलादिनियमार्थमेवेदं वचनम्। कालान्तरे तु तत्तत्कालविहितं सर्वेषाम्। तथाहि। वर्षास्वग्निरेव सर्वेषाम्। हेमन्तशिशिरयोस्तु क्षत्रियादित्रयाणामग्निविषयोर्विकल्पः। ब्राह्मणस्य त्वग्निरेव न कदाचिद्विषम्। ब्राह्मणस्य विषं विनेति प्रतिषेधात्। ग्रीष्मशरदोस्तु सलिलमेव। येषां तु व्याधिविशेषेणाग्न्यादिनिषेधः—

कुष्ठिनां वर्जयेदग्निं सलिलं श्वासकासिनाम्।
पित्तश्लेष्मवतां नित्यं विषं तु परिवर्जयेत्॥ इति,

तेषामग्न्यादिकालेऽपि साधारणं तुलाद्येव दिव्यं भवति।

तथा—

तोयमग्निर्विषं चैव दातव्यं बलिनां नृणाम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति वचनाद् दुर्बलानामपि । सर्वथा विधि-षेधात् ऋतुकालानातिक्रमेण जातिवयोवस्थाश्रि-दिव्यानि देयानि ॥ ९८ ॥

बा० १ । * अधीति । वर्णादीत्यर्थः । तथोक्तिस्वारस्य-*स्त्रीमात्रमिति । मात्रार्थं यावत्त्वं विशदयति * जातीति । ग्रेऽपि । ब्राह्मणीत्वादिर्जातिः । वर्षादिर्वयः । तत्कृता एवाव-बाल्यादयः । * नेत्रेति । लोकप्रसिद्ध्यनुरोधेनेदम् । यथातु तथा अपूर्णेत्यादिः । महाभियोगेषु सावष्टम्भेषु प्रागुक्तवाक्ये-सर्वेषां प्राप्तेराह * तुलैवेतीति ।

२ । तृतीयपादार्धं व्याचष्टे * अग्निरिति । पूर्ववदनि-एवासम्बन्धात्स्मृत्यन्तरानुरोधाच्चेदमुपलक्षणमित्याह * इति । तत्रावशिष्टार्थमाह * जलमिति । ननु जलंवेत्यस्य-मेवेति कथमर्थो ऽत आह * वाशब्द इति ।

वा स्याद्विकल्पोपमयोरेवार्थेऽपि समुच्चये । इति को-
एतस्याग्रेऽप्यन्वयो बोध्यः । अतएव सप्तैवेत्युक्ति-

३ । अवशिष्टं व्याचष्टे * विषस्येति । * उक्तेति । पूर्व-यान्ते इति भावः । नन्वग्निजलविषाणां श्रौतानां श्रौतत्व-विकल्पोऽस्तु किमित्यश्रौतक्षत्रवैश्यविषयतास्वीकारोऽ-*ब्राह्मणस्येति । *युक्तमिति । परिशेषादिति, अन्यथा न-पत्तेरेकस्य वाशब्दस्याधिक्यात्स्मृत्यन्तरानुरोधाच्चेति भा-एतेन विषस्य चेति क्वाचित्कः पाठः प्रत्युक्तः । एतदेवाह * वेति । * दापयेत्, नृप इति शेषः । नारदोऽप्येवम् । गोर-दिद्विजानामप्येवं बोध्यम् । तेषां तत्समत्वस्योक्तत्वात् ।

४ । विरोधं परिहरति * यत्त्विति । नारदमाह * सत्र-मिति । * भृशेति । आतिशयिताधिग्रस्तानामित्यर्थः । इ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नामिति पाठस्तु कल्पतरौ स्थितो न युक्तः । पौनरुक्त्यापत्तेः । * अपेक्षित इति । अपेक्ष्यते इति द्वितीयः पाठः । अवेक्ष्यतेइति तृतीयः पाठः । * इति विकल्पेति । इतिपक्षप्राप्तदिव्येत्यर्थः ।

५। ननु कथमनेन तन्निवृत्तिरतआह * एतादिति । स्त्र्यादीनामिति पूर्वान्वय्यपि । अन्यैः सहेति शेषस्तत्र । वैपरीत्ये ऽप्याह * एतेषामिति । स्त्र्यादीनामित्यर्थः । ननु स्त्र्यादीनामन्यैः सह तदभियोगे पक्षद्वयेऽपि तदन्येषामेव दिव्यमित्यस्तु अन्यतरविकल्पः, तथापि तेषां मिथोऽभियोगे कथम्, अत आह * परस्परेति । * विकल्प इति । ऐच्छिकविकल्प इत्यर्थः । ननु दिव्यकर्तृविकल्पवद्दिव्यविकल्पोऽप्यस्त्विति चेन्न । तस्य न्यायतः प्राप्तत्वेऽपि तुलास्त्रीति वाक्येन नियामकेन बाधात्। * तत्रापीति। दिव्यानां मध्येऽपीत्यर्थः । *अनेन, तुलास्त्रीति मूलवचनेन। नायं नियमः सावष्टम्भाभियोगे एव, किंत्वन्यत्रापीत्याह * तथेति । अयं समुच्चये, न सादृश्ये । तच्छङ्काभियोगे सर्वथा सावष्टम्भाभियोगसाम्याभावात् । तुलानियमसाम्यभावाशयको वा तथाशब्दः । नियम्यते इत्यस्यानुषङ्गः ।

६। नन्वेवं तुलानियमस्य स्त्रीणां सार्वकालिकत्वापत्तिः, तस्याप्यनेन बाधात्, अत आह * एतच्चेति। स्त्रीबालेत्यादिमूलवाक्यं चेत्यर्थः । अर्थवदित्यत्रान्वयः । मासक्रमस्य विवक्षितत्वादाह * मार्गेति । अयमकारान्तः शब्दः । * अर्थवत्, सफलं सम्भावितम् । अन्यथा सार्थक्यं निराचष्टे * नचेति । नात्वित्यर्थः । * तुलैवेतीति । नियामकतयेत्यादेरनुषङ्गः । नारदमाह * स्त्रीणान्त्विति ।

क्लीबान्नरान्सत्त्वहीनान् परितश्चार्दितान्तरान् ।
बालवृद्धातुरांस्त्रीश्च परीक्षेत धटे सदा ॥ इति–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्य पूर्वपद्यम् । * अतः, यतो निषेधस्तयोः अत
अन्तस्तत्त्वमिति पाठे आन्तरं वस्तुतत्त्वमित्यर्थः । आदि
माह * अग्न्यादिभिरिति । आदिना तण्डुलादि ।

७। वर्णविषये विशेषमाह * तथेति । उक्तं सर्व
ति स्पष्टार्थं * तस्मादिति । चैत्रादिमासत्रये इत्यर्थः ।
न्येति । पात्रादित्वात् स्त्रीत्वं न । * इदंवचनमिति ।
त्यादिमूलवाक्यमित्यर्थः ।

८। एवव्यवच्छेद्यं दर्शयन् प्रयोजनं तु वक्ष्यते इति
प्रयोजनं दर्शयति * कालान्तरे त्वित्यादि । * सलिल
सर्वेषामिति भावः ।

९। अयं च कालविशेषेऽग्न्यादिनियमः कुष्ठाद्यनु
इति विशेषान्तरमाह * येषां त्विति । अपिना साधार
समुच्चयः । वर्णाद्याशयेनाह *तुलाद्येवेति ।

१०। किञ्च स बलिष्ठविषयक इत्याह *तथेति ।
नामपीति । अग्न्यादीत्यादेरनुषङ्गः । उक्तं प्रयोजन
*सर्वथापीति । विधिप्रतिषेधाद्दतुकालानतिक्रमेणेति पाठः

मि॰ महाभियोगेष्वेतानीत्युक्तं, तत्राभि
यदपेक्षं महत्त्वं तदिदानीमाह ।

या॰ नासहस्राद्धरेत्फालं न विषं न तुलां तथा

मि॰ पणसहस्रादर्वाक् फालं विषं तुलां वा
रयेत् । मध्यवर्ति जलमपि ।

यथोक्तम्,

तुलादीनि विषान्तानि गुरुष्वर्थेषु दापयेत् ।
अत्र कोशस्याग्रहणम् । कोशमल्पेऽपि दा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यल्पाभियोगेऽपि तस्य स्मरणात्। एतानि चत्वारि दिव्यानि पणसहस्रादूर्ध्वमेव भवन्ति, नार्वागित्यर्थः। नन्वर्वागप्यग्न्यादीनि पितामहेन दर्शितानि,

सहस्रे तु घटं दद्यात्सहस्रार्द्धे तथाऽऽयसम्।
अर्धस्यार्द्धे तु सलिलं तस्यार्द्धे तु विषं स्मृतम्॥ इति।

सत्यम्। तत्रेत्थं व्यवस्था। यद्द्रव्यापहारे पातित्यं भवति तद्विषयं पितामहवचनम्, इतरद्रव्यविषयं योगीश्वरवचनमिति। एतच्च वचनद्वयं स्तेयसाहसविषयम्। अपह्नवे तु विशेषो दर्शितः—

कात्यायनेन,

दत्तस्यापह्नवो यत्र प्रमाणं तत्र कल्पयेत्।
स्तेयसाहसयोर्दिव्यं स्वल्पेऽप्यर्थे प्रदापयेत्॥
सर्वद्रव्यप्रमाणं तु ज्ञात्वा हेम प्रकल्पयेत्।
हेमप्रमाणयुक्तं तु तदा दिव्यं प्रयोजयेत्॥
ज्ञात्वा संख्यां सुवर्णानां शतनाशे विषं स्मृतम्।
अशीतेस्तु विनाशे वै दद्यादेव हुताशनम्॥
षष्ट्या नाशे जलं देयं चत्वारिंशति वै घटम्।
विंशद्दशविनाशे तु कोशपानं विधीयते॥
पञ्चाधिकस्य वा नाशे ततोऽर्द्धार्द्धस्य तण्डुलाः।
ततोऽर्द्धार्द्धविनाशे हि स्पृशेत्पुत्रादिमस्तकान्॥
ततोऽर्द्धार्द्धविनाशे तु लौकिक्यश्च क्रियाः स्मृताः।
एवं विचारयन् राजा धर्मार्थाभ्यां न हीयते॥ इति।

ज्ञात्वा संख्यां सुवर्णानामित्यत्र सुवर्णशब्दः षोडश माषाः सुवर्ण इत्युक्तपरिमाणवचनः। नाशशब्दश्चात्रापह्नववचनः। नासहस्राद्धरेत्फालमित्यत्र तु ता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिकपणसहस्रं बोद्धव्यम् ।

मि० ननु नृपद्रोहे महापातके चैतानि दिव्यान्यु नि, तत्कथं नासहस्राद्धरेत्फालमित्यत्राह।

या० नृपार्थेष्वभिशापे च वहेयुः शुचयः सदा ॥९९

मि० नृपद्रोहेषु महापातकाभियोगे च सदा संख्यामनपेक्ष्यैवैतानि दिव्यानि कुर्युरुपवासा शुचयः सन्तः । तथा देशविशेषोऽपि—

नारदेनोक्तः, (व्य० प० १।२६५)

सभाराजकुलद्वारदेवायतनचत्वरे ।
निखेयो निश्चलः पूज्यो धूपमाल्यानुलेपनैः॥

निखेयो घटः । व्यवस्था च-

कात्यायनेनोक्ता,

इन्द्रस्थानेऽभिशस्तानां महापातकिनां नृण
नृपद्रोहे प्रवृत्तानां राजद्वारे प्रयोजयेत् ॥
प्रातिलोम्यप्रसूतानां दिव्यं देयं चतुष्पथे।
अतोऽन्येषु च कार्येषु सभामध्ये विदुर्बुधाः
अस्पृश्याधमदासानां म्लेच्छानां पापकारि
प्रातिलोम्यप्रसूतानां निश्चयो न तु राजनि।
तत्प्रसिद्धानि दिव्यानि संशये तेषु निर्दि

इति ॥ ९९ ॥

इति दिव्यमातृका ॥

बा० १। व्यवहितसङ्गतिमाह * महेति । * तत्र, भियोगेषु । पञ्चम्युपपत्तये आह * अर्वागिति । * मिति । सादृश्यादग्निमित्यर्थः । तस्य मूलकृता नैवोक्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथैव वाच्ये एवमुक्तिस्तु तस्यापि प्रसङ्गतोऽभिमतत्वसूचनाय। एकेनैवेष्टसिद्धावधिकं स्पष्टार्थमिति सूचयितुमाह * नेति। हरेदित्यस्यान्तर्भावितण्यर्थतया लक्ष्यार्थमाह * कारयेदिति। न्यूनतानिरासाय आह *मध्येति। अग्नेस्तु फालत्वेनैव ग्रहणसम्भवस्योक्तत्वादाह *जलमिति। तुलाग्न्याप इत्यत्र तुलाविषयोर्मध्ये स्थितत्वात्तस्यापि तत्त्वमित्यर्थः। नेत्यादेरनुषङ्गः। *यथोक्तमिति। पितामहेनैवेति भावः। *अत्र, नासहस्रादित्यत्र। तदेकवाक्यतापत्तेः। *अग्रहणमिति। न ग्रहणमित्यर्थः। *अल्पेऽपीति। तथाचैतेषां गुरुष्वेवेत्यादिनियमात्तस्य च साधारण्याद्वैलक्षण्येनाग्रहणमिति भावः।

२। तमेव नियमं फलितमाह * एतानि चत्वारीति। तुलाग्निजलविषाणीत्यर्थः। संज्ञायाः प्रागुक्तत्वादाह *पणेति। सहस्रादिति अभिव्याप्तौ आङो योगे पञ्चमी। तमभिव्याप्येत्यर्थः। तत्राग्रिमानिरासाय अर्वागिति शेषो व्याख्याने उक्तः। तथाच व्युत्क्रमः सूचितः। तदाह * सहस्रादूर्ध्वमेवेति। * नार्वागिति। तदूर्ध्वतो नार्वागित्यर्थः।

३। अत एव सहस्रेऽपि नेत्याशयेनाह * नन्विति। अर्वागपीति। ऊर्ध्वत एवार्वागपीत्यर्थः। आयसं फालम्। * तत्र, विरोधे सति। * यद्द्रव्येति। सुवर्णेत्यर्थः।

४। तथासति फलितं विशेषमाह *एतच्चेति। नासहस्रादिति मौलम्, सहस्रेत्विति पैतामहं चेत्यर्थः। *स्तेयेति। स्तेयसाहसोभयविषयमित्यर्थः। ननु कल्पतरुणा नासहस्रादिति वाक्यं पणसहस्रादूर्ध्वमेवापह्नवे फालादिक्रियेत्येवमपह्नवविषयतया व्याख्यातमिति तथैव कुतो नोक्तमिति चेन्न। उपस्थितपूर्वोक्तसङ्गतिसम्भवेऽनुपस्थितपरतया व्याख्यानस्यानौचित्यात्। त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

थाच्च स विषयो मूले नोक्त एव ।

५। तदेतत् ध्वनयन्नाह *अपह्नवेत्विति। *प्रमाणम्, ह्नुतद्रव्यानुसारेण दिव्यानि । *स्तेयेति । अत्र ब्राह्मणव न्यायेन स्तेयान्यसाहसपरं साहसपदम् । स्वल्पेऽप्यर्थे पिना महतः समुच्चयः । तत्प्रकारमेवाह *सर्वेति । *युक्तं सम्बद्धं नासंबद्धं, तत्तुल्यमिति यावत् । *ज्ञात्वा संख्यां पूर्वान्वयि । *संख्यां, प्रमाणम् । सुवर्णानामित्यस्य मध्य न्यायेनान्वयः । *चत्वारिंशतीति । तत्संख्याकेषु सुवर्णेषु ह्नुतेष्वित्यर्थः । *विंशेति । विंशतिः प्रमाणमस्येति विंश दश च तेषां विनाशे इत्यर्थः । विंशद्दशेति पाठान्तरम् । दशेति तृतीयः पाठः । पञ्चार्धिकस्येति पाठः । पञ्चैवार्धं, ठक्, तस्येत्यर्थः। पूर्वान्वयीदं, वाशब्दस्वारस्यात्। तदर्धेत्य च्छब्देन दश परामृश्यन्ते। तत इत्यनेन पञ्च। अग्रे तत इ पूर्वतदर्थम् । *लौकिक्यः, लोकभवा अन्ये शपथादयः। चारयन्, तत्पूर्वकं कुर्वन्नित्यर्थः। कल्पतरौ तु पाठान्तरम्

प्रयोजयेदित्यग्रे—

शते विषं तु पादोने हुतभुक् तत्र दृश्यते ।
आपस्त्रिभागहीने तु शतार्द्धे तु तुला स्मृता ॥
कोशपानं तदर्धे वा दशपञ्चकसप्तसु ।
तदर्धे तण्डुला देयास्तदर्धे तप्तमाषकः ॥ इति ।

*शते, सुवर्णस्येति शेषः ।

वृद्धकात्यायनः,

ज्ञात्वा संख्यां सुवर्णस्य शतनाशे विषं स्मृतम् ।
अशीतेस्तु विनाशे तु दद्याच्चैव हुताशनम् ॥
षष्ट्या नाशे जलं देयं स्याच्चत्वारिंशतो घटम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिंशद्दशविनाशे वा कोशपानं बृहस्पतिः ॥
पञ्चार्द्धिकस्य वा नाशे तदर्धस्य च तण्डुलाः ।
*पञ्चार्द्धिकस्य, पञ्चार्धं सार्धद्वयम् इति ।

६। महत्त्वसम्पत्तये आह * ज्ञात्वेति । तत्पदस्वारस्यात् । नन्वत्र नाशपदोक्त्या कथमस्यापह्नवविषयत्वमित्यत आह * नाशेति । मिथोऽनयोर्विरोधं परिहरति * नासहस्रादिति । सामान्योक्त्या सामान्यपरिभाषासञ्चारात् ।

अन्योऽपि विशेषः कात्यायनेनोक्तः,
देशकालाविरोधे तु यथायुक्तं प्रकल्पयेत् ।
अन्येन हारयेद्दिव्यं विधिरेष विपर्यये ॥ इति ।

*हारयेत्, कारयेत् । *विपर्यये, दिव्यकारिणो ऽभियुक्तस्यासामर्थ्ये ।

कालदिव्यविरोधे तु यथायुक्तं विरोधयेत् ।
अन्येन हारयेद्दिव्यं विधिरेष विवर्जयेत् ॥

इति तु कल्पतरौ पाठः । अतएव महापातक्यादीनामन्यद्वारा—

दिव्यमाह स एव,
मातापितृद्विजगुरुबालस्त्रीराजघातिनाम् ।
महापातकयुक्तानां नास्तिकानां विशेषतः ॥
लिङ्गिनां प्रसवानां तु मन्त्रयोगक्रियाविदाम् ।
वर्णसङ्करजातीनां पापाभ्यासप्रवर्तिनाम् ॥
एतेष्वेवाभियोगेषु निन्द्येष्वेव प्रयत्नतः ।
दिव्यं प्रकल्पयेन्नैव राजा धर्मपरायणः ॥
एतैरेव नियुक्तानां साधूनां दिव्यमर्हति ।
नेच्छन्ति साधवो यत्र तत्र शोध्यः स्वकैर्नरः ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथाच दिव्यकारिणोऽशक्तौ अयं प्रतिनिधिर्वि
इत्यन्तेनोक्तः। *अन्येन हारयेत्, प्रतिनिधिना कारयेत्। प
पित्रित्यादिना पूर्वं पित्रादिघातादिमहापापं न कृतमिति नि
कालान्तरे चार्थान्तरसन्देहेऽपि प्रतिनिधिद्वारैव दिव्यमुक्तम्।
द्धस्त्रीबालेति पाठान्तरम् । प्रसवानां तु इत्यत्र प्रमदानां
पाठान्तरम् । नेच्छन्ति इत्यत्र नसन्तीति, तत्र शोध्यः सर्वै
इत्यत्र स्वकैर्नरैः इति च पाठान्तरम् । *स्वकैः, आप्तैः।
उ० ७। नृपार्थेष्वित्यस्य नृपोऽर्थो विषयो येषां द्रोहाणां तेषि
र्थः। तदाह * नृपद्रोहेष्विति। अभिशापे चेत्यस्य वास्तवे
त्यर्थः। तदाह * महेति। सदेति व्याचष्टे *द्रव्येति। प्र
त्वादाह * एतानीति । शुचित्वं तत्र निमित्तमित्याह *
वासादिनेति। आदिना स्नानादिपरिग्रहः।

८। विशेषमाह * तथेति। सभा च राजगृहद्वारं च
यतनं च चत्वरश्चेति समाहारद्वन्द्वः । व्यस्तपाठे तत्र द्वन्द्व
*कुलं, गृहम्। चत्वरश्चतुष्पथः। साकाङ्क्षत्वात्प्रकृतमाह *
इति। व्यवस्थाचेति चस्त्वर्थे । उक्तदेशानामिति भावः।
स्थानामिन्द्रप्रतिमा यत्र तत्रेत्यर्थ इति केचित्। इन्द्रध्वजपू
नामिति कल्पतरुः । इन्द्रध्वजपूजास्थानामित्यन्ये। इन्द्रस
श्वरस्य स्थानं तत्रेति वयम् । अभिशस्तानामित्यस्यैव व्या
*महापातकिनामिति। चस्त्वर्थो तथापाठ एववा । दिव्या
स्यानुषङ्गः। विषयसप्तमी च। देशव्यवस्थामुक्त्वा दिव्यव्यवस्
*अस्पृश्येति। अस्पृश्याश्चाण्डालादयः। अधमाः शूद्रादयः
तु, न हि। * तत्प्रसिद्धानि, धटसर्पादीनि।

नारदः, (व्य० प० १।२५५)

नार्तानां तोयशुद्धिः स्यान्न विषं पित्तरोगिणाम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्वित्र्यन्धकुनखादीनां नाग्निकर्म विधीयते ॥
न मज्जनीयाः स्त्रीबाला धर्मशास्त्रविचक्षणैः ।
रोगिणो ये च वृद्धाः स्युः पुमांसो ये च दुर्बलाः ॥(३१३)
निरुत्साहान् व्याधिक्लिष्टान्नार्तांस्तोये निमज्जयेत् ।
सद्यो म्रियन्ते मज्जन्तः स्वल्पप्राणा हि ते स्मृताः॥(३१४)
साहसेनागतानेतान्नैव तोये निमज्जयेत् ।
नचापि हारयेदग्निं न विषेण विशोधयेत् ॥ (३१५)
विष्णुः,
न श्लेष्मिकव्याधितानां भीरूणां श्वासकासिनाम् ।
न लोहशिल्पिनामग्निः सलिलं नाम्बुसेविनाम् ॥
मन्त्रयोगविदां चैव विषं दद्यात्तु न क्वचित् ।
तण्डुलैर्न नियुञ्जीत व्रतिनं मुखरोगिणम् ॥
व्रती पयोव्रतादिमान् ।
पितामहः,
मद्यपस्त्रीव्यसनिनां कितवानां तथैवच ।
कोशः प्राज्ञैर्न दातव्यो ये च नास्तिकवृत्तयः ॥
नारदः, (व्य० प० १।३३२)
महापराधे निर्धर्मे कृतघ्ने क्लीबकुत्सिते ।
नास्तिके दृष्टदोषे च कोशदानं विवर्जयेत् ॥
नारदबृहस्पतिकात्यायनाः,
यथोक्तविधिना देयं दिव्यं दिव्यविशारदैः ।
अयथोक्तं प्रदत्तं चेत् न दत्तं साध्यसाधने ॥
अदेशकालदत्तानि बहिर्वादिकृतानि च ।
व्यभिचारं सदाऽर्थेषु कुर्वन्तीह न संशयः ॥
वादिनमभियोक्ता बहिर्वादी । * मातृकेति । परिभाषे·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यर्थः ॥ ९९ ॥

इति दिव्योपोद्घातः ।

मि० एवं सर्वदिव्योपयोगिनीं दिव्यमातृकामभिधायेदानीं घटादिदिव्यानां प्रयोगमाह ।

या० तुलाधारणविद्वद्भिरभियुक्तस्तुलाश्रितः ।
प्रतिमानसमीभूतो रेखां कृत्वाऽवतारितः ॥ १०० ॥
त्वं तुले सत्यधामाऽसि पुरा देवैर्विनिर्मिता ।
तत्सत्यं वद कल्याणि संशयान्मां विमोचय ॥ १०१ ॥
यद्यस्मि पापकृन्मातस्ततो मां त्वमधो नय ।
शुद्धश्चेद्गमयोर्ध्वं मां तुलामित्यभिमन्त्रयेत् ॥ १०२ ॥

मि० तुलाया धारणं तोलनं ये विदन्ति सुवर्णकारप्रभृतयः तैः प्रतिमानेन मृदादिना समीभूतः समीकृतस्तुलामाश्रितोऽधिरूढोऽभियुक्तोऽभियोक्ता वा दिव्यकारी रेखां कृत्वा येन सन्निवेशेन प्रतिमानसमीकरणदशायां शिक्यतलेऽवस्थितस्तस्मिन् पाण्डुलेखेनाङ्कयित्वाऽवतारितस्तुलामभिमन्त्रयेत प्रार्थयेत अनेन मन्त्रेण । हे तुले त्वं सत्यस्य स्थानमसि । पुरा आदिसृष्टौ देवैर्हिरण्यगर्भप्रभृतिभिर्विनिर्मितोत्पादिता । तत्तस्मात्सत्यं संदिग्धस्यार्थस्य स्वरूपं वद दर्शय । कल्याणि शोभने अस्मात्संशयान्मां विमोचय । हे मातः यद्यहं पापकृत् असत्यवाद्यस्मि ततो मां त्वमधो नय । अथ शुद्धः सत्यवाद्यस्मि ततो मामूर्ध्वं गमयेति । प्राड्विवाकस्य तुलाभिमन्त्रणमन्त्राः स्मृत्यन्तरोक्ताः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अयं तु दिव्यकारिणः । जयपराजयलक्षणं तु मन्त्र-लिङ्गादेवावगम्यते इति न पृथगुक्तम् । घटनिर्माणं पुनः आरोहणाद्यर्थसिद्धमेव पितामहनारदादिभिः स्पष्टीकृतम् ।

तद्यथा,

छित्वा तु यज्ञियं वृक्षं यूपवन्मन्त्रपूर्वकम् ।
प्रणम्य लोकपालेभ्यस्तुला कार्या मनीषिभिः ॥
मन्त्रः सौम्यो वानस्पत्यच्छेदने जप्य एव च ।
चतुरस्रा तुला कार्या दृढा ऋज्वी तथैव च ॥
कटकानि च देयानि त्रिषु स्थानेषु चार्थवत् ।
चतुर्हस्ता तुला कार्या पादौ चोपरि तत्समौ ॥
प्रान्तरं तु तयोर्हस्तौ भवेदध्यर्धमेव वा ।
हस्तद्वयं निखेयं तु पादयोरुभयोरपि ॥
तोरणे च तथा कार्ये पार्श्वयोरुभयोरपि ।
घटादुच्चतरे स्यातां नित्यं दशभिरङ्गुलैः ॥
अवलम्बौ च कर्तव्यौ तोरणाभ्यामधोमुखौ ।
मृन्मयौ सूत्रसंबद्धौ घटमस्तकचुम्बिनौ ॥
प्राङ्मुखो निश्चलः कार्यः शुचौ देशे घटस्तथा ।
शिक्यद्वयं समासज्य पार्श्वयोरुभयोरपि ॥
प्राङ्मुखान्कल्पयेद्दर्भान् शिक्ययोरुभयोरपि ।
पश्चिमे तोलयेत्कर्तृनन्यस्मिन्मृत्तिकां शुभाम् ॥
पिटकं पूरयेत्तस्मिन्निष्टकाग्रावपांसुभिः ।

अत्र च मृत्तिकेष्टकाग्रावपांसूनां विकल्पः ।

परीक्षका नियोक्तव्यास्तुलामानविशारदाः ।
वणिजो हेमकाराश्च कांस्यकारास्तथैव च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कार्यः परीक्षकैर्नित्यमवलम्बसमो धटः ।
उदकं च प्रदातव्यं धटस्योपरि पण्डितैः ॥
यस्मिन्न प्लवते तोयं स विज्ञेयः समो धटः ।
तोलयित्वा नरं पूर्वं पश्चात्तमवतार्य तु ॥
धटं तु कारयेन्नित्यं पताकाध्वजशोभितम् ।
तत आवाहयेद्देवान् विधिनाऽनेन मन्त्रवित् ॥
वादित्रतूर्यघोषैश्च गन्धमाल्यानुलेपनैः ।
प्राङ्मुखः प्राञ्जलिर्भूत्वा प्राड्विवाकस्ततो वदेत् ॥
एह्येहि भगवन्धर्म ह्यस्मिन् दिव्ये समाविश ।
सहितो लोकपालैश्च वस्वादित्यमरुद्गणैः ॥
आवाह्य तु धटे धर्मं पश्चादङ्गानि विन्यसेत् ।
इन्द्रं पूर्वे तु संस्थाप्य प्रेतेशं दक्षिणे तथा ॥
वरुणं पश्चिमे भागे कुबेरं चोत्तरे तथा ।
अग्न्यादिलोकपालांश्च कोणभागेषु विन्यसेत् ॥
इन्द्रः पीतो यमः श्यामो वरुणः स्फटिकप्रभः ।
कुबेरस्तु सुवर्णाभो वह्निश्चापि सुवर्णभः ॥
तथैव निर्ऋतिः श्यामो वायुर्धूम्रः प्रशस्यते ।
ईशानस्तु भवेद्रक्त एवं ध्यायेत्क्रमादिमान् ॥
इन्द्रस्य दक्षिणे भागे वसूनाराधयेद्बुधः ।
धरो ध्रुवस्तथा सोम आपश्चैवानिलोऽनलः ॥
प्रत्यूषश्च प्रभातश्च वसवोऽष्टौ प्रकीर्तिताः ।
देवेशेशानयोर्मध्ये आदित्यानां तथाऽर्चनम् ॥
धाताऽर्यमा च मित्रश्च वरुणोंऽशो भगस्तथा ।
इन्द्रो विवस्वान्पूषा च पर्जन्यो दशमः स्मृतः ॥
ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्येते द्वादशादित्या नामभिः परिकीर्तिताः ॥
अग्नेः पश्चिमभागे तु रुद्राणामयनं विदुः ।
वीरभद्रश्च शम्भुश्च गिरिशश्च महायशाः ॥
अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः ।
भुवनाधीश्वरश्चैव कपाली च विशांपतिः ॥
स्थाणुर्भवश्च भगवान् रुद्रास्त्वेकादश स्मृताः ।
प्रेतेशरक्षोमध्ये तु मातृस्थानं प्रकल्पयेत् ॥
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही चैव माहेन्द्री चामुण्डा गणसंयुता ॥
निर्ऋतेरुत्तरे भागे गणेशायतनं विदुः ।
वरुणस्योत्तरे भागे मरुतां स्थानमुच्यते ॥
गगनः स्पर्शनो वायुरनिलो मारुतस्तथा ।
प्राणः प्राणेशजीवौ च मरुतोऽष्टौ प्रकीर्तिताः ॥
धटस्योत्तरभागे तु दुर्गामावाहयेद् बुधः ।
एतासां देवतानां तु स्वनाम्ना पूजनं विदुः ॥
भूषावसानं धर्माय दत्त्वा चार्घ्यादिकं क्रमात् ।
अर्घ्यादि पश्चादङ्गानां भूषान्तमुपकल्पयेत् ॥
गन्धादिकां निवेद्यान्तां परिचर्यां प्रकल्पयेत्। इति ।

अत्र च तुलां पताकाध्वजालङ्कृतां विधाय तस्याम् एह्येहीति मन्त्रेण धर्ममावाह्य धर्मायार्घ्यं कल्पयामि नम इत्यादिना प्रयोगेणार्घ्यपाद्याचमनीयमधुपर्काचमनीयस्नानवस्त्रयज्ञोपवीताचमनीयमुकुटकटकादिना भूषान्तं दत्त्वा इन्द्रादीनां दुर्गान्तानां प्रणवाद्यैः स्वनामभिश्चतुर्थ्यन्तैर्नमोऽन्तैरर्घ्यादिभूषान्तं पदार्थानुसमयेन दत्त्वा धर्माय गन्धपुष्पधूपदीपनैवेद्यानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दत्त्वा इन्द्रादीनां गन्धादीनि पूर्ववद्द्यात् । गन्धपुष्पाणि च घटपूजायां रक्तानि कार्याणि ।

यथाह नारदः,

रक्तैर्गन्धैश्च माल्यैश्च दध्यपूपाक्षतादिभिः ।
अर्चयेत्तु घटं पूर्वं ततः शिष्टांस्तु पूजयेत् ॥ इति ।

इन्द्रादीनां तु विशेषानभिधानाद्यथालाभं रक्तैरन्यैर्वा पूजनमिति पूजाक्रमः ।

एतच्च सर्वं प्राड्विवाकः कुर्यात् ।

यथोक्तम्,

प्राड्विवाकस्ततो विप्रो वेदवेदाङ्गपारगः ।
श्रुतवृत्तोपसंपन्नः शान्तचित्तो विमत्सरः ॥
सत्यसन्धः शुचिर्दक्षः सर्वप्राणिहिते रतः ।
उपोषितः शुद्धवासाः कृतदन्तानुधावनः ॥
सर्वासां देवतानां च पूजां कुर्याद्यथाविधि ।

तथा,

ऋत्विग्भिश्चतुर्भिश्चतसृषु दिक्षु लौकिकाग्नौ होमः कार्यः ।

यथा,

चतुर्दिक्षु तथा होमः कर्तव्यो वेदपारगैः ।
आज्येन हविषा चैव समिद्भिर्होमसाधनैः ॥
सावित्र्या प्रणवेनाथ स्वाहान्तेनैव होमयेत् ।

प्रणवादिकां गायत्रीमुच्चार्य पुनः स्वाहाकारान्तं प्रणवमुच्चार्य समिदाज्यचरून्प्रत्येकमष्टोत्तरशतं जुहुयादित्यर्थः । एवं हवनान्तां देवपूजां विधायानन्तरमभियुक्तमर्थं वक्ष्यमाणमन्त्रसहितं पत्रे लिखित्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्पत्रं शोध्यशिरोगतं कुर्यात् ।

यथाह,

यं चार्थमभियुक्तः स्याल्लिखित्वा तं तु पत्रके ।
मन्त्रेणानेन सहितं तत्कार्यं तु शिरोगतम् ॥

मन्त्रश्च,

आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्मश्च जानाति नरस्य वृत्तम् ॥ इति ।

एतच्च धर्मावाहनादि शिरसिपत्रारोपणान्तमनुष्ठानकाण्डं सर्वदिव्यसाधारणम् ।

यथोक्तम्,

इमं मन्त्रविधिं कृत्स्नं सर्वदिव्येषु योजयेत् ।
आवाहनं च देवानां तथैव परिकल्पयेत् ॥ इति ।

अनन्तरं प्राड्विवाको धटमामन्त्रयेत् ।

धटमामन्त्रयेच्चैव विधिनाऽनेन शास्त्रवित् ।

इति स्मरणात् । मन्त्राश्च दर्शिताः,

त्वं घट ब्रह्मणा सृष्टः परीक्षार्थं दुरात्मनाम् ।
धकाराद्धर्ममूर्तिस्त्वं टकारात्कुटिलं नरम् ॥
धृतो भावयसे यस्माद्धटस्तेनाभिधीयसे ।
त्वं वेत्सि सर्वजन्तूनां पापानि सुकृतानि च ॥
त्वमेव देव जानीषे न विदुर्यानि मानवाः ।
व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति ॥
तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि । इति ।

शोध्यस्तु,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वं तुले इत्यादिना पूर्वोक्तेन मन्त्रेण तुलामामन्त्रयेत्। अनन्तरं प्राड्विवाकः शिरोगतपत्रकं शोध्यं यथास्थानं यथासंनिवेशं च धटमारोपयति।

पुनरारोपयेत्तास्मिन् शिरोऽवस्थितपत्रकम्।

इति स्मरणात्। आरोपितं च विनाडीपञ्चकं यावत्तथैवावस्थापयेत्। तत्कालपरीक्षां च ज्योतिःशास्त्राभिज्ञः कुर्यात्।

ज्योतिर्विद्ब्राह्मणश्रेष्ठः कुर्यात्कालपरीक्षणम्।
विनाड्यः पञ्च विज्ञेयाः परीक्षाकालकोविदैः॥

इति स्मरणात्। दशगुर्वक्षरोच्चारणकालः प्राणः। षट्प्राणा विनाडी।

उक्तं च,

दशगुरुवर्णः प्राणः, षट् प्राणाः स्याद्विनाडिका, तासाम्। षष्ट्या घटी, घटीनां षष्ट्याऽहः, खाग्निभिर्दिनैर्मासः।

इति।

तस्मिंश्च काले शुद्ध्यशुद्धिपरीक्षणार्थं शुचयः पुरुषा राज्ञा नियोक्तव्याः। ते च शुद्ध्यशुद्धी कथयन्ति।

यथोक्तं पितामहेन,

साक्षिणां ब्राह्मणाः श्रेष्ठा यथादृष्टार्थवादिनः।
ज्ञानिनः शुचयोऽलुब्धा नियोक्तव्या नृपेण तु॥ इति

शंसन्ति साक्षिणः श्रेष्ठाः शुद्ध्यशुद्धी नृपे तदा। इति

शुद्ध्यशुद्धिनिर्णयकारणं चोक्तम्,

तुलितो यदि वर्द्धेत स शुद्धः स्यान्न संशयः।
समो वा हीयमानो वा न स शुद्धो भवेन्नरः।

इति॥ (ना० व्य० प० १।२८३)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्तु पितामहवचनम्,

अल्पदोषः समो ज्ञेयो बहुदोषस्तु हीयते । इति,

तत्र यद्यपि अभियुक्तस्यार्थस्याल्पत्वं बहुत्वं च न दिव्येनावधारयितुं शक्यते तथापि सकृदमतिपूर्वत्वेनाल्पत्वम् असकृन्मतिपूर्वत्वेन च महत्त्वमिति दण्डप्रायश्चित्ताल्पत्वमहत्त्वमवधार्यते । यदा चानुपलक्ष्यमाणदृष्टकारण एव कक्ष्यादीनां छेदो भङ्गो वा भवति तदाऽप्यशुद्धिरेव ।

कक्ष्यच्छेदे तुलाभङ्गे धटकर्कटयोस्तथा ।
रज्जुछेदेऽक्षभङ्गे च तथैवाशुद्धिमादिशेत् ॥

इति स्मरणात्। कक्ष्यं शिक्यतलम् । कर्कटौ तुलान्तयोः शिक्याधारावीषद्वक्रावायसकीलकौ कर्कटशृङ्गसन्निभौ । अक्षः पादस्तम्भयोरुपरि निविष्टस्तुलाधारपट्टः । यदा तु दृश्यमानकारणक एषां भङ्गस्तदा पुनरारोपयेत् ।

शिक्यादिच्छेदभङ्गेषु पुनरारोपयेन्नरम् ।

इति स्मरणात् । ततश्च ऋत्विक्पुरोहिताचार्यान्दक्षिणाभिश्च तोषयेत् ।

एवं कारयिता राजा भुक्त्वा भोगान्मनोरमान् ।
महतीं कीर्तिमाप्नोति ब्रह्मभूयाय कल्पते ॥

यदा तूक्तलक्षणं धटं तथैव स्थापयितुमिच्छति तदा वायसाद्युपघातनिरासार्थं कपाटादिसहितां शालां कुर्यात् ।

विशालामुन्नतां शुभ्रां धटशालां तु कारयेत् ।
यत्रस्थो नोपहन्येत श्वभिश्चाण्डालवायसैः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्रैव लोकपालादीन् सर्वान् दिक्षु निवेशयेत्।
त्रिसन्ध्यं पूजयेच्चैतान् गन्धमाल्यानुलेपनैः॥
कपाटबीजसंयुक्तां परिचारकरक्षिताम्।
मृत्पानीयाग्निसंयुक्तामशून्यां कारयेन्नृपः॥
इति स्मरणात्। बीजानि यवव्रीह्यादीनाम्।
इति घटविधिः॥ १००॥ १०१॥ १०२॥

वा० १। सङ्गतिमाह *एवमिति। * मातृकां, तत्परिभाषाम्। *प्रयोगमिति। सर्वसाधारणमित्यर्थः। यद्वा जातावेकवचनम्। प्रयोगानित्यर्थः। क्रमेणेत्यादिः। ईदृशोऽवतारितः प्राड्विवाक-कृत्योत्तरम् इति अनेन मन्त्रेण तुलामभिमन्त्रयेदित्यन्वय इत्याह *तुलाया इत्यादिना। तृतीयान्तस्य व्यवहितान्वय इत्याह * तैः प्रतिमानेनेति। अन्तर्भावितण्यर्थत्वेनाह * समीकृत इति। इ-मुक्तरीत्योपलक्षणमित्याह * अभियोक्ता वेति। तात्पर्यार्थमाह *दिव्येति। *रेखामिति। लेखामिति पाठान्तरम्। किञ्चिच्चिह्नवि-शेषमित्यर्थः। तमेवाह *येनेति। पाण्ड्वाति। अपक्वलेखेनेत्यर्थः। खडीति भाषाप्रसिद्धः। अभिमन्त्रयेदित्यस्य व्याख्या *प्रार्थयेते-ति। इतीत्यस्यार्थमाह *अनेनमन्त्रेणेति। त्वमित्यादिमामित्यन्तेने-त्यर्थः। तदर्थमाह *हे इत्यादि। धामार्थः *स्थानमिति। तदि-त्यस्य व्याख्या *तस्मादिति। सत्यमित्यस्यार्थः *सन्दिग्धेति। भाषणासंभवादाह * दर्शयेति। प्रकृतत्वादाह * अस्मादिति। अस्मीत्युक्तेरध्याहारेण तस्य तदर्थान्वयत्वेन वाऽऽह * अहमि-ति। प्राग्वदाह *असत्येति। एवमग्रेऽपि। निपातानामनेकार्थ-त्वात् चेदर्थमाह * अथेति। मामस्मीत्युक्तिस्वारस्यादस्याभि-युक्तेराह * प्राडिति। धर्माधिकारिण इत्यर्थः। इदमनुपदमेव स्फुटीभविष्यति। न्यूनतां निराचष्टे * जयेति। तयोः स्वरू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यर्थः। जातावेकवचनम्। लिङ्गमूर्ध्वगमनादिकम्।

२। एतदर्थमेवाह *धटेत्यादिना। पुनस्त्वर्थे। आरोहणादीति आदिना अवतारणम्। नारदादीति आदिना व्यासादिपरिग्रहः। तत्रादौ पितामहमाह *छित्त्वात्वित्यादिना। *यज्ञियं, खदिरादिकम्। *मन्त्रेति। ओषधे त्रायस्वैनमित्यादिमन्त्रपूर्वकम् इत्यर्थः। छेदनक्रियाविशेषणमिदम्। यूपवदित्यस्य तुला कार्येत्यत्रान्वयः। यूपवदित्यातिदेशासिद्धमन्त्रवदित्युक्तमेवानुवदति * मन्त्र इति। वानस्पत्यच्छेदने इति समस्तम्। तच्छेदनकाले सोमदेवताकः सोमो धेनुं सोमो अर्वन्तमित्यादिमन्त्रो जप्य एवेत्यर्थः। व्यस्तपाठे वानस्पत्यो मन्त्रो वनस्पते शतवल्शो वि रोहेति। अनयोर्जपमन्त्रत्वेनादृष्टार्थत्वात्समुच्चयः। चो भिन्नक्रमः। छेदने तुलाकाष्ठच्छेदने स स च जप्य एवेत्यर्थ इत्यन्ये। तुलास्वरूपमाह * चतुरस्रेति। * त्रिषु, पार्श्वद्वये मध्ये च। तत्फलमाह * अर्थवदिति। क्रियाविशेषणमेतत्। यथा तुलायाः सामर्थ्यं भवेत्तथा देयानीत्यर्थः। यत्नत इति पाठान्तरम्। तत्प्रमाणमाह *चतुर्हस्तेति। भूमेः *उपरि, ऊर्ध्वम्। *तत्समौ, तुलासमौ। चतुर्हस्तौ पादौ कार्यावित्यर्थः। पादौ कार्यौ तथाविधाविति पाठान्तरम्। तयोः पादयोरन्तरं व्यवधानं तु हस्तौ हस्तद्वयपरिमितं भवेदित्यर्थः। त्वेरन्यत्रानियमान्नानुपपत्तिः। पक्षा-

१ ननु आरोप्यविशेष्यार्थकपदसमानवचनकत्वमाख्यातस्य, "गृह्णाति वाचकः संख्यां प्रकृतेर्विकृतेर्नहि"
इत्यनुशासनात्। अत एव एको वृक्षः पञ्च नौका भवति इत्यादौ एकवचनं सङ्गच्छते। ततश्च–
"प्रान्तरं तु तयोर्हस्तौ भवेदध्यर्द्धमेववा"
इत्यत्रैकवचनोपपत्तावपि, षष्ठो भागो दश माषा दश यवाश्च भवन्तीति त्वविषेत्युत्तरश्लोकव्याख्याने बहुवचनं नोपपद्येत। यदि पुनः "स्वर्ण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्तरमाह * अध्यर्द्धमेववेति । सार्द्धहस्तो वेत्यर्थः । उपरीत्येत-त्सूचितमेवाह * हस्तद्वयमिति । उभयोरपि पादयोर्हस्तद्वयं ह-स्तचतुष्टयादवशिष्टं भूम्यन्तः प्रवेशनीयमित्यर्थः । * तोरणे चे-ति । तथेत्यनेन हस्तद्वयान्तरालतोक्ता । भूमेरुपरि समता स-मागतैव । तदन्तर्निखातस्तु यथासंभवम् । अतएव विशेषमाह *धटादिति । तथाच तुलायाः पार्श्वद्वये हस्तद्वयान्तरालं दक्षि-णोत्तरयोः स्तम्भस्य द्वयं निखाय तयोरुपरि उत्तराग्रं काष्ठं देयं, तदेतत्तोरणमिति बोध्यम् । तस्य फलं कथयन् तच्चावश्यं ध-टाद्दशाङ्गुलोच्चमित्याह * अवलम्बाविति । तोरणाभ्यां सम्बद्धौ तदधः प्रदेशे लम्बमानौ अधोमुखौ मृन्मयौ तद्गोलकरूपौ सू-त्रसम्बद्धौ धटमस्तकचुम्बिनौ तुलाप्रान्तद्वयोपरिभागस्पृशौ अव-लम्बौ वत्संज्ञकौ कार्यावित्यर्थः । धटमस्तकचुम्बिताविति पाठा-न्तरे बहुव्रीहिः । सम्यग्ज्ञानार्थमेवावलम्बद्वयकरणम् । एतत्फल-मनुपदमेवाग्रे स्फुटीभविष्यति, स विज्ञेयः समो धट इति । त-स्याग्रं तदाधारदेशं चाह * प्रागिति । * कल्पयेत्, स्थापयेत् । आस्तरणमिदम् । *पश्चिमे, शिक्ये । * अन्यस्मिन्, पूर्वे । *शुभा-मिति । इष्टकाभस्मपाषाणकपालास्थिदुर्गन्धादिविवर्जितामित्य-र्थः । पिटकं शिक्यम् । * तस्मिन्, उपविष्टे सति । चयनीयत्वे-

---

पिण्डःखादिराङ्गरसदृशो कुण्डले भवत" इति भाष्यप्रयोगात् च्व्यन्ता-तिरिक्तस्थले आरोप्यार्थकपदसमानवचनत्वमाख्यातस्योच्येत, तद-एको वृक्ष इत्यादौ प्रान्तरं तु तयोरित्यादौ च एकवचनानुपपत्तिः, अत आह *च्वेरन्यत्रेति । च्व्यन्तस्थले सङ्घीभवन्ति ब्राह्मणा इत्यादौ आख्यातस्य प्रकृत्यनुरोधित्वेऽपि अन्यत्रानियमः । तेन न क्वचिदनुप-पत्तिः । अनियमे च स्वर्णपिण्डः खादिराङ्गसदृशो कुण्डले भवत इति पस्पशास्थः, अत्वं त्वं सम्पद्यते इति युष्मद्युपपदे इति सूत्रस्थ-भाष्यप्रयोगौ मानम् । ध्वनितं चेदं कृभ्वास्तिसूत्रे शेखरे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाभ्यर्हितत्वात्पूर्वानिपातः । समुच्चये फलाभावात्तुल्यार्थत्वाच्चाह * अत्रचेति । मृत्तिकेत्येव सत्यमिति श्रुतेः उक्तक्रमादाह * मृत्तिकेष्टकेति।परीक्षाप्रकारमाह *परीक्षका इति। *पश्चादिति । तस्मादिति पाठान्तरम् । * पताकेति। पताकासहितध्वजशोभितामित्यर्थः । अल्पत्वमहत्त्वकृतोऽनयोर्भेदः । एवमग्रेऽपि । परित इति भावः । * मन्त्रवित्, धर्मविदिति पाठान्तरम् । तृतीयाद्वयमुपलक्षणे । * अनुलेपनं, स्नानचूर्णम् । अनेन विधिनेत्युक्तविधिमेवाह * एह्येहीति । अनेन धर्मदेवतास्वरूपमपि कथितम् । * अस्मिन्, तुलाख्ये । वसवश्चादित्याश्च मरुतश्च गणाश्चेति द्वन्द्वः । *अङ्गानि, लोकपालादीनि । तत्प्रकारमेवाह *इन्द्रमित्यादिना। एतेषां ध्येयरूपाण्याह*इन्द्र इत्यादि।*भागे इति। पार्श्वे वसूनावाहयेदिति पाठान्तरम् ।तेषां संख्यामाह * धर इति । देवेश इन्द्रः । * तथाऽर्चनम् । तथाऽयनमिति पाठान्तरम्। प्राग्वदाह *धातेति । वरुणांऽश इति पाठः । अन्योऽपपाठः । अजघन्येत्यादि क्रमादुभयविशेषणम् । गणपदार्थानाह * अग्नेरित्यादि । *अयनं, स्थानम् । तानाह * वीरेति । अत्र महायशा इति गिरिशविशेषणम् । विशांपतिरिति कपालिविशेषणम् । द्वौ विशौ वैश्यमनुजाविति कोशः। भगवानिति भवविशेषणम् । भग इति पाठान्तरम्। क्रमस्य विवक्षितत्वात्प्रेतेशस्य पूर्वनिपातः । मातृस्थानमिति समस्तपाठः । ता आह * ब्राह्मीत्यादि । गणसंयुतेति विशेषणं चामुण्डायाः । तथाच सप्त बोध्याः। गणेश एक एव । * मरुतां, वायूनाम् । तानाह * गगन इति । प्राणेशजीवावित्यार्षम् । चसमुच्चेयमाह * धटस्योत्तरेति । पूजाक्रममाह *भूषेति । अर्घप्रभृत्यलंकारान्तं क्रमेण धर्माय प्रधानदेवतायै दत्त्वा पश्चादिन्द्रादीनां तथैव कुर्यादित्यर्थः। निवेद्यो नैवेद्यः । सर्वथो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्तक्रमेणेति भावः ।

३। अस्यार्थमाह *अत्रचेति। तुलाख्यदिव्यविषये इत्यर्थः। पूजाक्रम इत्यत्रान्वयः । काण्डानुसमयस्याभावादाह * पदार्थेति । तद्रीत्येत्यर्थः । गन्धादौ विशेषमाह * गन्धेति । * शिष्टान्, शेषभूतान् । अङ्गानीति यावत् । * अन्यैर्वा, गन्धपुष्पैः।

४। * यथोक्तमिति।नारदेनेति भावः । *ततः, तस्याः पताकाद्यलंकारविधानानन्तरम्। * श्रुतं, वेदशास्त्रे । *वृत्तम् आचरणम् । *सत्यसंधः, सत्यसंकल्पः। *शुद्धवासाः, आर्द्रवासा इति पाठान्तरम् ।

५। अन्यदप्याह * तथेति । * यथाहेति । पितामह इति शेषः । *प्रतीति । चतुर्दिक्षु इति पाठान्तरम् । तथेति समुच्चये। कथं कार्य इत्याकाङ्क्षायां तत्र द्रव्याण्याह * आज्येनेति । उभयत्र इतरनिरासाय सामान्यनपुंसकत्वेन सामिद्विशेषणतयैव सार्थक्यं ध्वनयन्नाह * होमेति । एतत्त्रितयरूपहोमसाधनैरित्यर्थः फलितः। उत्तरार्द्धेऽन्वयोऽस्य । मन्त्रमाह * सावित्र्येति। अथशब्द आनन्तर्ये। एवेन तदभावव्यवच्छेदः । प्रणवेनेत्यस्य मध्यमणिन्यायेनान्वयः। आदियुक्तत्वं तृतीयार्थः। तदाह *प्रणवादीति।अथशब्दार्थः, * पुनरिति। पश्चादित्यर्थः। * स्वाहाकारेणेति। उच्चैस्तरां वा वषट्कार इत्यनेन सामान्यापेक्षज्ञापकेनाय साधुः। प्रसिद्धत्वाद्धविःशब्दार्थमाह * चरूनिति । चर्वाज्यसमिध इत्युचितम् ।

६। अत्राज्यहविःसामिधां संप्रातिपन्नदेवताकत्वात् मिलितानामेव होमः सान्नाय्ययोरिवेति कश्चित् । तन्न । आज्ये स्त्रुवेणावद्यतीति स्रुवस्य, चरौ सकृदुपस्तृणाति मध्यात्पूर्वार्द्धाच्च द्विर्हविषोऽवद्यति अभिघारयति हविः अवत्तं चैषोऽवदानधर्म इत्याश्वलाय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नादिसूत्रात् स्रुचः, सामित्सु असामर्थ्याद्धस्तस्यैव तत्त्वाद्भिन्नसाधनकत्वात्तन्त्रताऽनुपपत्तेः । सान्नाय्यहोमयोस्तु जुह्वा एव साधनत्वात्तन्त्रता युक्ता । तदेतत् ध्वनयन्नाह * प्रत्येकमिति ।

७ । अन्यदाह * एवमिति । * शोध्येति । दिव्यकारिणः शिरसि बध्नीयादित्यर्थः । * यथाहेति । पितामह इति शेषः । * यश्चार्थमिति । यदर्थकर्मकाभियोगविषयीकृतो दिव्यकारी स्यात् इत्यर्थः । पितामहोक्तमेव मन्त्रमाह * मन्त्रश्चेति । * आदित्येति । अभ्यर्हितत्वात्पूर्वनिपातः ।

८। यथोक्तमिति । पितामहेनेति भावः । आदित्येत्यग्रिमपद्यम् । चेनाग्रिमसर्वसमुच्चयः ।

९ । पितामहमेवाह * धटमिति । * दर्शिताः, तेनैव । *धृतः, शुचौ देशेऽवस्थापितः । त्वं यस्मात् कुटिलं नरं भावयसे प्रतिपादयसि तेनेत्याद्यन्वयः । तमेवाह * पुनरिति ।

१०। विशेषमाह *आरोपितं चेति । *तत्कालेति । विनाडीपञ्चकेत्यर्थः। तमेवाह *ज्योतिरिति । ज्योतिःशास्त्रविदो ये ब्राह्मणास्तेषु श्रेष्ठ इत्यर्थः । पदत्रयमित्यन्ये । * परीक्षाकालेति । कालस्य परीक्षा परीक्षाकालः । राजदन्तादिः । तत्र कोविदैरित्यर्थः । परीक्ष्याः कालेति पाठान्तरम् । तैः परीक्ष्याः सत्या एव विज्ञेया नान्यथेत्यर्थस्तत्र । * दशेति । तथाचात्र विनाडीशब्देन पलमुच्यते । *अहः खाग्निभिर्दिनैरिति । अहोरात्रैस्त्रिंशता दिनैरिति पाठान्तरम् । *तस्मिन्निति । पलपञ्चकरूपे इत्यर्थः । अलुब्धा इति पाठान्तरम् ।

११ । *चोक्तमिति । नारदेनेति शेषः । * स शुद्ध इति । विशुद्ध इति पाठान्तरम् । अत्र वृद्धिरूर्ध्वं गतिः । हानिरधोगतिः । अतो न पूर्वविरोधः । अतएवान्यविरोधं परिहर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ति * यत्त्विति । * न दिव्येनेति । तथा नियमाभावात् । *मह-त्त्वमिति । इदं च शिरःस्थापितपत्रेणैवावगतमिति भावः । एवं चैतत्परं तत्, न तत्परमिति न विरोध इति भावः । विशेषमाह * यदा चेति । चस्त्वर्थे । अनुपलक्ष्यमाणेति बहुव्रीहिः । छेदादिविशेषणम् । तमेवाह * कक्ष्येति । अस्पष्टत्वादिना भेदा-नाह * कक्ष्यमिति । धटस्य कर्कटाविति समासः । अन्यथा दोषा-पत्तेरित्याह * कर्कटाविति । * तुलान्तयोः, संबद्धौ ।

१२। वैलक्षण्यादाह * यदा त्विति । तमेवाह * शिक्यादीति । अतएव शिक्यमिति व्याख्यातं व्यक्त्यभिप्रायं बहुवचनम् । अन्यथाऽनयोर्मिथोविरोधः स्पष्ट एवेति भावः ।

व्यासोऽपि,

कक्ष्यच्छेदे तुलाभङ्गे धटकर्कटयोस्तथा ।
रज्जुच्छेदेऽक्षभङ्गे च दद्याच्छुद्धिं पुनर्नृपः ॥ इति ।

कात्यायनोऽपि,

शिक्यच्छेदे तुलाभङ्गे तथावापि गुणस्य वा ।
शुद्धेश्च संशये चैव परीक्षेत पुनर्नरम् ॥

अनेन कारणान्तरमप्युक्तम् । आवृत्तिस्तोलनमात्रस्य न साङ्गप्रयोगस्येति प्राच्याः । एवं तु वैगुण्यपापपरिहारात्साङ्गः प्रयोग आवर्तनीय इति मदनः । अत्राद्यमेव मूलसंमतम् । शेषं पितामहोक्त्यैव पूरयितुं चूर्णिकामाह * ततश्चेति । दिव्यकारीत्यर्थः । उपसंहरति * एवमिति । * ब्रह्मभूयाय, ब्रह्मत्वाय ।

१३। * इच्छति, राजा । पितामहमाह * विशालामिति । विस्तृता-मित्यर्थः । * उच्छ्रिताम्, उन्नताम् । * यत्रस्थः, घटः । * तत्रैव, शालायामेव । * एतान्, लोकपालादीन् । कपाटबीजेति शाक-पार्थिवादिः । कपाटेत्यत्रार्शआद्यच्, ततः कर्मधारयो वा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परमतात्पर्यमाह * अशून्यामिति । * व्रीह्यादीनाम् । व्रीह्यादीनीति पाठान्तरम् ॥ १०० ॥ १०१ ॥ १०२ ॥

इति घटविधिः ।

मि० इदानीं क्रमप्राप्तमग्निदिव्यमाह ।

या० करौ विमृदितव्रीहेर्लक्षयित्वा ततो न्यसेत् ।
सप्ताश्वत्थस्य पत्राणि तावत्सूत्रेण वेष्टयेत् ॥ १०३ ॥

मि० दिव्यमातृकोक्तसाधारणधर्मेषु सत्सु तुलाविधानोक्तधर्मावाहनादिशिरःपत्रारोपणान्ते च विधौ सति अयमग्निविधौ विशेषः । विमृदितव्रीहेः-विमृदिता विघर्षिता व्रीहयः कराभ्यां येनासौ विमृदितव्रीहिस्तस्य करौ लक्षयित्वा तिलकालकव्रणकिणादिस्थानेष्वलक्तकरसादिनाऽङ्कयित्वा ।

यथाह नारदः, (ना.व्य.प. १ । ३०१)

हस्तक्षतेषु सर्वेषु कुर्याद्धंसपदानि तु । इति ।

अनन्तरं सप्ताश्वत्थस्य पर्णानि हस्तयोरञ्जलीकृतयोर्न्यसेत् ।

पत्रैरञ्जलिमापूर्य आश्वत्थैः सप्तभिः समैः ।

इति स्मरणात् ।

तानि च हस्तसहितानि सूत्रेण तावद्वेष्टयेत् यावन्त्यश्वत्थपत्राणि, सप्तकृत्वो वेष्टयेदित्यर्थः । सूत्राणि च सप्त शुक्लानि भवन्ति ।

वेष्टयीत सितैर्हस्तौ सप्तभिः सूत्रतन्तुभिः ।

इति नारदवचनात् ।

तथा सप्त शमीपत्राणि सप्तैव दूर्वापर्णानि अक्ष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तांश्च दध्यक्तानक्षतांश्चाश्वत्थपत्राणामुपरि विन्यसेत्।

सप्त पिप्पलपत्राणि शमीपत्राण्यथाक्षतान्।
दूर्वायाः सप्त पत्राणि दध्यक्तांश्चाक्षतान्न्यसेत्॥
इति स्मरणात्। (ना.व्य.प. १।२८७)

तथा कुसुमानि च विन्यसेत्।

सप्त पिप्पलपत्राणि अक्षतान्सुमनोदधि।
हस्तयोर्निक्षिपेत्तत्र सूत्रेणावेष्टनं तथा॥
इति पितामहवचनात्। सुमनसः पुष्पाणि।

यदपि स्मरणम्,

अयस्तप्तं तु पाणिभ्यामर्कपत्रैस्तु सप्तभिः।
अन्तर्हितं हरन् शुद्धस्त्वदग्धः सप्तमे पदे॥ इति,

तदप्यश्वत्थपत्राभावे अर्कपत्रविषयं वेदितव्यम्। अश्वत्थपत्राणां पितामहप्रशंसावचनेन मुख्यत्वाव-गमात्।

पिप्पलाज्जायते वह्निः पिप्पलो वृक्षराट् स्मृतः।
अतस्तस्य तु पत्राणि हस्तयोर्विन्यसेद्बुधः॥ इति॥१०३

बा० १। सङ्गतिमाह *इदानीं क्रमेति। उद्देशक्रमेत्यर्थः। अत्र प्रागुक्तं सर्वं सामान्यमपेक्षितमित्याह *दिव्येति। पत्रारोपणान्तं च विधौ सतीति पाठः। विधिः प्रकारः। पत्रारोपणान्तविध्यन्तं सति अयमिति पाठान्तरम्। लक्षयित्वेत्यस्य व्याख्या *तिलकाल-केति। लक्ष दर्शनाङ्कनयोरिति धात्वर्थानुसारादाह *अङ्कोति अङ्कयित्वेति तत्र पाठान्तरम्। हंसपदानीति पाठः। तदाकारा-णि चिह्नानीत्यर्थः। तत इत्यस्य व्याख्या *अनन्तरमिति पूर्वं द्विवचनस्यैव सत्त्वादाह * हस्तयोरिति। तत्र विशेषमा-ह * अञ्जलीति। नारदमेवाह * पत्रैरिति। तावदिति क्रिय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विशेषणमित्याह * तावदिति । तात्पर्यार्थमाह * सप्तकृत्वइति । तावतां सूत्राणां समाहारः तावत्सूत्रं, पात्रादिः । तेन तावत्सूत्र्या सकृद्वेष्टयेदित्यर्थ इति मदनः । वेष्टनसंख्यामुक्त्वा तथैव च स्पष्टार्थं सूत्रस्य संख्यां वर्णं चाह * सूत्राणि चेति । वेष्टननिष्ठसंख्यारोपेण सप्त सूत्राणि चेत्यर्थः ।

२ । विशेषमाह * तथेति । नारदमेवाह * सप्तेति । अथशब्दः समुच्चये । सप्तेत्यस्योभयत्रान्वयः । अक्षतानां स्पष्टं द्वैविध्यमुक्तमनेन । [१]अत एव * दधि, दध्यक्षतान् । तथाच पूर्वैकवाक्यता । आवेष्टितमित्यत्र भावे क्तः । आवेष्टनमिति पाठान्तरम् । सुमनइति जातावेकवचनमित्याह * पुष्पाणीति ।

३ । पितामहविरोधं मूलस्य निराचष्टे * यदपीति । अतुल्यार्थत्वेन विकल्पो नेति सूचयन्नाह * अश्वत्थेति । *पितामहप्रशंसेति । पितामहकर्तृकतत्प्रशंसावचनेनेत्यर्थः । तदेवाह * पिप्पलादिति ॥ १०३ ॥

मि० कर्तुरग्न्यभिमन्त्रणमाह ।

या० त्वमग्ने सर्वभूतानामन्तश्चरसि पावक ।
साक्षिवत्पुण्यपापेभ्यो ब्रूहि सत्यं कवे मम ॥ १०४ ॥

मि० हेअग्ने त्वं सर्वभूतानां जरायुजाण्डजस्वेदजोद्भिज्जानाम् अन्तः शरीराभ्यन्तरे चरसि उपयुक्तान्नपानादीनां पाचकत्वेन वर्त्तसे। हेपावक शुद्धिहेतो कवे क्रान्तदर्शिन् साक्षिवत्पुण्यपापेभ्यः सत्यं ब्रूहि । पुण्य-

---

१ अक्षतानां स्पष्टं द्वैविध्यस्यात्र प्रतिपादितत्वादेव उत्तरत्र पितामहवचने दधिपदं दधिसंसृष्टाक्षतार्थपरम्। अतएव पितामहवचनस्य पूर्वोक्तेन नारदवचनेनैकवाक्यता इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पापेभ्य इति ल्यब्लोपे पञ्चमी। पुण्यपापान्यवेक्ष्य सत्यं ब्रूहि दर्शयेत्यर्थः। अयःपिण्डे त्रिभिस्तापैः संतप्ते सन्दंशेन पुरत आनीते कर्ता पश्चिममण्डले प्राङ्मुखस्तिष्ठन् अनेन मन्त्रेण अग्निम् अभिमन्त्रयेत्।

यथाह नारदः, (व्य० प० १।२८९)

अग्निवर्णमयःपिण्डं सस्फुलिङ्गं सुरञ्जितम्।
तापे तृतीये संताप्य ब्रूयात्सत्यपुरस्कृतम्॥ इति।

अस्यार्थः। लोहशुद्ध्यर्थं सुतप्तं लोहपिण्डमुदके निक्षिप्य पुनः संताप्योदके निक्षिप्य तृतीये तापे संताप्य सन्दंशेन गृहीत्वा पुरत आनीते सत्यपुरस्कृतं सत्यशब्दयुक्तं त्वमग्ने सर्वभूतानामित्यादिमन्त्रं कर्ता ब्रूयादिति।

प्राड्विवाकस्तु मण्डलभूभागाद्दक्षिणप्रदेशे लौकिकमग्निमुपसमाधाय अग्नये पावकाय स्वाहेति आज्येनाष्टोत्तरशतवारं जुहुयात्।

शान्त्यर्थं जुहुयादग्नौ घृतमष्टोत्तरं शतम्।

इति स्मरणात्।

हुत्वा च तस्मिन्नग्नावयःपिण्डं प्रक्षिप्य तस्मिंस्ताप्यमाने धर्मावाहनादिहवनान्तं पूर्वोक्तविधिं विधाय तृतीये तापे वर्तमाने अयःपिण्डस्थमग्निमेभिर्मन्त्रैरभिमन्त्रयेत्।

त्वमग्ने वेदाश्चत्वारस्त्वं च यज्ञेषु हूयसे।
त्वं मुखं सर्वदेवानां त्वं मुखं ब्रह्मवादिनाम्॥
जठरस्थो हि भूतानां ततो वेत्सि शुभाशुभम्।
पापं पुनासि वै यस्मात्तस्मात्पावक उच्यसे॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पापेषु दर्शयात्मानमर्चिष्मान् भव पावक ।
अथवा शुद्धभावेषु शीतो भव हुताशन ॥
त्वमग्ने सर्वभूतानामन्तश्चरसि साक्षिवत् ।
त्वमेव देव जानीषे न विदुर्यानि मानवाः ॥
व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति ।
तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि॥इति॥९०४॥

बा० १। *कर्त्तुरिति । प्राड्विवाकस्य तु अग्रे वक्तव्यमिति भावः । ममेत्युक्तिरत्र बीजम् । सर्वपदोक्तेराह *जरायुजेत्यादि । चरसीत्यस्य लक्ष्यार्थमाह *उपयुक्तेति । भुक्तादीत्यर्थः । साभिप्रायं विशेषणद्वयमित्याह * पावकेत्यादि । * साक्षिवत्, साक्षिणो यथा कथयन्ति । अनेनास्याग्रे एवान्वयो न पूर्वत्रापीति सूचितम् । यथाश्रुते पञ्चम्यनुपपत्तेराह * पुण्येति । साक्ष्यनुरोधेन तथोक्तावपि प्रकृते तदर्थासम्भवादाह * दर्शयेत्यर्थ इति । ममेतितु शेषत्वविवक्षायां षष्ठी ।

२। विशेषमाह * अयःपिण्डे इति । * तापैः, क्रियारूपैः । *अनेन, प्रागुक्तेन । तापत्रयफलमाह *लोहेति । तृतीये इति करणस्याधिकरणत्वविवक्षया सप्तमी । सत्यपुरस्कृतत्वमविवक्षितमित्याह * सत्यशब्दयुक्तमिति । मन्त्रो विशेष्य इत्याह *त्वमिति । अत्र सुरञ्जितत्वम् अतिशयिततापकृतमेव । अतएव तस्य सस्फुलिङ्गत्वम् । सुरक्षितमिति पाठान्तरम् ।

जात्यैव लोहकारो यः कुशलश्चाग्निकर्मणि ।
दृष्टप्रयोगश्चान्यत्र तेनायोऽग्नौ प्रतापयेत् ॥

इति अग्निवर्णमित्यतः पूर्वपद्यम् ।

३। विशेषान्तरमाह *प्राडिति । मण्डलेति । यावति भूप्रदेशे मण्डलानि तत इत्यर्थः। नारदमेवाह *शान्त्यर्थमिति। तापत्रयमप्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नैवाग्नावित्याह * हुत्वाचेति । * विधिमिति । पूर्वोक्तप्रकारं कृत्वे-त्यर्थः। सतिसप्तम्युभयत्र। अयः पिण्डस्थमिति विशेषणेन मुख्याग्नि-निरासः। प्राड्विवाक एवात्र कर्ता, क्त्वाबलात् नारदमेवाह * त्वमग्ने वेदा इत्यादि । *त्वंमुखं ब्रह्मेति । त्वयि होमेन देवतत्तेषामपि तृप्तेरिति भावः। पापेषु पुरुषेषु चरसि वर्तसे । *साक्षिवत्, अन्तर्यामिवत् । * देवेति। तानीतिशेषः । तत्स्थाने तत्पाठो वा ॥१०४॥

मि० आपिच ।

या० तस्येत्युक्तवतो लौहं पञ्चाशत्पालिकं समम् ।
अग्निवर्णं न्यसेत्पिण्डं हस्तयोरुभयोरपि ॥ १०५॥

मि० तस्य कर्तुः इत्युक्तवतः त्वमग्ने सर्वभूतानामि-त्याद्यभिमन्त्रणं कृतवतो लौहं लोहविकारं पिण्डं पञ्चाशत्पलिकं पञ्चाशत्पलसम्मितम्। समम् अस्त्रिरहितम्, सर्वतश्च समं वृत्तं श्लक्ष्णं च । तथाऽष्टाङ्गुलायामम्।

आस्त्रिहीनं समं कृत्वा अष्टाङ्गुलमयोमयम् ।
पिण्डं तु तापयेदग्नौ पञ्चाशत्पालिकं समम् ॥

इति पितामहस्मरणात् । अग्निवर्णमग्निसदृशम्। उभयोर्हस्तयोरश्वत्थपत्रदधिदूर्वाद्यन्तारितयोर्न्यसेत् निक्षिपेत्प्राड्विवाकः ॥ १०५ ॥

बा० १। मूलकृदन्यदप्याहेत्याह * अपि चेति । सममित्यस्य व्याख्या * अस्त्रिराहितमिति । कोणराहितमित्यर्थः। अर्थान्तरमाह * सर्वतश्च सममिति । तदर्थद्वयमाह * वृत्तं श्लक्ष्णं चेति। २। विशेष माह * तथेति। पैतामहे सममित्यस्य द्विरुक्तिः अस्त्रिहीनमित्यस्य चोक्तिरिति प्रागुक्तार्थलाभः। अत्राग्निहीनामिति।

१ तस्मिंस्ताप्यमाने इत्यत्र तृतीये तापे वर्तमाने इत्यत्रचेत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाठं धृत्वाऽग्निकोपराहितमिति व्याख्यातवान्कल्पतरुः। अग्निवर्णत्वस्य प्रकारान्तरेणापि संभवादाह * अग्निसदृशमिति। दाहकतया तत्तुल्यमित्यर्थः। न्यासस्यासंभवादाह * निक्षिपेदिति। प्राड्विवाक एवात्र कर्त्तेत्याह * प्राडिति॥ १०५॥

मि० ततः किं कुर्यादित्यत आह।

या० स तमादाय सप्तैव मण्डलानि शनैर्व्रजेत्।

मि० स पुरुषस्तं तप्तं लोहपिण्डम् अञ्जलिना गृहीत्वा सप्त मण्डलानि शनैर्व्रजेत्। एवकारेण मण्डलेष्वेव पदन्यासं मण्डलानातिक्रमणं च दर्शयति।

यथाह पितामहः,

न मण्डलमतिक्रामेन्नाप्यर्वाक् स्थापयेत्पदम्। इति।

मि० सप्तैव मण्डलानि शनैर्व्रजेदित्युक्तं, तत्रैकैकं मण्डलं किंप्रमाणं मण्डलयोरन्तरं च कियत्प्रमाणकमित्यत आह।

या० षोडशाङ्गुलकं ज्ञेयं मण्डलं तावदन्तरम्॥१०६॥

मि० षोडश अङ्गुलानि यस्य तत् षोडशाङ्गुलकम्। षोडशाङ्गुलप्रमाणं मण्डलं बोद्धव्यम्। मण्डलयोरन्तरं मध्यं च तावदेव षोडशाङ्गुलकमेव। सप्त मण्डलानि व्रजेदिति वदता प्रथममवस्थानमण्डलमेकमुक्तम्। अतश्चाष्ट मण्डलानि षोडशाङ्गुलानि, मण्डलान्तराणि तु सप्त तावत्प्रमाणानि। एतदेव—

नारदेन परिसंख्यायोक्तम्,

द्वात्रिंशदङ्गुलं प्राहुर्मण्डलात् मण्डलान्तरम्।
अष्टाभिर्मण्डलैरेवमङ्गुलानां शतद्वयम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चत्वारिंशत्समधिकं भूमेरङ्गुलमानतः। इति।

अयमर्थः। अवस्थानमण्डलात्षोडशाङ्गुलात् मण्ड-लान्तरमन्यन्मण्डलम् द्वितीयाद्येकैकं द्वात्रिंशदङ्गुलं सान्तरालम्। तदेवमवस्थानमण्डलं षोडशाङ्गुलम्, गन्तव्यानि च सप्त मण्डलानि सान्तरालानि द्वात्रिंश-दङ्गुलानि। एवमष्टाभिर्मण्डलैश्चत्वारिंशदधिकं शतद्वयं भूमेः अङ्गुलमानतोऽङ्गुलमानमिति। सार्वविभक्तिक-स्तासिः। अस्मिंस्तु पक्षेऽवस्थानमण्डलं षोडशाङ्गुलं विधाय द्वात्रिंशदङ्गुलप्रमाणानां सप्तानां सान्तराल-मण्डलभूभागानामेकमेकं भूभागं द्विधा विभज्यान्त-रालभूभागान् षोडशाङ्गुलप्रमाणान् विहाय मण्डल-भूभागेषु षोडशाङ्गुलप्रमाणेषु गन्तृपदप्रमाणानि सप्त मण्डलानि कार्याणि।

यथा तेनैवोक्तम्,

मण्डलस्य प्रमाणं तु कुर्यात्तत्पदसंमितम्। इति।

यत्तु पितामहेनोक्तम्,

कारयेन्मण्डलान्यष्टौ पुरस्तान्नवमं तथा।
आग्नेयं मण्डलं चाद्यं द्वितीयं वारुणं स्मृतम्॥
तृतीयं वायुदैवत्यं चतुर्थं यमदैवतम्।
पञ्चमं त्विन्द्रदैवत्यं षष्ठं कौबेरमुच्यते॥
सप्तमं सोमदैवत्यं सावित्रं त्वष्टमं तथा।
नवमं सर्वदैवत्यमिति दिव्यविदो विदुः॥
द्वात्रिंशदङ्गुलं प्राहुर्मण्डलान्मण्डलान्तरम्।
अष्टाभिर्मण्डलैरेवमङ्गुलानां शतद्वयम्॥
षट्पञ्चाशत्समाधिकं भूमेस्तु परिकल्पना।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्तुः पदसमं कार्यं मण्डलं तु प्रमाणतः ॥
मण्डले मण्डले देयाः कुशाः शास्त्रप्रचोदिताः।
इति, तत्र नवमं सर्वदैवत्यमपरिमिताङ्गुलप्रमाणं मण्डलं विहायाष्टाभिर्मण्डलैरष्टाभिश्चान्तरालैः प्रत्येकं षोडशाङ्गुलप्रमाणैरङ्गुलानां षट्पञ्चाशदधिकं शतद्वयं सम्पद्यते। तत्रापि गन्तव्यानि सप्तैव मण्डलानि। यतः प्रथमे तिष्ठति नवमे क्षिपतीति न विरुध्यते।

अङ्गुलप्रमाणं च—

तिर्यग्यवोदराण्यष्टावूर्ध्वा वा व्रीहयस्त्रयः।
प्रमाणमङ्गुलस्योक्तं वितस्तिर्द्वादशाङ्गुलः ॥
हस्तो वितस्तिद्वितयं दण्डो हस्तचतुष्टयम्।
तत्सहस्रद्वयं क्रोशो योजनं तच्चतुष्टयम् ॥

इति बोद्धव्यम् ॥ १०६ ॥

बा० १। * तत इति। तत्र तान्निक्षेपानन्तरमित्यर्थः। कर्त्रेति शेषः। एवाधिक्यं परिहरति * एवकारेणेति।

उ० २। संगतिमाह * सप्तैवेति। *किंप्रमाणं, कियत्प्रमाणम्। तस्योभयप्रतियोगिकत्वादाह * मण्डलयोरिति। प्रमाणार्थकाङ्गुलशब्दोऽदन्तो नित्यक्लीबः। सर्वामिति न्यायेनाह * तावदेवेति।

३। न्यूनतां विरोधं च परिहरति *सप्तेति। * उक्तम्, उक्तप्रायम्। फलितमाह * अतश्चेति। * मण्डलान्तराणीति। मण्डलानामन्तराणीत्यर्थः। तुरुक्तवैलक्षण्ये। तदेवाह * सप्तेति। तेषामेव सप्तत्वादिति भावः। * परिसंख्यायेति। उभयसंख्यामेकीकृत्येत्यर्थः। मण्डलान्तरम्, अन्यत् मण्डलम्। उक्तरीत्या मण्डलस्य द्वात्रिंशदङ्गुलत्वस्य बाधितत्वादाह * अयमर्थ इति। उक्तहेतोरेवाह * सान्तरालमिति। पर्यवसितमाह * तदेवमि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ति। अष्टाभिरित्याद्यर्थमाह * एवमिति। उक्तप्रकारेणेत्यर्थः। चत्वारिंशदधिकमिति बहुव्रीहिः। विभक्त्यन्तरायोग्यत्वादाह * अङ्गुलमानमिति। इतिरर्थसमाप्तौ। तदुपपत्तिमाह * सार्वविभक्तिक इति। आद्यादित्वात्। * अस्मिंस्तु पक्षे इति। द्वितीयादिमण्डलानां द्वात्रिंशदङ्गुलत्वमिति नारदोक्तपक्षे त्वित्यर्थः। * कार्याणीति। अन्यथा प्रागपि ततः पादप्रक्षेपसंभवान्मूलोक्तपक्षतो भेदापत्त्या तद्विरोधापत्तिरिति भावः। * तेनैव, नारदेनैव। *संमितं, तुल्यम्। यदि शोध्यपदं षोडशाङ्गुलाधिकं तदाऽन्तरालं षोडशाङ्गुलन्यूनमेव भवति, यदि शोध्यपदं षोडशाङ्गुलादल्पं तदा विपरीतं कार्यम् इति भावः। एवं मूलोक्तपक्षेऽपि पदप्रमाणमेव आन्तरमण्डलं तन्मध्ये कार्यमिति बोध्यम्।

४। अन्यविरोधं परिहरति * यत्त्विति। * कारयेदिति।

अग्नेर्विधिं प्रवक्ष्यामि यथावच्छास्त्रचोदितम्।

इत्यादिः। मदनरत्ने तु—

अष्टमं सर्वदैवतम्।

पुरस्तान्नवमं यत्तु तन्महत्पार्थिवं विदुः॥

मृद्गोमयेन कृतान्येतान्यद्भिः पर्युक्षितानि च।

इति पाठः। मण्डलानां परिमाणमाह * द्वात्रिंशदिति। इदं प्रागुक्तरीत्या बोध्यम्। * प्रचोदिता इति।

विन्यसेच्च पदं तेषु कर्ता नित्यमिति स्थितिः। इति शेषः।

५। ननु नवानां मण्डलानां स्वयमुक्तत्वादष्टाभिरित्ययुक्तम्। किं च प्रागुक्तरीत्या योजने चत्वारिंशदधिकमित्युचितम्। अन्यथा ततोऽप्याधिक्यापत्तिः, अतआह * तत्र नवममिति। तत्संख्याऽनुक्तेः पाठान्तरानुरोधाच्चाह *अपरिमिताङ्गुलेति। नवस्वपीत्यर्थः।

६। मूलादिविरोधं समाधत्ते *तत्रापीति। नवस्वपीत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवंच चत्वारिंशदिति नारदीयम् अष्टमनवममण्डलान्तरालं भूभागं विहाय बोध्यम्। तस्य गमनानर्हत्वात्। एवं—

चतुर्विंशतिराख्याता भूमेस्तुपरिकल्पना।

इति कल्पतरूक्तपाठेऽपि आद्यमवस्थानमण्डलं विहायाङ्गुलपरिमाणं योज्यम्। * अङ्गुलप्रमाणं चेति। बोद्धव्यमित्यत्रान्वयः॥ १०६॥

मि० सप्त मण्डलानि गत्वा किं कर्तव्यमित्यत आह।

या० मुक्त्वाऽग्निं मृदितव्रीहिरदग्धः शुद्धिमाप्नुयात्।

मि० अष्टमे मण्डले स्थित्वा नवमे मण्डले अग्निं तप्तमयःपिण्डं त्यक्त्वा कराभ्यां व्रीहीन्मर्दयित्वा अदग्धहस्तश्चेच्छुद्धिमाप्नुयात्। दग्धहस्तश्चेदशुद्ध इत्यर्थसिद्धम्। यस्तु सन्त्रासात्प्रस्खलन् हस्ताभ्यामन्यत्र दह्यते तथाप्यशुद्धो न भवति।

यथाह कात्यायनः,

प्रस्खलन्नभिशस्तश्चेत्स्थानादन्यत्र दह्यते।
अदग्धं तं विदुर्देवास्तस्य भूयोऽपि दापयेत्॥ इति।

मि० किंच

या० अन्तरा पतिते पिण्डे संदेहे वा पुनर्हरेत्॥१०७॥

मि० यदा गच्छतोऽन्तराऽष्टममण्डलादर्वागेव पिण्डः पतति दग्धादग्धत्वे वा संशयस्तदा पुनर्हरेदित्यर्थप्राप्तमुक्तम्। तत्र चायमनुष्ठानक्रमः। पूर्वेद्युर्भूतशुद्धिं विधाय परेद्युर्मण्डलानि यथाशास्त्रं निर्माय मण्डलाधिदेवताश्च मन्त्रैस्तत्र तत्र संपूज्याग्निमुपसमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धाय शान्तिहोमं निर्वर्त्य उपोषितस्य स्नातस्यार्द्रवाससः पश्चिमे मण्डले तिष्ठतो व्रीहिमर्दनादिकं करसंस्कारं विधाय प्रतिज्ञापत्रं समन्त्रकं कर्तुः शिरसि बध्वा प्राड्विवाकस्तृतीये तापेऽग्निमभिमन्त्र्य तप्तमयःपिण्डं सन्दंशेन गृहीत्वा कर्त्रभिमन्त्रितं तस्याञ्जलौ निदध्यात्। सोऽपि मण्डलानि सप्त गत्वा नवमे मण्डले प्रक्षिप्यादग्धः शुद्धो भवतीति। इत्यग्निविधिः॥ १०७॥

बा० १। *सप्तेति। नन्वियादिः। सप्त मण्डलानीति भिन्ने पदे। मुख्यस्य तस्याभावादाह * अग्निं तप्तमयःपिण्डमिति। तात्पर्यार्थमाह * व्रीहीनिति। शाब्दस्तु प्रागुक्त एव। प्रकृतत्वादाह * अदग्धहस्तश्चेदिति। विनापि प्रत्ययमिति मूले तस्य साधुत्वम्।

२। विशेषमाह यस्त्विति। * प्रस्खलन्निति। अभिशस्तः संत्रासात् प्रस्खलन् सन् यदि हस्ताभ्यामन्यत्रेत्याद्यन्वयः। मूले हस्तादिति जातावेकवचनम्। तस्येति शेषत्वविवक्षया षष्ठी। अयःपिण्डमिति शेषः। राजेति भावः।

उ० ३। मूलोक्तमन्यदप्याह *किं चेति। *गच्छत इति। हस्ताभ्यामिति शेषः। नायमपूर्वो विधिरित्याह * अर्थप्राप्तमिति। स्पष्टार्थमाह * तत्र चेति। अग्निविधिविषये इत्यर्थः। अधिदेवताः अग्न्यादयः। * विधाय, कारयित्वा। * गृहीत्वेति। तत्पुरतः समानीतमिति शेषः। * सोपि, कर्त्ताऽपि। एवं प्रागपि॥ १०७॥ इत्यग्निविधिः॥

मि० संप्रत्युदकविधिमाह।

या० सत्येन माऽभिरक्ष त्वं वरुणेत्यभिशाप्य कम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाभिदघ्नोदकस्थस्य गृहीत्वोरू जलं विशेत् ॥१०८॥

मि० हे वरुण सत्येन मामभिरक्ष त्वम् इति अनेन मन्त्रेण कमुदकमभिशाप्याभिमन्त्र्य नाभिदघ्नोदकस्थस्य नाभिप्रमाणोदकास्थितस्य पुरुषस्योरू गृहीत्वा शोध्यो जलं प्रविशेत् जले निमज्जेत् । एतच्च वरुणपूजायां सत्याम् ।

गन्धमाल्यैः सुरभिभिर्मधुक्षीरघृतादिभिः ।
वरुणाय प्रकुर्वीत पूजामादौ समाहितः ॥

इति नारदस्मरणात् ।

तथा साधारणधर्मेषु धर्मावाहनादिसकलदेवतापूजाहोमसमन्त्रकप्रतिज्ञापत्रशिरोनिवेशनान्तेषु सत्सु च ।

तथा,

तोय त्वं प्राणिनां प्राणः सृष्टेराद्यं तु निर्मितम् ।
शुद्धेश्च कारणं प्रोक्तं द्रव्याणां देहिनां तथा ॥
अतस्त्वं दर्शयात्मानं शुभाशुभपरीक्षणे ।

इति प्राड्विवाकेनोदकाभिमन्त्रणे कृते शोध्यः सत्येन माभिरक्ष त्वं वरुणेत्युदकं प्रार्थयते । उदकस्थानानि च—

नारदेनोक्तानि, (व्य० प० १।३०५)

नदीषु तनुवेगासु सागरेषु वहेषु च ।
ह्रदेषु देवखातेषु तडागेषु सरःसु च ॥ इति ।

तथा पितामहेनापि,

स्थिरतोये निमज्जेत्तु न ग्राहिणि न चाल्पके ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तृणशैवालरहिते जलौकामत्स्यवर्जिते ॥
देवखातेषु यत्तोयं तस्मिन् कुर्याद्धिशोधनम् ।
आहार्यं वर्जयेन्नित्यं शीघ्रगासु नदीषु च ॥
आविशेत्सलिले नित्यमूर्मिपङ्कविवर्जिते । इति ।

आहार्यं तडागादिभ्य आहृतं ताम्रकटाहादिक्षिप्तं जलम् । नाभिप्रमाणोदकस्थश्च याज्ञियवृक्षोद्भवां धर्मस्थूणामवष्टभ्य प्राङ्मुखस्तिष्ठेत् ।

उदके प्राङ्मुखस्तिष्ठेद्धर्मस्थूणां प्रगृह्य च ।
इति स्मरणात् ॥ १०८ ॥

बा० १। सङ्गतिमाह * संप्रतीति। मामित्यस्य मेत्यादेश इत्याह *मामिति । अत एव कर्त्तुरयं मन्त्रः । इतीत्यस्य व्याख्या *अनेन मन्त्रेणेति, कमित्यस्य च *उदकमिति। धातूनामनेकार्थत्वादाह * अभिमन्त्रयेति । * पुरुषस्येति । यस्यकस्यचित् बलीयस इत्यर्थः। अतएव— (व्य० प० १।३०८ उ०)

ब्राह्मणः क्षत्रियो वैश्यो रागद्वेषविवर्जितः ।
नाभिमात्रे जले स्थाप्यः पुरुषः स्थाणुवत् बली ॥ इति नारदः ।

तद्ग्रहणोत्तरं प्रवेशस्यासंभवादाह * निमज्जेदिति ।

२। क्रममाह प्राग्वत् *एतच्चेति। कार्यमिति शेषः। एवमग्रेऽपि। *प्रकुर्वीतेति । दद्यादित्यर्थः। अतएव वरुणायेति चतुर्थी। उक्तहेतोरेवोक्तम् * आदाविति। समाहित इति । प्राड्विवाक इत्यर्थः। प्राग्वदेवाह * तथेति । अत एव—

स्थापयेत्प्रथमं तोये स्तम्भवत् पुरुषं नृपः ।
आगतं प्राङ्मुखं कृत्वा तोयमध्ये तु कारिणम् ॥
ततस्त्वावाहयेद्देवान् सलिलं चानुमन्त्रयेत् । इति पितामहः ।

कुर्या देवान् धर्मादीन् । धर्मावाहनादिशिरःपत्रारोपणान्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दित्यर्थः। अन्यदप्याह *तथेति। *इति, अनेन मन्त्रेण। उदकस्थानानि चेति चस्त्वर्थे। *वहेषु, प्रस्रवणेषु। चेति पाठः। वेति पाठेऽग्रिमचोऽपि तत्रैव।

३। *तथा, तद्वत्। * पितामहेनापि, उक्तानीत्यस्यानुषङ्गः। ग्राहो मकरः। अल्पक इति कुत्सायां कन्। जलौकेति मध्यमपदलोपी समासः। * नित्यं, सर्वथा। * आहृतम्, आनीतम्।

४। विशेषमाह *नाभीति। *धर्मस्थूणां, धर्मायःप्रतिमाम्। सूर्मी स्थूणा ऽयः प्रतिमेत्यमरः। अवष्टम्भश्च धारणात्मकः संयोगविशेषः। नारदमाह * उदके इति। नाभिदघ्ने इत्यर्थः। तथाच साऽपि कृत्वा तत्रादौ स्थाप्येति भावः॥ १०८॥

मि० ततः किं कर्तव्यमित्यत आह।

या० समकालमिषुं मुक्तमानीयान्यो जवी नरः।
गते तस्मिन्निमग्नाङ्गं पश्येच्चेच्छुद्धिमाप्नुयात्॥१०९॥

मि० निमज्जनसमकालं गते तस्मिन् जविन्येकस्मिन्पुरुषे अन्यो जवी शरपातस्थानास्थितः पूर्वमुक्तमिषुमानीय जले निमग्नाङ्गं यदि पश्यति तदा स शुद्धो भवति।

एतदुक्तं भवति। त्रिषु शरेषु मुक्तेष्वेको वेगवान् मध्यमशरपातस्थानं गत्वा तमादाय तत्रैव तिष्ठति। अन्यस्तु पुरुषो वेगवान् शरमोक्षस्थाने तोरणमूले तिष्ठति। एवं स्थितयोस्तयोस्तृतीयस्यां करतालिकायां शोध्यो निमज्जति। तत्समकालमेव तोरणमूलस्थितोऽपि द्रुततरं मध्यमशरपातस्थानं गच्छति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शरग्राही च तस्मिन्प्राप्ते द्रुततरं तोरणमूलं प्राप्या-न्तर्जलगतं यदि न पश्यति तदा शुद्धो भवतीति।

एतदेव स्पष्टीकृतम्—

पितामहेन,

गन्तुश्चापि च कर्तुश्च समं गमनमज्जनम्।
गच्छेत्तोरणमूलात्तु लक्ष्यस्थानं जवी नरः॥
तस्मिन्गते द्वितीयोऽपि वेगादादाय सायकम्।
गच्छेत्तोरणमूलं तु यतः स पुरुषो गतः॥
आगतस्तु शरग्राही न पश्यति यदा जले।
अन्तर्जलगतं सम्यक्तदा शुद्धिं विनिर्दिशेत्॥ इति।

जविनोश्च पुरुषयोर्निर्धारणं कृतम्—

नारदेन,

पञ्चाशतो धावकानां यौ स्यातामधिकौ जवे।
तौ च तत्र नियोक्तव्यौ शरानयनकारणात्॥ इति।

तोरणं च निमज्जनसमीपस्थाने समे शोध्यकर्ण-प्रमाणोच्छ्रितं कार्यम्।

गत्वा तु तज्जलस्थानतटे तोरणमुच्छ्रितम्।
कुर्वीत कर्णमात्रं तु भूमिभागे समे शुचौ॥

इति नारदस्मरणात्।

शरत्रयं वैणवं च धनुर्मङ्गलद्रव्यैः श्वेतपुष्पादि-भिः प्रथमं सम्पूजयेत्।

शरान् सम्पूजयेत्पूर्वं वैणवं च धनुस्तथा।
मङ्गलैर्धूपपुष्पैश्च ततः कर्म समाचरेत्॥

इति पितामहवचनात्।

धनुषः प्रमाणं लक्ष्यस्थानं च—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नारदेनोक्तम्, (व्य० प० १)

क्रूरं धनुः सप्तशतं मध्यमं षट्शतं स्मृतम्।
मन्दं पञ्चशतं ज्ञेयमेष ज्ञेयो धनुर्विधिः॥ (३०७)
मध्यमेन तु चापेन प्रक्षिपेच्च शरत्रयम्। (३०६)
हस्तानां तु शते सार्द्धे लक्ष्यं कृत्वा विचक्षणः।
न्यूनाधिके तु दोषः स्यात्क्षिपतः सायकांस्तथा॥ इति।

अङ्गुलानां सप्ताधिकं शतं सप्तशतं क्रूरं धनुः। एवं षट्शतं पञ्चशतं च। एवं चैकादशाङ्गुलाधिकं हस्तचतुष्टयं क्रूरस्य धनुषः प्रमाणम्, मध्यमस्य दशाङ्गुलाधिकम्, मन्दस्य नवाङ्गुलाधिकामित्युक्तं भवति। शराश्चानायसाग्रा वैणवाः कार्याः।

शरांश्चानायसाग्रांस्तु प्रकुर्वीत विशुद्धये।
वेणुकाण्डमयांश्चैव क्षेप्ता तु सुदृढं क्षिपेत्॥

इति स्मरणात्। क्षेप्ता तु क्षत्रियस्तद्वृत्तिर्वा ब्राह्मणः सोपवासो नियोक्तव्यः।

यदाह,

क्षेप्ता च क्षत्रियः प्रोक्तस्तद्वृत्तिर्ब्राह्मणोऽपि वा।
अक्रूरहृदयः शान्तः सोपवासस्ततः क्षिपेत्॥ इति।

त्रिषु मुक्तेषु मध्यमः शरो ग्राह्यः।

तेषां च प्रेषितानां च शराणां शास्त्रचोदनात्।
मध्यमस्तु शरो ग्राह्यः पुरुषेण बलीयसा॥

इति वचनात्। तत्रापि पतनस्थानादानेतव्यो न सर्पणस्थानात्।

शरस्य पतनं ग्राह्यं सर्पणं तु विवर्जयेत्।
सर्पन् सर्पन् शरो यायाद् दूराद् दूरतरं यतः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति वचनात् । वाते च प्रवाति विषमादिदेशे च शरमोक्षो न कार्यः ।

इषुं न प्रक्षिपेद्विद्वान्मारुते चातिवायति ।
विषमे भूप्रदेशे च वृक्षस्थाणुसमाकुले ॥
तृणगुल्मलतावल्लीपङ्कपाषाणसंयुते ।

इति पितामहवचनात् । निमग्नाङ्गं पश्येच्चेच्छुद्धिमाप्नुयादिति वदता उन्मज्जिताङ्गस्याशुद्धिर्दर्शिता। स्थानान्तरगमने चाशुद्धिः—

पितामहेनोक्ता,

अन्यथा न विशुद्धः स्यादेकाङ्गस्यापि दर्शनात् ।
स्थानाद्वाऽन्यत्र गमनाद्यस्मिन्पूर्वं निवेशितः ॥ इति।

एकाङ्गस्यापि दर्शनादिति च कर्णाद्यभिप्रायेण ।

शिरोमात्रं तु दृश्येत न कर्णौ नापि नासिका ।
अप्सु प्रवेशने यस्य शुद्धं तमपि निर्दिशेत् ॥

इति विशेषाभिधानात् ।

अथमत्र प्रयोगक्रमः । उक्तलक्षणजलाशयसन्निधावुक्तलक्षणं तोरणं विधाय उक्तप्रमाणे देशे लक्ष्यं निधाय तोरणसन्निधौ सशरं धनुः सम्पूज्य जलाशये वरुणमावाह्य पूजयित्वा तत्तीरे धर्मादींश्च देवान् हवनान्तमिष्ट्वा शोध्यस्य शिरसि प्रतिज्ञापत्रमाबध्य प्राड्विवाको जलमभिमन्त्रयते, तोय त्वं प्राणिनां प्राण इत्यादिना मन्त्रेण । अथ शोध्यः सत्येनेत्यादिना मन्त्रेण जलमभिमन्त्र्य गृहीतस्थूणस्य नाभिमात्रोदकावस्थितस्य बलीयसः पुरुषस्य समीपमुपसर्पति। अथ शरेषु त्रिषु मुक्तेषु मध्यमशरपातस्थाने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मध्यमशरं गृहीत्वा जविन्येकस्मिन्पुरुषे स्थिते अन्यस्मिंश्च तोरणमूले स्थिते प्राड्विवाकेन तालत्रये दत्ते युगपद् गमनमज्जनम् अथ शरानयनमिति। इत्युदकविधिः ॥ १०९ ॥

बा० १। समकालमिति गमनाक्रियाविशेषणम्। तच्च साकाङ्क्षमिति प्रकृतत्वादाह *निमज्जनेति। * गते इति। मध्यमशरपातस्थानं प्रतीति भावः। तस्मिन्नित्यस्य व्याख्या *जविन्येकस्मिन्पुरुषे इति। नर इति लब्धमिदम्। अत एवाह * अन्य इति। तदर्थमाह *शरेति। भूतनिष्ठालब्धमाह *पूर्वमिति। *आनीयेति। यतः स गतस्तत्रानीयेत्यर्थः। * जलनिमग्नाङ्गमिति। सप्तम्यर्थे बहुव्रीहिः। जले निमग्नाङ्गमिति पाठेऽपि अर्शआद्यच्। तत्र तथा तद्विशिष्टं जलं पश्यतीत्येवार्थः। यद्वा निमज्जनं कर्णाद्यभिप्रायं दर्शनं मस्तकाभिप्रायमित्यनुपदं स्फुटीभविष्यति।

२। स्पष्टतया सर्वाप्रतीतेराह *एतदिति। *त्रिष्विति। अतएव—

अप्सु प्रवेश्य पुरुषं प्रक्षिपेत्सायकत्रयम्।

इति बृहस्पतिः। * एकः, पुरुषः। पञ्चम्यर्थबहुव्रीहिणा लब्धं स्थानं विशिनष्टि * तोरणेति। तोरणोऽस्त्री बहिर्द्वारमित्यमरः। * स्थितयोरिति। तयोस्सतोरिति भावः। * तृतीयस्यामिति। तोरणमूलस्थितप्राड्विवाकसंबन्धितृतीयकरतालिकासमकालमित्यर्थः। *तत्समकालमिति।

कात्यायनोऽपि,

क्षिप्तेषु मज्जनं कार्यं गमनं समकालिकम्। इति।

क्षिप्तेषु शरेषु सत्सु मज्जनं गमनं च तृतीयकरतालिकासमकालिकं कार्यमित्यर्थः। * प्राप्ते, सति। * प्राप्य, लब्ध्वा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अदर्शने हेतुमाह *अन्तर्जलगतमिति। सम्यगन्तर्जलगतमित्यर्थः। मस्तकस्यापि निमज्जनादिति भावः । एतदाशयेनैव यदि न पश्यतीत्युक्तम्। अतएव मूलविरोधो नेति भावः।

नारदोऽपि, (व्य० प० १।३०९।३१०)

शरप्रक्षेपणस्थानाद्युवा जवसमन्वितः ।
गच्छेत्परमया शक्त्या यत्रासौ मध्यमः शरः ॥
ध्यमं शरमादाय पुरुषो यस्तथाविधः ।
प्रत्यागच्छेत्तु वेगेन यतः स पुरुषो गतः ॥

आगत इत्यादि प्राग्वत् इति ।

३। विशेषानेवाह *जविनोश्चेत्यादिना । चस्त्वर्थे । एवमग्रेऽपि । तत्र हेतुमाह *शरेति फलमपीह हेतुः । तद्रूपहेतोस्तावेव नियोक्तव्यावित्यर्थः। *संशोध्येति। तस्य यौ कर्णावित्यर्थः। शोध्यकर्णेति पाठान्तरम्। *तज्जलेति। दिव्यजलसमीपभूप्रदेशमित्यर्थः। अतएवाह *तटे इति। शोध्यकर्णप्रमाणमुच्छ्रितमित्यर्थः। विशेषमाह * शरेति । वैणवं धनुश्चेत्यर्थः । मङ्गलेत्यस्य व्याख्या *श्वेतेति । एवमग्रेऽपि । *तत इति । अतएव प्रथममिति पूर्वमुक्तम् ।

४। विशेषमाह * धनुषः प्रमाणमित्यादिना । *विधिः, प्रकारः। त्रैविध्यफलमाह * मध्यमेनेति । चस्त्वर्थे । एवमग्रेऽपि। एवार्थो वा। द्वितीयः पादपूरणे। किं कृत्वेत्यत आह *हस्तानामिति । * तथा, किञ्च । न्यूनाधिके तस्मिन् सति सायकान् क्षिपतो दोषः स्यादित्यर्थः । सप्तशतमित्यादेर्भिन्नपदत्वे बहुवचनापत्तिः, समाहारद्विगौ ङीबापत्तिः, असंभवापत्तिश्च, अतः सप्ताधिकशताङ्गुलप्रमाणकमित्यादिः वाच्योऽर्थः। तत्फलितमाह *अङ्गुलानामिति।*शतमिति । यस्य तादृति दोषः। ता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्पर्यार्थमाह *एवंचेति । *अनायसाग्रा इति । अयोविकाररूपाग्रभागरहिता इत्यर्थः । कात्यायनमाह * शरांश्चेति । सुदृढमितिसूचितं विशेषमाह * क्षेप्तेति । पितामहमाह * यथाहेति । *ततः क्षिपेदिति । तथा शुचिरिति पाठान्तरम् । विशेषमुक्तमेवाह *त्रिष्विति । एवमग्रेऽपि । अग्रे सर्वा पितामहोक्तिरेव । *प्रेषितानां, प्रक्षिप्तानाम् । *तेषामिति । उक्तलक्षणानाम् । *तत्रापि, मध्यमशरविषयेऽपि । सर्पन्निति शत्रन्तम् । वीप्सायां द्वित्वम् । अतिवायतीत्यार्षम् । अतिव्ययतीति पाठो वा । स्थाणुर्वृक्षविशेषः । स्थाणुर्वा ना ध्रुवः शङ्कुरित्यमरः । उत्तरसङ्गतये आह *निमग्नाङ्गमिति । *वदता, मूलकृता । चोऽप्यर्थे । *अन्यथेति ।

आगतस्तु शरग्राही न पश्यति तथा जले ।
अन्तर्जलगतं सम्यक् तदा शुद्धं विनिर्दिशेत् ॥ इत्यादिः ।

४। अन्यथेत्यस्यैवार्थमाह * एकाङ्गेति । स्थानपदार्थमाह *यस्मिन्निति । मिथोऽविरोधायाह *एकाङ्गेति । चस्त्वर्थे । अपिरुक्तसमुच्चये । *विशेषाभिधानादिति । तेनैवेति भावः । *सन्निधौ, पश्चिमतीरदेशे । *तत्तीरे, अक्षतपुञ्जादौ । *अथ, तदभिमन्त्रणानन्तरम् । *गृहीतस्थूणस्येति । प्राङ्मुखस्येति शेषः । *प्रादिति । तोरणमूलस्थितेनेत्यादिः । *दत्ते इति । तृतीयतालिकासमकालमिति भावः ॥ १०९ ॥

मि० इदानीं विषविधिमाह ।

या० त्वं विष ब्रह्मणः पुत्रः सत्यधर्मे व्यवस्थितम् ।
त्रायस्वास्मादभीशापात्सत्येन भव मेऽमृतम् ॥ ११०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवमुक्त्वा विषं शार्ङ्गं भक्षयेद्धिमशैलजम् ।
यस्य वेगैर्विना जीर्येच्छुद्धिं तस्य विनिर्दिशेत् ॥११॥

मि० त्वं विषेत्यादिमन्त्रेण विषमभिमन्त्र्य कर्ता विषं हिमशैलजं शृङ्गप्रभवं भक्षयेत् । तच्च भक्षितं यस्य विषं वेगैर्विना जीर्यति स शुद्धो भवति । विषवेगो नाम धातोर्धात्वन्तरप्राप्तिः ।

धातोर्धात्वन्तरप्राप्तिर्विषवेग इति स्मृतः ।

इति वचनात् । धातवश्च—

त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्राणीति सप्त । एवं च सप्तैव विषवेगा भवन्ति । तेषां च लक्षणानि पृथगेव विषतन्त्रे कथितानि ।

वेगो रोमाञ्चमाद्यो रचयति विषजः स्वेदवक्त्रोपशोषौ
तस्योर्ध्वस्तत्परौ द्वौ वपुषि जनयतो वर्णभेदप्रवेपौ ।
यो वेगः पञ्चमोऽसौ नयति विवशतां कण्ठभङ्गं च हिक्कां
षष्ठो निश्वासमोहौ वितरति च मृतिं सप्तमो भक्षकस्य ॥

इति ।

अत्र च महादेवस्य पूजा कर्तव्या ।

यथाह नारदः,

दद्याद्विषं सोपवासो देवब्राह्मणसन्निधौ ।
धूपोपहारमन्त्रैश्च पूजयित्वा महेश्वरम् ॥ इति ।

प्राड्विवाकः कृतोपवासो महादेवं पूजयित्वा तस्य पुरतो विषं व्यवस्थाप्य धर्मादिपूजां हवनान्तां विधाय प्रतिज्ञापत्रं शोध्यस्य शिरसि निधाय विषमभिमन्त्रयते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वं विष ब्रह्मणा सृष्टं परीक्षार्थं दुरात्मनाम् ।
पापानां दर्शयात्मानं शुद्धानाममृतं भव ॥
मृत्युमूर्ते विषं त्वं हि ब्रह्मणा परिनिर्मितम् ।
त्रायस्वैनं नरं पापात्सत्येनास्यामृतं भव ॥ इति ।
एवमभिमन्त्र्य दक्षिणाभिमुखाय स्थिताय दद्यात् ।
नारदवचनात् ।
द्विजानां सन्निधावेव दक्षिणाभिमुखे स्थिते ।
उदङ्मुखः प्राङ्मुखो वा विषं दद्यात्समाहितः ॥
इति ।

विषं च वत्सनाभादि ग्राह्यम् ।
शृङ्गिणो वत्सनाभस्य हिमजस्य विषस्य वा ।
इति पितामहवचनात् । वर्ज्यानि च तेनैवोक्तानि,
चारितानि च जीर्णानि कृत्रिमाणि तथैव च ।
भूमिजानि च सर्वाणि विषाणि परिवर्जयेत् ॥ इति ।
नारदेनापि, (व्य० प० १।३२१)
भृष्टं च चारितं चैवं धूपितं मिश्रितं तथा ।
कालकूटमलाबुं च विषं यत्नेन वर्जयेत् ॥ इति ।
कालश्च नारदेनोक्तः, (व्य० प० १।३१९)
तोलयित्वेप्सितं काले देयं तद्धि हिमागमे ।
नापराह्णे न मध्याह्ने न सन्ध्यायां तु धर्मवित् ॥ इति ।
कालान्तरे तूक्तप्रमाणादल्पं देयम् ।
वर्षे चतुर्यवा मात्रा ग्रीष्मे पञ्चयवा स्मृता ।
हेमन्ते सा सप्तयवा शरद्यल्पा ततोऽपि हि ॥
इति स्मरणात् । अल्पेति षड्यवेत्यर्थः । हेमन्तग्रहणेन शिशिरस्यापि ग्रहणम् । हेमन्तशिशिरयोः स-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मासनेति श्रुतेः। वसन्तस्य च सर्वदिव्यसाधारणत्वात्तत्रापि सप्तयवा। विषं च घृतप्लुतं देयम्।

नारदवचनात्। (व्य० प० १।३२३)

विषस्य पलषड्भागाद्भागो विंशतिमस्तु यः।
तमष्टभागहीनं तु शोध्ये दद्याद् घृतप्लुतम्॥ इति।

पलं चात्र चतुःसुवर्णिकम्।

तस्य षष्ठो भागो दश माषाः दश यवाश्च भवन्ति। त्रियवं त्वेककृष्णलम् पञ्चकृष्णलको माषः इत्येको माषः पञ्चदश यवा भवन्ति। एवं दशानां माषाणां यवाः सार्द्धं शतं भवन्ति। पूर्वे च दश यवा इति षष्ट्यधिकं शतं यवाः पलस्य षष्ठो भागः। तस्माद्विंशतितमो भागोऽष्टौ यवाः। तस्याष्टमभागहीनः एकयवहीनः, तं विंशतितमं भागं सप्तयवं घृतप्लुतं दद्यात्। घृतं च विषात् त्रिंशद्गुणं ग्राह्यम्।

पूर्वाह्णे शीतले देशे विषं देयं तु देहिनाम्।
घृतेन योजितं श्लक्ष्णं पिष्टं त्रिंशद्गुणान्वितम्॥

इति कात्यायनवचनात्। त्रिंशद्गुणेन घृतेनान्वितं विषम्। शोध्यश्च कुहकादिभ्यो रक्षणीयः।

त्रिरात्रं पञ्चरात्रं वा पुरुषैः स्वैराधिष्ठितम्।
कुहकादिभयाद्राजा रक्षयेद्दिव्यकारिणम्॥
ओषधीर्मन्त्रयोगांश्च मणीनथ विषापहान्।
कर्त्तुः शरीरसंस्थांस्तु गूढोत्पन्नान्परीक्षयेत्॥

इति पितामहस्मरणात्। तथा विषमपि रक्षणीयम्। (व्य० प० १।३२२)

शार्ङ्गं हैमवतं शस्तं गन्धवर्णरसान्वितम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अकृत्रिममसंमूढममन्त्रोपहतं च यत् ॥

इति नारदस्मरणात् । तथा, विषे पीते यावत्करतालिकाशतपञ्चकं तावत्प्रतीक्षणीयोऽनन्तरं चिकित्सनीयः ।

यथाह नारदः,

पञ्चतालशतं कालं निर्विकारो यदा भवेत् ।

तदा भवति संशुद्धस्ततः कुर्याच्चिकित्सितम् ॥ इति ।

पितामहेन तु दिनान्तोऽवधिरुक्तोऽल्पमात्राविषयः ।

भक्षिते तु यदा स्वस्थो मूर्च्छाछर्दिविवर्जितः ।

निर्विकारो दिनस्यान्ते शुद्धं तमपि निर्दिशेत् ॥ इति ।

अत्र च प्राड्विवाकः सोपवासो महादेवं संपूज्य तत्पुरतो विषं स्थापयित्वा धर्मादीनिष्ट्वा शोध्यस्य शिरसि प्रतिज्ञापत्रं निधाय विषमभिमन्त्र्य दक्षिणाभिमुखाय स्थिताय विषं प्रयच्छति । स च शोध्यो विषमभिमन्त्र्य भक्षयतीति क्रमः । इति विषविधानम् ॥ ११० ॥ १११ ॥

बा० १। सङ्गतिमाह *इदानीमिति । व्यवस्थितमिति पाठः। विषशब्दस्य क्लीबत्वात् । एवमग्रेऽपि । विषमित्यस्य मध्यमणिन्यायेनान्वयेन एवमुक्त्वेत्यस्यार्थमाह *विषमभीति । प्रकृतत्वादाह *विषं वेगैरिति । लिङ्गर्थाविवक्षया आह *जीर्यतीत्यादि । वेगैरितिबहुवचनसूचितमाह *विषवेग इति । पितामहमाह *धातोरिति । *च लक्षणानीति । लक्षणानित्वित्यर्थः। तदेवाह *वेग इति। तस्योर्ध्व इति पूर्वान्वयि । तस्येति शेषत्वविवक्षया षष्ठी । *तत्परावविति । यथाक्रममिति भावः । *नय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तीति । तनोर्विवशतामतिचञ्चलतां कण्ठभङ्गं हिक्कां चेत्यर्थः । वितरतिचेति चस्त्वर्थे व्युत्क्रमे च ।

२। विशेषमाह *अत्रचेति । तदानन्तर्याभावात् यथाश्रुतासङ्गतेर्नारदार्थे सप्रयोगक्रममाह *प्रागित्यादि । तद्दिने उपवासाभ्रमाय सोपवास इत्यस्य व्याख्या *कृतोपवास इति। शेषमाह *तस्येत्यादि । *निधाय, बध्वा । पूर्वमन्त्रः कर्त्तुरिति अत्र पैतामहमेव तन्मन्त्रमाह *त्वं विषेति। विशेषोक्तौ हेतुमाह *नारदेति । तदेवाह * द्विजानामिति । स्थिते इति उद्देश्यस्याधिकरणत्वविवक्षया सप्तमी। *प्राङ्मुखो वा, प्राड्विवाकः।

विषस्येत्यस्य प्रत्येकं सम्बन्धः, विकल्पे वा ।

यवाः सप्त प्रदातव्याः शुद्धिहेतोरसंशयः ।

इति अस्य पूर्वार्द्धम् । भेदस्तु—

कात्यायनेनोक्तः,

अजाशृङ्गनिभं श्यामं सुपीतं शृङ्गसम्भवम् ।
भङ्गे च शृङ्गवेराभं ख्यातं तच्छृङ्गिणां विषम् ॥
रक्तस्थमासितं कुर्यात्काठिनं चैव तत्क्षणात् ।
अनेन विधिना ज्ञेयं विषं दिव्यविशारदैः ॥
वत्सनाभनिभं पीतं वर्णज्ञानेन निश्चयः ।
शुक्तिश्रृङ्गाकृतिर्भङ्गे विद्यात्तद्वत्सनाभकम् ॥
मधुक्षीरसमायुक्तं स्वच्छं कुर्वीत तत्क्षणात् ।
बाह्यमेवं समाख्यातं लक्षणं धर्मसाधकैः ॥ इति ।

३। *तेनैव, पितामहेनैव। एवः प्रागुक्त्या स्फुटप्रत्यासत्तौ *चारितानि, सञ्चारितानि कस्मैचिद्दत्तानि । *च जीर्णानि आतिजीर्णानीति पाठान्तरम् । उक्तहेतोरेवाह *नारदेनेति । तेनाप्युक्तानीत्यस्यानुषङ्गः। तथाच नारदेनापीति पाठे तद्वत् तेनाप्युक्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नीत्यर्थः। *ईप्सितं, सप्तयवात्मकम्।

४। *हिमेति। हेमन्तशिशिरयोरित्यर्थः। नारदमेवाह *वर्षे इति। इदमार्षम्।

वर्षासु षड्यवा मात्रा ग्रीष्मे पञ्चयवा स्मृता।
हेमन्ते सा सप्तयवा शरद्यात्ततोऽपिहि॥

इति कल्पतरौ पाठः। मात्राशब्दः परिच्छिन्नपरिमाणके वर्त्तते। सा मात्रा अल्पा त्रियवेति कश्चित्। न्यूनतां निराचष्टे *हेमन्तेत्यादि।

५। नारदमेवाह *विषस्येति। शोध्ये इति तस्य तत्त्वविवक्षया। तदर्थमाह *पलं चेत्यादिना। पक्षान्तरनिरासायाह *अत्रेति। षडादिशब्दाः षष्ठादिपरा इत्याह * षष्ठ इत्यादि। व्चेरन्यत्रानियमान्न दोषः। अतएवात्र मिथो विरोधो न। तस्मादिति संबन्धिनस्तत्त्वविवक्षया पञ्चमी तत्रेति भावः। शोध्ये इति प्रागूवत्। तमित्यस्य व्याख्या * विंशतीति।

६। विशेषं तत्राह *घृतंचेति। देहिनामित्यपि तस्य तत्त्वविवक्षया। *श्लक्ष्णं पिष्टमिति। तद् यथा स्यात्तथा पिष्टमित्यर्थः। सम्यक् पिष्टमिति पाठान्तरम्। घृतपरिमाणमाह *त्रिंशदिति। यथाश्रुतासंगतेः तदर्थमाह * त्रिंशदिति। त्रिंशद्ग्रहणेन त्विति कल्पतरौ पाठः।

७। विशेषान्तरमाह * शोध्यश्चेत्यादिना। * कुहकेति। तन्त्रादिभ्य इत्यर्थः। कुहकादीत्युक्तमेव विशदयति * ओषधीरिति। *गूढोत्पन्नानिति। गुप्ततया संजातानित्यर्थः। विषमिति पाठे तथाशब्दः समुच्चये। अपीति पाठे तद्वदित्यर्थे।

८। विशेषमाह *तथेति। पञ्च तालशतानि यस्मिन्निति बहुव्रीहिः। कालविशेषणम्। कालाध्वनोरिति द्वितीया। *चिकि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्सितमिति । चिकित्सनमिति पाठान्तरम् । अनर्थान्तरम् । विरोधं परिहरति * पितामहेनेति । तमेवाह * भक्षितेत्त्विति । विषे इति भावः । स्वस्थ इत्यस्यैव व्याख्या * मूर्छेति । सर्वसंग्रहायाह *निर्विकार इति ।

९। कंचन विशेषं कथयन्प्रागुक्तमपि किंचित् स्पष्टत्वायाह *अत्र चेति । क्रमेऽन्वयः । *निधाय, आबध्य ॥११०॥१११॥

इति विषाविधिः ॥

मि० अथ कोशविधिमाह ।

या० देवानुग्रान्समभ्यर्च्य तत्स्नानोदकमाहरेत् ।
संश्राव्य पाययेत्तस्माज्जलं तु प्रसृतित्रयम् ॥ ११२॥

मि० उग्रान्देवान् दुर्गादित्यादीन् समभ्यर्च्य गन्धपुष्पादिभिः पूजयित्वा संस्नाप्य तत्स्नानोदकमाहरेत् आहृत्य च "तोय त्वं प्राणिनां प्राण" इत्यादिना तत्तोयं प्राड्विवाकः संश्राव्य शोध्येन च तत्तोयं पात्रान्तरे कृत्वा सत्येन माऽभिरक्ष त्वं वरुणेत्यनेनाभिमन्त्रितं पाययेत्प्रसृतित्रयम् । एतच्च साधारणधर्मेषु धर्मावाहनादिसकलदेवतापूजाहोमसमन्त्रकप्रतिज्ञापत्राशिरोनिवेशनान्तेषु सत्सु च । अत्र च स्नाप्यदेवतानियमः कार्यनियमोऽधिकारिनियमश्च पितामहादिभिरुक्तः ।

भक्तो यो यस्य देवस्य पाययेत्तस्य तज्जलम् ।
समभावे तु देवानामादित्यस्य तु पाययेत ॥
दुर्गायाः पाययेच्चौरान् ये च शस्त्रोपजीविनः ।
भास्करस्य तु यत्तोयं ब्राह्मणं तन्न पाययेत् ॥
दुर्गायाः स्नापयेच्छूलमादित्यस्य तु मण्डलम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्येषामपि देवानां स्नापयेदायुधानि तु ॥
इति देवतानियमः ।
विस्रम्भे सर्वशङ्कासु सन्धिकार्ये तथैव च ।
एषु कोशः प्रदातव्यो नित्यं चित्तविशुद्धये ॥
इति कार्यनियमः । (ना० व्य० प० १।३२८)
पूर्वाह्णे सोपवासस्य स्नातस्यार्द्रपटस्य च ।
सशूकस्याव्यसानिनः कोशपानं विधीयते ॥
सशूक आस्तिकः ।
मद्यपस्त्रीव्यसनिनां कितवानां तथैव च ।
कोशः प्राज्ञैर्न दातव्यो ये च नास्तिकवृत्तयः ॥
महापराधे निर्धर्मे कृतघ्ने क्लीबकुत्सिते ।
नास्तिकव्रात्यदाशेषु कोशपानं विवर्जयेत् ॥ इति ।

महापराधो महापातकम् । निर्धर्मो वर्णाश्रमधर्मरहितः पाखण्डी । कुत्सितः प्रतिलोमजः । दाशाः कैवर्ताः । इत्यधिकारिनियमः ।

तथा, गोमयस्य मण्डलं कृत्वा तत्र शोध्यमादित्याभिमुखं स्थापयित्वा पाययेदिति नारदवचनादवगन्तव्यम् ।

यथाह,
तमाहूयाभिशस्तं तु मण्डलाभ्यन्तरे स्थितम् ।
आदित्याभिमुखं कृत्वा पाययेत्प्रसृतित्रयम् ॥ इति ॥ ११२ ॥

बा० १। *कोशेति । कोशोऽर्थदिव्ययोरित्यनेकार्थः । कोशः कोष इवाण्डजे। कुड्मले चषके दिव्येऽर्थचये योनिशम्बयोः । जातीकोशे ऽसिपिधाने इति हैमश्च । तत्रापि प्रकृतेऽपां वाचकत्वात् तत्र रूढिः । *संश्राव्य, अभिमन्त्र्य । *तस्मात् आहृतात् जलात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जलमितिपाठेऽग्रिमविशेष्यम् । वक्ष्यमाणलब्धमाह *संस्नाप्येति। *इत्यादिना, मन्त्रेण । संश्राव्येत्यस्य पाययेदित्यत्रान्वयः । मा-ग्वदाह *एतच्चेति । पितामहादिभिरिति आदिना नारदादयः। ते चान्यत्र स्पष्टाः ।

२। विशेषमाह * अत्रचेत्यादिना । * समभावे तु देवानां, देवताविषयकभक्तिसाम्ये । * ये चेति । तांश्चे-त्यर्थः । * तन्नेति । ब्राह्मण्यादेस्तन्मूलकत्वात् । *विस्रम्भे, विश्वासे । * आस्तिक इति । सत्येन दिव्यकरणे निष्ठाशङ्का-वानित्यर्थः । * मद्यपेति । द्वन्द्वगर्भोऽत्र द्वन्द्वः । * ये चेति। तेषां चेत्यर्थः । क्लीबेति समाहारद्वन्द्वः । * नास्तिकेति । पूर्वं तद्वृत्तिरुक्त इति न पौनरुक्त्यम् ।
विशेषमाह * तथेति । *यथाहेति । स एवेति शेषः ॥ ११२॥

मि० ननु तुलादिषु विषान्तेषु समनन्तरमेव शुद्ध्य-शुद्धिभावना कोशे तु कथमित्यत आह ।

या० अर्वाक् चतुर्दशादह्नो यस्य नो राजदैविकम् ।
व्यसनं जायते घोरं स शुद्धः स्यान्न संशयः ॥ ११३॥

मि० चतुर्दशादह्नः पूर्वं यस्य राजिकं राजनिमित्तं दैविकं दैवप्रभवं व्यसनं दुःखं घोरं महत् नो नैव जायते, अल्पस्य देहिनामपरिहार्यत्वात्, स शुद्धो वेदितव्यः। ऊर्ध्वं पुनरवधेर्न दोषः ।

यथाह नारदः, (व्य० प० १।३३१)

ऊर्ध्वं यस्य द्विसप्ताहाद्वैकृतं तु महद्भवेत् ।
नाभियोज्यः स विदुषा कृतकालव्यतिक्रमात् ॥

इति। अर्थसिद्धमेवोक्तम् इदम्। अर्वाक् चतुर्दशादह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्येतन्महाभियोगविषयम् । महाभियोगेष्वेतानीति प्रस्तुत्याभिधानात्। अवध्यन्तराणि पितामहेनोक्तानि अल्पविषयाणि।कोशमल्पेऽपि दापयेदिति स्मरणात्। तानि च—

त्रिरात्रात्सप्तरात्राद्वा द्वादशाहाद्विसप्तकात् ।
वैकृतं यस्य दृश्येत पापकृत्स उदाहृतः ॥ इति ।

महाभियोगद्रव्यादर्वाचीनं द्रव्यं त्रिधा विभज्य त्रिरात्राद्यपि पक्षत्रयं व्यवस्थापनीयम् । इति कोशविधिः॥ ११३ ॥

मि० तुलादीनि कोशान्तानि पञ्च महादिव्यानि यथोद्देशं योगीश्वरेण व्याख्यातानि । स्मृत्यन्तरे त्वल्पाभियोगविषयाण्यन्यानि दिव्यानि कथितानि ।

यथाह पितामहः;

तण्डुलानां प्रवक्ष्यामि विधिं भक्षणचोदितम् ।
चौरे तु तण्डुला देया नान्यस्येति विनिश्चयः ॥
तण्डुलान्कारयेच्छुक्लान् शालेर्नान्यस्य कस्यचित् ।
मृन्मये भाजने कृत्वा आदित्यस्याग्रतः शुचिः ॥
स्नानोदकेन संमिश्रान् रात्रौ तत्रैव वासयेत् ।
प्राङ्मुखोपोषितं स्नातं शिरोरोपितपत्रकम् ॥
तण्डुलान् भक्षयित्वा तु पत्रे निष्ठीवयेत्ततः ।
पिप्पलस्य तु नान्यस्य अभावे भूर्ज एव तु ॥
लोहितं यस्य दृश्येत हनुस्तालु च शीर्यते ।
गात्रं च कम्पते यस्य तमशुद्धं विनिर्दिशेत् ॥इति।

शिरोरोपितपत्रकं तण्डुलान् भक्षयित्वा निष्ठीवयेत्प्राड्विवाकः । भक्षयित्वेति च ण्यन्ताण्णि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चि रूपम् । सर्वदिव्यसाधारणं च धर्मावाहनादि पूर्ववदिहापि कर्तव्यम् । इति तण्डुलविधिः ।

तप्तमाषविधिः पितामहेनोक्तः । तथाहि ।

सौवर्णं राजतं वापि ताम्रं वा षोडशाङ्गुलम् ।
चतुरङ्गुलखातं तु मृन्मयं वाऽथ मण्डलम् ॥

वर्तुलमित्यर्थः ।

पूरयेद् घृततैलाभ्यां विंशत्या तु पलैस्तु तत् ।
सुवर्णमाषकं तस्मिन् सुतप्ते निक्षिपेत्ततः ॥
अङ्गुष्ठाङ्गुलियोगेन उद्धरेत्तप्तमाषकम् ।
कराग्रं यो न धुनुयाद्विस्फोटो वा न जायते ॥
शुद्धो भवति धर्मेण निर्विकारकराङ्गुलिः ।

उद्धरेदिति वचनात्पात्रादुत्क्षेपणमात्रं न बहिःप्रक्षेपणमादरणीयम् । अपरकल्पः ।

सौवर्णे राजते ताम्रे आयसे मृन्मयेऽपि वा ।
गव्यं घृतमुपादाय तदग्नौ तापयेच्छुचिः ॥
सौवर्णीं राजतीं ताम्रीमायसीं वा सुशोधिताम् ।
सलिलेन सकृद्धौतां प्रक्षिपेत्ताम्रमुद्रिकाम् ॥
भ्रमद्वीचि तरङ्गाढ्ये ह्यनखस्पर्शगोचरे ।
परीक्षेतार्द्रपर्णेन चुरुकारं सुघोषकम् ॥
ततश्चानेन मन्त्रेण सकृत्तदभिमन्त्रयेत् ।
परं पवित्रममृतं घृत त्वं यज्ञकर्मसु ॥
दह पावक पापं त्वं हिमशीतं शुचौ भव ।
उपोषितं ततः स्नातमार्द्रवाससमागतम् ॥
ग्राहयेन्मुद्रिकां तां तु घृतमध्यगतां तथा ।
प्रदेशिनीं च तस्याथ परीक्षेयुः परीक्षकाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(७) न्यायरत्नमाला-श्रीपार्थसारथिमिश्र वि० सं० (मीमांसा २

(८) ब्रह्मसूत्रभाष्यम्-बादरायणप्रणीत-वेदान्तसूत्रस्य यतीन्द्र श्रीमद्विज्ञान-भिक्षुकृत व्याख्यानम् । सम्पूर्णम् । (वेदान्तः) ६

(९) स्याद्वादमञ्जरी-मल्लिषेणनिर्मिता सम्पूर्णा । (जैनदर्शनम्) २

(१०) सिद्धित्रयम्-विशिष्टाद्वैत-ब्रह्मनिरूपण-परम्-श्रीभाष्यकर्तां परमगुरुभिः श्री ६ श्रीयामुनमुनिभिर्विरचितम् । सम्पूर्णम् (वेदान्तः) १

(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टा-रकाचार्यसंगृहीतः। आचार्यचित्सुख-मुनिविरचितव्याख्योपेतः (वेदान्तः) ४

(१२) विभक्त्यर्थनिर्णयःन्यायानुसारिप्रथमादि-सप्तविभक्तिविस्तृतविचाररूपः म० म० श्रीगिरिधरोपाध्यायरचितः । सम्पूर्णः (न्यायः) ५

(१३) विधिरसायनम् । श्रीअप्पयदीक्षितकृतम् । सं० (मीमांसा) २

(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्ट-सोमेश्वरविरचिता । (मीमांसा) १६

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता । (वेदान्तः) २

(१६) मीमांसाबालप्रकाशः (जैमिनीयद्वादशा-ऽध्यायार्थसंग्रहः) श्रीभट्टनारायणात्मज-भट्टशङ्करविरचितः । (मीमांसा) २

(१७) प्रकरणपञ्चिका (प्रभाकरमतानुसारि-मीमांसादर्शनम्) महामहोपाध्यायश्रीशालिकनाथमिश्रविरचितं, श्रीशङ्करभट्टकृतो मीमांसासारसंग्रहश्च सम्पूर्णः (मीमांसा) ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीसदानन्दव्यासप्रणीत-स्तत्कृतव्याख्यासमलङ्कृतश्च । (वेदान्त) ३

(१९) कात्यायनश्रौतसूत्रम् । महामहोपाध्यायश्रीकर्काचार्यविरचितभाष्यसहितम् । १३

(२०) ब्रह्मसूत्रभाष्यम् । श्रीभास्कराचार्यविरचितम् (वेदान्तः) १

(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम् । आनन्दपूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया (विद्यासागरी) ति प्रसिद्धया समेतम् । (वेदान्तः) १३

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता । १

(२३) श्रीलक्ष्मीसहस्रम्-बालबोधिनीव्याख्यया-ऽवतरणिकया च सहितम् । ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२४ ब्रह्मसूत्रवृत्तिः मरीचिका श्रीव्रजनाथभट्टकृता (वेदान्त) १
२५ क्रोडपत्रसंग्रहः । अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्याः प्रत्यक्षानुमानमाथुर्या व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि : (न्यायः) २
२६ ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम् । श्रीसुन्दरभट्टरचितसिद्धान्तसेतुकाऽभिधटीकासहितश्रीदेवाचार्यप्रणीतसिद्धान्तजाह्नवीयुतम् २
२७ षड्दर्शनसमुच्चयः । बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शन संक्षेपः । मणिभद्रकृतटीकया सहितः । हरिभद्रसूरिकृतः । १
२८ शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः । प्रमेयरत्नार्णवश्च १
२९ अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्याजागदीशी टीका । ११
३० वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा संस्कारप्रकाशात्मकः। १०
३१ वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः ६
३२ स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरत्रिपाठिसंकलितः । ४
३३ वेदान्तरत्नमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्यकृता । १
३४ प्रस्थानरत्नाकरः । गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितः २
३५ वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम् । १
३६ योगदर्शनम् । परमहंसपरिव्राजकाचार्य-नारायणतीर्थविरचित-योगसिद्धान्तचन्द्रिका-समाख्यया संवलितम् । २
३७ वेदान्तदर्शनम् । परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वती स्वामिकृत ब्रह्माऽमृतवर्षिणी समाख्य व्याख्यासंवलितम् । ४
३८ विश्वप्रकाशः । कोशः । विद्वद्वर श्रीमहेश्वरसुरिविरचितः । २
३९ श्रीसुबोधिनी । श्रीवलभाचार्यविनिर्मिता । श्रीमद्भागवतव्याख्या गोस्वामीश्रीविठ्ठलनाथदीक्षितविरचित टिप्पणीसहिता ।
४० वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः पूजाप्रकाशः ।
४१ वेदान्तसिद्धान्तसंग्रहः । श्रुतिसिद्धान्तापरनामकः । श्रीब्रह्मचारिवनमालि[illegible]
द्वैतदर्शनानुगतः ।
४२ स्वानुभवादर्शः । श्रीमत्परमहंसपरिव्राजकाचार्य नारायणाश्रमशिष्य[illegible]
स्वकृतटीकाविभूषितश्च ।
४३ याज्ञवल्क्यस्मृतिः । बालम्भट्टीसमाख्य व्याख्यासमलङ्कृतमिताक्षरासहि[illegible]

पत्रादिप्रेषणस्थानम् } हरिदास गु[illegible] चौखम्बा, बनार[illegible]

Registered According to Act XXV of 1867 (Act Re[illegible]
धर्म[illegible]
१७०४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

September 1912.

THE

CHOWKHAMBÂ SANSKRIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 177.

धर्मशास्त्र १५१

व्यवहार- बालंभट्टी

इति प्रसिद्धया लक्ष्मीनामिकया

पायगुण्डे इत्युपनामकेन बालंभट्टेन स्वपत्न्याः लक्ष्मीदेव्याः

स्मारकत्वेन तन्नाम्ना रचितया बृहत्या टीकया सहिता

मिताक्षरा

श्रीयुतगोविन्ददासमहाशयप्रदर्शितरीत्या

पर्वतीयनित्यानन्दपन्तेन परिष्कृत्य संशोधिता ।

VYAVAHÂRA-BÂLAMBHATTI

THE EXTENSIVE COMMENTARY ON THE MITÂKSHARÂ

WITH THE ORIGINAL

BY

Bâlambhatta Páyagunde

EDITED BY

Pandit Nityanand Pant Parvatiya

Under the supervision of Shri Govinda Das.

FASCICULUS V.

...ISHED AND SOLD BY THE SECRETARY

CHOWKHAMBÂ SANSKRIT BOOK-DEPOT.

BENARES.

AGENTS:- OTTO HARRASSOWITZ LEIPZIG:

PANDITA JYESHTHARAMA MUKUNDAJI BOMBAY:

PROBSTHAIN & CO., BOOKSELLERS, LONDON

Printed by Jai Krishna Dasa Gupta,

AT THE VIDYA VILASA PRESS

BENARES.

Price Rupee one.

Registered According to Act XXV of 1867. (All Rig...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ श्रीः ॥

-*-

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तवकः— १७७

१ अस्यां चौखम्बा-संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्त्रेषु एकःस्तबको मुद्रयित्वा प्रकाश्यते। एकस्मिन् स्तबके एक एव ग्रन्थो मुद्र्यते ।

२ प्राचीना दुर्लभाश्चामुद्रिता मीमांसावेदान्तादिदर्शनव्याकरण धर्म शास्त्रसाहित्यपुराणादिग्रन्था एवात्र सुपरिष्कृत्य मुद्र्यन्ते ।

३ काशिकराजकीयप्रधानसंस्कृतपाठशालाऽध्यापकाः पण्डिता अन्ये च शास्त्रदृष्ट्यो विद्वांस एतत्परिशोधनादिकार्यकारिणो भवन्ति।

४ भारतवर्षीयैः, ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्च एतद्ग्राहकै देयं वार्षिकमग्रिमं मूल्यम्-मुद्राः ७ आणकाः ८

५ अन्यैर्देयं प्रतिस्तबकम् ,, ,, १ ,,

६ प्रापणव्ययः पृथग् नास्ति ।

७ साम्प्रतं मुद्र्यमाणा ग्रन्थाः- मुद्रिताः स्तबकाः

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता (संस्कारः)

(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः (व्याकरणम्)

(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृत-न्यायरत्नाकराख्यया व्याख्यया सहितम् । सम्पूर्णम् ।

(४) भाष्योपबृंहितं तत्त्वत्रयम् । विशिष्टाद्वैतदर्शनप्रकरणम् । श्रीमल्लोकाचार्य्यप्रणीतम् । श्रीनारायण तीर्थ विरचित भाष्टभाषा प्रकाशसहितम् । सं० (वेदान्त)

(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः सम्पूर्णः (ज्योतिष)

(६) भाट्टचिन्तामणिः । महामहोपाध्याय-श्रीगागाभट्ट विरचितः । तर्कपादः (मीमांसा)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्य विस्फोटका न स्युः शुद्धोऽसावन्यथाऽशुचिः।

इति ।

अत्रापि धर्मावाहनाद्यनुसन्धातव्यम् । घृतानुमन्त्रणं प्राड्विवाकस्य । त्वमग्ने सर्वभूतानामिति श्लो.द्वयस्याग्न्यभिमन्त्रणमन्त्रः । प्रदेशिनीं परीक्षेयुरिति वचनात् प्रदेशिन्यैव मुद्रिकोद्धरणम् ॥

इति तप्तमाषविधिः ॥

धर्माधर्माख्यदिव्यविधिश्च पितामहेनोक्तः ।

तथाच—

अधुना संप्रवक्ष्यामि धर्माधर्मपरीक्षणम् ।
हन्तॄणां याचमानानां प्रायश्चित्तार्थिनां नृणाम् ॥

हन्तॄणामिति साहसाभियोगेषु । याचमानानामिति अर्थाभियोगेषु । प्रायश्चित्तार्थिनामिति पातकाभियोगेषु ।

राजतं कारयेद्धर्ममधर्मं सीसकायसम् ।

इति । प्रतिमाविधानं सीसकं वा आयसं वेति ।

पक्षान्तरमाह,

लिखेद् भूर्जे पटे वापि धर्माधर्मौ सितासितौ ।
अभ्युक्ष्य पञ्चगव्येन गन्धमाल्यैः समर्चयेत् ॥
सितपुष्पस्तु धर्मः स्यादधर्मोऽसितपुष्पधृक् ।
एवंविधायोपलिख्य पिण्डयोस्तौ निधापयेत् ॥
गोमयेन मृदा वापि पिण्डौ कार्यौ समं ततः ।
मृद्भाण्डकेऽनुपहते स्थाप्यौ चानुपलक्षितौ ॥
उपलिप्ते शुचौ देशे देवब्राह्मणसान्निधौ ।
आवाहयेत्ततो देवान् लोकपालांश्च पूर्ववत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धर्मावाहनपूर्वं तु प्रतिज्ञापत्रकं लिखेत् । ततो-
यदि पापविमुक्तोऽहं धर्मस्त्वायातु मे करे ।
अशुद्धश्चेन्मम करे पापमायातु धर्मतः ॥ इति-
अभिशस्तोऽभिमन्त्रयते ।
अभियुक्तस्तयोश्चैकं प्रगृह्णीताविलम्बितः ।
धर्मे गृहीते शुद्धः स्यादधर्मे तु स हीयते ॥
एवं समासतः प्रोक्तं धर्माधर्मपरीक्षणम् । इति ।

इति धर्माधर्मदिव्यविधिः ॥

अन्ये च शपथा द्रव्यालपत्वमहत्त्वविषया जाति-
विशेषविषयाश्च मन्वादिभिरुक्ताः ।
यथा,
निष्के तु सत्यवचनं द्विनिष्के पादलम्भनम् ।
त्रिकादर्वाक्तु पुण्यं स्यात्कोशपानमतः परम् ॥
(मनु. अ. ८. श्लो. ११३)
सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः ।
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः ॥
इत्यादयः ! अत्र च शुद्धिविभावना—
मनुनोक्ता, (अ. ८. श्लो. ११५ उ०)
न चार्तिमृच्छाति क्षिप्रं स ज्ञेयः शपथे शुचिः । इति ।
आर्तिरपि यस्य नो राजदैविकं व्यसनं जायते
घोरमित्युक्तैव । कालनियमश्च त्रिरात्रप्रभृतिः कार्य-
लाघवगौरवपर्यालोचनया द्रष्टव्यः । एवं दिव्यैर्ज-
यपराजयावधारणे दण्डविशेषोऽपि दर्शितः—
कात्यायनेन,
शतार्द्धं दापयेच्छुद्धमशुद्धो दण्डभाग्भवेत् । इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तं दण्डमाह,

विषे तोये हुताशे च तुलाकोशे च तण्डुले।
तप्तमाषकदिव्ये च क्रमाद्दण्डं प्रकल्पयेत्॥
सहस्रं षट्शतं चैव तथा पञ्चशतानि च।
चतुस्त्रिद्व्येकमेवं च हीनं हीनेषु कल्पयेत्॥ इति।

निह्नवे भावितो दद्यादित्युक्तदण्डेनायं दिव्यनिबन्धनो दण्डः समुच्चीयते॥

इति दिव्यप्रकरणम्॥

बा० १। मूलमवतारयति *नन्विति। अर्वागित्यस्यार्थः *पूर्वमिति। राजदैविकमित्यत्र द्वन्द्वात्तस्य निमित्तमिति ठञित्याह *राजिकमित्यादि। महदित्यस्य फलमाह *अल्पस्येति। आर्थिकमाह *ऊर्ध्वमिति। अनेन नारदीयेऽपि ऊर्ध्वमित्यत्रावधेरिति शेषो द्विसप्ताहादित्यत्र प्रभृतीति सूचितम्, अतो न विरोध इति बोध्यम्।*वैकृतं, विकृतमेव वैकृतं विकार इत्यर्थः। *कृतेति। कृतावधीत्यर्थः। इतिर्नारदसमाप्तौ। ननु नेदमवश्यवाच्यम् अत आह *अर्थेति। मौलावध्युपादानसिद्धमेव नारदेनोक्तमित्यर्थः।

२। विरोधं परिहरति *अर्वागिति। *प्रस्तुत्य, प्रक्रम्य। *अवध्यन्तराणि, तानि तु। पितामहमेवाह *त्रिरात्रादिति। क्वचित् तानि चेति अस्यादिः। नन्वेवमनयोर्व्यवस्थायामपि तदुक्तपक्षाणामवान्तरव्यवस्था कथम्, अत आह *महेति। *अर्वाचीनं, व्युत्क्रमेण सहस्रान्न्यूनम्॥ ११३॥

३। न्यूनतां निराचष्टे *तुलादीनीति। यथोद्देशमिति। उद्देशानतिक्रमेणेत्यर्थः। नाम्ना वस्तुसंकीर्त्तनमुद्देशः। *भक्षणचोदितमिति। भक्षणे चोदितं शास्त्रविहितं विधिं प्रकारमित्यर्थः। ल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षणबोधितमिति पाठान्तरम्, भक्षणवर्जने इति च। कृत्वेत्यस्य संमिश्रानित्यत्रान्वयः। स्नानोदकञ्चादित्यस्यैव, प्रत्यासत्तेः। * ततः, भक्षणकारणानन्तरम्। * शीर्यते, विशीर्णं भवति। हनुजालं च सीदतीति कल्पतरौ पाठः। हनुजालम् उत्तराधरदक्षिणं हनुजालसमूह इति तदर्थः। कर्त्रनुपादानादर्थमाह * शिरोरोपितेति। *तं, शोध्यम्। असम्बद्धत्वनिरासायाह * भक्षयित्वेति। चौरादिकत्वादिति भावः। इति तण्डुलविधिः॥

४। * तथाहि, तदेवोच्यते। विस्तारमाह *षोडशेति। निम्नतामाह *चतुरिति। बहुव्रीहिः। अथेत्यस्याग्रेऽन्वयः। अनेन कारयित्वेति तत्र शेषः सूचितः। मण्डलमित्यस्यार्थमाह *वर्त्तुलमिति। घृततैलयोरेकार्थत्वाद्विकल्पः। *धुनुयात्, कम्पयेत्। सर्वसंग्रहाय तत् उपसंहरति * निर्विकारेति। बहुव्रीहिः। यावद्वचनं वाचानिकमिति न्यायेनाह * उद्धरेदिति। तत्सत्त्वेऽप्याह * आदरणीयमिति। स्थलविशेषे इति भावः।

५। तदुक्तमेव प्रकारान्तरमन्यग्रन्थानुक्तमाह * अपरेति। *उपादायेति। स्थापयित्वेत्यर्थः। *सुशोधितामिति। भग्नादिनिरासायेति भावः। सुशोभितामिति पाठान्तरम्। *धौतां, प्रक्षालिताम्। *भ्रमद्वाचीति। भ्रमन्ती वाक् शब्दो यस्मिन्नित्यर्थः। तरङ्गैर्वीचिभिः पूर्णे। न नखस्पर्शस्यापि विषये। * चुरुकारामिति। तैलादिपक्वतापरीक्षा चुर इति शब्देन भवतीत्यनुकरणमिदं ध्वनेः। तत्रापि सुघोषकं महाशब्दयुक्तम्। क्रियाविशेषणमिदं द्वयम्। * अनेन, वक्ष्यमाणेन। प्राड्विवाक इति शेषः। सुतप्तत्वात् पवित्रत्वाच्चाह * पावकेति। * प्रदेशिनी, तर्जनी। *यस्य, कर्त्तुः। तस्यामिति शेषः। घृतानुमन्त्रणमिति। परमित्याद्युक्तामित्यर्थः। अत एवाह *त्वमग्ने इति। प्राग्वदाह *अन्त्यभी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ति । प्रागूवदाह *प्रदेशिनीमिति । इति तप्तमाषकाविधिः ।

६। चोऽप्यर्थे । *तथाचेति । स आहेति शेषः। वचने न्यूनतां परिहरति * हन्तॄणामित्यादि । इतिर्वचनसमाप्तौ । इतराश्रमाचाह * प्रतिमेति । एकार्थत्वादाह * सीसकं वेति । अर्शआद्यजन्तमिति भावः । कनन्तं वा । आहेति शेष एवेति भावः ।

७। *अभ्युक्ष्य, प्रोक्ष्य । सितपुष्प इति बहुव्रीहिः । *पुष्पधृत् इति । धृञः क्विबन्तस्य रूपम् । धृगिति पाठे धृष्णोतेस्तदन्तस्य रूपम् । भृदिति पाठे भृञस्तस्य । एवंविधायेत्यस्य व्याख्या *उपलिख्येति । एवंविधावुपलिख्येति पाठान्तरं सुगमम् । एवंविधायोपलिप्येति पाठे तु एवं संलिख्य चन्दनेनोपलिप्येत्यर्थः । समं यथा स्यात् तथा कार्यौ इत्यर्थः । तत इत्यग्रिमान्वयि । * अनुपहते, अभग्नादौ । अनुपलक्षितावित्यनेन पिधानं तस्य सूचितम् । मध्ये चूर्णिकामाह * तत इति । * तयोश्चैकमिति । ततश्चैकमिति द्वितीयः पाठः । अबिलम्बित इति । *आविलम्बिवमिति पाठे क्रियाविशेषणम् । * समासतः, संक्षेपतः ।

बृहस्पतिरपि,

पत्रद्वये लेखनीयौ धर्माधर्मौ सितासितौ ।
जीवदानादिकैर्मन्त्रैर्गायत्राद्यैश्च सामभिः ॥
आमन्त्र्य पूजयेत् गन्धैः कुसुमैश्च सितासितैः ।
अभ्युक्ष्य पञ्चगव्येन मृत्पिण्डान्तरितौ ततः ॥
समौ कृत्वा नवे कुम्भे स्थाप्यौ चानुपलक्षितौ ।
ततः कुम्भात्पिण्डमेकं प्रगृह्णीताविलम्बितः ॥
धर्मे गृहीते शुद्धः स्यात्संपूज्यश्च परीक्षकैः । इति ।

जीवदानादिकैः ताःप्रजामिथुनीत्यादिभिरिति कल्पतरुः । प्राणप्रतिष्ठापूर्वमित्यन्ये । इति धर्माधर्मविधिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

८। फालविधिर्बृहस्पतिनोक्तः,

आयसं द्वादशपलं घटितं फालमुच्यते।
अष्टाङ्गुलं भवेद्दीर्घं चतुरङ्गुलविस्तृतम्॥
अग्निवर्णं तु तच्चौरो जिह्वया संलिहेत्सकृत्।
न दग्धश्चेच्छुद्धिमियादन्यथा तु स हीयते॥ इति।
मन्वादिभिरिति आदिना नारदादिपरिग्रहः।
तथाच नारदः, (व्य० प० १।२४३।२४४)
शपथा अपि देवानामृषीणां च महात्मनाम्।
वसिष्ठः शपथं शेपे यातुधानेन शङ्कितः॥
महर्षयस्त्वथेन्द्रेण पुष्करार्थेन शङ्किताः।
शेपुः शपथमव्यग्राः परस्परविशुद्धये॥ इति।
महर्षिभिश्च देवैश्च कार्यार्थं शपथाः कृताः।
वसिष्ठश्चापि शपथं शेपे वै यवने नृपे॥

इति मनुरपि।(८।११०) *सत्यवचनं, सत्यमिति कथनम्। *पुष्पमिति। पुण्यमिति पाठान्तरम्। आद्यविषयमुक्त्वा द्वितीयमाह *सत्येनेति। * अत्र च, शपथविषये। आर्तिः पीडा सा च नान्येत्याह *आर्तिरपीति। पूर्वोक्तैवेति भावः। एवं कालनियमोऽपि प्रागुक्त एवेत्याह * कालेति।

कात्यायनः,

आचतुर्दशकादह्नो यस्य नो राजदैविकम्।
व्यसनं जायते घोरं स ज्ञेयः शपथे शुचिः॥

अत्राङ् मर्यादायाम्।

मनुः, (८।१११।११२)

न वृथाशपथं कुर्यात्स्वल्पेऽप्यर्थे नरो बुधः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वृथा हि शपथं कुर्वन्प्रेत्य चेह च नश्यति ॥
कामिनीषु विवाहेषु गवांभक्ष्ये तथेन्धने ।
ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकम् ॥

यमः,
कृत्वा मृषा तु शपथं कीटस्य वधसंयुतम् ।
अनृतेन तु युज्येत वधेन च तथा नरः ॥
तस्मान्न मिथ्याशपथं नरः कुर्याद्वधेप्सितम् । इति ।

सर्वदिव्यशेषमाह * एवमिति । *शुद्धं, पुरुषम् । *तम्, अशुद्धसंबन्धिनम् । *आहेति । कात्यायन एवेति भावः । तुलेति समाहारद्वन्द्वः । कल्पनामेवाह * सहस्रमिति । षट्शतमिति बहुव्रीहिः । दण्डो विशेष्यः । चतुरिति समाहारद्वन्द्वः । क्रमविवक्षया न दोषः । अग्रेऽपि आतिदिशन्नाह * एवंचहीनमिति । उक्तप्रकारेण कल्पनायाश्चाग्रेऽपि उत्तरोत्तरन्यूनमित्यर्थः ।

९। विरोधं परिहरति * निह्नवे इति । मूलमिदं सर्वसाधारणम् । अतएव न विकल्पः । अतएवाह * अयं दिव्येति । कात्यायनोक्तो दिव्यमात्रविषय इत्यर्थः। एवञ्च तुलाग्निसलिलविषकोशतण्डुलतप्तमाषधर्माधर्मशपथदण्डरूपैरवान्तरप्रकरणैर्विशिष्टमिदं महादिव्यप्रकरणं संपन्नमिति बोध्यम्।तदाह*इतिदिव्येति॥

इति दिव्यप्रकरणं संपूर्णम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ दायविभागप्रकरणम् ॥ ८ ॥

दायविभागोपोद्घातः ॥

मि० प्रमाणं मानुषं दैवमिति भेदेन वर्णितम् ।
अधुना वर्ण्यते दायविभागो योगमूर्तिना ॥

तत्र दायशब्देन यद्धनं स्वामिसंबन्धादेव निमित्तादन्यस्य स्वं भवति तदुच्यते । स च द्विविधः, अप्रतिबन्धः सप्रतिबन्धश्च । तत्र पुत्राणां पौत्राणां च पुत्रत्वेन पौत्रत्वेन च पितृधनं पितामहधनं च स्वं भवतीत्यप्रतिबन्धो दायः । पितृव्यभ्रात्रादीनां तु पुत्राभावे स्वाम्यभावे च स्वं भवतीति पुत्रसद्भावः स्वामिसद्भावश्च प्रतिबन्धः तदभावे पितृव्यत्वेन भ्रातृत्वेन च स्वं भवतीति सप्रतिबन्धो दायः । एवं तत्पुत्रादिष्वप्यूहनीयः ।

विभागो नाम द्रव्यसमुदायविषयाणामनेकस्वाम्यानां तदेकदेशेषु व्यवस्थापनम् । एतदेवाभिप्रेत्योक्तं—

नारदेन, (व्य० प० १३।१)
विभागोऽर्थस्य पैत्रस्य तनयैर्यत्र कल्प्यते ।
दायभाग इति प्रोक्तं व्यवहारपदं बुधैः ॥ इति ।

पैत्रस्येति स्वत्वनिमित्तसंबन्धोपलक्षणम् । तनयैरित्यपि प्रत्यासन्नोपलक्षणम् ।

इदमिह निरूपणीयम् । कस्मिन्काले कस्य कथं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कैश्च विभागः कर्तव्य इति । तत्र कस्मिन्काले कथं कैश्चेति तत्र तत्र श्लोकव्याख्याने एव वक्ष्यते ।

कस्य विभाग इत्येतावदिह चिन्त्यते । किं विभागात्स्वमुत स्वस्य सतो विभाग इति । तत्र स्वत्वमेव तावन्निरूप्यते, किं शास्त्रैकसमधिगम्यं स्वत्वमुत प्रमाणान्तरसमधिगम्यमिति । तत्र शास्त्रैकसमधिगम्यमिति तावद्युक्तम् ।

गौतमवचनात्,

स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु, ब्राह्मणस्याधिकं लब्धं, क्षत्रियस्य विजितं, निर्विष्टं वैश्यशूद्रयोरिति । प्रमाणान्तरगम्ये स्वत्वे नेदं वचनमर्थवत्स्यात् । तथा स्तेनातिदेशो—

(मनुः अ० ८ श्लो. ३४०)

योऽदत्तादायिनो हस्ताल्लिप्सेत ब्राह्मणो धनम् ।
याजनाध्यापनाद्वाऽपि यथा स्तेनस्तथैव सः ॥

इति अदत्तादायिनः सकाशात् याजनादिद्वारेणापि द्रव्यमर्जयतां दण्डविधानमनुपपन्नं स्यात्स्वत्वस्य लौकिकत्वे । अपि च । लौकिकं चेत्स्वत्वं मम स्वमनेनापहृतमिति न ब्रूयात् । अपहर्तुरेव स्वत्वात् । अथ अन्यस्वं तेनापहृतमिति नापहर्तुः स्वम्, एवं तर्हि सुवर्णरजतादिस्वरूपवदस्य वा स्वमस्य वा स्वमिति संशयो न स्यात् । तस्माच्छास्त्रैकसमधिगम्यं स्वत्वमिति ॥

अत्रोच्यते । लौकिकमेव स्वत्वं लौकिकार्थक्रियासाधनत्वात् व्रीह्यादिवत् । आहवनीयादीनां हि शा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रगम्यानां न लौकिकक्रियासाधनत्वमस्ति । नन्वाहवनीयादीनामपि पाकादिसाधनत्वमस्त्येव। नैतत्। न हि तत्राहवनीयादिरूपेण पाकादिसाधनत्वम्, किं तर्हि प्रत्यक्षादिपरिदृश्यमानाग्न्यादिरूपेण। इह तु सुवर्णादिरूपेण न क्रयादिसाधनत्वम् अपि तु स्वत्वेनैव। न हि यस्य यत्स्वं न भवति तत्तस्य क्रयाद्यर्थक्रियां साधयति। अपि च। प्रत्यन्तवासिनामप्यदृष्टशास्त्रव्यवहाराणां स्वत्वव्यवहारो दृश्यते। क्रयविक्रयादिदर्शनात्। किंच। नियतोपायकं स्वत्वं लोकसिद्धमेवेति न्यायविदो मन्यन्ते।

तथाहि। लिप्सासूत्रे तृतीये वर्णके द्रव्यार्जननियमानां क्रत्वर्थत्वे स्वत्वमेव न स्यात् स्वत्वस्यालौकिकत्वादिति पूर्वपक्षासम्भवमाशङ्क्य द्रव्यार्जनस्य प्रतिग्रहादिना स्वत्वसाधनत्वं लोकसिद्धमिति पूर्वपक्षः समर्थितो गुरुणा "ननु द्रव्यार्जनस्य क्रत्वर्थत्वे स्वत्वमेव न भवतीति याग एव न संवर्तेत, प्रलपितमिदं केनापि अर्जनं स्वत्वं नापादयतीति विप्रतिषिद्धम्" इति वदता। तथा सिद्धान्तेऽपि स्वत्वस्य लौकिकत्वमङ्गीकृत्यैव विचारप्रयोजनमुक्तम्, अतो नियमातिक्रमः पुरुषस्य न क्रतोरिति। अस्य चार्थ एवं विवृतः। यदा द्रव्यार्जननियमानां क्रत्वर्थत्वं तदा नियमार्जितेनैव द्रव्येण क्रतुसिद्धिरिति नियमातिक्रमार्जितेन द्रव्येण न क्रतुसिद्धिरिति न पुरुषस्य नियमातिक्रमदोषः पूर्वपक्षे। राद्धान्ते तु अर्जननियमस्य पुरुषार्थत्वात्तदतिक्रमेणार्जितेनापि द्रव्येण क्रतुसिद्धिर्भ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वति पुरुषस्यैव नियमातिक्रमदोष इति नियमाति-क्रमार्जितस्यापि स्वत्वमङ्गीकृतम् । अन्यथा क्रतुसि-द्ध्यभावात् । न चैतावता चौर्यादिप्राप्तस्यापि स्वत्वं स्यादिति मन्तव्यम् । लोके तत्र स्वत्वप्रसिद्ध्यभावा-त् व्यवहारविसंवादात् ।

एवं प्रतिग्रहाद्युपायके स्वत्वे लौकिके स्थिते ब्रा-ह्मणस्य प्रतिग्रहादय उपायाः, क्षत्रियस्य विजिता-दयो, वैश्यस्य कृष्यादयः, शूद्रस्य शुश्रूषादय इत्य-दृष्टार्था नियमाः। रिक्थादयस्तु सर्वसाधारणाः, स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेष्वित्युक्ताः। तत्रा-प्रतिबन्धो दायो रिक्थम् । क्रयः प्रसिद्धः। संविभागः सप्रतिबन्धो दायः। परिग्रहोऽनन्यपूर्वस्य जलतृणका-ष्ठादेः स्वीकारः। आधिगमो निध्यादेः प्राप्तिः। एतेषु निमित्तेषु सत्सु स्वामी भवति, ज्ञातेषु ज्ञायते स्वामी। ब्राह्मणस्याधिकं लब्धमिति । ब्राह्मणस्य प्रतिग्रहादि-ना यल्लब्धं तदधिकमसाधारणम् । क्षत्रियस्य विजि-तमित्यत्राधिकामित्यनुवर्तते। क्षत्रियस्य विजयदण्डा-दिलब्धमसाधारणम् । निर्विष्टं वैश्यशूद्रयोरित्य-त्राप्यधिकामित्यनुवर्तते। वैश्यस्य कृषिगोरक्षादिलब्धं निर्विष्टं तद् असाधारणम्, शूद्रस्य द्विजशुश्रूषादिना भृतिरूपेण यल्लब्धं तद् असाधारणम्।

एवमनुलोमजानां प्रतिलोमजानां च लोकप्रसि-द्धेषु स्वत्वहेतुषु यद्यदसाधारणमुक्तं, सूतानामश्वसा-रथ्यमित्यादि, तत्तत्सर्वं निर्विष्टशब्देनोच्यते। सर्व-स्यापि भृतिरूपत्वात् । निर्वेशो भृतिभोगयोरिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिकाण्डीस्मरणात् । तत्तदसाधारणं वेदितव्यम् ।

यदपि पत्नी दुहितरश्चेत्यादिस्मरणं, तत्रापि स्वामिसम्बन्धितया बहुषु दायविभागितया प्राप्तेषु लोकप्रसिद्धेऽपि स्वत्वे व्यामोहानिवृत्त्यर्थं क्रमस्मरणमिति सर्वमनवद्यम् ।

यदपि मम स्वमनेनापहृतमिति न ब्रूयात्स्वत्वस्य लौकिकत्वे इति । तदप्यसत् । स्वत्वहेतुभूतक्रयादिसन्देहात्स्वत्वसन्देहोपपत्तेः ।

विचारप्रयोजनं तु— (मनु० ११।१९३)

यद्गर्हितेनार्जयन्ति कर्मणा ब्राह्मणा धनम् ।
तस्योत्सर्गेण शुद्ध्यन्ति जप्येन तपसैव च ॥ इति ।

शास्त्रैकसमधिगम्ये स्वत्वे गर्हितेनासत्प्रतिग्रहवाणिज्यादिना लब्धस्य स्वत्वमेव नास्तीति तत्पुत्राणां तदविभाज्यमेव । यदा तु लौकिकं स्वत्वं तदाऽसत्प्रतिग्रहादिलब्धस्यापि स्वत्वात् तत्पुत्राणां तद्विभाज्यमेव । तस्योत्सर्गेण शुध्यन्तीति प्रायश्चित्तमर्जयितुरेव । तत्पुत्रादीनां तु दायत्वेन स्वमिति न तेषां दोषसंबन्धः ।

(अ० १० श्लो० ११५)

सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः ।
प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च ॥

इति मनुस्मरणात् ।

इदानीमिदं संदिह्यते, विभागात्स्वमुत स्वस्य सतो विभाग इति । तत्र विभागात्स्वमिति तावद्युक्तम् । जातपुत्रस्याधानविधानात् । यदि जन्मनैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वत्वं स्यात्तदोत्पन्नस्य पुत्रस्यापि तत्स्वं साधारणमिति द्रव्यसाध्येष्वाधानादिषु पितुरनधिकारः स्यात्। तथा, विभागात्प्राक् पितृप्रसादलब्धस्य विभागप्रतिषेधो नोपपद्यते। सर्वानुमत्या दत्तत्वाद्विभागप्राप्त्यभावात्।

यथाह, (ना० व्य० प० १३।६)

शौर्यभार्याधने चोभे यच्च विद्याधनं भवेत्।
त्रीण्येतान्यविभाज्यानि प्रसादो यश्च पैतृकः॥ इति।

तथा,

भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृतेऽपि तत्।
सा यथाकाममश्नीयाद्दद्याद्वा स्थावरादृते॥

इति प्रीतिदानवचनं नोपपद्यते जन्मनैव स्वत्वे। न च स्थावरादृते यद्दत्तमिति संबन्धो युक्तो, व्यवहितयोजनाप्रसङ्गात्। यदपि,

मणिमुक्ताप्रवालानां सर्वस्यैव पिता प्रभुः।
स्थावरस्य तु सर्वस्य न पिता न पितामहः॥

तथा,

पितृप्रसादाद् भुज्यन्ते वस्त्राण्याभरणानि च।
स्थावरं तु न भुज्येत प्रसादे सति पैतृके॥

इति स्थावरस्य प्रसाददानप्रतिषेधवचनं, तत् पितामहोपात्तस्थावरविषयम्। अतीते पितामहे तद्धनं पितापुत्रयोः साधारणमपि मणिमुक्तादि पितुरेव, स्थावरं तु साधारणमित्यस्मादेव वचनादवगम्यते। तस्मान्न जन्मना स्वत्वं किन्तु स्वामिनाशाद्विभागाद्वा स्वत्वम्। अत एव पितुरूर्ध्वं विभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गात्प्राग्द्रव्यस्वत्वस्य प्रहीणत्वादन्येन गृह्यमाणं न निवार्येत इति चोद्यस्यानवकाशः। तथैकपुत्रस्यापि पितृप्रायणादेव पुत्रस्य स्वमिति न विभागमपेक्षते इति।

अत्रोच्यते। लोकप्रसिद्धमेव स्वत्वमित्युक्तम्। लोके च पुत्रादीनां जन्मनैव स्वत्वं प्रसिद्धतरं नापह्नवमर्हति। विभागशब्दश्च बहुस्वामिकधनविषयो लोकप्रसिद्धो नान्यदीयविषयो न प्रहीणविषयः। तथा, उत्पत्त्यैवार्थस्वामित्वं लभेतेत्याचार्या इति गौतमवचनात्। मणिमुक्ताप्रवालानामित्यादि वचनं च जन्मना स्वत्वपक्षे एवोपपद्यते। न च पितामहोपात्तस्थावरविषयमिति युक्तम्। न पिता न पितामह इति वचनात्। पितामहस्य हि स्वार्जितमपि पुत्रे पौत्रे च सति अदेयमिति वचनं जन्मना स्वत्वं गमयति। यथा परमते मणिमुक्तावस्त्राभरणादीनां पैतामहानामपि पितुरेव स्वत्वं वचनात्, एवमस्मन्मतेऽपि पित्राऽर्जितानामप्येतेषां पितुर्दानाधिकारो वचनादित्यविशेषः।

यत्तु भर्त्रा प्रीतेनेत्यादिविष्णुवचनं स्थावरस्य प्रीतिदानज्ञापनं, तत्स्वोपार्जितस्यापि पुत्राद्यभ्यनुज्ञयैवेति व्याख्येयम्। पूर्वोक्तैर्मणिमुक्तादिवचनैः स्थावरव्यतिरिक्तस्यैव प्रीतिदानयोग्यत्वनिश्चयात्। यद्प्यर्थसाध्येषु वैदिकेषु कर्मस्वनधिकार इति, तत्र तद्विधानबलादेवाधिकारो गम्यते। तस्मात्पैतृके पैतामहे च द्रव्ये जन्मनैव स्वत्वम्। तथापि पितुरावश्यकेषु धर्मकृत्येषु वाचनिकेषु प्रसाददानकुटुम्बभरणापद्विमो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षादिषु च स्थावरव्यतिरिक्तद्रव्यविनियोगे स्वातन्त्र्यमिति स्थितम्। स्थावरे तु स्वार्जिते पित्रादिप्राप्ते च पुत्रादिपारतन्त्र्यमेव।

स्थावरं द्विपदं चैव यद्यपि स्वयमर्जितम्।
असंभूय सुतान्सर्वान्न दानं न च विक्रयः॥
ये जाता येऽप्यजाताश्च ये च गर्भे व्यवस्थिताः।
वृत्तिं च तेऽभिकाङ्क्षन्ति न दानं न च विक्रयः॥

इत्यादिस्मरणात्।

अस्यापवादः,

एकोऽपि स्थावरे कुर्याद्दानाधमनविक्रयम्।
आपत्काले कुटुम्बार्थे धर्मार्थे च विशेषतः॥ इति।

अस्यार्थः। अप्राप्तव्यवहारेषु पुत्रेषु पौत्रेषु वा अनुज्ञानादावसमर्थेषु भ्रातृषु वा तथाविधेष्वविभक्तेष्वपि सकलकुटुम्बव्यापिन्यामापदि तत्पोषणे चावश्यं कर्तव्येषु पितृश्राद्धादिषु च स्थावरस्य दानाधमनविक्रयमेकोपि समर्थः कुर्यादिति।

यत्तु वचनम्,

विभक्ता वाऽविभक्ता वा सपिण्डाः स्थावरे समाः।
एको ह्यनीशः सर्वत्र दानाधमनविक्रये॥ इति,

तदपि अविभक्तेषु द्रव्यस्य मध्यकत्वादेकस्यानीश्वरत्वात् सर्वाभ्यनुज्ञाऽवश्यं कार्या, विभक्तेषूत्तरकालं विभक्ताविभक्तसंशयव्युदासेन व्यवहारसौकर्याय सर्वाभ्यनुज्ञा न पुनरेकस्यानीश्वरत्वेन, अतो विभक्तानुमतिव्यतिरेकेणापि व्यवहारः सिद्ध्यत्येवेति व्याख्येयम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदपि,

स्वग्रामज्ञातिसामन्तदायादानुमतेन च।
हिरण्योदकदानेन षड्भिर्गच्छति मेदिनी॥ इति,

तत्रापि ग्रामानुमतिः—

प्रतिग्रहः प्रकाशः स्यात्स्थावरस्य विशेषतः।

इति स्मरणात् व्यवहारप्रकाशनार्थमेवापेक्ष्यते न पुनर्ग्रामानुमत्या विना व्यवहारासिद्धिः। सामन्तानुमतिस्तु सीमाविप्रतिपत्तिनिरासाय। ज्ञातिदायादानुमतेस्तु प्रयोजनमुक्तमेव। हिरण्योदकदानेनेति।

स्थावरे विक्रयो नास्ति कुर्यादाधिमनुज्ञया।

इति स्थावरस्य विक्रयप्रतिषेधात्,

भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति।
उभौ तौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ॥

इति दानप्रशंसादर्शनाच्च, विक्रयेऽपि कर्तव्ये सहिरण्यमुदकं दत्त्वा दानरूपेण स्थावरविक्रयं कुर्यादित्यर्थः।

पैतृके पैतामहे च धने जन्मनैव स्वत्वेऽपि विशेषं भूर्या पितामहोपात्तेत्यत्र वक्ष्यामः।

बा० १। निबन्धकारः पद्यबन्धेन सङ्गतिमाह *प्रमाणमिति। *इति भेदेनेति। इति एवंप्रकारेण द्विविधं प्रमाणमवान्तरभेदेन वर्णितमित्यर्थः। * योगेति। योगीश्वरेण याज्ञवल्क्येनेत्यर्थः। निरूपणीयव्यवहारपदानां मध्ये केषांचिन्निरूपणानन्तरं मध्ये प्रसक्तप्रमाणनिरूपणं कृत्वा ऽवसरसङ्गत्या प्राप्तावशिष्टव्यवहारपदनिरूपणप्रसङ्गे तावत् सर्वोपयोगित्वेन दायविभागो निरूप्यते इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२। दायशब्दार्थं तावदाह *तत्रेति। निरूपणीये दायविभागे इत्यर्थः। एतेन लोकप्रसिद्धक्रयादिरूपनिमित्तान्तरमात्रव्यवच्छेदः। सम्बन्धश्च जन्यजनकभावादिर्धनस्वामिना सहान्यस्य पुत्रादेर्बोध्यः। एतेन पूर्वद्रव्यस्वामिसम्बन्धाधीनं तत्स्वाम्युपरमे यत्र द्रव्ये स्वत्वं तत्र निरूढो दायशब्द इति प्राच्योक्तमपास्तम्। विभागंचेदित्यादिवक्ष्यमाणमूलादिविरोधापत्तेः। तत्र जन्मना स्वत्वाङ्गीकारात्। *स च, दायश्च। अप्रतिबन्ध इत्यादिर्बहुव्रीहिः। तत्राद्यस्वरूपमाह * तत्रेति। तयोर्मध्ये इत्यर्थः। भूर्य्या पितेत्यादिना वक्ष्यमाणसिद्धान्तमभिप्रेत्याह *पौत्राणां चेति। यथाक्रममन्वयः। तेषां स्वामिसत्त्वेऽपि जननमात्रेणान्योपायं विनापि स्वाम्यस्य सत्त्वात् दायस्य अप्रतिबन्धत्वमिति भावः। द्वितीयस्वरूपमाह *पितृव्यभ्रात्रादीनामिति। पितृव्यश्च भ्राता च तत्प्रभृतीनामित्यर्थः। अभ्यर्हितत्वात्तस्य पूर्वनिपातः। पितृव्यत्वादिकं च धनस्वामिनिरूपितमेव। अत्र वस्तुकथने तात्पर्यं न तु क्रमे। पितृभ्रात्रादीनामिति पाठान्तरम्। तत्र क्रम एव। पितरौ च भ्रातरश्च आदिर्येषां तेषामिति तदर्थः। विशेषान्तरमाह *स्वाम्यभावेचेति। * तदभावे, उभयोस्तत्तद्रूपेणाभावे। *तत्पुत्रादिष्वपीति। पितृव्यादिपुत्रादिष्वपीत्यर्थः। तत्रापि विद्यमानेषु धनस्वामिसम्बन्धिषु यस्य तेनाव्यवहितः सम्बन्धस्तस्याद्यो यस्य व्यवहितस्तस्य द्वितीय इति भावः।

३। एवं दायशब्दार्थमुक्त्वा विभागशब्दार्थमाह *विभागो नामेति। अविभक्तद्रव्यसमुदायनिरूपितानामनेकेषां पुत्रादीनिष्ठस्वाम्यानां तदेकदेशेषु समुदितद्रव्यैकदेशेषु तद्विषयतया तन्निरूपिततया व्यवस्थापनं विशेषेण प्रत्येकमवस्थापनं यत् तत् वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भागशब्दवाच्यमित्यर्थः।

४। उक्तार्थं समूलयति *एतदेवेति। *पैत्रस्येति। तस्येदमित्यण्। पित्र्यस्येति कल्पतरुधृतपाठस्तु न युक्तः। यतो देवताधिकारपठितत्वात्। *यत्र, व्यवहारे। तद्विवादपदं बुधैरिति पाठान्तरम्। तत्र तदिति विधेयविशेषणम्।

५। तत्र न्यूनतां परिहरन् तस्य स्वोक्तार्थपरत्वमाह *पैत्रस्येतीति। स्वत्वे निमित्तभूतो यः संबन्धः स्वामिसम्बन्धः प्रागुक्तस्तदुपलक्षणार्थमित्यर्थः। तेन पैतामहादेरपि ग्रहणम्। अत एवाह *तनयैरिति। *प्रत्यासन्नेति। अव्यवहितसम्बन्धीत्यर्थः। एतेनैकदेशगतस्यैव भूहिरण्यादावुत्पन्नस्यैव स्वत्वस्य विनिगमनाप्रमाणाभावेन वैशेषिकव्यवहारानर्हतया अवस्थितस्य गुटिकापातादिना स्वत्वव्यञ्जनं विभागं इति प्राच्योक्तमपास्तम्। निमित्तभूतसम्बन्धस्य साधारणत्वेन नियतैकदेशग्रहणे विनिगमकाभावेन च तथा दुर्वचत्वात्। अन्यथा तदाऽपि यथेच्छव्यवहारापत्तेर्मिथोविरोधाच्च।

६। एवं सङ्गतिमुक्त्वा विचारं कर्त्तुमादौ विभागप्रकरणार्थं निष्कृष्याह *इदमिति। *इह, विभागप्रकरणे। अत्र कस्येति द्रव्यनिर्देशः। कथमिति इतिकर्त्तव्यतायाः। कैश्चेति कर्तॄणाम्। *तत्र, चतुर्णां मध्ये। *इह, आदौ। तस्य मूलानारूढत्वात्सकलदायप्रकरणोपयोगित्वाच्चेति भावः। तत्रापि द्विविधो विचारः। तत्राद्यविचारस्य विभज्यमानं द्रव्यं विषयः। तत्र सन्देहः—

१ विनिगमना इदममुकस्य नान्यस्येत्यवधारणरूपा तत्प्रमाणाभावेन वैशेषिकव्यवहारः परस्परनैरपेक्ष्येण दानविक्रयादिलक्षणः तदनर्हतया अवस्थितस्य सतोऽप्यसत्कल्पस्य गुटिकापातादिना व्यञ्जनम् इदममुकस्येत्यवधारणं विभाग इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किम् अस्वस्य विभागः स्वत्वहेतुः तथाच विभागेन स्वत्वं न ततः प्राक् स्वत्वहेतुभूतविभागाभावात्, उत विभागो न स्वत्वे हेतुः किं तु जन्मैव तथाच तत एव स्वत्वात् स्वस्य विभाग इति। अयमेको विचारः। तदाह *किं विभागादिति। *स्वं, स्वीयम्। *स्वस्येति। स्वीयस्य सत इत्यर्थः। एतदुपयोगिद्वितीयविचारं तावदाह *तत्रेति। उक्ते विचारविषये इत्यर्थः। एवेन एतद्विचारं विना तस्य दुष्करत्वं सूचितम्। यथाचैतत् तथाऽनुपदमेव स्फुटीभविष्यति। अत्र विचारे स्वत्वं विषयः।

७। तत्र संशयमाह *किमिति। *शास्त्रैकेति। तन्मात्रेत्यर्थः। *प्रमाणान्तरेति। लौकिकेत्यर्थः। तत्र पूर्वपक्षमाह *तत्रेति। तयोर्मध्ये इत्यर्थः। तदेवाह *स्वामीति। व्याख्यातमिदं प्राक्। स्फुटीभविष्यति चानुपदं मूले एव। यथैतस्तल्लाभस्तमाह *प्रमाणान्तरेति। लौकिकत्वे इत्यर्थः। *इदं, गौतमवाक्यम्। अनुवादे फलाभावात्। वचनान्तरविरोधमाह *तथेति। स्वत्वस्य लौकिकत्वे इत्याग्रिममत्र योज्यम्। अदत्तादायिन इति षष्ठ्यन्तं हस्तान्वयि। अन्येनादत्तं परकीयमाददाति तस्य हस्तादि इत्यर्थः। अग्रे तु फलितार्थ उक्तः। याजनेति समाहारद्वन्द्वः। अपिना प्रतिग्रहसमुच्चयः। स्तेनत्वातिदेशस्तद्दण्डप्राप्त्यर्थ इत्याह *दण्डेति।

८। स्वत्वस्यालौकिकत्वे युक्तिमप्याह *अपिचेति। *स्वत्वमिति। तदेति शेषः। तत्र हेतुमाह *अपहर्तुरेवेति। तत्सम्बन्धस्यैव प्रत्यक्षविषयत्वात्। उक्तदोषं परिहरन् विशेषमाशङ्कते *अथेति। परिहरति *एवन्तर्हीति। स्वत्वस्य लौकिकत्वेऽन्यस्य स्वेऽन्येनापहृते स यदि ब्रूयान्मम स्वमनेनापहृतमिति तदा श्रोतॄणां सभासदामुक्तसंशयो न स्यात्। यथा दे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किंके सुवर्णरजतादिस्वरूपे दृष्टे सुवर्णादिकं भवति न वेति न संशयः तद्वत्स्वत्वेऽपि तदभावः स्यात् । लोकतः तत्कोटिनिश्चयसत्त्वात् । जायते च संशयः । तस्मादपहर्तुः स्वं न भवतीति वक्तुमशक्यमिति भावः ।

९। यद्वा । अथेति पूर्वपक्षवादी प्रष्टव्योऽपहर्तुः स्वं न भवतीति प्रमितिरुत्पद्यते नवेति । तत्राद्ये आह *एवन्तर्हीति । यथेदं सुवर्णमिदं रजतमित्युत्पन्नायां प्रमितौ सुवर्णादिस्वरूपे संशयो न भवति तथा प्रकृतेऽपीति भावः । नापि द्वितीयः । प्रमित्यनुदयादेवापहर्तुः स्वं न भवतीति वक्तुं शक्यत्वादिति । पूर्वपक्षमुपसंहरति[1] *तस्मादिति ।

१०। सिद्धान्तमाह *अत्रोच्यतइति । स्वत्वस्य लौकिकत्वमनुमानेन तावत्साधयति * लौकिकमेवेति । स्वत्वं पक्षः, लौकिकत्वं साध्यं, लौकिकार्थेति हेतुः । तत्रान्वयव्याप्तौ दृष्टान्तमाह *व्रीह्यादिवदिति । तथाच स्वत्वं लौकिकं, लौकिकार्थक्रियासाधनत्वात्, यद्यल्लौकिकार्थक्रियासाधनं तत्तल्लौकिकं यथा व्रीह्यादिस्वरूपं, तथाचेदं, तस्माल्लौकिकमिति बोध्यम् । यद्यल्लौकिकं न भवति तत्तल्लौकिकार्थक्रियासाधनमपि न भवतियथाऽऽहवनीयादिरिति व्यतिरेकव्याप्तिमप्याह * आहवनीयादीनामिति । * हि, यतः ।

११। संभवे व्यतिरेकापरिशुद्धमनुमानं न प्रमाणमित्याक्षेपं सूचयन् व्याप्तौ व्यभिचारमाह * नन्वाहवनीयादीनामपीति । अलौकिकस्यापि तस्य लौकिकपाकादिसाधनत्वादुक्तव्यतिरेकव्याप्तौ व्यभिचारादनुमानं दुष्टमिति भावः।समाधत्ते *नैतदिति। आहवनीयादौ स्वरूपद्वयसत्त्वेऽपि पाकसाधनत्वं न शास्त्रसमधिग-

१ प्रकरणप्रतिपाद्यस्यान्ते प्रतिपादनमुपसंहारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म्यम् । अलौकिकाहवनीयादिस्वरूपहीनलौकिकाग्नेरेव तत्स्वरूपेण पाकसाधनत्वाङ्गीकारात् । न चालौकिकाहवनीयादिस्वरूपेणैव तदस्तु । तथाहि सति अलौकिकाहवनीयादिस्वरूपहीनलौकिकाग्नेः पाकसाधनत्वं न स्यात् । न च सामान्यस्वरूपेण सार्वत्रिकं तदस्तु । तथासति तस्यापि लौकिकत्वापत्त्या शास्त्रानर्थक्यापत्तेः। अतएव साधनत्वं फलोपहितत्वं निविष्टम्। तस्मान्न व्याप्तौ व्यभिचार इति भावः। नन्वेवं प्रकृतेऽपि सुवर्णादेः सुवर्णादिस्वरूपेणैव लौकिकक्रयविक्रयाद्यर्थक्रियासाधनत्वमास्तां न स्वत्वरूपेणेति कथं तस्य लौकिकत्वसिद्धिरत आह * इहत्विति । * स्वत्वेनैव, तद्वत्तैव । तदेव ध्वनयन् उक्तमुपपादयति * नहींति ।

१२।लोकविशेषव्यवहारोऽपि स्वत्वस्यालौकिकत्वेऽनुपपद्यमानस्तस्य तत्त्वे प्रमाणमित्याह * अपिचेति । प्रत्यन्तो म्लेच्छदेशः स्यात् । सर्वथा शास्त्रज्ञानाभावसूचकमिदम् । तदाह * दृष्टेति । अज्ञातेत्यर्थः । म्लेच्छादीनामिति यावत् । ननु तद्व्यवहारस्य तस्य तत्कल्पकत्वमुक्तम्, तत्र कल्पकसत्त्वे एव न मानमिति कथमर्थापत्त्या तत्सिद्धिः, अत आह * क्रयेति ।

१३। स्वत्वस्य तत्त्वं न्यायवित्संमतमपीत्याह * किंचेति *नियतोपायकमिति । प्रतिग्रहार्जनादीत्यर्थः । * न्यायविदेऽपि । कथमित्याशङ्कायामुक्तमुपपादयति* तथाहीत्यादिना *लिप्सेति । तत्पदघटितसूत्रे इत्यर्थः ।

चतुर्थाध्याये प्रथमपादे द्वितीयाधिकरणसूत्रम्,

यस्मिन्प्रीतिः पुरुषस्य तस्य लिप्साऽर्थलक्षणा विभक्तत्वात्

इति । तत्र प्रथमवर्णके क्रत्वर्थपुरुषार्थयोर्लक्षणविचारः द्वितीये वर्णके गोदोहनादिकं क्रत्वर्थमुत पुरुषार्थमित्यादिविचारः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तृतीये वर्णके त्वयं विचारः। अनारभ्य पठ्यन्ते द्रव्यार्जननियमाः—ब्राह्मणः प्रतिग्रहादिना धनमर्जयेत्, राजन्यो जयादिना, वैश्यः कृष्यादिनेति। तत्र सन्देहः, किमेते क्रत्वर्था उत पुरुषार्था इति।

१४। तत्र पूर्वपक्षः। तेषां तत्त्वेऽपि क्रत्वर्थत्वानङ्गीकारेऽधिकारिणः अभावाद्विध्यानर्थक्यापत्तेः कर्तृप्रयुक्तद्रव्यद्वारा क्रत्वर्थत्वमेव युक्तमिति। अयं भावः। यथा क्रतुविधिना आक्षिप्ते द्रव्यार्जने सोमं क्रीणातीत्यादिर्द्रव्यार्जननियमः क्रत्वर्थस्तथैव प्रतिग्रहादिनियमोऽपि। अन्यथा तन्नियमस्य द्रव्यप्राप्तिस्वरूपे तत्कार्य्ये क्षुत्प्रतीघातादौ चानुपयोगाद्वैयर्थ्यं स्यात्। न च तत्र प्रकरणं क्रत्वर्थताबोधकमस्ति नात्रेति वैषम्यमिति वाच्यम्। अदृष्टोपायापेक्षक्रतुसामर्थ्येनादृष्टप्रयोजनापेक्षनियमसामर्थ्येनवाऽङ्गत्वसिद्धेः। नचैवं सर्वस्य द्रव्यस्य क्रत्वर्थत्वाज्जीवनं न स्यादिति वाच्यम्। अनियमोपार्जितेन तत्सिद्धेः। यद्वा जीवनं विना क्रत्वसिद्धेः क्रतुविधिभिरेव स्वार्थसिद्ध्यर्थं नियमोपार्जितस्य जीवनार्थत्वमभ्युपगतमिति। द्रव्यप्राप्तिरूपद्रव्यार्जनमत्रोदाहरणमिति तन्त्ररत्नकृदुक्तं तु वार्तिकविरुद्धं युक्तिविरुद्धं च। विधेयस्यैव मीमांसायां विचारादिति बोध्यम्।

१५। एवमाक्षिपति, * द्रव्येत्यादिना आशङ्क्येत्यन्तेन। द्रव्यार्जननियमानां क्रत्वर्थत्वे स्वत्वस्यालौकिकत्वेन लौकिकहेत्वजन्यत्वेन वैदिकहेत्वन्तराभावेन नियतप्रतिग्रहादिहेतूनां च क्रत्वर्थत्वेनान्यार्थत्वेनाकारणककार्योत्पत्त्यभावेन च स्वत्वानुत्पत्त्या स्वस्याभावात् अस्वेन च क्रत्वसिद्धेः क्रत्वर्था नियमा इति पूर्वपक्षासम्भव इत्यर्थः।

१६। तमुज्जीवयति, *द्रव्यार्जनस्येति। वैपरीत्येनान्वयः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतएव याजनादिद्वारेण द्रव्यमर्जयतामिति शङ्कावसरे उक्तम्। तत्र प्रतिग्रहो नाम स्वीकारविशेषः। अर्जनं च द्रव्यप्राप्तिरूपम्। अतएव याजनादिना लिप्सेतेति प्राक् स्मृत्युक्तम्।

ईश्वरं चाप्युपासीत योगक्षेमार्थसिद्धये। (याज्ञ० १।१०…

इति मौलम् अर्जनोपायबोधकं,

षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका।
याजनाऽध्यापने चैव विशुद्धाच्च प्रतिग्रहः॥

इति मानवं च (१०।७६) संगच्छते। प्रतिग्रहादिनियमाः स्वत्वं साधयन्त एव क्रतूपयुक्तधनद्वारा क्रत्वर्था भविष्यन्ति, यथाऽवघातो वितुषीभावं कुर्वन्नेव क्रतूपयुक्तव्रीहिद्वारा क्रत्वर्थस्तद्वत्। तच्च स्वत्वं जन्मना पुत्रत्वादिकवत् अर्जनेनार्जकार्ज्ययोः तादृशस्वत्वनामकं स्वस्वामिभावसंबन्धरूपं लौकिमेव मन्यन्ते वृद्धाः।

यतः,

संबन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः।
श्रुतायामश्रुतायां वा क्रियायामभिधीयते॥

इति हर्युक्तेः क्रियामूलकः कर्तृकर्मणोः सम्बन्धो लोक-सिद्धो न मानन्तरापेक्षः। [1]नचैवमर्जनक्रियापाये तज्जन्यस्य तस्याप्यपायः। संबन्धिनोराश्रययोः सत्त्वात्। नहि पितुः क्रियापाये पितृत्वमपैति। तथाच लौकिकत्वात्स्वत्वस्य स्वेन च क्रतुसिद्धेः [2]तदभाव इति सिद्धं तेषां तत्त्वमिति भावः।

१७। ननु तथाऽर्जनस्य स्वत्वसाधनत्वेऽपि तन्नियमानां क्रत्वर्थत्वादर्जनस्यापि क्रत्वर्थत्वेनान्यार्थत्वात् स्वमेव नेति क्रत्वभा…

१ अर्जकार्ज्ययोः स्वस्वामिभावसम्बन्धरूपस्य लौकिकस्य स्वत्वस्य अर्जनक्रियाजन्यत्वाङ्गीरे।

२ स्वत्वत्यागात्मकक्रत्वभावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वस्तदवस्थ एवेति पूर्वपक्षासिद्धिरेवेत्याह * ननुचेत्यादिवर्त्तेते-त्यन्तेन। उपहसन् परिहरति * प्रलपितमिति। अर्जनं स्वत्वं नापादयतीति वदता केनापि प्रलपितमिदं, यतो मिथो विप्रतिषिद्धमित्यर्थः। यद्वा केनापि प्रलपितमिदम्। तत्र हेतुमाह * अर्जनमिति। यत इत्यादिः। इति वदतेत्यस्य गुरुणेत्यत्रान्वयः। अर्जनं नामार्जकधर्मः प्रागुक्तरूपस्तत्प्रयुक्तः स्वस्वामिभावः संबन्धः। स च द्विनिष्ठः पितापुत्रत्ववत्। तथाचार्ज्यं विनाऽर्जनस्यानिष्पत्तेर्मे माता वन्ध्येतिवत् अर्जनं स्वत्वं नापादयतीति वचनं मिथो विरुद्धमित्यर्थः।

१८। ननु पूर्वपक्ष्युक्तत्वादेव नायं तात्सिद्धान्तोऽत आह *सिद्धान्तेऽपीति। इत्थं हि सः। धनार्जनप्रवृत्ते ह्यधिकारिणि अर्थलभ्ये सति तन्नियमानां क्रतुनिवेशकल्पना न युक्ता। धनकामाधिकारे च रागात्प्रवृत्तो न नियतं प्रवर्त्तते। अनियमप्रवृत्तेर्न तद्विद्ध्यानर्थक्यम्। किंचार्जनमात्रस्य क्रत्वर्थत्वे कृत्स्नमेवार्जितं क्रत्वर्थमिति जीवनोपायाभावात्सर्वक्रतुलोपः स्यात्। किञ्च लिङ्गस्य क्रत्वर्थत्वपुरुषार्थत्वबोधकत्वे साधारण्यान्न तेन क्रतुमात्रार्थत्वम्। अतो न क्रतोः क्रतुत्वेन द्रव्यार्जनाक्षेपकता किं तु पुरुषार्थत्वेन। अन्यथा "त्रयाणां द्रव्यसंपन्नः कर्मणो द्रव्यसिद्धित्वात्" इति षाष्ठाधिकरणोक्तेन क्रतूनां द्रव्यार्जनाक्षेपकत्वेन विरोधः स्यात्। द्वादशरात्रीर्दीक्षितो भृतिं चिन्वीतेति भृतिचयनादिकं तु पुरुषार्थार्जितद्रव्यबाधेन क्रत्वर्थतया विधीयते इति वैषम्यम्। तथाचोपायान्तरेण द्रव्यार्जने प्रत्यवायः कल्प्यते। न च हिरण्यं धार्यम् इतिवत् द्रव्यार्जनमेव फलार्थमस्त्विति वाच्यम्। दृष्टार्थत्वे सम्भवति अदृष्टार्थत्वस्यान्याय्यत्वात्। तस्मात्पुरुषार्था नियमा इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१९। यद्यप्येवं न्यायेन तत्र स्थापितं तथापि यज्ञोपवीतादिवदुभयार्थता बोध्या। अतएव—

न्यायोपार्जितवित्तेन कर्तव्यं तु सदा द्विजैः।

इति चतुर्विंशतिमतमुपपद्यते। अतएव जीविकेतिप्रागुक्तमानवसङ्गतिरिति बोध्यम्। अतएव द्रव्यस्य सर्वकार्यार्थत्वेन पुरुषार्थत्वात्तदाश्रितनियमस्यापि तदर्थत्वमिति सिद्धान्तसूत्रं सङ्गच्छते इति तत्त्वम्।

२०। *विचारेति। अधिकरणविचारप्रयोजनमित्यर्थः। सिद्धान्तप्रयोजनस्वरूपमेवाह * अतो नियमातिक्रम इति। तत्प्रयुक्तदोष इत्यर्थः। अतएव विशदयति *अस्यचेति। प्रयोजनपरग्रन्थस्य मूलोक्तस्येत्यर्थः। * विवृतः, गुरुणेति शेषः। यदेत्यादिना नियमातिक्रमदोष इतीत्यन्तेन ग्रन्थेनेति भावः। पूर्वपक्षे पुरुषस्य न ततो दोषः किंतु ततो न क्रतुसिद्धिः क्रतुवैगुण्यं ततः, सिद्धान्ते तु तेषां पुरुषार्थत्वात् व्यतिक्रमे पुरुषस्य दोषो न क्रतुवैगुण्यमिति तात्पर्यम्। एवव्यवच्छेद्यमेवाह *नियमातिक्रमार्जितेनेति। पूर्वपक्षे इति पूर्वान्वयि। भवतीति पाठः।

२१। वस्तुतस्तु पूर्वपक्षे द्रव्यार्जनस्य कर्माङ्गत्वात्तत्तत्कर्मकाले एवादौ तदुपयुक्तद्रव्यार्जनम्। स्वतन्त्रकालत्वे मानाभावात्। तत्काले द्रव्यालाभेन कर्मलोपेऽपि न प्रत्यवायः। अर्थिन एवाधिकारात्। सिद्धान्तेतु पूर्वार्जितेन यष्टव्यमिति। एतेन पूर्वपक्षे प्रतिग्रहाद्यर्जितमेव क्रतौ ग्राह्यम्, सिद्धान्ते यथाकथंचितिसद्धमिति राणकोक्तमपास्तम्। तन्नियमवाक्यतस्तदकरणे पुरुषस्यानिष्टभवनलाभेन प्रत्यवायवत् क्रतुफलाभावस्यापि कृतकष्टं प्रति कष्टजन्येष्टाभावस्याप्यनिष्टत्वेन दोषात्। अतएवापशूद्राधिकरणे शूद्रेण नाध्येयमिति निषेधातिक्रमे शूद्रस्य क्रतुफलासिद्धि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रत्यवायश्चेत्युक्तं भाष्यकृतेति बोध्यम्।

२२। प्रकृतोपसंहारं सूचयन् फलितमाह *नियमातिक्रमार्जितस्यापीति। तथाचेत्यादिः। सिद्धान्तिनेतिभावः। अपिः कैमुतिकन्यायसूचकः। * अन्यथा, नियमातिक्रमार्जितस्य स्वत्वानङ्गीकारे। नियमानां क्रत्वर्थत्वेन तदर्जितस्यापि तत्त्वेन स्वत्वस्यालौकिकत्वे स्वत्वाभावेन जीवनदौर्लभ्यात्तदभावात्तदभाव इत्यर्थः।

२३। ननु तदतिक्रमार्जितेऽपि स्वत्वाङ्गीकारे चौर्यादिप्राप्तस्यापि स्वत्वप्रसङ्गोऽतः प्रसंगान्मध्यमदोषपरिहारं सूचयन्नाह * नचैतावतेति। नहीत्यर्थः। हेत्वसिद्धिं परिहरति * व्यवहारविसंवादादिति। प्रसिद्धक्रयाद्यदर्शनादित्यर्थः।

२४। एवं स्वत्वस्य लौकिकत्वे साधिते असाधारणविध्यानर्थक्यं परिहरति *एवंप्रतीत्यादिना। विजितेत्यत्र भावे क्तः। विजयादयः। उपाया इत्यस्याग्रे सर्वत्रानुषङ्गः। *अदृष्टेति। द्रव्याद्यदृष्टेत्यर्थः। इति नियमा अदृष्टार्था इत्यन्वयः। अथ साधारणविध्यभावेऽपि तत्परिगणकगौतमवाक्यानर्थक्यरूपालौकिकत्वसाधकप्रागुक्ताद्ययुक्तिं खण्डयति * रिक्थादयस्त्वित्यादिना वेदितव्यमित्यन्तेन। *सर्वेति। वर्णसङ्करेत्यर्थः।

तदर्थं वक्तुं तानेवाह*स्वामीति। *तत्र, तेषां मध्ये।

*अनन्येति। अनन्यस्वामिकस्येत्यर्थः। एवं पदार्थानुक्त्वा वाक्यार्थमाह * एतेष्विति। यथाश्रुते साकाङ्क्षत्वादाह *भवतीति। सर्वतदर्थमाह *ज्ञातेषु ज्ञायते स्वामीति। एतेषु निमित्तेषु ज्ञातेषु स्वामीति ज्ञायते इत्यर्थः। अनेन पूर्वपक्ष्यभिमतार्थनिरासः। एतदर्थतया साफल्यात्।

अग्रिमार्थमाह * ब्राह्मणस्येत्यादि सप्रतीकम्। लब्धमि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्येतत्स्वारस्याद्वचनान्तरैकवाक्यत्वादत एव साहचर्याच्च शेषपूरणेनाह * प्रतिग्रहेति । अधिकमित्यस्योत्कृष्टमित्यर्थस्तदाह * असाधारणमिति । विजितमित्यत्र विजय उपलक्षणम् इत्याह * विजयदण्डेति । अधिकामित्यनुवर्तते इति पाठः । भोगरूपनिर्वेशाशयेनाह * कृषीति । आदिना वाणिज्यादिपरिग्रहः ।

२५। न्यूनतानिरासायोक्तन्यायमन्यत्राप्यतिदिशति *एवमिति । षष्ठ्यन्तयोस्तत्तदसाधारणमित्यत्राप्यन्वयः । *स्वत्वहेतुषु, तेषां मध्ये । *तत्तत्सर्वमिति । तेषामित्यादिः ।

२६। ननु स्वत्वस्य लौकिकत्वे पत्नी दुहितर इत्यादिवचनजातं विरुद्धं, तेन स्वामिनोऽभावे पत्न्यादेः स्वामित्वप्रतिपादनात् इति गौतमोक्त्योक्तप्रायं प्रागनुक्तमपि दोषं तत्प्रसङ्गेनोद्धर्तुम् आह *यदपीति । * तत्रापि, वचनेऽपि । तदभावे इति शेषः । *क्रमस्मरणमिति पाठः । अन्यथा तत्रापीत्यसंगतेः । एवमन्यस्मृतिविरोधाभासोऽपि निरसनीय इति न कोऽपि वचनविरोधः ।

२७।अत्रेदं बोध्यम् । ननु किं तावत्स्वत्वं यस्य लौकिकत्वं सिद्धान्तिनोच्यते । न च शास्त्रानिषिद्धं यथेष्टविनियोगोपायभूतक्रयप्रतिग्रहादिविषयत्वं तत्, तच्च न बहिरिन्द्रियवेद्यं प्रतिग्रहादेर्मानसज्ञानविशेषस्य तदयोग्यत्वाभिप्रायोक्तमेवेति वाच्यम् प्रतिग्रहादिनाशोत्तरमपि स्वत्वव्यवहारात्, दानादितः स्वत्वं नश्यति प्रतिग्रहादितश्चोत्पद्यते इति व्यवहाराच्च । इति चेन्न । दानादिनाऽस्यस्य प्रतिग्रहादिजन्यस्य पदार्थविशेषस्यैव स्वीकारात् । अपि तदपि बहिरिन्द्रियवेद्यं स्वं पश्यामीत्यादिव्यवहारात् । अतिप्रसङ्गस्तु न । तत्साक्षात्कारे तदीयस्वत्वव्याप्यतदीययथेष्टविनियोज्यत्ववदिदमिति ज्ञानस्य हेतुत्वात् । अतस्तदग्रहे तदीययथेष्टविनियोज्यत्वे तदीयस्वत्वव्यभिचारित्वग्रहे च न तद्ग्रहः । एतेनाऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मेयमेव स्वत्वं, स्वं पश्यामीति तु सुरभिचन्दनं पश्यामीतिवन्न लौकिकविषयतावगाहीति परोक्तमपास्तम्। तस्या अन्यत्र खण्डितत्वात् ।

२८। तत्र दानं द्विविधं दृष्टार्थमदृष्टार्थं च। द्विविधमपि द्विविधं प्रतिग्रहसहितं तद्रहितं च। यद्यपि प्रतिग्रहः स्वीकारमात्रं तथापि ब्राह्मणः प्रतिग्रहादिना धनमर्जयेदित्यत्र तिलतुरगादिप्रतिग्रहे दोषबोधकस्मृतिवाक्येषु च प्रतिग्रहशब्देनादृष्टार्थदत्तस्वीकार एवेति परितोषदत्ततिलतुरगादिस्वीकारे न कस्यापि दोषो नापि क्षत्रियाद्यर्जनानियमानर्थक्यम् । पारितोषिकमेव दृष्टार्थमित्युच्यते । दाधात्वर्थश्च स्वस्वत्वनिवृत्तिपूर्वकपरमात्रस्वत्वापत्त्यनुकूलत्यागः। न च त्यागस्य स्वत्वनिवृत्तिहेतुत्वेऽपि न परस्वत्वोत्पत्तिहेतुत्वं, प्रतिग्रहादेरेव तत्त्वादिति वाच्यम्। विप्रोद्देशेन त्यक्तमात्रायां गवि गौरियं विप्रस्य न ममेत्यादिसर्वजनप्रतीत्या त्यागस्यैव तस्या अपि हेतुत्वाङ्गीकारात् । अत एव पितृभ्यः श्राद्धं दद्यादित्यादौ स्वत्वे पितृनिरूपितत्वस्य प्रतिग्रहाभावात् बाधेऽपि उक्तरूपदाधात्वर्थे पितृणामुद्देश्यत्वसत्त्वाच्चतुर्थ्युपपत्तिः। विदेशस्थपात्रमुद्दिश्य त्यक्तधनस्वीकारमन्तरेणैव पात्रस्य मरणेऽपि उद्देश्यपुत्रादिभिरेव पितृदायत्वेन तद्धनं विभज्य गृह्यते नान्यैरिति व्यवहारसङ्गतिश्च। अन्यथा तैरिवोदासीनैरपि तद्धनस्यारण्यककुशादेरिवोपादाने प्रत्यवायो न स्यात्। नचैवं प्रतिग्रहो व्यर्थ इति वाच्यम्। लब्धावष्टगुणं पुण्यमित्युक्तेस्तस्य तादृशप्रतिगृहीतधनदाने फलातिशयजनकत्वात्।मात्रपदं तु वक्ष्यमाणसंसृष्टिस्थलेऽसाधारणस्वत्वनाशोत्तरं साधारणस्वत्वोत्पादेऽपि ददातीति प्रयोगाभावसंरक्षणार्थम्। न च तत्र न स्वत्वनाश इति स्वत्वानिवृत्तिपूर्वकेत्यनेनैवातिप्रसङ्गवारणे मात्रपदं व्यर्थमिति वाच्यम्। तत्रा-

११०५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत एव यथाविधीति पद्यं सर्वं सफलम्। पुनरुपनयने विशेषवदत्र पुनर्विवाहे न विशेष इति यथाविधीत्युक्तम्। आधिगम्येत्यनेन दांपत्यमुक्तम्। शुक्लेत्यादिना तस्यामदुष्टात्वं, भजेतेत्यनेन यावज्जीवं रमणाद्युक्तम्। अत एव आप्रसवादित्युक्तिर्वीप्साद्वयं च। अन्यथा तस्य सामान्यसिद्धत्वादेव वीप्सानर्थक्यं स्पष्टमेव। एवं च प्रधान एवायं विवाहो नाङ्गम्। अत एवानेन विधानेन विन्देतेत्युक्तम्। देवर इति पतिरिति च सूत्रशाटकवद् भाविसंज्ञया। प्रागुक्तकात्यायनीये पतिमितिवत्। एवं च कुल्लूकभट्टोक्तमेव युक्तम्। एवं शुल्कदमरणे—

मनुः, (अ० ९।९७)

कन्यायां दत्तशुल्कायां म्रियेत यदि शुल्कदः।
देवराय प्रदातव्या यदि कन्याऽनुमन्यते॥

इति। अनेन च तस्मै दानं स्पष्टमेवोक्तम्। यदि कन्येत्यनेन तथा तदनुमतौ देवराय देया, तदन्यानुमतौ तदन्यस्मै देया, विवाहमात्राननुमतौ तु कस्मैअपि न देयेति, तया नैष्ठिकव्रतमेव कर्त्तव्यमिति सूचितम्। शुल्कदातुर्देशान्तरगतौ तु—

कात्यायनः,

प्रदाय शुल्कं गच्छेद्यः कन्यायाः स्त्रीधनं तथा।
धार्या सा वर्षमेकं तु देयाऽन्यस्मै विधानतः॥
अथ प्रवृत्तिरागच्छेत् प्रतीक्षेत समात्रयम्।
अत ऊर्ध्वं प्रदातव्या कन्या ऽन्यस्मै यथेच्छतः॥

इति। अत्र धार्येत्यनेन धार्यत्वेन ततः पूर्वमपि देयेति सूचितम्। बहुभिर्निर्दोषैर्वरणे कृते विशेषमाह—

स एव,

अनेकेभ्योऽपि दत्तायामनूढायां तु यत्र वै।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुराऽऽगतश्च सर्वेषां लभेताद्यो वरस्तु ताम् ॥
पश्चाद्वरेण यद्दत्तं तस्याः प्रतिलभेत सः ।
अथागच्छेत्समूढायां दत्तं पूर्ववरो हरेत् ॥

इति । वरो विवाहार्थोपस्थितस्तेन यच्छुल्कं दत्तं तदेव लभेतेत्यर्थः । तत्र वै पुरागतश्च सर्वेषां लभते तदिमां सुतामिति पाठान्तरम् । अन्यस्मै दत्तायां कन्यायां पूर्ववरोऽप्यायाति तदाऽनूढां तां लभते, ऊढायां तु स्वदत्तं द्रव्यमेव लभते न तु कन्यामित्यपि सिद्धम् । अत एव तस्माद्विज्ञानेश्वरीयमूलार्थप्रतिपादनमेव युक्तम् । अत एव न स्वपूर्वविरोधः । अत्रापि प्राग्वत्तथा वाच्ये तदनुक्तिः प्राक् तथोक्तत्वात् । उक्तनिष्कर्षाकथनबीजं त्वस्य देवराच्च सुतोत्पत्तिरिति कलिवर्ज्येषु गणनात् अनास्थारूपमेव ।

उद्वाहिताऽपि सा कन्या न चेत्संप्राप्तमैथुना ।
पुनः संस्कारमर्हन्ती यथा कन्या तथैव सा ॥

इति नारदीयमपि ऊढायाः पुनरुद्वाहमिति कलिनिषिद्धमेव । न च कलिनिषिद्धस्यापि युगान्तरीयधर्मस्यैव नष्टे मृते इत्यादि पाराशरं प्रतिपादकमस्त्विति वाच्यम् । कलावनुष्ठेयान् धर्मानेव वक्ष्यामीति प्रतिज्ञाय तद्ग्रन्थप्रणयनात् । अत एव भगवता योगीश्वरेण अत्र आचाराध्याये च संक्षेपेणैवोक्तं न तु मनुवद्विस्तृततयेति दिक् इति बोध्यम् ॥ १२७ ॥

मि०अव० समानासमानजातीयानां पुत्राणां विभागक्लृप्तिरुक्ता । अधुना मुख्यगौणपुत्राणां दायग्रहणव्यवस्थां दर्शयिष्यन् तेषां स्वरूपं तावदाह ।

या० औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः ।
क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा ॥ १२८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चारप्रयोजनं त्विति। *उत्सर्गेण,त्यागेन। न केवलं तावन्मात्र- मित्याह *जप्येनेति । * इतीति । अनेन मानवेन त्यागवि- धानादित्यर्थः । पूर्वपक्षे आह *शास्त्रैकेति। गर्हितत्वं द्वेधा निषि- द्धत्वमविहितत्वं चेत्याह *असत्प्रतिग्रहेत्यादि । सिद्धान्ते तद्वचन- विरोधं परिहरति *तस्योत्सर्गेणेति । एवव्यच्छेद्यमेव सूचयन्नाह * तत्पुत्रेति । ननु दायत्वेन तत्त्वेऽपि परम्परया दोषसंबन्धो- ऽस्त्वेव अत आह * सप्तेति । वित्तलाभोपाया इत्यर्थः। अत्र दायपदेन रिक्थसंविभागयोर्ग्रहणं, लाभपदेन परिग्रहाधिगमयोः, जयेन दण्डस्यापि, प्रयोग इत्यनेन कृष्यादेः, कर्मयोग इत्यनेन सेवादिनः, प्रतिग्रह इत्यनेन तयोरपीति बोध्यम् ।

३३। ननु प्रतिज्ञानुरोधेन प्रतिज्ञातविषयाविचारो युक्तो नान्य- थेति कथमत्र वैपरीत्यम्। न च कारणान्तरेणात्र तथा। तस्यादर्श- नात् । नच हेतुहेतुमद्भावः । वक्ष्यमाणाविचारस्य स्वत्वगतलौ- किकत्वानपेक्षत्वात् । नच सूचीकटाहन्यायः। लौकिकत्वस्य बहु- युक्तिसाध्यत्वात् । अन्यस्य कस्यचिददर्शनाच्च । अतः कृतवक्ष्य- माणविचारावसरदुःस्थाविति चेन्न । स्वत्ववद्विभागस्यापि लौकिकत्वेन तद्गतनियमानामेवालौकिकत्वेन जन्मादेरपि लौ- लिकत्वेनोक्तरीत्या स्वत्वस्य लौकिकत्वे सिद्धे एव लौकिकवि- भागादिजन्यत्वस्य तत्र घटमानत्वं नान्यथेति कृतविचारो हेतुः वक्ष्य- रिष्यमाणविचारो हेतुमानिति तस्यैतदानन्तर्यमुचितमित्याशयः।

३४। तदेतत् ध्वनयन्नाह * इदानीमिति । तदनन्तरमित्य- र्थः । तथाच उक्ताशयेनैवेदानीमित्यस्यात्रोक्तिरिति बोध्यम्। *इदं संदिह्यतइति । पूर्वं विचारप्रतिज्ञायामुक्तसंदेहानुवादपूर्वं प्रतिज्ञातं प्रतिपाद्यते इत्यर्थः । यद्यप्युक्तप्रतिज्ञायां स्वस्यात- स्य वेत्येव शाब्दः सन्देहस्तथाप्यार्थिकमुक्तमेवाह * किं विभा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिति। *तत्र, तयोर्मध्ये। * जातेति। जातपुत्रः कृष्णकेशोऽग्नीनादधीतेत्यनेनेति भावः। तत्र पुत्रशब्दोऽपत्यमात्रोपलक्षणम्। कृतैकशेषाद्द्विवचनान्तेन बहुव्रीहिर्वा। कृष्णाः केशा यस्येत्यनेन पूर्ववयस्कत्वं, समर्थत्वमिति यावत्। एवंविधोऽधिकारी आधानं कुर्यादिति तदर्थः। नन्वस्य तद्विधायकत्वेऽपि विभागात्स्वत्वस्य कथमितो लाभोऽतआह * यदि जन्मनेति। एवेन तद्व्यवच्छेदः। * उत्पन्नेति। तन्मात्रस्येत्यर्थः। तस्यापि द्रव्यस्वाम्येन द्रव्यस्य साधारणत्वादिति भावः। तदाह * तत्स्वमिति। * आधानादिष्विति। पतिपत्नीमात्रसाध्येष्वित्यर्थः। आदिना अवश्यकर्तव्यश्राद्धजातकर्मादिपरिग्रहः।

३५। ननु वचनात्तत्राधिकारो वक्ष्यमाण इतिचेत्तर्हि निषेधस्य प्राप्तिपूर्वकत्वात्तत्र पक्षे प्रीतिदत्तस्य विभागप्राप्तिरेव नेति तन्निषेधस्यासङ्गतिरित्याह * तथेति। विप्रतिपत्तिरूपकारणान्तरनिरासायाह * सर्वेति। तत्र पक्षे ततः स्थिते एव स्वत्वे द्वयोर्दानप्रतिग्रहयोरधिकारात्तेनैव तत्सिद्ध्या विभागकारणाभावात्तदप्राप्तिरेवेति तदनुपपत्तिरित्यर्थः। ननु तद्वचनमेव खपुष्पायमाणम् अतो नारदमाह *यथाहेति। शौर्यंभार्यासबन्धिधने इत्यर्थः। एवमग्रेऽपि। अतएव शौर्यादिना वाऽऽप्तमिति बृहस्पतिर्विद्याप्राप्तं शौर्यधनमिति व्यासश्च सङ्गच्छते। *यस्येति। यच्चेति पाठान्तरं युक्तम्। * पैतृक इति। पितुरागत इत्यर्थे पितुर्यच्चेति ठञ्। ननु सर्वानुमतिरेव यत्र न, तद्विषयकमिति नायं दोष इति चेत्,

३६। दोषान्तरमाह * तथेति। वैष्णवमाह * भर्त्रेति। अत्र दानद्वैविध्यादाह * प्रीतीति। सामान्येनेत्यादिः। तत्र पक्षे जातमात्रस्यापि स्वत्वसत्त्वात्तस्यानुज्ञायामप्यसामर्थ्यात् तद्द्रव्यस्य सर्वसाधारणत्वेन एकेन दातुमशक्यत्वात् प्रीतिदानस्याप्यसं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवात् तत्प्रतिपादकमिदं वचनं विरुध्येतेत्यर्थः। ननु स्थावरादित्यस्योत्तरार्द्धोपात्तान्वयएव एवं स्यात्, स एव नेति न तद्वचनविरोधः किंतु अनुकूलमेव तदिति शङ्कते * नचेति। तथाचाशनादावसंबन्धेन तदनिषेधेन प्रीतिदाने संबन्धेन स्थावरांशे तन्निषेधेन तत्रैव वचनतात्पर्यं नान्यत्र तत्रेति तेन जन्मनैव स्वत्वं प्रतिपादितं भवतीति भावः। * व्यवहितेति। एवमन्वये तथा स्यात्, स एव न, व्यवधानस्य प्रतिबन्धकत्वेन तदन्वयालाभात्। नन्वेवमपि वचनान्तरयोरव्यवहितान्वयेनैव स्थावरस्य प्रीतिदानप्रतिषेधाज्जन्मैव स्वत्वहेतुः न विभाग इति आशयेनाशङ्कते * यदपीति। इदं द्वयं नारदीयम्। मवालानामिति निर्धारणे षष्ठी। यद्वा सामानाधिकरण्येनान्वयः। तत्र समानविभक्तिकत्वस्य तन्त्रत्वेऽपि समानवचनत्वस्यातन्त्रत्वात्। वेदाः प्रमाणमित्यादावन्यथा ऽगतेः। व्युत्क्रमेण एवव्यवच्छेद्यं, न स्थावरान्यदपि, किन्तु स्थावरमेव। अत एव सर्वपदसार्थक्यमिति तत् उपलक्षणमिति सूचयन्नाह * स्थावरेति। एकत्वमविवक्षितमिति सूचनायाह *सर्वस्येति। एवमग्रेऽपि। * पितृप्रसादात्, लब्धानि। * सति, सत्यपि। प्रसाददाने इति विषयसप्तमी। प्रतिषेधवचनमिति जातावेकवचनम्। एवमग्रेऽपि। ननु पैतामहे स्थावरे सर्वसाधारण्यं, तादृशेषु मणिमुक्तादिषु तु नेत्यर्धजरतीयमयुक्तम् अत आह*अतीते पितामह इति। तथाच वचननियम्यमेतादिति न दोषः।

३७। पूर्वपक्षमुपसंहरति। *तस्मादिति। अयं भावः। अर्जनादर्जकस्य स्वं,तच्च तत्संबाधिनां पुत्रादीनामपि विभागात्स्वामिनाशाद्वा स्वम्। तत्र स्वामिनि जीवति विभागः स्वत्वहेतुः त्रिनष्टे तु स्वामिनि तन्नाश एव स्वत्वहेतुः। तत्रान्योऽपि वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शेषः, स्वामिसंबन्धिनः पुत्रस्य पौत्रस्य वा एकत्वे स्वामिनश्च विभक्तत्वे एकत्वे वा स्वामिनाश एवासाधारणः स्वत्वहेतुः। तेषामेव बहुत्वे तु स्वामिनाशात्साधारणं स्वं भवति विभागाच्च प्रातिस्विकमिति। एवं सति स्वामिनि तादृशे पितामहे नष्टे विभागात्प्राक् पितामहधने पितुः प्रातिस्विकस्वत्वाभावादेव पैतामहं स्थावरं न प्रीत्या दद्यादिति तत्स्थावरप्रीतिदाननिषेधो, न स्वोपार्जितस्य, येन जन्मनैव स्वत्वं स्यादिति। यतः स्वामिनाशो ऽपि स्वत्वहेतुरतः पितरि मृते विभागात्प्रागन्यदीयद्रव्यमित्यौदासीन्यविषयभूतं तत् द्रव्यं न भवतीत्याह *अत एवेति। तन्नाशस्यापि तत्त्वाङ्गीकारादेवेत्यर्थः। *पितुः, मरणात्। *प्रहीणेति। निरूपकस्य स्वामिनोऽभावादिति भावः।

३८। एवमनेकपुत्रस्थले तदावश्यकत्वमुक्त्वैकपुत्रस्थले तदावश्यकत्वमाह * तथैकेति। तद्वदित्यर्थः। *प्रायणात्, मरणात्। तादृशस्यैकपुत्रस्य स्वं पितृमरणादेव पुत्रस्यापि स्वमिति न तद्विभागमपेक्षते इति वाक्यार्थः। एवव्यवच्छेद्यमेव नेत्यादिनोक्तम्। इतिः पूर्वपक्षसमाप्तौ।

३९। एवम् पूर्वपक्षे स्थिते सिद्धान्तमाह *अत्रोच्यते इत्यादि। पूर्वसिद्धान्तस्यात्र हेतुत्वसूचनाय तमनुवदति। * लोकेति। प्रकृते साधकं तदेवाह। * लोके चेति। तस्य तत्स्वीकारे सोत्कर्षस्य तत्त्वमत्यावश्यकमित्याह * नापह्नवमिति। युक्त्यन्तरमाह *विभागेति। प्रोक्तमिदं प्राक्। *न प्रहीणेति। नापि स्वत्वरहितेत्यर्थः। प्रसिद्धमित्यस्यानुषङ्गः। अत्र गौतमवचनमपि मानमाह *तथोत्पत्त्यैवेति। तथाशब्दः समुच्चये। उत्पत्त्यैव जन्मनैवांशे स्वामित्वात्तमर्थं लभेतेत्याचार्या मन्यन्ते इत्यर्थः। अर्थस्वामित्वमिति पाठान्तरं तु प्रचुरं युक्ततरं च। वचनाच्चेत्यपपाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४०। मणिमुक्तेत्याद्यपि सिद्धान्तपक्षे एवोपपद्यते इत्याह *म-णीति। आदिना वचनजातपरिग्रहः। एवं सफलयन् अस्य पूर्व-पक्ष्युक्तमन्यार्थपरत्वं निराचष्टे * न च पितामहेति। अनुपपत्तौ हेतुमाह * न पितेति। अयं भावः। स्वामिनाशस्यापि स्वत्व-हेतुत्वेनातीते पितामहे तद्धने पितापुत्रयोः स्वाम्यस्य साधार-ण्येऽपि मण्यादिकं वचनात्पितुरेव स्थावरं तु साधारणमेवेति प्रागुक्तार्थो यदि तद्वचनात्प्रतीयेत तदा पूर्वोक्तव्यवस्था स्यात्। न च तथा। यदि पितामहोपार्जितमेव स्यात्स्थावरादिकं तदा तास्मिन् जीवति स्वोपार्जिते तस्य प्रभुत्वाभावबोधकतुरीयपाद-स्यानुपपत्तेः। तस्मादेवं वाच्यं, पितामहे जीवत्यपि स्थावरेषु सर्वसाधारण्यमिति अस्य तद्विषयत्वं तदुक्तमनुपपन्नमेवेति।

४१। नन्वेवं किंविषयं तद्वचनद्वयं येन प्रकृतार्थलाभोऽत आह *पितामहस्य हीति। *हि, यतः। *वचनं, वचनद्वयम्। तथाच जन्मना स्वत्वपरमेव तद्वचनद्वयमिति भावः।

४२। ननु जन्मनैव स्वत्वे सर्वसाधारणत्वात्स्वस्य मणिमुक्तादे-रपि कथं प्रीतिदानमित्याशङ्कायां प्रतिबन्द्या वचनादित्याह *य-थेति। *परः, पूर्वपक्षी। उक्ताशयेनैवाह * वस्त्रेति। * अस्म-न्मतेऽपि, सिद्धान्तमतेऽपि। * पित्राऽर्जितेति। स्वार्जितेति पा-ठान्तरम्। तथाच स्थावराभिन्नं स्वोपार्जितं वस्तु अनुज्ञानाहर्दा-मतिं विनाऽपि पित्रा दातुं शक्यमिति भावः।

४३। नन्वेवमपि स्थावरस्य प्रीतिदानबोधकविष्णुवचनविरो-ध एवेत्यत आह *यत्तु भर्त्रेति। भर्तृकर्तृकपत्नीसंप्रदानकतद्दानेत्यर्थः। *ज्ञापनम्। करणे ल्युट्। ज्ञापकम्। क्वचित्तथैव पाठः। *-तस्वोपार्जितस्यापीति। स्वोपार्जितेष्वपि स्थावरेषु अनुज्ञासम-नुमतिं विना दानानाधिकारोऽन्यत्र तु नानुमत्यपेक्षेति भावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं च भर्तृदत्ते स्थावरे यावज्जीवं निवासो, न दानविक्रयौ आवश्यककार्य्यं विना । अत्र भर्तृग्रहणात् श्वशुरदत्ते स्वातन्त्र्यमपि । अत एव--

बृहस्पतिः,

स्थावरादिधनं स्त्रीभ्यो यद्दत्तं श्वशुरेण तु ।
न तच्छक्यमपाहर्तुं पुत्रैरपि हि कर्हिचित् ॥ इति ।

विष्णुवचनस्यैवमर्थपरत्वे हेतुमाह * पूर्वोक्तैरिति । बहुवचनेनानुक्तवचनसंग्रहो बोध्यः । तच्चाग्रे स्फुटीभविष्यति । वचनैरिति करणे तृतीया । अतो योग्यत्वनिश्चयादित्यत्र न समासानुपपत्तिः ।

४४। आद्ययुक्तिं खण्डयति *यदप्यर्थेति । वचनात्तत्राधिकार इत्यर्थः । सविशेषमुपसंहरति * तस्मादिति । स्थितमित्यत्रान्वयः । यद्यपीति शेषः । पितुरित्यस्य स्वातन्त्र्यमित्यत्रान्वयः । उक्तवक्ष्यमाणस्मृत्युक्तमाह । * आवश्यकेत्यादि । आवश्यकत्वे हेतुमाह । *वाचानिकेष्विति । श्राद्धादिष्वित्यर्थः । इदमुत्तरस्यैवाङ्गं वा । *स्थावरेति । तदन्यद्रव्यस्य विनियोगे स्वातन्त्र्यमित्यर्थः ।

४५। एवं स्थावरान्यत्रोक्त्वा स्थावरे सिद्धान्तमाह *स्थावरेत्विति । वैलक्षण्ये तुः । पारतन्त्र्यमेवेति । पित्रादेरिति भावः । अस्यार्थस्य पर्यवसानतो न्यायतो लाभेऽपि वचनमपि अपवादकमस्तीति आह * स्थावरमिति । * द्विपदं, दासादि । * स्वयं, स्वयमपि । *आर्जितं, तथापि तस्येति शेषः । *असंभूय, असंपृच्छ्य । सुतेत्युपलक्षणम् । अतएव * सर्वानिति । एकशेषस्तत्र माग्वत् । न केवलमेतावदेव किंत्वन्यदपीत्याह *येजाताइति। *अजाताः, जनिष्यमाणाः । *काङ्क्षन्ति, यतोऽत इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४६। अस्येति। उक्तसामान्यवचनस्य विशेषवचनेनापवाद इत्यर्थः। स्थावरे इति विषयसप्तमी। आधमनमाधिः। समाहारद्वंद्वः। निमित्तविशेषमाह * आपादिति। वक्ष्यमाणार्थसिद्ध्यर्थमेवाह *अस्यार्थ इति। *अनुज्ञानादाविति। तत्समर्थत्वे तु वक्ष्यमाणप्रकार इति न विरोध इति भावः। तथेत्यनेनोभयपरामर्शः। अपिना विभक्तसमुच्चयः। विशेषत इत्यस्य सर्वशेषत्वात् ततोऽपि विशेषमाह *सकलेत्यादि। *तदिति। सकलकुटुम्बेत्यर्थः। विषयसप्तम्या फलितमाह * स्थावरस्येति कुर्यादित्यतएवैकत्वलाभे पुनः एकार्थमाह * समर्थ इति।

४७। यथाश्रुते प्राप्तं मनुवचनविरोधम् उक्ताशयेनैव परिहरति * यत्तु मनुवचनमित्यादि। सपिण्डा इति प्रत्यासन्नोपलक्षणम् *हि, यतः। सर्वत्रेति दानादिविशेषणम्। तदपीत्यस्य व्याख्येयमित्यत्रान्वयः। अपिः पूर्वविष्णुसमुच्चये। अतएव व्युत्क्रमेण व्याचष्टे * अविभक्तोष्विति। * मध्यकत्वात्, साधारणत्वात् *अनीशकत्वात्,उभयत्र स्वार्थे कः। मध्यस्थत्वात् अनीश्वरत्वात् इति पाठान्तरम्। * सर्वेति। अविभक्ताभ्यनुज्ञां विना दानाद्यसिद्धेरिति भावः। * व्यवहारसौकर्यायेति। प्रतिग्रहीत्रादीनामिति भावः। * न पुनः, नतु। फलितमाह * अत इति तथाचाभ्यनुज्ञानादावसमर्थविषयकं तत्, इदं तु तत्समर्थविषयकम्। किञ्च तत्समर्थेष्वप्यविभक्तेषु तद्विना दानादिकमेव नैव अवश्यं तदपेक्षेत्येतस्यार्थः। तत्समर्थेषु विभक्तेषु तु तदनुज्ञां विना दानादिकोपपत्तावपि प्रतिग्रहीत्रादेर्व्यवहारसौकर्यार्थं तदपेक्षेत्येतस्य विषय इति नेदं सर्वात्मना दानाद्यधिकारनिरोधकम् एको ऽपीत्यस्याप्यपवादकं, येन विरोधो भवेदिति भावः।
व्यांशे विभक्तानामप्यविभक्तक्षेत्राद्युत्पन्नस स्यादिदानादावनुज्ञा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विनाऽधिकारप्रतिषेधार्थमिदामितितु मदनः।

४८। मनुवचनान्तराविरोधं निराचष्टे *यदपीति। स्वेति सर्वविशेषणं स्पष्टार्थं, प्रत्यासत्तेरेव लाभात्। द्वन्द्वान्ते श्रूयमाणत्वादनुमतेः सर्वत्र संबन्धः। तत्र च भावे क्तः। चोऽग्रे योज्य इति षड्भिरित्यर्थः। तदेतत् प्रतिपादयन् यथाक्रमेणोपयोगं प्रदर्शयन्नादौ ग्रामजनानुमतेः फलमाह * तत्रापि ग्रामानुमतिरिति। मनुमाह*प्रतिग्रह इति।*न पुनः,न तु। दायादानुमतेरिति जातावेकवचनम्। *उक्तमेवेति। व्यवहारसौकर्यमित्यर्थः। हिरण्योदेत्यादेर्विलक्षणोपयोगं वक्तुं सप्रतीकमाह * हिरण्येति। ननु दानस्थले तयोर्दानसत्त्वेऽपि विक्रये तदभावाद्गमनस्य तत्रापि सत्त्वादिदमयुक्तम्, अत आह * स्थावरे इति। इदं द्वयं मनुवत् सप्रतीकम् प्राग्वत्। आपिनां दानम्।

४९। एवं स्थावरे सामान्येनोक्त्वा विशेषमुभयत्राह *पैतृके इति। एतेन पितुर्निधनमेव स्वत्वकारणम्।

पितर्यूर्ध्वं गते पुत्रा विभजेयुर्धनं पितुः। (व्य० प० १२।२)

इति नारदात्। न जन्म। ऊर्ध्वं पितुश्च मातुश्चेति मनुना,

पितर्युपरते पुत्रा विभजेयुर्धनं पितुः।
अस्वाम्यं हि भवेदेषां निर्दोषे पितरि स्थिते॥

इति देवलेन च विरोधात्। न च भार्या पुत्रश्चेत्यादिवदस्वातन्त्र्याशयमिदम्। तदानीं स्वामित्वे मानाभावात्। भार्यादिषु यत्ते समधिगच्छन्तीति स्वत्वे सिद्धेऽयुक्तमस्वातन्त्र्यवर्णनम्। किंच स्वोपात्तेऽपि तेषामस्वामित्वे स्वधनसाध्यवैदिककर्मोच्छेदात् श्रुतिविरोधात्। तथा सति पितुरनिच्छयाऽपि विभागापत्तेश्च। जन्मनैव स्वत्वे मानाभावाच्च। अर्जनरूपतया जन्मनः स्मृतावनुक्तेः। तस्माज्जीवति पितरि विभागनिषेधार्थं न मन्वादिवचनम्, अस्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्थपरत्वापत्तेः। किं तु पित्रोः सतोः स्वामित्वमेव न। निधनप्रात्तियादौ तु स्वामित्वमिति प्राच्योक्तमपास्तम्। उक्तहेतुगणात्।

इत्युपोद्घातः।

मि० इदानीं यत्र काले येन च यथा विभागः कर्तव्यस्तद्दर्शयन्नाह।

या० विभागं चेत्पिता कुर्यादिच्छया विभजेत्सुतान्।
ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः समांशिनः॥११४॥

मि० यदा विभागं पिता चिकीर्षति तदा इच्छया विभजेत् पुत्रानात्मनः सकाशात् पुत्रं पुत्रौ पुत्रान्।

इच्छाया निरङ्कुशत्वादनियमप्राप्तौ नियमार्थमाह। ज्येष्ठं वा श्रेष्ठभागेनेति। ज्येष्ठं श्रेष्ठभागेन मध्यमं मध्यभागेन कनिष्ठं कनिष्ठभागेन, विभजेदित्यनुवर्तते। श्रेष्ठादिभागश्च—

मनुनोक्तः, (अ. ९ श्लो. ११२)

ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम्।
ततोऽर्द्धं मध्यमस्य स्यात्तुरीयं तु यवीयसः॥ इति।

वाशब्दो वक्ष्यमाणपक्षापेक्षः। सर्वे वा स्युः समांशिन इति। सर्वे वा ज्येष्ठादयः समांशभाजः कर्तव्याः। अयं च विषमो विभागः स्वार्जितद्रव्यविषयः। पितृक्रमायाते तु समस्वाम्यस्य वक्ष्यमाणत्वान्नेच्छया विषमो विभागो युक्तः। विभागं चेत्पिता कुर्यादिति। यदा पितुर्विभागेच्छा स तावदेकः कालः। अपरोऽपि जीवत्यपि पितरि द्रव्यानिःस्पृहे निवृत्तरमणे, मातरि च निवृत्तरजस्कायां पितुरनिच्छायामपि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुत्रेच्छयैव विभागो भवति,

यथा नारदेन— (व्य० प० १३।२।३)

अत ऊर्ध्वं पितुः पुत्रा विभजेयुर्धनं समम्। इति-पित्रोरूर्ध्वं विभागं प्रतिपाद्य,

मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च।
निवृत्ते वापि रमणे पितर्युपरतस्पृहे ॥

इति दर्शितः। अत्र पुत्रा धनं समं विभजेयुरित्यनुषज्यते।

गौतमेनापि, ऊर्ध्वं पितुः पुत्रा रिक्थं विभजेरन्नित्युक्त्वा निवृत्ते वापि रजसीति द्वितीयः कालो दर्शितः। जीवति वेच्छतीति तृतीयः। तथा सरजस्कायामपि मातरि अनिच्छत्यपि पितर्यधर्मवतिनि दीर्घरोगग्रस्ते च पुत्राणामिच्छया भवति विभागः।

यथाह शङ्खः, अकामे पितरि रिक्थविभागो वृद्धे विपरीतचेतसि रोगिणि वेति ॥ ११४ ॥

धा० १। पूर्वं कस्मिन्नित्यादिना प्रकरणार्थं संगृह्य तत्र कस्येत्यंशो महता प्रपञ्चेन प्रतिपादितः। इदानीमितरानंशान्प्रतिपादयितुं मूलमवतारयति * इदानीमिति। मूले आवश्यकोपयोगिमूलानुक्तपूरणानन्तरमित्यर्थः। * तदिति। त्रितयमित्यर्थः।

२। पौनरुक्त्यादिदोषगणानुपपत्तिं परिहरन् व्याचष्टे *यदेति। चेदर्थोऽयम्। कुर्यादित्यत्र लिङर्थो न विवक्षितः। स च करणेच्छायां लाक्षणिक इत्याह *चिकीर्षतीति। आक्षेपादाह *तदेति। *इच्छया, स्वेच्छयैव। *विभजेत्, दायभागदानेन पृथक्कुर्यात्। तत्रावध्याकाङ्क्षायामाह *आत्मन इति। तदनन्तरं तेषां मिथ ऐक्यं भेदो वेत्यत्र नाग्रहोऽस्येति भावः। सुतानित्युक्तेर्बहुभिन्ने न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विभाग इतिशङ्कानिरासाय तदर्थमाह * पुत्रामिति । कृतैकशेषयोस्तेन पुनरेकशेष इत्यर्थः । अनुदात्तानामितिवत् ।*निरङ्कुशेति अनियतत्वादित्यर्थः । *नियमार्थमिति । शास्त्रीयत्वादिना।मन्वाद्येकवाक्यतयेदमुपलक्षणमित्याह * मध्यममित्यादि । साकाङ्क्षत्वादाह *विभजेदिति । उपलक्षणत्वे मानं सूचयन्नाह * श्रेष्ठादीति । चस्त्वर्थे । अस्य व्याख्या त्वनुपदमेवाग्रे स्फुटा ग्रन्थे एव ।

३। ननु उत्तरार्धस्य पूर्वव्यवस्थापकतया योजने सर्वे वेतिवासाङ्गत्येऽपि ज्येष्ठं वेतिवाशब्दासङ्गतिः । पूर्वतो विकल्पबोधने एव तत्स्वारस्यात् । न च तथैवास्तां, पूर्वेणैच्छिकविषमविभागस्यैव प्रतिपादनादिति वाच्यम् । न्यूनाधिकविभक्तानामित्यनुपदवक्ष्यमाणमूलविरोधापत्तेः।अत आह *वाशब्द इति। मानववक्ष्यमाणोद्धाररहितविषमविभागपक्षापेक्ष इत्यर्थः। तथाच तस्य तत्त्वे न तदसङ्गतिरिति भावः । तुर्यपादं व्याचष्टे * सर्वेवेति। समांशिन इत्यत्र प्रशंसायामिनिः । अतएव बहुव्रीहिणा न गतार्थत्वमित्याह * समांशभाज इति । प्राग्वदाह * कर्तव्या इति। पित्रेति भावः । अत्र विभागं चेत्कुर्यादित्यादिना यस्मिन्काले विभाग इत्यस्य संग्रहः, पितेत्यनेन येन विभाग इत्यस्य, उत्तरार्धेन यथा विभाग इत्यस्येति बोध्यम् ।

४। विशेषमाह *अयं चेति । पितृकर्तृकाविभागः । *पितृक्रमायाते तु, द्रव्ये । *समस्वाम्येति । तस्य च समविभागे एव तात्पर्यम्।अन्यथोक्तरीत्या तदानर्थक्यमेवेति भावः।*इच्छया,पितुः यद्यप्ययं समोऽपि स्वार्जितविषय एव तथाप्यग्रे तस्यैव प्रतिपादनात् न तदंशे विशेषाभावात्तदनुक्तिरिति बोध्यम् । अत एव विभजेदिति साकाङ्क्षमात्रमुक्तं, द्वितीयं तु तत्रैव तदन्यपक्षद्वयसाधारणम् । अ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एव तथोक्तं सर्वेवेति । तच्च तत्र पक्षद्वये समविभागे एव । चत्वारो विभागस्य कालास्तत्राद्यो मूलकृतोक्त इति प्रतीकपूर्वकमाह * विभागं चेदिति । * यदेति । जीवत्येव तस्मिन्निति भावः । द्वितीयं तदनुक्तं स्वयमाह * अपरोऽपीति । कालोऽस्तीति शेषः । तमेवाह * जीवत्येवेति । * निवृत्तेति । स्त्रीसुखानभिलाषिणीत्यर्थः । * पितुरिति । विभागे इति शेषः । * अनिच्छायामपीति । यदा पुत्रेच्छा तदेति शेषः । मूलानुक्तत्वादत्र मानमाह * यथा नारदेनेति । दर्शित इत्यत्रान्वयः । * अत इति । अत्र पितुरित्यस्य धनमित्यत्रान्वयः । अत ऊर्ध्वमित्यस्य मातापितृमरणोत्तरमित्यर्थः ।

ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समम् ।
भजेरन्पैतृकं रिक्थमनीशास्ते हि जीवतोः ॥

इति मनूक्तेः । तदाह * पित्रोरिति । *प्रत्तासु, विवाहितासु । वापीति पाठः । रमणं स्त्रीसम्भोगः । तदिच्छानिवृत्तौ सत्याम् । स्पृहा द्रव्यविषया बोध्या । अत्र तदुक्तेः फलमाह * अत्रेति । मातुर्निवृत्ते इत्यत्रेत्यर्थः । अनेन साकाङ्क्षत्वं निरस्तम् । मूलोक्त, नारदीयस्वयमुक्त, नारदप्रथमोक्तपक्षान्प्रथमद्वितीयतृतीयान् व्युत्क्रमेण मुन्यन्तरसंवादेनाह * गौतमेनापीति । तृतीय इत्यनेन दर्शित इत्यस्यानुषङ्गसहितेनास्यान्वयः । *ऊर्ध्वमिति । पित्रोरिति शेषः । पितुरिति प्राग्वत् । वापीति पक्षान्तरे । एवं नारदवाक्येऽपि बोध्यम् । वेच्छतीत्यत्राप्येवम् । * तृतीय इति । गौतमेन कालो दर्शित इत्यर्थः । प्रकृतक्रमे तु अस्याद्यत्वं बोध्यम् । एवं स्वयं पक्षद्वयमुक्तम् ।

५। अथ तृतीयं कालमाह *तथेति । [1]निरितिपाठे तु दर्शित

१ "जीवतिवेच्छतीति तृतीय" इत्यत्र 'जीवति वेच्छति तृतीय" इति इतिशब्दरहिते पाठे इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यन्तेन गौतमसमाप्तिः । एवं कालद्वयं स्वयमुक्त्वा तृतीयमाह *जीवतिवेच्छति तृतीयस्तथेति । पितरि जीवत्येवेच्छति च वि- षयाभिलाषुके च सति तृतीयस्तथा तृतीयोऽपि विभागका- ल इत्यर्थः । तमेवाह * सरजस्कायामिति । * वस्तुत आद्य- पाठ एव तथा व्याख्यातो व्याख्यात्राभिमत इति बोध्यम् । * अ- निच्छत्यपीति । विभागमित्यादिः । * दीर्घेति । अचिकित्स्येत्य- र्थः । चेन वृद्धत्वसमुच्चयः । यदि पुत्रेच्छा तदेति शेषः । अस्या- पि मूलानुक्तत्वादाह * यथाह शङ्ख इति । * अकामे, विभा- गमनिच्छति । *विपरीतचेतसीति । अधर्मवर्त्तिनीत्यर्थः । रो- गिणीत्यत्र भूम्नि इनिः । वेतीत्यनेन विकल्प उक्तः । एवं प्रा- गपि बोध्यम् । एतेन "कालद्वयमेव पितुरिच्छा तन्निधनं च, न तृतीयोऽपीति मातुर्निवृत्ते रजसीति पितामहादिधनविषयम्" इति प्राच्योक्तमपास्तम् । शङ्खादिविरोधात् । तस्य तन्मात्रविषयत्वे माना- भावात् । तत्त्वेऽपि तत्त्वसंभवादुपक्रमविरोधाच्च । एवंचैवं कालत्रयं पितामहधनेऽपि बोध्यम् । एतेन तत्रान्यथा व्याख्यानं तदुक्त- मपास्तम् ॥ ११४ ॥

मि० पितुरिच्छया विभागो द्विधा दर्शितः, समो विषमश्च । तत्र समविभागे विशेषमाह ।

या० यदि कुर्यात्समानंशान् पत्न्यः कार्याः समांशकाः ।
न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वा ॥ ११५ ॥

मि० यदा स्वेच्छया पिता सर्वानेव सुतान् सम- विभागिनः करोति तदा पत्न्यश्च पुत्रसमांशभाजः कर्तव्याः । यासां पत्नीनां भर्त्रा श्वशुरेण वा स्त्रीधनं न दत्तम् । दत्ते तु स्त्रीधने अर्द्धांशं वक्ष्यति, दत्ते त्वर्द्ध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकल्पयेदिति । यदा तु श्रेष्ठभागादिना ज्येष्ठादीन् विभजति तदा पत्न्यः श्रेष्ठादिभागान् न लभन्ते किंतूद्धृतोद्धारात्समुदायात्समानेवांशान् लभन्ते स्वोद्धारं च।

यथाहापस्तम्बः, परीभाण्डं च गृहेऽलङ्कारो भार्याया इति ॥ ११९ ॥

बा० १ । *विभाग, आद्यः। * दर्शितः, मूलकृता। समस्यैव सिद्धान्तयिष्यमाणस्य मूलेष्टत्वमपि सूचयन् व्युत्क्रमेणाह *सम इति । तत्र, तयोर्मध्ये । यद्यर्थमाह * यदेति। फलितमाह * सर्वानिवेति । लिङ्गर्थाविवक्षयाऽऽह * करोतीति। *पत्न्यश्च, ता अपि। अत्र बहुवचनेन पत्नीपदस्वारस्येन च सुतसापत्नमातुरपि विभागः सूचितः। इदमग्रे स्फुटीभविष्यति। समांशका इत्यत्र अलौकिकप्रक्रियावाक्ये समासान्तप्रवृत्त्या तदा तत्र टाबभावान्नेत्वमिति ध्वनयन्नाह * समांशभाज इति। समांशिका इति पाठे तु वैकल्पिकत्वात्कबभावे टापि स्वार्थिके कनि कथंचिदिष्टसिद्धिः।

विष्णुरपि, मातरः पुत्रभागानुसारिभागहारिण्य इति।

२। यासामिति शेषे षष्ठी तत्रेत्याह *यासां पत्नीनामिति। एवमग्रेऽपि वक्ष्यति योगीश्वर एव आधिवेदनिकस्थले। तथाच स न्यायः सर्वत्रान्यत्र बोध्यः। अत एव अर्धशब्दो न समांशविभागपरः किन्तु यावता समत्वं तत्पर इति बोध्यम्। अस्य वचनस्य विषमविभागे पत्न्यंशाभावे दंपत्योः पुत्रवद्विभागे च न तात्पर्यं गमकाभावादनियामकत्वाच्च, किंतु समांशे एव। एको वाशब्दो मिथोविकल्पे द्वितीयो वाशब्दो वक्ष्यमाणपित्रादिविकल्पे तत्रेत्यभिप्रेत्याह * भर्त्रेति। * स्त्रीधनं, तत्त्वेन मनुमूलक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दादिना प्रतिपादितं वक्ष्यमाणं रिक्थादिभिन्नम्। नन्वेवं तद्दाने-ऽभावः स्यादत आह *दत्तेत्विति। तात्पर्यमयमेव विशेषः। त-देतदभिप्रेत्याह—

३। * यदा श्रेष्ठेति। उद्धृतोद्धारादिति बहुव्रीहिः। सुता-नामिति भावः। समं स्यादश्रुतत्वादिति न्यायेनाह *समानेवेति। स्वं पत्नी। अतएव अत्र द्वितीये मानमाह * यथाहेति। गृहे य-त्परीभाण्डं पीठमृन्मयदृषदादि उपकरणं, अलङ्कारश्च आभूषणं धृतं, तत् भार्याया अंश इत्यर्थः। रथः पितुः परीभाण्डं च गृहे उभयं पितुः अलङ्कारो भार्याया ज्ञातिधनं चेत्येके इदं भार्याया इति तु हरदत्तः।

४। अत्र यदि कुर्यादित्यनेन पितुरिच्छया विभाग उक्तो न पत्नीच्छया। सोऽपि पुत्रांशपृथक्करणपर्यन्तो न स्वतः। जायापत्यो-र्न विभागो विद्यते इत्यादिप्रागुक्तापस्तम्बादिना तत्र सहत्वोक्त्या तस्यासम्भवात्। अर्द्धो वा एष आत्मनो यः पत्नीति श्रुतेश्च। अय-मेवाशयोऽनीशास्ते हि जीवतोरिति मानवस्य। पुत्रतस्तस्या अन्त-रङ्गत्वात्। किन्तु बहुवचनादनेकत्वे पत्नीनां प्रतिपत्नि पुत्रांशतुल्यां-शान्संगृह्य स्वांशेन सह स्थाप्याः। एवं च ताभ्यः पृक्कृत्यांशो देय इति न। अतएव समांशका इत्येवात्रोक्तं, न तु तद्वत् पत्नीश्च विभजे-त् सममिति। अत एव धनाविभागाभावे नापस्तम्बादितात्पर्य-किन्तूक्ते इति प्राक्प्रतिपादितं प्रतिभूप्रकरणे व्याख्यात्रा। मद-नरत्नेऽप्येवम्। एवञ्च यथा जीवत्पितृकाविभागे आद्यपक्षे एवमन्त्यपक्षद्वये दत्तेत्विति न्यायेन निर्वाहवत् पुत्रेच्छयैव पि-वन्निर्वाहो बोध्यः॥ ११६॥

मि० ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः समांशिनः।

इति पक्षद्वयेऽप्यपवादमाह।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या० शक्तस्यानीहमानस्य किञ्चिद्दत्त्वा पृथक् क्रिया ।

मि० स्वयमेव द्रव्यार्जनसमर्थस्य पितृद्रव्यमनीहमानस्यानिच्छतो यत्किञ्चिदसारमपि दत्त्वा पृथक् क्रिया विभागः कार्यः पित्रा, तत्पुत्रादीनां दायजिघृक्षा माभूदिति ।

४ मि० ज्येष्ठं वा श्रेष्ठभागेनेति न्यूनाधिकाविभागो दर्शितः । तत्र शास्त्रोक्तोद्धारादिविषमविभागव्यतिरेकेणान्यथाविषमविभागनिषेधार्थमाह ।

या० न्यूनाधिकविभक्तानां धर्म्यः पितृकृतः स्मृतः॥ ११६॥

मि० न्यूनाधिकाविभागेन विभक्तानां पुत्राणामसौ न्यूनाधिकविभागो यदि धर्म्यः शास्त्रोक्तो भवति तदाऽसौ पितृकृतः कृत एव न निवर्त्तते इति मन्वादिभिः स्मृतः । अन्यथा तु पितृकृतोऽपि निवर्त्तते इत्यभिप्रायः ।

यथाह नारदः,

व्याधितः कुपितश्चैव विषयासक्तमानसः ।
अयथाशास्त्रकारी च न विभागे पिता प्रभुः॥ इति ११६॥

बा० १।शक्तस्येत्यस्य व्याख्या * स्वयमेवेति।शेषमाह * पित्रेति । अस्यैव व्याख्या *अनिच्छत इति । तत्पदस्वारस्यादाह *असारमपीति । अपिना सारस्यापि समुच्चयः । तत्र हेतुमाह *तत्पुत्रेति । *इति, हेतोरित्यर्थः ।

उ० २।उत्तरसङ्गतिमाह * ज्येष्ठं वेति । * तत्र, तस्मिन्सति । उद्धारादीति तृतीयासमासः। अन्यथेत्यस्य प्राप्तेत्यादिः । शास्त्रोक्तेत्यनेन वक्ष्यमाणस्यापि सङ्ग्रहः । निषेधस्यास्पष्टत्वादाह *नि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षेधार्थमिति । तत्तात्पर्यकमित्यर्थः । अन्यथा "विभागं चेत्पिता-कुर्यादिच्छया विभजेत्सुतान्" इत्यर्थेनैव तृतीयकोटिसिद्धेरेतस्य मनूक्तोद्धाररहितविषमविभागपक्षस्य चानर्थक्यं स्पष्टमेव। एवञ्च पिता चेत्पुत्रान्विभजेत्तस्य स्वेच्छा स्वयमुपार्जितेऽर्थे इति वैष्णवम्

प्रदानं स्वेच्छया कुर्याद्भागं चैव ततो धनात् ।

इति बार्हस्पत्यम्,

पिता चैव स्वयं पुत्रान्विभजेद्वयसि स्थितः ।
ज्येष्ठं श्रेष्ठविभागेन यथावा स्वमतेन तु ॥

इति नारदीयं च व्याख्यातृवर्णितमूलाशयकमेव। एते-नेदं पृथगैच्छिकविभागपरं नोद्धारादिविभागपरमिति इच्छया विभजेत् सुतानित्येतत्परमिति विष्णुनारदादिविरोधात्तथा वि-ज्ञानेश्वरव्याख्यानं चिन्त्यमिति मन्दोक्तमपास्तम् । यत्तु तेन यदपि मनुः पुत्रेभ्यो दायं व्यभजादित्यविशेषेण श्रूयते इति स-मविभागसाधकं विषमविभागनिषेधकं चोक्तं तदपि नित्यानुवा-दमविधिमाहुर्न्यायविदः इत्यनेन निराकृतमित्युक्तं, तत् तत्सूत्रा-दर्शनमूलकमान्ध्यसूचकम्। तस्यान्यनिराकरणपरत्वं तत्र हि स्पष्टं प्रागुक्तं च। एतेन स्वार्जिते पितुरैच्छिकवैषम्यमपि शास्त्रीयत्वेन धर्म्यमित्यपि तदुक्तमपास्तम् ।

जीवद्विभागे तु पिता नैकं पुत्रं विशेषयेत् ।
निर्भाजयेत् न चैवैकमकस्मात्कारणं विना ॥

इति कातीयं तु निर्दोषपुत्रपरमिति तदपि न विरुद्धम् भवदभिमतासाधकं च । न्यूनाधिकशब्दो विभागपर इत्याह

*न्यूनेति । अत एव—

समन्यूनाधिका भागाः पित्रा येषां प्रकल्पिताः ।
तथैव तैः पालनीया विनेयास्ते स्युरन्यथा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति बृहस्पतिः।
पित्रैवतु विभक्ता ये समन्यूनाधिकेन च।
तेषां स एव धर्म्यः स्यात्सर्वस्य हि पिता प्रभुः॥

इति नारदश्च(व्य०प०१३।१५)सङ्गच्छते। धर्म्य इत्यस्य व्याख्या *शास्त्रोक्त इति। अत्रासम्बद्धत्वाद् बहुशेषपूरणेन व्याख्यातम्। नन्वेवं तन्निषेधानुक्त्या प्रतिज्ञाभङ्गः, अत एवव्यवच्छेद्यमाह * अन्यथात्विति। तस्याशास्त्रोक्तत्वे त्वित्यर्थः। अयथाशास्त्रेति पाठः। अन्यथेति पाठेऽपि स एवार्थः॥ ११६॥

मि० इदानीं विभागस्य कालान्तरं कर्त्रन्तरं प्रकारनियमं चाह।

या० विभजेरन् सुताः पित्रोरूर्ध्वं रिक्थमृणं समम्।

मि० पित्रोर्मातापित्रोरूर्ध्वं प्रायणादिति कालो दर्शितः। सुता इति कर्तारो दर्शिताः। सममिति प्रकारनियमः, सममेवेति। रिक्थमृणं च विभजेरन्। ननु ऊर्ध्वं पितुश्च मातुश्चेत्युपक्रम्य,
(मनु० अ० ९ श्लो० १०४)
ज्येष्ठ एव तु गृह्णीयात्पित्र्यं धनमशेषतः।
शेषास्तमुपजीवेयुर्यथैव पितरं तथा॥
इत्युक्त्वा (मनु० अ० ९ श्लो० ११२)
ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम्।
ततोऽर्धं मध्यमस्य स्यात्तुरीयं तु यवीयसः॥ इति सर्वस्माद् द्रव्यसमुदायाद्विंशतितमो भागः सर्वद्रव्येभ्यश्च यच्छ्रेष्ठं तज्ज्येष्ठाय दातव्यम्, तदर्द्धं चत्वारिंशत्तमो भागो मध्यमं च द्रव्यं मध्यमाय दातव्यम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तुरीयमशीतितमो भागो हीनं द्रव्यं च कनिष्ठाय दातव्यमिति मातापित्रोरूर्ध्वं विभजतामुद्धाराविभागो मनुना दर्शितः।

तथा, (मनु० अ० ९ श्लो० ११६।११७)

उद्धारेऽनुद्धृते त्वेषामियं स्यादंशकल्पना। उ०
एकाधिकं हरेज्ज्येष्ठः पुत्रोऽध्यर्द्धं ततोऽनुजः।
अंशमंशं यवीयांस इति धर्मो व्यवस्थितः॥ इति

ज्येष्ठस्य द्वौ भागौ, तदनन्तरजातस्य सार्द्ध एको भागः, ततोऽनुजानामेकैको भाग इत्युद्धारव्यतिरेकेणापि विषमो विभागो दर्शितः, पित्रोरूर्ध्वं विभजताम्। जीवद्विभागे च स्वयमेव विषमो विभागो दर्शितो, ज्येष्ठं वा श्रेष्ठभागेनेति। अतः सर्वस्मिन्नपि काले विषमो विभागोऽस्तीति कथं सममेव विभजेरन्निति नियम्यते।

अत्रोच्यते। सत्यम् अयं विषमो विभागः शास्त्रदृष्टः, तथापि लोकविद्विष्टत्वान्नानुष्ठेयः।

अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न तु।

इति निषेधात्। यथा— (याज्ञ० अ० १।१०९)

महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत्।

इति विधानेऽपि लोकविद्विष्टत्वादननुष्ठानम्। यथा वा मैत्रावरुणीं गां वशामनूबन्ध्यामालभेत इति गवालम्भनविधानेऽपि लोकविद्विष्टत्वादननुष्ठानम्।

उक्तं च,

यथा नियोगधर्मो नो नानूबन्ध्यावधोऽपि वा।
तथोद्धाराविभागोऽपि नैव संप्रति वर्तते॥ इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आपस्तम्बोऽपि—जीवन्पुत्रेभ्यो दायं विभजेत्समामिति स्वमतमुक्त्वा ज्येष्ठो दायाद इत्येके इति कृत्स्नधनग्रहणं ज्येष्ठस्यैकीयमतेनोपन्यस्य देशविशेषेण सुवर्णं कृष्णा गावः कृष्णभौमं ज्येष्ठस्य, रथः पितुः परीभाण्डं च गृहे, अलङ्कारो भार्याया ज्ञातिधनं चेत्येके इत्येकीयमतेनैवोद्धारविभागं दर्शयित्वा तं शास्त्रविप्रतिषिद्धमिति निराकृतवान्। तं च शास्त्रविप्रतिषेधं स्वयमेव दर्शयतिस्म, मनुः पुत्रेभ्यो दायं व्यभजदित्यविशेषेण श्रूयते इति। तस्माद्विषमो विभागः शास्त्रदृष्टोऽपि लोकविरोधाच्छ्रुतिविरोधाच्च नानुष्ठेय इति सममेव विभजेरन्निति नियम्यते।

मि॰ मातापित्रोर्धनं सुता विभजेरन्नित्युक्तम्। तत्र मातृधनेऽपवादमाह।

या॰ मातुर्दुहितरः शेषमृणात्।

मि॰ मातुर्धनं दुहितरो विभजेरन् ऋणाच्छेषं मातृकृतर्णापाकरणावशिष्टम्। अतश्च ऋणसमं न्यूनं वा मातृधनं सुता विभजेरन्नित्यस्य विषयः। एतदुक्तं भवति—मातृकृतमृणं पुत्रैरेवापाकरणीयं न दुहितृभिः, ऋणावशिष्टं तु धनं दुहितरो गृह्णीयुरिति। युक्तं चैतत्।

पुमान्पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः।

इति स्त्र्यवयवानां दुहितृषु बाहुल्यात् स्त्रीधनं दुहितृगामि। पितृधनं पुत्रगामि, पित्रवयवानां पुत्रेषु बाहुल्यादिति।

तत्र च गौतमेन विशेषो दर्शितः, स्त्रीधनं दुहि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तृणामप्रत्तानामप्रतिष्ठितानां चेति।

अस्यार्थः। प्रत्ताऽप्रत्तासमवायेऽप्रत्तानामेव स्त्रीधनम्। प्रत्तासु चाप्रतिष्ठितप्रतिष्ठितासमवायेऽप्रतिष्ठितानां चेति। अप्रतिष्ठिता निर्धनाः।

मि॰ दुहित्रभावे मातृधनमृणावशिष्टं को गृह्णीयादित्यत आह।

या॰ ताभ्य ऋतेऽन्वयः ॥ ११७ ॥

मि॰ ताभ्यो दुहितृभ्यो विना दुहितॄणामभावे अन्वयः पुत्रादिर्गृह्णीयात्। एतच्च विभजेरन् सुताः पित्रोरूर्ध्वमित्यनेनैव सिद्धं स्पष्टार्थमुक्तम् ॥ ११७ ॥

बा॰ १। एवं पितरि जीवति विभागस्य कालत्रयमुक्तम्। अस्य पितरि जीवतीत्येतत्तात्पर्येणोक्तवचनेनैव सङ्ग्रहः। अधुना तन्मरणानन्तरमपि चतुर्थो विभागकालः तत्र संमतिमाह यथाहेति इति प्रतिपादकं मूलमवतारयति—

२। *इदानीमिति। तत्कथनानन्तरमित्यर्थः। एवं च मुनिना तेषां द्विधैव सङ्ग्रहः कृतः, पितृजीवनोपलक्षितः तन्मरणोपलक्षितश्च। तत्र पितरि जीवतीत्यत्र त्रयः पक्षाः पित्रिच्छा तदनिच्छा च अन्त्याऽप्युक्तरीत्या द्विधेति बोध्यम्। सर्वे वा स्युः समांशिन इत्यनेनापि सूचितामिदम्। अतस्तत्र पक्षद्वयं समविभागे एवेति बोध्यम्। तृतीयेऽपि पूर्वतो विशेषमाह *नियमं चाहेति। पिता च पिता चेत्यर्थनिरासायाह *मातेति। ऊर्ध्वमित्यस्य साकाङ्क्षत्वादाह * प्रायणादिति। मरणादित्यर्थः। *सुता इति। अत्रापि प्राग्वत् सुतश्च सुतौ च सुताश्चेत्येकशेषो बोध्यः। पितृव्यादिर्तो विभागे आद्योपयोगो बोध्यः। कन्याद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विशेषस्य वक्ष्यमाणत्वादत्र पूर्वत्र च न कन्याया ग्रहणमिति बोध्यम्। ननु एवकाराभावेन तावन्मात्रोक्त्या कथं नियमलाभः अतो नियमस्वरूपमेव निष्कृष्याह * सममेवेतीति। सर्वं वाक्यमिति न्यायेनेति भावः। अभेदभ्रमनिरासाय वक्ष्यमाणार्थसिद्धये च व्याचष्टे * रिक्थमिति।

३। ननु जीवद्विभागे आद्यपक्षे मूलेन विषमविभाग उक्तः, पित्रोरूर्ध्वं विभागे मन्वादिभिः स उक्त इति तयोरुभयप्रामण्याद्विकल्पे समविषमविभागयोर्न्याय्ये सममित्यस्य सममपीत्येव व्याख्यानमुचितं न तु सममेवेतीति। तथा च प्रकारनियमपरतया व्याख्यानमयुक्तमिति शङ्कते *ननूर्ध्वमित्यादिना। नियम्यते इत्यन्तेन। *ऊर्ध्वमिति। प्रागुक्तमिदं तस्य तदूर्ध्वत्वप्रतिपादकमिह लिखितम्। एवमग्रेऽपि। *पित्र्यं, पितुरागतम्। *अशेषतः, सार्वविभक्तिकः प्रथमान्तात्तासिः। *शेषाः, ज्येष्ठभिन्नाः। *उपजीवेयुः, पितृवत्तस्यानुसरणं कुर्युः। इदं ज्येष्ठेन जातमात्रेणेति च मानवं,

७ बिभृयादिच्छतः सर्वान् ज्येष्ठो भ्राता यथा पिता।
भ्राता शक्तः कनिष्ठो वा शक्त्यपेक्षा कुलस्थितिः॥
सर्वेच्छया कनिष्ठोऽपि शक्तः सन् बिभृयात् परान्।

इति नारदात् इच्छाविषयकम्। एवं च मानवे ज्येष्ठत्वमुपलक्षणम्। इदं व्याचष्टे * सर्वस्मात् द्रव्यसमुदायादिति। विभजनीयादित्यर्थः। उद्धार इति शेषः। कर्मणि घञ्। उद्ध्रियमाण इति तदर्थः। योगरूढोऽयम्। तस्य मध्यमणिन्यायेनाग्रेऽप्यन्वय इति। चादिस्वारस्यादाह*सर्वेति। यद्यपि स्यादित्यपकर्षेणान्वयस्तत्र तथापि फलितमाह *ज्येष्ठायेति। तत्कर्तृभिरुदासीनैरित्यर्थः। मिथो वा। *इतीति। तथोक्त्वा इत्यर्थकेन तेन मानवेन ततस्तथा कुर्वतां स दर्शित इत्यर्थः। एवमग्रेऽपि। ततोऽव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिष्टं द्रव्यं सर्वे समं विभज्य गृह्णीयुरिति भावः। प्रकारान्तरेण मनूक्तमेव विषमविभागमाह * तथेत्यादिविभजतामित्यन्तेन। तथेत्यस्य दर्शित इत्यत्रान्वयः। * एषां, ज्येष्ठादीनाम्। * इयं, वक्ष्यमाणा। अस्य व्याख्या * ज्येष्ठस्येति। इदमपि प्रकरणाज्ज्येष्ठादेः कर्तृत्वाच्च तदनन्तरपरमेवेत्याह *पित्रोरिति। नन्वेवमपि मूलानुक्तत्वान्नास्ति तत्र विषमविभाग इत्याशङ्कायां दृष्टान्ततयाऽऽह * जीवदिति। एतेनास्यात्रानुपयोग इत्यपास्तम्। * स्वयमेव, मूलकृतैव। एवंच मूलकृतः स नैवेष्टः क्वापीति दुर्वचमित्येतत्तात्पर्यकमिदामिति स्मार्तत्वाविशेषाद्विनिगमनाविरहात्तत्र तदभावो दुर्वचः। तदाह * अतइति।

४। सत्यमित्यादिना तत्सत्ताऽङ्गीकृतेत्यसत्त्वलक्षणमप्रामाण्यं निरस्तं यद्यपि तथाप्यननुष्ठानलक्षणमप्रामाण्यमेवेत्याह * लोकेति। ननु तस्य लोकविद्विष्टत्वेऽपि लोकतः शास्त्रस्य प्राबल्यात्कथमननुष्ठेयत्वम् अत आह *अस्वर्ग्यमिति। धर्म्यमपि लोकविद्विष्टं नाचरेत्, यतोऽस्वर्ग्यं तदित्यर्थः। अस्वर्ग्यत्वं तदभावे हेतुः। एवं च शास्त्रेणैव तथोक्तत्वान्नानुष्ठानं तस्येति भावः। अत्र स्मार्त्तं दृष्टान्तमाह * यथेति। मौलमेवेदम्। श्रौतं तमाह * यथावेति। मित्रावरुणदेवताकां वशां वन्ध्याम् अनूबन्ध्यां गामालभेतेत्यर्थः। इयमनूबन्ध्येष्टिरापस्तम्बेन सोमे उदवसानीयोत्तरमाम्नाता। सांप्रतं तेनैव तत्स्थाने आमिक्षाया उक्तत्वात्तदनुष्ठानं याज्ञिकानामिति बोध्यम्।

५। एवं सामान्येनोक्तविषमविभागाभावः कलावेव न तु पूर्वत्र दृष्टान्तबलेन तथैव लाभादिति सूचयन्सोद्धारविषमविभागः कलिनिषिद्धोऽपीति प्रतिपादयन् उक्तश्रौतस्मार्त्तदृष्टान्तयुतं विषमविभागप्रतिषेधकं स्मार्त्तभाट्टवचनमप्याह * उक्तं चेति। नियं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गो विधिः। यथाऽन्यः श्रौतान्यो विधिवाक्यविहितधर्मो महोक्षाद्यालम्भनरूपो नेत्यर्थः। नेत्यस्योभयत्रान्वयः। धर्मो नो इति पाठान्तरे नियोगधर्मोऽपुत्रां गुर्वनुज्ञात इत्यादिविहितो देवरादितः सुतोत्पत्तिरूपो बोध्यः। नो इति निषेधे। * अनूबन्ध्येति। वशालम्भनरूप इत्यर्थः। अपि वेति समुच्चये। * तथोद्धारेति। सोद्धारेत्यर्थः। अपिना द्वितीयसंग्रहः। * सम्प्रति, कलौ। अत एव माधवीये ब्रह्मपुराणम्,

ऊढायाः पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा।
कलौ पञ्च न कुर्वीत भ्रातृजायां कमण्डलुम्॥ इति।

आपस्तम्बोऽपीत्यस्य निराकृतवानित्यत्रान्वयः। यदपि जीवन्नित्यतः प्राक् एकधनेन ज्येष्ठं पुत्रं तोषयित्वेत्युक्तं तथापि न तद्विषमांशपरं किन्तु तत्परितोषपरम्। अत एवैकेन प्रधानेन केनचिद्धनेन गवादिना ज्येष्ठं पुत्रं तोषयित्वा तृप्तं कृत्वेति व्याख्यातम्। तदेतदभिप्रेत्याह * स्वमतमिति। क्षीबमुन्मत्तं च परिहाप्य पुत्राभावे यः प्रत्यासन्नः सपिण्डः तदभावे आचार्य आचार्याभावेऽन्तेवासी हृत्वा तदर्थं धर्मकृत्येषु चोपयोजयेद् दुहिता वा सर्वाभावे राजा दायं हरेतेत्युक्त्वा चेति शेषः। *कृत्स्नेति। अत्र संवादी ज्येष्ठ एवेति मनुः प्रागुक्त एव। गौतमोऽपि, सर्वं वा पूर्वस्य स चेतरान् बिभृयादिति। * देशेत्यादि। कास्मिंश्चिद्देशविशेषे। सुवर्णं कृष्णा गावः कृष्णभौमम् कृष्णं भूमौ जातं भौमं धान्यमाषादि। कृष्णायसमित्यन्ये। इदं सर्वं ज्येष्ठस्य पुत्रस्यांशः। रथः यत् गृहे परीभाण्डमुपकरणं पीठादिकं तदपि पितुरंशः। धृतोऽलंकारो भार्याया अंशः। ज्ञातिभ्यः पित्रादिभ्यश्च यद्धनं लब्धं तच्च भार्याया अंश इत्येके मन्यन्ते इति हरदत्तः। * विप्रतिषिद्धं, विरुद्धम्। * स्वयमेव, आपस्तम्ब एव। * मनुरिति। तैत्तिरीय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रुतिवाक्यमिदम् । तत्र पुत्रेभ्य इति बहुवचननिर्देशाद्दायमित्ये-कवचननिर्देशाच्चाविशेषेण श्रवणमित्यर्थः । किञ्च तदग्रे अथापि तस्माज्ज्येष्ठं पुत्रं धनेन निरवसाययतीत्येकवच्छ्रूयते अथापि नित्यानुवादमविधिमाहुर्न्यायविद इत्युक्तम् ।

६। सिद्धान्तमुपसंहरति * तस्मादिति । * श्रुतीति । म-नुरितिश्रुतीत्यर्थः । * सममेवेति । अतएव जीवद्विभागे स ए-वोत्तरपक्षत्वेनोक्तः स एवाग्रेऽवलम्बितश्च । ज्येष्ठं वेति तु त-द्द्युगान्तरविषयकम् ।

जीवद्विभागे तु पिता नैकं पुत्रं विशेषयेत् ।
निर्भागयेन्नचैवैकमकस्मात् कारणं विना ॥

इति कातीयमप्यत्रानुकूलम् । अतएव न्यूनाधिकेति प्रागु-क्तस्य नारदादेश्च तथा कर्त्तव्यत्वे न तात्पर्यं किंतु यदि विशेषाद-र्शी शास्त्रोक्तिमात्रेण दैवात्पिता शास्त्रोक्तप्रकारेण विषमविभागं करोति तदा न निवर्त्तते इत्यत्र तात्पर्यम्।परमतात्पर्यं तु प्रागु-क्तमेव व्याख्यात्रेति न तद्विरोध इति बोध्यम् ।

७। यद्यप्यत्र पित्रोरूर्ध्वमित्युक्तं,मानवेऽपि ऊर्ध्वं पितुश्च मातु-श्चेत्युक्तम्, इत्युभयमरणानन्तरकाल एव लभ्यते, प्रत्येकमरणान-न्तरमित्यर्थे तु पितरि जीवति मातृमरणोत्तरमपि विभागापत्तिः, तथापि तथाच पितरि मृते मातरि सत्याम् इष्टविभागानापत्तिः, तथापि प्रागुक्तयथाश्रुतगौतमात् पितुरूर्ध्वमिति वक्ष्यमाणमूलाच्च पितृमर-णमेव मुख्यं निमित्तम् । अन्वाचयशिष्टं मातृमरणम्।एवं च पितृ-मरणं मातृसत्त्वासत्त्वात् द्विविधमपि प्रमीतपितृकत्वेन गृह्यते इति तत्परमिदमिति न वक्ष्यमाणविरोधः । यथाचाद्येन तत्तात्पर्येण त्रयाणां संग्रहः तथाऽनेनद्वयोः अतएव जीवत्पितृकविभागः प्रमी-तपितृकाविभागश्चेति द्वैधैवाभियुक्तव्यवहारो न तु प्रमीतमातृकइति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तृतीयोऽपि। न चानीशास्ते हि जीवतोरिति मानवे उक्तत्वादुभयमरणयोरेव निमित्तत्वलाभ इति तदेकवाक्यतया यथाश्रुतमूलसौष्ठवे कथं तत्परत्वमिति वाच्यम् । सर्वथा ऽन्यथादुष्परिहरवक्ष्यमाणविरोधपरिहाराय जायापत्योरित्याद्यापस्तम्बस्य धनविभागसत्त्वेऽपि पुत्रवत्पृथक्करणाभावे अर्धाङ्गत्वेन सर्वत्र सहत्वेन तात्पर्यस्य प्रागुक्तत्वेन तद्रीत्या पुत्रतः पत्न्या अन्तरङ्गत्वेन तस्या अपि तद्वत्साधारणस्वत्वेन मातृसत्त्वे विभागाभावे यथेष्टविनियोगे स्वामित्वाभावस्तेषामिति मनुतात्पर्यात् । अयमेवाशयः पित्रोरूर्ध्वमिति वदतो मूलस्यापि। अस्वतन्त्राः पितृमन्तो मातर्यप्येवमेवेति शङ्खस्यापि ।

पितर्युपरते पुत्रा विभजेरन् पितुर्धनम् ।

अस्वाम्यं हि भवेदेषां निर्दोषे पितरि स्थिते ॥

इति देवलात् । यद्वा पितरि जीवति आस्तां तत् तदर्जितविषयम्।एवं मातरि सत्यां तद्धनाविषयम्। किञ्च पित्रोरित्यस्याग्रे फलमनुपदं वक्ष्यते। एतेन दंपत्योर्धनविभागो नास्ति प्रागापस्तम्बेनानुक्तत्वादिति हरदत्तोक्तमपास्तम्। एवं च पितरि मृते मातरि सत्यामपि विभागोऽस्त्येव। परं तु न स मात्रिच्छयेति न तस्यास्तत्र कदापि कर्त्रीत्वमिति बोध्यम् ।

८। तदयमर्थः। जीवद्विभागे त्रयः कालाः। पितुरिच्छा द्विविधा यदेति द्वौ। आद्ये पिता कर्ता, तदन्ययोः पुत्रः सः। अंशसाम्यं सर्वत्र। आद्ये मातुः पितुश्च समांशौ, एवं तदन्ययोरपि। तत्र मातुः स्त्रीधनादाने। दत्तेत्वर्द्धम् । मृतविभागे द्वौ कालौ मातृसत्त्वासत्त्वाभ्याम् । तत्र कर्ता पुत्रः। अंशसाम्यमेव । आद्ये मातुरपि समांशः । सर्वथा मातुरिच्छा न नियामिका, नापि तस्याः कर्तृत्वम् । इदमपि अस्थावरविषयं,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुद्धस्वार्जितविषयं, पैतामहमिश्रस्वार्जितविषयं च । शुद्धपैतामहे तु विशेषो वक्ष्यमाण इति न तत्र मातुरंश इति ।

९। तथाच प्रमीतपितृकाविभागः क्रमागतस्य पित्रर्जितरहितस्य, तन्मिश्रस्य, शुद्धपित्रर्जितस्य वा धनस्येति त्रेधा । पित्रर्जितस्यापि पाणिग्रहणतः पूर्वमूर्ध्वं वेति द्विधा । तत्राद्ये तद्विभागव्यवस्थावाक्येषु—

पैतृके न विभागार्हाः सुताः पितुरनिच्छतः ।
क्रमागते गृहे क्षेत्रे पितापुत्राः समांशिनः ॥
न तत्पुत्रैर्भजेत्सार्द्धमकामः स्वयमार्जितम् ।
इति गौतमीये--
द्रव्ये पितामहोपात्ते स्थावरे जंगमेऽपिवा ।
सममंशित्वमाख्यातं पितुः पुत्रस्य चैवहि ॥
पैतामहं हृतं पित्रा स्वशक्त्या यदुपार्जितम् ।
विद्याशौर्याद्यवाप्तं च तत्र स्वाम्यं पितुः स्मृतम् ॥
प्रदानं स्वेच्छया कुर्याद्भोगं चैव ततो धनात् ।
तदभावे तु तनयाः समांशाः परिकीर्तिताः ॥

इति बार्हस्पत्येषु च पुत्राणामेव पित्रा सह भोगितया निर्देशात् तदन्यविभागपरयोरेव "यदिकुर्यात्" "पितुरूर्ध्वम्" इत्यनयोर्वाक्ययोर्मातुर्विभागश्रवणाच्च माता न विभागहरणार्हा । युक्तंचैतत्, विभागशब्दो हि भावव्युत्पत्त्या रूढ्या चान्यस्वाम्यसहभावेन वि भजनीयार्थसामान्यास्थितस्य स्वस्वाम्यस्य तदसहभावेन तदेकदेशे व्यवस्थापनमभिधत्ते । श्वशुरादिधने च स्नुषादीनां न जन्मतः स्वाम्यम् । मिथः संबन्धस्य प्रागभावात् । भाविन एव तस्य जन्मान्तरसाधारण्येनातिप्रसङ्गकत्वात् । नापि पाणिग्रहणतः उत्तरपरिग्रहे एव ततः साहित्यसिद्धेः । नापि भर्तुर्मरणतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्य तदजनकत्वात्। तत्त्वे वा पुत्रस्वाम्येन प्रतिबन्धात्। अन्यथाऽपुत्रस्वपितृव्यपत्नीनां पौत्राणां च मिथो विभागप्रसक्तेरनेकपितृकाणामिति मूलं विरुध्येत। अतएव पाणिग्रहणतः प्राक् पित्रर्जिते द्रव्येऽपि न मातुर्विभागः। सममंशं हरेदिति सिद्धस्वाम्यस्यैव हरणप्रतीतेः। असिद्धस्वाम्ये हि दद्यादाप्नुयादित्यादिकमेव युक्तमिति बोध्यम्। स्थावरे उभयविधेपिं सत्सु पुत्रेषु तत्स्वाम्यस्य वक्ष्यमाणदिशाऽपायसंभवाच्चेति केचित्।

१०। ऊर्ध्वं तु पित्रर्जितं स्थावरमस्थावरं चेति द्विधा। तत्र केचित्। तत्र यद्यपि माताऽप्यंशं समं हरेदिति उभयसाधारणं तथापि न दत्तं स्त्रीधनमित्यस्यात्राप्यन्वयादस्थावरे एव पर्यवस्यति। तथाहि। कारककविभक्तिस्तावन्नैरपेक्ष्यं गमयत्युत्सर्गत इति सर्वसंमतम्। एवं भर्त्रा श्वशुरेण वा निरपेक्षेण यस्यै न दत्तोंऽशः सा अंशं हरेदित्युक्तौ यस्यै निरपेक्षेणामुनाऽमुना वा यद्दत्तं तस्याः स एव तादृशो भागो नान्य इत्युक्तं भवति। सोऽयं यदि पुत्रांशेन समस्तदा पूर्वं दत्तोऽप्यसाविदानीं वैभागिको भवति। यद्याधिकस्ततस्तदा तत्सम एव वैभागिको ऽधिकस्तु दत्त एव। अतएवाऽननुमतदत्ते तस्मिन् आकिञ्चित्करतयाऽस्थितस्य पुत्रस्वामित्वस्य पुत्रांशसमानादेवांशादिदानीं निवृत्तिर्नत्वधिकारात्। यदि न्यूनस्तदा मात्रन्तरेण अवैषम्याय तादृशेन विभाज्यद्रव्येण समः कार्यः। अत्र च दत्ते त्वर्द्धं प्रकल्पयेदित्यस्य दत्तं यथा समम् अंशान्तरेण भवति तथा अंशतामापन्नं कुर्यादित्यर्थः। एवं च माता सममंशं हरेदित्यस्य पुत्रस्वाम्यासंस्पृष्टस्वाम्यकं कुर्यादित्यर्थः। तत्र स्थावरस्यायोग्यत्वादकर्मत्वम्। "भर्त्राप्रीतेन" "मणिमुक्ता" "पितुः प्रसादात्" "स्थावरं द्विपदम्" इति व्याख्यातुक्तवाक्येभ्यः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सौदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकीर्तितम् ।
विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि ॥
भर्तृदायं मृते पत्यौ विन्यसेत्स्त्री यथेष्टतः ।
विद्यमाने तु संरक्षेत् क्षपयेत्तु कुलेऽन्यथा ॥
अपुत्रा शयनं भर्तुः पालयन्ती गुरौ स्थिता ।
भुञ्जीतामरणं दान्ता दायादा ऊर्ध्वमाप्नुयुः ॥

इति कातीयाच्च जीवत्सु पुत्रेषु क्रमागते इव पित्रार्जितेऽपि स्थावरे तत्स्वाम्यस्य सर्वथा निवृत्तेरवगमात् कालान्तरे स्वाम्यान्तरोत्पत्तौ गौरवात् । एवं सति च दानविक्रययोरनुत्पत्तिमीदृग्विधे विषये न दानं नच विक्रय इत्यादीन्यनुवदन्तीत्यपि लाघवम् । अन्यथा निषेधं कुर्वन्त्यतिक्रमे दुरितकल्पकानि स्युः ।

११। गौतमोऽपि, मातरः पुत्रभागानुसारभागहारिण्योऽनूढाश्च दुहितर इत्यत्र सुसदृशपर्यायं समशब्दमपहाय मन्दसदृशपर्यायमनुसारशब्दं प्रयुञ्जन् ऊढां दुहितरं च समुच्चिन्वन्नमुमर्थं द्योतयति स्म । मन्दसादृश्यस्यानूढासंस्कारस्य चास्थावरेणैव निर्वाहात् । मन्दसादृश्यमपि भागिभेदाद्भिद्यते इत्याह—

अङ्गिरा व्यासश्च,

तदभावे तु जननी तनयांशसमांशिनी ।
समांशा मातरस्त्वेषां तुरीयांशा च कन्यका ॥
असुतास्तु पितुः पत्न्यः समानांशाः प्रकीर्तिताः ।
पितामह्यश्च ताः सर्वा मातृतुल्याः प्रकीर्तिताः ॥ इति ।

जननी सवित्री। मातरोऽनपत्याः। कन्यकाऽनूढा भ्रातृभागचतुर्थांशं संस्काराय लभते इत्यर्थः। पितुरूर्ध्वमित्यत्र मातुऽनपत्येति हलायुधः।

१२। आपस्तम्बश्च, स्त्रियो भर्तुर्मातुः पुत्रेभ्यश्च भागं नेच्छन्ती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यादिकं तु साम्प्रतव्यवहारविरुद्धम्। इत्थंच पत्न्यः कार्या इत्यादावपि स्थावरे भर्तृधने पत्न्याः पुत्रैः सह विभागासंभवादंशशब्दः स्थावरान्यपर एवेति न स्थावरांशः पत्न्याः। भर्तृदायो भर्तृस्वत्वेन स्त्रीस्वत्वाश्रयो द्रव्यम्। तच्च द्विधा। मृते भर्तर्यधिकार्यन्तराभावात्स्त्रीस्वत्वाश्रयो, जीवत्येव भर्तरि तत्संबन्धाश्रयेण वा स्त्रीस्वत्वाश्रयः। तत्र प्रथमे स्थावरादन्यद्भियुञ्जीत गुरुसमीपे स्थिता भर्तुः शय्यां पालयन्ती समयं क्षिपेत्। स्थावरमाधिकृत्याह भुञ्जीतामरणादथ दायादा आप्नुयुः। द्वितीये त्वाह विद्यमाने तु संरक्षेत् व्यये भर्तुरनुज्ञां पालयन्ती तद्धनरक्षां कुर्यादिति कातीयं व्याकुर्वन्प्रकाशकारोऽप्यमुमेवार्थमनुमन्यतेस्मेत्याहुः। वस्तुतस्तु मूलाशुद्ध्या सर्वमशुद्धमित्युभयत्र तुल्यतैवेत्युक्तम्। स्फुटीभविष्यति चाग्रे इति दिक्॥

उ० १३। सङ्गतिमाह *मातेति। अनुवृत्त्या व्याचष्टे *मातुरिति। प्रकृतत्वादाह * मातृकृतेति। एतेन—

पुत्रः कनिष्ठो ज्येष्ठायां कनिष्ठायां च पूर्वजः।
कथं तत्र विभागः स्यादिति चेत्संशयो भवेत्॥
एकं वृषभमुद्धारं संहरेत स पूर्वजः।
ततोऽपरे ज्येष्ठवृषास्तदूनानां स्वमातृतः॥
ज्येष्ठस्तु जातो ज्येष्ठायां हरेद् वृषभषोडशाः।
ततः स्वमातृतः शेषा भजेरन्निति धारणा॥
सदृशस्त्रीषु जातानां पुत्राणामविशेषतः।
न मातृतो ज्यैष्ठ्यमस्ति जन्मतो ज्यैष्ठ्यमुच्यते॥
जन्मज्येष्ठेन चाह्वानं सुब्रह्मण्यास्वपि स्मृतम्।
यमयोश्चैव गर्भेषु जन्मतो ज्येष्ठता स्मृता॥
इति मानवम्, (अ० ९।१२२।१२३।१२४।१२५।१२६)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समानजातिसंख्या ये जातास्त्वेकेन सूनवः ।
विभिन्नमातृकास्तेषां मातृतो भागकल्पना ॥

इति व्यासीयम्,

यद्येकजाता बहवः समाना जातिसंख्यया ।
सापत्नास्तैर्विभक्तव्यं मातृभागेन धर्मतः ॥

इति बार्हस्पत्यम्,

सवर्णा भिन्नसंख्या ये स्वभागस्तेषु शस्यते ।

इत्यौभयं च युगान्तरविषयमिति सूचितम् । एतेनोद्धारं विना समांशबाधकत्वेन विषमांशपरतया व्यासपादादेर्व्याख्यानमर्वाक्कादपास्तम् । स्मृत्यर्थाज्ञानात् ।

१४। नन्वस्य तदपवादत्वे शेषमृणादिति व्यर्थम् । नच मात्रंशे तत्साफल्याय तदुपादानमिति वाच्यम् । ताभ्य ऋते इत्येकवाक्यतया तस्य दुहित्रभावविषयतया साफल्यात् । अत आह *अतश्चेति । तद्विशेषेणोक्तेश्चेत्यर्थः । ऋणापाकरणावशिष्टमातृधनेऽपवादवशात् दुहितृसत्त्वे तत्संबन्धित्वलाभेन पुत्रकर्तृकविभागानर्हत्वेऽपि समत्वे न्यूनत्वे चावशेषाभावेनापवादाप्रवृत्त्या दुहितॄणां विद्यमानत्वेऽप्यनाधिकारात्तत्र सामान्यवचनस्यैव प्रवृत्तिरिति भावः । ननु दुहितृषु सतीषु ऋणावशिष्टं तत्पुत्रविभागानर्हं, तथा सति समं न्यूनं च सुतरां पुत्रविभागानर्हं तस्यावश्यदेयत्वात्, अत आह *एतादिति । एवं च तैरेव गृहीतस्वं ऋणं देयमिति भावः । एवं वाचनिकं वैषम्यं स्मृत्यन्तरलभ्यं युक्त्या समर्थयते *युक्तमिति । शुक्ले इत्यस्योभयत्रान्वयः । एतेन वैरीत्यादिशङ्का निरस्ता । एवं चास्य तन्मरणोत्तरं पुत्रादिकर्तृकवि- तद्विषयत्वेन पितरि जीवति पुत्रकर्तृकविभागवन्मातरि जीवति तद्वज्जन्मतः स्वत्वेऽपि दुहितृकर्तृको न विभागो नापि मातृकर्तृको वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाभावात् किंतु तया स्वेच्छया यद्दत्तं तत्तदीयमेव । अतएव वक्ष्यति पितृभ्यां यस्येति । भार्याधनमविभाज्यमिति प्रागुक्तं तु तत्पद-स्वारस्यात् पतिकर्तृकविभागविषयकमिति न विरोधः । तमभिप्रेत्य विशेषमाह *तत्रचेति । दुहितृविषयेऽपीत्यर्थः । ननु दुहितृणा-मित्यस्योक्ततुल्यार्थत्वेन सामान्येन तेनैव सिद्धेः प्रत्तानामित्यादि व्यर्थमिति कथमस्य विशेषबोधकत्वमत आह *अस्यार्थः प्रत्तेति । प्रत्ता विवाहिता । अप्रत्ताऽनूढा । प्रतिष्ठिता सधना । अप्रतिष्ठिता निर्धना । तथाच तत्रापि विशेषबोधकत्वान्न वैयर्थ्यमिति भावः। एवार्थचशब्दस्योभयत्रान्वयह इत्याह * एत्रेति ।

च० १५। शङ्कते *दुहित्रिति *क इति।सामान्यवचनं त्वन्यविषय-कमिति नात्र प्रवृत्तिरिति मन्यते।पदार्थमुक्त्वा वाक्यार्थमाह *दु-हितृणामिति । सूचितमेवाह * एतच्चेति । *सिद्धमिति। अर्था-त्सिद्धमित्यर्थः । तद्वदयमपि तस्यैव विषय इति भावः ॥११७॥

मि० अविभाज्यमाह ।

या० पितृद्रव्याविरोधेन यदन्यत्स्वयमर्जितम् ।
मैत्रमौद्वाहिकं चैव दायादानां न तद्भवेत् ॥ ११८ ॥
क्रमादभ्यागतं द्रव्यं हृतमप्युद्धरेत्तु यः ।
दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च ॥ ११९ ॥

मि० मातापित्रोर्द्रव्याविनाशेन यत्स्वयमर्जितं—मैत्रं मित्रसकाशाद्यल्लब्धम्, औद्वाहिकं विवाहलब्धं, दा-यादानां भ्रातॄणां तन्न भवति ।

क्रमात् पितृक्रमादायातं यत् किञ्चित् द्रव्यम् अन्यै-र्हृतम् असामर्थ्यादिना पित्रादिभिरनुद्धृतं यः पुत्राणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मध्ये इतराभ्यनुज्ञयोद्धरति तत् दायादेभ्यो भ्रात्रादिभ्यो न दद्यात्। उद्धर्तैव गृह्णीयात्। तत्र क्षेत्रे च तुरीयांशमुद्धर्त्ता लभते शेषं तु सर्वेषां सममेव।

यथाह शङ्खः,

पूर्वं नष्टां तु यो भूमिमेकश्चेदुद्धरेत्क्रमात्।
यथाभागं लभन्तेऽन्ये दत्त्वांऽशं तु तुरीयकम्॥ इति।

क्रमात्, अभ्यागतामिति शेषः। तथा विद्यया वेदाध्ययनेनाध्यापनेन वेदार्थव्याख्यानेन वा यल्लब्धं तदपि दायादेभ्यो न दद्यात्। अर्जक एव गृह्णीयात्।

अत्र च पितृद्रव्याविरोधेन यत्किञ्चित्स्वयमर्जितमिति सर्वशेषः। अतश्च पितृद्रव्याविरोधेन यन्मैत्रमर्जितं, पितृद्रव्याविरोधेन यदौद्वाहिकं, पितृद्रव्याविरोधेन यत्क्रमादायातमुद्धृतं, पितृद्रव्याविरोधेन विद्यया यल्लब्धमिति प्रत्येकमभिसंबध्यते। तथा च पितृद्रव्यविरोधेन प्रत्युपकारेण यन्मैत्रम्, आसुरादिविवाहेषु यल्लब्धम् औद्वाहिकं, तथा पितृद्रव्यव्ययेन यत्क्रमायातमुद्धृतं, तथा पितृद्रव्यव्ययेन लब्धया विद्यया यल्लब्धं, तत् सर्वं भ्रातृभिः पित्रा च विभजनीयम्। तथा। पितृद्रव्याविरोधेनेत्यस्य सर्वशेषत्वादेव पितृद्रव्याविरोधेन प्रतिग्रहलब्धमपि विभजनीयम्। अस्य च सर्वशेषत्वाभावे मैत्रमौद्वाहिकमित्यादि नारब्धव्यम्। अथ पितृद्रव्याविरोधेनापि यन्मैत्रादिलब्धं तस्याविभाज्यत्वान्मैत्रादिवचनमर्थवदित्युच्यते। तथा सति समाचाराविरोधः, विद्यालब्धे—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नारदवचनविरोधश्च। (व्य० प० १३।१०)

कुटुम्बं बिभृयाद् भ्रातुर्यो विद्यामधिगच्छतः।
भागं विद्याधनात्तस्मात्स लभेताश्रुतोऽपि सन्॥ इति।

तथा, विद्याधनस्याविभाज्यस्य लक्षणमुक्तं—कात्यायनेन,

परभक्तोपयोगेन विद्या प्राप्ताऽन्यतस्तु या।
तया लब्धं धनं यत्तु विद्याप्राप्तं तदुच्यते॥ इति।

तथा, पितृद्रव्याविरोधेनेत्यस्य भिन्नवाक्यत्वे प्रतिग्रहलब्धस्याविभाज्यत्वमाचाराविरुद्धमापद्येत। एतदेव स्पष्टीकृतम्—

मनुना, (अ. ९ श्लो. २०८)

अनुपघ्नन् पितृद्रव्यं श्रमेण यदुपार्जयेत्।
दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च॥ इति।

श्रमेण सेवायुद्धादिना।

ननु पितृद्रव्याविरोधेन यन्मैत्रादिलब्धं द्रव्यं तत् अविभाज्यमिति न वक्तव्यम्। विभागप्राप्त्यभावात्। यद्येन लब्धं तत्तस्यैव नान्यस्येति प्रसिद्धतरम्। प्राप्तिपूर्वकश्च प्रतिषेधः।

अत्र काश्चिदित्थं प्राप्तिमाह।

यत्किञ्चित्पितरि प्रेते धनं ज्येष्ठोऽधिगच्छति।
भागो यवीयसां तत्र यदि विद्यानुपालिनः॥

इति ज्येष्ठो वा कनिष्ठो वा मध्यमो वा पितरि प्रेते अप्रेते वा यवीयसां वर्षीयसां चेति व्याख्यानेन पितरि सत्यसति च मैत्रादीनां विभाज्यत्वं प्राप्तं प्रतिषिध्यते इति। तदसत्। न ह्यत्र प्राप्तस्य प्रतिषे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धः। किन्तु सिद्धस्यानुवादोऽयम्। लोकसिद्धस्यैवानुवादकान्येव प्रायेणास्मिन्प्रकरणे वचनानि।

अथवा,

समवेतैस्तु यत्प्राप्तं सर्वे तत्र समांशिनः।

इति प्राप्तस्यायमपवाद इति सन्तुष्यतु भवान्। अतश्च यत्किञ्चित्पितरि प्रेते इत्यस्मिन्वचने ज्येष्ठादिपदाविवक्षया प्राप्तिरिति व्यामोहमात्रम्। अतो मैत्रादिवचनैः पितुः प्रागूर्ध्वं वा ऽविभाज्यत्वेनोक्तस्य यत्किञ्चित्पितरि प्रेते इत्यपवाद इति व्याख्येयम्। तथाऽन्यदप्यविभाज्यमुक्तम्—

मनुना, (अ. ९ श्लो. २१९)

वस्त्रं पत्रमलङ्कारं कृतान्नमुदकं स्त्रियः।
योगक्षेमं प्रचारं च न विभाज्यं प्रचक्षते॥ इति।

धृतानामेव वस्त्राणामविभाज्यत्वम्। यद्येन धृतं तत्तस्यैव। पितृधृतानि तु पितुरूर्ध्वं विभजतां श्राद्धभोक्त्रे दातव्यानि।

यथाह बृहस्पतिः,

वस्त्रालङ्कारशय्यादि पितुर्यद्वाहनादिकम्।
गन्धमाल्यैः समभ्यर्च्य श्राद्धभोक्त्रे समर्पयेत्॥ इति

अभिनवानि तु वस्त्राणि विभाज्यान्येव। पत्रं वाहनमश्वशिबिकादि, तदपि यद्येनारूढं तत्तस्यैव पित्र्यं तु वस्त्रवदेव। अश्वादीनां बहुत्वे तु तद्विक्रयोपजीविनां विभाज्यत्वमेव। वैषम्येणाविभाज्यत्वं ज्येष्ठस्य। (अ. ९ श्लो. ११९)

अजाविकं सैकशफं न जातु विषमं भजेत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अजाविकं सैकशफं ज्येष्ठस्यैव विधीयते ॥

इति मनुस्मरणात्। अलङ्कारोऽपि यो येन धृतः स तस्यैव। अधृतः साधारणो विभाज्य एव।

(मनु० अ० ९ इलो० २००)

पत्यौ जीवति यः स्त्रीभिरलङ्कारो धृतो भवेत्।
न तं भजेरन्दायादा भजमानाः पतन्ति ते ॥

इति। अलङ्कारो धृतो भवेदिति विशेषेणोपादानादधृतानां विभाज्यत्वं गम्यते। कृतान्नं तण्डुलमोदकादि तदप्यविभाज्यं यथासम्भवं भोक्तव्यम्। उदकं तूदकाधारः कूपादिः। तच्च विषमं मूल्यद्वारेण न विभाज्यं, पर्यायेणोपभोक्तव्यम्। स्त्रियश्च दास्यो विषमा न मूल्यद्वारेण विभाज्याः पर्यायेण कर्म कारयितव्याः। अवरुद्धास्तु पित्रा स्वैरिण्याद्याः समा अपि पुत्रैर्न विभाज्याः। स्त्रीषु च संयुक्तास्वविभाग इति गौतमस्मरणात्। योगश्च क्षेमश्च योगक्षेमम्। योगशब्देनालब्धलाभकारणं श्रौतस्मार्ताग्निसाध्यमिष्टं कर्म लक्ष्यते। क्षेमशब्देन लब्धपरिरक्षणहेतुभूतं बहिर्वेदिदानतडागारामानिर्माणादि पूर्तं कर्म लक्ष्यते। तदुभयं पैतृकमपि पितृद्रव्यविरोधार्जितमप्यविभाज्यम्।

यथाह लौगाक्षिः,

क्षेमं पूर्तं योगमिष्टमित्याहुस्तत्त्वदर्शिनः।
अविभाज्ये च ते प्रोक्ते शयनासनमेव च ॥ इति।

योगक्षेमशब्देन योगक्षेमकारिणो राजमन्त्रिपुरोहितादय उच्यन्ते इति केचित्। छत्रचामरशस्त्रोपा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नत्प्रभृतय इत्यन्ये। प्रचारो गृहारामादिषु प्रवेशनिर्गममार्गः। सोऽप्यविभाज्यः। यत्तूशनसा क्षेत्रस्याविभाज्यत्वमुक्तम्,

अविभाज्यं सगोत्राणामासहस्रकुलादपि।
याज्यं क्षेत्रं च पत्रं च कृतान्नमुदकं स्त्रियः॥

इति, तद् ब्राह्मणोत्पन्नक्षत्रियादिपुत्रविषयम्।

न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै।
यद्यप्येषां पिता दद्यान्मृते विप्रासुतो हरेत्॥

इति स्मरणात्। याज्यं याजनकर्मलब्धम्। पितृप्रसादलब्धस्याविभाज्यत्वं वक्ष्यते। नियमातिक्रमार्जितस्याविभाज्यत्वमनन्तरमेव निरासि। पितृद्रव्यविरोधेन यदर्जितं तद्विभजनीयमिति स्थितम्। तत्रार्जकस्य भागद्वयम्। वसिष्ठवचनात्। येन चैषां स्वयमुपार्जितं स्यात्स द्व्यंशमेव लभेतेति॥ ११८॥ ११९॥

बा० १। *अविभाज्यमिति। विभागदार्ढ्यायैव। अत एव प्रकरणसङ्गतिरिति भावः। अत्र वाऽपिशब्दौ विकल्पे। चैवेति चेति च पाठान्तरम्। पित्रित्यत्रैकशेषः उक्तयुक्तेरित्याह *मातेति। अत्र विरोधो नाश एवेत्याह *द्रव्याविनाशेनेति। *यदिति। किंचिदिति शेषः। मूले तथैव पाठात्। अन्यदिति मूले पाठे अत्रापि अन्यदिति शेषः। पितृद्रव्यभिन्नमिति तदर्थः। तद्दर्शनाह *मैत्रमित्यादिना। लिङ्गार्थाविवक्षयाऽऽह *भवतीति। एवमग्रेऽपि।

२। क्रमादिति द्वितीयपद्यप्रतीकम्। अथ व्याचष्टे *पित्रिति। नन्वेवं पूर्वैरेवोद्धारः कुतो न कृतोऽत आह *असामर्थ्येति। अभ्यनुज्ञाया अभावे देयमेवेत्याह *इतरेति। तात्पर्यार्थमाह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

* उद्धर्त्तेति। एवमग्रेऽपि। तत्र विशेषमाह * क्षेत्रे चेति। चस्त्वर्थे। तत्र च क्षेत्रे इति पाठान्तरं युक्तम्। तेषां मध्ये तद्विषये इत्यर्थः। *सर्वेषाम्, उद्धर्त्रादीनाम्। * यथाभागमिति। सर्वस्या भूमेस्तुर्यांशमुद्धर्त्रे दत्त्वा शेषं तेन सह सर्वे यथांशं गृह्णीयुरित्यर्थः। क्रमादित्यस्योद्धरणान्वये फलाभावेन मूलैकवाक्यतया च क्रमादिति वचनस्थप्रतीकं गृहीत्वा शेषं पूरयति * अभ्यागतामिति।

३। तुर्यपादं व्याचष्टे * तथेति। एवेत्यस्यात्रान्वयेनाह * विद्ययैवेति। विनिगमनाविरहात्स्मृत्यन्तरैकवाक्यतया चास्यार्थद्वयमाह * वेदाध्ययनेनेति। अस्य मुख्यत्वादिति भावः। चार्थमाह * तदपीति। एवं च तथा पाठ एव तत्संमतः।

४। इदं चान्यत्, पितृस्वयंदायादिपदस्वारस्यात् भ्रातॄणां मध्ये एकेनार्जितविषयं सर्वविभागेषु। एवं नारदीयशौर्यविषयेऽपि बोध्यम्। एवं प्रकारेण पित्रर्जिते तु अग्रे वक्ष्यते।

५। तत् स्वतन्त्रम् अव्यवहितविशेषणं सर्वविशेषणं वेत्येवम् उक्तं व्याख्यानं साधारणमपि प्रकरणसंगत्यर्थं स्वाभिमतपरमिति दर्शयति * अत्र चेत्यादिना। *अत्र च, मूलवाक्ये च। अन्यदर्थमाह * किंचिदिति। एवं पाठ एव वा। तत्र मन्वाद्येकवाक्यत्वार्थं च तृतीयं * सर्वशेष इति। विभागानर्हत्वेन विशिष्य वचनोपात्तानां मैत्रादीनां सर्वेषां शेषो ऽयमंश इत्यर्थः। * अतश्च, तस्य सर्वशेषत्वे च। फलितमाह *तथा चेति। विरोधेनेत्यस्य व्याख्या *प्रत्युपकारेणेति। यद्वा प्रत्युपकारे विरोधो नाशो हेतुः। अत एव तस्य प्रत्युपकारत्वम्। ब्राह्मे वाचनिकपितृद्रव्याविरोधाभावादाह *आसुरादीति। *पित्रा चेति। अत एव सर्वविभागेष्वित्युक्तम्। *विभजनीयमिति। अत एव विभागप्रकरणसङ्गतिः। स्पष्टार्थं वाच्यार्थमाह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

* नतथेति । पितृद्रव्याविरोधेनोपार्जितं मैत्रादि न विभजनीयमित्यर्थः ।

६। न केवलमिदं स्ववचनोपात्तसर्वशेषो ऽपि तु अन्यदपि स्मृत्यन्तरेषु यद्यदविभाज्यमुक्तं तस्याप्ययं सर्वस्य शेषो मैत्रादीनामुपलक्षणत्वात्। एवं च तादृशमैत्रादेर्यथा विभाज्यत्वं तथाऽन्यस्यापीत्याह * पितृद्रव्येति। (केचित् तन्न। तथा सति मैत्राद्यन्येषां स्मृत्यन्तरोक्तानामेव तत्त्वलाभेऽपि प्रतिग्रहार्जितस्यातत्त्वेन तत्र तत्त्वस्य दुर्वचत्वात्। तस्मादस्य तदन्यसर्वोपलक्षणत्वं वाच्यम्।) यद्वा मैत्रादेस्तत्त्वे तुल्ययुक्त्यैतत्सिद्धिरित्याह * पितृद्रव्येति। कचिन्नरहितः पाठः। अयमेव युक्तो व्याख्यातृशैलीस्वरससिद्धश्च। पुनर्वाच्यार्थकथने फलाभावश्च । तदा तथेत्युत्तरशेष एव न स्वतन्त्रम् । किञ्चेति तदर्थः । आशयस्तूक्त एवेति युक्तोऽयम् ।

केचित्तु न तथेत्येव पाठः। तथाप्युत्तरशेषत्वमेव। न स्वातन्त्र्यमित्यर्थः । पितृद्रव्याविरोधेनेत्यस्य सर्वशेषत्वादेव वचनोपात्तमैत्रादिमात्रशेषत्वादेव यथा तद्विरोधेनोपार्जितानां मैत्रादीनां विभाज्यत्वं तथा मैत्राद्यन्यत्वात्पितृद्रव्यविरोधेन प्रतिग्रहोपार्जितस्यापि न विभाज्यत्वमित्यर्थः। तस्य तदशेषत्वेन स्वातन्त्र्ये तु तत्राविरोधेनोपार्जिते विभाज्यत्वापत्तिरिति भाव इत्याहुः। तन्न। अपदं वक्ष्यमाणतथेत्यादिग्रन्थविरोधापत्तेः । ग्रन्थशैल्यस्वरसाच्च

७। ननु तथैवास्त्विति तत्रेष्टापत्तिरिति माऽस्तु तस्य तच्छेषत्वमिति स्वातन्त्र्यमेवास्तु ब्राह्मणवसिष्ठन्यायेन तस्य मैत्रादिभिन्नपरत्वसम्भवादत उक्तं द्रढयन् आह * अस्यचेति। तत्तदशेषत्वे किञ्चित्पदादिस्वारस्याद्यद्यत्तदविरोधेनार्जितं तत्सर्वमविभाज्यमित्यर्थस्य वचनव्यक्त्या लाभेन साधारणेनानेनैव तादृशप्रतिग्रहलब्धवत् तादृशमैत्रादेरविभाज्यत्वे सिद्धे पुनस्तदभि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धानानर्थक्यमित्यर्थः। ब्राह्मणवसिष्ठन्यायस्य तु न अयं विषयः। सति गमके ऽन्यथानुपपत्तौ च तत्प्रवृत्तेः। नैवं प्रकृते। अन्यथा भिन्नविषयतया तत्साफल्यं शङ्कते * अथेति। अपिः पूर्वसमुच्चये। अविभाज्यत्वादिति फलरूपहेतौ पञ्चमी। तत्प्रतिपादनार्थतयेत्यर्थः। अविभाज्यत्वायेति पाठस्तु सुगम एव। *समाचारेति। शिष्टाचाररूपप्रमाणविरोध इत्यर्थः।

८। ननु श्रुत्यादीनां पूर्वपूर्वप्राबल्यस्योक्तत्वेन वचनादाचारस्य दुर्बलत्वेनेदमयुक्तम्, आचारेण स्मृतिकल्पनेऽपि क्लृप्तस्मृतेर्झटित्युपस्थितेः प्राबल्यमेवेति चेन्न। आशयानवबोधात्। तथाहि। बाधो ऽगतिका गतिः। अबाधेनैवेति न्यायात्। न हि दुर्बलमित्येव बाधते। किं तु विरोधे निरवकाशत्वे च। विरोधश्चैकत्र मिथो भिन्नोक्त्या नैवमत्र। अबाधेनैवोपपत्तौ बाधो न न्याय्य इति न्यायेन मैत्रादिवचनस्यास्मदुक्तरीत्योपपत्तेः। अत एव न निरवकाशत्वमपि। एवं चानर्थक्यप्रतिहतानामिति न्यायेन विपरीतो बाध इति मदुक्तरीत्या तस्य तथार्थकत्वे शिष्टाचारविरोधः सम्यगेवेति दिक्।

९। न केवलमाचारविरोधोऽपि तु मैत्राद्यन्तर्गतविद्यालब्धविषये स्मृतिविरोधोऽपीत्याह *विद्यालब्धे इति। तदंशे इत्यर्थः। तदेवाह * कुटुम्बमिति। विद्याध्ययनं कुर्वतो भ्रातुर्योऽन्यो भ्राता तस्य कुटुम्बं पोषयति सोऽश्रुतोपि सन् वेदशास्त्राध्ययनरहितो मूर्खोपि सन् तस्माद्विद्याधनात्तदर्जितविद्यया लब्धाद्धनाद्भागमंशं लभेतेत्यर्थः। असुतोऽपीति पाठान्तरम्। अत्र कुटुम्बभरणस्य धनग्रहणे हेतुत्वोक्त्या औपाधिकी विद्याधनांशप्राप्तिर्न भ्रातृत्वेन स्वाभाविकीत्युक्तम्। यदि कथमप्यर्जितस्य विद्याधनस्य तत्त्वेनाविभाज्यत्वं मूलाभिमतं स्यात्तदा त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्धेतुकविभागकथनं नारदीयं विरुध्येत। तस्मात्तस्य स्वतो न ताहशस्य विभाज्यत्वाविभाज्यत्वे किं तु अविरोधे ऽविभाज्यत्वं विरोधे विभाज्यत्वमिति विरोधस्वरूपमेव नारदेन हेतुत्वेनोक्तमिति सिद्धान्ते एकवाक्यता सिद्धा । मूले पित्रित्युपलक्षणम्। किन्तु यदि स्वाभाविकी विद्याधनांशप्राप्तिर्नारदाभिमता भवेत्तर्हि तस्य हेतुत्वोक्तिरनर्थिका स्यात्। एवं च विद्याधनस्य यथाकथञ्चिदर्जितस्य न स्वतो विभागार्हता । अन्यथा पितृद्रव्यविरोधेनाप्यर्जितस्याविभाज्यत्वे अत्राप्यविभाज्यत्वमेवोचितमिति विभागकथनस्यैवासङ्गतिरिति भावः।

१०। अत्राश्रुतोऽपीत्यनेन सूचितम्, अश्रुते पित्रादिद्रव्यविरोध एव भागहेतुः सश्रुते तु तद्वत्त्वं विद्यावत्त्वमपि भागहेतुः। अत एव कात्यायनः,

नाविद्यानां तु वैद्येन देयं विद्याधनात्क्वचित्।
समविद्याधिकानां तु देयं वैद्येन तद्धनम् ॥ इति।

वैद्यो विद्यावान् । अयं च सिद्धान्तेऽविभाज्यत्वेन प्राप्तस्यापवादः। इदमनुपदमेव स्फुटीभविष्यति। एतेन नारदीयं कातीयापवाद इति मन्दोक्तमपास्तम्। कातीयेन अविभाज्यस्यैव तस्य लक्षणकरणात्। प्रकरणात् । तथैव च व्याख्यात्रोक्तम्, अन्यथा तद्विशेषणासङ्गतिरेव स्यात्। एवं च विद्याधनमन्यदपीति नारदादिविरोधो व्याख्यातुरिति बोध्यम्।

११। ननु विभक्तभ्रातृस्थलेऽपूर्वार्थबोधकं तत्। किञ्च मैत्रादिवचनप्राप्तस्य सर्वथाऽविभाज्यत्वस्यापवादकं सिद्धान्ते तद्वचनविशेषे तदिति न विरोधोऽतो ऽत्र दोषान्तरमाह * तथाविद्येति। * अन्यदपरेति। पित्रादिभिन्नौदनाद्यभ्यवहरणेनेत्यर्थः। * अन्यदः पित्रादिभिन्नात् । तथा च पित्रादिद्रव्याविरोधेन या वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तद्भिन्नाल्लब्धा तया यत्प्राप्तं धनं तद्विद्याप्राप्तं धनं नान्यत् ईदृशमेवाविभाज्यम् अतोऽन्यथा तु तद्विद्याधनमेव नेति तद्विभाज्यमेवेति कात्यायनतात्पर्येण तथाऽर्थस्यैतद्विरुद्धत्वं स्पष्टमेवेति भावः। तस्मान्नारदविरोधाभावेऽपि कातीयविरोधेन तथाऽर्थस्य दुर्वचत्वेन तथा सार्थक्याभावेन तस्य तदशेषत्वे तदानर्थक्यदोषः सुस्थ एव।

१२। तत्र दोषान्तरमाह * तथेति। * प्रतिग्रहेति। पितृद्रव्याविरोधेनेत्यादेः तदा प्रागुक्तरीत्या यद्यत्पितृद्रव्येत्याद्यर्थेन अदृष्टार्थदानाक्रियासम्प्रदानभूतस्यैव प्रतिग्रहीतृत्वेन प्रतिग्रहलब्धस्य पितृद्रव्याविरोधेनोपार्जितत्वस्यापि सम्भवेन तस्याप्यविभाज्यत्वापत्तौ वृद्धव्यवहारविरोध इति भावः। तस्मान्मैत्रादिसर्वस्मृत्युक्तविषये विरोधाविरोधकृतद्वैविध्येऽपि प्रतिग्रहविषये सर्वथा विभाज्यत्वमेवाचारसिद्धम्। तद्विषये स्मार्तनिषेधस्तु याजनाध्यापनलब्धवन्न क्वाप्युपलभ्यते इति तत्त्वम्।

१३। *एतदेवेति। पितृद्रव्याविरोधेनोपार्जितस्य मैत्रादिशेषत्वमेवेत्यर्थः। *अनुपघ्नन्निति। अनुपयुञ्जन्नित्यर्थः। अत्र पूर्वार्धार्थः स्पष्टः। अनुपघ्नन्नित्यत्र विभक्तिविपरिणामेन तदनुपघ्नता यत् विद्यया लब्धं तत् पूर्वं चोभयमपि दायादेभ्यो न देयमित्यर्थेन पितृद्रव्यविनाशरूपविरोधाभावेन यद्विद्यालब्धं श्रमलब्धं च तदविभाज्यमिति सिद्ध्या मैत्रादिगणान्तर्गतविद्याधनस्य तथात्वात्तस्योपलक्षणत्वेन मैत्रादीनामपि तथात्वमाविष्कृतमिति भावः।

१४। मानवे—

स्वयमीहितलब्धं च नाकामो दातुमर्हति।

इत्युत्तरार्द्धपाठो,यच्च स्वयमीहितं वाञ्छितं सत् मित्रादिभ्यो लब्धं तदकामो ऽनिच्छन् भ्रात्रादिभ्यो न दातुमर्हतीत्यर्थको

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मेधातिथिकल्पतर्वादिधृतो न युक्तः । अनेकस्मृतिव्याकोपापत्तेः । लब्धं तन्नेत्यर्वाचीनपाठस्त्वयुक्ततर एव । यद्वा तदा तत् पैतामहविषयकमस्तु । एवं च भ्रातृभागशेषमाहानुपघ्नितीत्यपि तदुक्तं तथेति ज्ञेयम् । आदिना कृष्यादि । तस्मात्पितृद्रव्याविरोधेनेत्यादिना वचनद्वयेन एकभ्रात्रर्जितं मैत्रादिकमन्यस्य नांश इति प्रतिपादितम् । पितृपददायादादिपदस्वारस्यात् । तथा च न पित्राद्यार्जितरपरामिति सिद्धम् । एतेनायमाचारो भ्रातृस्नेहेन पौरुषबुद्ध्या वा अन्यत्र तथा दर्शनेन तन्मूलको वा । यत्किञ्चित्पितरीति मानवस्य एवं तात्पर्यम्, पितेव पालयेत् पुत्रानिति मानवात्पितापुत्रवद्भावेन तद्वज्ज्येष्ठधने कनिष्ठाधिकारः । पित्रार्जिते ऽविदुषामपि ज्येष्ठार्जिते तु विदुषामेवेति विशेषः। इदं च "पितरि प्रेते" इति "ज्येष्ठ" इति "यवीयसाम्" इति "विद्यानुपालिन" इति चोक्त्या लभ्यते । तस्मादविभक्तार्जितत्वमात्रेणाविभक्तभ्रात्रन्तरस्य भवतीत्युक्तमेवेति प्राच्योक्तमपास्तम् । यत्किञ्चिदित्यस्य वैयर्थ्यापत्तेः ।

१५। ननु नैतद्युक्तं, पैतामहे पैतृके च धने पुत्रादेर्जन्मनैव स्वत्वेऽपि भ्रातुर्भ्रात्रर्जिते तदभावेन भ्रातृप्राप्तमैत्रादिधने यद्येन प्राप्तं तत्तस्यैवेति प्रसिद्ध्या विभागप्राप्तेरेवाभावेन तदविभाज्यमिति निषेधकवचनस्यैवोक्तस्यासङ्गतेरित्याशयेनाह * ननु पितृद्रव्ये- ति । प्राप्त्यभावे हेतुमाह * यदिति । यत इत्यादिः । एवं च न्यदीये स्वत्वमेव नेति भावः । अवक्तव्यत्वे हेत्वन्तरमाह *प्राप्तीति । चो ह्यर्थे ।

१६।एकदेशिमतं दूषयितुं मैत्रादीनां विभागप्राप्तिं तन्मतेनाह * अत्र कश्चिदिति । विभागप्रापकं मनुवचनमाह * यत्कि- ञ्चिदिति । * अधिगच्छति, प्राप्नोति । * तत्र, धने । *

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दीति। यदि यवीयांसो विद्यानुपालिनः विद्यासंरक्षकाः विद्वांस इति यावदित्यर्थः। विद्यानुयायिन इति पाठान्तरम्। तुर्यपादेनेदं सूचितम्, यदि तेऽविद्वांसस्तदा नेति।

तथाच गौतमः, स्वयमर्जितमवैद्येभ्यो वैद्यः कामं न दद्यादिति।

नारदोऽपि, (व्य० प० १३।११)

वैद्योऽवैद्याय नाकामो दद्यादंशं ततो धनात्।
पित्र्यं द्रव्यं समाश्रित्य नचेत्तेन तदाहृतम्॥ इति।

कात्यायनोऽपि प्रागुक्तः। अस्य वचनस्यार्थकथनेन मैत्रादिविभागप्राप्तिपरत्वमाह *ज्येष्ठो वेति। ज्येष्ठशब्दस्त्रयाणामुपलक्षणम्। यवीयःशब्दो ज्यायसामपि। प्रेते इति अप्रेते इत्यस्यापि। तथा च कालद्वयमपि लब्धम्। तथा च ज्येष्ठाद्यन्यतमो यत्किञ्चिद्धनं यथाकथंचित् प्राप्नोति तस्माद्धनादन्येषामपि भ्रातॄणां पितरि स्थिते मृते च भागोऽस्ति यदि ते विद्वांस इत्यर्थपरेण तेन मैत्रादीनामपि विभाज्यत्वे प्राप्ते पितृद्रव्येत्यनेन निषिध्यते इत्यर्थः।

१७। मैत्रादिधनस्य वृद्धव्यवहारसिद्धस्यैवाविभाज्यत्वस्यानुवादकं मूलं, न निषेधकं, येन प्राप्त्यपेक्षा स्यादित्याशयेनाशङ्कां निराकुर्वन् तन्मतं खण्डयाति * तदसादिति। * अत्र, मैत्रादिविषये। न केवलमेवमत्रैव अपि तु अन्यत्रापीत्याह *लोकेति। आद्येन एवेन शास्त्रसिद्धत्वव्यवच्छेदः। द्वितीयेन एवेन निषेधकत्वव्यवच्छेदः। क्वचिदन्यथापि वक्ष्यमाणत्वादाह *प्रायेणेति।

१८। भवतु निषेधकं, तथापि वचनान्तरेण प्राप्तिः नत्वदुक्तरीत्येति तुष्यतुदुर्जनन्यायेनाह *अथवेति। बार्हस्पत्यमाह *समवेतैरिति। सर्वाभिप्रायं बहुवचनम्। अत एवाह * सर्वे इति। *तत्र, धने। नन्वेवमपि विनिगमनाविरहोऽत आह * अतश्चे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ति । तव दुराग्रहस्य तथोपपत्तेश्चेत्यर्थः । * ज्येष्ठादीति । अवि- वक्षायां कारणाभावात् । तथा च विनिगमकं स्पष्टमेवेति भावः। तदाह *व्यामोहेति । नन्वेवं का तस्य सिद्धान्ते गतिः अत आह *अत इति । त्वदुक्तार्थासम्भवादित्यर्थः । *पितुरिति । मरणा- दिति शेषः । अविभाज्यत्वेनेति छेदः । * उक्तस्य, मैत्रादिधन- स्य । * इति, इत्यनेन । पितरि मृते ज्येष्ठेनार्जितान्मैत्रादिकाद् भागं कनीयांसो लभन्ते यदि ते विद्वांस इत्यर्थस्तस्येति भावः। अत एव पितृद्रव्याविरोधेनापि ज्येष्ठो विद्यादिना धनमर्जयति तत्र कनिष्ठानामपि भागो यदि ते विद्याभ्यासरता इति कल्प- तरुमेधातिथिप्रभृतयः । एवं प्रागुक्तकातीयादेरपि सिद्धान्ते तद- पवादत्वं बोध्यम् ।

१९। न्यूनतां निराचष्टे * तथाऽन्यदिति ।

अथान्यदित्यपपाठः । अपिना—

विद्याधनं तु यद्यस्य तत्तस्यैव धनं भवेत् ।
मैत्रमौद्वाहिकं चैव माधुपर्किकमेव च ॥

इत्यस्य सङ्ग्रहः। मधुपर्कदानेन पूज्यतया यल्लब्धम्। *प्रचक्ष- इति । पुस्तकामिति मन्दधृतपाठस्तु व्याख्यातृकल्पतरुमेधातिथ्या- द्यसंमतत्वादुपेक्ष्यः। वस्त्रमित्यादि क्रमेण व्याचष्टे *धृतानामित्या- दिना । मूले जातावेकवचनमिति भावः । एतेन वस्त्रपत्रालङ्का- रोदकानामेकत्वं विवक्षितम् । वस्त्रं च सममूल्यम् न तु महार्घ- मिति मेधातिथिकल्पतर्वाद्युक्तमपास्तम् । उद्देश्यविशेषणत्वाद् धृतं वस्त्रमलङ्कार इति कातीये धृतत्वस्यैव तदुभयसाधारण्यो- श्च । तदेतदभिप्रेत्याह * धृतानामेवेति।एवेन अधृतव्यवच्छेदः।द- पुत्रादिस्थले आह *यदिति। लोकप्रसिद्धमपीदम् । अथ पितृ- आह *अपित्रिति । *पितुः,मरणात् । *ऊर्ध्वमिति। अनेन जीवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भागे स्वांशवत्तान्यपि पित्रैव ग्राह्याणीति सूचितम्। विभजतामिति कृत्यानामिति कर्तरि षष्ठी। पितुस्तदादिकं च यत्तदित्यन्वयः। आदिभ्यामन्यदुपकरणम्। अर्चने श्राद्धभोक्तैव कर्म। श्राद्धभोक्त्रे इति जातावेकवचनम्। तत्स्थानस्थितविप्रमात्राशयकं वा। तथाव्याख्याफलमाह *आभिनवानीति। सर्वं स्याद्वाहनं यानं युग्यं पत्रं च धोरणम् इति पत्रं वाहनपक्षयोरिति च कोशादाह *वाहनमिति। आदिना गन्त्र्यादि। *वस्त्रवदेव, श्राद्धभोक्त्रे देयम्।

२०। विशेषमाह * अश्वादीनामिति। जीविनामिति प्राग्वत् कर्तरि षष्ठी। बहुत्वे सति तैस्ते विभजनीया इत्यर्थः। * ज्येष्ठस्येति। तस्यैव स भाग इत्यर्थः। अत्र वैषम्यमंशं प्रत्यपर्याप्तत्वरूपं न विषमसंख्यत्वम्। एवं हि एकं तस्मै दत्त्वा समसंख्यस्थलेंऽशविभागस्य पर्याप्तत्वात्तैस्ते विभाज्याः। विषमसंख्यस्थलविशेषे स्वरूपेण सर्वविभागस्य दुष्करत्वात् द्रव्यद्वारा विभागस्य च विक्रयनिषेधेन निषिद्धत्वादंशपर्याप्तान् विभज्य वैषम्येणावशिष्टमश्वादि ज्येष्ठायैव दद्यात्। तदसम्भवे तु सर्वं ज्येष्ठायैव देयम्। यथा चत्वारोऽश्वाः पुत्राः त्रयः पञ्च वेति। अस्मिन्प्रकरणे वैषम्यमेवमेव। तादृशाङ्गीकारे तु बहुव्याकोपः स्यादिति भावः। एवं रीतिरन्यत्रापि बोध्या। अव्यवहिते मानमाह * अजाविकामिति। पशुद्वंद्वैकवद्भावः। *भजेत्, विभजेत्। अत्र हेतुमाह * अजेति। यत इत्यादिः। पत्रशब्देन लेख्यनिविष्टं धनम्।

धनं पत्रानिविष्टं तु धर्मार्थं यन्निरूपितम्।
उदकं चैव दाराश्च निबन्धो यः क्रमागतः॥

इति कातीयात्,

विक्रीय वस्त्राभरणम् ऋणमुद्ग्राह्य लेखितम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृतान्नं चाकृतान्नेन परिवर्त्य विवर्तयेत् ।

इति बार्हस्पत्याच्चेति कल्पतरुः ।

२१। मूले सामान्ये नपुंसकमित्याशयेनाह *अलङ्कार इति। *धृतइति । अत्र सर्वत्र भृत इत्यादि पाठान्तरम् । अर्थस्तुल्यः। अधृत इत्यस्य व्याख्या * साधारण इति । * विभाज्य एवेति। विभज्य एवेत्यपपाठः । यद्यपि द्विवचनविभज्योपपदे इति नि-पातनेन सोऽपि साधुस्तथाप्यपादाने एव नान्यत्र। नचैवं कृत्य-ल्युट इति प्राप्तस्य ण्यतो बाधेन कथं विभाज्यशब्दसिद्धिरिति वाच्यम् । णिजन्तादचोयता सुसाधत्वात् । न चार्थभेदः।

निवृत्तप्रेषणात् धातोः प्राकृतेर्थे णिजिष्यते ।

इति णेरणाविति सूत्रे हर्यादिभिर्व्युत्पादनात् । निपातना-न्यबाधकानीति तु न युक्तम्। ण्यति कुत्वस्य दुर्वारत्वात्। तत्प्रस-क्त्यैवाभावाच्च । एतेन स्मृतिप्रयुक्ताविभाज्यशब्दस्य साधुत्वं चि-न्त्यमिति हरदत्तोक्तमपास्तम् ।

२२। मनुमेवाह *पत्याविति। अत्र पत्याविति स्त्रीभिरिति चोपलक्षणम्। अत एव यो येनेति पूर्वग्रन्थाविरोध इति बोध्यम्। *इति, इत्यत्र। उक्तविशेषे मानमाह *अलमिति। एतेन धृतस्त-थैव स्थापितो विभागकाले पुत्रादिविभागमध्ये न देयः, किं तु पतिभागत्वेन यथा सैव परिदध्यात् । न तु पत्यौ जीवति यो धृतः स मृतेऽप्यविभाज्य इति । अदृष्टार्थतापत्तेः। एतेन सर्वथा ऽविभाज्यत्वमपि निरस्तम्। तत्सौन्दर्यलोभेन भजने तु पातित्यम् जीवतीत्युक्त्या मृतेऽन्येनापि ग्रहणे न दोष इति मन्दोक्तमपास्तम्।

२३। कृतान्नमित्यत्र न कर्मधारयः। कृतशब्दवैयर्थ्यापत्तेः। किं तु अन्नेन कृतमिति राजदन्तादिः। अन्नशब्दो यौगिकस्तथा-न्यपर इत्याह *तण्डुलमोदकेति । तत्सबान्धिमोदकेत्यर्थः। आ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिना अपूपादि । *यथेति । किन्त्वित्यादिः । एवमग्रेऽपि ।

२४। विषममिति। *अनेन समत्वे विभागः सूचितः।एवमग्रेऽपि।उक्तहेतोः प्राप्तिमात्रमाह *मूल्येति।एवमग्रेऽपि । योग्यतया दास्य इत्युक्तेः फलं सूचयन्विशेषमाह * अवरुद्धास्त्विति । पित्राऽवरुद्धास्तास्त्वित्यर्थः । तत्स्वरूपमाह * स्वैरीति । अपिना विषमाणां समुच्चयः।समानामपि तासां तत्त्वे मानमाह *स्त्रीषु च संयुक्तास्विति। संयुक्तासु उपभुक्तासु अवरुद्धास्विति यावत्। तथैव पाठान्तरं वा । किन्तु मातृवत्पर्यायेण परिपाल्या इति भावः। संयुक्तानां विभागनिषेधाद्विवाहितानामर्थसिद्ध एवासौ। एतेन दासीतुल्यतया तासां व्याख्यानं मन्दादिकृतम् अन्यतरपरतया तदन्यकृतं चापास्तम् । विनिगमनाविरहेणोभयोरपि ग्रहणात्। अत एव सामान्योक्तिः ।

२५। *क्षेमश्चेति। क्षेममस्त्रियामित्यमरः।समाहारद्वन्द्वः। इष्टं तदाख्यं, पूर्तं तदाख्यम्। अस्य साधारणत्वादाह *पैतृकमिति । अपिना पैतामहसमुच्चयः । तस्य तच्छेषत्वेऽप्येतदशेषत्वेन साधारण्यादेवाह *पितृद्रव्येति । अपिना ऽविरोधेनार्जितसंग्रहः । साधारण्ये मानमाह *यथाहेति । एतेन मैत्राद्यन्वयवदस्यापि तद्विशेषणं स्यात् तुल्ययुक्त्या वा लभ्येतेत्यपास्तम् ।सामान्येनानेन तस्य बाधात्। मेधातिथिकल्पतरुमतमाह *योगेति। तदन्यमतमाह * छत्रेति । सर्वपक्षे तदुत्पन्नो लाभो विषमश्चेद्विभाज्य एव ।

योगक्षेमवतो लाभः समत्वेन विभज्यते ।

इति बार्हस्पत्यात् । योगक्षेमवतः तद्धेतोः ।

प्रचारशब्दे करणे हलश्चेति घञित्याह *गृहेति।ननु गृहारामादिप्रवेशनिर्गमप्रमार्गस्याविभाज्यत्वोक्त्या गृहारामादेर्विभाज्यत्वं लब्धं, तच्च स्मृत्यन्तरविरुद्धमित्याक्षिपति *यत्त्विति। व्यासोऽप्येवमानुपू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वीक एव । न वास्तुनि विभागो विद्यते इति प्रजापति रपि । उक्तचतुष्टये संवादोऽप्यनेन दर्शितः। परिहरति *तदिति। अत्रादिशब्दग्राह्यो वैश्य एव न शूद्र इत्यग्रे वक्ष्यते । बृहस्पतिमाह *न प्रतीति । एतद्विशेषणफलमप्यग्रे वक्ष्यते। इदं च शब्दशक्तिस्वारस्यादिच्छया पितृकर्तृकाविभागविषयम् । अतएव पुत्रकर्तृकविभागमात्रे तदभावो ऽर्थसिद्धः पित्र्यद्रव्यविषये । पैतामहविषये तु वक्ष्यति । अत एव भूरत्र स्वयमर्जितं भूमिमात्रप्रधानं प्राकाराङ्कं क्षेत्रम् । भूरित्येतन्मात्रोक्तेः । गृहदानादितो भूमिदानस्य भेदेन कथनाच्च । एवं च क्रमागतस्य गृहादेर्वा नात्र ग्रहणम् । अत एव बृहस्पतिः,

ब्रह्मदायं गतां भूमिं हरेद्यो ब्राह्मणीसुतः ।
गृहं द्विजातयः सर्वे तथा क्षेत्रं क्रमागतम् ॥ इति ।

ब्रह्मदायः प्रतिग्रहः।एवं चैतन्मूलकप्राग्लिखितमदनोऽयुक्त एवेति ज्ञेयम् । नचैवं रीत्या व्यासविरोधपरिहारेऽपि प्रजापतिविरोधस्तदवस्थ एवेति।वाच्यम् । तस्य बृहस्पतिवाक्यानुरोधेन प्रतिग्रहार्जितभिन्नगृहविषये स्वार्जिते विशिष्य निषेधकत्वात्। अत एवोक्तप्रजापत्यनुरोधेन मानवे योगक्षेमशब्देन वास्त्विति यत् मेधातिथिना व्याख्यातं, तदपि पितुरनिच्छायाम् । तदिच्छायां तु तत्रापि तद्भवत्येव । अत एव—

क्रमागते गृहे क्षेत्रे पितृपौत्राः समांशिनः ।
पैतृके न विभागार्हाः सुताः पितुरनिच्छतः ॥

इति व्यासः । सर्वथा क्षेत्रं वास्तुक्षेत्रमिति कल्पतरूक्तमयुक्तमेव । अत एव—

कात्यायनेन,

दृश्यमानं विभज्येत गृहं क्षेत्रं चतुष्पदम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति तयोर्भेदेनोपादानं कृतम्। एवं व्यासव्याक्ये ऽप्युक्ते कृतामिति बोध्यम्। अविभाज्यमस्तीति च दर्शयन्ननुक्तत्वाद्याज्यश-ब्दस्योपयुक्तं लक्ष्यार्थमाह * याजनेति।

पितृद्रव्येत्यादिना ऽविभाज्यं वक्तुमारब्धं मूलकृता न सर्वमुक्तमिति न्यूनतापरिहाराय विभाज्यप्रकरणे एव वक्ष्यमा-णमपि स्मरति *पितृप्रसादेति। तस्यापीत्यर्थः। पितृभ्यामित्या-दिना मूलकृत्। पूर्वं तु नारदीयत्वेनोक्तम्। इदं च पुत्रकर्तृकाविभा-गविषयकमेवेति बोध्यम्। अत्राविभाज्यत्वं व्याख्यात्रा विधिनि-षेधमुखाभ्यामुक्तम्। तत्राविभाज्यस्वरूपकथनं विधिः। विभा-ज्यत्वनिरासो निषेधः। तथा सत्यत्रैवोक्तमपि वक्ष्यमाणोपयोगि स्मरति *नियमेति। ब्राह्मणः प्रतिग्रहादिनेत्यादीत्यर्थः। *अन-न्तरमेवेति। कस्य विभाग इत्येतद्विचारावसरे शङ्कातः प्राप्तं सिद्धान्तिनेति भावः। *निरासि,न्यषेधि। तथा सत्युत्तरसङ्गत्य-र्थमव्यवहितफलितं प्रागुक्तमुपसंहरति * पितृद्रव्येति। तथा चे-त्यादिः। अत एव महाप्रकरणसङ्गतिः। * तत्र, तथाऽर्जित-मैत्रादिविषये। तमेवाह * येनेति। * एषां, भ्रातॄणां म-ध्ये॥ ११८॥ ११९॥

मि० अस्यापवादमाह।

या० सामान्यार्थसमुत्थाने विभागस्तु समः स्मृतः।

मि० अविभक्तानां भ्रातॄणां साधारणार्थस्य कृषि-वाणिज्यादिना समुत्थाने सम्यग्वर्धने केनचित्कृते सम एव विभागो नार्जयितुरंशद्वयम्।

मि०अव० पित्र्ये द्रव्ये तु पुत्राणां विभागो दर्शितः। इदानीं पैतामहे पौत्राणां विभागे विशेषमाह।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या० अनेकपितृकाणां तु पितृतो भागकल्पना ॥ १२० ॥

मि० यद्यपि पैतामहे द्रव्ये पौत्राणां जन्मना स्वत्वं पुत्रैरविशिष्टं तथापि तेषां पितृद्वारेणैव पैतामहद्रव्ये विभागकल्पना न स्वरूपापेक्षया। एतदुक्तं भवति। यदाऽविभक्ता भ्रातरः पुत्रानुत्पाद्य दिष्टं गतास्तदैकस्य द्वौ पुत्रावन्यस्य त्रयोऽपरस्य चत्वार इति पुत्राणां वैषम्ये तत्र द्वावेकं स्वपित्र्यमंशं लभेते, अन्ये त्रयोऽप्येकमंशं पित्र्यं, चत्वारोऽप्येकमंशं पित्र्यं लभन्ते इति। तथा केषु चित्पुत्रेषु ध्रियमाणेषु केषुचित्पुत्रानुत्पाद्य विनष्टेष्वप्ययमेव न्यायो ध्रियमाणाः स्वांशानेव लभन्ते नष्टानामपि पुत्राः पित्र्यानेवांशान् लभन्ते इति वाचनिकी व्यवस्था॥ १२० ॥

वा० १। *अस्य, वासिष्ठोक्तभागद्वयस्य। सामान्यार्थेत्यस्य व्याख्या *अविभक्तानामिति। समुत्थाने इत्यस्य व्याख्या *सम्यगिति। तत्र हेतुरुक्तः *कृषीति। एतदर्थमेव नियमातीत्युक्तम्। शेषमाह * केन चिदिति। भ्रातॄणां मध्ये इत्यादिः।

उ० २। उत्तरसंगतिमाह * पित्र्ये द्रव्ये इति। यथाकथंचित्पैतामहमात्रद्रव्ये इत्यर्थः। * पुत्राणां, तेषामेव। एवमग्रेऽपि। * पैतामहतन्मात्रे। *विभागे इति। जन्मनैव स्वत्वेन तस्य प्राप्तत्वादिति भावः। * अनेकपितृकाणामिति। अनेके पितरो येषामित्यर्थः भिन्नपितृकाणामिति यावत्। एकपितामहानेकपुत्ररूपभ्रात्रनेक पुत्राणामिति परमार्थः। प्रमीतपितृकाणामिति पाठान्तरम्। अनेकपित्र्यकाणामिति त्वपपाठ एव। शङ्कापूर्वं व्याचष्टे * यद्यपीति। तृतीयान्तात्सार्वविभक्तिकस्तासिरित्याह * पितृद्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णैवेति। त्वर्थे एवः। नियामकमिदं वचनमिति भावः। तद्व्यवच्छेद्यमेवाह * न स्वेति। स्वस्वरूपेत्यर्थः। फलितमाह * एतदिति। अविभक्ता इति छेदः। * तत्र, भ्रातॄणां मध्ये।

३। न्यूनतानिरासाय उक्तन्यायमन्यत्रातिदिशति * तथेति। * ध्रियमाणेषु, अवस्थितेषु। जीवत्स्विति यावत्। धृङ् अवस्थाने।

तदुक्तं कात्यायनेन,

अविभक्ते सुते प्रेते तत्सुतं रिक्थभागिनम्।
कुर्वीत जीवनं येन लब्धं नैव पितामहात्॥
लभेतांशं स्वपित्र्यं तु पितृव्यात्तस्य वा सुतात्।
स एवांशस्तु सर्वेषां भ्रातॄणां न्यायतो भवेत्॥
लभेत तत्सुताद्वापि निवृत्तिः परतो भवेत्। इति।

तदाह * वाचनिकीति। अन्यथैतदानर्थक्यापत्तिरिति नियामकमिदमिति भावः।

४। एकस्यां योषिति बहुभिः सङ्गतायां तेभ्यो जातानामित्यर्थः इति कल्पतरुः—

अनेकपितृकाणां तु पितृतोंऽशविकल्पना।
यस्य यत्पैतृकं रिक्थं तत् स गृह्णीत नेतरः॥

इति विष्णुव्याख्यावसरे। अत एव बृहस्पतिः,

यद्येकरिक्थिनौ स्यातामौरसक्षेत्रजौ सुतौ।
यस्य यत्पैतृकं रिक्थं स तद् गृह्णीत नेतरः॥ इति।

नायं पारिभाषिकः क्षेत्रजः। तस्यान्यविभागस्य वक्ष्यमाणत्वात्। किन्तु क्षेत्रमात्रोत्पन्नः।

द्वौ तु यौ विवदेयातां द्वाभ्यां जातौ स्त्रियां धने।
तयोर्यद्यस्य पित्र्यं स्यात्स तद् गृह्णीत नेतरः॥

इति मनुरपि (अ० ९।१९१)॥ १२०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि०अव० अधुना विभक्ते पितर्यविद्यमानभ्रातृके वा पौत्रस्य पैतामहे द्रव्ये विभागो नास्ति। अम्रियमाणे पितरि पितृतो भागकल्पनेत्युक्तत्वात्। भवतु वा स्वार्जितवत् पितुरिच्छयैवेत्याशङ्किते आह।

या० भूर्या पितामहोपात्ता निबन्धो द्रव्यमेव च।

तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चैव हि॥१२१

मि० भूः शालिक्षेत्रादिका। निबन्ध एकस्य पर्णभरकस्येयन्ति पर्णानि तथा एकस्य क्रमुकफलभरकस्येयन्ति क्रमुकफलानीत्याद्युक्तलक्षणः। द्रव्यं सुवर्णरजतादि यत्पितामहेन प्रतिग्रहविजयादिना लब्धम्। तत्र पितुः पुत्रस्य च स्वाम्यं लोकप्रसिद्धमिति कृत्वा विभागोऽस्ति। हि यस्मात्तत् सदृशं समानम्। तस्मान्न पितुरिच्छयैव विभागो नापि पितुर्भागद्वयम्। अतश्च पितृतो भागकल्पनेत्येतत् स्वाम्ये समेऽपि वाचनिकम्। विभागं चेत्पिता कुर्यादित्येतत् स्वार्जितविषयम्।

तथा, (ना० व्य० प० १३।१२)

द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पिता।

इत्येतदपि स्वार्जितविषयम्।

जीवतोरस्वतन्त्रः स्याज्जरयाऽपि समन्वितः।

इत्येतदपि पारतन्त्र्यं मातापित्रार्जितद्रव्यविषयम्। तथा, अनीशास्ते हि जीवतोरित्येतदपि। तथा च सरजस्कायां मातरि सस्पृहे च पितरि विभागमनिच्छत्यपि पुत्रेच्छया पैतामहद्रव्यविभागो भवति। तथाऽविभक्तेन पित्रा पैतामहे द्रव्ये दीयमाने विक्री-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यमाणे वा पौत्रस्य निषेधेऽप्यधिकारः। पित्रर्जिते तु न निषेधाधिकारः। तत्परतन्त्रत्वात्। अनुमतिस्तु कर्तव्या। तथाहि। पैतृके पैतामहे च स्वाम्यं यद्यपि जन्मनैव तथापि पैतृके पितृपरतन्त्रत्वात् पितुः स्वार्जकत्वेन प्राधान्यात् पित्रा विनियुज्यमाने स्वार्जिते द्रव्ये पुत्रेणानुमतिः कर्तव्या। पैतामहे तु द्वयोः स्वाम्यमविशिष्टमिति निषेधाधिकारोऽप्यस्तीति विशेषः।

मनुरपि—(अ० ९ श्लो० २०९)

पैतृकं तु पिता द्रव्यमनवाप्तं यदाप्नुयात्।

न तत्पुत्रैर्भजेत्सार्द्धमकामः स्वयमर्जितम्॥ इति—

यत्पितामहार्जितं केनाप्यपहृतं पितामहेनानुद्धृतं यदि पितोद्धरति तत्स्वार्जितमिव पुत्रैः सार्द्धमकामः स्वयं न विभजेदिति वदन् पितामहार्जितमकामोऽपि पुत्रेच्छया पुत्रैः सह विभजेदिति दर्शयति॥१२१॥

या० १। नन्वनेकपितृकाणामित्यनेन अन्यथाऽनुपपन्नेन एतावत्सम्पन्नं, पौत्रस्य पैतामहद्रव्यप्राप्तिः पितृद्वारा न स्वतः। तत्रापि पितरि अविभक्ते दिष्टं गते एव। विभागस्य स्वत्वाजनकत्वेऽपि तन्नाशकत्वात्। तत्सत्त्वस्य प्रतिबन्धकत्वाच्च। एवं च पौत्रस्यापि भ्रात्रादिवत् सप्रतिबन्ध एव दाय इति तथा प्रागुक्तमयुक्तम्। किंच तथा सति यदा पिता जीवति विभक्तश्च स्वपितुः यद्वा तस्य एकपुत्रत्वेन तस्य भ्रात्रन्तराभावात् स पितुः सकाशादविभक्त एव जीवन्नास्ते, तदाऽऽद्यपक्षे विभक्तत्वादेव पैतामहद्रव्यप्राप्त्यभावः स्वपितुरिति विभक्तत्वात् तस्य सत्त्वाच्च द्वारनिरोधेन पौत्रस्य पैतामहद्रव्यप्राप्त्यभावः। द्वितीयपक्षेऽपि यद्यपि स्वपितुर्ध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नप्राप्तिरस्ति अविभक्तत्वात्तथापि सत्त्वादेव तस्य तदभाव इति सर्वथा पैतामहे धने पौत्रस्य जीवत्पितृकस्य विभागाभाव एव स्यादित्युत्तरवाक्यमवतारयन्नाह—

२। * अधुनेति । इत्याशङ्किते इत्यत्रान्वयः। विभक्ते इति छेदः। पौत्रस्येत्युपलक्षणं, पौत्रयोः पौत्राणामपि। उभयत्र हेतुमाह * अध्रियमाणे इति। दिष्टं गते इत्यर्थः। ध्रियमाणे इति पाठे तस्य पूर्वान्वयः। अपितरीति छेदः। तदभावे। अत्र तूभयत्रापि पितुः सत्त्वमिति भावः।

३।ननु नैतद्युक्तं, जन्मनैव स्वत्वस्य प्रागुक्तत्वेन द्वारानपेक्षत्वेन तत्रापि विभागस्य युक्तत्वादिति चेत्, तथापि पितरि दिष्टं गते पितृद्वारैवांशविधानाज्जीवति तस्मिन् तद्द्वारकत्वं सुतरामिति अत्र पितुः प्राधान्यप्रतीत्या पितुरिच्छयैव विभागः स्यात्। तत्रापि स्वार्जितवत् द्वावंशाविति नारदवाक्येन पितुरंशद्वयं स्यात्तदाह *भवतु वेति। विभागस्तत्र तस्येत्यस्यानुषङ्गः। परं तु इति शेषः। *इच्छयैव, इच्छयैव च। स्यादिति शेषः। दृष्टान्तसूचितं तत्रापीत्यादि नोक्तम्। भवन्वेति पाठे तु एकवाक्यतैव। शब्दशक्तिमाहात्म्येन लब्धमर्थमाह * शालीति। आदिना यवक्षेत्रादि। तेन वास्त्वादिनिरासः। इदं वास्त्वादिविषयतत्त्वं चानुपदमेव विशदीकृतम्। आकराद्दी निबध्यते यः पर्णादिगणनया स निबन्धो वृत्तिः। प्रराजादिदत्तं नियतलभ्यम्। तत्स्वरूपमाह *एकस्येत्यादि। एवमग्रे। पर्णानां भरो बाहुल्यं यस्मिन्निति विग्रहः। समासान्तः। एवमन्येऽपि। तथाचैकस्याः पर्णवाटिकायाः क्रमुकवाटिकायाश्चेयन्ति पर्णानि क्रमुकफलानि चेति तद्व्यापारकोविदा एव जानन्ति नान्ये इति तदीयपर्णभरकादिपर्णगणनया निबध्यमान इत्यर्थः। यत्पितेति यत्पितामहेनेत्यनयोरग्रेऽपि संबन्धसूचनाय आह * यत्पितेति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नियमानतिक्रममाह । * प्रतिग्रहेति । आदिना वाणिज्यद्विजशुश्रूषादिपरिग्रहः ।

४। एवं पूर्वार्धवाक्यार्थत्रये प्रतिपादिते उत्तरार्द्धं वाक्यभेदेन सशेषपूरणेन व्याचष्टे *तत्रेति । त्रिष्वित्यर्थः । प्राग्वत् स्यादर्थमाह *अस्तीति । पूर्वम् एवान्वयादस्त्येवेत्यर्थः । चोभयोरिति कल्पतर्वादिधृतपाठासांगत्यं ध्वनयन्नाह *हि यस्मादिति । *सदृशं,सदृशमेव । अग्रिमैवान्वयात् । शेषं प्राग्वदाह * तस्मादिति । इच्छयैव न विभाग इति पाठो युक्ततरः । एतेन समांशत्वं सूचितम् ।

बृहस्पतिरपि,

द्रव्ये पितामहोपात्ते जंगमे स्थावरेऽपि वा ।
सममंशित्वमाख्यातं पितुः पुत्रस्य चैवहि ॥ इति ।

५। एवं सति पूर्ववचनानर्थक्यं प्रथमांशेन प्राप्तं तद्विरोधं च परिहरन् वाचनिकत्वमुक्तं द्रढयति * अतश्चेति । यत एवं स्वाम्यं पितापुत्रयोस्तत्र समानमेव लोकप्रसिद्धम् अत इत्यर्थः । * वाचनिकमिति । पितरि प्रेते वचनात्तथा नियम्यते न तु जीवति । अत एव प्रमीतपितृकाणामिति पाठो युक्ततर इति भावः । इदं प्रागपि उक्तम् ।

६। द्वितीयांशेन प्राप्तं वचनान्तराविरोधं परिहरति * विभागं चेदिति । प्रागपीदमुक्तम् ।

७। तृतीयांशेन प्राप्तं प्रागनुक्तान्यवचनाविरोधं परिहरति *तथेति । नारदमाह *द्वावंशाविति । प्रतिपत्तिर्नियमेन ग्रहणम् । आत्मन इति षष्ठ्यन्तं पञ्चम्यन्तं वा । अत्र विषमविभागे लोकविशेषाद्यभावादयं भवत्येवेति भावः । एवं प्रागुक्तवसिष्ठोक्ते विषमविभागेऽपि बोध्यम् । एवं च स्वार्जिते सर्वविभागेषु अर्ज-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कस्यांशद्वयमिति सिद्धम् ।

८। सदृशामित्यनेन प्राप्तमन्याविरोधमेवं रीत्यैव परिहरन् मतद्वयमाह । * जीवतोरित्यादि । * जीवतोरित्येतदपि, मातेत्याद्यनुषङ्गः । पैतामहे धने पित्रर्जितधनान्मूलानुक्तं तत्कालितं तदभिमतं विशेषान्तरमाह * तथा चेति । तयोः स्वत्वस्य तुल्यत्वे चेत्यर्थः । जीवद्विभागे उक्तकालत्रयाभावकृतविशेषमाह *सरजस्कायामिति । अपिना तन्निमित्तत्रयसमुच्चयः । * पुत्रेच्छया, तयैव । एवं चैतदिच्छाया मुख्यत्वम् ।

९। अत एव विशेषान्तरमाह * तथेति । तद्वदित्यर्थः । अविभक्तेनेति च्छेदः । विभागे स्वत्वनाशेन तदनधिकारादिति भावः । एतेन स्वयं विद्याशौर्यादिना स्वयमर्जितमिति व्याख्यानं मेध्यातिथ्यादेरपास्तम् ।

बृहस्पतिरपि,

पैतामहं हृतं पित्रा स्वशक्त्या यदुपार्जितम् ।
विद्याशौर्यादिना प्राप्तं तत्र स्वाम्यं पितुः स्मृतम् ॥ इति ।

अपिना विभागकरणसमुच्चयः ।

१०। कर्त्तव्येति। *पुत्रेणेति भावः।अव्यवहितोक्तमेव हेतूक्तिपूर्वकं विशदयति । *तथाहीत्यादिना । *जन्मनैव, समानमिति शेषः । * पित्रिति । पुत्रस्येत्यादिः । तत्रान्यतरस्यानर्जकत्वादाह * द्वयोरिति । अत एव पैतामहे न मातुरंशः स्वत्वाभावाद्वचनाभावाच्च।एवं च पौत्राणामप्रतिबन्धो दाय इति प्रागुक्तं युक्तमिति बोध्यम् ।

११। अत्रान्यसंवादमाह * मनुरपीति । इति वदन्निति दर्शयतीत्यन्वयः । पैतृकमित्यस्य पितेत्युक्तिबलात् व्याख्या * पितामहेति । अनवाप्तमित्यस्य व्याख्या * पितेति । यदेत्यस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*यदीति। आप्नुयादित्यस्य प्राग्वत् *उद्धरतीति। स्वयमर्जितमित्यस्यान्वयासंभवात्, यथाश्रुते चशब्दाभावेन वाक्यभेदासंभवाच्च दृष्टान्ततेत्याह * स्वार्जितमिवेति। * अकामः, विभागनिच्छुः। एतेन "चेत्स्वयं विद्याशौर्यादिना स्वयमर्ज्जितम्" इति व्याख्यानं मेधातिथ्यादेरपास्तम्।

बृहस्पतिरपि,

पैतामहं हृतं पित्रा स्वशक्त्या यदुपार्ज्जितम्।
विद्याशौर्यादिना प्राप्तं तत्र स्वाम्यं पितुः स्मृतम् ॥ इति।

कात्यायनोपि,

स्वशक्त्या ह्युद्धृतं नष्टं स्वयमाप्तं च यद्भवेत्
एतत् सर्वं पिता पुत्रैर्विभागे नैव दाप्यते इति।

इदं भूभिन्नविषयमिति प्रागुक्तमेवेति बोध्यम्। *पितामहार्जितमिति। उक्तभिन्नमित्यर्थः। अत्र भूः तामहेत्युभयमुपलक्षणम्।

अत एव व्यासः,

क्रमागते गृहे क्षेत्रे पितापुत्राः समांशिनः।
पैतृके न विभागार्हाः सुताः पितुरनिच्छया ॥ इति।

एवं चात्र सर्वत्र स्थावरे जङ्गमे च समांशित्वं, पैतृके तु पितुरिच्छया गृहादौ समांशित्वं यथेति विशेषः ॥ १२१ ॥

मि० विभागोत्तरकालमुत्पन्नस्य पुत्रस्य कथं विभागकल्पनेत्यत आह।

या० विभक्तेषु सुतो जातः सवर्णायां विभागभाक्।

मि० विभक्तेषु पुत्रेषु पश्चात्सवर्णायां भार्यायामुत्पन्नो विभागभाक् विभज्यते इति विभागः। पि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रोर्विभागस्तं भजतीति विभागभाक् । पित्रोरूर्ध्वं तयोरंशं लभते इत्यर्थः। मातृभागं च असत्यां दुहितरि। मातुर्दुहितरः शेषमित्युक्तत्वात्। असवर्णायामुत्पन्नस्तु स्वांशमेव पित्र्याल्लभते। मातुर्भागं तु सर्वमेव एतदेव—

मनुनोक्तम्, (अ० ९ श्लो० २१६)

ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनम्।इति।

पित्रोरिदं पित्र्यमिति व्याख्येयम्॥

अनीशः पूर्वजः पित्रोर्भ्रातुर्भागे विभक्तजः।

इति स्मरणात्। विभक्तयोर्मातापित्रोर्भागे विभागात्पूर्वमुत्पन्नो न स्वामी, विभक्तजश्च भ्रातुर्भागे न स्वामीत्यर्थः। तथा विभागोत्तरकालं पित्रा यत्किञ्चिदर्जितं तत्सर्वं विभक्तजस्यैव।

पुत्रैः सह विभक्तेन पित्रा यत्स्वयमर्जितम्।

विभक्तजस्य तत्सर्वमनीशाः पूर्वजाः स्मृताः॥

इति स्मरणात्। ये च विभक्ताः पित्रा सह संसृष्टाः, पितुरूर्ध्वं तैः सार्द्धं विभक्तजो विभजेत्।

यथाह मनुः, (अ० ९ श्लो० २१६ उ०)

संसृष्टास्तेन वा ये तु विभजेत स तैः सह।इति।

मि० अव० पितुरूर्ध्वं तु विभक्तेषु पश्चादुत्पन्नस्य कथं विभागस्तेनेत्यत आह।

या० दृश्याद्वा तद्विभागः स्यादायव्ययविशोधितात्॥१२२॥

मि० *तस्य, पितरि प्रेते (भ्रातृ)विभागसमयेऽस्पष्टगर्भ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भार्यायां मातरि) भ्रातृविभागोत्तरकालमुत्पन्नस्य, विभागस्ताद्विभागः। कुत इत्यत आह। दृश्याद् भ्रातृभिर्गृहीताद्धनात्। कीदृशात्? आयव्ययविशोधितात्। आयः प्रतिदिवसं प्रतिमासं प्रत्यब्दं वा यदुत्पद्यते, व्ययः पितृकृतर्णापाकरणं, ताभ्यामायव्ययाभ्यां यच्छोधितं तस्मात् उद्धृत्य तद्भागो दातव्यः स्यात्। एतदुक्तं भवति। प्रातिस्विकेषु भागेषु तदुत्थमायं प्रवेश्य पितृकृतम् ऋणमपनीयावशिष्टेभ्यः स्वेभ्यः भागेभ्यः किञ्चित्किञ्चिदुद्धृत्य विभक्तजस्य भागः स्वभागसमः कर्तव्य इति।

एतच्च विभागसमये भ्रातृभार्यायामप्रजासि अस्पष्टगर्भायां विभागादूर्ध्वमुत्पन्नस्यापि वेदितव्यम्। स्पष्टगर्भायां तु प्रसवं प्रतीक्ष्य विभागः कर्तव्यः।

यथाह वसिष्ठः, अथ भ्रातॄणां दायविभागो, याश्चानपत्याः स्त्रियस्तासामापुत्रलाभादिति।

गृहीतगर्भाणामाप्रसवात्। प्रतीक्षणीयामिति योजनीयम् ॥ १२२ ॥

बा० १। विभागोत्तरेति। प्रथमतृतीयकालयोरित्यर्थः। *पुत्रस्येत्युपलक्षणं पुत्रयोरित्यादेरपि। एवमग्रेऽपि। * पुत्रेषु, सत्सु। अत एवाह *पश्चादिति। भावघञि विभागभागित्यनुपपन्नमसम्बद्धं च अत आह *विभज्यते इति। कर्मणि घञिति भावः। साकाङ्क्षत्वात्प्रत्यासत्तेराह * पित्रोरिति। विभागो धनम्। तात्पर्यार्थमाह * पित्रोरूर्ध्वमिति। प्रायणादिति शेषः। *अंशं, तत्त्वेन स्थितं सर्वम्। पित्रोरित्युक्तं सफलयति * मातृभागमिति। चस्त्वर्थे। तत्सद्भावे तु तं न लभते इति भावः। सवर्णा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यामित्युक्तेः फलमाह * असवर्णायामिति । * स्वांशमेवेति । मुख्यांशमेवेति पाठान्तरम् । ब्राह्मणात् क्षत्रियायामुत्पन्नस्य पादोनं, वैश्यायामर्द्धं, शूद्रायां पादः, क्षत्रियाद्वैश्यायामुत्पन्नस्य पादद्वयं, शूद्रायां पादः, वैश्याच्छूद्रायामुत्पन्नस्य एकः पाद इत्यर्थः । तद्वक्ष्यति चतुस्त्रिद्व्येकभागाः स्युरिति । * पित्र्यादि-ति । धनादित्यर्थः । पित्र्यमिति पाठान्तरम् ।

२। विशेषमाह *मातुरिति । मातृकं त्विति पाठान्तरम् । अ-यमपि दुहितृसत्त्वे इति बोध्यम् । मातुर्दुहितर इत्यस्य मातृधन-मात्रशेषत्वात् । उक्तमूलस्य तदूर्ध्वं तस्य धनभाक्त्वमितिपरत्वं कुतः, जीवत्येव तस्मिन् तद्भाक्त्वपरत्वं कुतो नेत्याशङ्क्य प-रिहरन्मौलार्थे मानमाह * एतदेवेति । पित्रोरूर्ध्वमित्युक्तमेवे-त्यर्थः । * हरेत्, गृह्णीयात् । अनेन तदुत्तरकालिकत्वं स्पष्टमे-वोक्तम् ।

३। नन्वेवमपि पित्रोरिति प्रागुक्तमयुक्तं, पितुरिति वाच्यम् । अत्र पित्र्यमित्यस्यैवोक्तत्वात् । तस्य च पितुरागतमिति शब्दा-र्थात् । अत आह *पित्रोरिति । एकशेषं कृत्वा तद्धित इति भावः । इदं फलितार्थकथनम् । ननूभयथापि पित्र्यमित्यस्य तुल्यत्वादत्र तथा व्याख्याने एव न मानम् अत आह *अनीश इति । वाह-स्पत्ये अत्र पित्रोरिति द्विवचननिर्देशात्तथेति भावः । अस्फु-त्वादस्योक्तार्थपरत्वायेदं वाक्यभेदेन व्याचष्टे * विभक्तयोरि-ति । पूर्वपुत्रेभ्य इति भावः । अन्यथाऽनुपपत्तेः प्रकरणाच्चेदमु-क्तम् । भागे इति पाठः । विभागे इत्यपपाठः । स्मृतावसत्त्वात् । पूर्वज इत्यस्यार्थमाह * विभागादिति । द्वितीयवाक्यमाह *वि-भक्तजश्चेति । विभक्ताभ्यां पितृभ्यां जात इत्यर्थः । * भ्रातृ-पूर्वोत्पन्नस्य । तथा च विभक्तपुत्रांशान्न्यूनत्वे ऽधिकत्वे वा वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भक्तजस्तावदेव लभते, न तत्पूर्वजा अधिकं गृह्णीयुर्न्यूनं वा पूरयेयुः। अयमेवार्थो मनुवाक्ये एवेन सूचितः।

४। साधरणोक्त्या तन्त्रेण मूलस्यैवार्थान्तररूपविशेषमाह * तथेति। बृहस्पतिमाह * पुत्रैरिति। अस्य विभक्तेनेत्यत्रैवान्वयः। यद्वा पूर्वपुत्राणां विद्यमानत्वेऽपीत्यर्थः। सहैव दशभिः पुत्रैरितिवत्। स्वयमिति स्पष्टार्थम्। अत्रार्जितमिति सामान्योक्त्या धनम् ऋणं च ग्राह्यम्। अत एव बृहस्पतिरेव,

यथा धने तथर्णेऽपि दानाधानक्रयेषु च।
परस्परमनीशास्ते त्यक्त्वा ऽशौचोदकक्रियाम्॥ इति।

विपदस्वारस्यात्तथैव विशेषान्तरमाह *येचेति। पित्रा सहेत्यस्य मध्यमणिन्यायेनान्वयः। पुनः संसृष्टाश्चेत्यर्थः। *पितुरिति। प्रायणादिति शेषः। *संसृष्टा इति। प्रागुक्तोत्तरार्द्धमिदम्। अत एव पूर्वसमुच्चये वाशब्दः * तेन वेति। पित्रेत्यर्थः। * सतैरिति। विभक्तजः पूर्वजैरित्यर्थः।

उ० ५। यद्यप्यन्यानिबन्धकारैरत्र दृश्याद्वेति पूर्वत्रैव विकल्पपरतया व्याख्यातं, कैश्चिदन्यैश्चैकवाक्यतयैव व्याख्यातं, तथापि तन्न युक्तम्। उक्तस्मृतिविरोधेन विकल्पासम्भवात्। आनर्थक्यस्यान्यतरस्य स्पष्टत्वेनासम्बन्धेन वापदानर्थक्येन चैकवाक्यत्वासम्भवात्। न्यूनतापत्तेश्च। तदेतदभिप्रेत्योत्तरार्धस्यान्यदवतरणमाह * पितुरिति। प्रायणादिति शेषः। * पुत्रेष्विति। पितृमरणादत्यवहितपूर्वमेव गर्भे सति विभागसमयेऽपि मातुरस्पष्टगर्भात्वेन तदानीमज्ञानेन तदव्यवहितमिति भावः। वाशब्दः समुच्चये। अवधारणे वा। आयव्ययविशोधिताद् दृश्यादेव तद्विभाग इत्यर्थः। ननु तद्विभाग इत्यस्य कथमुक्तार्थोऽतस्तस्येत्यस्यार्थमाह * पितरीति। भ्रातृभिरित्यस्य विभागे एवान्वयः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्कर्तृकविभागेत्यर्थः। भ्रातृविभागेति पाठः प्रचुरः। मातरि सत्यां पितुरसत्त्वान्मातुर्विभागासम्भवादवाधिं पृच्छति * कुत इति। दृश्यादित्यस्य तात्पर्यार्थमाह * भ्रातृभिरिति । पदार्थवाह * आय इति । वृद्धिभेदस्य प्रागुक्त्या विनिगमनाविरहादाह *प्रतिदिवसमिति । वाक्यार्थमाह *ताभ्यामिति । शोधितं परिष्कृतम् । तथा च प्रकृते विभागोत्तरं प्रातिस्विकांशैः कृष्यादिषु क्रियमाणेषु यो लाभः स आयः । पितृकृतऋणं स्वकुटुम्बपोषणादिसाधकं तदपाकरणं व्यय इति भावः।

६। आयव्ययरहितादित्यर्थनिरासायाह *एतदिति। *भागेषु, सत्सु । *तदुत्थं, ततः कृष्यादितो लब्धम् । स्वस्वांशमध्ये इति शेषः। *प्रवेश्य,प्रक्षिप्य। *अपनीय,अपनीय च। *स्वेभ्यः, स्वीयेभ्यः सर्वेभ्य इत्यर्थः। *किञ्चिदिति । यस्माद्यस्मादंशाद्यावद्यावदुचितं तावत्तावद् गृहीत्वेत्यर्थः। अत एवाह *स्वभागसम इति । अयं भावः। विभक्तमपि तत्पितृधनमविभक्तमिव। यतो गर्भस्थितमप्यपत्यमपत्यत्वादेव पितृधनांशार्हम्। मातुः पितृमरणसमये एव गर्भे सति विभागसमये चाव्यक्ते गर्भे तस्मादेव गर्भादुत्पन्नमपत्यं तस्मात्पितृधनात्तदुत्थलाभाच्च भागार्हमिति। तत्रापि पुत्रसत्त्वे समांशभागित्वं पुत्रीसत्त्वे तु स्वस्वजातिनिवन्धनादंशाच्चतुर्थांशभागित्वं वक्ष्यमाणं बोध्यम्।

७। उक्तन्यायं युक्तितौल्यादन्यत्रातिदिशति *एतच्चेति। भ्रातुर्यस्य कस्य चित्प्रमीतस्य उक्त एव प्रकारः। अप्रजसीति भार्याविशेषणम् । अप्रजस्येति पाठे यथासंख्यमुभयोरुभयं विशेषणम्। न्यूनतानिरासाय विशेषं सूचितम् उभयत्राप्याह *सस्त्रीति । * अनपत्या इति । बहिरविद्यमानपुत्रा इत्यर्थः। स्त्रियोऽत्र भ्रातृभार्याः अत एवाह *आपुत्रेति । आङ् मर्यादायाम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत एव तदर्थमाह * गृहीतेति। पुत्रेत्युपलक्षणमित्याह *आप्रसवादिति। वाक्यार्थपूर्त्तये शेषमाह *प्रतीक्षणीयमिति॥१२२॥

मि० विभक्तजः पित्र्यं मातृकं च सर्वं धनं गृह्णातीत्युक्तम्। तत्र यदि विभक्तः पिता माता वा विभक्ताय पुत्राय स्नेहवशादाभरणादिकं प्रयच्छति तत्र विभक्तजेन दानप्रतिषेधो न कर्तव्यो नापि दत्तं प्रत्याहर्तव्यमित्याह।

पितृभ्यां यस्य यद्दत्तं तत्तस्यैव धनं भवेत्।

मि० मातापितृभ्यां विभक्ताभ्यां पूर्वं विभक्तस्य पुत्रस्य यद्दत्तमलङ्कारादि तत्तस्यैव पुत्रस्य न विभक्तजस्य स्वं भवति। न्यायसाम्याद्विभागात्प्रागपि यस्य यद्दत्तं तत्तस्यैव। तथा, असति विभक्तजे विभक्तयोः पित्रोरंशं तदूर्ध्वं विभजतां यस्य यद्दत्तं तत्तस्यैव नान्यस्येति वेदितव्यम्।

मि० अव० जीवद्विभागे स्वपुत्रसमांशित्वं पत्नीनामुक्तं यदि कुर्यात्समानंशानित्यादिना। पितुरूर्ध्वं विभागेऽपि मातुः स्वपुत्रसमांशित्वं दर्शयितुमाह।

पितुरूर्ध्वं विभजतां माताऽप्यंशं समं हरेत्॥१२३॥

मि० पितुरूर्ध्वं पितुः प्रायणादूर्ध्वं विभजतां माताऽपि स्वपुत्रांशसमम् अंशं हरेत, यदि स्त्रीधनं न दत्तम्। दत्ते त्वर्द्धांशहारिणीति वक्ष्यते॥ १२३॥

बा०१। व्यवहितसङ्गतिं सूचयन्नुत्तरावतरणमाह *विभक्तज इति। विभागानन्तरं मातापित्रोः सतोरेव य उत्पन्नः स विभक्तजो मातापितृमरणानन्तरं तयोर्धनं गृह्णातीत्युक्तं विभक्तेषु सुतो जात

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यनेनेत्यर्थः । मातृकांशः प्राग्वत् । * तत्र, तस्मिन्सति । माता वेति विकल्पो दाने, न तु विभागे । पितुः पुत्रेभ्यो विभागे मातुस्तस्यार्थासिद्धत्वात् । पृथक् तस्या अविभागाच्च । अत एव पुनस्तत्र विभक्तेति विशेषणानुक्तिः । ताभ्योऽपि पुत्रवत् पृथगंशं दत्त्वा तासां पृथक्कार इति तु न । जायापत्योर्न विभागो विधीयते इति हारीताद्युक्तेः । एवं च पत्न्यः कार्याः समांशका इत्यस्य बहुवचनात् पत्नीत्युक्तेश्च प्रतिपत्नि पुत्रांशसमानमंशं गृह्णीयादित्यर्थो न तु तथेति प्रागुक्तं न विस्मर्तव्यमिति बोध्यम् । * तत्र, विषये ।

पितामहेन यद्दत्तं पित्रा वा प्रीतिपूर्वकम् ।
तस्य तन्नापहर्त्तव्यं मात्रा दत्तं च यद्भवेत् ॥ इति ।
यस्येति षष्ठी शेषत्वाय ।

२। युक्तिसाम्यादन्यत्रातिदेशमाह *न्यायेति । अस्याग्रेऽप्यन्वयः । अपिः ऊर्ध्वसमुच्चये । एवेन विभाज्यत्वव्यवच्छेदः ।

३। अतिदेशान्तरं तत एवाह * तथेति । तद्वदित्यर्थः । विभक्तजे ऽसतीत्यन्वयः । तदूर्ध्वं, तन्मरणानन्तरम् । विभजतामिति निर्धारणे षष्ठी । न केवलं विभक्तजे पुत्रे सति विभागादूर्ध्वं प्राग्वा यस्य यद्दत्तं तत्तस्यैवेति नियमः, किं तु विभक्तजपुत्राभावेऽपि विभक्ताभ्यां ताभ्यां स्वपुत्रादिभ्यो यत्नीत्या दत्तं तत्तयोर्मरणोत्तरं तद्धनं विभजतां मध्ये यस्मै दत्तं तस्यैव न विभागार्हमित्यर्थः ।

उ० ४। व्यवहितसङ्गतिमाह *जीवादिति । स्वपदं स्पष्टार्थम् । पितुरिति प्राग्वत् । *पत्नीनां,सर्वासाम् । *दर्शयितुमिति । दर्शयन्नित्यर्थः । *प्रायणादिति । तादित्यादिः । *विभजतामिति । तद्धस्त्वन्वयः षष्ठी चानादरे इति षष्ठी ।ताननादृत्येत्यर्थः । तद्धस्त्वत्वस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सत्त्वात्। अत एव हरेदित्युक्तिः। अपेस्तत्रैवान्वयः। स च जीवद्विभागे समांशित्वसमुच्चायकः। अत एव तत्तुल्यतया एकत्वमत्र अविवक्षितम्। किं च अत्र मातुरुद्देश्यत्वात्तदुद्देशेन हरणस्य अप्राप्तत्वेन विधेयत्वादेकत्वमविवक्षितं, ग्रहं संमार्ष्टीतिवत्। यदि कुर्यादित्यत्र तु तेनैवाद्यपादेनांशभागित्वस्य प्राप्तत्वात्तदुद्देशेन पत्न्या विधानात्तद्गतं बहुत्वं विवक्षितं, पशुना यजेतेतिवत्। एतेन विपरीतशङ्का निरस्ता। अत एव तदनुरोधेनावतरणे पत्नीनामित्युक्तम्। यद्वा यथाश्रुतापिना जननीभिन्नसमुच्चयः। विष्णुरपि, मातरः पुत्रभागानुसारिभागहारिण्य इति।

५। प्राग्वच्छेषमाह *यदीति। प्रकृतानुरोधेनाह *अर्धांशहारिणीति। * वक्ष्यते इति। सौदायिके दत्ते त्वर्द्धं प्रकल्पयेदित्यनेनेति भावः। प्राग्वच्छेषः।

अत एव स्मृत्यन्तरम्,

जनन्यस्वधना पुत्रैर्विभागेंऽशं समं हरेत्। इति।

अस्वधना प्रातिस्विकस्त्रीधनशून्या। तत्र जननीग्रहणमपुत्राणां मातृसपत्नीनां पितामहीनां चोपलक्षणम्।

अत एव व्यासः,

असुताः स्वपितुः पत्न्यः समानांशाः प्रकीर्तिताः।
पितामह्यश्च ताः सर्वा मातृतुल्याः प्रकीर्तिताः॥ इति।

एवं सति प्रकृते मातृशब्दः पत्नीमात्रपर इत्यपि सुवचम्।

तिस्रः पूज्याः पितुः पक्षे तिस्रो मातामहे तथा।
इत्येता मातरः प्रोक्ताः पितुर्मातुः स्वसाऽष्टमी॥

इति चतुर्विंशतिमतवचनं, पितृपत्न्यः सर्वा मातर इति सुमन्तुवचनमप्यत्र साधकम्। एवं च सापत्नमातुरपि अंशभागित्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मिति सिद्धम् । एतेनात्र मातृपदोक्त्या सापत्नमातुरंशभागित्वं नेति निर्वचनः प्राच्यसिद्धान्तः परास्त इति दिक् ॥ १२३ ॥

मि० पितरि प्रेते यद्यसंस्कृता भ्रातरः सन्ति तत्संस्कारे कोऽधिक्रियते इत्यत आह।

या० असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः।

मि० पितुरूर्ध्वं विभजद्भिर्भ्रातृभिरसंस्कृता भ्रातरः समुदायद्रव्येण संस्कर्तव्याः।

मि० अव० असंस्कृतासु भागिनीषु विशेषमाह।

या० भगिन्यश्च निजादंशाद्दत्त्वांऽशं तु तुरीयकम् ॥१२४॥

मि० अस्यार्थः । भगिन्यश्चासंस्कृताः संस्कर्तव्या भ्रातृभिः । किं कृत्वा निजादंशाच्चतुर्थमंशं दत्त्वा। अनेन दुहितरोऽपि पितुरूर्ध्वम् अंशभागिन्य इति गम्यते। तत्र निजादंशादिति प्रत्येकं परिकल्पितादंशादुद्धृत्य चतुर्थांशो दातव्य इत्ययमर्थो न भवति। किंतु यज्जातीया कन्या तज्जातीयपुत्रभागाच्चतुर्थांशभागिनी सा कर्तव्या।

एतदुक्तं भवति। यदि ब्राह्मणी सा कन्या तदा ब्राह्मणीपुत्रस्य यावानंशो भवति तस्य चतुर्थांशस्तस्या भवतीति। तद्यथा। यदि कस्यचिद्ब्राह्मणस्यैव एका पत्नी पुत्रश्चैकः कन्या चैका, तत्र पित्र्यं सर्वमेव द्रव्यं द्विधा विभज्य तत्रैकं भागं चतुर्धा विभज्य तुरीयमंशं कन्यायै दत्त्वा शेषं पुत्रो गृह्णीयात्।

यदा तु द्वौ पुत्रौ एका कन्या तदा पितृधनं सर्वं त्रेधा विभज्य एकं भागं चतुर्धा विभज्य तुरीयमंशं

Nepal Sanskrit University; Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कन्यायै दत्त्वा शेषं द्वौ पुत्रौ विभज्य गृह्णीतः।

अथ त्वेकः पुत्रो द्वे कन्ये तदा पित्र्यं धनं त्रेधा विभज्य एकं भागं चतुर्धा विभज्य तत्र द्वौ भागौ द्वाभ्यां कन्याभ्यां दत्त्वाऽवशिष्टं सर्वं पुत्रो गृह्णातीति। एवं समानजातीयेषु समविषमेषु भ्रातृषु भगिनीषु च योजनीयम्।

यदा तु ब्राह्मणीपुत्र एकः क्षत्रियाकन्यैका तत्र पित्र्यं धनं सप्तधा विभज्य क्षत्रियापुत्रभागांस्त्रींश्चतुर्धा विभज्य तुरीयांशं क्षत्रियाकन्यायै दत्त्वा शेषं ब्राह्मणीपुत्रो गृह्णाति।

यत्र तु द्वौ ब्राह्मणीपुत्रौ क्षत्रियाकन्या चैका तत्र पित्र्यं धनमेकादशधा विभज्य तेषु क्षत्रियापुत्रभागान् त्रीन् चतुर्धा विभज्य चतुर्थमंशं क्षत्रियाकन्यायै दत्त्वा शेषं सर्वं ब्राह्मणीपुत्रौ विभज्य गृह्णीतः। एवं जातिवैषम्ये भ्रातॄणां भगिनीनां च संख्यायाः साम्ये वैषम्ये च सर्वत्रोहनीयम्।

न च निजादंशाद्दत्त्वांऽशं तु तुरीयकमिति तुरीयांशाविवक्षया संस्कारमात्रोपयोगि द्रव्यं दत्त्वेति व्याख्यानं युक्तम्।

मनुवचनविरोधात् (अ० ९. श्लो० ११८.)

स्वेभ्योंऽशेभ्यस्तु कन्याभ्यः प्रदद्युर्भ्रातरः पृथक्।
स्वात्स्वादंशाच्चतुर्भागं पतिताः स्युरदित्सवः॥ इति।

अस्यार्थः। ब्राह्मणादयो भ्रातरो ब्राह्मणीप्रभृतिभ्यो भगिनीभ्यः स्वेभ्यः स्वजातिविहितेभ्योंऽशेभ्यः "चतुरोंऽशान् हरेद्विप्र" इत्यादिवक्ष्यमाणेभ्यः स्वात्स्वां-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दंशात् आत्मीयात्मीयभागात् चतुर्थं चतुर्थं भागं दद्युः। न चात्मभागादुद्धृत्य चतुर्थांशो देय इत्युच्यते। किंतु स्वजातिविहितादेकस्मादंशात्पृथक्पृथगेकस्यै कन्यायै चतुर्थांऽशो देय इति । जातिवैषम्ये संख्यावैषम्ये च विभागक्लृप्तिरुक्तैव। पतिताः स्युरदित्सव इत्यकरणे प्रत्यवायश्रवणादवश्यं दातव्यता प्रतीयते।

अत्रापि चतुर्भागवचनमविवक्षितं संस्कारोपयोगिद्रव्यदानमेव विवक्षितमिति चेन्न। स्मृतिद्वयेऽपि चतुर्थांशदानाविवक्षायां प्रमाणाभावात् अदाने प्रत्यवायश्रवणाच्चेति।

यदपि कैश्चिदुच्यते। अंशदानविवक्षायां बहुभ्रातृकाया बहुधनत्वं बहुभगिनीकस्य च निर्धनता प्राप्नोतीति, तत् उक्तरीत्या परिहृतमेव।न ह्यत्रात्मीयाद्भागादुद्धृत्य चतुर्थांशस्य दानमुच्यते, येन तथा स्यात्। अतोऽसहायमेधातिथिप्रभृतीनां व्याख्यानमेव चतुरस्रं न भारुचेः । तस्मात्पितुरूर्ध्वं कन्याऽप्यंशभागिनी । पूर्वं चेद्यत्किञ्चित्पिता ददाति तदेव लभते विशेषवचनाभावादिति सर्वमनवद्यम् ॥ १२४ ॥

बा० १। पितुरूर्ध्वमित्यनेन प्रसङ्गसङ्गतिमाह *पितरीति। *संन्तीति। तदेति शेषः। असंस्कृतानामनधिकारादाह *पूर्वसंस्कृतैरिति। तत एवाह * पितुरिति। प्रायणादिति शेषः। * संस्कृताः, विवाहान्तसंस्कारैः। न च विभागप्रकरणे इदमयुक्तमिति वाच्यम्। पूर्वसंस्कृतैरिति विशेषणेन यथा स्वसंस्काराः पित्रा समुदायद्रव्येण कृतस्तथा तेषामपि कार्य इति स्ववत् तत्कृत्यस्या- वश्यकत्वबोधनद्वारा आदौ तथैव समुदायद्रव्येण तत् कृत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(७) न्यायरत्नमाला-श्रीपार्थसारथिमिश्र वि० सं० (मीमांसा २

(८) ब्रह्मसूत्रभाष्यम्-बादरायणप्रणीत-वेदान्तसूत्रस्य यतीन्द्र श्रीमद्विज्ञान-भिक्षुकृत व्याख्यानम् । सम्पूर्णम् । (वेदान्तः) ६

(९) स्याद्वादमञ्जरी-मल्लिषेणानिर्मिता सम्पूर्णा । (जैनदर्शनम्) २

(१०) सिद्धित्रयम्-विशिष्टाद्वैत-ब्रह्मनिरूपण-परम्-श्रीभाष्यकृतां परमगुरुभिः श्री ६ श्रीयामुनमुनिभिर्विरचितम् । सम्पूर्णम् (वेदान्तः) १

(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टा-रकाचार्यसंगृहीतः। आचार्यचित्सुख-मुनिविरचितव्याख्योपेतः (वेदान्तः) ४

(१२) विभक्त्यर्थनिर्णयःन्यायानुसारिप्रथमादि-सप्तविभक्तिविस्तृतविचाररूपः म० म० श्रीगिरिधरोपाध्यायरचितः । सम्पूर्णः (न्यायः) ५

(१३) विधिरसायनम् । श्रीअप्पयदीक्षितकृतम् । सं० (मीमांसा) २

(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्ट-सोमेश्वरविरचिता । (मीमांसा) १६

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता । (वेदान्तः) २

(१६) मीमांसाबालप्रकाशः (जैमिनीयद्वादशा-ऽध्यायार्थसंग्रहः) श्रीभट्टनारायणात्मज-भट्टशङ्करविरचितः । (मीमांसा) २

(१७) प्रकरणपञ्चिका (प्रभाकरमतानुसारि-मीमांसादर्शनम्) महामहोपाध्यायश्रीशालिकनाथमिश्रविरचितं, श्रीशङ्करभट्टकृतो मीमांसासारसंग्रहश्च सम्पूर्णः (मीमांसा) ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीसदानन्दव्यासप्रणीतस्तत्कृतव्याख्यासमलङ्कृतश्च । (वेदान्त) ३

(१९) कात्यायनश्रौतसूत्रम् । महामहोपाध्यायश्रीकर्काचार्यविरचितभाष्यसहितम् । १३

(२०) ब्रह्मसूत्रभाष्यम् । श्रीभास्कराचार्यविरचितम् (वेदान्तः) १

(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम् । आनन्दपूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया (विद्यासागरी) ति प्रसिद्धया समेतम् । (वेदान्तः) १३

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता । १

(२३) श्रीलक्ष्मीसहस्रम्-बालबोधिनीव्याख्यया-ऽवतरणिकया च सहितम् । ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दंशात् आत्मीयात्मीयभागात् चतुर्थं चतुर्थं भागं दद्युः। न चात्मभागादुद्धृत्य चतुर्थांशो देय इत्युच्यते। किंतु स्वजातिविहितादेकस्मादंशात्पृथक्पृथगेकस्यै कन्यायै चतुर्थांऽशो देय इति । जातिवैषम्ये संख्यावैषम्ये च विभागक्लृप्तिरुक्तैव। पतिताः स्युरदित्सव इत्यकरणे प्रत्यवायश्रवणादवश्यं दातव्यता प्रतीयते।

अत्रापि चतुर्भागवचनमविवक्षितं संस्कारोपयोगिद्रव्यदानमेव विवक्षितमिति चेन्न। स्मृतिद्वयेऽपि चतुर्थांशदानाविवक्षायां प्रमाणाभावात् अदाने प्रत्यवायश्रवणाच्चेति।

यदपि कैश्चिदुच्यते। अंशदानविवक्षायां बहुभ्रातृकाया बहुधनत्वं बहुभगिनीकस्य च निर्धनता प्राप्नोतीति, तत् उक्तरीत्या परिहृतमेव।न ह्यत्रात्मीयाद्भागादुद्धृत्य चतुर्थांशस्य दानमुच्यते, येन तथा स्यात्। अतोऽसहायमेधातिथिप्रभृतीनां व्याख्यानमेव चतुरस्रं न भारुचेः। तस्मात्पितुरूर्ध्वं कन्याऽप्यंशभागिनी । पूर्वं चेद्यत्किञ्चित्पिता ददाति तदेव लभते विशेषवचनाभावादिति सर्वमनवद्यम् ॥ १२४ ॥

स० बा० १।पितुरूर्ध्वमित्यनेन प्रसङ्गसङ्गतिमाह *पितरीति।*स-न्तीति।तदेति शेषः।असंस्कृतानामनधिकारादाह *पूर्वसंस्कृतै-रिति। तत एवाह * पितुरिति। प्रायणादिति शेषः। * -स्कृताः, विवाहान्तसंस्कारैः। न च विभागप्रकरणे इदमयुक्तमि-ति वाच्यम्। पूर्वसंस्कृतैरिति विशेषणेन यथा स्वसंस्कारः पित्रा समुदायद्रव्येण कृतस्तथा तेषामपि कार्य इति स्ववत् तत्कृत्यस्या-वश्यकत्वबोधनद्वारा आदौ तथैव समुदायद्रव्येण तत् कृत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(७) न्यायरत्नमाला–श्रीपार्थसारथिमिश्र वि० सं० (मीमांसा २

(८) ब्रह्मसूत्रभाष्यम्–बादरायणप्रणीत-वेदान्तसूत्रस्य यतीन्द्र श्रीमद्विज्ञान-भिक्षुकृत व्याख्यानम् । सम्पूर्णम् । (वेदान्तः) ६

(९) स्याद्वादमञ्जरी–मल्लिषेणानिर्मिता सम्पूर्णा । (जैनदर्शनम्) २

(१०) सिद्धित्रयम्–विशिष्टाद्वैत–ब्रह्मनिरूपण-परम्–श्रीभाष्यकृतां परमगुरुभिः श्री ६ श्रीयामुनमुनिभिर्विरचितम् । सम्पूर्णम् (वेदान्तः) १

(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टा-रकाचार्यसंगृहीतः। आचार्यचित्सुख-मुनिविरचितव्याख्योपेतः (वेदान्तः) ४

(१२) विभक्त्यर्थनिर्णयःन्यायानुसारिप्रथमादि-सप्तविभक्तिविस्तृतविचाररूपः म० म० श्रीगिरिधरोपाध्यायरचितः । सम्पूर्णः (न्यायः) ५

(१३) विधिरसायनम् । श्रीअप्पयदीक्षितकृतम् । सं० (मीमांसा) २

(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्ट-सोमेश्वरविरचिता । (मीमांसा) १६

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता । (वेदान्तः) २

(१६) मीमांसाबालप्रकाशः (जैमिनीयद्वादशा-ऽध्यायार्थसंग्रहः) श्रीभट्टनारायणात्मज-भट्टशङ्करविरचितः । (मीमांसा) २

(१७) प्रकरणपञ्चिका (प्रभाकरमतानुसारि–मीमांसादर्शनम्) महामहो-पाध्यायश्रीशालिकनाथमिश्रविरचितं, श्रीशङ्करभट्टकृतो मीमांसा-सारसंग्रहश्च सम्पूर्णः (मीमांसा) ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीसदानन्दव्यासप्रणीत-स्तत्कृतव्याख्यासमलङ्कृतश्च । (वेदान्त) ३

(१९) कात्यायनश्रौतसूत्रम् । महामहोपाध्यायश्रीकर्का-चार्यविरचितभाष्यसहितम् । १३

(२०) ब्रह्मसूत्रभाष्यम् । श्रीभास्कराचार्यविरचितम् (वेदान्तः) १

(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम् । आनन्दपूर्ण-विरचितया खण्डनफक्किकाविभजनाख्यया व्या-ख्यया (विद्यासागरी) ति प्रसिद्धया समेतम् । (वेदान्तः) १३

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता । १

(२३) श्रीलक्ष्मीसहस्रम्–बालबोधिनीव्याख्यया-ऽवतरणिकया च सहितम् । ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२४ ब्रह्मसूत्रवृत्तिः मरीचिका श्रीव्रजनाथभट्टकृता (वेदान्त)

२५ क्रोडपत्रसंग्रहः । अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्योः प्रत्यक्षानुमानमाथुर्यो व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि : (न्यायः)

२६ ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम् । श्रीसुन्दरभट्टरचितसिद्धान्तसेतुकाऽभिधटीकासहितश्रीदेवाचार्यप्रणीतसिद्धान्तजाह्नवीयुतम्

२७ षड्दर्शनसमुच्चयः । बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शन संक्षेपः । मणिभद्रकृतटीकया सहितः । हरिभद्रसूरिकृतः ।

२८ शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः । प्रमेयरत्नार्णवश्च

२९ अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्याजागदीशी टीका ।

३० वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा सस्कारप्रकाशात्मकः ।

३१ वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः

३२ स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरत्रिपाठिसंकलितः ।

३३ वेदान्तरत्नमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्यकृता ।

३४ प्रस्थानरत्नाकरः । गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितः

३५ वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्वार्काचार्यविरचितम् ।

३६ योगदर्शनम् । परमहंसपरिव्राजकाचार्य-नारायणतीर्थविरचित-योगसिद्धान्तचन्द्रिका-समाख्यया संवलितम् ।

३७ वेदान्तदर्शनम् । परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वती स्वामिकृत ब्रह्माऽमृतवर्षिणी समाख्य व्याख्यासंवलितम् ।

३८ विश्वप्रकाशः । कोशः । विद्वद्वर श्रीमहेश्वरसुरिविरचितः ।

३९ श्रीसुबोधिनी । श्रीवल्लभाचार्यविनिर्मिता । श्रीमद्भागवतव्याख्या गोस्वामीश्रीविठ्ठलनाथदीक्षितविरचित टिप्पणीसहिता ।

४० वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः पुजाप्रकाशः ।

४१ वेदान्तसिद्धान्तसंग्रहः । श्रुतिसिद्धान्तापरनामकः । श्रीब्रह्मचारिवनमालिमिश्रविरचितः । द्वैताद्वैतदर्शनानुगतः ।

४२ स्वानुभवादर्शः । श्रीमत्परमहंसपरिव्राजकाचार्य नारायणाश्रमशिष्य …
स्वकृतटीकाविभूषितश्च ।

४३ याज्ञवल्क्यस्मृतिः । बालम्भट्टीसमाख्य व्याख्यासमलङ्कृतमिताक्षरासहि…

पत्रादिप्रेषणस्थानम् } हरिदास … चौखम्बा, बनार…

११०४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

October 1912.

THE

CHOWKHAMBÂ SANSKRIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 178.

धर्मशास्त्र १५२

व्यवहार- बालंभट्टी

इति प्रसिद्धया लक्ष्मीनामिकया

पायगुण्डे इत्युपनामकेन बालंभट्टेन स्वपत्न्याः लक्ष्मीदेव्याः

स्मारकत्वेन तन्नाम्ना रचितया बृहत्या टीकया सहिता

मिताक्षरा

श्रीयुतगोविन्ददासमहाशयप्रदर्शितरीत्या

पर्वतीयनित्यानन्दपन्तेन परिष्कृत्य संशोधिता ।

VYAVAHÂRA-BÂLAMBHATTI

THE EXTENSIVE COMMENTARY ON THE MITÂKSHARÂ

WITH THE ORIGINAL

BY

Bâlambhatta Páyagunde

EDITED BY

Pandit Nityanand Pant Parvatiya

Under the supervision of Shri Govinda Das.

FASCICULUS VI.

PUBLISHED AND SOLD BY THE SECRETARY

CHOWKHAMBÂ SANSKRIT BOOK-DEPOT.

BENARES.

AGENTS:- OTTO HARRASSOWITZ; LEIPZIG:

PANDITA JYESHTHÂRAMA MUKUNDAJI BOMBAY:

PROBSTHAIN & CO., BOOKSELLERS, LONDON

Printed by Jai Krishna Dasa Gupta,

AT THE VIDYÂ VILÂSA PRESS

BENARES.

Price Rupee one.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ श्रीः ॥

-*-

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तबकः— १७८

१ अस्यां चौखम्बा-संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतकं सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एकःस्तबको मुद्रयित्वा प्रकाश्यते। एकस्मिन् स्तबके एक एव ग्रन्थो मुद्र्यते।

२ प्राचीना दुर्लभाश्चामुद्रिता मीमांसावेदान्तादिदर्शनव्याकरण धर्मशास्त्रसाहित्यपुराणादिग्रन्था एवात्र सुपरिष्कृत्य मुद्र्यन्ते।

३ काशिकराजकीयप्रधानसंस्कृतपाठशालाऽध्यापकाः पण्डिता अन्ये च शास्त्रदृष्टयो विद्वांस एतत्परिशोधनादिकार्यकारिणो भवन्ति।

४ भारतवर्षीयैः, ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्च एतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम्-मुद्राः ७ आणकाः ८

५ अन्यैर्देयं प्रतिस्तबकम् " " १ " ०

६ प्रापणव्ययः पृथग् नास्ति।

७ साम्प्रतं मुद्र्यमाणा ग्रन्थाः- मुद्रिताः स्तबकाः

(१) संस्काररत्नमाला। गोपीनाथभट्टकृता (संस्कारः) १

(२) शब्दकौस्तुभः। भट्टोजिदीक्षितकृतः (व्याकरणम्) १०

(३) श्लोकवार्तिकम्। भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृत-न्यायरत्नाकराख्यया व्याख्यया सहितम्। सम्पूर्णम्। १०

(४) भाष्योपबृहितं तत्त्वत्रयम्। विशिष्टाद्वैतदर्शनप्रकरणम्। श्रीमल्लोकाचार्य्यप्रणीतम्। श्रीनारायणतीर्थ विरचित भाट्टभाषा प्रकाशसहितम्। सं० (वेदान्त) २

(५) करणप्रकाशः। श्रीब्रह्मदेवविरचितः सम्पूर्णः (ज्योतिष) १

(६) भाट्टचिन्तामणिः। महामहोपाध्यायश्रीगागाभट्ट विरचितः। तर्कपादः (मीमांसा) २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो विभागः कार्यः न तु ततः प्रागिति बोधितत्वेनात्र सङ्गतेः । अन्यथा तद्विशेषणोपादानानर्थक्यं स्पष्टमेव । तदाह *समुदायेति । विवाहान्तसंस्कारैरिति शेषः । एवमग्रेऽपि । तुल्ययुक्त्या पातित्यादिदोषदुष्टे पितरि जीवत्यपि यदि पुत्रा एव विभागकर्त्तारस्तदा तत्राप्येवमेव बोध्यम् । एवमग्रेऽपि ।

उ. २। *विशेषमिति । विवाहान्तसंस्कारतौल्येऽपि विजातीयांशदानरूपम्, असंस्कृतासु पूर्वमंशदानं ततस्तासां संस्कार इति पूर्वक्रमान्यक्रमरूपं च विशेषमित्यर्थः । एतदर्थमेव मूले तुः ।

३। ननु नेदं संस्कारमात्रबोधकं तावत्, निजादित्यादिवैयर्थ्यापत्तेः । किं च पूर्वेणैव सामान्येन सिद्धे सम्पूर्णस्य वैयर्थ्यापत्तेः । नापि तुरीयांशदानमात्रं भगिनीमात्रोद्देशेन विधीयते । भगिन्य इति प्रथमायाः चशब्दस्य त्वाप्रत्ययस्य चासम्बद्धत्वापत्तेः । नापि पूर्वानुवृत्त्या पूर्वगृहीतादंशात्तुरीयमंशं दत्त्वा ताभ्यः, असंस्कृतास्तास्तैः संस्कार्या इति अर्थः । एवमपि चशब्दानर्थक्यस्य तदवस्थत्वात् । एतेन दत्त्वा तेनैव संस्कार्या न तु समुदायद्रव्येण नापि स्वांशेनेत्यर्थः इत्यपि निरस्तम् । तदा तदुपयोगिद्रव्यव्ययस्यैव प्राप्त्या अंशं तुरीयकमित्यस्यासङ्गतेश्च । दत्त्वेत्यस्य व्ययीकृत्येत्यर्थेऽप्ययमेव दोषः । निजमंशं परिभाव्य ततो वा तुरीयमंशं व्ययीकृत्यैव तथा ताः संस्कार्या इति नियामकमिदं पूर्वेण सिद्धत्वादिति पक्षेऽपि चशब्दासङ्गतिस्तदवस्थैव । वराय तं दत्त्वेत्यर्थस्तु प्रत्यासत्तिन्यायविरुद्धः ।

४। अथ वाक्यभेदेन भगिनीभ्यः सर्वाभ्यो निजादंशात्तं परिभाव्यादौ तमुपेक्ष्य तं विचार्य तत्रोद्यम्य वा तुरीयमंशं दत्त्वा स्वांशास्तैर्ग्राह्या असंस्कृतास्ताः संस्कार्याश्चेत्यर्थेन न कस्याप्यसङ्गतिरित्युच्येत, एवमपि पूर्वेणैव सिद्ध्या द्वितीयवाक्यानर्थक्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदवस्थमेव। भगिनीभ्यो निजादित्याद्येव ब्रूयात्। न चैवं विशेषेण अनेन पूर्वोक्तसंस्कारबाधापत्तिरिति वाच्यम्। तस्यासंस्कृतभ्रातृभगिनीसाधारणत्वेनास्य संस्कृतासंस्कृतभ्रातृभगिनीसाधारणत्वेन सामान्यविशेषभावाभावात्। परस्पराविषये द्वयोश्चारितार्थ्येनासंस्कृतभगिनीविषये विरोधाभावेन समावेशसंभवात्।

५। अथ तदनुवृत्त्यैव निजादंशात्तं दत्त्वा असंस्कृतास्ताः संस्कार्याः, संस्कारैः संस्कृतास्ताः संस्कार्या भूषणीयाश्चेत्यर्थस्याप्राप्तस्य विधानेन भगिनीमात्रदाने प्रत्यवायस्य मनूक्तत्वेन तदावश्यकत्वप्रतिपादनतात्पर्यकत्वेन स्फुटतया तदर्थबोधार्थकानुवादे च न कस्यापि वैयर्थ्यमित्युच्येत, एवमपि निजादित्यादि अयुक्तम्। अर्थस्य दुर्वचत्वात्।

६। तथा हि किं यावन्तो भ्रातरस्तावतः अंशान्विधाय स्वस्वांशाच्चतुर्यस्तुर्यो भागो देयस्तैः प्रत्येकमित्यर्थ उत भ्रातृभिः सर्वैः स्वस्वांशाच्चतुर्यं तुर्यं भागमुद्धृत्य देय इति। तत्राद्ये पक्षे भगिनीद्वित्वादावप्येकैकस्यैव प्रत्येकं चतुर्थो भागो देय इति सिद्धम्। द्वितीये पक्षे भगिनीद्वित्वादावपि सर्वैस्तैरुद्धृतं सकृद्भागमेव दत्तं सर्वा गृह्णीयुर्न तु प्रत्येकं पृथगुद्धार इति सिद्धम्।

७। तत्र न तावदाद्यं युक्तम्। यत एको भ्राता यत्र भगिन्यश्च बह्व्यस्तत्र पृथक् ताभ्यश्चतुर्थांशदाने भ्रातुराकिञ्चनता स्यात्। किं चैका भगिनी बहवश्च यत्र भ्रातरस्तत्र तैस्तथा दीयमाने तदपेक्षया तस्या अधिकांशलाभेन पुत्रापेक्षया कन्याया न्यूनांशप्रापकवचनाविरोधः।

८। नापि द्वितीयः। भगिन्या एकत्वे भ्रातॄणां च बहुत्वे पूर्वोक्तदोषस्यैव सत्त्वात्। किं च भ्रातुरेकत्वे भगिनीनां ब

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बहुत्वे भ्रातृभागस्यैकनिष्ठत्वेन तच्चतुर्थभागस्य स्वल्पत्वेन तत्राप्यंशकल्पनायामतितुच्छता स्यादंशस्येति दत्त्वांऽशं तु तुरीयकमित्यस्याविषयः । भवतु वा तथा, तथापि तद्वचनविरोधः । प्रथमपक्षे प्रत्येकमपि भगिनीनां तुरीयांशदानात्तुरीयांशमित्यादि विरुद्धम्, अत्र तु तदभावात्तद्विरुध्येतेतीति कोयमेतस्यार्थ इति चेत्तत्राह ।

९। *अस्यार्थ इति । एकवाक्यतया पूर्वानुषङ्गेणाह *भगिन्यश्चेति । चो भ्रातृसमुच्चये । * दत्त्वेति । नेदं संस्कारोपयोगिद्रव्यदानपरं भ्रातृद्रव्यसम्भवात् । तस्य भ्रातृकर्तृकत्वेन दानानपेक्षणाच्च । किं तु भ्रातुरंशवत्तासामपि ततः पृथगंशदानपरमित्यवश्यं वाच्यम् । तच्चायुक्तम् । तासां तद्वत्स्वत्वाभावात्। विशेषवचनाभावाच्च । तस्मादेतदनुवादान्यथानुपपत्त्यैव तत्स्वत्वाभावेऽपि तदनन्तरं तासामप्यंशोऽस्तीत्यनुमीयते । स च विनिगमनाविरहात् उभयोः । तदेव सामान्येनाह * तेन दुहितरोऽपीति । अन्यथैतदनुपपत्तिरुक्तैवेति भावः ।

१०। अथ प्रागुक्तचरममते पक्षद्वये दत्तदोषद्वयस्य वक्ष्यमाणनिराकरणोपपत्त्यर्थमुक्तं चरमैकदेश्युक्तमतद्वयानिराकरणपूर्वकं सोपपत्तिकमदोषं स्वमतमेतत्तात्पर्यभूतमाह * अत्र निजादंशादित्यादिना ब्राह्मणीपुत्रौ विभज्य गृह्णीत इत्यन्तेन । * अत्र, मूलवाक्ये । तत्रेति पाठे उक्तबौद्धार्थानां मध्ये इत्यर्थः । *इति, इत्यस्य । उभयं क्रोडीकृत्याह * प्रत्येकमिति । अयं च निजादित्यस्यार्थः । अनेन शास्त्रीयव्यवच्छेदः । * अयमर्थ इति । प्रागुक्तद्विविध इत्यर्थः । * नभवतीति । प्रागुक्तदोषादित्यर्थः । पुत्रभागादित्यनेन पञ्चम्यन्तार्थः शास्त्रीय उक्तोऽग्रिमोऽग्रिमस्य ।

११। नन्वेवमपि कथनमात्रान्न ततोऽत्र पक्षे भेदः स्फुटतया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भासते ऽत आह *एतादिति । *भवतीति । चतुर्थ्रीतिं वक्ष्यमाणवाक्येन प्रतिपादितो भवतीत्यर्थः । तथा च स एवात्र निर्जोंश इति तत्प्रतिपादितांशाच्चतुर्थांशं तस्यै दत्त्वा ऽवशिष्टं स्वयं यथासम्भवं गृह्णीयादिति निजांशस्य व्यवस्थितत्वे तत्तुरीयांशदानमात्रं तस्यै न तु प्राग्वदव्यवस्थितमिति नात्र पक्षे प्रागुक्तदोषापत्तिरिति भावः ।

१२। इदमेवोदाहरणबाहुल्यप्रदर्शनेन विशदयति *तद्यथेत्यादिना । यदीति यत्रेत्यर्थकम् । तत्रेति तदेत्यर्थकं वा। एवमग्रेऽपि । एतदभावे वक्ष्यमाणवाक्येन तत्राष्टावंशाः प्राप्ताः सन्तानभेदेनेति तुल्यांशलाभेन चत्वारश्चत्वारोंऽशा इति लाभेन फलितमाह * सर्वमेव द्रव्यं द्विधाविभज्येति । एवमग्रेऽपि बोध्यम् । एतद्वचनविषयमाह * तत्रेति।तयोर्मध्ये इत्यर्थः ।* शेषं, सर्वम्। दानसाम्येऽपि ग्रहणवैलक्षण्यसूचकस्तुः। अत एव तदा पितृधनमिति पाठः।एवमग्रेऽपि। यद्यपि भगिन्यश्चेति भ्रातृभिरिति च बहुवचनद्वयेनांशमित्येकवचनेन चानेकभ्रातृकर्तृकानेकभगिन्युद्देश्यकैकतुरीयांशकर्मकदानलाभेन प्रत्येकं भगिनीनां भागसम्बन्धलाभो न, तथापि वक्ष्यमाणमानवे वीप्सापृथगाद्युक्तेस्तथेत्याशयेनाह *द्वौ भागौ द्वाभ्यां कन्याभ्यामिति।एतेनैक एवांशो भगिनीभ्यां देय इति मदनपारिजातोक्तमपास्तम् । कन्याबहुत्वे प्रागुक्तदोषापत्तेः। एवं चात्र अंशमिति जातावेकवचनम् । इतिस्तु समाप्तौ । एवं पुत्रबहुत्वे कन्याबहुत्वेऽपीत्याह * एवमिति ।

१३ । विजातीयेष्वाह *यदात्विति । अत्र साम्याभावेन प्राग्वत् द्वेधा विभागासंभवादुक्तयुक्त्यैवाह* सप्तधेति । वस्तुतस्तु पुत्रस्यैवेत्याह *क्षत्रिया पुत्रभागानिति । * शेषं, सर्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१४। एवमुक्तवैपरीत्ये बहुत्वे च बोध्यमित्याह *एवं जातीति। तत्र जातिवैषम्ये भ्रातॄणां भगिनीनां च संख्यासाम्ये इत्थं बोध्यम्। तद्यथा ब्राह्मण्याः पुत्रः कन्यका च, क्षत्रियायाः पुत्रः कन्यका च, एवं वैश्याशूद्रयोरपि। एवं चाष्टावपत्यानि, चत्वारः पुमांसश्चतस्रः स्त्रियः। तत्र चतुस्त्रीति वक्ष्यमाणवाक्येन ब्राह्मणापत्ययोरष्टावंशाः, क्षत्रियापत्ययोः षट्, वैश्यापत्ययोश्चत्वारः, शूद्रापत्ययोर्द्वौ, एवं विंशतिभागान्कृत्वा ब्राह्मणीकन्यायै स्वजातिपुत्रविहितादंशचतुष्टयरूपान्निजाद्भागाच्चतुर्थमंशं दद्यात्, क्षत्रियाकन्यायै स्वजातिपुत्रविहितादंशत्रयरूपान्निजाद्भागाच्चतुर्थमंशं दद्यात्, वैश्याकन्यायै स्वजातिपुत्रविहितादंशद्वयरूपान्निजाद्भागाच्चतुर्थमंशं दद्यात्, शूद्राकन्यायै स्वजातिपुत्रविहितादेकांशरूपादेव निजाद्भागाच्चतुर्थमंशं दद्यात्। ततो ऽवशिष्टं द्रव्यमेकीकृत्य ब्राह्मण्यादिपुत्राः क्रमाच्चतुस्त्रिद्व्येकभागान् गृह्णीयुः। वैषम्ये तु भ्रातॄणां भगिनीनां च यावत्यो व्यक्तयः तावतीनां भ्रात्रादिव्यक्तीनां तावतः अंशान् चतुस्त्रीति क्रमेण कल्पयित्वा भगिनीभ्यः स्वस्वजातिपुत्रविहितादंशाच्चतुर्थश्चतुर्थमंशं दत्त्वाऽवशिष्टं तत्सर्वद्रव्यं भ्रातरस्ते पुनश्चतुस्त्रीत्यादिक्रमेण गृह्णीयुरिति।

१५। केचिदुक्तरीत्यैव तुरीयमंशं कन्यायै दत्त्वा तेनैव विवाहः कार्यो न तु समुदितद्रव्येण विवाहो ऽशदानं च पृथगित्याहुः। तन्मतं खण्डयति * न चेति। *इति, इत्यस्य। *संस्कारेति। विवाहान्तेत्यादिः। * दत्त्वेतीति। व्ययीकृत्येत्यर्थः। यद्यप्येवं व्याख्याने दोषद्वयं प्रागुक्तमत्रैव, तथापि स्वमतं परसंमतमपीति सूचयन् दोषान्तरं च तत्र प्रतिपादयन्नाह * मन्विति। एतेन देशाचाराद् व्यवस्थेति मदनपारिजाताद्युक्तमपास्तम्। तदेवाह *स्वेभ्यों ऽशेभ्य इति। तं प्रतिपादयन्नस्फुटत्वादिना स्वोक्तार्थप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रतया व्याचष्टे *अस्यार्थ इति। तत्र कन्यात्वं स्वपितृनिरूपितं न तु स्वनिरूपितमित्याह* भगिनीभ्य इति। स्वेभ्य इत्यस्य व्याख्या *स्वजातीति। तथा च आत्मीयपरः स्वशब्दः। स्वात्स्वादंशादित्येव सिद्धे बहुवचनान्ततदुक्तिसामर्थ्यलभ्यं तत्स्वरूपमाह *चतुर इति। वक्ष्यमाणस्यार्थतो निर्देशः। ल्यब्लोपे पञ्चमी। तानभिलक्ष्येत्यर्थः। हेतुपञ्चमी वा। दानग्रहणयोः प्रत्येकसंबन्धलाभार्थं वीप्सादीत्याह * स्वात्स्वादिति। स्वशब्द आत्मीयपर इत्याह * आत्मीयादिति। चतुःशब्दश्चतुर्थपरो लक्षणयेत्याह *चतुर्थं चतुर्थमिति। इयं वीप्सा पृथक्पदलभ्या। एवं चैतदुक्तिविरोधस्तद्व्याख्याने इति भावः।

१६। अत्रापि प्रागुक्तैकदेशिव्याख्यानं नेत्याह *न चात्रेति। मनुवाक्ये इत्यर्थः। उक्तहेतोः, स्वेभ्योंऽशेभ्य इत्यस्यानर्थक्यापत्तेश्चेति भावः। प्रागुक्तासिद्धान्तमाह *किं त्विति।

१७। अत्रापि जातिवैषम्ये संख्यावैषम्ये च पूर्वोक्तैव व्यवस्थेत्याह *जातीति। ननु भगिनीनां प्रीतिदानमेव न त्वावश्यकमिति कथं विधिः प्रकर्षश्च अत आह *पतिता इति। अदित्सवो दातुमनिच्छवः। भ्रातॄणामिति भावः।

१८। एवमुक्त्वा केचिन्मतेन प्राग्वदत्रापि शङ्कते *अत्रापीति। अपिः पूर्वसमुच्चये। एवं सति एतद्विरोधस्तत्र व्याख्याने नेति भावः। अत एवाह *स्मृतिद्वयेऽपीति। मनुस्मृतौ याज्ञवल्क्यस्मृतावपीत्यर्थः। पूर्वानुक्तदोषान्तरमाह * अदाने प्रत्यवायेति। मनुस्मृताविति शेषः। तथा सति तदर्थत्वेनैवोपयुक्ता वश्यकत्वे लब्धे ऽदाने प्रत्यवायश्रवणासङ्गतिः स्पष्टैवेति भावः।

१९। एवं दानावश्यकत्वे चरमप्रागुक्तैकदेशिमतव्याख्यानद्वयदोषापत्तिस्तदवस्थेति कस्यचिदुक्तिं खण्डयति * यदपीति। *अं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शेति। स्मृतिद्वये चतुर्थांशेत्यर्थः। * तत्, तदपि। * उक्तेति। स्वजातिपुत्रविहितादंशादित्यर्थेनेत्यर्थः। तदेव परोक्तव्यतिरेकमुखेनाह * नह्यत्रेति। उपसंहरति * अत इति। *असहायेति। स्वतन्त्रेत्यर्थः। प्रागुक्तहेतोः। * उचितमिति। चतुरस्रमिति प्रचुरः पाठः। एवव्यवच्छेद्यं प्रागुक्तमेवाह * न भारुचेरिति। फलितं परमतात्पर्यमाह * तस्मादिति। * पितुः, प्रायणात्। *कन्यापि, सर्वा। *पूर्वं, मरणात्। अत्रोपसंहारे विभागे इत्यनुक्त्या उपक्रमेऽपि अनेन दुहितर इत्यत्रानुक्त्या तस्य पूर्वतोऽलाभेन च विभागे सत्यसति च दुहिता तच्चतुर्थांशभागिनी तदनन्तरमिति सिद्धम्। अत एवैकपुत्रस्थलेऽप्युपपादनं कृतमिति बोध्यम्॥१२४॥

मि॰अव॰ एवं विभागं चेत्पिता कुर्यादित्यादिना प्रबन्धेन समानजातीयानां भ्रातॄणां परस्परं पित्रा सह विभागक्लृप्तिरुक्ता। अधुना भिन्नजातीयानां विभागमाह।

या॰ चतुस्त्रिद्व्येकभागाः स्युर्वर्णशो ब्राह्मणात्मजाः।
क्षत्रजास्त्रिद्व्येकभागा विड्जास्तु द्व्येकभागिनः॥१२५॥

मि॰ तिस्रो वर्णानुपूर्व्येणेति ब्राह्मणस्य चतस्रः, क्षत्रियस्य तिस्रो, वैश्यस्य द्वे, शूद्रस्यैकेति भार्या दर्शिताः। तत्र ब्राह्मणात्मजाः ब्राह्मणोत्पन्नाः, वर्णशः—वर्णशब्देन ब्राह्मणादिवर्णाः स्त्रिय उच्यन्ते संख्यैकवचनाच्च वीप्सायामित्यधिकरणकारकादेकवचनान्ताद्वीप्सायां शस्। अतश्च वर्णेवर्णे ब्राह्मणोत्पन्ना एकैकशश्चतुरश्चतुरो भागाँल्लभन्ते। तेनैव क्षत्रिया-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यामुत्पन्नाः प्रत्येकं त्रींस्त्रीन्, वैश्यायां द्वौ द्वौ, शूद्रायामेकमेकमिति।

क्षत्रजाः क्षत्रियेणोत्पन्नाः। वर्णशः इत्यनुवर्तते। यथाक्रमं त्रिद्व्येकभागाः। क्षत्रियेण क्षत्रियायामुत्पन्नाः प्रत्येकं त्रीन् त्रीन् भागान् लभन्ते, वैश्यायां द्वौ द्वौ, शूद्रायामेकमेकम्।

विड्जाः वैश्येनोत्पन्नाः। अत्रापि वर्णश इत्यनुवर्तते। यथाक्रमं द्व्येकभागिनः। वैश्येन वैश्यायामुत्पन्नाः प्रत्येकं द्वौ द्वौ भागौ लभन्ते, शूद्रायामेकमेकम्। शूद्रस्यैकैव भार्येति भिन्नजातीयपुत्राभावात्तत्पुत्राणां पूर्वोक्त एव विभागः। यद्यपि चतुस्त्रिद्व्येकभागा इत्यविशेषेणोक्तं तथापि प्रतिग्रहप्राप्तभूव्यतिरिक्तविषयमिदं द्रष्टव्यम्। यतः स्मरन्ति—

न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै।
यद्यप्येषां पिता दद्यान्मृते विप्रासुतो हरेत्॥ इति।

प्रतिग्रहग्रहणात्क्रयादिना लब्धा भूः क्षत्रियादिसुतानामपि भवत्येव। शूद्रापुत्रस्य विशेषप्रतिषेधाच्च।

शूद्र्यां द्विजादिभिर्जातो न भूमेर्भागमर्हति। इति।

यदि क्रयादिप्राप्ता भूः क्षत्रियादिसुतानां न भवेत्तदा शूद्रापुत्रस्य विशेषप्रतिषेधो नोपपद्यते।

यत्पुनः– (मनु० अ० ९ श्लो० १५५)

ब्राह्मणक्षत्रियविशां शूद्रापुत्रो न रिक्थभाक्।
यदेवास्य पिता दद्यात्तदेवास्य धनं भवेत्॥ इति,

तदपि जीवता पित्रा यदि शूद्रापुत्राय किमपि प्रदत्तं स्यात्तद्विषयम्। यदा तु प्रसाददानं नास्ति त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वैकांशभागित्यविरुद्धम् ॥ १२५ ॥

बा० १। सङ्गतिमाह *एवमिति। वचनबाहुल्यादाह *प्रबन्धेनेति। अस्य सम्भवमाह *तिस्रो वर्णेति। *इति, इत्यनेन। एकास्त्रीया वर्त्तते एवेत्याह *चतस्र इति। दर्शिता इतीत्यादिः। आचाराध्याये इति भावः। *तत्र, तासु सतीषु। ननु पितुर्ब्राह्मणस्यैकत्वेन न वर्णभेदोऽत आह *वर्णशब्देनेति। तत्र वर्णशब्दस्य नियतपुंस्त्वेनात्र स्त्रीषु लक्षणायामपि पदस्यैव तदङ्गीकाराद्गङ्गायां घोष इतिवन्न दोष इति भावः। बह्वर्थाल्पादित्यस्याप्राप्तेराह *संख्यैकेति। अस्य पाणिनीयसूत्रस्य संख्यावाचकादेकवचनान्ताच्च वीप्सायां शस् प्रत्ययः स्यादित्यर्थः। द्वौ द्वौ ददाति द्विशो ददातीति संख्योदाहरणं, माषश इत्येकवचनोदाहरणम्। यद्यपि एकवचनशब्देन परिमाणशब्दा एव गृह्यन्ते इति जयादित्येनोक्तं तथापि तदन्यस्यापि ग्रहणमिति वामनमतमेव युक्तम्। अत एव पदशः स्वरशोऽक्षरश इत्यादि सङ्गच्छते। अतिप्रसङ्गस्त्वनभिधानाद्वारणीय इति भावः। तदेतदभिप्रेत्य द्वितीयविषयतामत्राह *अधिकरणेति। अधिकरणसप्तम्येकवचनान्तादित्यर्थः। एवं पदार्थमुक्त्वा वाक्यार्थमाह *अतश्चेति। तादृशात् ततः तत्र शसि चेत्यर्थः। स्युरित्यस्यैव स्पष्टार्था व्याख्या *भवेयुरिति।

२। उक्तं विशदयति *एतदिति। *एकैकश इति। चिन्त्योयं प्रयोगः, एकश इति तु पाठ इति केचित्। वस्तुतस्तु सोऽपि साधुरित्यन्यत्र स्पष्टमिति बोध्यम्। *तेनैव, ब्राह्मणेनैव। लभन्ते इत्यस्याग्रे सम्बन्धोऽग्रे यथायोग्यं तदध्याहारः। तेनैवोत्पन्ना इत्यस्याग्रे उभयत्राप्यनुषङ्गः।

३। उत्तरार्धार्थमाह *क्षत्रजा इति। योग्यतयाऽऽह *त्रि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्व्येकैति। अस्य वैशद्यमाह *क्षत्रियेणेति। *विड्जा इति। द्वौ विशौ वैश्यमनुजावित्यमरः। प्राग्वदाह * वैश्येनेति। *तत्पुत्राणामिति। तस्य शूद्रस्य शूद्रायामुत्पन्नानां पूर्वोक्तः—

विभागं चेत्पितेत्यादिना विभजेरन् सुता इत्यादिना चोक्त एव विभाग इत्यर्थः।

४। विशेषमाह *यद्यपीति। भूः शालिक्षेत्रादिका। यथा चैतत् तथाऽनुपदमेवोक्तम्। बार्हस्पत्यमाह *न प्रेति।

५। तत्रापि विशेषमाह *प्रतिग्रहेति। तद्ग्रहणसामर्थ्यादित्यर्थः। तत्र सुताय इति जात्यभिप्रायं प्रत्येकाभिप्रायं वैकवचनमित्याह * सुतानामपीति। एवं च तत्रापि तेषां विभागोऽस्तीति भावः। अत्र हेत्वन्तरमप्याह * शूद्रेति। तस्य तद्भागस्य विशेषेण प्रतिषेधाच्चेत्यर्थः। तथा च आदिशब्देन वैश्य एवात्र न शूद्र इति भावः। तद्वचनं तदीयमेवेत्याह *शूद्यामिति। अत्र शूद्री न शूद्रभार्या। तथा सति तस्यां जातस्य कुण्डगोलकयोरन्यतरत्वेन भागानर्हत्वेनासङ्गत्यापत्तेः। अपि तु द्विजातिभ्यो शूद्रकन्या। केकयीतिवत्प्रयोगः। एतेन छान्दसः प्रयोग इत्यपास्तम्। द्विजातीत्युक्त्या शूद्रजातस्तु भागं स्वं लभते एवेति सिद्धम्। ननु भवतु तस्य तथा, तावताऽपि तेषां तत्र सा कुतः अत आह * यदीति। शूद्रापुत्रस्यैव शृङ्गग्राहिकया निषेधात् तेषां भागोऽस्तीति गम्यते इत्यर्थः।

६। शूद्रापुत्रस्यांशदानपरमूलस्य तदीयवचनान्तरविरोधं तदीयन्यूनताञ्च परिहरति * यत्पुनरिति। यत्त्वित्यर्थः। अ *किस्येति शेषे षष्ठी। अपिरेतज्जातीयस्मृत्यन्तरसमुच्चायकः। *किमपि, किञ्चिदपि। * प्रदत्तं, प्रसाददत्तम्। क्वचिदेवमेव पाठः। अत एवाग्रे तथैव वक्ष्यते। एवञ्च सर्वथा तथैवांशभाक् न भव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तीति भावः।

७। एतेनानूढशूद्रापुत्रविषयं तदिति मन्दोक्तमपास्तम्। तस्यापि प्रकरणादूढापुत्रविषयकत्वसम्भवादन्यत्र प्रागुक्तरीत्या भागानर्हत्वाच्च। दासस्थले तदभावस्य वक्ष्यमाणत्वाच्च। * तदैकांशेति। अत एव तत्र विशिष्य भूभागनिषेधोक्तिसाफल्यमिति भावः॥ १२५॥

मि॰ अथ सर्वविभागशेषं यत् किञ्चिदुच्यते।

या॰ अन्योन्यापहृतं द्रव्यं विभक्ते यत्र दृश्यते।
तत्पुनस्ते समैरंशैर्विभजेरन्निति स्थितिः॥ १२६॥

मि॰ परस्परापहृतं समुदितद्रव्यं विभागकाले चाज्ञातं विभक्ते पितृधने यत् दृश्यते तत् समैरंशैर्विभजेरन्नित्येवं स्थितिः शास्त्रमर्यादा। अत्र समैरंशैरिति वदता उद्धारविभागो निषिद्धः। विभजेरन्निति वदता येन दृश्यते तेनैव न ग्राह्यमिति दर्शितम्। एवं वचनस्यार्थवत्त्वान्न समुदायद्रव्यापहारे दोषाभावपरत्वम्। ननु मनुना ज्येष्ठस्यैव समुदायद्रव्यापहारे दोषो दर्शितो न कनीयसाम्।

(अ. ९ श्लो. २१३)।

यो ज्येष्ठो विनिकुर्वीत लोभाद् भ्रातॄन्यवीयसः।
सोऽज्येष्ठः स्यादभागश्च नियन्तव्यश्च राजभिः॥

इति वदता। नैतत्। यतः सम्भावितस्वातन्त्र्यस्य पितृस्थानीयस्य ज्येष्ठस्यापि दोषं वदता ज्येष्ठपरतन्त्राणां कनीयसां पुत्रस्थानीयानां दण्डापूपिकनीत्या सुतरां दोषो दर्शित एव।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा चाविशेषेणैव दोषः श्रूयते ।

यो वै भागिनं भागान्नुदते, चयते चैनं स, यदि चैनं न चयतेऽथ पुत्रमथ पौत्रं चयते इति ।

यो भागिनं भागार्हं भागान्नुदते भागादपाकरोति भागं तस्मै न प्रयच्छति, स च भागान्नुन्न एनं नोत्तारं चयते नाशयति दोषिणं करोति । यदि तं न नाशयति तदा तस्य पुत्रं पौत्रं च नाशयतीति ज्येष्ठविशेषमन्तरेणैव साधारणद्रव्यापहारिणो दोषः श्रुतः।

अथ साधारणं द्रव्यमात्मनोऽपि स्वं भवतीति स्वबुद्ध्या गृह्यमाणं न दोषमावहतीति मतम् । तदसत् । स्वबुद्ध्या गृहीतेऽप्यवर्जनीयतया परस्वमपि गृहीतमेवेति निषेधानुप्रवेशाद्दोषमावहत्येव । यथा मौद्गे चरौ विपन्ने सदृशतया माषेषु गृह्यमाणेषु अयज्ञिया वै माषा इति निषेधो न प्रविशति मुद्गावयवबुद्ध्या गृह्यमाणत्वादिति पूर्वपक्षिणोक्ते मुद्गावयवेषु गृह्यमाणेषु अवर्जनीयतया माषावयवा अपि गृह्यन्ते एवेति निषेधः प्रविशत्येवेति राद्धान्तिनोक्तम् । तस्माद्वचनतो न्यायतश्च साधारणद्रव्यापहारे दोषोऽस्त्येवेति सिद्धम् ॥ १२६ ॥

बा० १। सङ्गतिमाह *सर्वेति । घञजपः पुंसीत्यस्य प्रायिकत्वाच्छेषमित्युक्तिः । *यत्किञ्चित्, पद्यात्मकम् । *परस्परेति । सर्वैरेवेत्यर्थः । स्वीये स्वीये बाधकाभावात् सामान्योक्तिलभ्यमाह *समुदितेति । विभक्ते इति सतिसप्तमी । तत्स्वारस्यादात *विभागेति । यत्रेत्यस्य सर्वविभागे इत्यर्थः । अत एव साकाङ्क्षत्वाच्छेषमाह *यदिति । पुनःशब्दः अप्यर्थे पश्चादर्थे वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दृश्यते इति पद्योक्तं बोध्यम् । स्थित्यर्थमाह * शास्त्रेति ।

२। *अत्र चेति । अत्रापीत्यर्थः । अपिना पूर्वसमुच्चयः । अत्रेत्येव पाठे पूर्वं यथातथात्राऽस्तु अत्र तु सर्वथा निषिद्ध इत्यर्थः । * वदता, योगीश्वरेण । एवमग्रेऽपि । *उद्धारेति । ज्येष्ठं वा श्रेष्ठेत्युक्त इत्यर्थः ।

३। केचित्तु विभागार्हैः समुदायद्रव्यापहारे कृतेऽपि तेषां न दोष इत्येतद्वचनतात्पर्यमित्याहुः। तत् खण्डयति *एवमिति । उक्तरीत्येत्यर्थः । उक्तरीत्या श्रुतसमांशविभागविधानादिमात्रेणैव वाक्यस्य साफल्येनाश्रुतदोषाभावपरत्वकल्पनस्यानौचित्येन समुदायद्रव्यापहारेऽपि तेषां दोषोऽस्त्येवेति भावः ।

४। नन्वस्तु दोषः तथापि स ज्येष्ठस्यैव नान्येषां, मनुना तथोक्तत्वादित्याह *ननु मनुनेति । एवेनान्यव्यवच्छेदः । तदेव स्पष्टार्थमाह *न कनीयसामिति। तद्भिन्नानामित्यर्थः । *विनिकुर्वीत, तिरस्कुर्यात् । वञ्चयेत् इति यावत् । न तावदेवेत्याह *अभागश्चेति । एवमग्रेऽपि । *नियमनं दण्डः । राजभिरिति बहुवचनेन देशान्तरगमनेऽपि तत्रत्यराजदण्डः सूचितः । वदतेत्यस्य मनुनेत्यत्रान्वयः ।

५। वस्तुतस्तदभावादाह *संभावितेति । बहुव्रीहिः । ज्येष्ठत्वमेव तद्बीजम् । अत एवाह *पित्रिति ।

तदुक्तं मनुनैव, (अ० ९ श्लो० १०८।११०)

पितेव पालयेत्पुत्रान् ज्येष्ठो भ्रातॄन्यवीयसः ।
पुत्रवच्चापि वर्त्तेरन् ज्येष्ठे भ्रातरि धर्मतः ॥
यो ज्येष्ठो ज्येष्ठवृत्तिः स्यान्मातेव स पितेव सः ।
अज्येष्ठवृत्तिर्यस्तु स्यात् स संपूज्यस्तु बन्धुवत् ॥ इति ।

ज्येष्ठस्यापीति अपिर्विरोधे । * वदता, मनुना । ज्ये-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्ठपरतन्त्राणामिति षष्ठीतत्पुरुषः । * दण्डेति । दण्डापूपिकसंबन्धिन्यायेनेत्यर्थः । रीत्येति पाठान्तरम् । अपूपानां समूह आपूपिकम्। अचित्तेति ठक् । दण्डस्यापूपिकं दण्डापूपिकम्। तथा च यस्मिन्दण्डे आपूपिकं प्रोतं बद्धं वा स दण्डो यदि चोरादिभिरपहृतस्तदाऽऽपूपिकमपि सुतरामपहृतं यथा, तद्वदत्रापि ज्येष्ठस्य दोषे तेषां सुतरां स इत्यर्थः । तथा च ज्येष्ठादिपदमुपलक्षणमिति भावः ।

६। अत्रार्थे श्रुतिमपि मानत्वेनाह *तथा चेति। श्रुतौ वैशब्दो निश्चये। श्रुत्यर्थं प्रतिपादयन्नुक्तार्थं सविशदमाह *यो भागिनमिति । गृहीतसर्वभागे तदसंभवात् अंस्तीत्येतत्स्वारस्याच्चाह *भागार्हमिति । भागान्नुदते इत्यस्य व्याख्या *भागादिति । तस्य व्याख्या * भागमिति । भागिनमित्यस्य यमित्यादिरित्याशयेनाह * स चेति । चो व्युत्क्रमे वाक्यालङ्कारे इति भावः। स इत्युक्तं लक्ष्यार्थमाह * नाशेत्यादि । तृतीयवाक्यमाह * यदीति । स इत्यस्य चेनानुषङ्गः । आद्याथशब्दार्थमाह * तदेति। साकाङ्क्षत्वादाह *तस्येति । द्वितीयाथशब्दार्थमाह *चेति ।

७। तत्र तस्य तदभावं शङ्कते * अथेति । *आवहतीति। अपजनयतीत्यर्थः । समुदायद्रव्ये स्वस्यापि स्वत्वसत्त्वात् अप-

१ तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रे अस्तीतिपदस्वारस्या-दित्यर्थः ।

अयं भावः । अत इनिठनौ इति सूत्रेण मत्वर्थे इनिप्रत्ययविधानात् मतुब्विधायके तदस्यास्त्यास्मिन्निति सूत्रे च वर्तमानत्वार्थकस्य अस्तीतिपदस्य श्रवणात् इनिप्रत्ययस्य वर्तमानत्वार्थकत्वे गृहीतसर्वभागे भागवत्त्वस्यासंभवात् तदर्थकस्य इनिप्रत्ययस्य भागिनमित्यत्रासंगतिः इत्याशङ्क्य भागशब्दस्य भागार्हत्वे लक्षणया तद्वत्त्वस्य गृहीतसर्वभागेऽपि विद्यमानत्वान्नासंगतिरिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वारदशायामपि स्वद्रव्यमित्येवं ग्रहणेनापहर्तुर्दोषो नेति भावः। *अवर्जनीयतयेति। परस्वत्वस्येत्यादिः। यथा तत्र स्वस्वत्वं तथाऽन्येषामपि तदस्त्येवेति तस्य वर्जनासम्भवात्तद्दशायामन्यद्रव्यमपि सर्वथाऽपहृतमेवेति निषेधाश्च बलीयांस इति न्यायेन परस्वं न गृह्णीयादितिनिषेधशास्त्रानुप्रवेशादस्त्येव दोष इत्यर्थः।

८। अत्र दार्ढ्याय दृष्टान्तत्वेन षाष्ठन्यायमुपन्यस्यति *यथेति। षाष्ठतृतीयपादषष्ठाधिकरणसूत्रं "विप्रतिषिद्धं चाविशेषेण हि तच्छ्रुतिः" इति। तत्र अयज्ञिया वै माषा वरकाः कोद्रवा इति श्रूयते। तत्र संशयः। मौद्गं चरुं निर्वपेदिति विहितमुद्गाभावे प्रतिनिधित्वेन माषा ग्राह्या न वेति। तत्र पूर्वपक्षः। व्रीह्यभावे नीवारा इव कोद्रवाः, मुद्गाभावे माषा ग्राह्याः, तत्त्वेन जातिसादृश्याभावेऽप्यवयवसादृश्यात्। यत उक्तनिषेधो माषादिरूपेण ग्रहणे प्रवर्तते न तु मुद्गावयवोपादानेनावर्जनीयतया प्राप्तमाषाद्यवयवरूपेण, अतः प्रतिनिधित्वमेवेति।

सिद्धान्तस्तु—माषादिजातीयस्य सर्वात्मना यज्ञसाधनत्वं तेन निरस्तम्। अयज्ञिया माषा इति सामान्यश्रवणात्। अतो नान्तरीयका अपि माषावयवा वर्ज्या एव। तस्मात्प्रतिनिधित्वेन ते न ग्राह्या इति। तदेतदभिप्रेत्य तत्र तावदधिकरणपूर्वपक्षं संगृह्याह—

९। *मौद्गे इति। विकारे मुद्गादणित्यण्। *विपन्ने, नष्टे। पुनस्तद्दौर्लभ्ये मुद्गेति शेषः। *मुद्गेति। माषावयवानां तदवयवसादृश्येन तदवयवबुद्ध्यैव ग्रहणान्न स्वरूपेणेत्यर्थः। अथ सिद्धान्तं तथाऽऽह *मुद्गेति। अयज्ञिया इति सामान्येन माषजातिनिषेधात्तद्बुद्ध्या गृह्यमाणेष्वपि तेषु अवर्जनीयतया निषिद्धमाषजातीयावयवा अपि गृह्यन्ते एवेति निषेधप्रसर एवेत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१०। उक्तन्यायोऽत्रापीति दर्शयन् तन्मतखण्डनमुपसंहरति *तस्मादिति। वचनं यो वै इत्यादि। न्यायः षाष्ठः।

एतेन—परस्वत्वज्ञानपूर्वकं स्वस्वत्वहेतुं विना स्वस्वत्वारोपकः स्तेन इति लोकप्रसिद्धोऽर्थः। न चात्र इदं मम इदं परकीयमिति विवेकः। द्रव्यस्याविभक्तत्वात्। तथा चात्र साधारणधने तदसम्भवादिदमयुक्तमिति प्राच्योक्तमपास्तम्। मन्वर्थाद्यज्ञानात्। प्रच्छन्नं वेति कातीयस्तेयलक्षणे द्रव्ये परसम्बन्धमात्रं विवक्षितमिति न तद्विरोधः। अन्योन्येति वचनबलात्तथेतितु न। तस्यार्थवत्त्वस्योक्तत्वात्। एतेन कातीये परशब्दादात्मीयत्वव्यवच्छेदेनैव तत्स्वत्वापगम इत्यपि तदुक्तमपास्तम्॥ १२६॥

मि॰ अव॰ द्व्यामुष्यायणस्य भागविशेषं दर्शयंस्तस्य स्वरूपमाह।

या॰ अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः।
उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः॥१२७॥

मि॰ अपुत्रां गुर्वनुज्ञात इत्याद्युक्तविधिना अपुत्रेण देवरादिना परक्षेत्रे परभार्यायां गुरुनियोगेनोत्पादितः पुत्र उभयोर्बीजिक्षेत्रिणोरसौ रिक्थी रिक्थहारी पिण्डदाता च धर्मत इत्यस्यार्थः। यदाऽसौ नियुक्तो देवरादिः स्वयमप्यपुत्रोऽपुत्रस्य क्षेत्रे स्वपरपुत्रार्थं प्रवृत्तो यं जनयति स द्विपितृको द्व्यामुष्यायणो द्वयोरपि रिक्थहारी पिण्डदाता च। यदा तु नियुक्तः पुत्रवान् केवलं क्षेत्रिणः पुत्रार्थं प्रयतते तदा तदुत्पन्नः क्षेत्रिण एव पुत्रो भवतीति, न बीजिनः। स च न नियमेन बीजिनो रिक्थहारी पिण्डदो वेति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथोक्तं मनुना, (अ. ९ श्लो. ५३)

क्रियाभ्युपगमात्क्षेत्रं बीजार्थं यत्प्रदीयते ।
तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च ॥ इति।

क्रियाभ्युपगमादिति । अत्रोत्पन्नमपत्यमावयोरुभयोरपि भवत्विति संविदङ्गीकरणाद्यत्क्षेत्रं क्षेत्रस्वामिना बीजावपनार्थं बीजिने दीयते तत्र तस्मिन्क्षेत्रे उत्पन्नस्यापत्यस्य बीजिक्षेत्रिणौ भागिनौ स्वामिनौ दृष्टौ महर्षिभिः ।

तथा, (मनु० अ० ९ श्लो० ५२)

फलं त्वनभिसन्धाय क्षेत्रिणां बीजिनां तथा ।
प्रत्यक्षं क्षेत्रिणामर्थो बीजाद्योनिर्बलीयसी ॥इति।

फलं त्वनभिसन्धायेति । अत्रोत्पन्नमपत्यमावयोरुभयोरस्त्वित्येवमनभिसन्धाय परक्षेत्रे यदपत्यमुत्पाद्यते तदपत्यं क्षेत्रिण एव, यतो बीजाद्योनिर्बलीयसीति ।गवाश्वादिषु तथा दर्शनात्। अत्रापि नियोगो वाग्दत्ताविषय एव । इतरस्य नियोगस्य—

मनुना निषिद्धत्वात्।(मनु० अ. ९ श्लो. ५९।६०)

देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया ।
प्रजेप्सिताऽधिगन्तव्या सन्तानस्य परिक्षये ॥
विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि ।
एकमुत्पादयेत्पुत्रं न द्वितीयं कथञ्चन ॥

इत्येवं नियोगमुपन्यस्य मनुः स्वयमेव निषेधति।
(अ० ९ श्लो० ६४ । ६५ । ६६ । ६७ । ६८)

नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः।
अन्यस्मिन्हि नियुञ्जानाः धर्मं हन्युः सनातनम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्यते क्वचित्।
न विवाहविधावुक्तं विधवावेदनं पुनः॥
अयं द्विजैरविद्वद्भिः पशुधर्मो विगर्हितः।
मनुष्याणामपि प्रोक्तो वेने राज्यं प्रशासति॥
स महीमखिलां भुञ्जन् राजर्षिप्रवरः पुरा।
वर्णानां सङ्करं चक्रे कामोपहतचेतनः॥
ततः प्रभृति यो मोहात् प्रमीतपतिकां स्त्रियम्।
नियोजयत्यपत्यार्थं गर्हन्ते तं हि साधवः॥ इति।

न च विहितप्रतिषिद्धत्वाद्विकल्प इति मन्तव्यम्। नियोक्तॄणां निन्दाश्रवणात्। स्त्रीधर्मेषु व्यभिचारस्य बहुदोषश्रवणात्। संयमस्य प्रशस्तत्वाच्च।

यथा मनुरेव—(अ० ५ श्लो० १५७)

'कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः।
न तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य तु॥

इति जीवनार्थं पुरुषान्तराश्रयणं प्रतिषिध्य—(मनु० अ० ५ श्लो० १५८।१५९।१६०।१६१)

आसीतामरणात् क्षान्ता नियता ब्रह्मचारिणी।
यो धर्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम्॥
अनेकानि सहस्राणि कौमारब्रह्मचारिणाम्।
दिवं गतानि विप्राणामकृत्वा कुलसंततिम्॥
मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता।
स्वर्गं गच्छत्यपुत्राऽपि यथा ते ब्रह्मचारिणः॥
अपत्यलोभाद्या तु स्त्री भर्तारमतिवर्तते।
सेह निन्दामवाप्नोति परलोकाच्च हीयते॥

इति पुत्रार्थमपि पुरुषान्तराश्रयणं निषेधति। त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्माद्विहितप्रतिषिद्धत्वाद्विकल्प इति न युक्तम् ।

एवं विवाहसंस्कृतानियोगे प्रतिषिद्धे कस्तर्हि धर्म्यो नियोग इत्यत आह ।

(मनु० अ० ९ श्लो० ६९।७०)

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ॥
यथाविध्यधिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् ।
मिथो भजेताप्रसवात्सकृत्सकृदृताव‍ृतौ ॥ इति ।

यस्मै वाग्दत्ता कन्या स प्रतिग्रहमन्तरेणैव तस्याः पतिरित्यस्मादेव वचनादवगम्यते । तस्मिन्प्रेते देवरस्तस्य ज्येष्ठः कनिष्ठो वा निजः सोदरो विन्देत परिणयेत् । यथाविधि यथाशास्त्रमधिगम्य परिणीय अनेन घृताभ्यङ्गवाङ्नियमादिना शुक्लवस्त्रां शुचिव्रतां मनोवाक्कायसंयतां मिथो रहसि आगर्भग्रहणात् प्रत्यृत्वेकैकवारं गच्छेत् । अयं च विवाहो वाचनिको घृताभ्यङ्गादिनियमवत् नियुक्ताभिगमनाङ्गमिति न देवरस्य भार्यात्वमापादयति।अतस्तदुत्पन्नमपत्यं क्षेत्रस्वामिन एव भवति न देवरस्य । संविदातूभयोरपि ॥ १२७ ॥

बा० १। यथाश्रुते पूर्वसङ्गत्यभावादाह *द्व्यामुष्यायणस्येति। तथा च तस्य पूर्वभागापवादभूतभागविशेषोपयोगित्वमेव पूर्वसङ्गतिरिति भावः । * धर्मतः, शास्त्रतः । अस्य शब्दार्थं तावदाह *अपुत्रामिति । (याज्ञ० १ । ६८ । ६९)

अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया ।
सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋतावियात् ॥
आ गर्भसम्भवात् गच्छेत्पतितस्त्वन्यथा भवेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनेन विधिना जातः क्षेत्रजोऽस्य भवेत्सुतः ॥

इति आचाराध्याये विवाहप्रकरणे मूलोक्तविधिनेत्यर्थः। स्वमन्वाद्यनुरोधेनात्र शेषोऽयम् । * भार्यायां, पाणिग्रहणयोग्यायाम् । तत एव साकाङ्क्षत्वादाह * गुर्विति । अपेनैष्फल्यं सूचयन्नाह *उभयोरिति । *इत्यस्यार्थः, इत्यस्य शाब्दोऽर्थः।

२।नन्वेतावताऽपि द्व्यामुष्यायणपदानुक्तेः कथमस्य तत्त्वमित्याशङ्कायाम् अपुत्रेणेत्यादिसूचितं तत्त्वमेव रिक्थग्रहणादौ निमित्तं नान्यदिति तत्सूचितं द्व्यामुष्यायणत्वमिति प्रतिपादयन् अपुत्रेणेत्यादेः प्रत्युदाहरणं च दर्शयिष्यंस्तात्पर्यार्थमाह * यदाऽसाविति । तथा च इत्यस्यार्थ इत्यस्य मध्यमणिन्यायेनात्राप्यन्वयः । * इति, एवं वक्ष्यमाणोऽस्याभिप्रायार्थ इत्यर्थः। अपिः स्पष्टार्थः । एवमग्रेऽपि । * पुत्रार्थे, पुत्रोत्पत्त्यर्थम् । * स इति यत इति शेषः । तस्यैव व्याख्या *द्व्यामुष्यायणइति । अत इति शेषः । प्रत्युदाहरणमेवाह * यदा त्विति । *तत्रापि विशेषमाह *सचेति । अद्व्यामुष्यायणश्चेत्यर्थः । तदानीं पुत्रसत्त्वे तदभावेन तदभावेऽपि अनन्तरं तन्नाशादन्यस्याधिकारीति सूचयितुमाह * नियमेनेति । पिण्डदो वेति वाशब्दः चार्थे ।

३। मूलानुक्तं विशेषं कथयितुं उदाहरणप्रत्युदाहरणयोर्मनुसंमतिमाह * यथोक्तमिति ।तत्राद्ये तामाह *क्रियेति। यद्विशेषकथनार्थं मनूक्तिः तस्य प्राधान्यं सूचयन्सप्रतीकधारणमिदं व्याचष्टे * क्रियेति। एवमग्रेऽपि। अत्र क्रियापदं विवक्षितम् । संवित्स्वरूपमाह *अत्रोत्पन्नमिति ।* अत्र,* क्षेत्रे । * उत्पन्नम्, उत्पत्स्यमानम् । *संवित,प्रतिज्ञा एकवाक्यता । पञ्चम्यन्तार्थोऽयमित्याह * अङ्गीकरणादिति । * क्षेत्रस्वामिनेति । विद्यमानेऽपि तस्मिन् षण्ढत्वाभिप्रायमिदम् । इदमपि स्वरीत्यैव । अन्यथा त्विदमुपल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षणमपि बोध्यम्।बीजार्थमित्यस्य व्याख्या * बीजावपनार्थमिति। अर्थादाह * बीजिने इति । यदः तदाकाङ्क्षत्वाच्छेषेणाह * तस्मिन्क्षेत्रे इति। तस्येत्यस्यार्थमाह * उत्पन्नस्यापत्यस्येति । तत्र इहेत्यस्य शास्त्रे इत्यर्थः।तत्र प्रयोगस्यार्षत्वात्तदनुरोधेन स्वयमपि तथैवाह * बीजीति। भागिनावित्यस्य यथाश्रुतार्थासम्भवादाह * स्वामिनाविति ।

४।द्वितीये तामाह *तथेति। तुः उक्तवैलक्षण्ये व्युत्क्रमे च। निर्धारणे षष्ठीद्वयम्।अत एव बहुवचनम्, उदाहरणान्तराविवक्षया च। तथेत्यनेन तदर्थं दीयते यत्र परक्षेत्रे यदपत्यमुत्पाद्यते इत्यस्याध्याहारः। तथा च क्षेत्रिणां बीजिनां च मध्ये ऽन्यतमेनापि फलमनभिसन्धाय तु यत्क्षेत्रं तेन तदर्थं दीयते तत्र तेन यदपत्यमुत्पाद्यते सोऽपत्यरूपोऽर्थः क्षेत्रिणामेव । तत्र हेतुर्बीजाद्योनिर्बलीयसीति । तत्र हेतुः *प्रत्यक्षमिति । तथा लोके दृश्यते इत्यर्थः। फलमत्र संविद्रूपमित्याह * अत्रोत्पन्नमिति । तत्र तस्य हेतुत्वार्थमाह * यत इति । तत्र प्रत्यक्षमिति हेतुरिति सूचयन्नाह *गवेति ।

तदप्युक्तं मनुनैव, (अ० ९। श्लो ५४।५५)
ओघवाताहृतं बीजं यस्य क्षेत्रे प्ररोहति ।
क्षेत्रिकस्यैव तद् बीजं न वप्ता लभते फलम् ॥
एष धर्मो गवाश्वस्य दास्युष्ट्राजाविकस्य च ।
विहङ्गमहिषाणां च विज्ञेयः प्रसवं प्रति ॥ इति ।

५। मेधातिथिस्तु— (अ० ९।५१)
तथैवाक्षेत्रिणो बीजं परक्षेत्रप्रवापिणः ।
कुर्वन्ति क्षेत्रिणामर्थं न बीजी लभते फलम् ॥
इति अविशेषेणोक्तस्य क्षेत्रिणां फलं न बीजिन इत्यस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विशिष्टविषयत्वमाह।

"फलं त्विति। तयोर्मिथो यत्र फलानभिसन्धानं तत्र क्षेत्रिणां प्रत्यक्षमर्थो निश्चितं फलम्। प्रत्यक्षशब्देन निःसन्दिग्धतामाह। * यतो बीजाद्योनिर्बलीयसी। क्षेत्रमधिकम् इत्यर्थः। अनभिसन्धाने क्षेत्रिणः फलमुक्तम्, अभिसन्धाने किं बीजिन उतोभयोरिति संशये उभयोरित्याह * क्रियेति। एवमेवैतदिति यो निश्चयः सन्धिलक्षणः सा क्रिया तदङ्गीकरणात् बीजार्थं बीजकार्यफलनिष्पत्त्यर्थं यद्दीयते सामर्थ्याद् बीजमिति गम्यते तस्येदं द्वावपीत्याद्यर्थ" इति व्याचख्यौ।

६। स्वमतमुक्त्वा प्राग्वदत्रापि आचार्यमतमाह * अत्रापीति। अपिना विवाहप्रकरणोक्तसमुच्चयः। *इतरस्येति। विवाहिताविषयस्येत्यर्थः। तमेवाह *देवराद्वेत्यादिना साधव इतीत्यन्तेन। तत्रादौ तस्या नियोगमाह *देवरादिति। तत्सकाशादित्यर्थः। *सम्यक्, यथाशास्त्रम्। * ईप्सिता, पुत्ररूपा। *अधिगन्तव्या, प्राप्तव्या। *परिक्षये, सति। अनेन आपदुक्ता। तस्य नियोगमाह *विधवायामिति। *वाग्यतो, मौनी। * निशि, गच्छन्सकृत्कामित्याद्यर्थः।

७। अत्र मेधातिथिः। सन्तानशब्देन पुत्रः, कार्यक्षमत्वात्। अनेनापदुक्ता। अत एव– (मनु० अ० ९।५८)

ज्येष्ठो यवीयसो भार्यां यवीयान्वाऽग्रजास्त्रियम्।
पतितौ भवतो गत्वा नियुक्तावप्यनापदि॥

इत्यनेन मिथो भार्यागमने ज्येष्ठानुजयोः पातित्यमनापदि सत्यपि नियोगे पूर्वमुक्तम्। * नियुक्तया, अपत्योत्पादनेऽनुज्ञातया गुरुभिः। तथा स्मृत्यन्तरोक्तेः। सम्यगित्यनेन वक्ष्यमाणघृताभ्यङ्गादिनियमानुवादः। गन्तव्येति विधौ कृत्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ईप्सिताशब्देन कार्यक्षमतामाह । तथा च दुहितरि अन्धबधिरादौ च जाते पुनर्नियोगो ऽनुष्ठेयः । विधवाग्रहणमतन्त्रम् । क्लीबादिरूपे पत्यौ जीवत्यपि एष एव विधिः ।

यतो वक्ष्यति । (मनु० अ० ९।६३)

नियुक्तौ यौ विधिं हित्वा वर्त्तेयातां तु कामतः ।
तावुभौ पतितौ स्यातां स्नुषागगुरुतल्पगौ ॥ इति ।

निशीति प्रीत्याद्यालोकनानिवृत्त्यर्थम् । वचनान्तरेणैव दिवोपगमप्रतिषेधात् इति ।

८।पूर्वविहितनियोगप्रतिषेधमाह *नान्यस्मिन्निति । पतिभिन्ने इत्यर्थः । *नोद्वाहिकेष्विति । पूर्वशेषोऽयमर्थवादः । विवाहकर्मणि तत्र तत्र एवमेव मन्त्रप्रयोगः,

अर्यमणं तु देवं कन्या अग्निमयक्षत ।
मया पत्या जरदष्टिः मया पत्या प्रजावतीति,

नैवं श्रूयते, मयाऽत्र नियुज्यसे ततो जनयेति । तादृशमन्त्रग्रहणेन मन्त्रार्थवादा अपि नैवं विधाः सन्तीति दर्शितम् । तदेवाह *न विवाहविधाविति । *अयमिति । अयमप्यर्थवाद एव नियोगप्रतिषेधशेषः । अविद्वद्भिः सम्यक्शास्त्रमन्त्रलिङ्गाद्यनभिज्ञैरयं पशुधर्मः सन्नत्यन्तगर्हितो मनुष्याणामपि प्रोक्तः प्रवर्तितः, सोऽपि इदानींतनो नानादिरित्याह * वेने राज्यं प्रशासतीति । राष्ट्रं पालयति सतीत्यर्थः । द्विजैर्हि विद्वद्भिरिति पाठे विगर्हितोऽपि विद्वद्भिर्मनुष्याणां प्रोक्तः,पशूनामेष धर्मो भ्रातृस्त्रीगमनं नाम, स च प्रवृत्तो वेनस्य राज्ये इत्यर्थः । तदेवाह *स महीमिति । * भुञ्जन्, पालयन् । ननु राजर्षिप्रवरस्याखिलमहीपालकस्य कथं तत्करणमत आह *कामोपहतेति । कामेनोपहता चेतना यस्येत्यर्थः । स्पष्टार्थम् अर्थवादमाह *तत इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

९। मेधातिथिमतं खण्डयति *न चेति। अयं हि तदाशयः नान्यस्मिन्निति निषेधो मृतभर्तृकाया एव न क्लीबादिजीवत्पतिकायाः तेन भिन्नविषयत्वमिति न। सन्तानविच्छेदस्य निमित्तस्य तत्र श्रवणेन तस्योभयत्र तुल्यत्वात्। घृताभ्यङ्गादिनियमस्यापि तत्राभावापत्तेश्च। तथा च विधिवत् निषेधेऽपि विधवाग्रहणस्यातन्त्रत्वेन निषेधस्याविशिष्टत्वेन देवराद्वेत्यादिविधेः नान्यस्मिन्निति निषेधस्य चैकविषयत्वलाभेन षोडशिग्रहणाग्रहणवद्विकल्पः। अयमपि अपत्योत्पादनविधेर्नित्यत्वे बोध्य इति।

१०। *नियोक्तॄणामिति। अयमाशयः। तुल्यार्थास्तु विकल्पेरान्नित्युक्तेः समयोर्विकल्पः। अत्र तु अन्यस्मिन् हि नियुञ्जानाः इति तेषां निन्दाश्रवणान्निषेधे च तदभावान्न समता विधिनिषेधयोः। किं च पुत्रेण लोकान् जयतीत्येवमादिफलोऽपत्योत्पादनविधिः। तथाचासत्यपत्ये तत्कार्यस्यौर्द्ध्वदेहिकादेरुपकारस्याभावात् सत्यपत्ये भावाद्भिन्नफलत्वम्। अतो न विकल्पः। षोडशिग्रहणादौ तूभयत्र निन्दाया अश्रवणादङ्गभूयस्त्वेन फलभूयस्त्वेऽपि प्रधानकार्यसिद्धावविशेषाच्च समत्वेन तयोर्विकल्प इति।

११। तत्र निन्दायाः प्रागुक्तत्वेन व्यभिचारदोषांशे संयमप्राशस्त्ये मनुसंमतिमाह * यथा मनुरेवेति। प्रतिषिध्य निषेधतीत्यत्रान्वयः। अत एवाहेत्यपपाठः। द्विविधमन्याश्रयणं, जीवनार्थं स्वर्गफलकपुत्रार्थं च। तत्राद्ये आह *काममिति। यथेच्छमित्यर्थः। *क्षपयेत्, कृशीकुर्यात्। *पुष्पेति। अंबहुप्र-

१ फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानां बहुप्रकृतिरेव द्वन्द्व एकवदिति वार्त्तिकेन बहुप्रकृतिके एव एकवद्भावस्य विधानात् पुष्पमूलफलैरित्यत्र पुष्पं च मूलञ्च फलं चेति विग्रहकरणात् बहुप्रकृतिकत्वाभावेन नैकवद्भावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृतित्वादेकवत् न। शुभैरित्यनेन निषिद्धनिरासः। * नामापीति। आश्रयणादिकं तु दूरापास्तमेवेति भावः।

१२। द्वितीये आह *आसीतेति। आङ् मर्यादायाम्।अनेन नैष्ठिकव्रतमुक्तम्। * क्षान्ता, क्षमावती। * नियता, संयता। *एकपत्नीनाम्,एकपतिकानाम् अरुन्धत्यादीनाम्। *अनुत्तमं, सर्वोत्कृष्टं नैष्ठिकत्वादेव। दृष्टान्तं वक्तुं वृत्तमाह *अनेकेति। *कौमारेति। बाल्यादारभ्य तद्व्रतचारिणामित्यर्थः। अत एव तत् दृष्टान्तेन द्रढयति *मृते इति। व्यवास्थितेति विना मध्ये विच्छेदाभावः सूचितः। *स्वर्गमिति। सूर्यमिति पाठान्तरम्, अर्चिरादिमार्गप्रदर्शकम्।

१३। एवं संयमप्राशस्त्यमुक्त्वा तद्दोषमाह *अपत्येति। * भर्तारं, मृतं जीवन्तं च। * इह, भूलोके। तत्खण्डनम् उपसंहरति। *तस्मादिति।

१४। *एवम्, उक्तप्रकारेण। * धर्म्य इति। धर्मादनपेत इत्यर्थः। अन्यथा तत्कथनस्य निर्विषयत्वापत्तेरिति भावः। *आहेति। मनुरेवेति भावः। अत्र सर्वत्र वर्तमानत्वं स्वव्यवस्थाकालापेक्षया बोध्यम्। *वाचा सत्ये कृते,वाग्दाने निर्वृत्ते। एकेन वाचा दत्ताऽन्येन तथैव प्रतिगृहीतेति यावत्। ननु एवमपि पाणिग्रहणाभावात्कथं पतित्वमाह *यस्मै इति। यमुद्दिश्येत्यर्थः। तत्पित्रादये इति भावः। *प्रतिग्रहमिति। पाणिग्रहणमित्यर्थः। क्वचित्तथैव पाठः। * वचनात्, पतिपदघटितमनुवाक्यात्। अस्मादेव गम्यते इति पाठान्तरम्।

श्यालाः स्युर्भ्रातरः पत्न्याः स्वामिनो देवृदेवरौ।

इत्यमरादाह * ज्येष्ठः कनिष्ठो वेति। निज इत्यस्य व्याख्या *सोदर इति। एवमग्रेऽपि। पूर्वश्लोकोक्तम् "अनेन विधानेन"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति यद्यपि मेधातिथिना वक्ष्यमाणेन विधानेनेत्येवं तत्रैव योजितं तथापि तथा तत्रानुपयोगादाह *अनेनेति । गच्छेदित्यत्रान्वयोऽस्य । तस्या अपि विशेषान्तरमाह *शुक्लेति । *व्रतं, सङ्कल्पः । स च त्रिविध इत्याह * मनोवागिति । शुचित्वमाह *संयतामिति । मिथो इत्योदन्तमव्ययम् । तदर्थमाह *रहसीति । आप्रसवादित्यस्य निषेधेन यथाश्रुतानुपपत्तेरर्थमाह *आगर्भेति । *ऋतावृताविति । पृथक् पृथगित्यपपाठः । सकृत्सकृदित्यस्य व्याख्या *एकैकवारमिति । भजेतेत्यस्यार्थो *गच्छेदिति ।

१५। ननु तामनेनेत्यनेन विवाहस्य विहितत्वात्सा तद्भार्या, स च तत्पतिरिति दाम्पत्यसम्पत्त्या तदुत्पन्नस्तयोरौरस एव स्यान्न पूर्वोक्तोऽत आह *अयं चेति । केवलं परार्थः स्वपरार्थो वा वाचनिको यथापूर्वं तन्नियमभिन्नो विवाहसंस्कार इत्यर्थः । अत एवाह * घृतेति । नियुक्ताभिगमने यथा घृताभ्यङ्गादिकमङ्गत्वेन विधीयते तथा ऽयं विवाहोऽपि नियुक्ताभिगमनेऽङ्गं न स्वातन्त्र्येण प्रधानकर्म । येन दाम्पत्यप्रसङ्गः । पुनर्भूत्वादूढाया भार्यात्वासम्भवात् । अत एव तदग्रे—

मनुः, (अ० ९।७१)

न दत्त्वा कस्यचित् कन्यां पुनर्दद्याद्विचक्षणः ।
दत्त्वा पुनः प्रयच्छन् हि प्राप्नोति पुरुषानृतम् ॥ इति ।

पुरुषेति । मनुष्यहरणे यत्पापं तत्तस्य भवतीत्यर्थः । तथा च दानाभावे कथं भार्यात्वम् । अतो न स औरसः पुत्रोऽपि तु क्षेत्रज एव क्षेत्रस्वामिनः संविदभावे । तत्सत्त्वे तूभयोरपि । तत्रापि बीजिन औरससमो नौरस इत्यग्रे स्फुटीभविष्यतीति भावः । तदाह * अत इति । आगर्भग्रहणादित्युक्तेः सकृद्गमनोपदेशाच्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्मै वाग्दत्ता तदपत्यं भवतीति कुल्लूकभट्टः। इत्थमाचार्यमतं प्रतिपादितम्, अत्रापीत्यादिनोभयोरपि इत्यन्तेन। यद्यप्यत्र तत्त्वेन नोक्तं किन्तु सामान्येन तथाप्याचाराध्याये स्वयं स्पष्टं तथैवोक्तमिति तथैव बोध्यम्।

१६। वस्तुतस्तु नेदं युक्तम्।

अद्भिश्च वाचा दत्तायां म्रियेतादौ वरो यदि।
न च तौ दम्पती स्यातां कुमारी पितुरेव सा॥

इति वसिष्ठविरोधापत्तेः। "न च मन्त्रोपनीता स्यात्" इति तृतीयपादे पाठान्तरं, "कुमारी पुनरेव सा" इति चतुर्थपादे। किं च वाग्दानोत्तरं वरे देशान्तरं गतेऽपि हि विशेषो नारदेनोक्तः स विरुध्येत।

प्रतिगृह्य तु यः कन्यां वरो देशान्तरं व्रजेत्।
त्रीन् ऋतून् समतिक्रम्य कन्याऽन्यं वरयेद्वरम्॥(व्य.प.१२।२४)
स्त्रीपुंसयोस्तु सम्बन्धाद्वरणं प्राग्विधीयते।
वरणाद्ग्रहणं पाणेः संस्कारोऽपि विचक्षणैः॥ (व्य.प. १२।२)
तयोरनियतं प्रोक्तं वरणं दोषदर्शनात्। (व्य.प. १२।३)

इति। * प्रतिगृह्य, वाचा दत्तां स्वीकृत्य। संवत्सरमतीति पाठान्तरम्। स्त्रीपुंसयोः संसर्गात् प्राक् त्रितयं क्रियते, वरणं पाणिग्रहणं सप्तपदीप्रक्रमश्चेति। तत्र वरणं नाम वरस्य सम्प्रदानत्वाय कन्यादात्रा प्रार्थनम्। तदेव च वाग्दानम्। एवं स्थिते तयोः पाणिग्रहणसप्तपदीप्रक्रमयोः पूर्वभावि यद्वरणं तदनियतमनियामकमित्यर्थः। तयोरेव भार्यात्वोत्पादकत्वादिति भावः। अत्र मनुरनुपदमेव स्फुटीभविष्यति। दोषेति। अस्यार्थः वरणस्यानियामकत्वमपि पूर्ववरस्य दोषे सत्येवेतीति। इदं च माधवीये स्पष्टम्। एतदेकवाक्यतयैव माधवेन—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वरयित्वा तु यः कश्चित्प्रणश्येत्पुरुषो यदा ।
ऋत्वागमांस्त्रीनतीत्य कन्याऽन्यं वरयेत् पतिम् ॥

इति कात्यायनोक्तं, प्रणश्येद्देशान्तरं गच्छेत् अन्यथा प्रतीक्षावैयर्थ्यापत्तेरित्येवं व्याख्यातम् । वरमिति पाठान्तरम् । मन्त्रोपनीता पाणिग्रहणमन्त्रजन्यसंस्कारवती । इत्थम् एतदेकवाक्यतयोक्तनारदीये ऋतुपदेन रजोदर्शनमेव न तु कालः। एवं च संवत्सरमतीति पाठान्तरमयुक्तमेवेति बोध्यम् । तथा च पाणिग्रहणादिकं विना वाचा दानमिवाद्भिरपि दानं न भार्यात्वोत्पादकमित्यर्थः । कुमारी पितुः, अन्यस्मै यादृशसम्बन्धेन पित्रा विवाह्यते तादृक्पितृसम्बन्धवती । तथा च न तस्या वैधव्यम् । एतत्परमेव यमवाक्यं पूर्वाध्याये उक्तं तादृशम् ।

तथा च पराशरोऽपि,

नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥

इति । वाग्दानानन्तरं पाणिग्रहणात्प्राक् पतौ सम्भावितोत्पत्तिकपतित्वे पूर्वस्मिन्वरे नष्टे सति लक्षणया दूरदेशगमनेनापरिज्ञातवृत्तान्ते सतीत्यर्थः । एवं दुष्टे पूर्ववरे वाग्दत्ताऽपि वरान्तराय देयेत्यपि सिद्धम् । एवं च वाग्दत्ता, मनोदत्ता, अग्निं परिगता, सप्तमं पदं नीता, भुक्ता, गृहीतगर्भा, प्रसूता चेति सप्तविधा पुनर्भूः तां गृहीत्वा न प्रजां न धर्मं विन्देदिति बौधायनोक्तो वाग्दत्तामनोदत्तयोर्निषेधः पूर्ववरस्य निर्दोषत्वे इति बोध्यः ।

अत एव नारदः, (व्य० प० १२।३२)

दत्तां न्यायेन यः कन्यां वराय न ददाति ताम् ।
अदुष्टश्चेद्वरो राज्ञा स दण्ड्यस्तत्र चोरवत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति तत्रैव दण्डं विधत्ते। प्रदानं स्वामित्वहेतुर्न तु वाग्दानम्। तथा च मनुः,

मङ्गलार्थं स्वस्त्ययनं यज्ञश्चासां प्रजापतेः।
प्रयुज्यते विवाहेषु प्रदानं स्वाम्यकारकम्॥ (अ०५।१५२)
पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम्।
तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे॥ (अ०८।२२७)

इति। स्वस्त्ययनं कुशलेन कालातिवाहनहेतुः करणसाधनत्वात् कनकधारणादि स्वस्ति भवन्तो ब्रुवन्त्वित्यादि च यत्, यश्च प्रजापतिदेवताको वैवाहिको होमस्तत्सर्वं मङ्गलार्थम्। अभिमतार्थसिद्धिर्मङ्गलं तदर्थम्। निष्ठा भार्यात्वसमाप्तिरूपा। प्रतिगृह्य वाग्दानेन गते वरे ऋतुत्रयप्रतीक्षणादिकं मुख्यप्रागुक्तकालादूर्ध्वमपि दात्रा अदीयमानत्वविषयमेव। गम्यं त्वभावे दातॄणामित्याद्येकवाक्यत्वात्। तस्माद्वाग्दानस्थले उक्त एव प्रकारभेदः। अपुत्रां गुर्वनुज्ञात इति अपुत्रेण परक्षेत्रे इति च मूलं विवाहिताविषयमेव। तथैव च व्याख्यातं व्याख्यात्रा। मनूक्तनियोगोऽप्येतद्विषय एव। अत एव तत्र विधवापदोक्तिस्वारस्यम्। नान्यस्मिन्निति निषेधस्तु देवरसपिण्डसगोत्रान्यविषयकः। क्रमोक्त्या स्वरसतस्तथैव प्रतीतेः। एतस्यैव पोषकं *नोद्वाहिकेष्विति प्रागुक्तानियोगान्यसामान्यनियोगाद्यभावबोधकम्। एकं पुत्रमित्याद्युक्तपोषकमेव *अयमिति। अत एव पशुधर्म इत्युक्तम्। स च वारं वारं नियोजनादिरूपः। तदेव द्रढयति * तत इति। सामान्येनोक्तनियमानादरेण पुनः पुनस्तदर्थं नियोजयतीत्यर्थः। अत एव व्यभिचारदोषश्रवणस्य संयमप्राशस्त्यस्य चोपपत्तिरिति न तद्विरोधः। यस्या म्रियेतेति तु देवरसत्त्वे ऽन्यस्मै न देया किं तु तस्माएव देयेत्येवंपरम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत एव यथाविधीति पद्यं सर्वं सफलम्। पुनरुपनयने विशेषव-दत्र पुनर्विवाहे न विशेष इति यथाविधीत्युक्तम्। आधिगम्येत्य-नेन दांपत्यमुक्तम्। शुक्लेत्यादिना तस्यामदुष्टात्वं, भजेतेत्यनेन यावज्जीवं रमणान्युक्तम्। अत एव आप्रसवादित्युक्तिर्वीप्साद्वयं च। अन्यथा तस्य सामान्यसिद्धत्वादेव वीप्सानर्थक्यं स्पष्टमेव। एवं च प्रधान एवायं विवाहो नाङ्गम्। अत एवानेन विधानेन विन्देतेत्युक्तम्। देवर इति पतिरिति च सूत्रशाटकवद् भाविसं-ज्ञया। प्रागुक्तकात्यायनीये पतिमितिवत्। एवं च कुल्लूकभट्टो-क्तमेव युक्तम्। एवं शुल्कदमरणे—

मनुः, (अ० ९।९७)

कन्यायां दत्तशुल्कायां म्रियेत यदि शुल्कदः।
देवराय प्रदातव्या यदि कन्याऽनुमन्यते॥

इति। अनेन च तस्मै दानं स्पष्टमेवोक्तम्। यदि कन्येत्यनेन तथा तदनुमतौ देवराय देया, तदन्यानुमतौ तदन्यस्मै देया, वि-वाहमात्राननुमतौ तु कस्माअपि न देयेति, तया नैष्ठिकव्रतमेव कर्त्तव्यमिति सूचितम्। शुल्कदातुर्देशान्तरगतौ तु-

कात्यायनः,

प्रदाय शुल्कं गच्छेद्यः कन्यायाः स्त्रीधनं तथा।
धार्या सा वर्षमेकं तु देयाऽन्यस्मै विधानतः॥
अथ प्रवृत्तिरागच्छेत् प्रतीक्षेत समात्रयम्।
अत ऊर्ध्वं प्रदातव्या कन्या ऽन्यस्मै यथेच्छतः॥

इति। अत्र धार्येत्यनेन धार्यत्वेन ततः पूर्वमपि देयेति सूचितम्। बहुभिर्निर्दोषैर्वरणे कृते विशेषमाह-

स एव,

अनेकेभ्योऽपि दत्तायामनूढायां तु यत्र वै।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुराऽऽगतश्च सर्वेषां लभेताद्यो वरस्तु ताम् ॥
पश्चाद्वरेण यद्दत्तं तस्याः प्रतिलभेत सः ।
अथागच्छेत्समूढायां दत्तं पूर्ववरो हरेत् ॥

इति । वरो विवाहार्थोपस्थितस्तेन यच्छुल्कं दत्तं तदेव लभेतेत्यर्थः । तत्र वै पुरागतश्च सर्वेषां लभते तदिमां सुतामिति पाठान्तरम् । अन्यस्मै दत्तायां कन्यायां पूर्ववरोऽप्यायाति तदाऽनूढां तां लभते, ऊढायां तु स्वदत्तं द्रव्यमेव लभते न तु कन्यामित्यपि सिद्धम् । अत एव तस्माद्विज्ञानेश्वरीयमूलार्थप्रतिपादनमेव युक्तम् । अत एव न स्त्रपूर्वविरोधः । अत्रापि प्राग्वत्तथा वाच्ये तदनुक्तिः प्राक् तथोक्तत्वात् । उक्तनिष्कर्षाकथनबीजं त्वस्य देवराच्च सुतोत्पत्तिरिति कलिवर्ज्येषु गणनात् अनास्थारूपमेव ।

उद्वाहिताऽपि सा कन्या न चेत्संप्राप्तमैथुना ।
पुनः संस्कारमर्हन्ती यथा कन्या तथैव सा ॥

इति नारदीयमपि ऊढायाः पुनरुद्वाहमिति कलिनिषिद्धमेव । न च कलिनिषिद्धस्यापि युगान्तरीयधर्मस्यैव नष्टे मृते इत्यादि पाराशरं प्रतिपादकमस्त्विति वाच्यम् । कलावनुष्ठेयान् धर्मानेव वक्ष्यामीति प्रतिज्ञाय तद्ग्रन्थप्रणयनात् । अत एव भगवता योगीश्वरेण अत्र आचाराध्याये च संक्षेपेणैवोक्तं न तु मनुवद्विस्तृततयेति दिक् इति बोध्यम् ॥ १२७ ॥

मि०अव० समानासमानजातीयानां पुत्राणां विभागक्लृप्तिरुक्ता। अधुना मुख्यगौणपुत्राणां दायग्रहणव्यवस्थां दर्शयिष्यन् तेषां स्वरूपं तावदाह ।

या० औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः ।
क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा ॥ १२८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः ।
कानीनः कन्यकाजातो मातामहसुतो मतः ॥१२९॥
अक्षतायां क्षतायां वा जातः पौनर्भवः सुतः ।
दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत् ॥१३०॥
क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात्स्वयंकृतः ।
दत्तात्मा तु स्वयंदत्तो गर्भे विन्नः सहोढजः ॥१३१॥
उत्सृष्टो गृह्यते यस्तु सोऽपविद्धो भवेत्सुतः ।

मि० उरसो जात औरसः पुत्रः । स च धर्मपत्नीजः । सवर्णा धर्मविवाहोढा धर्मपत्नी । तस्यां जात औरसः पुत्रो मुख्यः । * तत्समः पुत्रिकासुतः। तत्सम औरससमः । पुत्रिकायाः सुतः पुत्रिकासुतः। अत एवौरससमः ।

यथाह वासिष्ठः,

अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम्।
अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति॥इति।

अथवा पुत्रिकैव सुतः पुत्रिकासुतः। सोऽप्यौरससम एव । पित्रवयवानामल्पत्वात् मात्रवयवानां बाहुल्याच्च । यथाह वसिष्ठः; तृतीयः पुत्रिकैवेति। तृतीयः पुत्रः पुत्रिकैवेत्यर्थः । द्व्यामुष्यायणस्तु जनकस्यौरसादपकृष्टोऽन्यक्षेत्रोत्पन्नत्वात् । *क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा । इतरेण सपिण्डेन देवरेण वोत्पन्नः पुत्रः क्षेत्रजः ॥ १२८ ॥

मि० गूढजः पुत्रो भर्तृगृहे प्रच्छन्न उत्पन्नो हीना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धिकजातीयपुरुषजत्वपरिहारेण पुरुषविशेषजत्वनिश्चयाभावेऽपि सवर्णजत्वनिश्चये सति बोद्धव्यः। कानीनस्तु कन्यकायामुत्पन्नः पूर्ववत्सवर्णात्, स मातामहस्य पुत्रः, यद्यनूढा सा भवेत्तथा पितृगृहे एव संस्थिता। अथोढा तदा वोढुरेव पुत्रः।

यथाह मनुः, (अ० ९ श्लो० १७२)

पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः।
तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवम्॥

इति॥ १२९॥

मि० पौनर्भवस्तु पुत्रोऽक्षतायां क्षतायां वा पुनर्भ्वां सवर्णादुत्पन्नः। मात्रा भर्त्रनुज्ञया प्रोषिते प्रेते वा भर्तरि, पित्रा वा, उभाभ्यां वा सवर्णाय यस्मै दीयते स तस्य दत्तकः पुत्रः। यथाह—

मनुः, (अ० ९ श्लो० १६८)

माता पिता वा दद्यातां यमद्भिः पुत्रमापदि।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दात्रिमः सुतः॥ इति।

आपद्ग्रहणादनापदि न देयः। दातुरयं प्रतिषेधः। तथा एकपुत्रो न देयः। न त्वेवैकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वेति वसिष्ठस्मरणात्। तथा अनेकपुत्रसद्भावेऽपि ज्येष्ठो न देयः।

(मनु० अ० ९ श्लोक. १०६)

ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः।

इति तस्यैव पुत्रकार्यकरणे मुख्यत्वात्।

पुत्रप्रतिग्रहप्रकारश्च, पुत्रं प्रतिग्रहीष्यन्बन्धूनाहूय राजनि चावेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अदूरबान्धवं बन्धुसन्निकृष्टमाहूय एव प्रतिगृह्णीयादिति वसिष्ठेनोक्तः । अदूरबान्धवमित्यत्यन्तदेशभाषाविप्रकृष्टस्य प्रतिषेधः। एवं क्रीतस्वयंदत्तकृत्रिमेष्वपि योजनीयम् । समानन्यायत्वात् ॥ १३० ॥

मि० क्रीतस्तु पुत्रः ताभ्यां मातापितृभ्यां मात्रा पित्रा वा विक्रीतः । पूर्ववत् तथैकं ज्येष्ठं च पुत्रं वर्जयित्वा आपदि सवर्ण इत्येव ।

यत्तु मनुनोक्तम्, (अ० ९ श्लो० १७४)

क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् ।
स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा॥इति,

तद् गुणैः सदृशोऽसदृशो वेति व्याख्येयम्, न जात्या । सजातीयेष्वयं प्रोक्त इत्युपसंहारात् । * कृत्रिमः स्यात्स्वयंकृतः । कृत्रिमस्तु पुत्रः स्वयं पुत्रार्थिना धनक्षेत्रप्रदर्शनादिप्रलोभनैः पुत्रीकृतो मातापितृविहीनः । तत्सद्भावे तत्परतन्त्रत्वात् । दत्तात्मा तु यो मातापितृविहीनस्ताभ्यां त्यक्तो वा तवाहं पुत्रो भवामीति स्वयं दत्त उपनतः । सहोढजस्तु गर्भे स्थितो गार्भिण्यां परिणीतायां यः परिणीतः स वोढुः पुत्रः ॥ १३१ ॥

मि० अपविद्धो मातापितृभ्यामुत्सृष्टो यो गृह्यते स ग्रहीतुः पुत्रः । सर्वत्र सवर्ण इत्येव ॥

मि० अव० एवं मुख्यामुख्यपुत्राननुक्रम्यैतेषां दायग्रहणे क्रममाह ।

या० पिण्डदोंऽशहरश्चैषां पूर्वाभावे परः परः॥ १३२॥

मि० एतेषां पूर्वोक्तानां पुत्राणां द्वादशानां पूर्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्य पूर्वस्याभावे उत्तरः उत्तरः पिण्डदः श्राद्धदोऽश-हरो धनहरो वेदितव्यः । औरसपौत्रिकेयसमवाये औरस्यैव धनग्रहणे प्राप्ते——

मनुरपवादमाह, (अ. ९ श्लो. १३४)

पुत्रिकायां कृतायां तु यदि पुत्रोऽनुजायते ।
समस्तत्र विभागः स्यात् ज्येष्ठता नास्ति हि स्त्रियाः॥

इति ।

तथा अन्येषामपि पूर्वस्मिन् पूर्वस्मिन् सत्यप्युत्तरेषां पुत्राणां चतुर्थांशभागित्वमुक्तं वासिष्ठेन, तस्मिंश्चेत्प्रतिगृहीते औरस उत्पद्येत चतुर्थभागभागी स्यात् दत्तक इति । दत्तकग्रहणं क्रीतकृत्रिमादीनां प्रदर्शनार्थम् । पुत्रीकरणाविशेषात् । तथा च——

कात्यायनः,

उत्पन्ने त्वौरसे पुत्रे चतुर्थांशहराः सुताः ।
सवर्णा,असवर्णास्तु ग्रासाच्छादनभाजनाः॥इति।

सवर्णा दत्तकक्षेत्रजादयः, ते सत्यौरसे चतुर्थांशहराः। असवर्णाः कानीनगूढोत्पन्नसहोढजपौनर्भवाः, ते त्वौरसे सति न चतुर्थांशहराः किन्तु ग्रासाच्छादनभाजनाः ।

यदपि विष्णुवचनम्,

अप्रशस्तास्तु कानीनगूढोत्पन्नसहोढजाः ।
पौनर्भवश्च नैवैते पिण्डारिक्थांशभागिनः॥ इति,

तदप्यौरसे सति चतुर्थांशनिषेधपरमेव । औरसाद्यभावे तु कानीनादीनामपि सकलपित्र्यधनग्रहणमस्त्येव । पूर्वाभावे परः पर इति वचनात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदपि मनुवचनम्, (अ. ९ श्लो. १६३)

एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः।
शेषाणामानृशंस्यार्थं प्रदद्यात्तु प्रजीवनम्॥ इति,

तदपि दत्तकादीनामौरसप्रतिकूलत्वे निर्गुणत्वे च वेदितव्यम्। तत्र चेत्रजस्य विशेषो दर्शितः—तेनैव, (अ. ९ श्लो. १६४)

षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात्।
औरसो विभजन् दायं पित्र्यं पञ्चममेव वा॥ इति।

प्रतिकूलत्वनिर्गुणत्वसमुच्चये षष्ठमंशम्, एकतरसद्भावे पञ्चममिति विवेक्तव्यम्। यदपि मनुना पुत्राणां षट्कद्वयमुपन्यस्य पूर्वषट्कस्य दायादबान्धवत्वमुक्तम्, उत्तरषट्कस्यादायादबान्धवत्वमुक्तम्, (अ. ९ श्लो. १५९। १६०)

औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट्॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा।
स्वयन्दत्तश्च शौद्रश्च षडदायादबान्धवाः॥ इति,

तदपि स्वपितृसपिण्डसमानोदकानां सन्निहितरिक्थहरान्तराभावे पूर्वषट्कस्य तद्रिक्थहरत्वमुत्तरषट्कस्य तु तन्नास्ति, बान्धवत्वं पुनः समानगोत्रत्वेन सपिण्डत्वेन चोदकप्रदानादिकार्यकरत्वं वर्गद्वयस्यापि सममेवेति व्याख्येयम्।

(अ. ९ श्लो. १४२)

गोत्ररिक्थे जनयितुर्न भजेद्दत्रिमः सुतः।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यत्र दत्त्रिमग्रहणस्य पुत्रप्रतिनिधिप्रदर्शनार्थत्वात्। पितृधनहारित्वं तु पूर्वस्य पूर्वस्याभावे सर्वेषामविशिष्टम्।

(मनु. अ. ९ श्लो. १८५)

न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः।

इत्यौरसव्यतिरिक्तानां पुत्रप्रतिनिधीनां सर्वेषां रिक्थहारित्वप्रतिपादनपरत्वात्। औरसस्य तु--

(मनु. अ. ९ श्लो. १६३)

एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः।

इत्यनेनैव रिक्थभाक्त्वस्योक्तत्वात्। दायादशब्दस्य दायादानपि दापयेदित्यादौ पुत्रव्यतिरिक्तरिक्थभाग्विषयत्वेन प्रसिद्धत्वाच्च। वासिष्ठादिषु वर्गद्वयेऽपि कस्यचिद्व्यत्ययेन पाठो गुणवद्गुणवद्विषयो वेदितव्यः। गौतमीये तु पौत्रिकेयस्य दशमत्वेन पाठो विजातीयविषयः। तस्मात्स्थितमेतत् पूर्वपूर्वाभावे परः परोंऽशभागिति।

यत्तु- (अ. ९ श्लो. १८२)

भ्रातॄणामेकजातानामेकश्चेत्पुत्रवान् भवेत्।

सर्वांस्तान् तेन पुत्रेण पुत्रिणो मनुरब्रवीत्॥

इति, तदपि भ्रातृपुत्रस्य पुत्रीकरणसम्भवेऽन्येषां पुत्रीकरणनिषेधार्थम्, न पुनः पुत्रत्वप्रतिपादनाय। तत्सुता गोत्रजा बन्धुरित्यनेन विरोधात्॥ १३२॥

वा० १। प्रसङ्गसंगतिमाह *समानेति। *तेषां, तेषां चेत्यर्थः। *क्लृप्तिः, कल्पना। मुख्याश्च गौणाश्चेत्यादिसमासः। * व्यवस्थां, नियमम्, बहूनां समवधाने एवमेवेत्येवंरूपम्। स्वरूपमिति जातावेक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वचनम्। स्वरूपाणीत्यर्थः । क्रमेणेति शेषः । अत एव वक्ष्यति *अनुक्रम्येति । इदमुपलक्षणं लक्षणानामपि । अत्रौरस इति लक्ष्यं, धर्मेति लक्षणम् । आद्यमपि योगरूढम् । तत्र यद्यपि उरसि जातस्ततः प्रभवति वेत्येव शास्त्रीयशाब्दः, तथापि—

अङ्गादङ्गात्संभवसि हृदय दधि जायसे ।

इति श्रुत्यनुरोधेन फलितार्थमाह * उरसो जात इति। यद्यपि यो धर्मपत्नीजः स औरस इत्याद्युद्देश्यविधेयभावस्तथापि योगार्थेन तस्य ज्ञातत्वात्तेन रूपेणोद्दिश्य रूढ्यर्थविधानमित्याह * स च धर्मपत्नीज इति । यद्यपि मूले नोक्तं तथापि सवर्णायां संस्कृतायामिति बौधायनमात्रोक्तमाह *सवर्णेति। ननु नासौ मूलाक्षरार्थः। किं च स्वक्षेत्रे संस्कृतायामित्येवं मनुविष्णुवासिष्ठदेवलादिभिर्बहुभिरुक्तमिति सवर्णेत्युपलक्षणमेवैकत्रेत्याशयेन सर्वाभिमतमूलार्थमाह * धर्मेति । धर्मेत्यनेन यस्य यो नधर्मविवाहस्तदूढानिरासः । तथा च धर्मपत्नी द्विजानां द्विजैव, शूद्रस्य तु मुख्यपत्न्यभावेपि तत्तुल्या परिणीता । * तस्यां जात इति । स्वस्मादिति शेषः । अत एव विष्णुना स्वक्षेत्रे संस्कृतायां स्वयमुत्पादितः प्रथम इत्युक्तम् ।

मनुनापि,

स्वक्षेत्रे संस्कृतायां हि स्वयमुत्पादयेत्तु यम् ।
तमौरसं विजातीयात्पुत्रं प्रथमकाल्पिकम् ॥

इत्युक्तम्।एतदर्थमेव धर्मपदम्।तेन प्रतिलोमजानां न तत्त्वम्। तथा च पत्नीत्वं मुख्यमविवक्षितामिति शूद्राऽपि तादृशी द्विजानाम्। अत एव तज्जस्यौरसत्वं वक्ष्यते "शूद्रापुत्रस्त्वौरसोपि" इति भावः। अवतरणोक्तमुख्यत्वं प्रतिपादयति *औरसः पुत्रो मुख्य इति।तथा च तद्वत् आसुरादिविवाहोढसवर्णापुत्रः, अनुलोमेन विवाहि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तक्षत्रादिस्त्रीषु विप्रादुत्पन्नो मूर्द्धावसिक्तः, अम्बष्ठो, निषादापरपर्यायः पारशवश्च, वैश्यादिस्त्रियो राज्ञ उत्पन्नौ माहिष्योग्रौ च, शूद्रायां वैश्यादुत्पन्नः करणश्चेत्येतेऽप्यौरसा एव । अत एव वक्ष्यति, मूर्धावसिक्तादीनामौरसेष्वेवान्तर्भावादितिति बोध्यम् ।

२। अग्रिमांशं सप्रतीकधारणं व्याचष्टे *तत्सम इति।इदं लक्ष्यम्, अवशिष्टं लक्षणम् एवमग्रे सर्वत्रोभयं बोध्यम्।एतद्व्याख्याने बीजमह * अत एवेति । यत औरस्याः पुत्रिकायाः सुतो ऽत एवौरससमत्वं, न साक्षादौरसत्वं, व्यवहितत्वादित्यर्थः । इदं च दायग्रहणे न पिण्डदाने । इदमपि संवित्सत्त्वे एव नान्यथेति ध्वनयन्नाह * यथाहेति । संवित्करणे बीजमाह * अभ्रातृकामिति । अकृता वा कृतावेति मनुरप्यत्र बोध्यः । एतेन द्वितीये साधकत्वेन तदुक्तिः केषां चिदपास्ता। अयं मातामहस्यैव। तथा संविदा तु बीजिनोऽपि ।

अत एव यमः,

कुर्यान्मातामहश्राद्धं नियमात्पुत्रिकासुतः ।
उभयोरर्थसम्बद्धः स कुर्यादुभयोरपि ॥

इति । तथा चायमपि द्व्यामुष्यायणः । संविदंशे तत्त्वं तु अरोगिणीं भ्रातृमतीमित्यत्रोक्तम् ।

३। वासिष्ठानुरोधेन, कर्मधारयस्य ततो लघुत्वाच्चाह *अथ वेति । नन्वत्र मते तत्सम इति विरुद्धमव्यवहितत्वात्, अत आह *सोऽप्यौरसेति । पित्रवयवानां तस्यामल्पत्वात् अवयवबाहुल्याभावेन व्यवहितत्वात्तत्त्वमिति भावः ।अत्र सम इत्युक्त्या ऽस्यापि कालिवर्ज्यत्वं नेति स्फुटमग्रे । तमेवाह *यथाहेति । तत् व्याचष्टे * तृतीयः पुत्र इति । वासिष्ठेन तृतीयत्वेन पुत्रिका परिगणिता न मूलकृतेति ज्ञेयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४। ननु द्व्यामुष्यायणः प्रागुक्तो बीजिनः किमौरस उत तत्समाद्यन्यतमोऽत आह *द्व्यामुष्यायणस्त्विति। *औरसादपकृष्ट इति। औरससम इत्यर्थः। औरसापेति पाठान्तरम्। औरसविशिष्ट इति पाठोऽप्येवम्। तत्र हेतुमाह * अन्येति। एतेन व्यवहितत्वाभावात्कथं तत्त्वमित्यपास्तम्।

५। प्राग्वदाह *क्षेत्रज इति। *सगोत्रेणेति। सवर्णेनेत्यादिः सर्वत्र। इतरेणेति द्विधा व्याचष्टे *सपिण्डेनेति। सगोत्रान्यसपिण्डेनेत्यर्थः। मूलस्थ एव वाशब्द इत्याह * वोत्पन्न इति। विधवायाम् अपुत्रां गुर्वनुज्ञात इति मूलोक्तविधिना नियोगधर्मेणेति शेषः। यस्या म्रियेतेत्युक्तेरिति भावः। पुत्रजननासमर्थस्य जीवतोऽपि पत्युर्नियोगेन तत्क्षेत्रे सवर्णात्तादृशाज्जातश्चेत्यपि बोध्यम्। अत एवात्र साधारणमुक्तम्।

तथा च मनुः,

यस्तल्पजः प्रमीतस्य क्लीबस्य व्याधितस्य च।
स्वधर्मेण नियुक्तायां स ज्ञेयः क्षेत्रजः सुतः॥

इति। अयं च क्षेत्रिण एव। अनेन विधिना जात इत्युक्तेः। बीजिनोऽपि पुत्रेच्छायां तस्यापि। अपुत्रेण परक्षेत्रे इति मूलोक्तेः॥ १२८॥

बा० १। उत्पन्न इति। निश्चितपुरुषविशेषात्सवर्णादिति भावः। तदेवाह *हीनेत्यादि। सर्वमेकं वाक्यम्। अत्र तन्निश्चयाभावे न तस्याः किं त्वन्येषाम्। एवं तन्निश्चयस्तद्द्वारा। तया तत्स्वरूपस्य ज्ञातत्वात्। यत्र तु बलाद्रहसि निशि तमोवृतायां पुरुषान्तरसम्भोगात्साऽपि वर्णविशेषं न जानाति तत्र स गूढजनामात्रधारी न प्रोक्तगूढजवत्प्रशस्त इति मदनपारिजातकृत। स त्याज्य एवेत्यन्ये। अयमपि क्षेत्रिण एव।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा च मनुः,

उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः।
स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः ॥ इति ।

२। *पूर्ववदिति । पूर्वो यथा सवर्णजस्तद्वदयमपि सवर्णज इत्यर्थः । कन्यकायामित्यस्याविवाहितायामिति मात्रं नार्थः। तत्रापि पुरुषासम्बन्धे तत्प्रयोगदर्शनात् । किं तु अमन्त्रवत्संस्कारपूर्वकक्षतयोन्यामित्यर्थः । तत्त्वमेव हि तत्प्रवृत्तिनिमित्तमित्यन्यत्र स्पष्टम् । अग्रे वक्ष्यते च । तदेतत् ध्वनयन् विकल्पमाह *यद्यनूढेति । मध्यमणिन्यायेनाग्रेऽपि अन्वयसूचनार्थम् उभयसाधारणं निमित्तान्तरं भेदेनाह *तथेति । चार्थेऽयम्। तत्रैव संस्थिता चेत्यर्थः । *अथोढेति। तत्रैव स्थिता चेत्यर्थः। तथा च विवाहात्प्रागुत्पन्नस्तत्र मातामहस्य, तदुत्तरमुत्पन्नस्तत्र वोढुरिति सिद्धम् । अत्रोभयत्र मनुसंमतिमाह * यथाह मनुरिति । पितृगृहे स्थिता कन्या क्षतयोनिः सुता रहोव्यभिचारेण यं पुत्रं जनयेत् कन्यासमुद्भवं तं तु नाम्ना कानीनं वदेत् स वोढुर्भवतीत्यर्थः । अत्र वोढुरित्युपादानाद्विवाहिता चेत्तदा वोढुर्नो चेन्मातामहस्येत्येतद्गम्यते । अत एव वासिष्ठः, कानीनः पञ्चमो यं पितृगृहे ऽसंस्कृता कामादुत्पादयेत्स कानीनो मातामहस्य पुत्रो भवतीति ।

अप्रत्ता दुहिता यस्य पुत्रं विन्देत तल्पजा।
पुत्री मातामहस्तेन दद्यात्पिण्डं हरेद्धनम् ॥ इति च ।

अत्रापि एकस्यैवापुत्रत्वे तस्यैव, उभयोरपि तत्त्वे उभयोरपीति बोध्यम् ॥ १२९ ॥

बा० १। स्वरीत्यैवाह *पुत्रो ऽक्षतायामिति । पत्या अभुक्तायां, भुक्तायां वा जीवता पत्या त्यक्तायां, विधवायां वेत्यर्थः ।

११०४२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा च विष्णुः,

या तु पत्या परित्यक्ता विधवा स्वेच्छया ऽथ वा।
उत्पादयेत्पुनर्भूत्वा स पौनर्भव उच्यते ॥ इति।

अयं बीजिन एव। परित्यागेन मरणेन च भर्तुः क्षेत्रस्वत्वाभावात्। नियोगस्याभावात् स्वेच्छाग्रहणाच्च।

२। मौलक्रमेणैवाह *मात्रेति। अस्याः पत्यसांनिध्ये दानेऽधिकारः। तच्च द्विविधम्। तत्राद्ये आह *भर्त्रनुज्ञया प्रोषिते इति। तयैवेत्यर्थः। सन्निहिते ऽनधिकारिणि वेत्यपि बोध्यम्। द्वितीये आह * प्रेते वा भर्त्तरीति। तथा चात्र स्वातन्त्र्यम्।

तथा च वासिष्ठः, शुक्रशोणितसम्भवः पुत्रो मातापितृनिमित्तकस्तस्य प्रदानविक्रयत्यागेषु मातापितरौ प्रभवत इति।

३। मौलं पक्षान्तरमाह *पित्रा वेति। अनयोश्चायं विशेषः। उभयोर्जीवने अस्यापि पत्न्यनुमत्यैव दातृत्वम्। अत्यन्तापदि तु कथं चिदपि तदनुमत्यलाभे स्वातन्त्र्यमपि। यद्यपि मूले एवावदेवोक्तं तथापि दद्यातामिति मन्वनुरोधेन कैमुतिकन्यायेन च लब्धमर्थमाह * उभाभ्यां वेति। पुत्रस्य सवर्णत्वे प्रतिग्रहीतुरपि तत्त्वमर्थासिद्धमेवेत्याह * सवर्णायेति। सवर्णो य इति पाठान्तरम्। *यस्माइति। यो ऽत्यन्तदुर्गत्या भरणासामर्थ्येन। विधिपूर्वक इति शेषः। * सः, प्रतिगृहीतसवर्णः। * तस्येति। प्रतिग्रहीतुरेवेत्यर्थः। अयमद्व्यामुष्यायणः। द्व्यामुष्यायणोऽप्ययमस्तीत्यन्यत्र स्पष्टम्। तत्र मानं मनुमाह *यथाहेति। अत्र वाशब्दद्विवचनयोः स्वारस्यादध्याहारेणार्थत्रयलाभः। तथा च भर्तरि प्रोषितादौ तदनुमत्यैव मृते वा ऽऽपदि केवलमातुरधिकारो दाने, तथा मातरि मृतायामुन्मादादिदोषयुक्तायां वा तदनुमत्या, पितृगृहस्थितायां वा तदनुमत्यैवापदि केवलं पितुरधिका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रस्तत्र । अन्यथोभयोरपि सहैवाति बोध्यम् ।

२। तथा च वासिष्ठः, न स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वा ऽन्यत्र भर्तुरनुज्ञानादिति । स्त्रीग्रहणात्पत्युः पूर्वोक्ते एव विषये स्वातन्त्र्यं द्योत्यते, न तु सर्वदा । उपक्रमविरोधात् । विशेषणे निषेधसंक्रमाद्दाने इव प्रतिग्रहेऽपि स्त्रियाः अधिकारः । होमस्तु न भवति ।

शौनकोऽपि,

वन्ध्या वा मृतपुत्रा वा पुत्रार्थं समुपोष्य च । इति ।

३। इदं च सधवाविधवोभयसाधारणम् इति स्पष्टमेव । एतेनात्र चशब्दः पठितुं युक्तो न वाशब्द इत्यादि मेधातिथ्युक्तमपास्तम् । अद्भिरिति वासिष्ठोक्तविध्युपलक्षणम् । *सदृशं, प्रतिग्रहीतृसवर्णम् । एतेन तत्त्वं न जातितः, किं तु कुलानुरूपैर्गुणैः । तथा च क्षत्रियादिरपि ब्राह्मणस्य दत्तको युज्यते इति मेधातिथ्युक्तमपास्तम् । सवर्णसदृशपठितस्यापि तत्त्वस्यैवौचित्यात् । सजातीयेष्विति मूलोक्तेश्च । प्रीतीति लोभभयद्वेषादिनिरासार्थम् । इदं च देयपुत्रविशेषणम् ।

विक्रयं चैव दानं च न नेयाः स्युरनिच्छवः ।

इत्युक्तेः । *दात्रिम इति । क्त्रेर्मब् नित्यमिति साधुः । आपदीत्यस्य दुर्भिक्षादावित्यर्थः । यत्तु तस्य प्रतिग्रहीतुरपुत्रत्वे इत्यर्थः । तथा च सपुत्रत्वे तस्यैव दोषः ।

अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः सदा ।
पिण्डोदकक्रियाहेतोर्यस्मात्तस्मात्प्रयत्नतः ॥

इत्यत्र्यादिस्मरणादिति । तन्न । तथा सत्त्वेऽपि तदापत्तेर्ग्रहणस्यात्रोपस्थापकाभावात् । तदेतत् ध्वनयन् तल्लब्धमर्थमाह * आपदिति । * नदेय इति । इति गम्यते इति शेषः । तत एवाह * दातुरिति । अनापदीत्यादिः । न प्रतिग्रहीतुरि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यर्थः। तथा च तत्र दाने तस्यैव दोषो न त्वस्येति भावः। इत एव सङ्गतेर्विशेषमाह * तथेति । * न देय इति । नापि प्रतिग्राह्य इति शेषः । तथा च तथाकरणे उभयोर्दोष इति भावः। वाशब्दः चार्थे। स हि सन्तानाय पूर्वेषामिति तच्छेषः।

शौनकोऽपि,

नैकपुत्रेण कर्त्तव्यं पुत्रदानं कदाचन।

बहुपुत्रेण कर्त्तव्यं पुत्रदानं प्रयत्नतः॥ इति।

अत्र नैकेति निषेधविधिः। ततोऽर्थलब्धार्थानुवादकमुत्तरार्द्धं, न तु सोऽपि विधिः। तथा सति आपद्यपि यथाकथञ्चित्स्ववन्निर्वाहेण तद्दाने दोषापत्तेः । प्रयत्नत इत्युक्त्या ऽस्यावश्यकत्वलाभेन नित्यविधित्वे निमित्तफलयोरनपेक्षयाऽऽपदाद्यनपेक्षत्वेन तत्रापि तदकरणे दोषापत्तेश्च।

४। एतेन नैकेत्येव सिद्धे बहुपुत्रेणेत्याद्युक्त्या द्विपुत्रस्य तद्दाने नाधिकार इति लब्धमित्यपास्तम् । उक्तयुक्तेः । एकपुत्रस्य तद्दाने वासिष्ठोक्तस्य हेतोस्सहीत्यादेस्तत्राभावाच्च। तस्मात्तदे-कवाक्यतयाऽपि तथैव । अन्तरा बहुशब्दो ऽनेकपर एव। तदंतर प्रयत्नत इत्यपि वासिष्ठोक्तविधिपरमेवेति बोध्यम् । तदंतरं ध्वनयन् विशेषान्तरमाह * तथाऽनेकपुत्रेति। अन्यथा बहुपुत्रे-त्युक्तं स्यात्। तथा च वासिष्ठे एकं पुत्रमित्युपलक्षणम्।

५। मनुमाह *ज्येष्ठेनेति। अस्य यथाश्रुतार्थो न विवक्षितोऽन्य-विरोधापत्तेः, अत आह *इति तस्यैवेति। अनेनेत्यर्थः। *मु-ख्यत्वात्, मुख्यत्वप्रतिपादनात्। तथा च परलोकहानिर्बोध्येति भावः। अत एव स्मृत्यन्तरमपि, न ज्येष्ठं पुत्रं दद्यादिति।

६। आद्भिरित्यनेन सूचितमाह *पुत्रप्रतीति *निवेशनस्य, गृहस्य। "सन्देहे चोत्पन्ने दूरे शूद्रमिव स्थापयेत् विज्ञायते ह्येकेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बहून् ततस्त्रायते" इति तच्छेषः। सति सम्भवे * बन्धुसन्निकृष्टं, भ्रातृपुत्रादिकम्। तदभावे *अदूरबान्धवं, सन्निहितदेशवृत्तिपित्रादिकं ज्ञातकुलशीलम् अन्यमपि। परीक्षितस्यापि कथञ्चित् ब्राह्मण्यादिसन्देहे उत्पन्ने यावत्तन्निवृत्तिं दूरे स्थापयेत्, तेन न व्यवहरेत्। अपुत्रस्य पुत्रीकरणावश्यकत्वद्योतनाय श्रुत्याकर्षः, विज्ञायते इति। श्रूयते इत्यर्थः। हि यत एकेनानौरसेनापि पुत्रेण बहून् पित्रादीन् ततः नरकात् त्रायते इति अर्थः॥किञ्चिद्दूरस्थसङ्ग्रहायाह। * अदूरमिति। अनेनेत्यर्थः।

७। दत्तके उक्तपुत्रीकरणविधिं क्रीतादिष्वप्यतिदिशति * एवं क्रीतेति। प्रागुक्तं होमभिन्नं सर्वमपि ग्रहणापादानग्रहीतृविषयकं नियमनमित्यर्थः। यथायोग्यं दृष्टार्थत्वात् वसिष्ठेन विक्रयत्यागोपादानाच्च। स्वयंदत्ते तु होमोऽपि। तत्रापि प्रतिग्रहसत्त्वात्। एवमपविद्धेऽपि यथासम्भवं बोध्यमिति भावः। अतिदेशवचनाभावेऽपि युक्तिरेव नियामिकेत्याह *समानेति॥१३०॥

१। *ताभ्यामिति मूलस्थस्य व्याख्या * मातेति। ननु एवं मात्रा पित्रा वेत्यधिकमत आह * पूर्ववदिति। तथा च तुल्यन्यायत्वात्तथोक्तावपि तल्लाभ इति भावः। तत एव चाह * तथैकमित्यादि।

२। सवर्ण इत्यंशे मनुविरोधं परिहरति * यस्त्विति। मातापित्रोरन्तिकात् सकाशादित्यर्थः। * तस्य, क्रेतुरेव। सदृशोऽसदृशोऽथवेति पाठः। सदृशोऽसदृशोऽपि वेति पाठान्तरम्। * न जात्येति। ब्राह्मणत्वादिनेत्यर्थः। निषेधे हेतुमाह *सजातीयेष्विति। मूलकृतेति शेषः। तथा च तद्विरोधान्न तथा

१ ग्रहणापादानं च ग्रहीता चेति विग्रहः। पुत्रदाता ग्रहणापानशब्देनोच्यते। ग्रहणक्रियां प्रति तस्यापादानत्वात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्याख्यानं किं त्वगत्या तथैवेति भावः।

३। पुनः सिंहावलोकनन्यायेन सप्रतीकं व्याचष्टे * कृत्रिम इति।

तथा च मनुः, (अ. ९ । १६९)

सदृशं यं प्रकुर्वीत गुणदोषविचक्षणम्।
पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयस्तु कृत्रिमः॥ इति।

अयमपि तस्यैव प्रलोभनैरिति। तथा च प्रौढत्वमपि तत्र बोध्यम्।

४। अत्र दत्तात्मेति लक्ष्यनिर्देशः स्वयं दत्त इति लक्षणम् इत्याशयेनाह * दत्तात्मात्विति। * त्यक्त इति। अकारणे इति शेषः। * इति, इत्येवम्। स्वयं दत्त इत्यस्यार्थः * उपनत इति। प्राप्त इत्यर्थः।

५। अन्ये तु विपरीतो लक्ष्यलक्षणभावः। तथा च तादृशः तवाहं पुत्रो भवामीत्येवमात्मानं दत्तवान्पूर्ववद् गृहीतो यः स स्वयं दत्त इत्यर्थः इत्याहुः।

तथा च मनुः, (अ. ९ । १७७)

मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात्।
आत्मानं स्पर्शयेद्यस्मै स्वयं दत्तस्तु स स्मृतः॥ इति।

६। सहोढज इत्यस्य तया सह य ऊढो विवाहितो गर्भस्तस्माज्जात इत्यर्थः। गर्भस्योढत्वात्तस्याप्यूढत्वमिति। सहोढ इत्यपि नामान्तरं मानवादौ, तत् ध्वनयन् "गर्भे विन्न" इति लक्षणं शेषपूरणेन व्याचष्टे * गर्भे स्थित इति। विन्न इत्यस्य व्याख्या * परिणीतायामिति। अन्ये तु-गर्भे स्थितः गर्भिण्यां परिणीतायां स्वीकृतः गर्भेण सह योढा पश्चात्तस्यां जात इत्यर्थः। ङ्यापोरिति ह्रस्व इत्याहुः। सवर्णात्सम्भूतत्वं तु उभयत्र भावः।

१ स्वयंदत्त इति लक्ष्यनिर्देशः दत्तात्मेति लक्षणमिति भावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

थाऽपि बोध्यम् ।

तथा च मनुः, (अ. ९ । १७३)

या गर्भिणी संस्क्रियते ज्ञाताऽज्ञातापि वा सती ।

वोढुः स गर्भो भवति सहोढ इति चोच्यते ॥ इति ।

७। पुरुषसम्बन्धमात्रान्न कन्यात्वहानिः किं तु मन्त्रवत्संस्कारपूर्वकक्षतयोनित्वे एव, तदभाव एव हि कन्याशब्दप्रवृत्तिनिमित्तमिति स्पष्टं कन्यायाः कनीनचेति सूत्रे महाभाष्ये। एवं च तस्या अपि विवाहसम्भव इति न दोषः । अत एव प्रागुक्तद्विविधकानीनसङ्गतिरिति बोध्यम् ॥ १३१ ॥

१। प्रक्रान्तत्वादाह * मातेति । परित्यक्त इत्यर्थः । दोषाभावेऽपि भरणासामर्थ्येन मूलजातत्वादिना वेत्यादिः । * य इति । ज्ञातपित्रादिरित्यर्थः । *गृह्यते, पुत्रत्वेनेत्यादिः ।

तथा च मनुः, (अ. ९ । १७१)

मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा ।

यं पुत्रं प्रतिगृह्णीयादपविद्धस्तु स स्मृतः ॥ इति ।

कृत्रिमादिषु विशेषमाह * सर्वत्रेति । कृत्रिमस्वयंदत्तसहोढजापविद्धेष्वित्यर्थः ।

उ. १। एतेषां क्रमोऽपि विवक्षितो न स्वरूपमात्रमित्याशयेन सङ्गतिमाह * एवमिति । यद्यपि पिण्डद इत्यप्यस्ति तथापि प्रकरणादाह * दायेति । रिक्थेत्यर्थः । तत्कथनं त्वानुषङ्गिकमिति भावः । एषामित्यस्य व्याख्या * पूर्वोक्तानामित्यादि । संख्याया अनुक्तत्वेऽपि विभागेनैव लाभादाह * द्वादशानामिति । निर्धारणे षष्ठी । पूर्वाभावे इति वीप्सागर्भं सप्तपर्णइतिवदग्रिमानुरोधेनेत्याह * पूर्वस्येति । परशब्दो नोत्कृष्टार्थ इत्याह * उत्तर इति । मौलक्रमेणाह * पिण्डद इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्त्वमात्रमविवक्षितमित्याह * श्राद्धद इति । एकसंग्रहायाह * धनेति । चोऽन्वान्वये न तु समुच्चये इति सूचनाय व्याख्याने तत्त्यागः ।

२।यद्यप्यत्र प्रकरणादंशहर इत्येवोचितमिति पिण्डद इत्यसंबद्धम्, अथ श्राद्धप्रकरणे ऽनुक्तत्वात्प्रकरणान्तरे सङ्गत्यभावादत्रैव पुत्रप्रसङ्गेन तदप्युक्तं लाघवादिति चेत्, एवमपि अन्ते वाच्यमागन्तूनामिति न्यायात् नादाविति तथोक्ता सङ्गतिरेव, तथापि पुत्राणां पिण्डदत्वमावश्यकमदाने प्रत्यवायश्रवणात् धनहरत्वं तु आनुषङ्गिकमन्वाचयाशिष्टं न तु मुख्यमिति, नापि तेषामंशहरत्वप्रयुक्तं पिण्डदत्वमिति अंशहरत्वप्रयुक्तपिण्डदत्वस्यान्यत्र क्वचित्समानियतस्य शास्त्रीयत्वेऽपि पिण्डदत्वप्रयुक्तांशहरत्वस्य तथा न शास्त्रीयत्वमिति अनयोर्मिथो न व्याप्यव्यापकभावो नापि सार्वत्रिकं समनैयत्यम् इति च सूचनार्थं भगवता योगीश्वरेण पिण्डदोऽशहरश्चेत्युक्तम् । अनेनैवाशयेनावतरणे प्रकरणसङ्गतये तथोक्तमप्यत्र व्याख्याने मौलक्रमेणैव व्याख्यातं व्याख्यात्रेति बोध्यम्। एवं सति मन्वादिभिः प्राप्तविरोधपरिहारद्वारा मूलं समर्थयन् तेषां व्यवस्थां दर्शयति * औरसेत्यादिना अंशभागितीत्यन्तेन।

३। औरसेति। अस्य एवं सतीत्यादिः। औरसपौत्रिकेययोर्मिथः समवाये इत्यर्थः। आद्यार्थाशयेनेदम् । इदं च पुत्रिकाकरणानन्तरमौरसोत्पत्तावेव सम्भवतीति बोध्यम् । तदेवाह * पुत्रिकायामिति । पुत्रिकैव पुत्र इति द्वितीयार्थाशयेनाह * ज्येष्ठतेति । हि यतः स्त्रियाः पुत्रिकायाः ज्येष्ठता नास्ति ज्येष्ठस्येत्याद्युक्तोद्धारादिकं नास्ति अतस्तथा यदि भवेत्तदा तत्र सम एव विभाग इत्यर्थः। अत्र सम एवेत्युक्त्या औरसस्यैव सर्वधनग्रहणाभावेन मूलोक्तापवादत्वं मनोरिति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४। अपवादान्तरमाह * तथेति। यथौरसे सति पुत्रिकाया अंशभाक्त्वं तथाऽन्येषामपि क्षेत्रजादीनामित्यर्थः। अन्येषामित्यस्योत्तरेषामित्यत्रान्वयः। अन्यत्वं च पुत्रिकातः। उत्तरेषामिति स्पष्टार्थम्। अपिः पुत्रिकासमुच्चये। पूर्वस्मिन्सत्यपीति पाठः। औरसे सत्यपीति तदर्थः। अयमापिर्विरोधे। पूर्वस्मिन् पूर्वस्मिन्सत्यपीत्यपपाठः। वक्ष्यमाणात् तदलाभात्। *तास्मिन्, दत्तकत्वेनाभिमते। सत्सप्तमी। *चेत्, यदि। *उत्पद्येत, तदेति शेषः। नन्विदं दत्तकमात्रविषयमिति कथमन्येषामित्याद्युक्तिरत आह *दत्तकेति। आदिना स्वयंदत्तपरिग्रहः। ननु तदविशेषेऽपि तत्र यथाश्रुत एवार्थोऽस्तु अतः क्षेत्रजाद्यंशेऽपि मानं सूचयन्नाह * तथा चेति। अत्र सुता इति सामान्यबहुवचनान्तेनोक्तेस्तथा लाभ इति भावः। सवर्णा इति पूर्वान्वयीत्याह * सवर्णा इति। आदिना क्रीतकृत्रिमस्वयंदत्तापविद्धाः। * सत्यौरसे इति। तस्मिन्नुत्पन्ने सतीत्यर्थः। एवमग्रेऽपि। क्षेत्रजादीनां सवर्णादुत्पन्नत्वं स्वतः सवर्णत्वं चास्ति, कानीनादीनां तु तत उत्पन्नत्वेऽपि स्वतस्तत्त्वाभावस्य वक्ष्यमाणत्वादाह * असवर्णा इति। अप्रशस्ता इत्यर्थः। सहोढसहोढजौ पर्यायौ, तथा मनुमूलोक्तेरिति। उक्ते तुसूचितमाह * न चतुर्थांशेति। अनेनेदं सूचितं, यत्र शाब्द आर्थो वा अंशनिषेधस्तत्रैव ग्रासादि नान्यत्रेति। स्फुटीभविष्यति चेदमग्रे। * किं त्विति। तयोः पात्रभूता इत्यर्थः। भागिन इत्युभयत्र पाठान्तरम्।

अत एव मनुः, (अ. ९। २०२)

सर्वेषामपि तु न्याय्यं दातुं शक्त्या मनीषिणा।
ग्रासाच्छादनमत्यन्तं पतितो ह्यददद्भवेत्॥ इति।

* न्याय्यं, यस्य यावदुपयुक्तं धनानुरूपं च। * अत्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्तं, यावज्जीवम् ।

५। नन्वेतावता औरसे सति क्षेत्रजादीनां तुर्य्यांशभागित्वं कानीनादीनां ग्रासादिभागित्वमिति लब्धं, तथा सति क्षेत्रजाद्यंशे कानीनाद्यंशे च मूलापवादत्वं सिद्धं यद्यपि, तथापि कातीयस्य विष्णुविरोधः । कानीनाद्यंशे तेन तेषां सामान्येनांशभागित्वाभावस्योक्तत्वात्कातीयेन विशेषस्योक्तत्वादित्याशङ्कां हृदि निधाय विरोधं परिहरति * यदपीति । * परमेवेति । कातीयैकवाक्यतयैवेति भावः । अत एव मूलस्यापि न विष्णुना विरोध इत्याह । * औरसाद्यभावे इति । आदिना आद्यकोटिग्रहणम् ।

६। नन्वेवमपि वासिष्ठादेर्मनुविरोधः, तेन दत्तकादीनामपि तद्भागित्वस्योक्तत्वात् । अतस्तं परिहरति *यदपीति ।*एक एव, मुख्य एव । हेतुगर्भविशेषणमिदम् । * वसुनः, धनस्य । अत एवाह *शेषाणामिति । दत्तकादीनामित्यर्थः । शेषे षष्ठी । एवमग्रेऽपि । न नृशंसो घातुकोऽनृशंसस्तद्भावः आनृशंस्यम-घातुकत्वं पापाजनकत्वम्, अददत्पापमाप्नोति, तदर्थमित्यर्थः । पुत्रिकायास्तेनैव विशेषस्योक्तत्वात्क्षेत्रजस्य वक्ष्यमाणत्वाच्चाह * दत्तकेति । तथा च कानीनादिवत्तेषामपि तत्त्वे सति ग्रासादिभागित्वमेव न तुर्यांशभागित्वमिति वासिष्ठादेरपवादो मनुस्तत्रेति भावः ।

७ । वक्ष्यमाणमेवाह * तत्रेति । शेषाणां मध्ये इत्यर्थः । * विशेष इति । कातीयतो विशेषः, शेषाणामिति-मनुतो विशेषो, निर्गुणत्वप्रातिकूलत्वयोरवान्तरविशेषश्चेत्यर्थः । एवं च क्षेत्रजस्यौरसप्रतिकूलत्वे निर्गुणत्वे चाविशेषः पूर्ववन्नास्तीति भावः । * तेनैव, मनुनैव । * दायं, धनम् । पञ्चम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मित्यादि पक्षान्तरम् । दत्तकादिवदुक्तपूर्ववाक्येन जीवनमात्रे प्राप्ते भागविकल्पोयम् । स चान्यथाऽनुपपन्न इत्यवश्यं कल्प्यमाह * प्रतिकूलत्वेति । इदमपीत्यादिः । * समुच्चये, तयोः सद्भावे । एवं चैकवाक्यीयविकल्पोपपत्तये आवश्यकयुक्त्यैव पूर्वमनुवाक्यस्याप्युपपत्तिरिति न तस्य तद्विरोध इति भावः ।एवं च क्षेत्रजस्योभयसत्त्वे षष्ठांश एकतरसत्वे पञ्चमांशस्तस्याप्यभावे कातीयचतुर्थांशभागित्वम् । कानीनादीनां तु तत्र सति ग्रासादिभागित्वमेव न चतुर्थांशभागित्वम् । पुत्रिकायास्तु तत्र सति समभागः ।

८। यत्तु गौतमीयं, पुत्रा औरसक्षेत्रजदत्तकृत्रिमगूढोत्पन्नापविद्धा रिक्थभाजः कानीनसहोढपौनर्भवपुत्रिकापुत्रस्वयंदत्तक्रीता गोत्रभाजश्चतुर्थांशभागिन इति, तत्र गुणवदगुणवदित्युक्तरीत्याऽऽद्यवर्गोक्ताः क्रमेण तद्धराः, द्वितीयवर्गमध्ये आद्यत्रयाणां तुर्यांशभागित्वोक्तिरौरसाभावे पुत्रिकादिसत्त्वे च ज्ञेया । अन्यथोक्तस्मृतिविरोधो दुष्परिहर एव । पुत्रिकापुत्रस्य विषयो व्याख्यात्रैव वक्ष्यते । स्वयंदत्तक्रीतयोस्तत्त्वं तु औरसे सति उक्तरीत्या वासिष्ठाद्येकवाक्यतयैव । एवं गूढोत्पन्नस्य रिक्थभाक्त्वोक्तिरपि औरसाद्यभावे ज्ञेयेति न कश्चिद्विरोधः। एवं मानवे मेधातिथिसंमतरिक्तांशो[1]ऽपि औरसे सति कानीनादिवद्दत्तकादावपि दोषद्वयसत्त्वे तदन्यतरसत्त्वे च ज्ञेयः। रिक्थांशेति पाठे तु न कश्चिद्दोष एवेति तत्त्वम् इति एताद्भिन्नविषयकं मूलवाक्यमिति सिद्धमिति बोध्यम् ।

९। मूलस्य वासिष्ठादेश्च मनुवचनान्तरविरोधं परिहरति * यदपीति । * पुत्राणामिति । (मनु. अ. ९। १५८)

---

१ रिक्तांशः प्रजीवनमात्रम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुत्रान् द्वादश यानाह नृणां स्वायम्भुवो मनुः ।
तेषां षड् बन्धुदायादाः षडदायादबान्धवाः ॥

इत्युपक्रम्येत्यादिः । श्लोकद्वयेनेति भावः । * दायादेति । दायहरत्वं गोत्रहरत्वं चेत्यर्थः । तदेवाह * औरस इति । * शौद्रश्चेति । (मनु. अ. ९ । १७८)

यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत्सुतम् ।
स पारयन्नेव शवस्तस्मात्पारशवः स्मृतः ॥

इति अग्रे तेनैवौरसादिपुत्रान् प्रतिपाद्य अन्ते लक्षितोऽयम्। पारयन् पिण्डदानादिना प्रीणयन्नपि शवस्तत्तुल्यः अनुपकारकः असंपूर्णोपकारकत्वात् । कामादिति त्वनुवादः कामतस्तु प्रवृत्तानामित्यस्य । मूर्द्धावसिक्तादीनां तु सम्पूर्णोपकारकत्वेनौरसत्वमित्यत एव शौद्रमात्रस्य द्वादशमध्ये मनुना पृथग्गणनं कृतम् । तस्य फलमनुपदमेव स्फुटीभविष्यति । पुत्रिका तु एतत्प्रकरणात्पूर्वं पृथगेवोक्ता मनुनेति स त्रयोदशः पुत्रः । अत एव

पुत्रान् द्वादश यानाह नृणां स्वायम्भुवो मनुः ।

इत्यत्र तस्य न ग्रहणम् । अत एवौरसः क्षेत्रजश्चैवेत्यादिना तानुक्त्वा "यद्येकरिकथिनौ" "एकएवौरसः" "षष्ठं तु क्षेत्रजस्य" इत्युक्त्वा— (मनु. अ. ९ । १६५)

औरसक्षेत्रजौ पुत्रौ पितृरिकृथस्य भागिनौ ।
दशापरे तु क्रमशो गोत्ररिक्तांशभागिनः ॥

इत्युक्त्वा स्वक्षेत्रे संस्कृतायामित्यादिना पारशवः स्मृत इत्यन्तेन द्वादशस्वरूपमुक्तम् । तदग्रे— (मनु. अ. ९ । १८०)

क्षेत्रजादीन् सुतानेतानेकादश यथोदितान् ।
पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः ॥

इत्यत्रैते एव शौद्रान्ता मन्वभिमता इति स्पष्टमेव । औ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रसक्षेत्रजाविति षष्ठं त्विति पूर्वस्यानुवादो न विध्यन्तरम्। क्षेत्रजस्यौरससाम्याभावात्। गोत्रभागिनो रिक्तांशभागिनश्च। रिक्तांशः प्रजीवनमात्रम्। मुख्याभावे हि प्रतिनिधिः। अत औरसे सति एते न कार्याः। क्रियालोपाद्धेतोः क्रियायाः अपत्यमुत्पादयितव्यमित्यस्य विधेर्लोपो मा भूदिति। नित्यो ह्ययं विधिः। स यथाकथंचित् गृहस्थेन सम्पाद्यः। तत्र मुख्यकल्प औरसः तदसम्पत्तावेते ऽनुकल्पा इति मेधातिथिः। अदायादेति द्वंद्वोत्तरं नञ्समास इति शङ्काशयः। तदपीत्यस्य व्याख्येयमित्यत्रान्वयः। * स्वेति। पूर्वोक्तपुत्रेत्यर्थः। सपिण्डाश्च समानोदकाश्चेति द्वन्द्वः। * तदिति। स्वपितुः सपिण्डसमानोदकान्यतरेत्यर्थः। * तत्, तद्रिक्थहरत्वम्। एवं दायादादिशब्दस्यार्थमुक्त्वा बान्धवशब्दस्य तमाह * बान्धवत्वमिति। पुनस्त्वर्थे। अस्यातिप्रसक्तत्वादाह * सपिण्डत्वेन चेति। बान्धवत्वस्वरूपमाह * उदकेति। एवं च अदायादबान्धवा इत्यत्र नञ्समासं कृत्वा द्वन्द्वः कार्यो न तु प्रागुक्त इति भावः। एतेन प्रागुक्तमेधातिथिव्याख्यानमपास्तम्।

१०। एवं वचनद्वयव्याख्यानहेतुं तदुक्तिरूपमेवाह*गोत्रेति। दत्रिमः दत्तकः सुतः पुत्रः जनयितुर्निषेक्तुर्जनकस्य गोत्ररिक्थे गोत्रधने न भजेत् न प्राप्नुयात्। जनयितुरिति पञ्चमीति मेधातिथिः। तथा च तन्मरणनिमित्ताशौचादिकमपि न प्राप्नोति विवाहं विना। तत्र तद्गोत्रस्यापि परिहार्यत्वात्। अनेनान्यगोत्रस्यापि पुत्रीकरणमनुज्ञातं भवति। अपि तु यस्मै दत्तस्तस्य गोत्रं धनमाशौचादिकं च दत्तकः प्राप्नोति। तथा यतोगोत्ररिक्थानुगः "सगोत्रेण" इति "यो रिक्थहर" इति च स्मृतेः पिण्डः तद्दानं श्राद्धमिति यावत् गोत्ररिक्थे ऽनुगच्छति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सः, यदीयगोत्ररिक्थे गृह्येते तस्मै एव पिण्डोदकदानाद्यौर्ध्वदेहिकक्रिया, अतो ददतस्तद्दातुर्जनकस्य दत्तपुत्रकर्तृकस्वधा श्राद्धं व्यपैति। अर्थात्ततो निवर्त्तते। दत्तकस्य जनकश्राद्धे नाधिकारः। तस्य तत् तेन न कर्त्तव्यमिति यावत्। ददत इति पञ्चमी व्यपैतीत्यत्रान्वय इति वा। वस्तुतः पिण्डशब्दः सापिण्ड्यपरः। श्राद्धपरत्वे ददतः स्वधेत्यनेन पौनरुक्त्यापत्तेः। अत एव शिष्टाः प्रतिग्रहीतृगोत्रेणैव तस्य सर्वक्रियानुष्ठानं कुर्वन्ति। प्रतिग्रहीतृसपिण्डा एव च तन्मरणादौ दशाहाशौचमनुतिष्ठन्ति। प्रतिग्रहीतृकुले एव तत्सापिण्डीकरणाद्याचरन्ति। अत एवास्मादेव वचनाद्दत्तकस्य जनकसापिण्ड्यानिवृत्तिरित्यभियुक्तैर्व्याख्यातमिति बोध्यम्। एतच्च दातुः पुत्रान्तरादिसद्भावे। तदभावे तु तस्याप्यसावेव रिक्थश्राद्धाद्यधिकारी। (याज्ञ. २। १२७)

अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः।
उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः॥

इति न्यायसाम्यात्,

दत्तः पुत्रः पितुः कुर्याज्जनकस्य मृते ऽहनि।
गयायां च ततोऽन्यत्र न पुत्रान्तरसंनिधौ॥

इति शातातपस्मरणाच्च। इदमपि दानानन्तरं जनकस्यापुत्रत्वे। दानकाले त्वेकस्य दाननिषेधात्। एवमेव द्व्यामुष्यायणदत्तकस्यापि उभयोपकारकत्वं बोध्यम्। अत एव द्वित्रिः क्वचिदिति पाठेन सहैकवाक्यताऽपि। अस्य सापिण्ड्यं परिवेदनदोषाभावश्चान्यत्र स्पष्टः। एष एव न्यायः प्राग्वत् पुत्रीकरणाविशेषात् कृत्रिमादीनामपि बोध्यः। तदाह * इत्यत्र दत्त्रिमेति। औरसपुत्रप्रतिनिधिदत्तककृत्रिमादेरप्युपलक्षणार्थत्वादित्यर्थः। तथा च दत्तकादीनां ततः पित्रादिरिक्थहरत्वप्रतीतेः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वपक्षोक्तरीत्या च तदभावप्रतीतेर्मिथोविरोधादप्रामाण्यापत्तिरिति वचनानर्थक्याभियोक्तैव व्यवस्था ज्यायसी । अत एवोक्तद्वादशपुत्रानुक्त्वा देवलेनोक्तम्,

एते द्वादश पुत्रास्तु संतत्यर्थमुदाहृताः ।
आत्मजाः परजाश्चैव लब्धा याद्दच्छिकास्तथा ॥
एषां षट् बन्धुदायादाः पूर्वेऽन्ये पितुरेव षट् ।
विशेषश्चापि पुत्राणामानुपूर्व्याद्विशिष्यते ॥
सर्वे ह्यनौरसस्यैते पुत्रा दायहराः स्मृताः ।
औरसे पुनरुत्पन्ने तेषु ज्यैष्ठ्यं न तिष्ठति ॥
तेषां सवर्णा ये पुत्रास्ते तृतीयांशभागिनः ।
हीनास्तमुपजीवेयुर्ग्रासाच्छादनसम्भृताः ॥

इतीति भावः ।

११। ननु तदविशेषेऽपि दत्रिमग्रहणं नोपलक्षणमिति पूर्वोक्तमनुवाक्यद्वयं पितृधनविषयकमेवास्तां, तावताऽपि मनोर्मिथो विरोधाभावात् । मूलकृता पितृधनस्थले उक्तत्वेऽपि मनुनाऽन्यत्रतत्रानुक्तत्वात् । एवं च पूर्वपक्षोक्तमेव दृढं सम्पन्नम् । अतो मनुवचनादेव तथा प्रतिपादयितुमाह * पितृधनेति । *सर्वेषाम्, अग्रिमाणाम् । तदुक्तमेवात्र हेतुमाह * न भ्रातर इति ।

श्रेयसः श्रेयसो ऽलाभे पापीयान् रिक्थमर्हति ।
बहवश्चेत्तु सदृशाः सर्वे रिक्थस्य भागिनः ॥ (मनु. ९।१८४)

इति अस्य पूर्वश्लोकः । * इति, इत्यस्य । पुत्रा इति सामान्यबहुवचनाभ्यामाह * सर्वेषामिति ।

१२। नन्वौरसबहुत्वापेक्षमेव बहुत्वामिति औरसा एव पुत्रा न ते प्रतिनिधिभूताः । किं च न भ्रातर इत्यत्रत्यस्य पुत्रा इत्यस्य पित्रादिसाहचर्यान्मुख्यौरसपुत्रपरत्वमेवेति तद्वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षयकमेव पुत्रपदोक्त्या पितृधनविषयकं तदस्तु । अत आह * औरसस्येति । वचनद्वयस्याप्येकार्थत्वे पौनरुक्त्यापत्तिरिति भावः । ननु द्विर्बद्धमिति न्यायेन दार्ढ्याय पुनस्तदनुवादकमेव तदास्तामत आह * दायादेति । तथा च दायादशब्दस्वरूपपर्यालोचनयाऽपि पितृधनपरत्वं तस्य नास्तीति भावः ।

१३। किं च साहचर्यस्यासार्वत्रिकत्वेन पुत्रत्वत्रातिपितृत्वादेरपि गौणमुख्यसाधारणत्वेन च साहचर्यस्य दुर्वचत्वात्, अपि च श्रेयस इत्यग्रे पाठेन गौणपुत्रविषयत्वात्, श्रेयस इत्यनेनापि तत्प्रतिपादनाच्च, ब्राह्मणस्यानुपूर्व्येणेत्यादिना पुत्रशतं भवेदित्यन्तेन ततः प्राक्तनवचनकदम्बेन पितृधनविषयेंऽशविभागकथनपूर्वं तद्भागित्वस्यौरसस्य प्रतिपादितत्वाच्च। तस्मादौरस इत्यादि तत्परमेवेति व्यवस्थापनं मनुसम्मतं युक्तमेवेतिन मूलादिवचनानां प्रागुक्तानां मिथो विरोध इति दिक् ।

१४। नन्वेवमपि मूलोक्तस्ससंख्यः क्रमो ऽयुक्त एव। स्मृत्यन्तरेष्वन्यथाक्रमस्य ससंख्यस्य प्रतिपादितत्वेन तद्विरोधात्। एवमुक्तवर्गद्वयप्रतिपादकमनुरपि स्मृत्यन्तरविरुद्धः। तथा हि। तत्रतावदापस्तम्बधर्मसूत्रविवृतौ स्मृत्यन्तरसंग्रहः,

औरसः पुत्रिकाबीजक्षेत्रजौ पुत्रिकासुतः ।
पौनर्भवश्च कानीनः सहोढो गूढसम्भवः ॥
दत्तः क्रीतः स्वयंदत्तः कृत्रिमश्चापविद्धकः ।
यत्रक्वचोत्पादितश्च स्वपुत्रा दश पञ्च च ॥ इति ।

अत्र संख्याव्यत्ययः क्रमव्यत्ययश्च। तत्राद्यः सुपरिहरो यद्यपि, पुत्रिकापुत्रिकासुतौ द्वावप्येका कोटिः तथा बीजक्षेत्रजो यत्रक्वचनोत्पादितोऽप्येषामेवान्यतम इति त्रयाणामन्तर्भावे द्वादशत्वस्यैव सम्पत्तेः, तथापि क्रमव्यत्ययस्तदवस्थ एव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१५। मानवे तु, (अ. ९। १६५)

औरसक्षेत्रजौ पुत्रौ पितृरिक्थस्य भागिनौ।
दशापरे तु क्रमशो गोत्ररिक्तांशभागिनः॥

इत्यत्र पुत्रिकामप्यौरससमत्वेनौरसे एवान्तर्भावयित्वा, तस्याः पूर्वं स्वातन्त्र्येणोक्तत्वात्तद्भिन्ना एवात्र विवक्षिता वेत्याशयेन एतावुक्त्वा इतरे दशेत्युक्त्वा तथैव क्रमेणोक्तानि तल्लक्षणानि। तथा हि।

स्वक्षेत्रे संस्कृतायां तु स्वयमुत्पादितश्च यः।
तमौरसं विजानीयात्पुत्रं प्राथमकल्पिकम्॥ (१६६)
यस्तल्पजः प्रमीतस्य क्लीबस्य व्याधितस्य वा।
स्वधर्मेण नियुक्तायां स पुत्रः क्षेत्रजः स्मृतः॥ (१६७)
माता पिता वा दद्यातां यमद्भिः पुत्रमापदि।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः॥ (१६८)
सदृशं तु प्रकुर्याद्यं गुणदोषविचक्षणम्।
पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयश्च कृत्रिमः॥ (१६९)
उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः।
स गृहे गूढ उत्पन्नः तस्य स्याद्यस्य तल्पजः॥ (१७०)
मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा।
यं पुत्रं परिगृह्णीयादपविद्धः स उच्यते॥ (१७१)
पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः।
तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवम्॥ (१७२)
या गर्भिणी संस्क्रियते ज्ञाताऽज्ञातापि वा सती।
वोढुः स गर्भो भवति सहोढ इति चोच्यते॥ (१७३)
क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात्।
स क्रीतकः सुतस्तस्य सदृशो ऽसदृशोथ वा॥ (१७४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या तु पत्या परित्यक्ता विधवा वा यथेच्छया।
उत्पादयेत्पुनर्भूत्वा स पौनर्भव उच्यते ॥ (१७६)
मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात्।
आत्मानं स्पर्शयेद्यस्मै स्वयंदत्तस्तु स स्मृतः ॥ (१७७)
यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत्सुतम्।
स पारयन्नेव शवस्तस्मात्पारशवः स्मृतः ॥ इति। (१७८)

तल्पं दाराः। यथा गुरुतल्पग इति। तल्पं शय्याट्टदारेष्वित्यमरः। * व्याधितस्य, अप्रतीकारराजयक्ष्मादिरोगाक्रान्तस्य। * स्वधर्मेण, प्रागुक्तेन। *सदृशं, सवर्णम्। *गुणदोषविचक्षणं, प्रौढम्। अत एव पुत्रगुणैर्युक्तम्। *न च ज्ञायेतेति। हीनाधिकपुरुषजत्वमन्तरेण सवर्णजत्वनिश्चये अस्य पुरुषस्यायमित्येवं न ज्ञायेत चेत्यर्थः। मातुर्बहुगामिनीत्वे इदम्। *यस्येति। यस्य तल्पजः स्यात्तस्य स इत्यर्थः। * मातापितृभ्यामिति। बहुपुत्रतया भरणासामर्थ्येन केन चिद्दोषेण वेत्यर्थः। *पुत्रं, तद्बुद्ध्या परिग्रहो न तज्जीवितेच्छया। *येति। या ज्ञाताऽज्ञाताऽपि वा गर्भिणी सती संस्क्रियते इत्यर्थः। *सहोढ इति। तया सहोढ इत्यर्थः। *पुनर्भूत्वा, पुनर्गृहिणी भूत्वा। *अकारणात्, पातित्यादिकारणाभावात्। अकारणे इति पाठान्तरम्। *स्पर्शयेत्, दद्यात्।

विश्राणनं वितरणं स्पर्शनं प्रतिपादनम्।

इत्यमरः। *स पारयन्निति। स पुत्रः पितॄन् श्राद्धादिभिः पारयन् प्रीणयन्नपि अन्यपुत्रवदप्रशस्तत्वाच्छवतुल्य इति पारशव इत्यर्थः। यद्यप्यस्य शूद्रापुत्रस्य विवाहिताजन्यत्वेनानुलोमजत्वेन च मूर्द्धावसिक्तादिवदौरसत्वमविशिष्टं तथाप्युक्तरीत्या अप्रशस्तत्वेन ततो भेदेन तत्रागणनम्, एतेषु सत्सु तस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सकलधनहरत्वाभावादत्र प्रकरणेऽन्ते परिगणनम् इति बोध्यम्।

१६। वासिष्ठे तु औरसानन्तरं तदलाभे नियुक्तायां क्षेत्रजो द्वितीयः, तृतीयः पुत्रिका विज्ञायते, पौनर्भवश्चतुर्थः, कानीनः पञ्चमो, दत्तकः षष्ठः, क्रीतः सप्तमः, स्वयमुपगतोऽष्टमो, ऽपविद्धो नवमो, गूढोत्पन्नो दशमः, कृत एकादशः, शूद्रापुत्र एव द्वादशो भवतीत्युक्तम्।

वैष्णवे तु औरसक्षेत्रजपुत्रिकापुत्रपौनर्भवकानीनगूढोत्पन्नसहोढदत्तक्रीतस्वयमुपगतापविद्धयत्रक्वचनोत्पादिता द्वादशेत्युक्तम्।

देवलीये तु औरसपुत्रिकापुत्रक्षेत्रजकानीनगूढोत्पन्नापविद्धसहोढपौनर्भवदत्तकस्वयमुपगतकृत्रिमक्रीता द्वादशेत्युक्तम्।

नारदीये तु— (व्यव. १३। श्लो. ४५। ४६)

औरसः क्षेत्रजश्चैव पुत्रिकापुत्र एव च।
कानीनश्च सहोढश्च गूढोत्पन्नस्तथैव च॥
पौनर्भवो ऽपविद्धश्च दत्तः क्रीतः कृतस्तथा।
स्वयं चोपगतः पुत्रा द्वादशैते प्रकीर्तिताः॥ इत्युक्तम्।

तस्मात्क्रमव्यत्ययकृतविरोधो दुष्परिहरोऽत आह—

१७। *वासिष्ठादिष्विति। *अगुणवदिति। असुब्वत इति भाष्यप्रयोगवदयं साधुः। अयं भावः। मनुना औरस इत्यादिना वर्गद्वयेनाद्यस्य तत्त्वं द्वितीयस्य तदभावं च प्रतिपाद्य तत्प्रसङ्गादेवाग्रे स्वल्पव्यवधानेनौरसादिपुत्रस्वरूपप्रतिपादनेनोपक्रमानुसारेण तथोक्तिर्न तु तत्त्वत एष क्रम इति ज्ञायते। अत एव तत्र क्रमश इत्युक्तिरपि तत्परैवेति न सर्वथा तात्त्विकैतत्क्रमबोधिका ऽपितु कस्मिंश्चिद्विशेषे असत्येवासौ, विशेषेतु गुणवदगुणवद्रूप एवेति। एवं स्मृत्यन्तरपाठस्यापि गतिः। युक्तियुक्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्च मूलोक्तक्रमः। तथा हि। औरसपुत्रिकयोरौरसत्वात्तत्समत्वाच्च प्रागुक्तिः। क्षेत्रजगूढजाद्वितीयकानीनपौनर्भवानां स्वबीजक्षेत्रोत्पन्नत्वादेव दत्ताद्यपेक्षया प्राबल्यम्। आद्यकानीनस्यापि स्वीयकन्योत्पत्तिकत्वादेव ततः प्राबल्यम्। अवान्तरमपि तारतम्यं स्पष्टमेव सर्वेषाम्। एवमग्रेऽपि सहोढजस्य स्वबीजाश्रयत्वेन परिगृहीतक्षेत्रोत्पन्नत्वेऽप्युत्तरषट्कयोगो गर्भोत्पत्तिकाले स्वक्षेत्रत्वाभावकृत एवेति सर्वमनवद्यमिति।

१८। इदमपि सर्वं युगान्तरविषयकम्। कलौ त्वौरसदत्तकावेव औरससमत्वात्पुत्रिका च।

दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः।

इति माधवादिस्मरणात्।

एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः।

निवर्त्तितानि कर्माणीति चरमेणास्यान्वयः। शिष्टाचारोऽपि तथैव दृश्यते।

केचित्तु औरसेन पुत्रिकासंग्रहवत् दत्तपदेन तत्समकक्षक्रीतस्वयन्दत्तकृत्रिमाणामपि ग्रहणम्।

अत एव श्रेयसः श्रेयस इति मनूक्तिः,

स्वगोत्रेण कृता ये स्युर्दत्तक्रीतादयः सुताः।
विधिना गोत्रतां यान्ति न सापिण्ड्यं विधीयते॥

इति वृद्धगौतमोक्तिः,

दत्तक्रीतादिपुत्राणां बीजवप्तुः सपिण्डता।
सप्तमीं पञ्चमीं चैव गोत्रं तत्पालकस्य च॥ इति बृहन्मनुः,

औरसः क्षेत्रजश्चैव दत्तः कृत्रिमकः सुतः।

इति कलिधर्मप्रस्तावे पराशरश्च सङ्गच्छते। औरसादीनां सर्वेषां पुत्राणां प्रकृतत्वादौरसादीनुपक्रम्य तेषां पूर्वः पूर्वः श्रेयान्

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एव दायहरः स चान्यान्बिभृयादिति वैष्णवम् औरसादीनां पुत्राणां पूर्वपूर्वाभावे परः परो रिक्थमर्हति पूर्वसद्भावे परसंवर्द्धनं स एव कुर्यादिति, तदप्यपवादेतरविषयम्। यदि तु समानरूपा बहवः पुत्रास्तदा सर्वे एव विभज्य धनं गृह्णीयुरिति मनुव्याख्यातारः। यद्यपि मन्वादिकं युगान्तरपरतयाऽपि सुयोजं तथापि अन्त्यमन्यथा दुर्योजमेवेत्याहुः।

१९। वस्तुतो नियोगनिषेधेनैव क्षेत्रजनिषेधे तत्र क्षेत्रज इत्यौरसविशेषणमावश्यकं यथा तथा कृत्रिमक इत्यपि दत्तस्यैव विशेषणमिति बोध्यम्।

२०। नन्वेवमपि मूलस्य गौतमविरोध एव। तेन हि औरससमस्य पौत्रिकेयस्य दशमत्वेन परिगणनं कृतम्। तथा हि पुत्रा औरसक्षेत्रजदत्तकृत्रिमगूढोत्पन्नापविद्धा रिक्थभाजः कानीनसहोढपौनर्भवपुत्रिकास्वयंदत्तक्रीता गोत्रभाजः चतुर्थांशभागिन इति। कानीनादीनां तुर्यांशभागित्वमत्रोक्तं चौरसाभावे पुत्रिकादिसत्त्वे च ज्ञेयम्। एवं क्षेत्रजादीनामपि तत् क्रमतो ज्ञेयम्। अन्यथा पूर्वविरोधो दुष्परिहर एव। स्वयंदत्तक्रीतयोस्तत्त्वं वासिष्ठाद्येकवाक्यतया प्रागुक्तरीत्या। गूढोत्पन्नस्य तत्त्वमौरसाद्यभावविषयकमिति बोध्यमित्यत आह *गौतमीयेत्विति। *विजातीयेति। ब्राह्मणादेः शूद्रान्यक्षत्रियादिस्त्रियामुत्पन्नपुत्रिकापुत्रविषय इत्यर्थः।

२१। तत्र परिगणनमात्रोक्त्या क्रमानुक्त्या तन्मात्रपरमेव तत्सर्वं न तु क्रमपरम्। अतः क्रमो मूलोक्त एव। पूर्वाभावे परः पर इत्युक्तेरिति केचित्।

यद्यपि वैष्णवादौ औरसादीनां प्रागुक्तानां प्रथमद्वितीयादित्वेन कथनात्, "एतेषां पूर्वः पूर्वः श्रेयान् स एव दायहर" इत्यु-

१ कलिधर्मप्रस्तावे पराशरवचनम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्तेश्च क्रमो विहित एव तथापि मूलोक्त एव युक्तियुक्त इति प्रा-
गुक्तम् इति बोध्यम् । तदेतदभिप्रेत्यैव उपसंहरति *तस्मादिति ।

२२ । नन्वेवमपि मूलादेर्मनुविरोध एव । भ्रातॄणामिति मनु-
ना एकेन भ्रातुष्पुत्रेणैवान्येषामप्यपुत्रभ्रातॄणां पुत्रवत्त्वप्रतिपाद-
नेन स पुत्र इति लाभेन मूलकृत च "औरसो धर्मपत्नीज"
इत्यादिना "पूर्वाभावे परः पर"इत्यन्तेन विभागकथनद्वारादिना
द्वादशत्वस्य पुत्राणां प्रतिपादनेन द्वादशभ्यो ऽधिकोऽन्यस्तत्र
कथमयमन्तर्भूतः तथा द्वादशत्वासङ्गतेरित्याशयेनाह *यत्तु भ्रा-
तॄणामिति । *यत्तु, यदपि । परिहरति * तदपीति । परमत-
माह *भ्रातुष्पुत्रस्येति । सम्भवे इत्यनेनान्यथा अन्येषामपि अ-
वकाशः सूचित इति न तत्प्रतिपादकस्मृतिविरोध इति सूचितम् ।
*निषेधार्थमिति । तथा च तस्य दत्तकत्वमिति न विरोध इति भावः ।

२३ । ननु निषेधार्थमित्यस्य निषेधाभिधेयकमित्यर्थः उत निषे-
धतात्पर्यकमित्यर्थः । नाद्यः । शब्दात्तदप्रतीतेः । नान्त्यः । तथा ता-
त्पर्यस्य लक्षणां विना दुर्वचत्वेन वक्ष्यमाणरीत्या वचनोपपत्त्या
मुख्यार्थबाधाभावेन तथार्थे साधकस्मृत्यन्तराभावेन तात्पर्यानु-
पपत्त्याद्यभावेन च निष्प्रयोजनलक्षणाया अनौचित्येन तदर्था-
सम्भवात् । तथा चेदमयुक्तम् । अतो वक्ष्यमाणं स्वाभिमतमर्थं हृदि
निधाय स्वमतेन प्रकृतं विरोधं परिहरति *न पुनरिति । न चे-
त्यर्थः । * पुत्रत्वेति । अपुत्रभ्रातृनिष्ठापितृतानिरूपितपुत्रत्वेत्य-
र्थः । कन्यादिसत्त्वे इत्यादिः । अत्रैव तात्पर्यं न तूक्तार्थे इति अत
एवेदम् उपपादयितुमत्र हेतुमाह *तत्सुता गोत्रजा इति । पत्नीदुहि-
तरश्चेत्यादिनाऽत्र वक्ष्यमाणेन भ्रात्रभावे भ्रातृसुतस्य धनभाक्-
त्वं प्रतिपादितम् । यदि तु मनोस्तथाऽर्थः स्यात्तदा तस्याप्यौरसा-
दितुल्यतया पुत्रत्वेन सर्वेभ्यः पत्न्यादिभ्यः पूर्वमेव धनभाक्त्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्य लाभेन तद्विरोधः स्पष्ट एव । किं च तथा सति अस्य क्रमपाठितद्वादशमध्येऽन्तःपातस्य दुष्करत्वेन तदग्रे एव निवेशो वाच्यः । तथा च सर्वतोऽत्रापकृष्टत्वलाभेन वक्ष्यमाणस्मृतिकदम्बविरोधापत्तेः । प्रकृतसंख्याविरोधस्तु न दत्तः । शङ्काविषयत्वात् । न चैवमपि तथा सति त्रयोदशपुत्रत्वापत्त्या पुत्रान्द्वादश यानाहेतिमनुविरोध एव कुतो न दत्त इति वाच्यम् । तदाशयस्य वक्ष्यमाणत्वादिति भावः । एतत्तत्त्वमनुपदमेव स्फुटीभविष्यतीत्यलम् ॥ १३२ ॥

मि० अव० इदानीमुक्तोपसंहारव्याजेन तत्रैव नियममाह ।

या० सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः ।

मि० समानजातीयेष्वेव पुत्रेषु अयं पूर्वाभावे परः पर इत्युक्तो विधिः न भिन्नजातीयेषु । तत्र च कानीनगूढोत्पन्नसहोढजपौनर्भवाणां सवर्णत्वं जनकद्वारेण न स्वरूपेण । तेषां वर्णजातिलक्षणाभावस्योक्तत्वात् । तथा अनुलोमजानां मूर्धावसिक्तादीनामौरसेष्वन्तर्भावात्तेषामप्यभावे क्षेत्रजादीनां दायहरत्वं बोद्धव्यम् । शूद्रापुत्रस्त्वौरसोऽपि कृत्स्नं भागमन्याभावेऽपि न लभते ।

यथाह मनुः, (अ. ९ श्लो. १५४)

यद्यपि स्यात्तु सत्पुत्रो यद्यपुत्रोऽपि वा भवेत् ।
नाधिकं दशमाद्दद्याच्छूद्रापुत्राय धर्मतः ॥ इति ।

यदि सत्पुत्रो विद्यमानद्विजातिपुत्रो यद्यपुत्रोऽविद्यमानद्विजातिपुत्रो वा स्यात्तस्मिन्मृते क्षेत्रजादिर्वाऽन्यो वा सपिण्डः शूद्रापुत्राय तद्धनाद्दशमांशादधिकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न दद्यादिति । अस्मादेव क्षत्रियावैश्यापुत्रयोः सवर्णापुत्राभावे सकलधनग्रहणं गम्यते ।

मि० अव० अधुना तत्प्रसङ्गेन शूद्रधनविभागे विशेषमाह।

या० जातोऽपि दास्यां शूद्रेण कामतोंऽशहरो भवेत्॥१३३॥
मृते पितरि कुर्युस्तं भ्रातरस्त्वर्द्धभागिकम् ।
अभ्रातृको हरेत्सर्वं दुहितॄणां सुतादृते ॥ १३४॥

मि० शूद्रेण दास्यामुत्पन्नः पुत्रः कामतः पितुरिच्छया भागं लभते । पितुरूर्ध्वं तु यदि परिणितापुत्राः सन्ति तदा ते भ्रातरः तं दासीपुत्रम् अर्धभागिकं कुर्युः । स्वभागादर्द्धं दद्युरित्यर्थः । अथ परिणीतापुत्रा न सन्ति तदा कृत्स्नं धनं दासीपुत्रो गृह्णीयात्, यदि परिणीतादुहितरस्तत्पुत्रा वा न सन्ति । तत्सद्भावे त्वर्द्धभागिक एव दासीपुत्रः ! अत्र च शूद्रग्रहणाद्द्विजातिना दास्यामुत्पन्नः पितुरिच्छयाऽप्यंशं न लभते, नाप्यर्द्धं, दूरत एव कृत्स्नम् । किंत्वनुकूलश्चेज्जीवनमात्रं लभते ॥ १३३ ॥ १३४ ॥

बा० १ । सङ्गतिमाह * इदानीमिति । उपसंहारमात्रपरत्वे पौनरुक्त्यपरिहारेऽपि तथाचमत्काराभावेनाह *व्याजेनेत्यादि। *तत्रैव, क्षेत्रजादिष्वेव। नियमस्वरूपं "सर्वं वाक्यम्" इति न्याये-नाह *समानेति । तद्व्यवच्छेद्यमाह *न भिन्नेति । तथा चैते सवर्णा एव युक्ताः पुत्रा भवन्ति । अत एव सवर्णायामिति बौधायनेनोक्तम् । एवं चैते क्षेत्रजादयो यद्यधिकवर्णादुत्पन्नाः तदाऽपि तन्नामधेयभाजो भवन्त्येव अपितु सवर्णादुत्पन्ना इव प्रशस्तत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रा न भवन्ति। सजातीयेष्विति सजातीयानियमात् । यदि हीनवर्णादुत्पन्नास्तदा प्रतिलोमजत्वेन निन्द्या एवे ति बोध्यम्।

२। तथा सति प्रसक्तपूर्वविरोधाभावाय कानीनादिषु सजातीयत्वमाह * तत्रचेति। तेषां पुत्राणां मध्ये इत्यर्थः। तथा नियमे सति चेत्यर्थो वा। ननु स्वतस्तत्कुतो नेत्यत आह *स्वरूपेणेति। स्वरूपतस्तेषां कुण्डगोलकयोरन्यतरत्वेन आद्यकानीनस्य व्यभिचारजन्यत्वेन वर्णजात्यन्तर्भावाभावस्याचाराध्यायेऽभिहितत्वादित्यर्थः । अन्यथाऽनुपपत्त्याचेदम् । अन्यथा विरोधो दुष्परिहर एव स्यादिति भावः।

३। नन्वेवमपि मूर्द्धावसिक्तादीनां दायहरत्वानुक्त्या न्यूनता मूलादौ, तेषां तत्रानन्तर्भावात् । उपलक्षणतया तत्र तेषां ग्रहणे प्रागुक्तरीत्या मध्ये दुर्ग्रहत्वेन अन्ते ग्रहणे द्वादशाभावे तेषां दायहरत्वापत्तिः, उपसंहारविरोधापत्तिश्च, अतो ऽनुक्तं विशेषान्तरमाह *तथेति। प्रतिलोमजव्यावृत्तये आह* अनुलोमेति। प्रागुक्ताशयेनाह * औरसेष्विति । तथा च परांशे एवायं नियमो न सर्वतः पूर्वांशे इति तत्रासवर्णत्वेऽपि न बाधकमिति न शङ्कोक्तदोष इति भावः। अपिर्मुख्यपुत्रिकोभयसमुच्चायकः।

४। एवं सति प्राप्तातिप्रसङ्गनिरासाय वक्ष्यमाणमूलसङ्गतये च आदिना पारशवान्यस्यैव ग्रहणमिति सूचयन् विशेषान्तरमाह *शूद्रेति। * अन्याभावेऽपीति। मुख्यौरसादिपुत्राभावेऽपीत्यर्थः। उभयत्र मानमाह * यथाहेति। मन्वर्थमाह * यदीति। यद्यपीत्यर्थः। क्वचित्तथैव पाठो वचनानुरोधी। पितेति शेषः। इदं च मृतपितृकधनविभागविषयकम् । अक्षरमर्यादया तथैव प्रतीतेः। जीवद्विभागे तु प्रसादादाने एकांशः, प्रसादे तु तावदेवेत्युक्तं यत्पुनर्ब्राह्मणेत्यादिना। अत एव तद्विरोधो न। तदेतदभि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रेत्याह * तस्मिन्निति । पितरीत्यर्थः । दद्यादिति स्वारस्यादाह *क्षेत्रजादिरित्यादि।*दशमांशादधिकामिति । नचेदं मनूक्तं दशमांशहारित्वं चतुस्त्रिद्व्येकभागाः स्युर्वर्णश इति मूलोक्तेन शूद्रापुत्रस्यैकांशहारित्वेन विरुद्धमिति वाच्यम्। ब्राह्मणीपुत्रस्य चत्वारोऽशाः, क्षत्रियापुत्रस्य त्रयः, वैश्यापुत्रस्य द्वौ, शूद्रापुत्रस्यैक इति मिलित्वा दशेति तत्रापि दशांशहारित्वस्यैवोक्तत्वात्। तत्र शूद्रापुत्रांशापेक्षया चत्वारो भागा बोध्याः।इतिः शाब्दार्थसमाप्तौ।

८। तात्पर्यार्थमाह * अस्मादेवेति । उक्तमनुवचनादेवेत्यर्थः । तदेव तथेत्यादिना प्रतिपादितमिति न तस्य निर्मूलता नापि काश्चित्तत्र विशेष इति भावः ।

उ. १। अत एव वक्ष्यमाणसङ्गतिमेवाह *अधुनेति । पूर्वोक्तोपसंहारस्य सविशेषस्य कथनानन्तरमित्यर्थः । *तत्प्रसङ्गेन, तत्प्रकरणेन । तदुक्तन्यत्वस्याप्यावश्यकत्वात् । * उत्पन्नः, सोऽपि । कामत इत्यस्य व्याख्या * पितुरिति । एवं पूर्वार्द्धेन जीवत्पितृकविभाग उक्तः ।

मनुरपि, (अ. ९ । १७९)

दास्यां वा दासदास्यां वा यः शूद्रस्य सुतो भवेत् ।
सो ऽनुज्ञातो हरेदंशमिति धर्मो व्यवस्थितः ॥ इति ।

२। उत्तरार्द्धं द्वितीयविभागपरं स्पष्टमेवेत्याह * पितुरूर्ध्वमिति । मरणादिति शेषः । * परिणीतापुत्राः, विवाहितापुत्राः। तदा ते भ्रातर इति पाठः । * अर्द्धभागिकं, कर्मधारयान्मत्वर्थीयष्ठन् । अर्द्धभागिनमिति पाठे इनिर्बोध्यः । अर्द्धत्वस्य सापेक्षत्वादाह * स्वभागादिति । तेषां प्रत्येकं यो भागोऽशस्तस्मै-

१ दद्यादिति दानक्रियायाः कर्त्राकाङ्क्षत्वात् योग्यतया क्षेत्रजादेरेव कर्तृत्वमिति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कांशापेक्षया ऽर्द्धं समुदितद्रव्यात् दद्युरित्यर्थः।

३। तृतीयार्द्धार्थमाह *अथेति। हरोदित्यनेन जन्मना पुत्रवत्तस्यापि स्वत्वं सूचितम्। दुहितॄणामित्याद्यर्थमाह *यदीति। दुहितृसुतापेक्षया दुहितुः प्राथम्यस्य मूले वक्ष्यमाणत्वेन तत्सुतसत्वेऽपि कृत्स्नग्रहणे किमु वक्तव्यं साक्षाद्दुहितृसत्त्वे इति कैमुतिकन्यायासिद्धमर्थमाह * परिणीताद्दुहितर इति। एवमेवाह * तत्पुत्रा इति।

४। केचित्तु—दुहितॄणामित्यत्राभावे इति शेषः। सुतादित्यत्रापि प्रत्यासत्त्या तत्सबन्धः। गामश्व इतिवत्समुच्चय इत्याशयोऽस्येत्याहुः। प्रत्यासत्तेरेवैतत्तात्पर्यार्थमाकाङ्क्षितमाह *तत्सद्भावे इति। अन्यतरसद्भावे इत्यर्थः। युक्त्यन्तरस्य वक्ष्यमाणत्वेनैतद्युक्तमिति तत्त्वम्। अन्यस्याश्रुतत्वात्तस्य च प्रकृतत्वेन बुद्धिस्थत्वमित्यत्रापि तथैवेति भावः।

बा.स्व.१।अत्र गृहजातप्रसङ्गात् दासविषये किञ्चिदनुक्तमुच्यते। तत्र तावद्दासाः पञ्चदश। (व्यव.५।श्लो.२६।२७।२८)

गृहजातस्तथा क्रीतो लब्धो दायादुपागतः।
अनाकालभृतस्तद्वदाहितः स्वामिना च यः॥
मोक्षितो महतश्चर्णात् युद्धप्राप्तः पणे जितः।
तवाहमित्युपगतः प्रव्रज्यावासितः कृतः॥
भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः।
विक्रेता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः॥ इति नारदः।

तत्र गृहजातादौ विशेषमाहतुः— (मनु. अ. ९। १७९)
मनुयाज्ञवल्क्यौ, (याज्ञ. २। श्लो. १३३। १३४)

दास्यां वा दासदास्यां वा यः शूद्रस्य सुतो भवेत्।
सो ऽनुज्ञातो हरेदंशमिति धर्मो व्यवस्थितः॥ इति,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जातोऽपि दास्यां शूद्रेण कामतोंऽशहरो भवेत् ॥
मृते पितरि कुर्युस्तं भ्रातरस्त्वर्द्धभागिकम् ।
अभ्रातृको हरेत्सर्वं दुहितॄणां सुताहृते ॥ इति च ।

तत्र दास्यां कस्यां चित् ध्वजाहृताद्युक्तलक्षणायां तादृशस्य दासस्य कस्यचित्सम्बन्धिन्यां वा यः शूद्रस्य सुतो भवेत् स पित्रा "परिणीतापुत्रैः समांशभागो भवान्भवतु" इत्यनुज्ञातः सममंशमौरसेन हरेदिति शास्त्रव्यवस्था नियतेत्याद्यर्थ इति कुल्लूकभट्टः । शूद्रस्यानूढायामनियुक्तायामपि जातः सुत एव एवं यद्यपि दासस्य दासी तथापि वचनात्तस्यां जातो न दासस्य दासः सुतो वाऽपि तु स्वामिन एव सुतोऽनुज्ञातस्तेन सममंशमौरसेन हरेदिति मेधातिथिः । जीवत्पितृकविभागेऽयं द्वितीयार्थो मिताक्षरायां स्पष्टः । तत्र द्वितीयेऽपिना क्रीतादयोऽपि समुच्चीयन्ते। यथा पाणिनीये भूतेऽपीत्यपिनाऽन्यकालसमुच्चयः । यथा वा,

बलाद्दासीकृतश्चौरैर्विक्रीतश्चापि मुच्यते ।

इत्यत्रापिना ऽऽहितदत्तयोरन्यपठितयोः समुच्चयो विज्ञानेश्वरकृतः। न च अपिः पूर्वसमुच्चायक एवेति वाच्यम् । तं विनाऽपि मनुवत्तत्समुच्चयसम्भवात् । औरसान्यसमुच्चयस्यौरसेन सममिति वदतो मेधातिथ्यादेः परिणीतापुत्राः सन्तीत्यादि वदतो विज्ञानेश्वरस्य चानभिमतत्वात् । दत्तान्येषां कालिवर्ज्यत्वेन शूद्राणामविद्यत्वेन होमादिकरणासंभवान्न पुत्रस्य दाने प्रतिग्रहे वाऽधिकार इति तदसंभव इति तत्तात्पर्यात् । अत एव—

तस्माच्छूद्रं समासाद्य सदा धर्मपथे स्थितम् ।
प्रायश्चित्तं प्रदातव्यं जपहोमविवर्जितम् ॥

इत्याङ्गिरसं,

तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति मूलं च सफलम्। अन्यथा तयोस्तत्रानाधिकाराद्भवदुक्तरीत्यैव वचनान्तरविहितकर्मणां तयोरपि तदर्जनेन सिद्धौ तद्दानर्थक्यं स्पष्टमेव। तस्माद्यत्र तद्रहितं कार्यमिति वचनमस्ति तदेव तद्रहितं तत्र भवति नान्यत्। न चेह तथा वचनमस्ति। न च—

ब्राह्मणानां सपिण्डेषु शूद्राणां शूद्रजातिषु।
सर्वेषां चैव वर्णानां ज्ञातिष्वेव न चान्यतः॥
दौहित्रं भागिनेयं वा शूद्राणां चापि दीयते।
शूद्रः सर्वस्वमेवापि अशक्तश्चेद्यथाबलम्॥

इति शौनकीयमस्त्येवेति वाच्यम्। तस्य कालिकापुराणैकवाक्यतया दत्ताख्यदासप्रतिपादने एव तात्पर्यात्। अत एव—

ध्वजाहृतो भक्तदासो गृहजः क्रीतकृत्रिमौ।
पैतृको दण्डदासश्च सप्तैते दासयोनयः॥ (अ. ८। ४१५)

इति मन्वाद्युक्तदत्रिमस्य सावकाशत्वम्। अन्यथा दत्रिमयोः पुत्रदासयोर्विविक्तत्वं न स्यात्। मन्त्रादिरहितविधिना पुत्रत्वमन्यथा दासत्वमिति तु न। पूर्वोक्तहेतोः। अत एव कालिकापुराणे अदासतेति च्छेद इति केषाञ्चित्कल्पनाऽपि निरस्ता। अत एव तेषां दासत्वप्रतिपादनार्थं न तु परिसंख्यार्थमित्येवं मानवं व्याख्यातं व्याख्यात्रा। स्पष्टं चेदं वाचस्पतिगोविन्दार्णवादिनिबन्धेषु। ब्राह्मणादित्रये नास्तीत्यादि तु दत्ताख्यदासत्वस्यैव बोधकम्। न च तत्र सुतपदान्न तथेति वाच्यम्। मानवेऽप्यत्र सुतपदसत्त्वात्। किं च मनूक्ताद्वितीयसमुच्चयानापत्तेः। एतेनोक्तसमुच्चायकत्वं तस्य नानुक्तसमुच्चायकत्वमित्यप्यपास्तम्। प्रागुक्तसमुच्चायकत्वे मनूक्ताद्वितीयसमुच्चयानापत्तेः। बलाद्दासीत्यत्रापि तेन तयोः समुच्चयानापत्तेश्च। स्मृत्यन्तरीयेषु मा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नवस्यैव समुच्चयो न नारदीयस्येत्यत्रात एव मानाभावाच्च। एतेन जात इत्यनेनैव मनूक्तोभयसंग्रह इति स व्यर्थ एवेत्यप्यपास्तम्। फले संभवति तत्त्वकल्पनाया अन्याय्यत्वात्। एतदर्थमपि नारदीयं परिगणनम्। अन्यथा अपिवैयर्थ्यं स्पष्टमेव। पादपूरकत्वकल्पनापेक्षयोक्तमेवोचितम्। अत एव मनुना दासदास्यां वेत्यप्युक्तम्। विज्ञानेश्वरस्त्वत्राप्यंशे उदासीनः। एवं चान्येषामपि दासानां शूद्रस्वामिकधनांशहरणमुक्तरीत्या सिद्धम्। एवं सति— (अ. १०। ४१)

शूद्राणां तु सधर्माणः सर्वे ऽपध्वंसजाः स्मृताः।

इति मनोरन्यत्राप्यवर्णेषु तादृशेषु तथा बोध्यम्। न च मनुविष्ण्वादिभिः— (मनु. ९। १८७)

अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं हरेत्।

इत्यादिना प्रत्यासत्तेरेवांशहरत्वे नियामकत्वस्योक्तत्वेन गृहजातस्य तत्सत्त्वेऽपि क्रीतादिदासेषु तदभावात्कथं तेषां तद्धरत्वमिति वाच्यम्। दत्तक्रीतादिपुत्रवदत्रापि उपाधिना तत्संभवात्। भ्रातरस्त्वर्द्धभागिनमिति अभ्रातृको हरेदिति च तस्य भ्रातृत्वातिदेशाच्च। मानवेन सुतत्वातिदेशाच्च। अन्यथा मृते स्वामिन्यात्मीयमिति विष्णूक्तं दासानां स्वामिमरणे सजातीयाशौचमपि न स्यात्। अत एव दासीगमने ऽन्यस्य दण्डोऽप्युक्तः। (याज्ञ. २।२९०)

अवरुद्धासु दासीषु भुजिष्यासु तथैव च।
गम्यास्वपि पुमान्दाप्यः पंचाशत्पणिकं दमम्॥

प्रसह्य दास्यभिगमे दण्डो दशपणः स्मृतः। इत्यादि।

अत एव च भक्तदासस्य स्वामिना सह विवाद उक्तः। अत एव च तेषां प्रव्रज्यावसितभिन्नानां दासत्वान्मुक्तौ कारणानि मोक्षक्रमश्चोक्तः— (याज्ञ. अ. २। १८२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बलाद्दासीकृतश्चौरैर्विक्रीतश्चापि मुच्यते।
स्वामिप्राणप्रदो भक्तत्यागात्तन्निष्क्रयादपि॥
इति मूले। (ना. व्यव. ५।)
यो वैषां स्वामिनं कश्चिन्मोक्षयेत्प्राणसंशयात्।
दासत्वात्स विमुच्येत पुत्रभागं लभेत च॥ (३०)
अनाकालभृतो दास्यान्मुच्यते गोयुगं ददत्।
संभक्षितं यद् दुर्भिक्षे न तच्छुध्येत कर्मणा॥ (३१)
भक्तस्योत्क्षेपणात्सद्यो भक्तदासः प्रमुच्यते। (३६)
आहितोऽपि धनं दत्त्वा स्वामी यद्येनमुद्धरेत्। (३२)
ऋणं तु सोदयं दत्त्वा ऋणी दास्यात्प्रमुच्यते। (३३)
कृतकालव्यपगमात्कृतकोऽपि विमुच्यते।
तवाहमित्युपगतो युद्धप्राप्तः पणे जितः।
प्रतिशीर्षप्रदानेन मुच्येरंस्तुल्यकर्मणा॥ (३४)
निग्रहाद्वडवायास्तु मुच्यते वडवाहृतः॥ (३६)
इति नारदश्च।

विनतायाः कद्रूदास्यान्मुक्तिरपि वैनतेयकृता महाभारते स्पष्टा। (ना. व्यव. ५। ४२। ४३।)

स्वं दासमिच्छेद्यः कर्तुमदासं प्रीतमानसः।
स्कन्धादादाय तस्यासौ भिन्द्यात्कुम्भं सहाम्भसा॥
साक्षताभिः सपुष्पाभिर्मूर्द्धन्यद्भिरवाकिरेत्।
अदास इति चोक्त्वा त्रिः प्राङ्मुखं तमथोत्सृजेत्॥

इत्यन्त्ये ऽन्यः। तस्मात्प्रत्यासत्तेः सत्त्वात् युक्तं तस्यापि तद्धरत्वम्। किं च पुत्रत्वादिप्रत्यासत्त्यपेक्षया दासत्वप्रत्यासत्तिरुत्तमोत्तमा। अत एवोक्तं तेषां दासस्य दासोऽहमिति।

अत एव च दास्यं नवविधभक्तिमध्ये गणितं, "श्रवणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कीर्त्तनम्" इत्यादि। तत्र तत्र मुख्याधिकारिणश्चोक्ताः, श्रीविष्णोः स्मरणे परीक्षिदित्यादि। दासविषये आशौचमपि ऋषिभिः प्रतिपादितम्। अत एव— (अ. ४। १८५)

छाया स्वो दासवर्गस्तु दुहिता कृपणं परम्।

इति मनूक्तिः। सा चाचारे प्रपञ्चिता। अत एव श्राद्धे दासानां तृप्त्यर्थं भूमावुच्छिष्टान्नदानमुक्तम्। अत एव दासीनां वंशपत्रमित्यादिना मनुना विभाज्यत्वनिषेधः कृतः। न चैवं-

भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः।
यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम्॥(अ. ८।४१६)

इतिमनुविरोध इति वाच्यम्। एते त्रयोऽर्जितधना अपि अधना धनास्वामिनः, भर्त्रादेरेव हि तत्र स्वामित्वं, ते यद्धनम् अधिगच्छन्ति तत्र स्वस्वामिस्वामिकत्वात् इत्यर्थेनांशग्रहणे भार्यादिवदविरोधात्। पारतन्त्र्यप्रतिपादनपरतया मेधातिथिविज्ञानेश्वरादिभिर्व्याख्यातत्वेन स्वस्वकर्मणस्तदनुज्ञया तत्सत्त्वे करणेऽपि तद्वृत्तस्यापि तदनन्तरं स्वातन्त्र्यस्य निर्विघ्नत्वाच्च। नञोऽल्पार्थत्वेनास्योपपत्तिर्बोध्या। अत्र भार्यादिसाहचर्यमपि तेषां तत्त्वे लिङ्गम्। (मनु. अ. ८। श्लो. २९९। ३००)

पुत्रः शिष्यस्तथा भार्या दासी दासस्तु पञ्चमः।
प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा॥
अधस्तात्तु प्रहर्त्तव्यं नोत्तमाङ्गे कदाचन।
अतोऽन्यथा तु प्रहरन् चौरस्याप्नोति किल्बिषम्॥

इति मानवोक्तसाहचर्यमप्येवम्।

यथा शिष्यस्य सर्वाभावे तद्धारित्वमेवं वर्णत्रये दासस्यापीत्यपि मनुतो लब्धम्। अत एव— (व्यव. ५। श्लो. २।३।४)

शुश्रूषकः पञ्चविधः शास्त्रे दृष्टो मनीषिभिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतुर्विधः कर्मकरस्तेषां दासास्त्रिपञ्चकाः ॥
शिष्यान्तेवासिभृतकाश्चतुर्थस्त्वधिकर्मकृत् ।
एते कर्मकरा ज्ञेया दासास्तु गृहजादयः ॥
सामान्यमस्वतन्त्रत्वमेषामाहुर्मनीषिणः ।

इति नारदः सङ्गच्छते। अत एव तुल्यदण्डोक्तिरपि सङ्गता।
दासत्वात्स विमुच्येत पुत्रभागं लभेत च । (व्यव. ५।३०)
इति प्रागुक्तनारदीयमप्यत्र लिङ्गम्। दायादुपागत इति पैतृक इति च तत्र गणनमपि गृहजाताभिन्नानां तत्त्वे साधकम्। संबन्धसत्त्वे एव हि तथा । अन्यथाऽसम्बद्धत्वं स्पष्टमेव । मनुनाऽपि गृहजस्य मध्यपाठेन सर्वेषां समत्वं बोधितम्। अत एव नारदीये पञ्चदशत्वमपि तथैव बोध्यम् । किं चौरससत्त्वे दासस्य तत्र सति समांशभागित्वं तदिच्छया तदभावेऽपि चार्द्धभागित्वं, दत्तकस्य तु औरससत्त्वे चतुर्थांशभागित्वमिति ततस्तस्य दुर्बलत्वमेव। किं च पत्न्यादिभ्योऽप्ययं प्रबलः। पत्नीत्यादितः प्राक् पुत्रानन्तरं तद्विषये जातोऽपीति योगिनोक्तत्वात् । पुत्रप्रकरणे एव औरसः क्षेत्रजश्चैवेत्यादिना पारशवः स्मृत इत्यन्तेन प्रागुक्तक्रमेणोक्त्वा दास्यां वेत्युक्त्वा क्षेत्रजादीनिति यएते ऽभिहिता इति च भ्रातृणामित्यतः प्राक् मनूक्तेश्च । अत एवाधुना शूद्रधनविभागे विशेषमाहेति व्याख्यात्रा ऽवतारितम्। विशेषपदेन पूर्वस्य त्रैवर्णिकमात्रविषयत्वमिति अत्र तन्निरासः सूचितः । न चैवं दुहितृदौहित्रयोरत्र ग्रहणं कथमिति वाच्यम् । प्रागुक्तपुत्रिकासुत इत्यस्य व्याख्याद्वयाभिप्रायेण तथोक्तिरित्याशयात् । तेन प्रागुक्तप्रतिनिधिमध्ये ऽत्र युगे ऽयमेव पुत्रिकापुत्रः शूद्रादौ प्रतिनिधिर्न दत्तक इति सूचितम् । दत्तौरसेतरेषां त्विति तु त्रैवार्णिकपरम् । परिग्रहपदस्वारस्यात् । अत एव तत्समः पुत्रिकासुत इत्युक्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पत्नी दुहितर इति वक्ष्यमाणाशयेन तु नात्र तद्ग्रहणम्। प्रथमोपात्तपत्नीत्यागस्य निर्मूलत्वापत्तेः। दौहित्रस्य साक्षात्तत्रानुपादानाच्च। अत एवात्र दौहित्र्या न ग्रहणम्। तथा च यथौरसो मुख्यो ऽन्ये प्रतिनिधयः एवमत्र गृहजातो मुख्यो ऽन्ये प्रतिनिधय इति सिद्धम्। एतदर्थमेव तदनन्तरमेतदुक्तिः। तथा चात्र दत्तको नैवेति साम्प्रतम्। तथा सन्नपि दास एव। अत एव व्याख्यात्रादिना परिणीतापुत्राः सन्तीत्याद्युक्तमित्युक्तम्। अत एव-

दत्ताद्या अपि तनया निजगोत्रेण संस्कृताः।
आयान्ति पुत्रतां सम्यगन्यबीजसमुद्भवाः॥
पितुर्गोत्रेण यः पुत्रः संस्कृतः पृथिवीपते।
आचूडान्तं न पुत्रः स पुत्रतां याति चान्यतः॥
चूडाद्या यदि संस्कारा निजगोत्रेण वै कृताः।
दत्ताद्यास्तनयास्ते स्युरन्यथा दासतोच्यते॥

इति कालिकापुराणं सङ्गच्छते। ब्राह्मणादित्रयेऽप्यङ्गवैकल्ये दासत्वं प्रतिपादयता तेन कैमुतिकन्यायेनान्यत्र तथा सति सुतरां तथेति सूचितमिति दिक्।

एवं च ब्राह्मणादिस्थलेऽपि शिष्याद्यभावे दासः सर्वापहारी। तदभावे श्रोत्रियादिः। अत एव सर्वाभावे इति तत्रोक्तम्। मानवं नारदीयं च साहचर्यमप्यत्र गमकमिति बोध्यम्। न चैवमपि यथा— (मनु. अ. ९। श्लो. ४८। ५९)

गोऽश्वोष्ट्रदासदासीषु महिष्याजाविकासु च।
नोत्पादकः प्रजाभागी तथैवान्याङ्गनासु च॥ इति,
एष धर्मो गवाश्वस्य दास्युष्ट्राजाविकस्य च।
विहङ्गमहिषाणां च विज्ञेयः प्रसवं प्रति॥

इति च मनुविरोध इति वाच्यम्। तत्रोत्पादकस्य स्वाम्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दभिन्नस्यैव स्पष्टत्वात्। अत एव दासदास्यामित्यत्र वचनात्तथेति मेधातिथिनोक्तम्। किं च द्विजात्युत्पन्नस्यैव निरंशस्य भरणमुक्तं व्याख्यात्रा। याज्ञवल्क्यादिनाऽपि भर्तव्याः स्युर्निरंशका इत्यादिना तेषां भरणमुक्तम्। स्त्रीस्थलेऽपि प्रतिबन्धकवशान्निरंशत्वे भरणमुक्तं भरणं चास्येति नारदेन अपुत्रा योषित इति मूलेन च। तद्दृष्टान्तेनैवानुकूलश्चेदिति वक्ष्यति व्याख्याकृत्। तथा च यत्र कथमपि निरंशत्वप्राप्तिः तत्रैव भरणम् अन्यत्रांशहरत्वमेव यथासम्भवम्। अत एव— (अ. ९। २०२)

सर्वेषामपि तु न्याय्यं दातुं शक्त्या मनीषिणा।
ग्रासाच्छादनमत्यन्तं पतितो ह्यददद्भवेत्॥

इति मनुना अनंशौ क्लीबपतिताावित्यग्रिमेणाभरणे पातित्यमुक्तम्। अत्यन्तमित्यस्य यावज्जीवमित्यर्थः। तथा च शूद्रादिस्थले परिणीतापुत्रपुत्रीदौहित्रसत्त्वे मृतपितृकाविभागे ऽर्धभागित्वं दासस्य असत्त्वे तु सर्वहारित्वम्। अत एव दुहितॄणां सुतादते इति दौहित्रमात्रपरतया मेधातिथिना व्याख्यातमपि व्याख्यात्रोपेक्ष्य भेदेन व्याख्यातम्। दुहितृसत्त्वेऽपि सर्वहारित्वम्। यावद्वचनं वाचनिकमिति सिद्धान्तात्। तदयं निर्गलितो ऽर्थः। आद्यदासस्यौरसकल्पत्वं परिणयनाभावात्। अन्येषां दत्तककल्पत्वं, तत्र मन्त्रहोमयोरभावात्। तथा च तेषामन्यतमसत्त्वे मुख्यपुत्रादिसत्त्वे जीवत्पितृकाविभागे तदिच्छया तत्समांशभागित्वम्। मृतपितृकविभागे तूक्तमेव। एवं दुहितृदौहित्रसत्त्वेपि। एवं पत्नीसत्त्वेऽपि पुत्रपौत्रदुहितृदौहित्राणामभावे सर्वग्राहित्वं, तदभावेतु पत्नीसत्त्वेऽपि संसृष्टिनो ऽविभक्तस्य भ्रातुः सर्वहारित्वं, तदभावे तु पत्न्याः सर्वांशभागित्वमित्यादीति दिगिति। तदेतत्सर्वं हृदि निधायोक्तं ध्वनयन्नेव व्यङ्ग्यार्थमाह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

* अत्र चेति । मूले इत्यर्थः । लभते इत्यस्य इति गम्यते इति शेषः । ब्राह्मणादीनां तु दासीसुताः प्रजीवनभाजो न रिक्थहरा इति मेधातिथिरपि ॥ १३३ ॥ १३४ ॥

मि० अव. मुख्यगौणसुता दायं गृह्णन्तीति निरूपितम्।
तेषामभावे सर्वेषां दायादक्रम उच्यते ॥

या० पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।
तत्सुता गोत्रजा बन्धुः शिष्यः सब्रह्मचारिणः॥१३५॥
एषामभावे पूर्वस्य धनभागुत्तरोत्तरः ।
स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः ॥ १३६॥

मि० पूर्वोक्ता द्वादशपुत्रा यस्य न सन्ति असावपुत्रः तस्यापुत्रस्य स्वर्यातस्य परलोकं गतस्य धनभाक् धनग्राही एषां पत्न्यादीनामनुक्रान्तानां मध्ये पूर्वस्य पूर्वस्याभावे उत्तरोत्तर इति सम्बन्धः । सर्वेषु मूर्द्धावसिक्तादिषु अनुलोमजेषु सूतादिषु प्रतिलोमजेषु वर्णेषु च ब्राह्मणादिषु अयं विधिर्दायग्रहणक्रमो वेदितव्यः ।

तत्र प्रथमं पत्नी धनभाक् । पत्नी विवाहसंस्कृता । पत्युर्नो यज्ञसंयोगे इति स्मरणात् । एकवचनं च जात्यभिप्रायेण । अतश्च बह्व्यश्चेत्सजातीया विजातीयाश्च यथांशं विभज्य धनं गृह्णन्ति । वृद्धमनुरपि पत्न्याः समग्रधनसंबन्धं वक्ति ।

अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता ।
पत्न्येव दद्यात्तत्पिडं कृत्स्नमंशं लभेत च॥ इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बृहद्विष्णुरपि,
अपुत्रधनं पत्न्यभिगामि तदभावे दुहितृगामि तदभावे पितृगामि तदभावे मातृगामीति।
१ कात्यायनेनापि,
पत्नी भर्तुर्धनहरी या स्यादव्यभिचारिणी।
तदभावे तु दुहिता यद्यनूढा भवेत्तदा॥ इति।
तथा,
अपुत्रस्याथ कुलजा पत्नी दुहितरोऽपि वा।
तदभावे पिता माता भ्राता पुत्राश्च कीर्तिताः॥इति।
बृहस्पतिरपि,
कुल्येषु विद्यमानेषु पितृभ्रातृसनाभिषु।
असुतस्य प्रमीतस्य पत्नी तद्भागहारिणी॥ इति।
एतद्विरुद्धानिच वाक्यानि लक्ष्यन्ते।
तद्यथा, (ना. व्यव. १३ श्लो.। २५। २६)
भ्रातॄणामप्रजाः प्रेयात् कश्चिच्चेत्प्रव्रजेत वा।
विभजेरन् धनं तस्य शेषास्ते स्त्रीधनं विना॥
भरणं चास्य कुर्वीरन्स्त्रीणामाजीवनक्षयात्।
रक्षन्ति शय्यां भर्तुश्चेदाच्छिन्द्युरितरासु तु॥ इति।
पत्नीसद्भावेऽपि भ्रातॄणां धनग्रहणं पत्नीनां च भरणमात्रं नारदेनोक्तम्।
मनुना तु, (अ. ९. श्लो. १८५ उ.)
पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वा।
इत्यपुत्रस्य धनं पितुर्वा भ्रातुर्वेति दर्शितम्।
तथा, (अ. ९. श्लो. २१७)
अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मातर्यपि च वृत्तायां पितुर्माता हरेद्धनम् ॥

इति मातुः पितामह्याश्च धनसंबन्धो दर्शितः।

शङ्खेनापि "स्वर्यातस्य ह्यपुत्रस्य भ्रातृगामि द्रव्यं तदभावे पितरौ हरेयातां ज्येष्ठा वा पत्नी" इति भ्रातॄणां पित्रोर्ज्येष्ठायाश्च पत्न्याः क्रमेण धनसंबन्धो दर्शितः।

कात्यायनेनापि—

विभक्ते संस्थिते द्रव्यं पुत्राभावे पिता हरेत्।

भ्राता वा जननी वाऽथ माता वा तत्पितुः क्रमात् ॥

इति। एवमादीनां विरुद्धार्थानां धारेश्वरेण व्यवस्था दर्शिता। पत्नी गृह्णीयादित्येतद्वचनजातं विभक्तभ्रातृस्त्रीविषयम्। सा च यदि नियोगार्थिनी भवति। कुत एतत् नियोगसव्यपेक्षायाः पत्न्या धनहरणं न स्वतन्त्राया इति। पिता हरेदपुत्रस्येत्यादिवचनात्तत्र व्यवस्थाकारणं वक्तव्यम् नान्यद्व्यवस्थाकारणमस्तीति। गौतमवचनाच्च, "पिण्डगोत्रर्षिसंबन्धा रिक्थं भजेरन् स्त्री वाऽनपत्यस्य बीजं वा लिप्सेत" इति। अस्यार्थः। पिण्डगोत्रर्षिसंबन्धा अनपत्यस्य रिक्थं भजेरन्, स्त्री वा रिक्थं भजेत यदि बीजं लिप्सेतेति।

मनुरपि, (अ. ९ श्लो. (१४६)

धनं यो बिभृयाद् भ्रातुर्मृतस्य स्त्रियमेव च।

सोऽपत्यं भ्रातुरुत्पाद्य दद्यात्तस्यैव तद्धनम् ॥

इति।

अनेनैतद्दर्शयति विभक्तधनेऽपि भ्रातर्युपरतेऽपत्यद्वारेणैव पत्न्या धनसंबन्धो नान्यथेति।

तथाऽविभक्तधनेऽपि, (मनु. अ. ९ श्लो. १२०)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कनीयान् ज्येष्ठभार्यायां पुत्रमुत्पादयेद्यदि।
समस्तत्र विभागः स्यादिति धर्मो व्यवस्थितः॥ इति।
तथा वसिष्ठोऽपि रिक्थलोभान्नास्ति नियोग इति रिक्थलोभान्नियोगं प्रतिषेधन् नियोगद्वारक एव पत्न्या धनसंबन्धो नान्यथेति दर्शयति। नियोगाभावे तु पत्न्या भरणमात्रमेव।

नारदवचनात्। (व्यव. १३। २६)
भरणं चास्य कुर्वीरन्स्त्रीणामाजीवनक्षयात्। इति।
योगीश्वरेणापि किल वक्ष्यते। [अ. २।१४२]
अपुत्रा योषितश्चैषां भर्तव्याः साधुवृत्तयः।
निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च॥ इति।
अपिच। द्विजातिधनस्य यज्ञार्थत्वात् स्त्रीणां च यज्ञेऽनधिकारात् धनग्रहणमयुक्तम्। तथाच केनापि स्मृतम्,

यज्ञार्थं द्रव्यमुत्पन्नं तत्रानधिकृतास्तु ये।
अरिक्थभाजस्ते सर्वे ग्रासाच्छादनभाजनाः॥
यज्ञार्थं विहितं वित्तं तस्मात्तद्धि नियोजयेत्।
स्थानेषु धर्मजुष्टेषु न स्त्रीमूर्खविधर्मिषु॥ इति।

तदनुपपन्नम्। पत्नी दुहितर इत्यत्र नियोगस्याप्रतीतेरप्रस्तुतत्वाच्च। अपिच इदमत्र वक्तव्यम्। पत्न्या धनग्रहणे नियोगो वा निमित्तं तदुत्पन्नमपत्यं वा। तत्र नियोगस्यैव निमित्तत्वे अनुत्पादितपुत्राया अपि धनसंबन्धः प्राप्नोति। उत्पन्नस्य च पुत्रस्य धनसंबन्धो न प्राप्नोति। अथ तदपत्यस्यैव निमित्तत्वं तथा सति पुत्रस्यैव धनसम्बन्धात्पत्नीति नारब्धव्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ स्त्रीणां पतिद्वारको धनसंबन्धः पुत्रद्वारको वा नान्यथेति मतम्। तदप्यसत्।

(मनु अ. ९ श्लो. १९४)

अध्यग्न्यध्यावहनिकं दत्तं च प्रीतिकर्मणि।
भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम्॥

इत्यादिविरोधात्। किंच। सर्वपुत्राभावे पत्नी दुहितर इत्यारब्धम्। तत्र नियुक्ताया धनसंबन्धं वदता क्षेत्रजस्यैव धनसंबन्ध उक्तो भवति। स च प्रागेवाभिहित इति अपुत्रप्रकरणे पत्नीति नारब्धव्यम्।

अथ पिण्डगोत्रर्षिसंबन्धा रिक्थं भजेरन्स्त्री वाऽनपत्यस्य बीजं वा लिप्सेतेति गौतमवचनान्नियुक्ताया धनसंबन्ध इति। तदप्यसत्। न हि यदि बीजं लिप्सेत तदाऽनपत्यस्य स्त्री धनं गृह्णीयादित्ययमर्थोऽस्मात्प्रतीयते। किन्तु अनपत्यस्य धनं पिण्डगोत्रर्षिसंबन्धा भजेरन्स्त्री वा, सा स्त्री बीजं वा लिप्सेत संयता वा भवेदिति तस्या धर्मान्तरोपदेशः। वाशब्दस्य पक्षान्तरवचनत्वेन यद्यर्थाप्रतीतेः।

अपिच। संयताया एव धनग्रहणं युक्तम्, न नियुक्तायाः स्मृतिलोकनिन्दितायाः।

अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता।
पत्न्येव दद्यात्तत्पिण्डं कृत्स्नमंशं लभेत च॥

इति संयताया एव धनग्रहणमुक्तम्।

तथा नियोगश्च निन्दितो—

मनुना, (अ. ९ श्लो. ६४)

नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्यस्मिन् हि नियुञ्जाना धर्मं हन्युः सनातनम्॥
इत्यादिना।

यत्तु वसिष्ठवचनम् "रिक्थलोभान्नास्ति नियोग" इति, तत् अविभक्ते संसृष्टिनि वा भर्तरि प्रेते तस्या धनसम्बन्धो नास्तीति स्वापत्यस्य धनसम्बन्धार्थं नियोगो न कर्तव्य इति व्याख्येयम्।

यदपि नारदवचनम्, (व्यव. १३। २६)
भरणं चास्य कुर्वीरन् स्त्रीणामाजीवनक्षयात्। इति,
तदपि— (व्यव. १३। २४)
संसृष्टिनां तु यो भागस्तेषामेव स इष्यते।
इति संसृष्टिनां प्रस्तुतत्वात्तत्स्त्रीणामनपत्यानां भरणमात्रप्रतिपादनपरम्। न च भ्रातृणामप्रजाः प्रेयादित्येतस्य संसृष्टिविषयत्वे संसृष्टिनां तु यो भाग इत्यनेन पौनरुक्त्यमाशङ्कनीयम्। यतः पूर्वोक्तविवरणेन स्त्रीधनस्याविभाज्यत्वं तत्स्त्रीणां च भरणमात्रं विधीयते।

यदपि अपुत्रा योषितश्चैषामित्यादिवचनं, तत् क्लीबादिस्त्रीविषयमिति वक्ष्यते।

यत्तु द्विजातिधनस्य यज्ञार्थत्वात्स्त्रीणां च यज्ञेऽनधिकाराच्च धनग्रहणमयुक्तमिति। तदसत्। सर्वस्य द्रव्यजातस्य यज्ञार्थत्वे दानहोमाद्यसिद्धेः।

अथ यज्ञशब्दस्य धर्मोपलक्षणत्वात् दानहोमादीनामपि धर्मत्वात्तदर्थत्वमविरुद्धमिति मतम्। एवं तर्ह्यर्थकामयोर्धनसाध्ययोरसिद्धिरेव स्यात्।

तथा सति— (याज्ञ. १। ११५)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धर्ममर्थं च कामं च यथाशक्ति न हापयेत्।

तथा "न पूर्वाह्णमध्यान्दिनापराह्णानफलान् कुर्याद्यथाशक्ति धर्मार्थकामेभ्यः" तथा– (मनु. अ. २।९६)

न तथैतानि शक्यन्ते संनियन्तुमसेवया।

इत्यादियाज्ञवल्क्यगौतममनुवचनविरोधः।

अपिच। धनस्य यज्ञार्थत्वे हिरण्यं भार्यमिति हिरण्यधारणस्य क्रत्वर्थतानिराकरणेन पुरुषार्थत्वमुक्तं, तस्प्रत्युद्धृतं स्यात्।

किंच। यज्ञशब्दस्य धर्मोपलक्षणत्वे स्त्रीणामपि पूर्तधर्माधिकाराद्धनग्रहणं युक्ततरम्।

यत्तु पारतन्त्र्यवचनं न स्त्री स्वातन्त्र्यमर्हतीत्यादि, तदस्तु पारतन्त्र्यं, धनस्वीकारे तु को विरोधः।

कथं तर्हि यज्ञार्थं द्रव्यमुत्पन्नमित्यादिवचनम्। उच्यते। यज्ञार्थमेवार्जितं यद्धनं तत् यज्ञे एव नियोक्तव्यं पुत्रादिभिरपीत्येवंपरं तत्। (मनु. अ. ११।२५)

यज्ञार्थं लब्धमददद्भासः काकोऽपि वा भवेत्।

इति दोषश्रवणस्य पुत्रादिष्वप्यविशेषात्।

यदपि कात्यायनेनोक्तम्,

अदायिकं राजगामि योषिद्भृत्त्यौर्ध्वदेहिकम्।
अपास्य, श्रोत्रियद्रव्यं श्रोत्रियेभ्यस्तदर्पयेत्॥ इति,

अदायिकं दायादरहितं यद्धनं तत् राजगामि राज्ञो भवति, योषिद्भृत्त्यौर्ध्वदेहिकमपास्य। तत् स्त्रीणामशनाच्छादनोपयुक्तम् और्ध्वदेहिकं धनिनः श्राद्धाद्युपयुक्तं चापास्य परिहृत्य राजगामि भवतीति संबन्धः। अस्यापवादः, श्रोत्रियद्रव्यं तु योषिद्भृत्त्यौ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्ध्वदैहिकमपास्य श्रोत्रियायोपपादयेदिति। एतदप्य-वरुद्धस्त्रीविषयम्। योषिद्ग्रहणात्।

नारदवचनं च- [व्यव. १३। ५२]

अन्यत्र ब्राह्मणात्किन्तु राजा धर्मपरायणः।
तत्स्त्रीणां जीवनं दद्यादेष दायविधिः स्मृतः॥

इति अवरुद्धस्त्रीविषयमेव। स्त्रीशब्दग्रहणात्।इह तु पत्नीशब्दादूढायाः संयताया धनग्रहणमविरुद्धम्। तस्माद्विभक्ते असंसृष्टिन्यपुत्रे स्वर्याते पत्नी धनं प्रथमं गृह्णातीत्ययमर्थः सिद्धो भवति। विभागस्योक्तत्वा-त्संसृष्टिनां वक्ष्यमाणत्वात्।

एतेनाल्पधनविषयत्वं श्रीकरादिभिरुक्तं निरस्तं वेदितव्यम्। तथा हि औरसेषु पुत्रेषु सत्स्वपि जीव-द्विभागे अजीवद्विभागे च पत्न्याः पुत्रसमांशग्रहण-मुक्तम्, (याज्ञ. २। श्लो. ११५।)

यदि कुर्यात्समानंशान् पत्न्यः कार्याः समांशकाः। इति— (याज्ञ. २ श्लो. १२३)

पितुरूर्ध्वं विभजतां माताऽप्यंशं समं हरेत्। इति च।

तथा सति अपुत्रस्य स्वर्यातस्य धनं पत्नी भरणा-दतिरिक्तं न लभते इति व्यामोहमात्रम्।

अथ पत्न्यः कार्याः समांशका इत्यत्र माताऽप्यंशं समं हरेदित्यत्र च जीवनोपयुक्तमेव धनं स्त्री हरतीति मतम्। तदसत्। अंशशब्दस्य समशब्दस्य चानर्थ-क्यप्रसङ्गात्।

स्यान्मतम्। बहुधने जीवनोपयुक्तं धनं गृह्णाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अल्पे तु पुत्रांशसमांशं गृह्णातीति । तच्च न । विधिवैषम्यप्रसङ्गात् । तथाहि । पत्न्यः कार्याः समांशकाः माताऽप्यंशं समं हरेदिति च बहुधने जीवनमात्रोपयुक्तं वाक्यान्तरमपेक्ष्य प्रतिपादयति अल्पधने तु पुत्रांशसममंशं प्रतिपादयतीति ।

यथा चातुर्मास्येषु द्वयोः प्रणयन्तीत्यत्र पूर्वपक्षिणा सौमिकप्रणयनातिदेशो हेतुत्वेन "न वैश्वदेवउत्तरवेदिमुपकिरन्ति न शुनासीरीये" इत्युत्तरवेदिप्रतिषेधे दर्शिते, राद्धान्तैकदेशिना न सौमिकप्रणयनातिदेशप्राप्ताया उत्तरवेद्याः प्रथमोत्तमयोः पर्वणोरयं प्रतिषेधः किन्तु उपात्र वपन्तीति प्राकरणिकेन वचनेन प्राप्ताया उत्तरवेद्याः प्रतिषेधोऽयमित्यभिहिते, पुनः पूर्वपक्षिणा उपात्र वपन्तीति प्रथमोत्तमयोः पर्वणोः प्रतिषेधमपेक्ष्य पाक्षिकीमुत्तरवेदिं प्रापयति मध्यमयोस्तु निरपेक्षमेव नित्यवदुत्तरवेदिं प्रापयतीति विधिवैषम्यं दर्शितम् । राद्धान्तेऽपि विधिवैषम्यभयात्प्रथमोत्तमयोः पर्वणोरुत्तरवेदिप्रतिषेधो नित्यानुवादो, द्वयोःप्रणयन्तीत्याद्यर्थवादपर्यालोचनया उपात्र वपन्तीति मध्यमयोरेव वरुणप्रघाससाकमेधपर्वणोरुत्तरवेदिं विधत्ते इति दर्शितम् ।

यदपि मतम्,

[मनु अ. ९ श्लो. १८५]

पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वा ।

इति मनुस्मरणात्, तथा स्वर्यातस्य ह्यपुत्रस्य भ्रातृगामि द्रव्यं तदभावे पितरौ हरेयातां ज्येष्ठा वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पत्नीति शङ्खस्मरणाच्च अपुत्रस्य धनं भ्रातृगामि इति प्राप्तम्। (ना. व्यव. १३। २६)

भरणं चास्य कुर्वीरन्स्त्रीणामाजीवनक्षयात्।

इत्यादिवचनाच्च भरणोपयुक्तं पत्नी लभते इत्यपि स्थितम्। एवं स्थिते बहुधने अपुत्रे स्वर्याते भरणोपयुक्तं पत्नी गृह्णाति शेषं च भ्रातरः, यदा तु पत्नीभरणमात्रोपयुक्तमेव द्रव्यमस्ति ततो न्यूनं वा तदा किं पत्न्येव गृह्णात्युत भ्रातरोऽपीति विरोधे पूर्वबलीयस्त्वज्ञापनार्थं पत्नी दुहितर इत्यारब्धव्यमिति। तदप्यत्रभवानाचार्यो न मृष्यति।

यतः—[मनु. अ. ९ श्लो. १८५]

पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वा।

इति विकल्पस्मरणान्नेदं क्रमपरं वचनम् अपितु धनग्रहणेऽधिकारप्रदर्शनमात्रपरम्, तच्चासत्यपि पत्न्यादिगणे घटते इति व्याचचक्षे। शङ्खवचनमपि संसृष्टभ्रातृविषयमिति।

अपिच। अल्पविषयत्वमस्माद्वचनात्प्रकरणाद्वा नावगम्यते।

धनभागुत्तरोत्तर इत्यस्य च पत्नी दुहितर इति विषयद्वये[1] वाक्यान्तरमपेक्ष्याल्पधनविषयत्वम्, पित्रादिषु तु धनमात्रविषयत्वमिति पूर्वोक्तं विधिवैषम्यं तदवस्थमेवेति यत्किञ्चिदेतत्।

यत्तु हारीतवचनम्,

विधवा यौवनस्था चेन्नारी भवति कर्कशा।

१ पत्नीविषये दुहितृविषये चेत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आयुषः क्षपणार्थं तु दातव्यं जीवनं तदा ॥ इति,

तदपि शङ्कितव्यभिचारायाः सकलधनग्रहणनिषेधपरम्। अस्मादेव वचनात् अशङ्कितव्यभिचारायाः सकलधनग्रहणं गम्यते । एतदेवाभिप्रेत्योक्तं शङ्खेन, ज्येष्ठा वा पत्नीति । ज्येष्ठा गुणज्येष्ठा अनाशङ्कितव्यभिचारा सा सकलं धनं गृहीत्वाऽन्यां कर्कशामपि मातृवत्पालयतीति सर्वमनवद्यम् । तस्मादपुत्रस्य स्वर्यातस्य विभक्तस्यासंसृष्टिनः सकलमेव धनं परिणीता स्त्री संयता गृह्णातीति स्थितम्।

२। तदभावे दुहितरः । दुहितर इति बहुवचनं समानजातीयानामसमानजातीयानां च समविषमांशप्राप्त्यर्थम् ।

तथाच कात्यायनः,

पत्नी भर्तुर्धनहरी या स्यादव्यभिचारिणी।
तदभावे तु दुहिता यद्यनूढा भवेत्तदा ॥ इति।

बृहस्पतिरपि,

भर्तुर्धनहरी पत्नी तां विना दुहिता स्मृता।
अङ्गादङ्गात्सम्भवति पुत्रवद् दुहिता नृणाम् ॥
तस्मात्पितृधनं त्वन्यः कथं गृह्णीत मानवः।इति।

तत्र चोढानूढासमवायेऽनूढैव गृह्णाति ।

तदभावे तु दुहिता यद्यनूढा भवेत्तदा ।

इति विशेषस्मरणात् । तथा, प्रतिष्ठिताऽप्रतिष्ठितासमवाये अप्रतिष्ठितैव, तदभावे प्रतिष्ठिता । स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानां चेति गौतमवचनस्य पितृधनेऽपि समानत्वात्। न चैतत् पुत्रिकावि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षयामिति मन्तव्यम् । तत्समः पुत्रिकासुत इति पुत्रिकायास्तत्सुतस्य चौरससमत्वेन पुत्रप्रकरणेऽभिधानात् ।

३ । चशब्दाद् दुहित्रभावे दौहित्रो धनभाक् ।

यथाह विष्णुः,

अपुत्रपौत्रसन्ताने दौहित्रा धनमाप्नुयुः ।
पूर्वेषां तु स्वधाकारे पौत्रा दौहित्रका मताः॥इति।

मनुरपि, (अ. ९ श्लो. १३६)

अकृता वा कृता वाऽपि यं विन्देत्सदृशात्सुतम्।
पौत्री मातामहस्तेन दद्यात्पिण्डं हरेद्धनम्॥इति।

४।तदभावे पितरौ मातापितरौ धनभाजौ।यद्यपि युगपदधिकरणवचनतायां द्वन्द्वस्मरणात् तदपवादत्वादेकशेषस्य धनग्रहणे पित्रोः क्रमो न प्रतीयते तथापि विग्रहवाक्ये मातृशब्दस्य पूर्वनिपातादेकशेषाभावपक्षे च मातापितरावेिति मातृशब्दस्य पूर्वं श्रवणात् पाठक्रमादेवार्थक्रमावगमाद्धनसम्बन्धेऽपि क्रमापेक्षायां प्रतीतक्रमानुरोधेनैव प्रथमं माता धनभाक् तदभावे पितेति गम्यते ।

किञ्च पिता पुत्रान्तरेष्वपि साधारणो माता तु न साधारणीति प्रत्यासत्त्यतिशयात्–(मनु.अ.९।१८७)

अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेत् ।

इति वचनान्मातुरेव प्रथमं धनग्रहणं युक्तम् । न च सपिण्डेष्वेव प्रत्यासत्तिर्नियामिका अपि तु समानोदकादिष्वप्यविशेषेण धनग्रहणे प्राप्ते प्रत्यासत्तिरेव नियामिकेत्यस्मादेव वचनादवगम्यते इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मातापित्रोर्मातुरेव प्रत्यासत्त्यतिशयाद्धनग्रहणं युक्ततरम्। तदभावे पिता धनभाक्।

५। पित्रभावे भ्रातरो धनभाजः।

तथाच मनुः, (अ. ९ श्लो. १८५)

पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वा। इति।

यत्पुनर्धारेश्वरेणोक्तम्, (अ. ९ श्लो. २१७)

अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात्।
मातर्यपि च वृत्तायां पितुर्माता हरेद्धनम्॥

इति मनुवचनाज्जीवत्यपि पितरि मातरि वृत्तायां पितुर्माता पितामही धनं हरेन्न पिता। यतः पितृगृहीतं धनं विजातीयेष्वपि पुत्रेषु गच्छति, पितामहीगृहीतं तु सजातीयेष्वेव गच्छतीति पितामह्येव गृह्णातीति।

एतदप्याचार्यो नानुमन्यते। विजातीयपुत्राणामपि धनग्रहणस्योक्तत्वात्, चतुस्त्रिद्व्येकभागाः स्युरित्यादिनेति।

यत्पुनः— (अ. ९ श्लो. १८९)

अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः।

इति मनुस्मरणं, तत् नृपाभिप्रायं न तु पुत्राभिप्रायम्।

भ्रातृष्वपि सोदराः प्रथमं गृह्णीयुः। भिन्नोदराणां मात्रा विप्रकर्षात्। (मनु. अ. ९। १८७)

अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेत्।

इति स्मरणात्। सोदराणामभावे भिन्नोदरा धनभाजः।

६। भ्रातॄणामप्यभावे तत्पुत्राः पितृक्रमेण धनभाजः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भ्रातृभ्रातृपुत्रसमवाये भ्रातृपुत्राणामनधिकारः। भ्रात्रभावे भ्रातृपुत्राणामधिकारवचनात्।

यदा त्वपुत्रे भ्रातरि स्वर्याते तद्भ्रातॄणामविशेषेण धनसम्बन्धे जाते भ्रातृधनविभागात्प्रागेव यदि कश्चिद् भ्राता मृतस्तदा तत्पुत्राणां पितृतोऽधिकारे प्राप्ते तेषां भ्रातॄणां च विभज्य ग्रहणे पितृतो भागकल्पनेति युक्तम्।

७। भ्रातृपुत्राणामप्यभावे गोत्रजा धनभाजः। गोत्रजाः पितामही सपिण्डाः समानोदकाश्च। तत्र पितामही प्रथमं धनभाक्।

(अ. ९ श्लो. २१७)

मातर्यपि च वृत्तायां पितुर्माता धनं हरेत्।

इति मात्रनन्तरं पितामह्या धनग्रहणे प्राप्ते पित्रादीनां भ्रातृसुतपर्यन्तानां बद्धक्रमत्वेन मध्येऽनुप्रवेशाभावात् पितुर्माता धनं हरेदित्यस्य वचनस्य धनग्रहणाधिकारप्राप्तिमात्रपरत्वादुत्कर्षे तत्सुतानन्तरं पितामही गृह्णात्यविरोधात्।

पितामह्याश्चाभावे समानगोत्रजाः सपिण्डाः पितामहादयो धनभाजः। भिन्नगोत्राणां सपिण्डानां बन्धुशब्देन ग्रहणात्।

तत्र च पितृसन्तानाभावे पितामही पितामहः पितृव्यास्तत्पुत्राश्च क्रमेण धनभाजः।

पितामहसन्तानाभावे प्रपितामही प्रपितामहस्तत्पुत्रास्तत्सूनवश्चेत्येवमासप्तमात्समानगोत्राणां सापिण्डानां धनग्रहणं वेदितव्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तेषामभावे समानोदकानां धनसम्बन्धः । ते च सपिण्डानामुपरि सप्त वेदितव्याः । जन्मनामज्ञानावधिका वा ।

यथाह बृहन्मनुः,

सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते ।
समानोदकभावस्तु निवर्तेताचतुर्दशात् ॥
जन्मनाम्नोः स्मृतेरेके तत्परं गोत्रमुच्यते । इति ।

८ । गोत्रजाभावे बन्धवो धनभाजः । बन्धवश्च त्रिविधाः आत्मबन्धवः पितृबन्धवो मातृबन्धवश्चेति ।

यथोक्तम्,

आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसुः सुताः ।
आत्ममातुलपुत्राश्च विज्ञेया ह्यात्मबान्धवाः ॥
पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः ।
पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः ॥
मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः ।
मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः ॥ इति ।

तत्र चान्तरङ्गत्वात्प्रथममात्मबन्धवो धनभाजस्तदभावे पितृबन्धवस्तदभावे मातृबन्धव इति क्रमो वेदितव्यः ।

९ । बन्धूनामभावे आचार्यः । तदभावे शिष्यः ।

पुत्राभावे यः प्रत्यासन्नः सपिण्डस्तदभावे आचार्यः आचार्याभावेऽन्तेवासीत्यापस्तम्बस्मरणात् ।

१० । शिष्याभावे सब्रह्मचारी धनभाक् । येन सहैकस्मादाचार्यादुपनयनाध्ययनतदर्थज्ञानप्राप्तिः स सब्रह्मचारी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

११। तदभावे ब्राह्मणद्रव्यं यः कश्चित् श्रोत्रियो गृह्णीयात्। श्रोत्रिया ब्राह्मणस्यानपत्यस्य रिक्थं भजेरन्निति गौतमस्मरणात्। तदभावे ब्राह्मणमात्रम्।

यथाह मनुः, (अ. ९ श्लो. १८८)

सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः।
त्रैविद्याः शुचयो दान्तास्तथा धर्मो न हीयते॥इति।

न कदाचिदपि ब्राह्मणद्रव्यं राजा गृह्णीयात्। (अ. ९ श्लो. १८९)

अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः।

इति मनुवचनात्।

नारदेनाप्युक्तम्,

ब्राह्मणार्थस्य तन्नाशे दायादश्चेन्न कश्चन।
ब्राह्मणायैव दातव्यमेनस्वी स्यान्नृपोऽन्यथा॥इति।

क्षत्रियादिधनं सब्रह्मचारिपर्यन्तानामभावे राजा हरेत् न ब्राह्मणः।

यथाह मनुः, (अ. ९ श्लो. १८९)

इतरेषां तु वर्णानां सर्वाभावे हरेन्नृपः।

इति ॥ १३५ ॥ १३६ ॥

वा. १। उक्तवक्ष्यमाणप्रमेययोः कठिनतरत्वात्तयोस्तात्पर्यार्थे सौकर्याय दर्शयंस्तत्र श्रोतृसमवधानाय पद्येन सङ्गतिमाह*मुख्यगौणेति। गौणेत्यनेन दासानामपि सङ्ग्रहः। उक्तक्रमेणेति भावः। *तेषामभावे इति। तेषां सर्वेषां ब्राह्मणादिवर्णानां मूर्द्धावसिक्ताद्यनुलोमजानां दासानां चेत्यर्थः। दायादाः धनग्राहिणः। पत्नीत्यत्र एवकारस्य सर्वत्र प्रत्येकं सम्बन्धः। तेनाद्यादिसत्त्वे द्वितीयादिव्यावृत्तिः। चेन दौहित्रसमुच्चयः। भ्रातर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यत्रैकशेषेण भगिनीनामपि ग्रहणं बोध्यम्। तथेति भ्रातृविशेषणं विभक्ता असंसृष्टिनश्चेत्यर्थकम्। अत एव सफलम्। न तु समुच्चयाद्यर्थकम्। तं विनाऽप्यन्यत्रेवात्रापि तत्प्रतीत्या तथा साफल्याभावात्। तत्सुता इत्यत्र तयोः सुता इत्यर्थः। सुता इत्यत्र तथैकशेषेण तयोः कन्यानामपि ग्रहणम्। बन्धुशब्देन बान्धववदाचार्यस्य गुरोरपि ग्रहणम्। तस्यानेकार्थत्वात्। हिस्त्वर्थे पूर्वतो वैलक्षण्यसूचकः।

२। अपुत्रस्येत्यत्र मुख्यपुत्रशून्यत्वमात्रं न विवक्षितं प्रकरणविरोधात्, किं तु मुख्यगौणपुत्राणामभाव एवेत्याशयेन तृतीयपादस्य अग्रे ऽन्वयासंभवात् पूर्वैकवाक्यतामाह *पूर्वोक्ता इति। एषामित्यत्रापि तथैकशेष इत्याह *पत्न्यादीनामिति। इदमो न बुद्धिस्थप्रत्येकपरामर्शित्वमित्याह * अनुक्रान्तानामिति। निर्धारणे षष्ठीत्याह * मध्ये इति। आग्रिमानुरोधेन पूर्वस्येति वीप्सागर्भमित्याह * पूर्वस्य पूर्वस्येति। उत्तरोत्तर इति संबन्ध इति पाठः। उत्तरोत्तरो धनभागिति संबन्ध इत्यपाठः। पौनरुक्त्यादनन्वयाच्च। तथा पाठे तु तदीयधनभाक्त्वमुद्दिश्य तेषां तथोत्तरोत्तरत्वस्य विधानान्न दोषः।

३। अत्र पुत्रग्रहणं पौत्रप्रपौत्रयोरप्युपलक्षणम्। जीवति मृते च पुत्रे पौत्राणां भागस्य भूयां पितामहेति अनेकपितृकाणामिति चोक्तत्वात्।

अविभक्ताविभक्तानां कुल्यानां वसतां सह।
भूयो दायविभागः स्यात् आचतुर्थादिति स्थितिः॥
इति देवलात्।
अपुत्रपौत्रसंताने दौहित्रा धनमाप्नुयुः।
तिइ विष्णोः। पिता सवर्णायाः पुत्रः पौत्रः पुत्रपौत्र इत्यु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पक्रम्य सत्स्वन्येषु तद्गामीति बौधायनोक्तेश्च। एवं पादत्रयैक्-वाक्यार्थमुक्त्वा तुर्यपादार्थमाह * सर्वेष्विति। सर्वशब्दो न वर्ण-विशेषणम् अपि तु स्वतन्त्र इति सर्वे च वर्णाश्चेतीतरेतरद्वंद्व इति भावः। * क्रम इति। इदं क्रमपरमेव हीति स्पष्टमिति भावः।

४। उक्तक्रमं विभज्य विविच्य दर्शयति * तत्रेत्यादिना। *तत्र, पत्न्यादीनां मध्ये। * प्रथमं, तथोपादानात्। तदर्थमाह *विवाहसंस्कृतेति। धर्मविवाहपूर्वकश्रौतस्मार्त्तकर्मसहाधिकारव-तीत्यर्थः। तदेतत् ध्वनयन्नाह * पत्युर्नो यज्ञेति। *स्मरणात्, पाणिनिस्मृतेः। पतिशब्दस्य नकारादेशो भवति यज्ञसंयोगे गम्ये। दंपत्योः सहाधिकारेण यज्ञसाधनत्वात्तत्कर्तृकयज्ञफलभो-क्तृत्वाच्च तस्या यज्ञसंयोगः। यज्ञसंयोगे इत्यस्य यज्ञेन संबन्धे इत्यर्थः। स्त्रिया इति शेषः। संयोगपदं संबन्धोपलक्षणम्। संब-न्धश्च यज्ञफलप्रतियोगिकैश्वर्यवत्त्वम्। तथा च विलक्षणविवाहसं-स्कृतैव यज्ञसाधनं नान्येति सैव पत्नीत्युच्यतइति भावः। सव-र्णासु विधौ धर्म्ये इत्युक्त्या ज्येष्ठां विनाऽन्यासामनधिकारेऽपि त-या सहाधिकारात् तदभावेऽप्यधिकारात्तासामपि तत्संबन्धो बोध्यः।

५। एतेन "यद्यपि ज्येष्ठायामनिषिद्धायां सत्यामन्यासां ना-धिकारस्तथापि तदभावे दीर्घरोगग्रस्तायां तस्यां पतितायां वाऽ-न्यासां क्रमेणाधिकारोऽस्तीति यज्ञसाधनत्वयोग्यता ऽस्तीति यज्ञसंयोगे इत्यत्र यज्ञसाधनत्वयोग्यता विवक्षिता। यद्वा यज्ञसं-योगशब्देन विवाह एव। तत्रापि देवतोद्देशेन द्रव्यस्य दीयमानत्वा-त्तद्रूपत्वाच्च यागस्य। एवमपि विवाहितैव पत्नी नान्येति तदा स्त्रियं विना विवाहस्यैवाभावाद्यज्ञसाधनत्वं बोध्यम्" इति मदनोक्तम-पास्तम्। अन्यार्थ योग्यत्वविवक्षायामपि प्रकृते प्रोक्तरीत्या नि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्थाहे तद्विवक्षाया अनुपयोगात्, द्वितीयार्थस्य भाष्याद्यसंमतत्वात्, उक्तरीत्या पूर्वपक्षस्यैवासंगतेश्च ।

६। एतेन "पत्नी विवाहिता, पत्युर्नो यज्ञेति अत्र वदतो ग्रन्थेऽप्युपसंहारे उभयत्र तथैव वदतो विज्ञानेश्वरस्य द्वितीयमतमेवेष्टमिति शूद्राया अपि तस्यास्तत्त्वम्, अत एव कातीयादिकमवरुद्धस्त्रीविषयमिति तेन वक्ष्यते, अन्यथा तां विहाय तत्पर्यन्तधावनासंगतिः स्पष्टैव" इति परास्तम्। तथेष्टत्वे पत्नी धर्मविवाहोढेति प्राग्वद्विवाहितेत्येव सिद्धे पत्युर्नोयज्ञेत्युल्लेखस्य निर्बीजत्वापत्तेः, अर्थान्तरस्य महाभाष्यविरुद्धत्वाच्चेति दिक् ।

७। न्यूनत्वादिनिरासायाह *एकवचनमिति। अत एव पत्न्यः कार्या इत्यत्र बहुवचनम् उक्तम्। *यथांशमिति । सन्ति तदेत्यादिः । चतुस्त्रिद्व्येकभागाः स्युरित्युक्तिक्रमेण ब्राह्मणी क्षत्रिया वैश्या शूद्रीयुरित्यर्थः । तथा च तस्य तादृशस्य समग्रधनग्रहणं पत्न्या कार्यमिति सिद्धम् ।

अत एव व्यासः,

मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता ।
स्नाता प्रतिदिनं दद्यात्स्वभर्त्रे सलिलाञ्जलिम् ॥
कुर्यादनुदिनं भक्त्या देवतानां च पूजनम् ।
विष्णोराराधनं चैव कुर्यान्नित्यमुपोषिता ॥
दानानि विप्रमुख्येभ्यो दद्यात्पुण्यविवृद्धये ।
उपवासांश्च विविधान्कुर्याच्छास्त्रोदितान् शुभान् ॥
लोकान्तरस्थभर्त्तारमात्मानं च वरानने ।
तारयत्युभयं नारी नित्यं धर्मपरायणा ॥ इति ।

अनेन च पुत्रादिवत्सर्वोपकारकतया नरकादिनिस्तारकत्वेन च तदभावे ऽन्यतः पूर्वं पत्न्या एव तत्त्वम् अन्यथा दानाद्य-

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सम्भव इति बोधितम् । सवर्णाया अभावेऽसवर्णाऽपि पत्नी। तेन शूद्राव्यवच्छेदः। तस्याः परिणीतात्वेऽप्यपत्नीत्वात्।

अत एव विष्णुः, सवर्णाऽभावे त्वनन्तरया चापदि, न त्वेव द्विजः शूद्रयेति। धर्मकार्यं कुर्यादित्यनुवर्त्तते। आचाराध्याये मूले चोक्तमिदम् । अतस्तस्या जीवनोपयुक्तांशभागित्वं न कृत्स्नांशभागित्वमिति बोध्यम् ।

८। तत्र मानान्तरमप्याह *वृद्धेत्यादिना । *शयनम् इति। तच्छयनसाधनयोनिरक्षणं सम्यक्कुर्वतीत्यर्थः। अत एवाह *व्रते इति। ब्रह्मचर्ये इत्यर्थः। एवेनेतरव्यवच्छेदः। तथा चेदमपि तदंशे क्रमबोधकमेवेति भावः। * तत्, तस्मै भर्त्रे।* अंशं, धनम्। अपुत्रेत्युक्तेरिदमग्रिमं चापुत्रादिविषयमिति स्पष्टमेव।*बृहद्विष्णुरपीति। पत्न्यादीनां क्रमेण सामान्येन सर्वधनग्रहणं वक्तीति शेषः।स हि क्रमपर एव स्पष्टः मूलवत् । विष्णुरप्येवम्।*मातृगामीतीति।तदभावे भ्रातृगामि, तदभावे भ्रातृपुत्रगामि, तदभावे बन्धुगामि, तदभावे सकुल्यगामि, तदभावे सहाध्यायिगामि, तदभावे ब्राह्मणधनवर्जं राजा स्वामीति वाक्यशेषः। *कात्यायनेनापीति । तथोक्तं किंचिदंशे इति भावः। * पत्नीति। सेत्यादिः। *भर्त्तुरिति। अपुत्रस्येत्यादिः। मन्वादिस्मृत्यनुरोधात्। धनहरीत्यत्र विशिष्टस्य पचादिषु पाठादच्। स नदडित्यादिवद्दिदिति ङीप्। * अव्यभिचारिणीति। इदमप्रतिकूलाया अप्युपलक्षणम्। *दुहितेति। तत्सामान्यमित्यर्थः। यद्यनूढेत्यादेरर्थस्तु वक्ष्यमाण एव। उक्तवाक्यमपुत्रपरमिति सूचयन् तदीयमेव वाक्यान्तरमाह * तथेति। अथशब्दः प्रारम्भादाविति यावत्। कुलजात्वं च नात्र सवर्णात् जातात्वमात्रम् अपि तु सवर्णादानुलोम्येन च जातात्वे सति सत्कुलप्रसूतात्वम्। तेनाव्यभिचारिणी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साध्वी गृह्यते। अत एव पूर्वस्यैकवाक्यता। अत एव तदभावे इत्यस्य अर्द्धद्वयमध्यपठितस्य पूर्वत्राप्यन्वयः। मूलाग्रेकवाक्यतया चाग्रेऽपि प्रतिवाक्यं संबन्धः। आपिना दौहित्रसमुच्चयः। वाशब्द एवार्थः सर्वत्रान्वेति। पुत्राश्च प्रत्यासत्त्या भ्रातुरेव। चेन कन्यानामपि प्राग्वत् ग्रहणं बोध्यम्। भ्रातृपदं भगिनीनामप्युपलक्षणम्। पितामातेत्यंशे ऽनेन प्रागुक्तविष्णुना च तत्रान्यत्र च विरोधो यथा मूलस्य न, तथाऽग्रे स्फुटीभविष्यति। * बृहस्पतिरपीति। सर्वत आदौ पत्न्या धनग्रहणं वक्तीति शेषः। कुल्येष्विति पित्रादिविशेषणमिति काश्चित्। वस्तुतो भिन्नपितृभ्रातृसपिण्डान्यस्वकुलोत्पन्नदुहितृदौहित्रभ्रातृसुतादिपरम्। पितृपदेनैकशेषेण मातुरपि ग्रहणम्। एवं भ्रातृपदेन भगिनीनामपि ग्रहणं बोध्यम्। सपिण्डाः स्युः सनाभय इति कोशः। तेषु तेषु च विद्यमानेष्वपि अपुत्रस्य मृतस्य पत्न्येव तस्य भर्त्तुः, भज्यते इति भागो धनं सर्वं, तद्धारिणीत्यर्थः।

९। एवं स्वल्पस्मृत्यन्तरानुरोधेन मूलार्थं प्रतिपाद्य दृश्यमानान्यस्मृतिविरोधं परिहर्तुमादौ विरोधमाह * एतदिति। उक्तसर्वविरुद्धानीत्यर्थः। चस्त्वर्थे। * लक्ष्यन्ते, दृश्यन्ते। तान्येवाह * तद्यथेति। तान्येव क्रमेण प्रदर्शयामीत्यर्थः। तत्रादौ नारदमाह * भ्रातॄणामिति। निर्धारणे षष्ठी। अप्रजा इत्यत्र नित्यमसिजित्यसिच्। प्रजाशब्दः पुत्रादिमात्रपरः। * प्रेयात्, परलोकं गच्छेत्। * शेषास्ते, भ्रातर एव प्रत्यासत्तेः। चो भिन्नक्रमः। चेद्यदि स्त्रियः भर्तुः शय्यां प्राग्वत् स्वयोनिं रक्षन्ति तदा जीवनक्षयपर्यन्तमस्य स्त्रीणां भरणं पोषणं कुर्वीरंश्चेत्यर्थः। आच्छिन्द्युरिति। इतरासु व्यभिचारिणीषु स्त्रीषु विषये भरणमप्याच्छिन्द्युरपाकुर्युर्न दद्युरिति यावदित्यर्थः। एतच्चापोष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णमत्यन्तपरिदुष्टासु बोध्यम् । * च भरणमात्रमिति । भरणमात्रं चेत्यर्थः । मानवे एवकारस्य पूर्वत्राप्यन्वयः । वाशब्दः समविकल्पे इत्याह * पितुर्वा भ्रातुर्वेति । मन्वन्तरमेवाह * तथेति । *वृत्तायां, समाप्तायाम् । मृतायामिति यावत् । चः त्वर्थे व्युत्क्रमे च । शङ्कीये हिः त्वर्थे । व्युत्क्रमेणान्वयः । एवार्थो वाशब्दः सर्वत्रान्वयी । ज्येष्ठायाश्चेति चो व्युत्क्रमे । तेन सगोत्रशिष्यसब्रह्मचारिण इति वाक्यशेषसमुच्चयः । पैठीनसिरप्येवम् । तदभावे इत्यस्याग्रेऽपि संबन्ध इत्याशयेनाह * क्रमेण धनेति । * कात्यायनेनापीति । पितुर्भ्रातुर्मातुः पितामह्याश्च क्रमेण धनसंबन्धो दर्शित इति शेषः । क्रमादित्याद्युक्त्या तथा स्पष्टत्वादत्रेदं नोक्तम् । तच्चेत्थं, वाशब्द एवार्थः अथशब्द आनन्तर्यार्थः उत्तरार्द्धे सर्वत्रान्वेति । तेन तत्तदभावो लभ्यते । तदेत्र स्फुटीकृतं * क्रमादिति । तत्पितुर्माता वेत्यन्वयः । विभागं विना तदीयद्रव्यस्यैव प्रायोऽसंभवेन पितुस्तद्धनहारित्वासंभवादुक्तम्, * विभक्ते इति । भावे क्तः । विभागे जाते सतीत्यर्थः । यद्वा विभक्ते पितरि संस्थिते मृते सति इति । इतिः समाप्तौ ।

१०। एवं विरोधमुक्त्वा तमुपसंहरन्नन्यकृतं तत्परिहारं दूषयितुं तावदनुवदति * एवमादीनामित्यादिना । एवमादीनां कात्यायनादीनाम् । आदिनाऽनुपदं वक्ष्यमाणगौतमादेः ।

ततो दायमपुत्रस्य विभजेरन्सहोदराः ।
तुल्या दुहितरो वाऽपि ध्रियमाणः पिताऽपि वा ॥
सवर्णा भ्रातरो माता भार्या चेति यथाक्रमम् ।
तेषामभावे गृह्णीयुः कुल्यानां सह वासिनः ॥

इति देवलस्य च परिग्रहः । तुल्याः सवर्णदुहितरः । सवर्णा भ्रातरः सापत्नाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

११। * व्यवस्थेति। भ्रात्रंशे इति भावः।

* एतादिति। मूलवृद्धमनुविष्णुबृहस्पतिकात्यायनादिप्रोक्तवचनसमूह इत्यर्थः। * विभक्तेति। विभागस्योक्तत्वात्, विरुद्धकार्तीये विभक्ते इत्यस्योपादानाच्च।

तत्रापि विशेषान्तरमाह *सा चेति सा तु इत्यर्थः। तदा तत् तद्विषयमिति भावः। तदेव शङ्कानिरासेन द्रढयति * कुत इत्यादिना। नियोगार्थिन्या एव पत्न्याः धनग्रहणं न स्वतन्त्रायास्तदनपेक्षिण्यास्तस्या इत्येतत् कुतः कस्माद्धेतोरित्यर्थः। तं हेतुमाह * पितेत्यादिना कारणमस्तीतीत्यन्तेन। आदिना नारदीयस्यापि परिग्रहः। * वचनात्, वचनजातविरोधात्। * तत्र, उभयेषामप्रामाण्यप्रसङ्गे तन्निरासायेति शेषः। व्यवस्थाकारणमिति समाहारद्वन्द्वः। कारणं च प्रत्यासत्तेस्तस्या एव। ननु तत् अन्यदेवास्तु किमिति नियोगापेक्षित्वमेवेति नियमोऽत आह * नान्यदिति। तथा च विभक्तभ्रातृस्त्रीविषयमित्यनेन व्यवस्थोक्ता। सा चेत्यनेन नियोगार्थित्वं तत्कारणमुक्तमिति भावः। इतिहेतौ।

१२। न केवलं तथोक्तिमात्रेण तदर्थसाधनमपि तु वाचनिकोऽपि सो ऽर्थ इत्याह * गौतमेति। तमेवाह * पिण्डेति। तथाऽस्फुटत्वात् व्याचष्टे * अस्यार्थ इति। ऋषिः प्रवरः। सगोत्रत्वे सप्रवरत्वे च सति सपिण्डा इत्यर्थः। अनेन पित्रादेर्धनसंबन्धस्तावदुक्तः। पक्षान्तरमाह * स्त्रीवेति। बीजं वेति वाशब्दार्थमाह। * यदीति। निपातानामनेकार्थत्वात्।

१३। * मनुरपीति। सोऽपि इत्यनेनैतद्दर्शयतीत्यन्वयः। * बिभृयात्, रक्षेत्। स्त्रियमेव चेति पाठः। तद्धनं तस्य भ्रातुर्धनं तस्यैव पुत्राय दद्यादित्युक्त्येदं विभक्तभ्रातृविषयम्। अन्यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विभागाभावे तस्य पृथग्धनाभावात्तद्धनमित्यस्यासङ्गतिः स्पष्टैवेत्याशयेन एतत्पदार्थमाह *विभक्तेति । बहुव्रीहिः। पूर्वार्द्धोक्त एव उत्पाद्येत्यत्रान्वेतीत्याशयेनाह * द्वारेणैवेति ।

१४।एवं विभक्ताविषये उक्त्वाऽविभक्ताविषयेऽपि तथेति मनुमेवाह *तथा ऽविभक्तधनेऽपीति ।अनेनेत्यादि भ्रातरीत्यादिचपूर्वानुषङ्गेण वाक्यार्थः। अपिद्वयं मिथःसमुच्चये । समो विभागः स्यादित्युक्त्येदमविभक्ताविषयम् । विभक्ते विभागाभावात् । प्रतिषेधन्निति हेतुगर्भं वसिष्ठस्य विशेषणम् । लोभादिति हेतौ पञ्चमी । नियोगे चान्वयः । नास्तीत्यस्य न कार्य इत्यर्थः ।

१५।एवं तद्विषयमुक्त्वा तद्दार्ढ्याय विरुद्धप्रागुक्तनारदविषयमाह *नियोगाभावेत्विति । एवेन कृत्स्नधनसंबन्धव्यवच्छेदः । तदेवाह *भरणमिति । *जीवनेति। जीवितेति पाठे भावे क्तः। एवं च प्रागुक्तमन्वादिकमप्येतद्विषयमेवेति बोध्यम् । मूलसंमतिमप्यत्राह *योगीति । तदेवाह । * अपुत्रा इति । वस्तुतोऽरुचौ किलशब्दोऽत्र । यथा, त्वं किल योत्स्यसे इति । अपुत्रा इति मूलस्यार्थान्तरस्य वक्ष्यमाणत्वादिति बोध्यम् ।

१६।*अनाधिकारात्, स्वातन्त्र्येण विध्यविषयत्वाद् गुणाद्यभावादेश्च ।*यज्ञार्थं, तत्सिद्ध्यर्थम्। *तत्र, यज्ञे । शास्त्रनिषिद्धत्वादपि तदनधिकृतत्वं बोध्यम् । *हि, यतः । तस्मात्तत् तथा स्थानेषु अनिषिद्धसगुणविधिविषयद्विजातिषु नियोजयेत् राजा । शास्त्रनिषिद्धाः शूद्रादयश्च विधर्मिणः।वस्तुतः केनापीत्युक्त्या ऽत्र अनादरो द्योतितः । अत एवात्र वचने मूलं न प्रदर्शितमिति बोध्यम् ।

१७। तदुक्तव्यवस्थां दूषयति *तदनुपपन्नमिति । ननु तत्र तद्बोधकशब्दाभावेऽपि प्राकरणिकः सोऽर्थोऽत आह * अप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तुतत्वाच्चेति । अप्रकृतत्वादित्यर्थः ।

१८। नन्वेवमप्यन्यथाऽनुपपत्त्या कल्पितः स इत्युक्तमेव। किं च । अपुत्रेण परक्षेत्रे इत्यत्र स उपात्त इति तत्त्वमेव । अत आह *अपि चेदमिति । नियोगः बीजधारणमूलभूतः ।

१९ । आद्यं खण्डयति *तत्रेति । तयोर्मध्ये इत्यर्थः । एवेन द्वितीयव्यवच्छेदः । अत एवाह *अनुत्पादितपुत्राया अपीति। अपिनेष्टसमुच्चयः। ननु नियोगस्यैव धनग्रहणे निमित्तत्वेऽनुत्पादितपुत्राया अपि धनग्रहणमस्तु को विरोधोऽत आह * उत्पन्नस्य च पुत्रस्येति । नियोगोत्पन्नपुत्रस्य धनग्रहणे निमित्तत्वाभावेन तस्य धनसम्बन्धाभावे "पित्रोरूर्ध्वं विभजतां" पिण्डदोंऽशहरश्चैषाम्" इति "स्वर्यातस्य ह्यपुत्रस्य" इति च यथाक्रमं द्वादशविधपुत्राणां विभागप्रकारकथनं पुत्राभावे एवेतरेषां धनग्रहणकथनं च विरुध्येतेति भावः ।

२०। द्वितीयपक्षं दूषयति *अथेति । सर्वं वाक्यमितिन्यायेनाह * तदपत्यस्यैवेति । एवं प्रागपि । एवेनाद्यव्यवच्छेदः। धनग्रहणे इति शेषः । * तथेति । तस्यैव तद्ग्रहणनिमित्तत्वे पुत्रस्यैव धनसम्बन्धनिमित्तत्वलाभात् पत्नी दुहितर इत्यत्र पत्नीत्यंशो न पाठ्यः। तस्या धनसम्बन्धनिमित्तत्वाभावात्, अस्य वचनस्य तत्प्रदर्शनार्थत्वाच्चेति भावः ।

२१ । यद्यपि पत्न्या धनग्रहणे नियोगो वा निमित्तं, तदुत्पन्नमपत्यं वा, उभयं वा, विशिष्टं वा । अन्त्येऽपि नियोगः प्रधानमपत्यं वा । वैशिष्ट्यं च जन्यजनकभावसम्बन्धेनेति पञ्चपक्षीसंभव इति पक्षद्वयमात्रोपन्यासो न्यूनस्तथापि पक्षद्वयोक्तदूषणैरेवान्येषामपि सुपरिहरत्वेन पृथगनुक्तिः । तथा हि । यदा वैशिष्ट्ये नियोगः प्रधानं तदा ऽपत्यं गौणमिति निमित्तमप्यनिमि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(७) न्यायरत्नमाला-श्रीपार्थसारथिमिश्र वि० सं० (मीमांसा २

(८) ब्रह्मसूत्रभाष्यम्-बादरायणप्रणीत-वेदान्तसूत्रस्य यतीन्द्र श्रीमद्विज्ञान-भिक्षुकृत व्याख्यानम् । सम्पूर्णम् । (वेदान्तः) ६

(९) स्याद्वादमञ्जरी-मल्लिषेणनिर्मिता सम्पूर्णा । (जैनदर्शनम्) २

(१०) सिद्धित्रयम्-विशिष्टाद्वैत-ब्रह्मनिरूपण-परम्-श्रीभाष्यकृतां परमगुरुभिः श्री ६ श्रीयामुनमुनिभिर्विरचितम् । सम्पूर्णम् (वेदान्तः) १

(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टारकाचार्यसंगृहीतः । आचार्यचित्सुखमुनिविरचितव्याख्योपेतः (वेदान्तः) ४

(१२) विभक्त्यर्थनिर्णयःन्यायानुसारिप्रथमादि-सप्तविभक्तिविस्तृतविचाररूपः म० म० श्रीगिरिधरोपाध्यायरचितः । सम्पूर्णः (न्यायः) ५

(१३) विधिरसायनम् । श्रीअप्पयदीक्षितकृतम् । सं० (मीमांसा) २

(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्ट-सोमेश्वरविरचिता । (मीमांसा) १६

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता । (वेदान्तः) २

(१६) मीमांसाबालप्रकाशः (जैमिनीयद्वादशाऽध्यायार्थसंग्रहः) श्रीभट्टनारायणात्मज-भट्टशङ्करविरचितः । (मीमांसा) २

(१७) प्रकरणपञ्चिका (प्रभाकरमतानुसारि-मीमांसादर्शनम्) महामहोपाध्यायश्रीशालिकनाथमिश्रविरचितं, श्रीशङ्करभट्टकृतो मीमांसा-सारसंग्रहश्च सम्पूर्णः (मीमांसा) ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीसदानन्दव्यासप्रणीत-स्तत्कृतव्याख्यासमलङ्कृतश्च । (वेदान्त) ३

(१९) कात्यायनश्रौतसूत्रम् । महामहोपाध्यायश्रीकर्काचार्यविरचितभाष्यसहितम् । १३

(२०) ब्रह्मसूत्रभाष्यम् । श्रीभास्कराचार्यविरचितम् (वेदान्तः) १

(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम् । आनन्दपूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया (विद्यासागरी) ति प्रसिद्धया समेतम् । (वेदान्तः) १३

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता । १

(२३) श्रीलक्ष्मीसहस्रम्-बालबोधिनीव्याख्ययाऽवतरणिकया च सहितम् । ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२४ ब्रह्मसूत्रवृत्तिः मरीचिका श्रीव्रजनाथभट्टकृता (वेदान्त)

२५ क्रोडपत्रसंग्रहः। अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्याः प्रत्यक्षानुमानमाथुर्या व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि : (न्यायः) ९

२६ ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम्। श्रीसुन्दरभट्टरचितसिद्धान्तसेतुकाऽभिधटीकासहितश्रीदेवाचार्यप्रणीतसिद्धान्तजाह्नवीयुतम् २

२७ षड्दर्शनसमुच्चयः। बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शन संक्षेपः। मणिभद्रकृतटीकया सहितः। हरिभद्रसूरिकृतः। २

२८ शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः। प्रमेयरत्नार्णवश्च १

२९ अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्याजागदीशी टीका। १

३० वीरमित्रोदयः। महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा सस्कारप्रकाशात्मकः। १३ १०

३१ वीरमित्रोदयः। महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः ५

३२ स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरत्रिपाठिसंकालितः। ४

३३ वेदान्तरत्नमञ्जूषा। श्रीभगवत्पुरुषोत्तमाचार्यकृता। २

३४ प्रस्थानरत्नाकरः। गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितः २

३५ वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम्। १

३६ योगदर्शनम्। परमहंसपरिव्राजकाचार्य-नारायणतीर्थविरचित-योगसिद्धान्तचन्द्रिका-समाख्यया संवलितम्। २

३७ वेदान्तदर्शनम्। परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वती स्वामिकृत ब्रह्माऽमृतवर्षिणी समाख्य व्याख्यासंवलितम्। ४

३८ विश्वप्रकाशः। कोशः। विद्वद्वर श्रीमहेश्वरसुरिविरचितः। २

३९ श्रीसुबोधिनी। श्रीवलभाचार्यविनिर्मिता। श्रीमद्भागवतव्याख्या गोस्वामीश्रीविठ्ठलनाथदीचितविरचित टिप्पणीसहिता।

४० वीरमित्रोदयः। महामहोपाध्यायश्रीमित्रमिश्रविरचितः पुजाप्रकाशः

४१ वेदान्तसिद्धान्तसंग्रहः। श्रुतिसिद्धान्तापरनामकः। श्रीब्रह्मचारिवनम
द्वैतदर्शनानुगतः।

४२ स्वानुभवादर्शः। श्रीमत्परमहंसपरिव्राजकाचार्य नारायणाश्रम
स्वकृतटीकाविभूषितश्च।

४३ याज्ञवल्क्यस्मृतिः। बालम्भट्टीसमाख्य वाख्यासमलङ्कृतमिताक्षर

पत्रादिप्रेषणस्थानम् } हरिदास
चौखम्बा, ब

धर्मशास्त्र

११०४२.

TRIBHUVAN UNIVERSITY ... KATHMANDU

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

November *1912.*

THE

CHOWKHAMBÂ SANSKRIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 179. धर्मशास्त्र १५३

Registered According to Act XXV of 1867.

व्यवहार- बालंभट्टी

इति प्रसिद्धया लक्ष्मीनामिकया

पायगुण्डे इत्युपनामकेन बालंभट्टेन स्वपत्न्याः लक्ष्मीदेव्याः स्मारकत्वेन तन्नाम्ना रचितया बृहत्या टीकया सहिता

मिताक्षरा

श्रीयुतगोविन्ददासमहाशयप्रदर्शितरीत्या

पर्वतीयनित्यानन्दपन्तेन परिष्कृत्य संशोधिता ।

VYAVAHÂRA-BÂLAMBHATTI

THE EXTENSIVE COMMENTARY ON THE MITÂKSHARÂ

WITH THE ORIGINAL

BY

Bâlambhatta Páyagunde

EDITED BY

Pandit Nityanand Pant Parvatiya

Under the supervision of Shri Govinda Das.

FASCICULUS VII

LISHED AND SOLD BY THE SECRETARY

CHOWKHAMBÂ SANSKRIT BOOK-DEPOT.

BENARES.

AGENTS:- OTTO HARRASSOWITZ LEIPZIG:

PANDITA JYESHTHÂRAMA MUKUNDAJI BOMBAY:

PROBSTHAIN & CO., BOOKSELLERS, LONDON

Printed by Jai Krishna Dasa Gupta,

AT THE VIDYÂ VILÂSA PRESS

BENARES.

Price Rupee one.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ श्रीः ॥

-*-

आनन्दवनाविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तबकः— १७९

१ अस्यां चौखम्बा-संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एकः स्तबको मुद्रयित्वा प्रकाश्यते। एकस्मिन् स्तबके एक एव ग्रन्थो मुद्र्यते ।

२ प्राचीना दुर्लभाश्चामुद्रिता मीमांसावेदान्तादिदर्शनव्याकरण धर्मशास्त्रसाहित्यपुराणादिग्रन्था एवात्र सुपरिष्कृत्य मुद्र्यन्ते ।

३ काशिकराजकीयप्रधानसंस्कृतपाठशालाऽध्यापकाः पण्डिता अन्ये च शास्त्रदृष्यो विद्वांस एतत्परिशोधनादिकार्यकारिणो भवन्ति।

४ भारतवर्षीयैः, ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्च एतद्ग्राहकैर्देयं वार्षिकमाग्रिमं मूल्यम्-मुद्राः ७ आणकाः ८

५ अन्यैर्देयं प्रतिस्तबकम् ,, ,, १ ,, ०

६ प्रापणव्ययः पृथग् नास्ति ।

७ साम्प्रतं मुद्र्यमाणा ग्रन्थाः- मुद्रिताः स्तबकाः

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता (संस्कारः) २

(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः (व्याकरणम्) १०

(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृत-न्यायरत्नाकराख्यया व्याख्यया सहितम् । सम्पूर्णम् । १०

(४) भाष्योपबृहितं तत्त्वत्रयम् । विशिष्टाद्वैतदर्शनप्रकरणम् । श्रीमल्लोकाचार्य्यप्रणीतम् । श्रीनारायण तीर्थ विरचित भाट्टभाषा प्रकाशसहितम् । सं० (वेदान्त) २

(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः सम्पूर्णः (ज्योतिषः) १

(६) भाट्टचिन्तामणिः । महामहोपाध्याय-श्रीगागाभट्ट विरचितः । तर्कपादः (मीमांसा) २

११०४३.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्तामिव परतन्त्रत्वात् । तथा चानुत्पादितेत्याद्यपक्षोक्ताद्यदूषणं तदवस्थमेव। अथापत्यं प्रधानं तदोक्तरीत्या द्वितीयपक्षोक्तदोषस्तदवस्थ एव। उभयोः समप्राधान्ये नियोगवत्याः पत्न्याः पुत्रस्य च धनसम्बन्धात् केवलं पत्नी दुहितर इत्यनेन पत्न्या धनसम्बन्धोक्तिरयुक्ता। अथ तत्रापि नियोगोत्पन्नः पुत्रः प्रधानमित्युच्यते तथापि द्वितीयपक्षोक्तदोष एव। पुत्रस्यैव धनसम्बधादिति सर्वथोक्तदोषतो न मुक्तिरिति।

२२। तत्र द्वितीयपक्षोक्तदोषोद्धारेण तं समर्थयन् शङ्कते *अथ स्त्रीणामिति। अयं भावः। स्त्रीणां सामान्येन भर्तृद्वारा पुत्रद्वारा वा धनसम्बन्धो न साक्षात्। न स्त्री स्वातन्त्र्यमर्हतीति वचनात्। तथा च भर्तृपुत्ररहितायास्तदभावप्राप्तौ भर्त्रभावे नियोगेनैव पुत्रसिद्धेस्तस्यास्तद्द्वारा धनसम्बन्धबोधकं पत्नीति अस्मदुक्तव्यवस्थायामवश्याश्रयणीयायामेतदारम्भः सार्थक इति नोक्तदोष इति।

२३। मनुमाह * अध्यग्नीति। अध्यग्नि विवाहे ऽग्निसमीपे लब्धम्। अध्यावहनिकं, द्विरागमने शिविकाद्यावहनकाले यल्लब्धम्।

तथा च कात्यायनः,

यत्पुनर्लभते नारी नीयमाना पितुर्गृहात्।
अध्यावहानिकं नाम स्त्रीधनं तदुदाहृतम्॥ इति।

इदं सर्वमग्रे स्फुटीभविष्यति। भ्रातृमातृपित्रित्यत्र मध्यमपदलोपिसमासद्वयम्। आदिपदग्राह्यमपि अग्रे एव व्यक्तम्।*विरोधादिति। तदुभयद्वारं विनापि उत्तरार्द्धेन अन्यथा तत्सम्बन्धस्य तेन प्रतिपादनादित्यर्थः।

२४। उक्तदोषोऽपि तदवस्थ एवेत्याह *किं चेति। * स-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेति। मुख्यगौणेत्यर्थः । * तत्र, आरब्धे पत्नीति वाक्ये। *नियुक्ताया इति।पुत्रद्वारेति भावः। स च पुत्रः क्षेत्रज एवेत्याह *क्षेत्रजस्यैवेति । *स च, आरब्धपत्नीतिप्रातिपाद्यार्थः।*प्रागेव, औरसो धर्मपत्नीज इत्यत्रैव । * अपुत्रेति। अपुत्रसम्बन्धिधनग्राहिप्रकरणे इत्यर्थः । पौनरुक्त्यापत्तेरिति भावः।

२५।द्वितीयहेतुनिरासायोक्तार्थस्योक्तं वाचनिकत्वं दोषसुकरतायै तद्वचनगत्यन्तराय च अनुवदति * अथ पिण्डेति। न ही त्यस्य प्रतीयते इत्यत्रान्वयः। * हि, यतः। स्त्रीधनमित्यत्र स्त्रीति पदं भिन्नं कर्त्री च सा। अनपत्यस्य धनं स्त्री गृह्णीयादित्यर्थः।

२६। एतेन स्त्री चेति पाठं धृत्वा "द्विजातीनां केवलशूद्राभार्याविषयमिदं, तस्य धनं सपिण्डाद्याः प्रत्यासत्तिक्रमेण भजेरन् स्त्री च, सपिण्डादितस्तस्याः पृथगुक्तेरर्द्धं ते ऽर्धं स्त्रीति तदर्थः। स्त्रीग्रहणादिदं शूद्रापरमेवान्यासां पत्नीत्वात्" इति भ्रान्तोक्तमपास्तम् । मूलाशुद्धेः, उपक्रमविरोधात्, तस्याधिकारिप्रदर्शनमात्रपरत्वाच्च ।

२७। *धर्मान्तरोपदेश इति।प्रतीयते इत्यस्यानुषङ्गः।हेतौ हेतुमाह *वाशब्देति । निपातानामनेकार्थत्वमपि लिङ्गानुशासनानुरोधेनेति भावः । अयं भावः।ते धनभाजः स्त्री वा तथेत्युक्त्वा तस्या गतभर्तृकाया अन्यधर्मद्वयोपदेशं चिकीर्षुरेकं धर्ममुक्तवान्, सा स्त्री बीजं वा लिप्सेतेति । नियोगधर्मेण पुत्रमपेक्षेतेत्यर्थः । अत्र वाशब्दो न यद्यर्थः । मानाभावात् । किं तु विकल्पार्थः। स च पक्षान्तरापेक्षया । तदेव द्वितीयो धर्मः । स च वचने साक्षादश्रुतोऽपि वाशब्दबलात्स्मृत्यन्तरानुरोधाच्च नियोगेन पुत्राभिलाषरूपोपात्तपक्षप्रतियोगी संयतत्वरूपो धर्म इति ज्ञायते। तथा च नियोगात् पुत्रमपेक्षेत वा, संयता वा भवेदिति धनभजनम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्थतोऽन्यधर्मद्वयोपदेश इति।

२८। एवं तदीयहेतुद्वयं संखण्ड्य दोषान्तरमाह * अपिचेति। तदयोग्यतासूचकं विशेषणं * स्मृतीति। तत्र हेतुमाह * अपुत्रेति। यत इति शेषः। तत्पिण्डमित्यतोऽनुषज्यमानेन तच्छब्देन भर्तृपरामर्शात् भर्तुः कृत्स्नमंशं पत्नी लभते न तु स्वांशं कृत्स्नमित्यर्थः। * कृत्स्नं, स्थावरं जङ्गमं च।

अत एव बृहस्पतिः,

जङ्गमं स्थावरं हेम कुप्यं धान्यं रसाम्बरम्।
आदाय दापयेच्छ्राद्धं मासषाण्मासिकादिकम्॥
पितृव्यगुरुदौहित्रान् भर्तुः स्वस्रीयमातुलान्।
पूजयेत्कव्यपूर्ताभ्यां वृद्धांश्चाप्यतिथीन् स्त्रियः॥
सपिण्डा बान्धवा ये तु तस्याः स्युः परिपन्थिनः।
हिंस्युर्धनानि तान् राजा चौरदण्डेन घातयेत्॥ इति।

क्वचित् स्थावरेऽपवादमाह स एव,

यद् विभक्ते धनं किं चिदाध्यादिविधिसम्भवम्।
तज् जाया स्थावरं मुक्त्वा लभते गतभर्तृका॥ इति।

एवं च तत्स्थावरं विभक्तस्यापि भ्रातुरेव न पत्न्याः। इदमपि वचनं वक्ष्यमाणसिद्धान्ताद्यंशसाधकं बोध्यम्। एतेन "इदमविभक्तस्थावराविषयं, वृत्तहीनपत्नीविषयं वा, दुहितृरहितपत्नीविषयं वा, दायादानुमतिं विना स्थावरदानविक्रयादिनिषेधपरं वा" इति परास्तम्। आद्यान्त्ययोर्वचनविरोधात्। मानाभावस्यान्ययोः सत्त्वात्।

मृते भर्तरि भर्त्रंशं लभते कुलपालिका।
यावज्जीवं न हि स्वाम्यं दानाधमनविक्रये॥

इति कातीयं तु नियुक्तान्यविषयकमिति बोध्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२९। "धनं य" इति "कनीयान्" इति च पूर्वोक्तमनुद्वयस्य तात्पर्यान्तरं स्फुटमेव, न भवदुक्तं, मन्वन्तरविरोधादिति ध्वनयन्, तस्याः स्मृतिनिन्दितत्वं प्रतिपादयन्, तत्र दोषान्तरं तदुक्तमेवाह *तथेति। नियोगो निन्दितश्चेत्यर्थः। आदिपदग्राह्यव्याख्यानं च पूर्वं स्फुटम्। तयोस्तात्पर्यं त्वित्थम्। तत्र विभक्तधनस्य भ्रातुरभावे विधिरुक्तो "धनं य" इति। तत्र पूर्वतो विशेष उक्तः "सोऽपत्यम्" इति। नियोगधर्मेणेति भावः। तस्यैवेति सम्बन्धसामान्ये षष्ठी। तदीयमाता एवकारव्यवच्छेद्या। अनेन च पुत्रसत्त्वे स्त्रीणां भरणार्हता न तु पतिधनसम्बन्ध इति सूचितम्। एवं कनीयानित्यपि अविभक्तस्य श्रेष्ठस्य नियोगधर्मेण पितृवत्सोद्धारेंऽशे प्राप्ते तन्निवृत्त्यर्थं, समो विभागः स्यान्नोद्धारं न वाऽधिकं हरेज्ज्येष्ठः नापि यत्किंचिदेव देयम् अपि तु उत्पादकेन पितृव्येण कनीयसा समः स्यादिति।

३०। इत्थं हि गूढाकूतम्। मनुनैव नियोगस्य निन्दितत्वाचत्परिहारः सुकर इति व्याख्यातृबुद्धिपरीक्षार्थं स्वाभिमतार्थं तस्यार्थं क्रमप्राप्तमदर्शयित्वैव वचनान्तराणि स्वेष्टार्थपरत्वेन दर्शितानि। परिहारस्त्वेवम्—

अन्यस्मिन् हि नियुञ्जाना धर्मं हन्युः सनातनम्।

इत्यादिना विधवायां नियोगस्य निन्दितत्वादवश्यं नियोगेन विभक्तधनभ्रातृजायायां पुत्रमुत्पाद्य तद्धनं तस्यैव देयमिति न नियम्यते तेन वाक्येन, अपि तु न स्त्री स्वातन्त्र्यमर्हतीति मनुना स्त्रीणामेकाकितया ऽवस्थानं निषिद्धमिति देवरगृहे स्थितौ कृतायां स्त्रीणामप्रगल्भत्वेन तद्धनरक्षणे च देवरेण क्रियमाणे सन्ततिलोभात् सा स्त्री शास्त्रसिद्धत्वाद्गर्हितमपि नि-

१ धनंय इत्यस्य कनीयानित्यस्य चेत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योगं यद्यनुमन्यते तदा ऽपत्ये उत्पन्ने देवरेण धनलोभो न का-र्यस्तस्यैव तद्धनं दद्यात्, नापि तन्मात्रे।अत एव बिभृयादिति धारणपोषणवाचिनो भृञ उक्तिरिति।

३१। तेन तदग्रे तद्वत् साधकत्वेनोक्तवसिष्ठतात्पर्यमाह *यत्त्विति।*तत् अविभक्ते इति। पक्षद्वयमिदम्। *तस्याः,तत्पत्न्याः। * नास्ति, उक्तयुक्तेः। इतिर्हेतौ। स च सम्बन्धेऽन्वेति। स्वस्य तदभावेऽपि स्वापत्यस्य स भवत्विति लोभान्नियोगो नापेक्षणीय इति भावः।

३२। अग्रिमयुक्तिं खण्डयति *तदपीति। *प्रस्तुतत्वात्, तानुपक्रम्य भ्रातॄणामित्यादेरुक्तत्वात्। तथा चोपक्रमानुरोधेन तादृशस्य भ्रातुर्धनमितरे संसृष्टिनो भ्रातर एव गृह्णीयुरिति भावः। अत एवाह * तत्स्त्रीणामिति। मात्रपदेन कृत्स्नधनसम्बन्धव्यवच्छेदः।

३३। उक्ताशयेनैव शङ्कते * न चेति। * पौनरुक्त्यमिति। उभयोरेकार्थबोधकत्वात्। * यत इति। पूर्वं संग्रहेण कथितमग्रे विवृण्वता तेन वाक्यद्वयेन स्त्रीधनमविभाज्यमिति तासां भरणमात्रं कार्यमिति चार्थद्वयं विधीयते, न केवलं पूर्वोक्तमेव कथ्यते। येन पौनरुक्त्यं स्यात्। तत्र भ्रातॄणामित्यादिना विवरणं, स्त्रीधनं विनेति तस्याविभाज्यत्वविधिः, उत्तरेणेतरविधिरिति भावः। एतेन "सवर्णाऽभावे त्वनन्तरया चापदि न त्वेव द्विजः शूद्रया" इति विष्णूक्तेः परिणीतात्वे ऽप्यपत्नीत्वात्तद्विषयं नारदवचनम्, अत एव तत्र पत्नीशब्दस्तत्र स्त्रीशब्द इति प्राच्योक्तमपास्तम्। उक्तरीत्योपपत्तेः।

३४। किलेति सूचितं योगीश्वरोक्तेर्वक्ष्यमाणं स्वेष्टार्थमाह *यदपीति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३५। चरमदोषं खण्डयति *यत्त्विति। *जातस्य, तत्समूहस्य। ननु यज्ञशब्दो धर्ममात्रोपलक्षको न यज्ञवाचक इति दानहोमादिसिद्ध्या हेत्वसिद्धिरिति शङ्कते * अथेति । देवतोद्देशेन द्रव्यत्यागो वैधे आधारे सवषट्कारो यागः। स एवावषट्कारो होमः। स्वत्वनिवृत्तिपूर्वकपरस्वत्वापादनं दानमिति यागहोमदानानां भेदः । * एवं तर्हि, धर्ममात्रे एव धनस्योपयोगे सति। धनसाधनकः कृषिवाणिज्यादिलभ्योऽर्थः। तादृशः स्रक्चन्दनादिविषयः कामः। इष्टापत्तावाह * तथा सतीति। मूलोक्तिमाह * धर्ममिति। गौतमोक्तिमाह *तथा न पूर्वाह्णेति। धर्मार्थकामेभ्यो यथाशक्ति पूर्वाह्णमध्यन्दिनापराह्णानफलान्न कुर्यादित्यर्थः। मनूक्तिमाह * न तथैतानीति।

इन्द्रियाणां विचरतां विषयेष्वपहारिषु।
संयमे यत्नमातिष्ठेत्। (मनु. अ. २। ८८)

इतीन्द्रियसंयमं प्रक्रम्य—

प्रापणात्सर्वकामानां परित्यागो विशिष्यते। (अ.२।९५)
न तथैतानि शक्यन्ते सन्नियन्तुमसेवया। (अ. २।९६)

इत्युक्तं मनुना। अस्यार्थः। तेषां तद्विषयके संयमे सर्वभोगाणां प्रापणादुपभोगात् तद्धेतुकपरित्यागो विशिष्यते। समीचीन उत्तम इति यावत्। यतः एतानि विषयासक्त्या दोषजनकानीन्द्रियाणि असेवया स्रगादिविषयानुपभोगेन तथा संनियन्तुं सम्यक् नियन्तुं न शक्यन्ते यथा विषयोपभोगेन। विषयोपभोगेन यथा तद्गतदोषविज्ञानं तथा विषयानुपभोगेन नेति अनिषिद्धविषयोपभोगस्य वैराग्योत्पादकत्वेन कर्त्तव्यत्वादर्थकामाववश्यं साधनीयावित्येतत्प्रतिपादकवचनजातविरोध इति भावः।

३६। दोषान्तरमाह *अपि चेति। *भार्यमितीति। विहित-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्येति शेषः। * क्रत्वर्थता, पूर्वपक्ष्युक्तेत्यादिः। * उक्तं, सिद्धान्तिना। * तत्प्रत्युद्धृतं, विघटितं विपरीतोक्तमिति यावत्।

अयं भावः। तृतीयाध्यायचतुर्थपादैकादशाधिकरणम्। * अप्रकरणे तु तद्धर्मस्ततो विशेषात्। "पू. मी. अधि. ३। ४। ११" अनारभ्य श्रूयते, तस्मात् सुवर्णं हिरण्यं भार्यं दुर्वर्णोऽस्य भ्रातृव्यो भवतीति। तत्र संशयः—किमिदं हिरण्यधारणं क्रत्वङ्गतया विधीयते, उत क्रतुगतहिरण्यानुवादेन धारणसंस्कारो विधीयते, उत हिरण्यं हस्ते भवतीति विहितं यद्धारणं तदनुवादेन सुवर्णता शोभनवर्णतारूपो गुणो विधीयते यद्धिरण्यं भार्यं तत्सुवर्णमिति, उत हिरण्यधारणं पुरुषार्थतया विधीयते इति।

३७ पूर्वपक्षस्तु—हिरण्यविशिष्टं धारणं यद्यपि विधीयते तथापि तस्य फलापेक्षायामस्य धारणस्य वेदवाक्यविहितत्वेन वैदिकत्वाक्रियारूपत्वाच्च वैदिकदर्शपूर्णमासादिसाम्यात् फलवद्वैदिकं कर्म बुद्धिस्थं भवति। ततश्च तत्रैव वैदिके कर्मणि प्रयाजादिवदारादुपकारं कुर्वत् क्रत्वङ्गं धारणं भविष्यति। एतावतैव फलाकाङ्क्षानिवृत्तेः स्वर्गादिफलकल्पना न युक्तेत्येकः।

हिरण्यं भार्यमित्यत्र कृत्यप्रत्ययेन धारणविधानात् तत्कर्मणो हिरण्यस्य कृत्यश्रुत्या प्राधान्यप्रतीतेर्धारणं संस्कारो व्रीहीन् प्रोक्षतीत्यत्र प्रोक्षणमिव। भूतभाव्युपयोगं हि द्रव्यं संस्कारमर्हतीति न्यायेनोपयुक्तस्योपयोक्ष्यमाणस्य वा संस्कारः कार्यः। उपयोगश्च प्रयोजनवत एव, निष्फलस्य लौकिकसुवर्णस्य धारणसंस्कारायोगात् क्रतुगतहिरण्यानुवादेन धारणसंस्कारविधानमिति प्रयाजादिवन्नारादुपकारकमङ्गम् अपि तु प्रोक्षणादिवत्संस्कारकर्मेत्यपरः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रतुगतं हिरण्यं तद्धारणं चानूद्य लाघवात्सुवर्णमिति शोभनवर्णता विधीयते इत्यन्यः।

३८। एवं त्रेधाऽपि तावत् क्रत्वर्थमिति प्राप्ते उच्यते। यदुक्तं वैदिकत्वाक्रियात्वसाम्यात्क्रतुरुपातिष्ठते फलाकाङ्क्षायामिति। नैष नियमो घटते। यतः स्वर्गाद्युत्पत्तेरपि क्रियात्वात् दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादिषु स्वर्गादेः कर्तृसम्बन्धितयोक्तेर्वैदिकत्वाच्च स्वर्गाद्युत्पत्तिं क्रतुं चोभयमुपस्थापयति वैदिकत्वं क्रियात्वं चेति हेतुद्वयं, न नियमतः क्रतुमेव, येन विशिष्टविधिपक्षेऽपि क्रत्वर्थता स्यात्। लोकेऽपि हिरण्यसत्त्वान्न क्रतुगतहिरण्यप्रतीतिः। न हि धारणं धार्यमाणसंस्कारः। अदृष्टार्थत्वेनापि धारणोपपत्तेः। कृत्यप्रत्ययश्च कर्मत्वं साध्यतामात्रं वाऽऽह न प्राधान्यम्। अनीप्सितकर्मणोऽपि विद्यमानत्वात्। अत एव धारणानुवादेन न सुवर्णतारूपगुणविधिः। क्रतुधारणाप्रतीतेः लोकेऽपि धारणसंभवात्। अतो न सर्वथा क्रत्वर्थं सुवर्णधारणम्। विधिवशाच्चावश्यं फलेन भवितव्यम्। तच्च फलमर्थवादाभावे विश्वजिन्न्यायेन स्वर्गः, तत्सत्त्वे तु रात्रिसत्रन्यायेन तद्गतमेव। अत्र तु दुर्वर्णोऽस्य भ्रातृव्यो भवतीति श्रवणात् भ्रातृव्यस्य दुर्वर्णत्वमात्मनश्च शोभनरूपतैव फलमिति पुरुषार्थमेव हिरण्यधारणमिति सिद्धान्त इति।

३९। दोषान्तरमाह * किं च यज्ञेति। * पूर्तं तडागारामादि।

पूर्वोक्तमनुतात्पर्यशरीरघटकत्वेनोपस्थितमन्वन्तरविरोधमपि परिहरति * यत्तु पारतन्त्र्येति। (मनु. अ. ९। ३)

पिता रक्षति कौमारे भर्ता रक्षति यौवने।
रक्षन्ति स्थाविरे पुत्रा इति वाक्यादिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आदिना कालेऽदाता पिता वाच्य इत्यादितदग्रिममनुग्रहणम् । * तदास्त्विवति । पारतन्त्र्यमेकाकीभूत्वा ऽनवस्थितिरिति तया स्वस्य पत्युर्धनग्रहेऽपि न विरोध इति भावः ।

४० । एवं चरमसाधकखण्डने तत्साधकत्वेनोक्तवचनानामन्याशयत्वं शङ्कापूर्वकमाह * कथं तर्हि इत्यादिना । सर्वं वाक्यमिति न्यायेनाह * यज्ञार्थमेवेति । यज्ञार्थमिति वचने द्रव्यं यज्ञार्थम् उत्पन्नमिति न विधिः, किं तु यागभिक्षयाऽवनिपतिगमनेन यज्ञार्थमेव तदुद्देशेनैव यत् द्रव्यमुत्पन्नं तत् द्रव्यं तेन यज्ञे एव नियोक्तव्यं, लोभादिना तेन तत्र विनियोगे ऽकृतेऽपि तत्पुत्रादिभिरपि धर्मकार्येष्वेव नियोक्तव्यमिति सर्वथा धर्मार्थमर्जितं द्रव्यं धर्मे एव नियोक्तव्यमिति विधीयते । अत एव धर्मे ऽनधिकृतैस्तत् द्रव्यं न ग्राह्यम् । धर्मकरणेऽधिकाराभावात् । अत एव च ते ग्रासाच्छादनमात्रभाजना इति तदर्थ इति भावः । अपिना ऽर्जकपरिग्रहः ।

४१ । अत्र मानं मनुमेवाह *यज्ञार्थमिति । यज्ञार्थं लब्धमिति मानवे अर्जकनामग्रहणं विना सामान्यत उक्त्याऽनारभ्याधीतनानृतंवदेदितिवत्पुरुषमात्रोद्देशेन तस्य प्रवृत्त्याऽर्जकस्य तत्पुत्रादीनां च धर्मार्थद्रव्यस्य धर्मकृत्येष्वविनियोगे दोष इति भावः ।

४२ । पूर्वप्रसङ्गोपस्थितकात्यायनविरोधमपि परिहरति *यदपीति । विरोधप्रकटतायै व्यत्यस्तपदोक्त्या ऽसम्बद्धत्वनिरासाय च तदर्थमाह * अदायिकमिति । दायिके मत्वर्थीयष्ठन् । ततो बहुव्रीहिः । दायग्राहकशून्यमित्यर्थः । तदाह * दायादेति । तत्पदोक्तेराह * यदिति । अनेन श्रोत्रियेभ्यस्तदर्पयेदिति पाठः सूचितः । वक्ष्यमाणात्तु श्रोत्रियायोपपादयेदिति पाठो लभ्यते । तत्र उपेत्यादेः प्रापयेदित्यर्थः । तदाऽत्रोभयमध्याहारलभ्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र च जातावेकवचनमिति बोध्यम् । वृत्तिपदार्थमाह * अशनेति । योषितो ऽत्रैव सम्बन्धो नाग्रेऽपीति भावः । द्वितीयार्धशेषार्थमस्यैवाह * अस्यापवादमिति । तदनुवृत्तेराह *योषिदिति। तथा च स्त्रीणामशनादिपर्याप्तधनसम्बन्ध एव न सकलधनसम्बन्ध इति तदभिमतमिति तद्विरोधोऽसम्बद्धतानिरासश्च स्पष्ट एवेति भावः।एवं तदर्थं व्याख्याय अथ तं परिहरति *एतदपीति। प्रक्रान्तमपीत्यर्थः । तत्र बीजमाह * योषिदिति ।

४३ । नारदान्तरविरोधमपि तथैव परिहरति *नारदेति। इति नारदवचनमप्यवरुद्धस्त्रीविषयमेवेत्यर्थः । तदेवाह * अन्यत्रेति । अन्यत्र ब्राह्मणादिति पूर्वान्वयि ।

तथा च पूर्वपद्यम्, (ना. व्यव. १३ । ५१)

अभावे दुहितॄणां वै सकुल्या बान्धवास्तथा ।
ततः सजात्याः सर्वेषामभावे राजगामि तत् ॥ इति।

तथा च सर्वेषामभावे ब्राह्मणात्तदीयधनादन्यत्र तद् धनं राजगामि, किं तु धर्मपरायणो राजा तत्रापि तत्स्त्रीणां जीवनं दद्यादित्याद्यर्थः । बृहस्पतिरप्येवम् । जीवनपदार्थश्च—

बृहस्पतिनैव तदग्रे उक्तः,
अन्नार्थं तन्दुलप्रस्थमपराह्णे तु सेन्धनम् ।
वसनं त्रिपणक्रीतं देयमेकं त्रिमासतः ॥
एतावदेव साध्वीनां चोदितं विधवाधनम् ।
वसनस्याशनस्यैव तथैव रजकस्य च ॥
धनं व्यपोह्य तच्छिष्टं दायादानां प्रकल्पयेत् । इति।

साध्वीनामित्युक्त्या ऽसाध्वीनां तदपि नेति सूचितम् । एतेनान्यत्र ब्राह्मणादिति बृहस्पतिः क्षत्रियादिपरिणीतशूद्राविषय इति भ्रान्तोक्तमपास्तम् । एवं च सामान्यतः परिणी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रशूद्राविषयकमपीदं द्वयम्। तस्या अप्यपत्नीत्वात्। तथाचावरुद्धग्रहणं पत्नीत्वाभाववदुपलक्षणम्। तथा च यत्र पत्नीत्वाभावः पुनर्भ्वादावपि तत्र सर्वत्र इदमेव। एतदभिप्रायक एव—

प्रजापतिरपि,

आढकं भर्तृहीनाया दद्यादाभरणं स्त्रियाः। इति।

* ऊढाया इति। श्रौतकर्मसु पाणिग्रहणपूर्वकसहाधिकारवत्या एवेत्यर्थः। नारदाद्येकवाक्यतयाऽऽह * संयताया इति। देवलवाक्ये यथाक्रममित्यस्य न स्वपाठक्रमेणेत्यर्थोऽपि तु मूलविष्ण्वाद्युक्तक्रमेणेत्यर्थ इति न तद्विरोधोऽपि। सोदरासोदरत्वकृतविशेषस्तु प्रागुक्तबृहस्पतिपराहत एव।

४४। एवं तदीयपक्षं संदूष्य स्वाभिमतमर्थमुपसंहरन्नेवाह *तस्मादिति। *पत्नीति। संयतेत्यादिः। कृत्स्नमित्यग्रे शेषः। ननूक्तस्यैवोपसंहारो युक्त इति अस्यार्थस्य पत्नीदुहितर इत्यत्रानुक्तत्वात्कथमयमुपसंहार इति चेन्न। सकलवाक्यानां सर्वत्र स्वेतरवाक्याविरोधेनैव प्रवृत्तेर्न्याय्यत्वात्तदुक्तवक्ष्यमाणानुसन्धानेनास्यार्थस्य लाभादुक्तोपसंहारात्। तदेतत् ध्वनयन् उक्तं स्मारयन् वक्ष्यमाणमाह *विभागस्येत्यादि। एतेन तस्याश्रुतत्वेऽपि प्रस्तुतत्वेनाप्रस्तुतत्वदोषनिरासः सूचितः। साक्षादपवादविषयपरिहारेणैवोत्सर्गप्रवृत्तेर्न्याय्यत्वात्। अन्यथाऽप्रामाण्याद्यापत्तेः।

४५। *एतेन, वक्ष्यमाणदोषेण। *अल्पेति। यद्यल्पं धनं तदा तस्य तत् प्रथमं पत्नी गृह्णीयादिति पत्नीतिमूलतात्पर्यमित्यर्थः। निरसनप्रकारमेवाह * तथाहीत्यादि। *जीवदिति। पत्यौ जीवति मृते चेत्यर्थः। * उक्तं, मूलकृता। तदेव क्रमेणाह * य-

१ अदायिकामिति कात्यायनबृहस्पतिभ्यामुक्तम् अन्यत्रब्राह्मणादिति नारदोक्तंचेत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दीत्यादि । * व्यामोहेति । यदा पुत्रे सति तत्र जीवति मृते च तत्समांशभाक्त्वं न भरणमात्रपर्याप्तभाक्त्वं तस्याः, तदा किमु वक्तव्यमपुत्रस्य तस्य धनं सा सर्वं प्राप्नोतीति, कैमुतिकन्यायेनैव तस्याः सकलधनभाक्त्वसिद्धेर्ग्रासाच्छादनातिरिक्तं न प्राप्नोतीत्युक्तिर्भ्रान्तैवेत्यर्थः ।

४६। किं चान्यपुत्रसत्त्वेंऽशग्रहणाधिकारिणा पुत्रान्तराभावे सकलरिक्थग्रहणाधिकारिणा पुत्रेण सह समांशभाक्त्वस्योक्तत्वात्पुत्राद्यभावे विभक्तादेस्तस्य सा सर्वं गृह्णातीति युक्तियुक्तमपि इदमिति तद् उपेक्ष्यमेवेति बोध्यम् ।

४७। समांशकादिशब्दोऽपि जीवनोपयुक्तधनोपलक्षक इति न विरोध इत्याशयेनाह * अथेति । अंशशब्दस्य कथंचित्सार्थक्येऽप्याह *समेति । भागतुल्यतयोरंशसमशब्दौ लोकप्रसिद्धौ। तयोर्निष्फलं स्वार्थत्यागो ऽनुचित इति आनर्थक्यमिति भावः।

४८। ननु तयोः शब्दयोः पक्षे स्वार्थपरत्वान्न सर्वात्मना ऽऽनर्थक्यमिति विशेषमाशङ्कते *स्यान्मतमिति । *बहु, विपुलम्। कर्मधारयः । खण्डयति * तच्च नेति । विधिवैषम्यमेवाह * तथाहीति । पत्यौ जीवति मृते वा पुत्रैः सह विभागकाले इति शेषः । * वाक्यान्तरमिति । भरणं चास्य कुर्वीरन्नित्यादीत्यर्थः। * प्रतिपादयतीति । विधत्ते इत्यर्थः। पत्न्यामिति भावः। *प्रतिपादयतीति इति । तथा च सकृदुच्चारितमेकमेव वचनं पक्षे सापेक्षं पक्षे निरपेक्षमित्येकरूपत्वाभावाद्विधिवैषम्यमिति भावः ।

४९। अत्रार्थे दृष्टान्ततया मानं दर्शयन् अस्य न्यायस्योपपादकमधिकरणं संगृह्य दर्शयति *यथा चातुर्मास्येष्वित्यादिना। सप्तमतृतीयपादाष्टमाधिकरणम्।*सौमिकं तु प्रणयनमंवाच्यं हीतरत्। अग्निषोमे सधर्मकमग्निप्रणयनं, दर्शपूर्णमासयोश्चाधर्मकं तत् । आग्नि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णयनं नाम गार्हपत्यादाहवनीयादिष्वग्निनयनम्। उत्तरवेदिश्च सोमे एव न दर्शपूर्णमासयोः।एवं प्रयोगस्थितिः । एवं स्थिते चातुर्मास्यस्थचतुष्कर्मसु वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयाख्येषु श्रूयते "द्वयोः प्रणयन्ति तस्मात् द्वाभ्यां यन्ति ऊरू वा एते यज्ञस्य यद्वरुणप्रघासश्च साकमेधश्च" इति ; तत्राद्यं द्वयोश्चातुर्मास्यपर्वणोः अग्निप्रणयनविधायकं, तस्मादित्यादिकं तदर्थवादवाक्यम् । तत्र संशयः । किं सौमिकप्रणयनवत्प्रणयनविधिरुत प्रणयनमात्रविधिरिति ।

५०।तत्र पूर्वपक्षः। आद्यपक्ष एव युक्तः। द्वितीये प्रकृतिवदित्यतिदेशत एव प्रकृतिभूतदर्शपूणमासतः प्रणयनमात्रस्य प्राप्त्या तद्विध्यानर्थक्यापत्तेः । न च चोदकप्राप्तप्रणयनस्यानुवादकमेव तदस्तु किमर्थं विधानमिति वाच्यम् ।प्रणयन्तीतिविधिप्रत्ययबलाद्विधेयत्वप्रतीतेः।किं च "न वैश्वदेवे उत्तरवेदिमुपकिरन्ति न शुनासीरीये" इति वाक्यद्वयेन तयोः पर्वणोरुत्तरवेदिप्रतिषेधः प्राप्तिसापेक्षो यतः स्वमते उपपद्यते । आद्यपक्षे हि सौमिकवदित्यतिदेशप्रतीत्या तत्रत्यसकलधर्मप्राप्तौ उत्तरवेदेरपि प्राप्तत्वात् । द्वितीये तु प्रकृतावेवोत्तरवेदेरभावात्तत्प्रणयनप्राप्तावपि उत्तरवेदिप्राप्त्यभावेन "न वैश्वदेवे" इत्यादिप्रतिषेधासङ्गतिः स्पष्टैव । तस्मात्स प्रतिषेधोऽपि सौमिकवत्प्रणयनविधाने हेतुरिति पूर्वपक्ष्याशयः। तदाह *द्वयोः प्रणयन्तीत्यादिना दर्शिते इत्यन्तेन। उपकिरतीति पाठान्तरम् ।

५१। नन्विदमयुक्तं, प्रकारान्तरेण निषेधसाफल्ये तथैव स्वीकारे दुराग्रहमात्रत्वात् । तथाहि । प्रतिषेधस्य प्राप्तिसापेक्षत्वेऽपि न त्वदुक्तरीत्या प्राप्तिः । तत्प्रकारं विनापि चातुर्मास्यप्रकरणपठितेनैव उपात्र वपन्तीत्यनेनोत्तरवेदेर्विधानात्तल्लब्धोत्तरवेदेरा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्यन्तपर्वणोर्निषेधकमुक्तवाक्यद्वयमिति तदुपपत्त्या सौमिकप्रणय-नातिदेशः पूर्वपक्ष्युक्तो न घटते इति चेत्, तदेवाह * राद्धान्तैके-त्याद्यभिहितइत्यन्तन । पूर्वपक्षिमतातिरस्कारकत्वातिसिद्धान्तित्वं, स्वोक्तेरप्ययुक्तत्वस्य तेनैव वक्ष्यमाणत्वादेकदेशित्वम् । * उपा-त्रेति । अत्र चातुर्मास्येषु उपवपन्ति वेदिम् उपाकिरन्तीत्यर्थः । * प्राकरणिकेनेति । चातुर्मास्यप्रकरणपठितेनेत्यर्थः ।

९२। नन्विदमप्ययुक्तं, विधिवैषम्यापत्तेः। तथाहि। उपात्रेति वाक्यं चातुर्मास्यपरमापूर्वशेषतयोत्तरवेदिं विदधत् पर्वचतुष्टयेऽप्य-विशेषेण तां विधत्ते । नवैश्वेत्यादिवाक्यद्वयं तु पर्वद्वये निषे-धकम् । तथा च तद्विधिनिषेधयोर्द्वयोरपि वाक्यप्रमितत्वेन वा-चनिकत्वाविशेषात् तुल्यत्वेन विकल्पः प्राप्नोति। स चेत्थम्, उ-पात्रेति वाक्यम् आद्यन्त्यपर्वणोर्यदा नवैश्वेत्यादिवाक्यद्वयमपेक्ष्य तेन प्राप्तस्य निषेधद्वयार्थस्यानुष्ठानाभावस्तदैव पक्षे तदपेक्ष्यो-त्तरवेदिं विधत्ते ऽन्यथा न, मध्यमपर्वणोस्तु निषेधवाक्यानपेक्ष-यैव नित्यवत् तां विधत्ते। तथा च द्वयोर्वाक्यान्तरानपेक्षतयोत्तर-वेदिविधिर्द्वयोर्वाक्यान्तरसापेक्षतया पक्षे विधिरिति सकृच्छ्रुत-वाक्यमेकत्र पक्षे प्राप्तमेकत्र नित्यवदिति एकरूपप्रवृत्त्यभावाद्वि-धिवैषम्यापत्तिः। तस्मादगत्या पूर्वपक्ष्युक्तमेव युक्तमिति चेत्, तदेव स आह *पुनःपूर्वेत्यादिना दर्शितामित्यन्तेन। सिद्धान्त्येकदेशि-मतानन्तरं मुख्यसिद्धान्त्युक्तिरुचितेति तद्भ्रान्तिनिराशाय पुनः पूर्वपक्षिणेत्युक्तम् । इतीति कर्तृ । * प्रतिषेधमिति । न वैश्वेत्या-दिवाक्यद्वयप्राप्तम् । * निरपेक्षमिति । प्रतिषेधेत्यादिः । नित्य-तावोधकपदाभावादाह * नित्यवदिति ।

---

१ उपात्र वपन्तीति इत्यत्रत्यम् इतिपदं प्रापयतीत्यस्य कर्तृ इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

९३। सिद्धान्तस्त्वित्थम्। विधिप्रत्ययश्रुतेः प्रणयनं तावद्विधेयमेव। तत्त्वादेव दार्शपौर्णमासिकप्रणयनादन्यदेतादिति गम्यते। न चैवं प्रणयनमात्रमेव, आतिदेशिकं न, किं त्वौपदेशिकमिति प्रवृत्तौ न कोऽपि विशेष इति वाच्यम्। तस्मादित्याद्यर्थवादस्य प्रणयनवाक्यैकवाक्यतया प्रामाण्योपपत्तिरित्यर्थवादबलेन मध्यमपर्वद्वये उत्तरवेदेरुपसंहारेणानुष्ठाने विशेषसत्त्वात्। तथा च द्वयोः प्रणयन्ति तस्मादित्यादेर्मध्यमपर्वद्वयघटितत्वेन तत्रैव प्रणयनविधिर्यत्र प्रणयनं तत्रैवोत्तरवेदिविधिरिति। उपात्रेत्युत्तरवेदिविधानमप्यर्थवादानुसारेण मध्यमपर्वणोरेव नाद्यन्तयोरिति तयोरुत्तरवेदिप्राप्त्यभावात् नवैश्वेत्यादिवाक्यद्वयमाद्यन्तयोः पर्वणोर्नित्यानुवादकम्। नान्तरिक्षे न दिव्यग्निश्चेतव्य इतिवत्। तथा च पर्वचतुष्टये उत्तरवेदिप्राप्तेरेवाभावाद्विधिवैषम्यमपि नास्त्येवेति प्रणयनान्तरविधिरेवेति। एतेनेदं प्रणयनविधानमाद्यन्तयोः पर्वणोरुत मध्यमयोरेवेति संशये नवैश्वेत्यादिना तत्प्रतिषेधादसत्यां प्राप्तौ प्रतिषेधानुपपत्त्याऽऽद्यन्तयोः प्रणयनं पूर्वपक्षे इत्यपि निरस्तम् इति। तदाह *राद्धान्तेऽपीति। अस्य दर्शितामित्यत्रान्वयः। *विधिवैषम्यभयादिति। सिद्धान्त्येकदेशिमते इत्यादिः। *इत्याद्यर्थवादेति। इति विधिरादिर्यस्य तस्मादित्याद्यर्थवादस्य तस्य पर्यालोचनयेत्यर्थः। तस्य मध्यमपर्वद्वयघटितत्वादिति भावः। तथा च यथा तत्र तन्मते विधिवैषम्यं दोषः तथा "पत्न्यः कार्याः" "माताऽप्यंशम्" इत्यत्र सकृच्छ्रुतावंशसम्बन्धावपि भर्तुर्बहुधनपक्षे भरणञ्चास्येत्यादिवाक्यपर्यालोचनया जीवनोपयुक्तधनपरौ स्वल्पधने तु वाक्यान्तरनैरपेक्ष्येण नित्यवत्पुत्रांशसमांशपराविति श्रीकराद्युक्तव्यवस्थायां विधिवैषम्यदोषो दुर्वार इति तात्पर्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५४। पत्नीत्यस्य अन्यैरन्यथा कृतां व्यवस्थां खण्डयितुमाह *यदपीत्यादिना पत्नीदुहितर इत्यारब्धमित्यन्तेन । * तथा, तद्वत्। अत एव चशब्दासङ्गतिर्न। मनुशङ्खयोस्तात्पर्यार्थमाह *अपुत्रस्यधनमिति । यद्यपि मानवे पिता आदिस्तथापि तस्य क्रमाबोधकत्वेन तद्बोधकशङ्खेनान्यथा नयनम् अत एव तस्यापि कथनमित्याशयेनाह *भ्रात्रिति । वचनाच्चेति चस्त्वर्थे । नारदतात्पर्यार्थमाह * भरणोपयुक्तमिति। *एवं स्थिते, उभयप्रामाण्यादपुत्रप्रमीतभ्रातृधनभाज इतरे भ्रातरः, स्त्र्यपि जीवनोपयुक्तं धनं लभते इत्येवं व्यवस्थिते । * भ्रातर इति । इति द्वयमपि घटते इति शेषः । मात्रमवधारणे । * ततोऽन्यूनं वेति । तज्जीवनायापि नालमित्यर्थः । अनयोः संग्रहस्तु बहुधनाभिन्नत्वेनेति बोध्यम्।

५५। *पत्न्येवेति। नारदोक्तेः । *भ्रातरोऽपीति। मनुशङ्खोक्तेः । अपिना ततस्तस्याः समुच्चयः । * विरोधे, प्राप्ते सति तद्विषये एव तन्निवृत्त्यर्थमिति शेषः । *पूर्वेति। पूर्वत्वं च मौलम्। तत्र विषये एवादौ पत्न्येव गृह्णातीति वक्तुं क्रमप्रतिपादकं योगीश्वरेण वचनं पत्नीत्यारब्धमित्यर्थः । सर्वथा पत्न्येवापुत्रभर्तृधनभागिनी नेति भावः ।

५६। खण्डयति * तदप्यत्रेति । * अत्रभवान्, पूज्यः। * आचार्यो, विश्वरूपाचार्यः। मनोरन्यार्थत्वस्य तेन दर्शितत्वादित्यर्थः। तदेवाह *यत इत्यादिना व्याचचक्षे इत्यन्तेन । यत इत्यस्य व्याचचक्षे इत्यत्रान्वयः। यतस्तथाऽत इत्यर्थः । स एवेति भावः। *इति, इत्यत्र। विकल्पे एवेति विषयसप्तमी संबन्धिनस्त्त्वाविवक्षया। विकल्पस्यैवेति पाठान्तरम् । विकल्पस्मरणादित्यपि तथा । मात्रपदेन क्रमव्यवच्छेदः । * तच्च, अधिकारप्रदर्शनं च । आदिना दुहितुर्दौहित्रस्य मातुश्च परिग्रहः । अत एवाह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*गणे इति। अयं भावः। दायग्रहणे पित्रादिक्रमप्रतिपादकं तन्न, येनोक्तव्यवस्था स्यात्, अपि तु पित्रादयोऽपि धनग्रहणेऽधिकारिण इत्यधिकारप्रदर्शनपरम्। वाशब्देन विकल्पप्रतीतेः। समयोर्हि विकल्पः। पितुरभावे ऽन्येऽधिकारिण इति क्रमविवक्षायां तु पितुः प्राधान्यप्रतीत्या तस्यान्येषां च साम्याभावाद्विकल्पासङ्गतिरेव। तस्याधिकारप्रदर्शनमात्रपरत्वे तु पत्नीं दुहितरं दौहित्रं मातरं च गणयित्वा पिता हरेदिति पित्रादिगणने कृते तस्याधिकारो घटतएवेति। तस्मात्तस्य तथोक्तिरयुक्तैवेति तात्पर्यार्थं मूलशङ्खवाक्यमपि तेनान्यथा व्याख्यातमित्याह * शङ्खेति। *संसृष्टेति। विभागानन्तरं पुनरपि स्नेहादिना एकीभूयस्थितभ्रातृविषयमित्यर्थः। इतीत्यस्य व्याचचक्षे इत्यस्यानुषङ्गेणान्वयः। एवमप्यन्यथा प्रसक्तविरोधपरिहारस्त्वग्रे स्फुटीभविष्यति।

५७। स्वयं दोषान्तरमाह *अपि चेति। यत इति शेषः। एवमग्रेऽपि। * अस्मात्, पत्नीदुहितर इत्यस्मात्। न केवलं तदननुमतत्वादि किन्तु दोषोऽपि प्रागुक्तस्तथा व्याख्याने इत्याह * धनेति। अत एव चः किं चेत्यर्थे। व्युत्क्रमेण सर्वान्त्ये स बोध्यः। पत्न्यंशे तथाऽर्थे वाचनिकेऽपि तत्र स्त्रीत्वस्यैव त्वन्मते हेतुत्वस्याभिमतत्वेन तस्याविशेषेण युक्तितौल्येनाह * दुहितर इति। *विषयद्वये इति। इदमुपलक्षणं, मातृविषये इत्यपि बोध्यम्। *वाक्यान्तरम्, भरणं चास्येत्यादि। तत्र मात्रं कार्त्स्न्ये। उक्तहेतोः पत्नीत्यस्य तादृशधनाविषयत्वे तुल्यन्यायेन दुहित्रादावपि तथा प्राप्त्या धनभागिति वाक्यशेषोऽपि भरणं चास्येत्यादिपर्यालोचनया यदि चाल्पं धनं तदैव पत्नी गृह्णात्यादौ तदभावे दुहिता न बहुधने इति पाक्षिकं धनग्रहणं पत्न्यादेः प्रापयति, पित्रादिषु तु वाक्यान्तरनैरपेक्ष्येणैव नित्यवत् तद् बोधयतीति स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दोषस्तदवस्थ एवेति भावः ।

५८। पूर्वं संयताया एव तस्या धनग्रहणमुक्तं द्रढयितुमन्यविरोधं परिहरति * यत्त्विति । यौवनस्थाचेदिति यथास्थितमेव । *कर्कशा, क्रूरा। अनेन कृत्स्नधनासम्बन्धः स्पष्टए वोक्त इति विरोधः स्फुट एव ।

५९। परिहरति *तदपीति। विधवा यौवनस्था नारी कर्कशाचेद्भवतीत्यन्वयः । कर्कशात्वं च नान्यादृशं किं तु दुरूहदुरभिप्रायकत्वं, प्रागुक्तस्मृत्यन्तरानुरोधात् । तदाह * शङ्कितेति। एवं च संयतायाः सकलधनग्रहणमेतत्संमतमेवेति न विरोध इति भावः। एवं च इतोऽपि प्रागुक्तार्थलाभ एवेत्याह *अस्मादेवेति। एवोऽप्यर्थे। हारीतवचनादपीत्यर्थः । अपिना प्रागुक्तसमुच्चयः।

६०। अत्र प्रागुक्तमेव मानान्तरमप्याह *एतदेवेति। अनाशङ्कितव्यभिचारायाः सकलधनग्रहणमित्येवेत्यर्थः । वयःकृतज्येष्ठत्वे उक्तार्थालाभादाह *ज्येष्ठा गुणेति । अन्यगुणकृतज्येष्ठत्वमपि नाभिमतमिति तदर्थमाह * अनाशङ्कितेति । *अन्यामिति । कर्कशामपीत्यर्थः । अपिना स्वीयसमुच्चयः । *मातृवत्, माता यथा पालयति स्वीयं तद्वत् ।

६१। उपसंहरति *तस्मादिति । संसृष्टीत्यत्र भावे क्तः। पत्नीपदार्थमाह * परिणीतेति । धर्मपरिणयनपूर्वकश्रौतस्मार्तकर्मसहाधिकृतेत्यर्थः । एवं पूर्वोपसंहारे ऊढाया इत्यस्याप्यर्थो बोध्यः । एवेन भरणोपयुक्तमात्रव्यवच्छेदः ।

६२ । यत्तु प्राच्याः—एवंव्यवस्थायां बृहस्पतिविरोधः।

विभक्ता भ्रातरो ये च सम्प्रीत्यैकत्र संस्थिताः ।
पुनर्विभागकरणे तेषां ज्यैष्ठ्यं न विद्यते ॥

१ स्वहितेत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदा कश्चित्प्रमीयेत प्रव्रजेद्वा कथं चन।
न लुप्यते तस्य भागः सोदरस्य विधीयते॥
या तस्य भगिनी मातुस्ततोंऽशं लब्धुमर्हति।
अनपत्यस्य धर्मोऽयमभार्यापितृकस्य च॥
संसृष्टानां तु यः कश्चिद्विद्याशौर्यादिनाऽधिकम्।
आप्नोति तस्य दातव्यो ह्यंशः शेषाः समांशिनः॥

इति हि सः। तत्र चोपक्रमोपसंहारयोः संसृष्टविषयत्वान्मध्यस्थस्य यदाकश्चिदित्यादेरपि तद्विषयत्वेन तत्र चानपत्यस्येत्यनेनार्धेन पुत्रकन्यापत्नीपितॄणामभावे संसृष्टसोदरभ्रातुरधिकारबोधनेन कथं तस्य पत्नीबाधकत्वम्। किं चाविभक्तत्वे संसृष्टत्वे च भ्रात्रन्तरीयद्रव्यस्य मिश्रीकृतादेः पृथगप्रतीतौ लोपशङ्कायां न लुप्यते इत्युपपद्यते। विभक्तासंसृष्टस्य तु धने विभागप्रतीत्या न लोपशङ्का। तस्मात्संसृष्टविषयत्वमेवैषाम्।

६३। किं च पत्न्यादेः पूर्वम् अधिकारज्ञापकशङ्खादीनां संसृष्टविषयत्वं वचनान्न्यायाद्वा। नाद्यः। तदभावात्। संसृष्टिनास्त्वित्यादेस्तु भ्रात्रधिकारावसरे विशेषज्ञापनत्वेनं भ्रात्रधिकारमात्रपरत्वानुपपत्तेः। किं च समीपोक्तबृहस्पतिवचसः संसृष्टिविषये पुत्रादिपित्रन्ताभावे सोदरभ्रात्रधिकारज्ञापकत्वाच्चाद्विरुद्धत्वादसंसृष्टविषयत्वमेव तावद् युक्तं तेषां, न तु तथा।

६४। संसृष्टत्वे यदेकस्य भ्रातुर्धनं तदन्यस्यापि तत्रैकनाशे तत्स्वत्वनाशेऽपि जीवतस्तत्सत्त्वात्तस्यैव तत् न तु पत्न्याः। भर्तृमरणेन पत्नीस्वत्वस्यापि नाशात्। यथा सत्सु पुत्रादिषु न तद्धनं पत्न्या इत्येवं

१ समानसम्बन्धिनां मध्ये संसर्गिणः संसर्गनिबन्धनाधिकारबोधकत्वेनेत्यर्थः। अन्यथा पुत्रसत्त्वेऽपि संसृष्टभ्रात्रधिकारप्रसङ्गादिति भावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वितीयपक्षोऽपि न। न हि संसृष्टत्वेऽपि यदेकस्य तदेवान्यस्यापि। किंतु अविज्ञातैकदेशाविशेषं तत् द्वयोः, न तु समग्रमेव। तत्स्वामित्वकल्पनायां मानाभावात्। परिणयोत्पन्नभर्तृधने पत्न्याः स्वामित्वं तस्मिन् मृते नश्यतीत्यत्र च मानाभावात्। सति पुत्रे तदधिकारशास्त्रादेव स्वत्वनाशोऽवगम्यते। नन्वत्रापि संसृष्टिभ्रात्रधिकारशास्त्रात्तथेति चेन्न। संसृष्टभ्रातृगोचरत्वस्याद्याप्यसिद्धेः। सिद्धे हि भ्रातृसंसृष्टभर्तृमृत्या पत्नीस्वामित्वनाशे भ्रात्रधिकारशास्त्रस्य संसृष्टाविषयत्वं, सति तु तस्य तद्विषयत्वे पत्नीस्वामित्वनाश इत्यन्योन्याश्रयश्च।

६५। किं च शङ्खादेस्तत्त्वे भ्रात्रंशे तथा सत्त्वेऽपि तदभावे पितरावित्यत्र प्राग्वद्विकल्पसम्भवेन पत्नीदुहितरश्चैवेत्यादिना विभक्तासंसृष्टयोः पित्रोः पत्नीबाध्यत्वादाद्यपक्षस्य, अविभक्तसंसृष्टभ्रातृसद्भावेऽप्यविभक्तसंसृष्टपितृग्राह्यत्वस्य सर्वेषां मते विवादाभावेन द्वितीयपक्षस्य चासम्भवः।

६६। किं च यथा पित्रा भ्रात्रा च विभक्तासंसृष्टधने शरीरदातृतया ऽऽत्मा वै जायते पुत्र इत्येकत्वस्मृतेर्धनशरीरयोश्च प्रभुत्वात्तत्पितृदेयपितामहादिपिण्डत्रये च सपिण्डनेन मृतस्य भोक्तृत्त्वाज्जीवति च पितरि पुत्राणां पार्वणदानाभावात् भ्रातुः पूर्वं पितुरधिकारस्तथाऽन्यत्रापीति युक्तम्। अविभागसंसर्गयोर्वाऽविशेषात् पिताभ्रात्रोस्तुल्यवदधिकारो युक्तो न तु तदभावे पितुरिति युक्तम्।

६७। किं चाविभक्तसंसृष्टौ पितराविति द्वित्वानुपपत्तिर्मात्रा सह विभागाविभागयोरभावात्। अत एव संसर्गाभावोऽपि। यदाह बृहस्पतिः, विभक्तो यः पुनरिति। अतः संसर्गित्वाविभक्तत्वयोर्द्वयोर्मात्रा सहासम्भवात्कथं मातृगतो भ्रातृसद्भा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाधिकाराविरोधः समाधेयः। तस्मात् विष्ण्वादितः पुत्राद्यभावमात्रेण पत्न्यधिकारः स्पष्टोऽवगम्यते। तत्र पुत्रादीनां त्रयाणामादौ तत्त्वं, पुन्नाम्नो नरकादित्यादिमनुविष्ण्वाद्युक्तेः। प्रपौत्रपर्यन्ताभावे वैधव्यात्प्रभृति व्रतादिना भर्तुः परलोकहिताचरणेन पुत्रादितो जघन्या भार्येति तेषामभावे सैव धनाधिकारिणीति तत्त्वमिति।

६९। तन्न। उक्तबृहस्पतिवाक्यस्य संसृष्टिनस्त्विति मूलस्य विभक्ताः सह जीवन्त इत्यादिमनोरुक्तनारदस्य च समानार्थकत्वेन प्रकृताविषयत्वात्। अपत्यसत्त्वे नैवमित्युक्तम्। तत्र अनपत्येत्यपवादप्रसङ्गादसंसृष्टविभक्तस्थलेऽप्यपवाद उक्तः, अभार्यपितृकेति। लोपशङ्काऽपि मनुवद्बोध्या। पत्नीति मूलस्य पूर्वोत्तरवचनैस्तत्त्वे सति परिशेषन्यायेन शङ्खादेस्तद्विषयत्वं सिद्धमिति न दोषश्च।

किं च भ्रात्रंशे एवेदं न पित्राद्यंशे। तत्र त्वनुपदमेव प्रकारो वक्ष्यमाण इति न कोऽपि दोष इति दिक्।

७०। नन्वेतावता प्रपञ्चेन पत्नीत्यस्य भ्रात्रंशे विरोधे परिहृते नारदसङ्गतावपि पित्राद्यंशे विरोधस्यापरिहृतत्वेन तदवस्थत्वेन मनुशङ्खकात्यायनादेः का गतिरिति चेत्, न। नेदं क्रमपरमित्याद्याचार्योक्त्यनुवादकेन भगवता विज्ञानेश्वरेण सर्वविरोधपरिहारस्य सूचितत्वात्।

तथा हि। तत्र तावत् पिता हरेदितिमनुविरोधस्तु कण्ठतः परिहृत एव। तथा च तत्र वाशब्दो व्यवस्थितविकल्पे न स्वैच्छिकविकल्पे। व्यवस्था च मूलोक्त्यैवेति बोध्यम्। एवमनपत्यस्य पुत्रस्य मातेति मनुरपि न विरुद्धः। तस्यापि क्रमाबोधकत्वात्। मानाभावात् अधिकारप्रदर्शनमात्रपरत्वात्। त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

था च मूलानुरोधेन तत्र चकारेण च वृत्तायामित्यस्य पूर्वत्रापि संबन्धेन पत्न्यां दुहितरि च वृत्तायां दौहित्रे च वृत्ते माता तस्य दायमाप्नुयादित्यर्थः । अग्रेऽपि अपिशब्दात्पित्रादिसमुच्चयेन पितरि भ्रातृषु सत्सु तेषु च वृत्तेषु पितामही हरेदित्यर्थः। इदमग्रेऽपि व्यक्तम् । तत्रैव मातर्यपीत्यत्र कण्ठतो विज्ञानेश्वरेण तथोक्तत्वान्मात्रंशेऽपि तथैव तस्याभिमतम् । एवं शङ्खवचनमपि न विरुद्धम् । तस्याविभक्तसंसृष्टभ्रातृविषयत्वस्य भ्रात्रंशे कण्ठतस्तेनोक्तत्वात् ।

७१। किं च तत्र वाशब्दस्य समुच्चयार्थत्वेन तदभावेइत्यस्योभयत्रान्वयेन क्रमवैपरीत्येन च तदभावे अविभक्तसंसृष्टभ्रात्रभावे ज्येष्ठा संयता पत्नी हरेत् तदभावे पत्न्यभावे चेन दुहितृदौहित्रयोरभावे पितरौ हरेयातामित्यर्थात् यथाश्रुतक्रमाबोधकत्वात् कात्यायनवचनमपि न विरुद्धम् । तत्र पुत्राभावे इत्यत्र पुत्रपदस्य पौत्रोपलक्षकत्वावश्यकत्वात् "अपुत्रा पुत्रवत्पत्नी" "यथैवात्मा तथा पुत्रः" " पुत्रेण दुहिता समा "

पौत्रदौहित्रयोर्लोके विशेषो नोपपद्यते ।

इत्याद्युक्त्या पुत्राभावे इत्यस्य पुत्रस्य पौत्रस्य पत्न्या दुहितुर्दौहित्रस्य चाभावे इत्यर्थेनाग्रे क्रमवैपरीत्येन वाशब्दानां तदभावरूपपक्षान्तरबोधकत्वेनादौ जननी हरेत्, वा तदभावे पिता हरेत्, वा तदभावे भ्राता हरेत्, पुनरन्वयेनाथशब्दस्य समुच्चयार्थत्वेन वा तदभावेऽथ तत्सुता हरेयुः, वा तदभावे तत्पितुर्माता पितामही हरेदित्यर्थात् । एतादृशक्रमबोधनार्थमेव क्रमादिति सफलम् । अन्यथोक्तक्रमस्य पाठत एव लाभे तदुक्तिरफलेति स्पष्टमेव । गौतमवचनमपि न विरुद्धम् । तत्र वाशब्दस्य चार्थत्वेनाधिकारमात्रप्रदर्शनपरत्वेनोक्तरीत्यैव क्रमस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विवक्षितत्वात्। तत्र पिण्डशब्दः सापिण्ड्यपरः। गोत्रशब्दसमभिव्याहारात्। न केवलं मूलस्यैव नारदादिविरोधः, किं तु तेषामपि मिथो भूयानिति तत्रैकस्य सिद्धान्तत्वे सर्वानिर्वाहाभावात् व्यापकत्वान्मूलाद्यनुरोधेनोक्तव्यवस्थयैव सर्वैकवाक्यतासंपादनमुचितमिति गूढाकूतम्।

७२। अत्रेदं तत्त्वम्। यद्यपि पूर्वविरोधदानावसरे नारदमनुशङ्खकात्यायनविरोधः क्रमेण व्याख्यात्रा सम्भवात्सामान्यतो बहुविषये दत्तस्तथापि उपक्रमोक्तनारदवाक्याद्विशिष्यभ्रातृपत्न्योः क्रमबोधकशङ्खाच्च मुख्यतया भ्रात्रंशे एवाभिमतः। मनुकात्यायनोल्लेखस्तु मूलवत्तेषामपि मिथो विरोधो यथाश्रुत इति न तयोरपि क्रमव्यवस्थापकत्वमिति सूचयितुमानुषङ्गिकः। तत्र मनुद्वयांशे विरोधपरिहारोऽग्रे व्याख्यात्रा ऽन्यप्रसङ्गेन कण्ठतः कृत एवेति नात्र पुनर्विशिष्योक्तिः[1]। तेनैव पित्रादौ शङ्खकात्यायनविरोधोऽपि परिहृतप्राय इति न तथा। भ्रात्रंशे तदुभयविरोधोऽपि अन्यप्रसङ्गेन तयोः संसृष्टविषयत्वमुक्तवता परिहृत एव। तत्र संसृष्टेत्युपलक्षणमविभक्तस्यापि। इदमप्यन्यत्राविभक्ते संसृष्टिनि वेति उक्तवता तेन सूचितमेव। एवं च तस्मादित्याद्युपसंहारद्वयमपि मुख्यतात्पर्यविषयतया भ्रात्रंशे एव फलितार्थकथनपरं न तु शाब्दार्थकथनपरम्। तल्लाभो यद्यपि प्रागुक्तरीत्या सिद्धः तथापि अत्रापि गमकमस्तीत्याशयेनाद्योपसंहारार्थे हेतुद्वयमुक्तं विभागेत्यादि। स च मुख्यतया भ्रातृणामेव प्रतिपादितः। शब्दतस्तथैव लाभात्। अत एवाग्रे "एवं विभागं चेदित्यादिना प्रबन्धेन समानजातीयानां भ्रातृणां परस्परं पित्रा

---

१ न पुनर्विशिष्योक्तः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च सह विभागक्लृप्तिरुक्ता" इत्युक्तं तेन।

७३। किंच भ्रातॄणां तयोरूर्ध्वमनन्तरं विभाग उक्त इति तस्यैव विभागस्यात्र ग्रहणम्। अत एवैकवचनम्। एवं च भ्रात्रंशे तादृशप्रकरणात्तथेति तद्भावः। ननु शाब्दमुख्यविभक्तत्वस्य तत्रोक्तत्वेऽपि आर्थानुषङ्गिकाविभक्तत्वस्य पितरि मातरि च सत्त्वेन तादृशविषये तयोरधिकारापत्तिः। पत्नीत्यस्य सर्वविषयत्वेनाप्रवृत्त्या वचनान्तरादित्यत उक्तं संसृष्टिनामिति। संसृष्टिनास्त्वित्यस्य पत्नीत्यादिसर्वापवादत्वं न पत्नीमात्रांशपरम्। अत एव "पत्न्यादयो धनभाज इत्युक्तम्। अस्यापवादमाह" इति वक्ष्यते तेन। एवं च तादृशपितृभ्रातृपितृव्यान्यतमस्थले ऽस्य वचनस्य संपूर्णस्याप्रवृत्तावप्यन्यत्र विभागे ऽविभागे च सर्वत्र प्रवृत्तिः। अत एव वैरूप्यमपि नेदानीम्। अत एव संसृष्टविषयत्वमेव नारदशङ्खयोः कण्ठत उक्तं न त्वविभक्तविषयत्वमपि। इयमरुचिरुपसंहारद्वयमध्ये विभक्ते संसृष्टिनि वेत्यत्रापि बोध्या। अत एवाद्ये उपसंहारे ऽयमर्थः सिद्धो भवतीत्युक्तम्, न तु पत्नीत्यादेरेतद्विषयतया व्यवस्थितिरित्युक्तम्। द्वितीयोपसंहारस्तु साकल्यांशे इति न पौनरुक्त्यम्।

७४। किं च विभक्तभ्रातृस्त्रीविषयत्वं पत्नीत्यस्य धारेश्वरसंमतत्वेन प्रागुक्तं न स्वसंमतत्वेन। यद्यपि तत्र नियोगो दूषितः कण्ठतो नान्यस्मिन्नित्यादिना तथापि तादितरांशस्य सम्भवदुक्तिकत्वेऽपि उक्तवक्ष्यमाणयुक्तिभ्यां स्वानभिमतत्वमेव। एतेन पत्नीत्यादिमूलस्य आपुत्राशयनामिति मनोश्च व्याख्यायां विभक्तासंसृष्टधनविषयतया व्यवस्थापितत्वेन तद्भिन्नस्थले तयोरप्रवृत्त्योक्तनारदशङ्खादिना तत्र निर्वाह इति मिताक्षरासम्मतासिद्धान्त इति भ्रान्त्वादिना तत्र निर्वाह इति मिताक्षरासम्मतासिद्धान्त इति शेषः।

१ चतुस्त्रिद्व्येकभागाः स्युः १२५ इति श्लोकावतरणे इति शेषः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्तोक्तमपास्तम्। तदभिमतार्थाज्ञानात्। विभागोक्त्या मूलस्य तद्विषयत्वलाभेऽपि उक्तमनोस्तद्विषयत्वासम्भवात्। तथा तेनानुक्तत्वात्। मूलैकवाक्यतया तस्य तत्त्वेऽपि विरुद्धवाक्यजातान्तर्गते विभक्ते संस्थिते इत्यत्र विभक्ते इत्युक्त्या तदेकवाक्यतया नारदमन्वादेरपि तद्विषयत्वापत्त्या त्वदुक्तार्थस्य बाधितत्वात्। अन्यथा तेषां मिथो विरोधस्य स्पष्टत्वेनाव्यवस्था तदवस्थैव।

७५। किं च। तावतापि तैः सर्वत्रानिर्वाहः। तत्र स्वल्पोपादानात्। पत्नीत्यादेस्तु त्वदुक्तरीत्योत्तरोत्तरस्य पूर्वपूर्वसापेक्षत्वेन तद्विषयत्वस्यैव युक्तत्वेन च सम्पूर्णस्यैव तद्विषयत्वापत्त्या तत्राप्रवृत्तेः। मूलसमानार्थविष्णुना निर्वाहे तु अस्मत्पक्षस्यैव सिद्ध्या द्रविडप्राणायामस्यासांगत्यापत्तेः।

७६। किं च। अन्यत्र तेन निर्वाह इति न विज्ञानेश्वरसम्मतम्। यदपि नारदवचनमित्यादितदुक्तिविरोधोपपत्तेः। तदप्यत्रभवान्नाचार्यो न मृष्यतीत्यादिविरोधापत्तेः। तत्र पितामही प्रथमं धनभाक् मातर्यपि च वृत्तायाम् इत्यादितदुक्तिविरोधापत्तेश्च। वचनस्यैकत्वेनोत्तरार्द्धस्यापि तन्मात्रविषयतया सांकर्यस्यैवाभावात्। एतेन अविभक्तैकपुत्रस्य स्वार्जितधनकस्य मृतपितृकस्य मातृपत्नीभगिनीसमवाये उक्तरीत्या पत्नीत्यादेरप्रवृत्त्या अनपत्यस्य पुत्रस्य मातेति मनोर्मातैव धनभाग् न पत्नी इत्यपास्तम्। तद्विरोधात्। त्वन्मते मात्रभावे तत्सत्त्वे तत्प्रवृत्तेः।

७७। किं च। तथा सति तत्रैव पत्न्यां जीवन्त्यामपि त्वदुक्तरीत्या धनाभाक्त्वेन मातृधनस्य दुहितृगामित्वेन तत्कन्यासत्त्वे तद्गामित्वेन पत्न्या निरंशत्वापत्त्या जीवनाभावापत्तेः।

७८। किं च। पितुः स्वत्वमित्यव्यवस्था दुर्वारैव। निर्वाहकवचनान्तराभावात्। विष्णोर्मूलसमानार्थत्वात्। अनन्तरः सपि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ण्डाद् य इतिमनूक्तप्रत्यासत्तेस्तत्त्वाङ्गीकारेऽपि तस्यास्तत्र तुल्यत्वेन तत्तादवस्थ्यमेव। अस्मन्मतप्रवेशापत्तिश्च। तदुक्तप्रत्यासत्त्यङ्गीकारेऽपि तद्वृत्तिपितुरपि असमर्थस्य उक्तरीत्या निरंशत्वापत्तिः। अर्द्धो वा एष आत्मनो यः पत्नीत्यादिश्रुत्यादिबोधितप्रत्यासत्त्यतिशयस्य पत्न्यामेव सत्त्वं च।

७९। किं च। पुत्रपौत्ररहितस्य दुहित्रादिगणाभावे पत्नीसत्त्वे विभागस्याभावे त्वदुक्तरीत्या पत्नीत्यादेरप्रवृत्त्या "श्रोत्रिया ब्राह्मणस्यानपत्यस्य रिक्थं भजेरन्" इति गौतमात् तस्य तत्त्वापत्त्योक्तदोषापत्तेः।

८०। किं च। तादृशस्य तस्य पत्नीसत्त्वे सापिण्डान्तर्गतदूरतरयत्किञ्चित्सत्त्वे विभागाभावे मूलाप्रवृत्त्या पुत्राभावे प्रत्यासन्नः सपिण्ड इत्यापस्तम्बात् तस्य तत्त्वापत्त्योक्तदोषापत्तिरेव। वचनान्तरं तु न साधकमास्ति। उक्तश्रुत्या पत्न्याः प्रत्यासन्नत्वादिना तत्त्वे तु तत्रापि तन्नेदं वारितामित्यलं तदनभिज्ञोक्तिखण्डनेनेति। क्वचिदवशिष्टविरोधपरिहारस्त्वग्रेऽनुपदमेव स्फुटीभविष्यतीति दिक्।

८१। एवं पत्नीति व्याख्यायाग्रिमं व्याचष्टे * तदभावे दुहितर इत्यादिनाऽभिधानादित्यन्तेन। ननु पत्नीतिवज्जातावेकवचनेनैव सजातीयानेकग्रहणलाभे बहुवचनं निर्वीजमत आह * बहुवचनमिति। प्रकृतिबोध्यस्त्र्यपत्यत्वस्य प्रत्ययबोध्यबहुत्वस्य च विजातीयास्वपि अविशिष्टत्वमविरुद्धत्वं चेति ताभ्यामुभयप्रतीत्या तासां चतुस्त्रीत्युक्तक्रमेण समाविषमांशभागप्राप्तिरिति भावः। यद्यपीदमपि तद्वदेव सिद्धं तथापि तस्य स्फुटबोधकमिदमिति गूढाकूतम्। एतेनादौ सवर्णा तदभावेऽसवर्णेति व्याख्यानमपास्तम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

८२। दुहितॄणां धनसम्बन्धं पोषयति *तथा चेत्यादिना। तत्राद्यं व्याख्यातम्। *तां विना, तदभावे। *स्मृता, धनहरीत्यस्यादावनुषङ्गः। *अङ्गादङ्गात्, सर्वेभ्यः अङ्गेभ्य उत्पद्यते।

यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा।

तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेत्॥ इति,

यदपत्यं भवेदस्यां तन्मम स्यादित्युक्तमपत्यं धनभाक्। अतः पितरि मृतेऽनुत्पन्नपुत्राया धनहरत्वाप्राप्तावयं विधिकल्पकोऽर्थवादः। तत्र तस्यामात्मनि पुत्रनिमित्तं तिष्ठन्त्यामेव धनलाभो, न पुत्रोत्पत्तिस्तदीयाऽपेक्षिता। यद्वा। तस्यामात्मभूतायां पितृरूपेण तिष्ठन्त्यामित्यर्थः। एतदर्थको मनुस्तु न लिखितः। तत्र सामान्यवचनदुहितृशब्दस्यापि प्रकरणात्पुत्रिकापरत्वेन मेधातिथिना व्याख्यातत्वात्। एतदर्थमेवार्थकथनम्।

८३। एतेन "पुत्रवत्या एव तस्यास्तद्धनाधिकारो न दुहितृसामान्यस्य। तुल्यसन्तानदर्शनादिति नारदीये हेतुनिर्देशेन प्रत्यासत्तिसाम्येऽपि उपकारातिशयेन तदाधिकारबोधनात्। यथा पुत्रत्वसाम्येऽप्यक्लीबादेः। तथा च पुत्रदुहित्रोस्तद्वत्त्वमेव तदाधिकारापादकं, न स्वरूपमात्रम्। अन्यथा क्लीबादिपर्युदासस्यादृष्टार्थतापत्तेः" इति भ्रान्तोक्तमपास्तम्। मन्वादिविरोधात्, नारदार्थस्य वक्ष्यमाणत्वात्, क्लीबादेर्यथाकथञ्चित्पुत्रसत्त्वे कर्मानधिकारप्रयुक्तस्य वाचनिकस्य वाऽनधिकारस्य सत्त्वात्, अन्यथाऽपुत्रपुत्रादेस्तत्त्वानापत्तेः, योग्यतायाः पतितादावपि सत्त्वाच्चेति दिक्।

८४। यद्यनूढेति व्याचष्टे *तत्र चेति। दुहितृषु चेत्यर्थः। अनेन यदि तयोः समवायो भवेत्तदा ऽनूढैवेति तत्र योजना सूचिता। तदेवाह *तदेति। धनं विनाऽविवाहे तस्या ऋतुदर्शने पित्रादीनां नरकपातश्रुत्या युक्तमेवेदं, ततो निस्तारात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा च पैठीनसिः,

यावन्नोद्भिद्येते स्तनौ तावदेव देया अथर्तुमती भवति दाता प्रतिग्रहीता नरकमाप्नोति पिता पितामहः प्रपितामहश्च विष्ठायां जायन्ते तस्मान्नग्निका दातव्येति ।

पराशरोऽपि, अपुत्रमृतस्य कुमारी ह्यर्थं गृह्णीयात्तदभावे चोढेति ।

देवलोऽपि,

कन्याभ्यश्च पितृद्रव्याद्देयं वैवाहिकं वसु ।
अपुत्रस्य तु कन्या स्वा धर्मजा पुत्रवद्भवेत् ॥ इति ।

स्वा सवर्णा । धर्मजा धर्मपत्नीजा ।

नारदोऽपि, (व्यव. १३ । २७)

स्यात्तु चेद् दुहिता तस्याः पित्र्यांशो भरणे मतः ।
आ संस्काराद्धरेद्भागं परतो बिभृयात्पतिः ॥ इति ।

अत्र हरेद्भागमिति ऊढानूढासाधारणं, भरणांशे विशेषः । एतेन "ऊढानूढासमवाये इति चिन्त्यं, तादृशक्रमकल्पने मानाभावात् । यद्यनूढा भवेदित्यस्योक्तनारदादनूढा पितृभागं न लभते किं तु आविवाहं भरणं विवाहोपयुक्तं द्रव्यं च । तद्भागं तु विवाहानन्तरमेवेत्यर्थपरत्वात्" इति भ्रान्तोक्तमपास्तम् ।

८५। विशेषान्तरमाह *तथेति । प्रतिष्ठिता सधना । अप्रतिष्ठिता निर्धना । *स्त्रीधनमिति । तत् कन्यानां, तासां मध्ये अपरिणीतानामेव, परिणीतानाम् मध्ये निर्धनानामेवेत्यर्थः । नन्वेतच् श्रुत्या मातृधनविषयकमिति प्रकृते कथं प्रवर्त्तते अत आह *पितृधनेऽपीति । स्त्रीधनोद्देशेन दुहितृसबन्धविधानेनोद्देश्यविशेषणत्वेन स्त्रीत्वस्याविवक्षितत्वात्तुल्यत्वमिति भावः । एतेन "यद्यप्यादौ सपुत्राया एव धनं तथापि सर्वथाऽविशेषादुभयोरपि विभज्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धनग्रहणम् । एतेन तथेत्यादि चिन्त्यं तस्य स्त्रीधनाविषयत्वा-न्न्यायस्य पितृधनविषये दुष्टत्वात्" इति तदुक्तमपास्तम् ।

८६। ननु दुहितर इति वाक्यं पत्न्यभावे पुत्रिकारूपकन्याया धनसंबन्धमाह, तदुक्तमन्वनुरोधात्, न तु तत्सामान्यस्य, येनानूढादिक्रमः प्रागुक्तो भवेदित्याशयेनाह * न चैतदिति । दुहितर इत्येतादित्यर्थः । व्याख्याभेदेनाह * तत्सुतस्येति । एवं च तत्रैवोक्त्याऽत्रोक्तिः पुनरुक्तेत्यनुपपन्नैव स्यादित्यर्थः । मनुना तु द्वादशपुत्रमध्ये शूद्रापुत्रो गणितो न पुत्रिकापुत्र इति तस्य तदुक्तिस्तथेति भावः । अपुत्रधनं पत्न्यभिगामि तदभावे दुहितृगामीति प्रागुक्तविष्णुरपि ।

दुहितॄणामभावे तु रिक्थं पुत्रेषु तद्धनम्—

इति कात्यायनोऽपि ।

मातुर्दुहितरो ऽभावे दुहितॄणां तदन्वयः ।

इति वक्ष्यमाणनारदोऽपि । (व्यव. १३ । २)

८७। यत्तु "पत्न्यभावे स्नुषैव न दुहिता । तदधिकारस्य पुत्रपत्न्यभावायत्ततया पत्न्यभावेऽपि पुत्रार्धशरीरसत्त्वेन पुत्राभावविरहात् ।

तथा च बृहस्पतिः,

यस्य नोपरता भार्या देहार्धं तस्य जीवति ।

जीवत्यर्द्धे शरीरे तु कथमन्यः समाप्नुयात् ॥ इति ।

न च दुहितुः साक्षात्पित्रवयवारब्धत्वेन पित्रवयवारब्धपुत्रसहकारिस्नुषापेक्षया संनिकृष्टत्वमिति वाच्यम् । दुहित्रपेक्षया सगोत्रसपिण्डायाः स्नुषायाः प्रत्यासत्त्यतिशयात् । पित्रादिष्वतिप्रसङ्गस्तु न । तेषां वचनेनैव व्यक्तं स्थानविशेषस्य नियमितत्वात् । यत्रापि पतिमरणानन्तरं पत्न्येव लभते तत्रापि मातृधन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वेन तद्धनं दुहितृगामीति न भ्रमितव्यम् । जन्मना पुत्रस्येव विवाहात् स्नुषाया अपि भर्तृद्वारा श्वशुरधने स्वत्वोत्पत्त्या श्वशुरमरणे श्वश्रूस्नुषयोः स्वत्वसाम्येन श्वशुरमरणे स्नुषायाश्च साधारणस्वाम्यात्" इति भ्रान्तः ।

तन्न । वस्तुतस्तथा सत्त्वेऽपि तदभावायत्तत्वस्य तस्याशाब्दत्वात् । पत्नीतः प्रागपि तदधिकारापत्त्या सकलव्याकुलीभावापत्तेः । अर्द्धो वा एष आत्मनः इतिश्रुतिमूलकस्योक्तबृहस्पतेः प्रत्यासत्त्या तादृशपातिधनविषये पत्न्या अधिकारबोधकत्वेन प्रकृते ऽप्राप्तेः । तत्प्रत्यासत्त्यपेक्षया स्नुषायां तादृशप्रत्यासत्त्यतिशयाङ्गीकारे दुहितुरपि प्राक् पित्रादेरधिकारापत्त्या स्मृतिविरोधबाहुल्यापत्तेः । स्थानविशेषनियमितत्वस्य स्नुषायामपि तुल्यत्वात् । तस्या अपि गोत्रजत्वात् । एतेन यत्रापीत्याद्यग्रिममपि निरस्तमिति दिक् ।

८८। अनुपपन्नमभिप्रायतो व्याचष्टे *चशब्दादित्यादिना हरेद्धनमितीत्यन्तेन। एतेन दुहितर इति बहुवचनेन दौहित्रग्रहणमिति प्राच्योक्तं पत्नीत्यादिक्रमसंबन्धात्सर्वान्ते दौहित्राधिकार इत्यन्योक्तं चापास्तम् । बहुवचनफलस्योक्तत्वात् । राज्ञो ऽभावाभावेनानाधिकारापत्तेश्च ।

८९। विष्णवाद्यनुरोधेनाह *दौहित्र इति । तदेवाह *यथाहेति। अन्यथा तेषां निर्विषयता स्यादिति भावः । * अपुत्रेति । सन्तन्यते यस्यामिति व्युत्पत्त्या सन्तानशब्देन पत्नी दुहिता चोच्यते।

अत एव नारदः, (व्यव. १३ । ५०)

---

१ राज्ञः सर्वदा विद्यमानत्वेन तदभावस्य कदाप्यभावेन सब्रह्मचारिपर्यन्ताभावे तस्याप्यधिकारित्वेन अधिकारिसामान्याभावरूपस्य सर्वान्तत्वस्यासम्भवेन दौहित्रस्य अनधिकारापत्तेश्चेत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुत्राभावे तु दुहिता तुल्यसन्तानकारणात्।
पुत्रश्च दुहिता चोभौ पितुः सन्तानकारकौ ॥ इति।
सन्तानोऽपत्यगोत्रयोः सन्ततौ देववृक्षे चेति विश्वोऽपि।
त्रयाणां द्वन्द्वोत्तरं बहुव्रीहिः। तस्मिन्पुरुषे मृते सतीत्यर्थः।
अव्ययीभावेन व्याख्यानं तु अयुक्तम्। नञा तदभावस्य भाष्यसंमतत्वात्। सन्तानपदवैयर्थ्यापत्त्या कर्मधारयोऽप्ययुक्तः। तथा च पुत्रपौत्रपत्नीदुहित्रभावे सति तद्धनं दौहित्राः आप्नुयुरित्यर्थः।

९०। यश्चार्थहरः स पिण्डदोऽपीति बृहस्पतेः यो धनमाददीत स तस्मै श्राद्धं कुर्यात्पिण्डं च त्रिपुरुषं दद्यादिति वृद्धशातातपोक्तेश्चाह * पूर्वेषां त्विति। पूर्वेषां मातामहादीनां स्वधाकारे श्राद्धादौ दौहित्रकाः स्वार्थे कन् पौत्रा एव मता इत्यर्थः।

अत एव मनुः, (अ. ९ श्लो. १३१। १३२। १३३। १३९)
मातुस्तु यौतकं यत्स्यात्कुमारीभाग एव सः।
दौहित्र एव च हरेदपुत्रस्याखिलं धनम् ॥
दौहित्रो ह्यखिलं रिक्थमपुत्रस्य पितुर्हरेत्।
स एव दद्यात् द्वौ पिण्डौ पित्रे मातामहाय च ॥
पौत्रदौहित्रयोर्लोके विशेषो नास्ति धर्मतः।
तयोर्हि मातापितरौ संभूतौ तस्य देहतः ॥ इति।
पौत्रदौहित्रयोर्लोके विशेषो नोपपद्यते।
दौहित्रोऽपि ह्यमुत्रैनं सन्तारयति पौत्रवत् ॥ इति च।

यद्यपीदं सर्वं पुत्रिकापुत्रविषयं प्रकरणात्, व्याख्यातं च मेधातिथिना तथैव, तथापि न्यायसाम्यादत्र सम्मतित्वेन लिखितम्। अत एव विज्ञानेश्वर एतत् सर्वं विहायैतत्प्रकरणस्थमपि अकृतावेत्युक्त्या साधारणं मनुवाक्यमात्रं संमतित्वेनाह—
*मनुरपीति। पुत्रिकात्वेनाकृता वा कृता दुहिता सदृशा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्सवर्णाद्यं सुतं पुत्रं विन्देत् लभेत तेन तत्सुतेन मातामहः पौत्री पौत्रवानेव। अत एव स सुतः उक्तहेतोः पाठक्रमादार्थक्रमस्य बलीयस्त्वात्तस्य धनं हरेत् गृह्णीयात्पिण्डं दद्याच्चेत्यर्थः। मेधातिथिना त्वयमपि श्लोकः कैमुतिकन्यायेन पौत्रिकेयपरतयैव सिद्धान्तितः।

बृहस्पतिरपि,

यथा पितृधने स्वाम्यं तस्याः सत्स्वपि बन्धुषु।
तथैव तत्सुतानां च तदभावे तु धर्मतः॥ इति।

९१। अत्रेदं बोध्यम्। यद्यपि मानवे पुंस्त्वैकवचनाभ्यां दौहित्रस्यैव धनभाक्त्वमायातीति तावदेव विज्ञानेश्वरेण चशब्दसमुच्चेयमुक्तं तथापि दौहित्राभावे दौहित्र्यास्तत्त्वमपि चसमुच्चेयम्। अप्रजःस्त्रीधनं भर्तुरिति वक्ष्यमाणेनाप्रजःस्त्रीधनोद्देशेन भर्तुर्दुहितृदौहित्र्यादेश्च संबन्धाविधानेनोद्देश्यविशेषणत्वेन स्त्रीत्वादेरविवक्षितत्वेन दुहितॄणां प्रसूता चेदित्यस्य पितृधनेऽपि तुल्यत्वात्। एवं रीत्या मातुर्दुहितर इति नारदस्याप्यत्रानुकूलत्वात्। युक्तं चैतत्। यथा मातृधनग्रहणे दुहितृदौहित्रपुत्रपौत्रादिक्रमस्तथा पितृधने पुत्रपौत्रप्रपौत्रपत्नीदुहितृदौहित्रदौहित्र्यादिक्रमस्य प्रत्यासत्तितारतम्येन न्यायप्राप्तत्वात्। स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानां चेति गौतमवचनस्य पितृधनेऽपि समानत्वादित्यनुपदमेवोक्तवता विज्ञानेश्वरेण सूचितत्वात्तत्संमतमपीदम्। अन्यथा दौहित्र्याः पूर्वत्र वक्ष्यमाणेषु च स्वतो नोक्तत्वादनन्तर्भावाच्च पितृधनविषये तस्या अनधिकारस्यैवापत्तिरिति महान् दोषः। अग्रे यथाकथंचिदन्तर्भावे तु प्रथमं धनग्रहणे प्रत्यासत्तेर्नियामकत्वबोधकमन्वादिविरोधः स्पष्ट एव। अत एवाग्रे भ्रात्रनन्तरमेव तत्सुतोक्तिरितीति। अत्र प्रागुक्तविष्णुकात्यायनविरोधपरिहारस्तु अनुपदमेव स्फुटीभविष्यति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

९२। अथाग्रिमं व्याचष्टे* तदभावे इति। पितरावित्यत्र न सरूपैकशेषः, "पिता मात्रा" इतिस्मृत्यन्तरानुरोधादित्याह *मातापितराविति। नन्वेवमपि एकशेषत्वादेव एकेनैवोभयप्रतीत्या मिलितयोरेव तयोर्धनसम्बन्धः प्राप्नोति, नैच्छिकेन प्रतिनियतेन वा क्रमेणेति स्मृत्यन्तरविरोधस्तदवस्थ एवेत्याशयेन शङ्कते * यद्यपीति। तत्र तावत् एकदेशिमतेनाह * युगपदिति। युगपत् अधिकरणानां द्रव्याणां वचनं यैः पदैः तेषां भावस्तत्ता तस्यामित्यर्थः। द्विवचनाद्यन्तेनैकशेषसाधनार्थमयं पक्षो भाष्ये सरूपसूत्रे एकदेशिनोक्तः। अग्रे तु भगवता "सेयं युगपदाधिकरणवचनता दुःखा दुरुपपादा च" इत्यनेन दूषितः। उत्सर्गापवादयोः साम्यादुत्सर्गेऽपि तथेत्याशयेनात्र द्वन्द्वस्मरणादित्युक्तं, तदेवाह *तदपवादत्वादिति।

९३।वस्तुतस्तु इतरेतरद्वन्द्वेऽपि समूहस्यैव प्राधान्यात्समाहारे तस्यानुद्भूतावयवभेदत्वं तत्र तूद्भूतावयवभेदत्वमिति भेदाङ्गीकारादितरेतरविषये एवैकशेषाङ्गीकारात्समूहस्यैव प्राधान्येन प्रतीत्या तस्यैव तत्र निमित्तत्वप्राप्तिः। किं च।एकशेषे एकपदलोपेन यः शिष्यतइति न्यायेनावशिष्टस्यैव तत्समूहबोधकत्वेन तत्त्वम्। यत्र हि पृथगुपस्थितिः कारणान्तरं वा तत्रैव क्रमबोधः, तत्र पृथगुपस्थित्यादेस्तन्त्रत्वात् इति बोध्यम्। एतेन पूर्वपक्षोऽयुक्तस्तन्मतस्यासिद्धान्तत्वादित्यपास्तम्।

९४। *क्रम इति। यथाकथञ्चित् क्रम इत्यर्थः।तथा च स्मृत्यन्तराविरोधस्तदवस्थ एवेति भावः। एतेनेतरेतरयोगसमाहारयोर्विधीयमानद्वन्द्वस्योभयपदार्थप्रधानत्वात्तदपवादैकशेषस्यापि युगपदधिकरणवचनत्वेन क्रमाप्रतीतिरिति व्याख्यानमपास्तम्। असिद्धान्तत्वादिति दिक्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

९५। समाधत्ते * तथापीति । *विग्रहेति । माता च पिता चेति एकशेषविग्रहवाक्ये इत्यर्थः।ननु वाक्ये ऐच्छिकप्रयोग इति न तथा नियमः, पूर्वनिपातप्रकरणं हि समासे एव तथा प्रयोगनियामकम्, अतो युक्त्यन्तरमाह *एकशेषाभावपक्षे चेति। अत एव चो व्युत्क्रमे श्रवणादित्यस्याग्रे बोध्यः।*पूर्वमिति।अभ्यर्हितमित्यनेनेति भावः। *पाठेति।तत्र प्रयोगे तच्छब्दस्यैव पूर्वमुच्चारणेन तत्क्रमेणैवार्थक्रमप्रतीत्या मातापितृसमूहस्यैव बोधेऽप्युद्भूतावयवभेदत्वात्पूर्वोत्तरत्र प्रत्येकमेव तत्संबन्धस्य विजातीयानां बोधनात् स्मृत्यन्तरानुरोधाच्च अत्रापि प्रत्येकमेव धनसंबन्धः। तत्रापि धनग्रहणे क्रमापेक्षायामुपस्थितमिति न्यायेनोपस्थितक्रमेणैवादौ मातुस्तदभावे पितुर्धनसंबन्धस्य पर्यवसानमित्यर्थः।

९६। नन्वयुक्तमेतत् । पितरावित्यत्रान्यशब्दस्थक्रममादाय तथा प्रतिपादने स्वारस्याभावात् । "पिता मात्रा" इत्यत्र तु तृतीयानिर्देशेन तस्या अप्राधान्यप्रतीतेः । पितृशब्दस्यैवोच्चारणेन द्विवचनस्य सजातीयासजातीयानेकबोधकत्वेनेष्टार्थबोधस्य तात्पर्यग्राहकसापेक्षत्वेन च पूर्वं पितुरेवोपस्थितेश्च । अत आह * किं चेति । पितृत्वस्य यावत्सवर्णाऽसवर्णाजातपुत्रत्वनिरूपितत्वेन साधारणत्वान्मातृत्वस्य स्वजातपुत्रत्वमात्रनिरूपितत्वेन मिथोपेक्षया मिथो व्यवहितो ऽत्यन्तसंनिहितश्च संनिकर्ष इति मातुस्ततोऽधिकप्रत्यासत्तिरिति भावः ।

९७। ननु धनग्रहणे प्रत्यासत्त्यतिशयस्य नियामकत्वे एव किं मानम्, अत आह *अनन्तर इति। मनूक्तिरियम्। सपिण्डादिति "दूरान्तिकार्थैः" इति षष्ठ्यर्थे पञ्चमी । तथा च सपिण्डस्य यो ऽनन्तरः संनिहितः तस्य सपिण्डसंनिहितस्य धनं तस्य सापिण्डस्य भवेदित्यर्थः। एवं च प्रत्यासत्तेर्नियामकत्वं मनुना स्पष्टमेवोक्तम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

९८। नन्वनुगतं कारणं हि लोके दृश्यते, प्रकृते तु न तथा। अनन्तर इति मनुना सपिण्डपदोक्त्या सपिण्डेष्वेव प्रत्यासत्तेर्नियामकत्वं न सोदकादिष्विति प्रतिपादनात् । तथा च तत्र कारणान्तरेऽवश्यं वक्तव्ये सपिण्डेष्वपि तदेवास्तां किमनया प्रत्यासत्त्येत्याशयेनाह * न चेति । न हीत्यर्थः ।

बहवो ज्ञातयो यत्र सकुल्या बान्धवास्तथा ।
यस्त्वासन्नतरस्तेषां सोऽनपत्यधनं हरेत् ॥

इति बृहस्पतेस्तत्र सपिण्डपदं सोदकादीनामप्युपलक्षकमित्युभयत्र सैव तत्र नियामिकेत्याह * अपित्विति । अस्मादेवेति एवोऽप्यर्थे । मातापित्रोरिति निर्धारणे षष्ठी । अनेन पत्नी दुहितर इत्यत्र सर्वत्र मृतनिरूपितप्रत्यासत्त्यतिशयस्यैव क्रमेण धनग्रहणाधिकारितावच्छेदकत्वं विवक्षितं मूलकृत इति सूचितम् ।*तदभावे पितेति । अत एव च मनुना पितुरनन्तरमेव भ्रातुर्ग्रहणं कृतम् । यदितु पूर्वं पितुस्ततो मातुरिति क्रमोऽत्र स्यात्तदा तदनन्तरं तदुक्तिरसङ्गतैव स्यात् । इदमेव ध्वनयितुमग्रिमव्याख्याने ऽव्यवहितं मनुमेव वक्ष्यति । इदं सर्वं प्रागुक्तशङ्खवाक्यस्थे पितरावित्यत्रापि बोध्यम् ।

९९। वस्तुतस्तु आदौ पिता तदभावे मातेति क्रमो युक्तः। किं चेत्यस्यावतरणोक्तयुक्तेः । किं चेत्याद्युक्ततारतम्यसत्त्वेऽपि पुत्रे पित्रवयवबाहुल्यान्मात्रपेक्षया तत्र प्रत्यासत्त्यतिशयात् तदपेक्षया तस्य अभ्यर्हितत्वात् । क्षेत्रजविशेषविषये उक्तवैपरीत्यस्य सत्त्वेन तथा तस्यापि दुर्वचत्वाच्च। किं च। तदेव हि प्रत्यासत्तेर्मूलकारणं, मातुर्दुहितर इत्यत्रापि तथैव विज्ञानेश्वरेण प्रतिपादितं च । अग्रे बन्धुपदव्याख्यावसरे आत्मबान्धवाः पितृबान्धवा मातृबान्धवा वृद्धशातातपाद्युक्तक्रमेणैव प्रतिपादिताः। स्त्री-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धनविभागवैपरीत्येनात्रैवमेवोचितं च । अत एव च विष्णुकात्यायनौ प्रागुक्तौ, अपुत्रधनं पत्न्यभिगामि तदभावे दुहितृगामि, तदभावे दौहित्रगामि, तदभावे पितृगामि, तदभावे मातृगामीति,

अपुत्रस्याथ कुलजा पत्नी दुहितरोऽपि वा ।

तद्भावे पिता माता भ्राता पुत्राश्च कीर्तिताः ॥ इति च ।

अन्यथा तयोरपि क्रमबोधकत्वेन तद्विरोधो दुष्परिहर एव । एतदनुरोधेन तयोरन्यथा नयनस्य कर्तुमशक्यत्वात् । इदं तु तदनुरोधेनोक्तरीत्या सुयोजमेव ।

देवलोऽपि,

तुल्या दुहितरो वाऽपि ध्रियमाणः पिताऽपि च । इति ।

अत एव च न समुदितयोरधिकारः । अनपत्यस्येति प्रागुक्तं मानवम्,

भार्यासुतविहीनस्य तनयस्य मृतस्य तु ।

माता रिक्थहरी ज्ञेया भ्राता वा तदनुज्ञया ॥

इति बार्हस्पत्यं च पितृपर्यन्ताभावपरं तत एवेति न विरोधः। तत्र तदनुज्ञयेत्युक्त्या तदभावे नाधिकार इति सूचितम् । शङ्खवाक्येऽप्येवमेवेति बोध्यम् । दौहित्र्यंशे विष्णुविरोधोऽपि न । दौहित्रगामीत्यत्रैकशेषघटितसमासेन तस्या अपि परिग्रहात् । दौहित्रांशे कात्यायनविरोधोऽपि न । तत्र अपिशब्देनोभयोः समुच्चयात् । तत्र पुत्रा इत्यस्य प्रत्यासत्त्या भ्रातुष्पुत्रा इत्यर्थः । अत्र माता जननी अभावे सापत्नमातापि । मातृपदोक्तेः ।

१००। अग्रिमं व्याचष्टे *पित्रभावे इति। भ्रातृपुत्रावित्येकशेषेण प्रागुक्तसिद्धान्तरीत्या पूर्वं भ्राता, तदभावे स्वसा। अत एव

भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः ।

इति संसृष्टिधनविषये वक्ष्यमाणं सङ्गच्छते इति बोध्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*भ्रातर एव वेति। अत्र वाशब्दः व्यवस्थितविकल्पे इति प्राक् प्रतिपादितम्। तदभावे भ्रातृगामीति विष्णुवाक्येऽप्येवमेव बोध्यम्। कातीये भ्रातेति स्वसुरप्युपलक्षणं बोध्यम्।

१०१। मातुरभावे पिता धनभागित्युक्तम्। तस्य सिद्धिर्मन्वधीना उक्तरीत्येति पित्रभावे इत्यादि एववेतीत्यन्तं मध्ये उक्त्वा ऽन्यैरन्यथा सिद्धान्तितं निराकर्त्तुं सिंहावलोकनन्यायेनानुवदति यत्पुनरिति। यत्त्वित्यर्थः। *वृत्तायां, मृतायाम्। *विजातीयेष्वपीति। मूर्द्धावसिक्तादिष्वपीत्यर्थः। पित्रा गृहीते तद्धनस्य तदीयत्वात् इति भावः। *सजातीष्वेवेति। तया गृहीते तद्धनस्य मातृसम्बन्धित्वेनादौ तत् दुहितॄणां तदभावे दौहित्रादीनां क्रमाद्भवतीति सजातीयानामेव भवतीति भावः। उपसंहरति *इतीति। इत्येवं मनोराशयादित्यर्थः। *पितामह्येवेति। मातुरभावे इत्यादिः।

१०२। निराकरोति * एतदपीति। प्रागनूदितमित्यर्थः। * आचार्यः, न्यायविद्विश्वरूपाचार्यः। केनेत्याकाङ्क्षायामाह *चतुर्भ्रीति। एवं च तेषामपि वचनेनैव धनभागित्वस्योक्तत्वेनोक्तरीत्या परम्परया विजातीयपुत्राणां धनग्रहणेऽपि न दोष इति न तन्मतसम्भव इति भावः। उक्तमनुवाक्यं तु न क्रमपरं, किं तु अधिकारमात्रप्रदर्शकम्।

यद्वा। मात्रनन्तरं पितृभ्रातृतत्सुताः क्रमेण धनभाजस्तेषामप्यभावे पितामही हरेदित्येवमध्याहृत्य व्याख्येयम्।

यद्वा। नाध्याहारोऽपि, किं तु पितुर्मातेत्यत्र पितृशब्दे तन्त्रम्। तत्रैकः पितरं तदपत्यं पुत्रं पौत्रं च लक्षयति। अनन्तरमिति शेषः। पितुर्मातेत्येतत्पदद्वयं तु तदनन्तरं पितामह्या धनसम्बन्धं बोधयतीति गम्यते। यतः सूत्रप्राया मुनीनामुक्तिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत एव पितामहीत्येव नोक्तमिति केचित् ।

वस्तुतस्तद्वचनस्य स्वरसार्थ उक्तप्रकारत्रयं विनाऽपि प्राक् व्याख्यात इति बोध्यम् ।

१०३। अव्यवहितार्थे प्रसक्तमनुविरोधं परिहरति *यत्पुनरिति । प्राग्वत् । * नित्यं, सर्वथा । *स्थितिः, शास्त्रमर्यादा । * तन्नृपेति । राजपदोक्तेः, सर्वेषामप्यभावे त्विति वक्ष्यमाणमानवात् अग्रे तदुक्तेश्चेति भावः ।

१०४ । एवं परमतं निराकृत्य पित्रभावे भ्रातर इति प्रागुक्तं बहुवचनान्तं भगिनीनामपि विभागं सूचयितुं विशदयति * भ्रातृष्वपि सोदरा इत्यादिना । * मात्रा, कृतात् ।

अथाग्रिमं व्याचष्टे * भ्रातॄणामपीति । तदभावे भ्रातृपुत्रगामीति विष्णुरप्युक्त एव । * तत्पुत्रा इति । भ्रातुः पुत्राः कन्याश्च, स्वसुः पुत्राः कन्याश्चेत्यर्थः । उक्तन्यायेनाह * पितृक्रमेणेति । सोदरासोदरपितृक्रमेणेत्यर्थः ।

१०५। यत्तु अनेकपितृकाणामिति पूर्वोक्तन्यायेन तत्सुतानामेकत्वे अवैलक्षण्येऽपि द्वित्वे बहुत्वे च स्वस्वपित्रादिद्वारा भागकल्पना न स्वस्वरूपत इत्यर्थ इति । तन्न । भ्रातॄणां पूर्वमृतत्वेन भ्रातृधने स्वत्वानुत्पत्या भ्रातुष्पुत्राणामेव स्वामिनाशेन स्वत्वोत्पत्त्या पितृक्रमेण विभागानर्हत्वेन तदविषयत्वात् । तस्य पितृस्वत्वास्पदद्रव्याविषयत्वात् । स्फुटीभविष्यति चेदमनुपदमेव ।

१०६। सर्वत्रान्वितैवशब्दार्थं सिंहावलोकनन्यायेनात्रैवाशोकवनिकान्यायेन विशदयति *भ्रातृभ्रातुष्पुत्रेति । मृतस्य भ्रातॄणां प्रमीतापितृकाणां केषां चित् भ्रातुष्पुत्राणां च सद्भावे इत्यर्थः । * अधिकारवचनादिति । "भ्रातरस्तथा तत्सुता" इत्यनेन तदभावे एव तेषामाधिकार प्रतिपादनात्, एव शब्देन तत्सत्त्वे तेषां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्त्वनिरासप्रतिपादनाच्चेत्यर्थः । अयं न्यायः सर्वत्र बोध्यः ।
१०७। यत्र मृतस्यैको भ्राता विद्यमानोऽनेके वा, प्रत्येकं तत्पुत्रश्चै-कोऽनेके वा, तद्विषयमिदं भ्रातृभ्रातुष्पुत्रेति नाति प्रसङ्ग इति सूचयन् अनेकभ्रात्रादौ स्थलविशेषे विशेषमाह * यदा त्विति । विभक्तादीनां बहूनां भ्रातृणां मध्ये एकस्मिन्नित्यादिः । *अपुत्रे, अपत्न्यादिके च । * धनाविभागादिति । मृतभ्रातृसम्बन्धि-धनाविभागात्पूर्वमेवेत्यर्थः । * कश्चित्, अन्यः । तत्पुत्रास्तु स-न्तीत्याह * तदा तत्पुत्राणामिति । अनुपदोक्तस्योभयसत्त्वे तेषामनधिकारात् भ्रातर एव विभज्य गृह्णीयुर्न तत्पुत्रा इत्यस्य च विषयता यद्यपि प्राप्ता तथापि पितृधनविभागप्रकरणोक्त-न्यायाविषयत्वसत्त्वात्तेन न्यायेनाह * पितृत इति । युक्तत्वे हे-तुः प्राप्तिः । तथाच तेषां स्वांशलाभस्तत्पुत्राणां च स्वपित्रं-शलाभ इति भावः ।

१०८। अथाग्रिमं व्याचष्टे *भ्रातुष्पुत्राणामपीति । गोत्रज-पदार्थं स्वरीत्याऽऽह *पितामहीति । भिन्नं पदम् । एतदग्रे स्नुषा बोध्या । एवमग्रेऽपि । तथा च चत्वार इत्यर्थः । तत्र क्र-ममाह * तत्रेति । तेषां मध्ये इत्यर्थः । यद्यपि धारेश्वरमतनि-राकरणावसरे एवापेक्षितत्वाद्वक्तुमुचितमिदं तथापि तत्र हृदया-रूढमेव कृत्वाऽत्र, मनुना मात्रनन्तरं पितामह्या धनग्रहणस्यो-क्तत्वाद् भ्रातृसुतानन्तरं कथं तस्या धनग्रहणोक्तिरित्याशङ्कानि-रासायाह * मातर्यपि चेति । * इति, इत्यनेन तत्क्रमबोधके-न मनुना । * अनुप्रवेशाभावादिति । यद्यपीदं तदग्रेऽपि तुल्यं तथापि बन्ध्वाद्युत्तरं तस्याः प्रवेशस्योक्तरीत्याऽन्तरङ्गत्वेन चा-सम्भवेन बन्धुशब्देन वक्ष्यमाणरीत्या ग्रहणासम्भवेन गोत्रजा-नन्तरं प्रवेशस्य तथैवासम्भवेन गोत्रजात्वस्य तत्र सत्त्वेनान्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्भावसम्भवात् तत्रैव ग्रहणं युक्तमिति भावः ।

१०९। ननु बद्धक्रमाणामपि पञ्चचितीनां मध्ये यां वै कां चिदिति विहितोपधानं मध्यमचितौ यथा, तथाऽत्रापि स्यात्, अतो हार्दमेवाह *पितुर्मातेति । मानवस्येतिभावः। * अधिकारमात्रेति । तद्बोधनमात्रेत्यर्थः । इदमुपलक्षणं प्रागुक्तान्यपक्षाणामपि । कातीयैकवाक्यतया तस्य क्रमपरत्वमपि न तद्वत् श्रौतं, विनिगमनाविरहग्रस्तं, सिद्धान्तरीत्या सर्वं सुयोजं च ।एतेन पित्रादीनामित्यादि चिन्त्यं, चित्युपधानविरोधात्, कातीयैकवाक्यतया तस्य क्रमपरत्वाच्चेति भ्रान्तोक्तमपास्तम्।उत्कर्षे तत्सुतानन्तरमिति पाठः। उत्कर्षे इत्यस्यावश्यके इत्यादिः।उपरितनमृतानन्तरमिति पाठान्तरम् । उपरितनाः पित्रादयो भ्रातृसुतपर्यन्तास्तन्मरणानन्तरमिति तदर्थः ।

११०। *आविरोधादिति। गोत्रजत्वस्य तत्र सत्त्वेन केनापि सह विरोधाभावादित्यर्थः।उक्तमनोरुक्ताशयकत्वेन वस्तुतः क्रमे तात्पर्याभावेन मूलकृता पुत्राद्यभावे पत्न्यादीनां केषां चित्तदधिकारमुक्त्वा पितरावित्येकशेषेण तयोरत्यन्ताव्यवधानोक्त्या मध्ये परोक्तमनूक्तक्रमेण तत्प्रवेशासम्भवात्तदनन्तरमप्येकगोत्रत्वे सति स्वपितृकुलत्वेनात्यन्तान्तरङ्गत्वादानन्तर्यपाठात्पूर्वाभावे इति वाक्यशेषाच्च तत्सुतान्तानामुक्त्या दृष्टक्रमत्वेनैव तेषां मध्ये तस्याः प्रवेशस्य दुष्करत्वात्तत्पर्यन्तमपकृष्य पृथगनुक्ताऽपि सती सा आपाततः परोक्तमनुप्रतीतक्रमस्यातः परं बाधे मानाभावात्तत्परं गोत्रजा इति पाठात् मनुप्रतीततादृशक्रमानुसारेण पितामहाद्यपेक्षया पितामह्या एव सन्निहितत्वाद्गोत्रजात्वाच्च तदनन्तरमेव धनभागिति भावः। प्रागुक्तासिद्धान्ते तु न कापि शङ्कैवेति बोध्यम् । एतेन मृतस्य पितृसंताना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्पूर्वं पित्रनन्तरं मातुरधिकारोक्त्या पितामहसंतानात्पूर्वं पितामहादनन्तरं पितामह्या अधिकारः सूचितः। अन्यथा पितरौ भ्रातर इति क्रमविरोधापत्तिः । अत एव च मातर्यपीति मनुरपि सङ्गच्छते इति प्राच्योक्तमपास्तम् । उक्तरीत्या निर्वाहात् तदर्थाज्ञानाच्च ।

१११ । अत्र केचित् । दौहित्रानन्तरं मातापितरौ धनग्रहणे युगपदधिकारिणौ । उभयोरपि संनिहितत्वात् । अत एव तौ विभज्य गृह्णीयातां न तु माता पूर्वं तदभावे पितेत्येवमुक्तक्रमः। इदमेवाभिप्रेत्य मूले पितरावित्येकशेषः कृतः ।

११२ । तत्र क्रमाप्रतीतौ पाञ्चमिकन्यायोऽपि । तथा हि । पञ्चमाद्यपादसप्तमाधिकरणम्। *मुख्यक्रमेण चाङ्गानां तदर्थत्वात्। सारस्वतौ भवत इत्यनेन पुरोडाशहविष्कं यागद्वयं विहितम् । सरस्वती देवताऽस्य सारस्वतः पुरोडाशः। सरस्वान् देवताऽस्य सारस्वतः । स च स च तौ सारस्वतावित्येकशेषः । एवं सति स्त्रीदेवत्ययाज्यानुवाक्यायुगलमाम्नाये आदौ पठित्वा पुन्देवत्ययाज्यानुवाक्यायुगलं पठितमिति मन्त्रपाठानुसारेण यागानुष्ठानक्रम इत्येतावानधिकरणविषयमूलविभागः ।

इतः परमधिकरणचिन्ता । पुरोडाशयज्ञस्येष्टिविकृतित्वात्प्रकृतिवदित्यतिदेशेन चतुरो मुष्टीन्निर्वपतीति विहितो निर्वापस्तत्र प्राप्तः । तत्र सन्देहः । किमनियमेन निर्वापः कर्त्तव्य उत स्त्रीदेवत्यनिर्वापं कृत्वा पुन्देवत्यनिर्वाप इति । तत्रातिदेशप्राप्तनिर्वापे क्रमाप्रतीतेरनियमेन निर्वाप इति पूर्वपक्षे--

राद्धान्तः । मुख्ययागक्रमेणैव निर्वापः कार्यः । तयोस्तु याज्यानुवाक्यायुगलपाठक्रमेणानुष्ठानक्रमः । अतः प्रमितक्रमाविरोधाय मुख्यक्रमानुसारेणैव निर्वापानुष्ठानक्रम इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

११३। एवं च तत्राधिकरणे सारस्वतावित्युत्पत्तिवाक्ये एकशेषसत्त्वेन क्रमाप्रतीत्या यथा तद्युगलपाठक्रमेण यागयोरनुष्ठानक्रमोऽङ्गीकृतस्तथाऽत्रापि पितरावित्यत्र तत्त्वेन तदप्रतीत्या सामान्यतो दौहित्रानन्तरं मातापित्रोर्युगपद्विभज्य धनप्राप्तिस्तदभावे भ्रातृणामित्यादीति ।

प्रागुक्तन्यायमूलमिदं मूलवाक्यं कात्यायनवचनेनापोद्यते । सामान्यन्यायापेक्षया वचनस्य प्राबल्यात् । वचनं च विभक्ते संस्थिते द्रव्यमिति प्रागुक्तमेव। तस्य चायमर्थः। पुत्रग्रहणमासन्नतरोपलक्षणार्थम्। तेन पुत्रपौत्रप्रपौत्रपत्नीदुहितृदौहित्रदौहित्र्यभावे प्रथमं पिता धनभाक् ततो माता ततो भ्रातेत्यादीति। व्याख्याकृदुक्तव्याख्याने दोषा अपि । तथा हि । यत्तु साधारणत्वासाधारणत्वाभ्यां ततस्तस्याः प्रत्यासत्त्यतिशय उक्तः, तन्न। जननीजनकयोर्जन्यं प्रति सन्निकर्षतारतम्याभावात् । यदपि गोत्रजपदार्थान्वयः तत्र तदादितदन्तानां बद्धक्रमत्वेन मध्ये तस्या अप्रवेशेन मनूक्त्या मात्रनन्तरं सा धनं न प्राप्नोति अपितूत्कृष्टा सती भ्रातृसुतानन्तरं प्राप्नोतीति । तदपि न । गोत्रजा इति सरूपैकशेषत्वेन पुंसामेव ग्रहणात् । तथा च पूर्वोक्तभ्रातृसुतैः सह गोत्रजानां पुरुषत्वेन बद्धक्रमत्वाविशेषेण तत्रापि तस्याः प्रवेशासम्भव एवेति दिगित्याहुः ।

११४। इदमयुक्तम्। न हि तावदेकशेषे क्रमाप्रतीतिः। विग्रहवाक्येऽनेकशेषपक्षे च मातुः पूर्वपाठादेव तत्प्रतीतिसम्भवात् । अधिकरणविरोधोऽपि न । विषयभेदात् ।तत्र हि सारस्वतश्च सारस्वतश्चेति सरूपैकशेषसत्त्वाद्विग्रहवाक्येऽपि न क्रमप्रतीतिरतः को वा क्रम इत्याकाङ्क्षायां श्रौतो मन्त्रक्रमो युक्त इति तत्क्रमेण यागानुष्ठानक्रमो निरूपितो न तु सर्वत्रैकशेषे क्रमप्रतीत्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भावस्तदभिप्रेतः। अत्र तु पितामात्रेति विजातीयैकशेषसत्त्वाद्विग्रहवाक्यादाववश्यं क्रमप्रतीतेः स क्रमो युक्त एव।

११५। यच्चोक्तं जननीजनकयोरिति। तदपि न। यतो गर्भधारणपोषणादिभिरत्यावश्यकत्वेन जन्येऽतिशयोत्कर्षमुत्पादयति माता, पिता तु निषेककृदेव। अदृष्टात् दृष्टस्यैव प्राबल्येन दृष्टोपकाराधिक्यान्मातुः सन्निकर्षातिशयोऽस्ति।

११६। यदपि गोत्रजा इतीत्यादिनोक्तम्। तदपि न। विजातीयानामपि स्त्रीणां पुंसां च एकविभक्त्यन्तत्वाविरोधात्। गोत्रजा इति जातिद्रव्यगुणा इतिवदत्रापि तथा बद्धक्रमता। यतः पित्रादितत्सुतान्तानां स्वसन्निहितत्वात्स्वपितृकुलत्वाच्चान्तरङ्गत्वेन बद्धक्रमत्वं न पुंस्त्वेन नापि पाठमात्रेण, अतस्तत्सुतानां गोत्रजानां च न बद्धक्रमता। अतः पत्न्यभावे दुहिता, तदभावे दौहित्रः, तदभावे माता, तदभावे पिता, तदभावे भ्राता, तदभावे तत्सुताः, तदभावे पितामहीत्येव क्रमः।

तथा च बृहस्पतिः,

भार्या सुतविहीनस्य तनयाऽस्य मृतस्य तु।
माता रिक्थहरी ज्ञेया भ्राता वा तदनुज्ञया॥ इति।

अस्यार्थः। सुतविहीनस्य मृतस्यास्य धनहरी भार्या, तदभावे तनया, तदभावे तत्पुत्रः, तदभावे माता, मात्रनुज्ञया मृतस्य भ्राता वा। भ्रात्रा गृहीतेऽपि मात्रनुज्ञया गृहीतत्वादेव मात्रा गृहीतमेवेति मातुरेव पितुः पूर्वं धनभाक्त्वमिति।

११७। यत्तु बृहस्पतिवाक्येऽपि तनयाशब्दो दुहितृदौहित्रपितृणामुपलक्षक इति। तन्न। अनुपपत्त्या हि लक्षकत्वं शब्दानाम्। एवं च सर्वत्राविवादेन दुहितुरभावे दौहित्रस्य धनभाक्त्वं वचनेष्वविशिष्टमिति दुहित्रनन्तरं स्मृत्यन्तरविरोधरूपानुपपत्त्या दुहि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तृदौहित्रयोरेवोपलक्षको न पितुः । तावतैवानुपपत्तेः परिक्षयात् । तत्परिक्षयश्च मानवादिवाक्यान्तरेषु पितुर्दौहित्रानन्तर्यस्यानियतत्वेन। अतो यावत्यर्थे लक्षितेऽनुपपत्तिशान्तिस्तावानेव तनयाशब्देन लक्ष्यतइति न सर्वथा पितुर्दौहित्रानन्तरं प्रतीतिः।

११८। यच्च कातीयं विभक्ते संस्थिते इति । तदपि वाबलान्न क्रमपरम्। अपि तु वचनोक्ता अधिकारिण इत्येवमधिकारमात्रप्रदर्शनपरमेव । विकल्पाभावेऽप्यपिशब्दार्था वाशब्दाः, न तु परोक्तरीत्या पूर्वपूर्वाभावपरास्ते । अभावे वाशब्दस्य शिष्टैरप्रयुज्यमानत्वात्। अप्यर्थे कोशात् प्रयोगाच्च। अथशब्दोऽप्यानन्तर्यपरो न मात्रनन्तरमेव पितामह्या धनसम्बन्धम् आह । तस्योक्तरीत्याऽक्रमपरत्वात् । अतस्तत्सुतानन्तरमेवाविरोधाद्धनसंबन्धं बोधयतु तथापि स्वार्थाहानात्।क्रमादिति च मूलपर्यालोचनया मूलोक्तमविरुद्धमेव क्रमं बोधयति, न स्ववाक्यस्थम् । क्रमादिति सामान्योक्तेर्मूलोक्तविशेषेण बाधनात्, तत्रोपसंहाराच्चेति दिक्। तस्माद्व्याख्यानोक्तमेव युक्ततरमिति विज्ञानेश्वरानुयायिनो ऽन्ये आहुः ।

११९। वस्तुतस्तु प्रागुक्तरीत्या स क्रमो न युक्तः किं तु स एवेति प्रागुक्तमेव। एकशेषे क्रमाप्रतीत्या द्वयोर्युगपत्त्वप्रतीतावपि प्रागुक्तविष्णुकात्यायनाभ्यां तथा क्रमस्य स्फुटतया प्रतीतेः । विभक्ते संस्थिते इति कात्यायनवचनमप्युक्तार्थे ऽनुकूलतरम्। तस्य चार्थः प्रागुक्त एव न भवदुक्तः। मूले एकशेषस्तु लाघवेन छन्दोनुरोधेन च कृतो नोक्ताशयकः। पाञ्चमिकन्यायस्य तूक्तरीत्यैव विषय इति न न्यायमूलकत्वमपि मूलस्य ।

१२०।किं च।प्रागुक्तरीत्या जननीजनकयोर्जन्यं प्रति संनि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्षतारतम्यमस्त्येवेति तदुक्तमयुक्तमेव । यत्तु गर्भधारणेत्यादि । तन्न । गर्भधारणस्य पोषणस्य चातिप्रसक्तत्वेनाकिञ्चित्करत्वात् । अत एव बीजस्यैव प्राधान्यं सिद्धान्तितं मनुना । अत एव च माता भर्त्तेत्यादि सङ्गच्छते ।

१२१ । यत्तु गोत्रजा इति सरूपैकशेषत्वेन पुंसामेव ग्रहणमिति । तन्न । तथा सति पितरावित्यत्रापि तदापत्तेः । अथ अत्र पितामात्रेत्येकशेषो विशेषविहित इति चेत्, इहापि पुमान् स्त्रियेति विशेषविहित इति पश्य ।

१२२। यदपि विजातीयानामपीत्यादि।तदपि न। सरूपैकशेषाभावेनैकविभक्त्यन्तत्वानुपयोगात् । तत्रापि तस्यानिमित्तत्वाच्च । दृष्टान्तेन लिङ्गभेदेऽपि प्रथमान्तत्वस्यावश्यकस्य सत्त्वेन ततो वैषम्याच्च । गोत्रजानां तत्सुतैः सह बद्धक्रमत्वाभावस्तूक्तरीत्यैव । बृहस्पतिवचनमप्यस्माकमेवानुकूलं, न भवताम् । यतो मात्रनन्तरं तत्र भ्रातैवोक्तो न पितेति । तत्र तुशब्दस्य चार्थकत्वेन तनया चेत्यन्वयेन सेन दुहितृदौहित्रदौहित्रीपितृणां समुच्चयेन विरोधलेशोऽपि न ।

एतेन तनयाशब्दस्योपलक्षकत्वोक्तिः तद्दूषणोक्तिश्चापास्ता । उक्तरीत्यैव निर्वाहात् । तस्मात्तत्र तथैव क्रमो युक्तो न व्याख्याकारोक्त इति बोध्यम् ।

१२३ । यद्यपि कल्पतरौ दायविभागे च विष्णुवाक्ये भ्रातृपुत्रगामीत्यग्रे तदभावे बन्धुगामि तदभावे सकुल्यगामीति पाठेन तद्विरोधस्तथापि तदभावे सकुल्यगामि तदभावे बन्धुगामीति मदनरत्नधृतपाठे न विरोधः । युक्तश्चायं मूलसंवादात् । सम्भवतीति न्यायात् । एवं च स पाठश्चिन्त्य एवेति न कश्चिद्दोषः । गोत्रजपदार्थसकुल्यपदार्थयोस्तुल्यत्वात् । एतेन तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाठं धृत्वाऽन्यथा व्याख्यातं यद् भ्रान्तेन, तदपास्तम् इति दिक्।

१२४।पितामह्याश्चेति चेन स्नुषायाः समुच्चयः। सपिण्डत्वस्यातिप्रसक्तत्वेन मौलपदानुरोधेनाह *समानेति । तत्र हेत्वन्तरमप्याह *भिन्नेति।*सपिण्डानां, तेषामपि।अस्य फलमग्रे स्फुटीभविष्यति। तत्सुतानन्तरं तस्या धनग्राहित्वे निष्प्रत्यूहे तदारभ्य क्रमं विविच्याह * तत्र चेति । तदुत्तरम् उक्तरीत्या तस्या धनग्राहित्वे चेत्यर्थः । ततोऽन्तरङ्गाभावमाह *पितृसंन्तानाभावे इति । स च तत्सुतान्तः । सम्भवादाह *पितृव्या इति । सापिण्ड्यस्य तावत्पर्यन्तमेव सत्त्वादाह * आसप्तमादिति । सप्तममभिव्याप्येत्यर्थः। अयमेव न्यायः सोदकेष्वपि बोध्यः ।

१२५। *ते च, समानोदकास्तु। ननु एवमपि न्यूनतैव, अत आह * जन्मनामेति । सपिण्डानामुपरीत्यनुवर्तते । तथा च सप्तपुरुषानन्तरं यावज्जन्म नाम च स्वकुले ज्ञायते तावद्वा समानोदकसंज्ञका इत्यर्थः । उभयत्र मानमाह * यथाहेति । सप्तमे पुरुषे इति मासिकामितिवत्सामीपिकमाधिकरणं, तदग्रिमे निवर्तते इत्यर्थः। चस्त्वर्थे । चतुर्दशानां पूरणं तदाग्रिमश्चतुर्दशस्तस्मात् आ ऊर्ध्वं निवर्त्ततेत्यर्थः। अधिकसंग्रहाय पक्षान्तरमाह *जन्मनाम्नोरिति । आ इत्यनुवर्तते । जन्मनाम्नोः स्मृतेर्ज्ञानात् आ-ऊर्ध्वं स निवर्तेतेत्येके आहुरित्यर्थः । तथा च स्मृत्यन्तरानुसन्धानद्वारा विकल्पः फलितः। स चाधिकसंग्रहाय न तु न्यूनसंग्रहाय। तदग्रे उक्तेः। अन्यतरस्यातिप्रसक्तत्वादुभयोः समुच्चयो बोध्यः । तच्छब्देन पक्षभेदेनान्यतरपरामर्शः । * गोत्रं, सगोत्रत्वम् । अर्शआद्यच्, सामान्ये एकत्वं क्लीबत्वं च ।

१२६। अथाग्रिमं व्याचष्टे *गोत्रजाभावे इति । बहुवचनान्तेन द्वन्द्व इत्याह *बन्धव इति । चस्त्वर्थे । वृद्धशातातपाद्युक्तक्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मेणाह *आत्मबन्धव इति । बान्धवाश्चेति पाठान्तरम् । तमेवाह *यथोक्तमिति । अत्र पुत्रादिग्रहणेन कन्यानामपि ग्रहणं प्रागु-क्तरीत्यैति बोध्यम् । अत एव गार्गीबन्धुः कारीषगन्धीबन्धु-रित्यादिसङ्गतिः । तत्र क्रमे बीजमाह * तत्र चेति । तेषां मध्ये चेत्यर्थः । प्रत्यासत्त्यतिशयात् अन्तरङ्गत्वम् । प्रागुक्तसिद्धान्त-रीत्या आह * तदभावे पितृबन्धव इति । अत एव वृद्धशाता-तपाद्युक्तिरपि सङ्गतेति भावः । एतेनादौ बन्धुगामीति धृत्वा तेनात्मभगिनीभागिनेयादीनामपि सगोत्रसपिण्डादिक्रमेण ग्रहणं व्याख्यायेदं चिन्त्यं तेषु सत्सु तेषां विप्रकर्षेण तथाक्रमानौचि-त्यादिति भ्रान्तोक्तमपास्तम् । आत्मभगिन्यादेः पूर्वमेवोक्तत्वात् ।

१२७।यद्यपि भ्रातृबान्धवयोर्बन्धुरिति विश्वादिकोशाद्बन्धु-शब्दो बान्धवपरतयैव व्याख्यातो व्याख्यात्रा, भ्रातॄणां पूर्वमु-क्तत्वात्, तथापि तस्य तावन्मात्रार्थत्वे बान्धवशब्दे एव वाच्ये बन्धुशब्दोक्त्या भगवतो ऽन्योऽप्यर्थो ऽत्राभिप्रेतः । न च तत्त्वमप्रसिद्धं, ब्रह्मबन्धुरित्यादिप्रयोगात् । आत्मैवात्मनो बन्धु-रित्यादिप्रयोगाच्च । तथा च प्रियकारिण्यपि तत्प्रयोगात्प्रकृते तत्त्वेन स्मृत्यन्तरानुरोधेनाचार्योऽपि । कृतैकशेषेण द्वन्द्वकरणात् तदर्थोऽभिमत इति गूढाशयेनाह * बन्धूनामिति । उक्तविधबा-न्धवानामित्यर्थः ।

१२८। अथाग्रिमं व्याचष्टे * तदभावे शिष्या इति । अत्रापि कृतैकशेषेण तथा द्वन्द्व इति भावः । तेनानेकसजाती-यसत्त्वे विभज्य तैर्ग्राह्यम् । तदेव स्मृत्यन्तरमाह *पुत्राभावे इति। * यः प्रत्यासन्नः सपिण्ड इति । अनेन पत्न्यादिबान्धवान्ता-नां संग्रहः । तस्य ततो मुख्यत्वायाह * आचार्याभावे इति । अनन्तरः सपिण्डाद्य इत्यग्रिमो—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मनुरपि, (अ. ९ । १८७)

अत ऊर्ध्वं सकुल्यः स्यादाचार्यः शिष्य एव वा । इति ।

१२९। अथाग्रिमं व्याचष्टे *शिष्याभावे इति। सब्रह्मचारीत्येकवचनमन्तेवास्यभिप्रायम् । सन्दिग्धत्वात्तदर्थमाह * येनेति । साहित्यं प्राप्तौ । * तदर्थेति । वेदार्थेत्यर्थः । ब्रह्म वेदः । तदध्ययनार्थं व्रतमपि ब्रह्म । तच्चरतीति ब्रह्मचारी । समानश्चासौ ब्रह्मचारी च सब्रह्मचारी । व्रते इति सुप्यजाताविति वा णिनिः । चरणे ब्रह्मचारिणीति सादेशः । तस्य समानत्वं वेदस्य व्रतस्य वा समानत्वात् । तस्य तत्त्वं चाध्येतृभेदाद्वेदभेदं व्रतभेदं वा परिकल्प्य बोध्यम्। तेन समानवेदाध्ययननिमित्तब्रह्मचर्यवानित्यर्थः । समानं ब्रह्म वेदाध्ययनार्थं व्रतं चरतीत्यर्थो भाष्याल्लभ्यते ।

१३०। अत्र कृतैकशेषबहुवचनान्तसब्रह्मचारिशब्देन द्वन्द्वः। अन्यथा तद्बोधकं शब्दान्तरमेवोक्तं स्यात् । तत्रैकस्यार्थ उक्तः। द्वितीयस्य तु समानं ब्रह्म श्रौतं कर्म चरतीति ऋत्विग् इति । अत एवान्तेवासी ऋत्विग्व्याहरोदिति शङ्खः सङ्गच्छते । तृतीयस्य तु ब्रह्म वेदस्तेन सहितं विशिष्टं सब्रह्म वेदतदङ्गानि तच्चरति जानातीति सः श्रोत्रिय इति।तुरीयस्य तु ब्रह्मचारिणा सह सदृशः सब्रह्मचारीति। तदेतत्सर्वं शिष्यबुद्धिवैशद्यार्थं द्वितीयविशेषं च हृदि निधाय गूढाशयेन न्यूनतां परिहरन् तदग्रिमविशेषद्वयं सविशेषमाह क्रमेण * तदभावे ब्राह्मणद्रव्यमिति । *यः कश्चित्, स्वपरजातिसाधारणो ब्राह्मणः । *श्रोत्रियः, वेदतदर्थज्ञः । तद्‌बहुत्वेऽसति गमके विभज्य गृह्णीयुरित्याह *श्रोत्रिया इति । ब्राह्मणा इत्यर्थः ।

१३१। *ब्राह्मणमात्रमिति । मात्रमवधारणे। तेन श्रोत्रियत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यवच्छेदः। शिष्य एव वेत्यग्रिमं मनुमाह * यथाहेति। * सर्वेषां, पत्न्यादिश्रोत्रियान्तानाम्। तस्येति भावः। अपिरेवार्थे व्युत्क्रमे। ब्राह्मणा एव। बहुवचनं प्राग्वत्। वेदाध्ययनधर्मानुष्ठितिमात्रमत्राप्यपेक्षितामित्याह * त्रैविद्या इति। वेदत्रयाध्ययनकर्तारः। * शुचयः, धर्मानुष्ठातारः। अन्तरिन्द्रियनिग्रहोऽप्यावश्यक इत्याह *दान्ता इति। *तथा, तथा सति। राज्ञेति शेषः। तस्मादिति पाठे राज्ञ इत्यर्थः। अन्यथा तु हानिरेवेति भावः।

१३२। तदेव ध्वनयन्नाह * न कदाचिदिति। * राजा, अभिषिक्तः।श्रोत्रियोऽपीत्यर्थः। न हीयते इत्यग्रिममेवाह *अहार्यमिति। अग्राह्यमित्यर्थः। *नित्यं, सर्वथा। *स्थितिः, मर्यादा। उक्तमेव विशदयन् त्रैविद्यत्वादिगुणाभावेऽपि जातिब्राह्मणोऽप्यधिकारीति सूचयन् उक्तार्थे मानान्तरमप्याह * नारदेनाप्युक्तमिति। *ब्राह्मणार्थस्येति। तस्य स्वामिनो ब्राह्मणस्य नाशे सति। *चेत्, यदि ब्राह्मणार्थस्य तद्धनस्य कश्चन दायादो नास्ति, तदा तद्धनं ब्राह्मणायैव दातव्यमित्यर्थः। यद्वा। तदिति भिन्नं पदम्। नाशे इत्यत्र स्वामिन इति शेषः। तत् ब्राह्मणधनम्। सामान्येन नपुंसकत्वनिर्देशः। विधेयलिङ्गं वा। * अन्यथा, स्वयं हरणे।

१३३। ब्राह्मणद्रव्यमित्युक्त्याऽऽकाङ्क्षितविशेषमाह *क्षत्रियादीति। पत्न्यादीनामित्यादिः सब्रह्मचारिपर्यन्तानामित्यस्य। स्थितिरित्यग्रिममेवाह * यथाहेति। * इतरेषां, प्रागुक्तब्राह्मणभिन्नानाम्। धनमिति शेषः। * सर्वाभावे, पत्न्यादिसब्रह्मचारिपर्यन्तानामभावे। अत्र मन्वनुरोधेन गौतमस्य ब्राह्मणपरत्वं, मनोरपि श्रोत्रियपरत्वं त्रैविद्या इत्यादिना स्पष्टमेव। एवं च तदुभयं तत्रैव साधकम्। शुद्धब्राह्मणपरस्तु नारद एवेति परे।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं मूलोक्तक्रमे न कोऽपि दोष इति स्थितम् ।

१३४। अत्र पुत्राद्येतावत्पर्यन्तं यदुक्तं तच्छेषतया किंश्चित्सिद्धान्ततत्त्वं गूढतममभिमतं स्पष्टार्थमुक्तार्थानुवादसहितमुच्यते।

पुत्रपौत्रप्रपौत्राणां विविधफलानि—दायहरणं, जीवतो वाक्यादिकरणं, वंशविच्छित्तिपरिहरणं, पिण्डादिकरणं, नामसङ्कीर्त्तिकरणम्, ऋणादिदोषानिवृत्तिकरणं, परलोककरणं चेत्यादीनि स्मृत्यादौ प्रतिपादितानि ।

तत्र मनुः, (अ. ९ श्लो. १६३ । १८५)

एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः ।
शेषाणामानृशंस्यार्थं प्रदद्यात्तु प्रजीवनम् ॥ इति ।
न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः । इति च ।

अत्र द्वितीयेन दायहरणं सर्वेषामविशेषेण प्रतिपादितं प्रतिनिधीनां क्रमेण तत्तदभावे । औरसस्य तु पूर्वेणैव ।

मूलमपि प्रागुक्तमेव, (याज्ञ. अ. २)

औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः ।
क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा ॥ (१२८)
गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः ।
कानीनः कन्यकाजातो मातामहसुतो मतः ॥ (१२९)
अक्षतायां क्षतायां वा जातः पौनर्भवः सुतः ।
दद्यान्माता पिता यं वा स पुत्रो दत्तको भवेत् ॥ (१३०)
क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात्स्वयंकृतः ।
दत्तात्मा तु स्वयंदत्तो गर्भे विन्नः सहोढजः ॥ (१३१)
उत्सृष्टो गृह्यते यस्तु सोऽपविद्धो भवेत्सुतः ।
पिण्डदोंऽशहरश्चैषां पूर्वाभावे परः परः ॥ (१३२)
सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः । इति । (१३३)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र तत्सम इत्युक्त्या औरसपुत्रिकापुत्रसमवाये समविभागः सूचितः।

अत एव मनुः, (अ. ९ । १३४)

पुत्रिकायां कृतायां तु यदि पुत्रोऽनुजायते।

समस्तत्र विभागः स्यात् ज्येष्ठता नास्ति हि स्त्रियाः ॥इति।

द्विविधः क्षेत्रजः तत्समवाये षष्ठपञ्चमान्यतरांशहरः। अन्ये चतुर्थांशहराः। तदभावे तु प्रागुक्तरीतिरेव। यद्यपि विभागं चेदित्यादिना— (याज्ञ. २ । ११४)

विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः। (याज्ञ.२।१४९)

इत्यन्तेन प्रोक्तविभागप्रकरणमध्यस्थत्वेनास्य पिण्डद इत्यस्यात्रानुपयोगः, पूर्वाध्याये प्रोक्तश्राद्धप्रकरणेऽपेक्षिताधिकार्यनुक्तेः प्रासङ्गिकत्वे तु चरमोक्तिरुचिता, तथास्वारस्याभावश्च, अत एव विज्ञानेश्वरेण औरस इत्यादि "अधुना मुख्यगौणपुत्राणां दायग्रहणव्यवस्थां दर्शयिष्यंस्तेषां स्वरूपं तावदाह" इत्येवमवतार्य व्याख्याय च "एवं मुख्यामुख्यपुत्राननुक्रम्यैतेषां दायग्रहणे क्रममाह" इत्येवमवतारितं पिण्डद इतीति, तथापि यस्यांशहरत्वं तस्यैव पिण्डदत्वमित्यस्य मुख्यामुख्यातिदेशिकपुत्रान्यविषयत्वं, तादृशपुत्रस्थले तस्य सधनत्वे तथा संभवेऽपि अतथात्वे तस्य पिण्डदत्वावश्यकत्वात् तादृशस्य तस्य तद्धर्मत्वान्न तद्विषयत्वम्, अत एव च— (अ. ९ । १२७)

अपुत्रोऽनेन विधिना सुतां कुर्वीत पुत्रिकाम्।

यदपत्यं भवेदस्यां तन्मम स्यात् स्वधाकरम् ॥

इति मनूक्तिः यश्चार्थहरः स पिण्डदायी पुत्रः पितृवित्ताभावे पिण्डं दद्यादिति विष्णूक्तिश्च सङ्गच्छते— इत्येतदर्थं तथोक्तिः। अत एव—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षेत्रजादीन् सुतानेतानेकादश यथोदितान् ।
पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः ॥
इति मनुः । (अ. ९ । १८०)

अत्र पारशवाख्यं शौद्रं गृहीत्वा एकादशत्वम् । इतोऽव्यवहितं प्राक् पठितानां तेषामेव तेनोक्तत्वात् । पुत्रिकासुतस्य तु बहुव्यवधानेन पार्थक्येन तेनोक्तत्वात् ।

अत एव— (मनु. अ. ९ । १६५)
औरसक्षेत्रजौ पुत्रौ पितृरिक्थस्य भागिनौ ।
दशापरे तु क्रमशो गोत्ररिक्थांशभागिनः ॥

इति प्रागुक्ताः । तेषां ततः प्रागुक्त्यौरस इत्यादिना द्वादशपुत्रक्रमानुरोधेनैतावत्पर्यन्तं लक्षणान्युक्तानि । क्रिया पिण्डादिकरणं तल्लोपो व्यतिरेके हेतुः।तल्लोपं वीक्ष्येत्यर्थो वा। अकारप्रश्लेषो वा ।प्रतिनिधित्वं चावयवान्वयेन न्यायसिद्धं वाचनिकं यथायथं बोध्यम् । अत एव तेन यथाक्रममेव पिण्डदः श्राद्धदः अंशहरः धनहरो वेदितव्य इति व्याख्यातम् ।

अप्रशस्तास्तु कानीनगूढोत्पन्नसहोढजाः ।
पौनर्भवश्च नैवैते पिण्डरिक्थांशभागिनः ॥

इति विष्णुवाक्येऽप्येवमेव बोध्यम् । मूलवाक्ये चकारेणान्यफलानामपि असाधारणानां समुच्चयः। एवमेव द्व्यामुष्यायणस्य क्षेत्रजस्य भागविशेषप्रतिपादके विभागप्रकरणान्तर्गते—

अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः ।
उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः ॥

इति मूलोक्ते (याज्ञ.अ. २।१२७) ततः पूर्वपद्ये तदुक्तिफलादि बोध्यम्। तत्र तथोक्तिस्तु प्रकरणानुरोधात्, नियोगेनोत्पादनान्न तद्धनहारित्वमिति भ्रमानिरासार्थत्वात्, तदर्थमेव तत्प्रवृत्तेश्चेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बोध्यम्। अत एव तदपि तेन "द्व्यामुष्यायणस्य भागविशेषं दर्शयंस्तस्य स्वरूपमाह" इत्येवमवतार्य्य यथाक्रमं व्याख्यायोभयोरपुत्रत्वे तस्य द्व्यामुष्याणत्वेन प्रागुक्तं बोध्यम्। देवरादेस्सपुत्रत्वे तु अद्व्यामुष्यायणः। स क्षेत्रिण एव पुत्रो भवतीति तस्यैव रिक्थी पिण्डदश्च न बीजिन इति तद्रिक्थी पिण्डदश्च नियमेन न।

तदुक्तं मनुना, (अ. ९। ५३। ५२)

क्रियाभ्युपगमात् क्षेत्रं बीजार्थं यत्प्रदीयते।
तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च॥
फलं त्वनभिसंधाय क्षेत्रिणां बीजिनां तथा।
प्रत्यक्षं क्षेत्रिणामर्थो बीजाद्योनिर्बलीयसी॥ इति।

किञ्च। मुख्यामुख्यमात्रपुत्रातिरिक्तस्थलेंऽशहरत्वेन पिण्डदत्वं नियतम् अत्र तु वैपरीत्यामिति सूचनार्थमपि तथोक्तिः। ततश्च पुत्रादीनां, यद्धनं स्वामिसम्बन्धादेव निमित्तादन्यस्वत्वाक्रान्तं तद्रूपदायहरणं, पुत्रत्वादिना अप्रतिबद्धं भवतीत्ययमप्रतिबन्धो दायः। पितृपितामहादिधने तेषां तत्त्वेन लोकप्रसिद्धजन्मतःसिद्धस्वत्वस्याविशिष्टत्वात्। पत्न्यादीनां तु पुत्राद्यभावे स्वाम्यभावे विषमविभागाभावे दानाभावे च स्वं भवति तत्तद्रूपेणेति तत्तत्सद्भावः प्रतिबन्धक इति सप्रतिबन्धो दायः। एवं च तद्द्वैविध्यं सिद्धम्।

ननु भवतु उक्तरीत्या पुत्रस्य तत्, पौत्रादेस्तत्सत्त्वे किं मानमिति चेत्, शृणु। (याज्ञ. २। श्लो. १२०। १२१)

अनेकपितृकाणां तु पितृतो भागकल्पना।
भूर्या पितामहोपात्ता निबन्धो द्रव्यमेव वा।
तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चैव हि॥
इति तत्रैव मूलम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पैतृकं तु पिता द्रव्यमनवाप्तं यदाप्नुयात् ।
न तत्पुत्रैः भजेत्साद्धमकामः स्वयमर्जितम् ॥
इति मनुश्चेति । (अ. ९ । २०९)
नन्वेवमपि द्वितीये किं मानमिति चेत्, शृणु ।
जीवतो वाक्यकरणात्प्रत्यब्दं भूरिभोजनात् ।
गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता ॥
इति देवलः,
पिता माता च सम्प्रीतौ स्यातां पुत्रगुणैर्यदि ।
स पुत्रः सकलं धर्ममाप्नुयात्तेन कर्मणा ॥
इति सत्यव्रतश्च ।
स पुत्रः पितरं यस्तु जीवन्तमनुवर्त्तयेत् ।
संस्थितं तर्पयेद्भक्त्या श्राद्धेन विविधेन च ॥ इति ।
एवमग्रेऽपि क्रमेणोच्यते ।
अपत्यं तु ममैवैकं कुले महति भारत ।
अपुत्रमेकपुत्रत्वमित्याहुर्धर्मवादिनः ॥
चक्षुरेकं च पुत्रश्च अस्ति नास्ति च भारत ।
चक्षुर्नाशे तनोर्नाशः पुत्रनाशे कुलक्षयः ॥
अनित्यतां च मर्त्यानां मत्वा शोचामि पुत्रक ।
सन्तानस्याविनाशं तु कामये भद्रमस्तु ते ॥
इति भारतम्,
अनेन तु विधानेन पुरा चक्रे स्वपुत्रिकाम् ।
विवृद्ध्यर्थं स्ववंशस्य स्वयं दक्षप्रजापतिः ॥
ददौ स दश धर्माय कश्यपाय त्रयोदश ।
सोमाय राज्ञे सत्कृत्य प्रीतात्मा सप्तविंशतिम् ॥
इति मनुश्च । (अ. ९ । १२८ । १२९)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पिण्डादिविषये मूलन्तूक्तमेव ।
न ह्यस्मिन् युज्यते कर्म किञ्चिदामौञ्जिबन्धनात्।(अ.२।१७१)
नाभिव्याहारयेत् ब्रह्म स्वधानिनयनादृते ॥ (१७२)
इति मनुः ।
कृतचूडस्तु कुर्वीत उदकं पिण्डमेव च ।
स्वधाकारं प्रयुञ्जीत मन्त्रोच्चारं न कारयेत् ॥
इति व्याघ्रश्च ।
अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः सदा ।
पिण्डोदकक्रियाहेतोर्यस्मात्तस्मात्प्रयत्नतः ॥
इत्यत्रिश्च ।
एतेन पुत्रवतो ऽनधिकारः सूचितः ।
अपुत्रेण सुतः कार्यो यादृक् तादृक् प्रयत्नतः ।
पिण्डोदकक्रियाहेतोर्नामसङ्कीर्तनाय च ॥ इति—
मनुयमव्यासाश्च ।
धर्मसङ्कीर्तनस्य चेति बृहस्पतौ पाठान्तरं तुर्यचरणे ।
त्रयाणामुदकं कार्यं त्रिषु पिण्डः प्रवर्त्तते ।
चतुर्थः सम्प्रदातैषां पञ्चमो नोपपद्यते ॥
इति मनुश्च । [अ. ९ । १८६]

पुत्रः पौत्रः प्रपौत्रश्च भ्राता वा भ्रातृसन्ततिः। इत्यन्यत्र च। भ्राता वेत्यत्र तद्वद्वेति पाठान्तरम् ।

पुत्रः पौत्रश्च तत्पुत्रः पुत्रिकासुत एव च ।
इति स्मृतिसंग्रहे च ।
पुत्रेषु वर्तमानेषु नान्यो वै कारयेत्स्वधाम् ।
पुत्रास्ते हिंसितास्तेन यस्त्वेवं कुरुते नरः ॥
आनुकूल्याद्वा पुत्रस्य श्राद्धं कुर्यात्सनाभिकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति ऋष्यशृङ्गश्च ।

उत्तमर्णाधमर्णेभ्यः पितरं त्रायते सुतः ।
अतस्तु विपरीतेन नास्ति तेन प्रयोजनम् ॥
काङ्क्षन्ति पितरः पुत्रान् नरकापातभीरवः ।
गयां यास्यति यः कश्चित्सोऽस्मान्सन्तारयिष्यति ॥
करिष्यति वृषोत्सर्गमिष्टापूर्तं तथैव च ।
पालयिष्यति वार्द्धक्ये श्राद्धं दास्यति चान्वहम् ॥

इति बृहस्पतिश्च ।

पुत्रश्चोत्पत्तिमात्रेण संस्कुर्यादृणमोचनात् ।
पितरं नाब्दिकाच्चौलात्पैतृमेधेन कर्मणा ॥

इति सुमन्तुश्च।

नापुत्रस्य लोकोऽस्तीति, जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासीति,

ऋणमस्मिन्सन्नयत्यमृतत्वं च गच्छति ।
पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम् ॥ इति च—

श्रुतिश्च । विष्णुवासिष्ठात्रप्येवम् । विन्दतीति पाठान्तरं गच्छतीत्यत्र ।

तत्रापि विशेषः, (अ. ९ । १०६ । १०७ । १०८ । १०९)

ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः ।
पितॄणामनृणश्चैव स तस्मात्सर्वमर्हति ॥
यस्मिन्नृणं सन्नयति तेन चानन्त्यमश्नुते ।
स एव धर्मजः पुत्रः कामजानितरान्विदुः ॥
पितेव पालयेत्पुत्रान्ज्येष्ठो भ्रातॄन्यवीयसः ।
पुत्रवच्चापि वर्तेरन् ज्येष्ठे भ्रातरि धर्मतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्येष्ठः कुलं वर्द्धयति विनाशयति वा पुनः ।
ज्येष्ठः पूज्यतमो लोके ज्येष्ठः सद्भिरगर्हितः ॥ इति,
पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते ।
अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम् ॥ (१३७)
इति च मनुः ।
जातमात्रेण पुत्रेण पितॄणामनृणी पिता ।
इत्यत्रिश्च ।
अपुत्रस्य गतिर्नास्ति स्वर्गे नैव च नैव च ।
येन केनाप्युपायेन पुत्रं संपादयेत्खग ॥
इति गारुडं च ।
शङ्खलिखितपैठीनसयश्च,
यत्र क्वचन जातेन पिता पुत्रेण नन्दति ।
तेन चानृणतां याति पितॄणां पिण्डदेन वै ॥ इति ।
अग्निहोत्रं त्रयो वेदा यज्ञाश्च सहदक्षिणाः ।
श्रेष्ठपुत्रस्य पौत्रस्य कलां नार्हन्ति षोडशीम् ॥
पुत्रपौत्रप्रतिष्ठस्य बहुपुत्रस्य जीवतः ।
अस्कन्नवेदयज्ञस्य हस्तमात्रं त्रिविष्टपम् ॥ इति ।

वासिष्ठः, अनन्ताः पुत्रिणो लोका नापुत्रस्य लोकोऽस्तीति श्रूयते अप्रजाः सन्तु पुत्रिण इत्यभिप्रायः प्रजाभिरग्ने अमृतत्वं पश्यामीत्यपि निगमो भवतीति ।

ननु पुत्रजननमात्रेण पितुर्नानृण्यं किं तु सम्यगनुशिष्टेन पुत्रेण शास्त्रीयेषु कर्मस्वनुष्ठितेषु पश्चादानृण्यम्। अत एव वाजसनेयेऽपि ब्राह्मणे पुत्रानुशासनविधिः समाम्नातः, तस्मात्पुत्रमनुशिष्टं लोक्यमाहुस्तस्मादेनमनुशासति यद्यनेन किञ्चिदक्ष्णया कृतं भवति तस्मादेनं सर्वस्मात्पुत्रो मुञ्चति तस्मात्पुत्रो नाम पु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रेणैवास्मिन् लोके प्रतितिष्ठतीति ।

अयमर्थः । अस्ति किञ्चित्सम्प्रतिपत्तिनामकं कर्म । यदा पितुर्मरणावसरो भवति तदा पुत्रमाहूय वेदाध्ययने यज्ञे लौकिकव्यापारे च यद्यत्कर्त्तव्यजातं तस्य सर्वस्य पुत्रे सम्प्रदानं कर्त्तव्यम्। सेयं सम्प्रतिपत्तिः, तस्याञ्च सम्प्रतिपत्तौ यस्मादनुशिष्टः पुत्रोऽधिकारी तस्मादनुशिष्टं पुत्रं परलोकहितमाहुः। अत एव पुत्रानुशासनं कुर्युः पितरः । स चानुशिष्टः पुत्रः स्वपित्रा शास्त्रीयं कर्म अक्ष्णया वक्रत्वेन शास्त्रवैपरीत्येन कृतं भवति एतस्मात्सर्वस्मात्पापाद् इमम् पितरं स्वयं कर्म सम्यगनुतिष्ठन्मोचयति तस्मात्पुन्नाम्नो नरकात् त्रायत इति व्युत्पत्त्या पुत्रो नाम ।

अत एव मनुविष्णू, (मनु. ९ । १३८)

पुन्नाम्नो नरकाद्यस्मात् त्रायते पितरं सुतः ।
तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा ।। इति ।

हारीतः,

पुन्नामा निरयः प्रोक्तश्छिन्नतन्तोश्च तत्र वै ।
पितरं त्रायते यस्मात्तस्मात्पुत्र इति स्मृतः ॥
यस्य पुत्रः शुचिर्दक्षः पूर्वे वयसि धार्मिकः ।
नियन्ता चात्मदोषाणां सन्तारयति पूर्वजान् ।। इति ।

बृहस्पतिश्च,

पुन्नाम्नो नरकात्पुत्रः पितरं त्रायते यतः ।
मुखसन्दर्शनेनापि तदुत्पत्तौ यतेत सः ।।
पौत्रोऽथ पुत्रिकापुत्रः स्वर्गप्राप्तिकरावुभौ ।
रिकूथे पिण्डाम्बुदाने च सुतौ सुपरिकल्पितौ ॥ इति ।

स च पिता स्वयं मृतः पुत्रशरीरेणैवास्मिन् लोके यथाशास्त्रं कर्म कुर्वन्प्रतितिष्ठतीति । एवं सति बहूनां मध्ये यथावद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नुशासनं प्रज्ञामान्द्यादिप्रतिबन्धबाहुल्यात्कस्यचिदेव सम्पद्यते। अनुशिष्टेष्वपि बहुषु यथावदनुष्ठानं कस्यचिदेव । अतो ज्येष्ठः कनिष्ठो वा यस्तादृशः स एवानृण्यहेतुरिति कथं तथा प्रागुक्तमिति चेद्, न।

अनुशासनस्य संप्रतिपत्तिद्वारा विलक्षणपितृकृतपापनिवारणद्वाराऽप्रतिबद्धविलक्षणपरलोकप्राप्तिफलकत्वस्योक्तरीत्या प्रतीयमानत्वेनानृण्याहेतुत्वात् । अत एव लोक्यमित्याद्यक्षरस्वारस्यम्। अत एव प्रागुक्तश्रुतिस्मृत्यादिसङ्गतिः। अन्यथा तद्विरोधो दुष्परिहर एव। अत एव च ज्येष्ठो न देयस्तस्यैव पुत्रकार्यकरणे मुख्यत्वादिति सफलं विज्ञानेश्वरादिभिरुक्तम्। एवं च पुत्रादेस्तत्त्वं सिद्धम्।

तत्रापि विशेषः, सन्निहितत्वेऽपि पुत्रादीनां पतितत्वादि दोषे क्वापि नाधिकारः।

पतितो नाग्निसंस्कारं न क्रियां न च तर्पणम्।
कुर्यादुन्मत्त एवापि नान्यथेत्यब्रवीद्यमः॥

इति स्मृतेः। तथाच अस्वस्थोन्मत्तनास्तिकादिपुत्रसत्त्वे पौत्रादीनां पुत्रप्रतिनिधित्वेनाधिकारः।

एवं—

पितृद्विट् पतितः षण्ढो यश्च स्यादौपपातिकः।
औरसा अपि नैतेंऽशं लभेरन् क्षेत्रजाः कुतः॥

इति नारदोक्तेः— (व्यव. १३। २१)

दायग्रहणेऽपि तथा बोध्यम्। वक्ष्यते चेदमनुपदमेव मूलकृता। तदभावे विभक्ते ऽसंसृष्टिनि पत्यौ स्वर्याते तादृशपरिणीता संयता पत्नी सकलमेव धनं प्रथमं गृह्णाति, तदभावे तादृशी दुहितेत्यादि दायहरणमात्रे इमं क्रमं मूलकृदुक्तवान्—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।
तत्सुता गोत्रजा बन्धुशिष्यसब्रह्मचारिणः ॥
एषामभावे पूर्वस्य धनभागुत्तरोत्तरः ।
स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः ॥ इति ।

अत्र पत्नीत्यनेन तादृशपरिणीतालाभः । पत्युर्न इत्यनुशासनात् ।

अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता ।
पत्ये दद्याच्च सा पिण्डं कृत्स्नमंशं लभेत च ॥
इति वृद्धमनोः,
पत्नी भर्त्तुधनहरी या स्यादव्यभिचारिणी ।
तदभावे तु दुहिता यद्यनूढा भवेत्तदा ॥ इति —
अपुत्रस्याथ कुलजा पत्नी दुहितरोऽपि च ।

इति च कात्यायनाच्च संयतत्वस्य साकल्यस्य च लाभः। आद्ये चशब्दद्वयं मिथः समुच्चये ।तेनांशहरत्वे तदावश्यकत्वं सूचितम् । एवं तदभावेऽप्यन्याभावेऽपि तस्यास्तदावश्यकत्वम्, अन्येन तद्धरणे तस्यैव तदावश्यकत्वं न तस्या इति सूचितम् । धनहरीति तु पचाद्यचष्टित्त्वेन बोध्यम् । विभागकथनानन्तरमस्योक्तत्वाद्विभक्तत्वस्य लाभः । पत्नीत्याद्यपवादस्य संसृष्टिनस्तु संसृष्टीत्यस्य वक्ष्यमाणत्वादसंसृष्टित्वलाभः । यद्यपि—

विभक्ते संस्थिते द्रव्यं पुत्राभावे पिता हरेत् ।
भ्राता वा जननी वाऽथ माता वा तत्पितुः क्रमाद् ॥

इति कात्यायनस्मृतौ क्रमादित्युक्तं, तथा—

"स्वर्यातस्य ह्यपुत्रस्य भ्रातृगामि द्रव्यं तदभावे पितरौ हरेयातां ज्येष्ठा वा पत्नी"

इति शङ्खस्मृतौ तदभावे इत्युक्तम्, एवमन्यत्रापि, तच्च प्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गुक्तमेव, तथापि न तानि क्रमबोधकानि । विकल्पस्य स्मरणात्, मिथो विरोधात् ,

पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वा । इति—

अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात् ।
मातर्यपि च वृत्तायां पितुर्माता हरेद्धनम् ॥

इति च मनुविरोधात् । (अ. ९ । १८५ । २१७)

भ्रातॄणामप्रजाः प्रेयात्कश्चिच्चेत्प्रव्रजेत वा ।
विभजेरन् धनं तस्य शेषास्तु स्त्रीधनं विना ॥
भरणं चास्य कुर्वीरन् स्त्रीणामाजीवनक्षयात् ।
रक्षन्ति शय्यां भर्तुश्चेदाच्छिन्द्युरितासु च ॥

इति नारदविरोधाच्च । व्यव. १३ । श्लो. २५।२६) एतेन—

पुत्रः पौत्रः प्रपौत्रौ वा भ्राता वा भ्रातृसन्ततिः ।

इति दायग्रहणक्रमबोधकमित्यप्यपास्तम् । तस्य श्राद्धप्रकरणस्थत्वाच्च । एवं च विकल्पघटितवाक्यानां न क्रमबोधकत्वमिति सिद्धम् । स्पष्टश्चायमर्थः पूर्वमीमांसायां, "तुल्यार्थास्तु विकल्पेरन्" इत्याधिकरणे । एवं च तेषामधिकारप्रदर्शनमात्रपरत्वम् । तथा सति शङ्खवाक्यं नारदवाक्यं च संसृष्टिविषयकम्।

संसृष्टानां तु योभागस्तेषामेव स इष्यते ।

इति संसृष्टिनां प्रस्तुतत्वात् । तथा च तत्स्त्रीणामनपत्यानां भरणमात्रप्रतिपादनपरं तदिति तत्त्वम् ।

न च भ्रातॄणामप्रजाः प्रेयादित्यस्य संसृष्टिविषयत्वे संसृष्टानां तु यो भाग इत्यनेन पौनरुक्त्यमिति वाच्यम्। पूर्वोक्तविवरणेन स्त्रीधनस्याविभाज्यत्वस्य तत्स्त्रीणां भरणमात्रस्य च विधाने तत्तात्पर्यात् । मनुवाक्यं कात्यायनवाक्यं च पत्न्याद्दिगणासत्त्वविषयतयाऽपि सुयोजमिति न कश्चिद्दोषलेशः । तत्र श-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ङ्गविषये तदभावे इत्यस्य मध्यमणिन्यायेनान्वयः। तत्राद्ये तस्य पौत्राद्यभावे इत्यर्थः। द्वितीये संसृष्टिनो भ्रातुरभावे इत्यर्थः। तस्य तत्त्वाभावे इति यावत्। पत्न्याद्यसत्त्वे इति शेषः। यद्वोक्तरीत्योत्तरान्वय्येव तत्। एवं पिता हरेदपुत्रस्येति मनुवाक्यं विभक्ते संस्थिते इति कात्यायनवाक्यांशभूतं च संसृष्टिविषयमेव। तदेकवाक्यतानुरोधात्। संसृष्टत्वं च यतो न येन केन चित्सह, अपि तु पित्रा भ्रात्रा पितृव्येण वा।

विभक्तो यः पुनः पित्रा भ्रात्रा वैकत्र संस्थितः।
पितृव्येणाथवा प्रीत्या स तत्संसृष्ट उच्यते॥

इति बृहस्पतेः।

अनपत्यस्य पुत्रस्येति मनुवाक्यांशस्तु पत्नीदुहितृदौहित्राद्यभावपरः। उक्तहेतोः। अत एव मातर्यपिच वृत्तायामिति अपिचेत्येतद्बलात्पित्रादिभ्रातृसुतान्तानामप्यभावपरम्। अत एव कातीये तत्पितुरिति पूर्वान्वायि। तत्पितुर्माता वा, पितामहीत्यर्थः। अन्यथा पौनरुक्त्यादिति स्पष्टमेव। तत्र क्रमादित्यस्य तु पौत्रादिक्रममवीक्ष्येत्यर्थः। ल्यब्लोपे पञ्चमी। यद्वा। क्रमं वंशपरम्पराम् अत्ति भक्षयतीति क्रमात् सा। यद्वा। क्रमं धनसम्बन्धक्रमम् अतति गच्छतीति क्रमात्। सर्वविशेषणमिदम्। एवमन्यत्रापि यथासंभवं योजना प्राक् प्रतिपादितैव। विकल्पादिरहितबहुविषयसंग्राहकैषामभावइत्यर्द्धघटितैकमूलानुरोधेनान्येषामतादृशानामेव वाक्यानाम् अन्यथा योजनमुचितं, लाघवात्। अन्यथा गौरवं स्पष्टमेव। अत्र सर्वत्र मृतनिरूपितप्रत्यासत्तिरेव तद्ग्रहणे हेतुत्वेन विवक्षिता। अत एव—

अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेत्।

इति मनुः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बहवो ज्ञातयो यत्र सकुल्या बान्धवास्तथा।
यस्त्वासन्नतरस्तेषां सोऽनपत्यधनं हरेत्॥
इति बृहस्पतिः,

पुत्राभावे प्रत्यासन्नः सपिण्ड इति आपस्तम्बश्च सङ्गच्छते। सा च प्रत्यासत्तिः शास्त्रतो लोकतश्च यथायथमवयवान्वयादिद्वारेण बोध्या। तथैव च पत्नीत्यादिना प्रदर्शितं तेन। अत एव पुत्रिकासुत इत्यत्र—

"अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम्।
अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति॥
इति वासिष्ठोक्त्या—
अपुत्रोऽनेन विधिना सुतां कुर्वीत पुत्रिकाम्।
यदपत्यं भवेदस्यां तन्मम स्यात्स्वधाकरम्॥

इति मनूक्त्या च(अ.९।१२७)संविदा दत्ता कन्या पुत्रिका, तत्पुत्रत्वादेवौरससमत्वमित्येकां व्याख्यां कृत्वा, पुत्रिकैव तादृशी सुतः स औरससम एव, पित्रवयवानामल्पत्वान्मात्रवयवानां बाहुल्याच्च, अत एव वसिष्ठः तृतीयः पुत्रिकैवेति" इति व्याख्यान्तरं कृतं तेन। पत्नीत्यादिवाक्ये एवकारस्य सर्वत्र संबन्धः। तेन अन्यव्यवच्छेदः। समवाये तत्फलम्। तत्फलितार्थ एव व्याख्यायां प्रथममिति। प्रत्यासत्त्यतिशयादिति तद्भावः। तदभावे दुहिता।

यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा। (अ.९।१३०)
तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेत्॥ इति मनुः।
भर्त्तुर्धनहरी पत्नी तां विना दुहिता स्मृता।
अङ्गादङ्गात्संभवति पुत्रवद् दुहिता नृणाम्॥
तस्मात्पितृधनं त्वन्यः कथं गृह्णाति मानवः।
इति बृहस्पतिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुत्राभावे तु दुहिता तुल्यसंतानदर्शनात् ।
पुत्रश्च दुहिता चोभौ पितुः सन्तानकारकौ ॥
इति नारदश्च । (व्यव. १३ । ५०)

तत्र चोढानूढासमवायेऽनूढैव । प्रागुक्तकात्यायनोक्तेः । एवमूढासु प्रतिष्ठिताऽप्रतिष्ठितासमवाये ऽप्रतिष्ठितैव । तदभावे प्रतिष्ठिता । स्त्रीधनं दुहितॄणामप्रत्तानाम् अप्रतिष्ठितानां चेति गौतमवचनस्य पितृधनेऽपि तुल्यत्वात् । नेदं पुत्रिकाविषयम् । तत्समः पुत्रिकासुत इत्यस्य पुत्रप्रकरणे उक्तत्वात् ।

चेन दौहित्रसमुच्चयः । अत एव—
अपुत्रपौत्रसन्ताने दौहित्रा धनमाप्नुयुः ।
पूर्वेषां तु स्वधाकारे पौत्रा दौहित्रका मताः ॥
इति विष्णुः,
अकृता वा कृता वापि यं विन्देत्सदृशात्सुतम् ।
पौत्री मातामहस्तेन दद्यात्पिडं हरेद्धनम् ॥ इति– (१३६)
दौहित्रो ह्यखिलं रिक्थमपुत्रस्य पितुर्हरेत् ।
स एव दद्यात् द्वौ पिण्डौ पित्रो मातामहाय च ॥ (१३२)
पौत्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्मतः ।
तयोर्हि मातापितरौ संभूतौ तस्य देहतः ॥ (१३३)
पौत्रदौहित्रयोर्लोके विशेषो नोपपद्यते ।
दौहित्रोऽपि ह्यमुत्रैनं सन्तारयाति पौत्रवत् ॥ (१३९)
इति च मनुश्च (अ. ९) सङ्गच्छते ।

अत्र चेन दौहित्रवत्तदभावे दौहित्र्या अपि समुच्चय इति प्राक् प्रतिपादितमत्रापि बोध्यम् ।

तदभावे पितरौ । तत्र प्रथमं माता ततः पितेति व्याख्याकृत् । आदौ पिता ततो मातेति तत्त्वं तु प्रागुक्तमेव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो भ्रातरः । तथेत्यस्यार्थः उक्त एव । आवृत्त्या द्वितीयस्य तथेत्यस्य प्रत्यासत्तिक्रमेणेत्यर्थः । तेन सोदरासोदरसमवाये प्रथमं सोदरास्तदभावे ऽसोदरा इति सूचितम् । अत्र भ्रातर इत्यनेन तथैकशेषेण भगिनीनामपि ग्रहणम् । तत्रापि क्रमो भ्रातृवदिति प्रागुक्तमेवेति बोध्यम् ।

तथेत्यस्य पितृक्रमेणेत्यर्थकस्य तत्सुता इत्यत्रापि मध्यमणिन्यायेनान्वयः । तत्सुता इत्यस्य तयोर्भ्रातृभागिन्योः सुता इत्यर्थः । सुता इत्यत्र प्राग्वत् कन्यानामपि ग्रहणं बोध्यम् । तच्चोक्तं प्राक् ।

गोत्रजपदेन पितामही, समानगोत्रजाः पितामहस्नुषादयः सप्त सपिण्डाः, समानोदकाश्च सप्त तदुपरितनाः, जन्मनामज्ञानावधिका वा ।

बन्धुशब्देन भिन्नगोत्रं बन्धुत्रयम् आचार्यश्च । चार्थकतथाशब्दस्य चरमे उत्कर्षात्सब्रह्मचारिणश्चेत्यर्थः । तेन बन्धुशिष्यमध्यवर्त्याचार्यस्य सब्रह्मचार्यनन्तरस्य ऋत्विक्श्रोत्रियादेश्च समुच्चय इति केचित् । तत्त्वं तु प्रागुक्तम् । प्रागुक्तसपिण्डाभावे आचार्यस्तदभावे अन्तेवासीत्यापस्तम्बः । अन्तेवासी ऋत्विग्वेति शङ्खः । श्रोत्रिया ब्राह्मणस्यानपत्यस्य रिक्थं भजेरन् इति गौतमः ।

सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः ।

इति मनुः ।

ब्राह्मणार्थस्य तन्नाशे इति नारदश्चेति ।

पत्नीत्यादि न पिण्डदानक्रमबोधकं, तस्यात्रानुक्तत्वात् । अत एव पिण्डदोंऽशहरश्चैषामित्यस्यानुवृत्तिसंभवेऽप्येषामभावे इत्याद्युक्तं तेन भगवता । अत एव च—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुख्यगौणसुताभावे दायादक्रम उच्यते।

इत्येवमवतारितमिदं तेन। दायादशब्देन च रिक्थभागिनः। व्युत्पत्तेः।

विश्वामित्रं तु दायादं गाधिः कुशिकनन्दनः।
जनयामास पुत्रं तु तपोविद्याशमात्मकम्॥

इति हरिवंशोक्तेः पुत्रे इव दायादानपि दापयेदित्यादौ पुत्रभिन्नेऽपि तत्र तस्य प्रसिद्धत्वात्। अत एव—

"पुत्रान् द्वादश द्वादश यानाह नृणां स्वायंभुवो मनुः।
तेषां षट् बन्धुदायादाः षडदायादबान्धवाः॥
औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट्॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा।
स्वयंदत्तश्च शौद्रश्च षडदायादबान्धवाः॥

इति मनुवाक्ये—

स्वपितृसपिण्डसमानोदकानां संनिहितरिक्थहरान्तराभावे पूर्वषट्कस्य तद्रिक्थहरत्वं नोत्तरस्य, बान्धवत्वं तु समानगोत्रत्वेन सपिण्डत्वेन चोदकप्रदानादिकार्यकरत्वं वर्गद्वयस्यापि सममेव, गोत्ररिक्थे इति मनुवाक्ये दत्त्रिमग्रहणस्य पुत्रप्रतिनिधिप्रदर्शनार्थत्वात्" इत्येवमुक्तमूलाविरोधाय तेन व्याख्यातम्। पित्रादिधने तु सर्वेषामविशेषश्चरमभिन्नानां पुत्रिकासुतघटितानां तेषाम्, अस्मात् प्रागुक्तमनोश्च। अत एव तयोर्मिथो विरोधोऽपि न। अग्रे साधकानि तु पूर्वमुक्तान्येव। तस्मात् स्थितमेतत् तदभावे यथाक्रमं पत्न्यादयो धनभाज इति।

नन्वस्तु दायहरणे प्रागुक्तम्। तथापि अन्येषां पुत्रासाधारणकार्याणां केषांचिद्यथायथं पत्न्यादिष्वसंभवेन तत्र विचा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रप्रसक्त्यभावेऽपि तदभावे पिण्डदानादौ कथं क्रम इति चेत्, शृणु। प्रागुक्तरीत्या दायहरणे सिद्धेन क्रमेणैव "यश्चार्थहरः स पिण्डदायी" इति विष्णूक्तेः पिण्डदानादौ क्रम इत्युत्सर्गः। तत्र पत्नीविषये वाक्यमपि प्रागेव वृद्धमनूक्तमुक्तम्। तत्र कृत्स्नमंशमित्यादिना दायहरत्वे एव तस्या अधिकारः सूचितस्तस्य सधनत्वे। एतदर्थमेव तत्र तदुपादानम्। अन्यथाऽपि तदभावे सैवाधिकारिणी। अत एव—

भार्या पिण्डं पतिर्दद्याद्भर्त्रे भार्या तथैव च।
श्वश्र्वादेस्तु स्नुषा चैव तदभावे तु सोदरः॥ इति—
पितुः पुत्रेण कर्त्तव्याः पिण्डदानोदकक्रियाः।
पुत्राभावे तु पत्नी स्यात्पत्न्यभावे तु सोदरः॥
इति च शङ्खः,
पत्नी कुर्यात्सुताभावे तदभावे सहोदरः।
इति कौर्मम्,
भ्रातुर्भ्राता स्वयं चक्रे तद्भार्या चेन्न विद्यते।
तस्य भ्रातृसुतश्चक्रे यस्य नास्ति सहोदरः॥

इति ब्राह्मं च सङ्गच्छते। दुहितुस्तु तद्धनहर्तृत्वादेव पिण्डादिदत्वम्। एवं च तदभावे न तस्यास्तत्प्रदत्वम्। दौहित्रविषये वाक्यमपि मन्वाद्युक्तं प्रागेवोक्तम्। तत्र हरेद्धनमित्यादिना तस्यापि दायहरत्वे एवाधिकारः सूचितः। अत एव—

श्राद्धं मातामहानां च ह्यवश्यं धनहारिणा।
दौहित्रेण विधिज्ञेन कर्त्तव्यं विधिवत्सदा॥

इति लौगाक्षिः सङ्गच्छते। अत एव मातामहश्राद्धं मासिश्राद्धे सूत्रभाष्यकारौ न ब्रूत इति सुदर्शनेनोक्तम्। अत एव च आश्वलायनेनापि सूत्रे मातामहश्राद्धं नोक्तम्। एवं च—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथा व्रतस्थोऽपि सुतः पितुः कुर्यात् क्रियां नृप ।
उदकाद्यां महाबाहो दौहित्रोऽपि तथाऽर्हति ॥
इति मात्स्यं भविष्यत्पुराणं च,
मातामहानामप्येवं श्राद्धं कुर्याद्विचक्षणः ।
मन्त्रोहेन यथान्यायं शेषमूहविवर्जितम् ॥
इति विष्णुस्मरणम्,
मातुः पितरमारभ्य त्रयो मातामहाः स्मृताः ।
तेषां तु पितृवत् श्राद्धं कुर्युर्दुहितृसूनवः ॥

इति पुलस्त्यस्मरणं च एकवाक्यतानुरोधेन तत्परतया योज्यम् । पितृवच्छ्राद्धं पार्वणम् । येषां सूत्रे तदुक्तं तेषां तु सर्वथा तदावश्यकम् । यद्वा तानि पुत्रिकासुतविषयाणि । इदमग्रे स्फुटीभविष्यति । दौहित्र्या अप्येवम् ।

न पुत्रस्य पिता चैव नानुजस्य तथाऽग्रजः ।

इति बौधायनाद्युक्तेरेतदभावे दायहरत्वेऽपि पित्रोर्न पिण्डदानादावधिकारः । भ्रातृतत्पुत्रयोस्तु यथाक्रमं वचनमप्यनुपदमेवोक्तम् । अत एव सर्वथाऽपि तयोरनुक्रममधिकारः । तस्य भ्रातृसुतश्चक्रे इत्यादि प्रागुक्तमप्येवंपरमेव । मूलानुरोधात् । तत्र भ्राता कनिष्ठ एव न ज्येष्ठः । अंशहरत्वेऽपि उक्तनिषेधादिति बोध्यम् ।

ननु पिण्डदानादावप्येवं क्रमे स्वीक्रियमाणे—
भ्रातॄणामेकजातानामेकश्चेत्पुत्रवान् भवेत् ।
सर्वांस्तांस्तेन पुत्रेण पुत्रिणो मनुरब्रवीत् ॥
बहूनामेकपत्नीनामेका चेत्पुत्रिणी भवेत् ।
सर्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः ॥
इति मनोः, (अ. ९ । १८२ । १८३)
यद्येकजाता बहवो भ्रातरस्तु सहोदराः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकस्यापि सुते जाते सर्वे ते पुत्रिणः स्मृताः ॥
बह्वीनामेकपत्नीनामेष एव विधिः स्मृतः।
एका चेत्पुत्रिणी तासां सर्वासां पिण्डदस्तु सः॥

इति बृहस्पतेश्च का गतिः । अयं मनुस्मृत्यादौ पाठः। भट्टवार्तिके कौस्तुभे च सर्वे तेनैवेति पाठः। अन्यत्र सर्वे ते तेनेति पाठः। मेधातिथिसंमतस्त्वाद्यपाठः। यद्येक इति कौस्तुभे पाठः। सर्वासामिति मनुस्मृत्यादौ पाठः। पुत्रिण्यो मनुरब्रवीदिति कौस्तुभादौ पाठः । एतेषां यथाश्रुतार्थत्वे त्रयोदशपुत्रत्वापत्त्या पुत्रान् द्वादश यानाहेतिमन्वाद्युक्तद्वादशसंख्याविरोधापत्तिः । अपुत्रदायाधिकारिक्रमबोधकोक्तमूलवाक्ये भ्रातृसुतानां नवमस्थानस्थितिविरोधापत्तिः। पिण्डाद्यधिकारक्रमबोधकवाक्येऽपि पत्नी भ्राता च तज्जश्चेत्यादौ तृतीयस्थानस्थितिविरोधापत्तिश्च । तेषां तद्वत्पुत्रत्वे पत्न्याः पूर्वमेव निवेशौचित्यादिति चेन्न । तेषां किञ्चित्कार्यवत्त्वातिदेशपरत्वेन तेन तेषां वंशाविच्छितेः परलोकस्य पितृऋणदोषापाकरणस्य च करणेन तदर्थं सर्वपुत्राभावे पत्न्यादिसत्त्वे दत्तकपरिग्रहो नेति तात्पर्यात्। अत एवैकजातानामिति हेतुगर्भं विशेषणमप्यर्थवत् । तत्र च पुमान् स्त्रियेत्येकशेषः । सहोदरा इति बृहस्पत्येकवाक्यत्वात्। अत एवैकमातापितृकाणामिति व्याख्यातं मेधातिथिना । अनेन तेषामेव तथा नियमो न भिन्नपितृकाणां भिन्नमातृकाणां चेति सूचितम्। अत एवाभियुक्ताः "अत्रैकजातग्रहणं भिन्नोदराणामेकपितृकाणामपि सपिण्डान्तरलाभदशायां भ्रातृसुतनियमो नेति ज्ञापनार्थं न तु भ्रातृसुतस्याग्राह्यत्वज्ञापनार्थम्।

ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचित्।

इति वृद्धगौतमवदत्र निषेधस्मृतेरनुपलम्भात् । पुत्रवा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निति मतुपा न त्वेवैकामिति निषेधस्याप्यत्रानवकाश" इति। अत एव च सपत्नीविषये वचनान्तरारम्भः। भ्रातॄणामिति निर्धारणे षष्ठी। अत एव मध्ये इति तेन व्याख्यातम्। तेन ह्येकीयावयवान्वयेनैकमातापितृकत्वेनैकत्वं यथा तेषां तथैकावयवान्वयेन सर्वावयवान्वयसत्त्वेनैकपुत्रत्वं सर्वेषामिति सूचितं द्रौपदीवत् द्व्यामुष्यायणवच्च। अत एव तेनैकपुत्रेण सर्वान्भ्रातॄन् सपुत्रान्मनुराहेति तेन व्याख्यातम्। एतेन प्रागुक्तं पाठान्तरं निरस्तम्। अत एव च सर्वे ते इत्युक्तिसङ्गतिः। अन्यथाऽन्ये ते इत्यादि ब्रूयात्। भ्रातृपदं स्फुटतया भगिनीनिराससूचनद्वारा विषयप्रदर्शनार्थम्। यद्यपि भ्रातृपुत्रावित्येकशेषस्यापि संभवस्तथापि—

ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचित्।

इति वृद्धगौतमोक्तेर्नेति पुमपत्यानामेव ग्रहणम्। एकः, एकोऽपि। एकस्यापि सुते जाते इति तदेकवाक्यत्वात्। अनेन द्व्यादेस्तत्त्वे सुतरां तथेति सूचितम्। पुत्रवानित्यत्र पुत्रपदमौरसपरम्। तत्रैव तस्य मुख्यत्वात्। जाते इति तदेकवाक्यत्वाच्च। अनेनान्यत्रायं नियमो नेति सूचितम्। अत्र पुत्रत्वेनैकानेकपुत्रप्रतीत्या सर्वविषयमिदम्। अग्रे तेनेत्याद्युक्तिस्तु एकत्र तथात्वेऽनेकत्र तथात्वं निर्विवादमित्येवंपरा। चेदित्यनेन जनकस्यैवातत्त्वे सर्वेषां तत्त्वं दूरापास्तमिति सूचितम्। अत एव भवेदिति संभावने लिङ्। अत्र सर्वं वाक्यमिति न्यायेनैकस्यैव द्वयोरेव त्रयाणामेव वेत्यादि क्रमेण बोध्यम्। अत एवान्ये च पुत्ररहिता इति तेन व्याख्यातम्।

किं च भ्रातॄणामित्यनेन न तत्र पुत्रत्वातिदेशः। तथा हि सति पुत्रिण इति पुत्रवतीरिति च पदद्वयमाधिकं स्यात्। तेन पुत्रेणेत्येकेनैव पुत्रत्वातिदेशासिद्धेः। पुत्रित्वातिदेशस्तेनेति चेत्, लाघवात्तदेवास्तु,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृतं पुत्रत्वातिदेशेन। सोऽपि परिशेषात्कार्यातिदेशः। पुत्रिणः पुत्रवतीरिति श्रवणात् तत्र तद्धर्मातिदेशः। तत्फलं तूक्तं वक्ष्यमाणं चेति दिक्।

उक्तं चैतत्स्मृतिपादे शिष्टाचारप्रामाण्यप्रतिपादके *अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन् (पू.मी. १।३।७)इति सूत्रे भट्टाचार्यैः, "रामभीष्मयोस्तु स्नेहपितृभक्तिवशाद्विद्यमानधर्ममात्रार्थदारयोरेव साक्षाद्व्यवहितापत्यकृतपित्रानृण्ययोर्यागसिद्धिः। हिरण्मयीसीताकरणं च लोकापवादभीत्या त्यक्तसीतागतानृशंस्याभावाशङ्कानिवृत्त्यर्थम्। भीष्मश्च—

भ्रातृणामेकजातानामेकश्चेत्पुत्रवान्भवेत्।
सर्वे तेनैव पुत्रेण पुत्रिणो मनुरब्रवीत्॥

इत्येवं विचित्रवीर्यक्षेत्रजपुत्रलब्धपित्रनृणत्वः। केवलं यज्ञार्थपत्नीसंबन्ध आसीदित्यर्थापत्त्याऽनुक्तमपि गम्यते।

यो वा पिण्डं पितृपाणौ विज्ञातेऽपि न दत्तवान्।
शास्त्रार्थातिक्रमाद्भीतो यजेतैकाक्यसौ कथम्॥" इति।

व्याख्यातं च न्यायसुधायां भट्टसोमेश्वरशर्मभिः, "रामभीष्मयोर्यथा न विरुद्धाचरणकर्तृत्वं तथा विवृणोति रामेति। रतिपुत्रार्थत्वनिरासाय मात्रशब्दः। नन्वेवं सति—

ऋतुस्नातां तु यो भार्यां संनिधौ नोपगच्छति।
तस्या रजसि तं मासं पितरस्तस्य शेरते॥

इति विहितातिक्रमात्प्रत्यवायः स्यादित्याशङ्क्य स्नेहपितृभक्तिवशादित्युक्तम्। रामेण सीतास्नेहाद्भार्यान्तरागमनव्रतग्रहणात्, भीष्मेण च शन्तनवे सत्यवती तत्पितरं याचिता त्वयि महाबले राज्याभिलाषुके तिष्ठति एतस्याः पुत्राणां राज्यालाभान्नेमां ददामीति तत्पित्रा प्रत्याख्याते तेन राज्यं नाहं करिष्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मीति प्रतिज्ञाते त्वय्यनिच्छत्यपि त्वत्सन्ततिभयान्नैतस्याः संतती राज्यभागिनी स्यादिति तत्पित्रा पुनः प्रत्याख्याते—

नापत्यहेतोरपि च करिष्ये तद्विनिश्चयम् ।
अद्य प्रभृति मे दाश ब्रह्मचर्यं भविष्यति ॥

इति पितृभक्त्या ब्रह्मचर्यव्रतग्रहणात्, नैमित्तिकेन च व्रतेन नित्यस्य ऋतुकालगमनस्य बाधाद् धर्ममात्रार्थमहं भार्यां परिणेष्यामीति उक्त्या परिणीताया अगमनेऽप्यदोष इत्याशयः। एवमप्यनपत्यत्वेन पित्रृणानपाकरणात्प्रत्यवायः स्यादित्याशङ्क्य साक्षादित्युक्तम् । साक्षादपत्याभ्यां कुशलवाभ्यां कृतपित्रानृण्यो रामः, व्यवहितैर्विचित्रवीर्यस्यापत्यैर्धृतराष्ट्रादिभिः कृतपित्रानृण्यो भीष्मः । ननु रामस्य धर्मार्थं दारान्तरसद्भावे—

यज्ञे यज्ञे प्रकुरुते सीतां पत्नीं हिरण्मयीम् ।

इति हिरण्मयीसीताकरणमपार्थकं स्यादित्याशङ्क्याह हिरण्मयीति । अपवादभीत्या त्यक्ता या सीता तद्गतं तद्विषयं यदानृशंस्यमनैष्ठुर्यं तदभावाशङ्कानिवृत्त्यर्थम् । रावणापहारदूषितां सीतां रामो भजते इति लोकापवादभयमात्रेणासौ त्यक्ता, न सीताया दुष्टत्वात् नापि रामस्य सीतायां नैष्ठुर्यमिति द्योतयितुम् । लोकापवादभीतिं प्रति त्यागस्य नित्यसापेक्षत्वात्तत्प्रदर्शनाय त्यक्ताशब्दस्य सीतापदेन सह सापेक्षसमासः कृतः । कथं व्यवहितापत्यकृतपित्रानृण्यता भीष्मस्येत्यपेक्षायामाह भीष्मश्चेति । ननु तयोर्धर्ममात्रार्थं दारसद्भावः क्वचिदपि पुराणेतिहासयोरनुक्तः केन प्रमाणेनावगम्यतइत्याशङ्क्याह केवलमिति । अपिशब्देनापत्यहेतोः अद्यप्रभृतीतिच विशेषणसामर्थ्यादेवमवगम्यते इति सूचितम् । ननु मोहादप्यनुष्ठानोपपत्तेर्नैकान्ततोऽर्थापत्तिः संभवतीत्याशङ्क्य—

श्राद्धकाले मम पितुर्मया पिण्डः समुद्यतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तं पिता मम हस्तेन भित्त्वा भूमिमयाचत ॥
नैष कल्पे विधिर्दृष्ट इति निश्चित्य चाप्यहम् ।
कुशेष्वेव तदा पिण्डं दत्तवानविचारयन् ॥

इति भीष्मस्यात्यन्तनैपुण्यान्मोहासंभवं दर्शयितुमाह यो वेति" इति । अत्र नैमित्तिकेन नित्यस्य बाध इत्यंशो धर्मार्थे दारान्तरसद्भाव इत्यंशश्च न युक्त इति प्रतिपादितं गुरुचरणैर्मञ्जूषायां तत एव बोध्यम् ।

न चैवं द्वादशविधपुत्रप्रतिपादनानन्तरं "यत्तु भ्रातॄणामेकजातानामित्यादि, तदपि भ्रातुष्पुत्रस्य पुत्रीकरणसंभवे अन्येषां पुत्रीकरणनिषेधार्थं, न पुनः पुत्रत्वप्रतिपादनाय, तत्सुता गोत्रजा बन्धुरित्यनेन विरोधात्" इति व्याख्याकृदुक्तं विरुध्येतेति वाच्यम् । आशयानवबोधात् । तथा हि । किं तन्निषेधः शाब्दोऽर्थ उत तात्पर्यार्थः । नाद्यः । अक्षरमर्यादया तदप्रतीतेः । नान्त्यः । संभावितशाब्दत्यागेन तदङ्गीकारे निर्बीजत्वात् । तस्मान्नेदं युक्तम् । नन्वस्तु यथाश्रुतसंभवोऽत आह न पुनरिति । पश्चादित्यर्थः । द्वादशविधपुत्राभावे पत्न्यादिसत्त्वे इत्यर्थः । अत एवाह तत्सुता इति । तथा सति इतरपुत्रवत्पत्न्याः पूर्वमेव निवेशौचित्येन तथोक्तिविरोधः स्पष्ट एव । तथा सति त्रयोदशपुत्रत्वापत्त्या पुत्रान् द्वादश यानाहेति द्वादशसंख्याविरोधापत्तिश्चेत्यपि बोध्यम् । तथा च न तस्य तदर्थप्रतिपादने तात्पर्यं किं त्वेतदर्थखण्डने इति बोध्यम् । अत एव वा तत्रैव हेतूपन्यासो न तु तत्रेति भावः।

नन्वेवं कस्तर्हि वचनार्थ इति चेत्, प्रागुक्त एव वार्तिकसम्मत इति बोध्यम् । तदनुक्तिस्तु अन्यत्र तस्योक्तत्वेन स्पष्टत्वात् । एतदुक्तिस्तु एकदेश्युक्तार्थान्तरनिरासस्ूचनपूर्वकविरोधखण्डनमात्रतात्पर्येणेति । तथा च तत्र नाग्रहो ऽपित्वत्रेति बोध्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतेन आशौचनिर्णयस्था गुरुचरणोक्तिरपि व्याख्याता। तथा च वार्त्तिकैकवाक्यता सिद्धा। तथा च द्वादशपुत्रभिन्नेन भ्रातृसुतेन तादृशपितृव्यस्य प्रागुक्तकार्यसिद्ध्या तदर्थं पत्न्यादिसत्त्वे पुत्रान्तरपरिग्रहो न कर्त्तव्य इति तत्त्वम्।

एतेन "भ्रातॄणामिति सोदरभ्रात्रभावविषयमविभक्तविषयं चेति न पुत्रत्वातिदेशोऽयम्। अतस्तत्र सति एकादशपुत्राः प्रतिनिधयो न कार्याः, स एव भ्रातॄणां पिण्डदोंऽशहरश्च" इति वाचस्पतिमेधातिथिकल्पतरुरत्नाकराद्युक्तं परास्तम्। उक्तयुक्तेः। द्वादशपुत्राभावे पत्नीत्यादिमूलोक्तेश्च।

अत एव "तस्माद्दत्तकपुत्रप्रशंसेयमिति विज्ञानेश्वर" इति इति निर्णयसिन्धूक्तं, दिनकरोद्द्योतोक्तं, "भ्रातॄणामित्यादि पुत्रित्वातिदेशपरं तत्फलं तु पुन्नामनरकाप्राप्तिः पुंसः स्त्रियाः सपिण्डनार्हत्वमुभयोः कृत्रिमाद्यकरणं च" इति मिश्रादिभिरुक्तं चापास्तम्।

नन्वेवमपि मन्वादिवाक्यस्योक्तार्थकत्वे न भीष्मविषये प्रवृत्तिः, भीष्मविचित्रवीर्यौ भिन्नमातृकावेकपितृकौ, व्यासविचित्रवीर्यावेकमातृकौ भिन्नपितृकौ यथा। किं च। तस्य धृतराष्ट्रादिः क्षेत्रजो नौरसः। एवं च कथं वार्तिकादिसङ्गतिरिति चेन्न। तत्र तदविषयत्वेन तदंशेऽपि तस्यायुक्तत्वेऽपि मनुवाक्यस्य तदर्थकत्वे दोषाभावेन प्रकृतेष्टार्थसिद्धेरप्रत्यूहत्वात्। अत एव पितृभक्त्यैव तस्य पित्रृणापाकरणम्। अग्निहोत्रादिना देवर्णमुक्तिः। किं च। त्रिभिर्ऋणवान् इत्यादिश्रुतिर्न नैष्ठिकब्रह्मचारिविषया, तदृणापाकरणस्य ब्रह्मचर्येणाग्निकार्यादिना च सिद्धेः स्मृतिषूक्तत्वात्, इति गुरुचरणैरुक्तं तत्र।

यदि तु वार्त्तिकोक्तिरपि तदंशे योजनीयेत्याग्रहस्तर्हि इत्थं योज्या। एकजातानामित्यत्रैकशब्दः प्रधानपरः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

माता भस्त्रा पितुः पुत्रो येन जातः स एव सः।
तस्माद्भरस्व दुष्यन्तं माऽवमंस्थाः शकुन्तलाम्॥
इति भारतोक्तेः।
बीजस्यै व च योन्याश्च बीजमुत्कृष्टमुच्यते।
सर्वभूतप्रसूतिर्हि बीजलक्षणलक्षिता॥

इति मनूक्तेश्च।(अ.९।३५)क्षेत्रजे तु वैपरीत्यं वाचनिकम्। तथा चैकपितृकत्वमात्रं विवक्षितम्। बृहस्पतिवाक्ये सहोदरत्वमपि पित्रुदरमादायैव। अत एव सोदरा इत्यनुक्तिः।बहव इति तु तत्र स्पष्टार्थम्।बहवोऽपीति तदर्थः।यद्वा भूयांसोऽपीत्यर्थः। कपिञ्जलाधिकरणन्यायेन बहुत्वस्य बहुवचनबोधितस्य त्रित्वे पर्यवसानमिति व्यवच्छेदाय हि बहव इत्युक्तम्। अथ वा तुशब्दस्य चार्थत्वेन व्युत्क्रमेण च सहोदराश्चेति वाक्यान्तरम्। तथा चोभयोरपि तत्प्रतिपादनम्।तदेकवाक्यतया मनुवाक्यस्यापि प्रागुक्तरीत्याऽर्थद्वयं बोध्यम्। अत एवैकयोनिप्रसूतानामिति स्मृतिसारसमुच्चयोक्तपाठः सङ्गच्छते। अत एव पुत्रवानित्यत्र पुत्रपदं मातापित्रन्यतरजन्यपरम्। तत्र जातेइत्युक्तिस्वारस्याच्च। एवं च तद्विषयता तत्र स्पष्टैवेति।

नन्वेवमपि—
अपुत्रस्य पितृव्यस्य तत्पुत्रो भ्रातृजो भवेत्।
स एव तस्य कुर्वीत श्राद्धं पिण्डोदकक्रियाम्॥
बह्वीनामेकपत्नीनामेष एव विधिः स्मृतः।
एका चेत्पुत्रिणी तासां सर्वासां पिण्डदस्तु सः॥

इति बृहत्पराशरोक्तिविरोध एवेति चेन्न। आशयानवबोधात्।

तथा हि। तत्र पूर्वार्धस्योक्त एवार्थस्तत्तुल्यत्वात्। अपुत्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्य पितृव्यस्य भ्रातृजस्तत्पुत्रो भवेदित्यन्वयः। अपुत्रपितृव्यत्वावच्छिन्नस्य भ्रातुः सुतः तस्यापि पितृव्यत्वावच्छिन्नस्यापि पुत्रो भवेदित्यर्थः । तदेकवाक्यत्वात् । सर्वं वाक्यमिति न्यायेन व्याख्यानेतूक्तविरोधः शास्त्रान्तरविरोधश्च स्पष्ट एव। भ्रातृज एकोऽपि। अत एव तदेकवाक्यता। अपुत्रस्येत्यनेन पुत्रसत्त्वे न तथेति सूचितम्। अत एव पूर्वं तथा व्याख्यातम्। तद्व्याख्यानानुरोधेन पितृपत्न्यः सर्वा मातरः स्मृता इतिवत् प्रागुक्तरूपम् पुत्रकार्यकारित्वं विधीयते । तेन तदेकवाक्यता इष्टसिद्धिर्दोषाभावश्चेति सिद्धम् ।

नन्वेवमप्युत्तरार्द्धस्य का गतिरिति चेत्, अत्रोच्यते। पूर्वार्द्धेन केषाञ्चित् पुत्रकार्याणां सिद्ध्या तदर्थं तत्परिग्रहं प्रतिपाद्य प्रसङ्गाद्विषयविशेषे पिण्डादिरूपकार्यसिद्धिरपि अत एवेत्याह स एवेति। बुद्धिस्थो विलक्षणभ्रातृपुत्र एवेत्यर्थः। तस्य, तस्यापि पितृव्यत्वावच्छिन्नस्यापि । कुर्वीतेत्यनेन स्वफलार्थं तस्यावश्यकत्वेन तस्य स्वधर्मत्वं सूचितम् । श्राद्धमेकोद्दिष्टादि। पिण्डपदेन दशसु दिनेषु दीयमानाः । उदकमञ्जलिदानादि । क्रियापदेनाग्निसंस्कारादि ।

यद्वा क्रियापदेन कर्मधारयः । अत एव क्रियालोपादित्येव मनुनोक्तम्। तथा चोत्तरार्द्धं प्रागुक्तक्रमेणौरसादिभ्रात्रन्ताभावविषयम्। एवेन गोत्रजादिव्यवच्छेदः। यद्वा। भ्रातुः सुतानां बहूनां सत्त्वेऽपुत्रपितृव्येण कनिष्ठस्य तस्यैव दत्तकत्वेन पुत्रीकरणे तद्विषयम्। एवेन पत्न्यादिव्यवच्छेदः।

यद्वा अविभक्तभ्रातृसुतविषयम् । यद्वा विभक्तसंसृष्टभ्रातृसुतविषयम् । अत्र पक्षद्वये यथा पत्नीसत्त्वेऽपि दायहरत्वं भ्रातुस्तथा पत्न्यादिसत्त्वे भ्रात्रभावे तस्य धनहारित्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भ्रातृसत्त्वे तस्य धनहारित्वेऽपि पिण्डदानादौ तस्यैवाधिकारो नांशहरणप्रयुक्तोऽन्यस्य। तत्र भ्रातृसत्त्वे जीवतिपतृकनिषेधबाधकमिदं, विशेषविहितत्वात्। अत्र पक्षे यथा तस्य भ्रातृसुतश्चक्रे इत्यादिना न विरोधस्तथोक्तं प्राक्। यद्वा। इदं तादृशगतपितृकविषयकमेवास्तु। सर्वथा पत्न्यादिः एवव्यवच्छेद्यः।

वस्तुतस्तु द्वादशविधपुत्राभावे पत्न्यादिसत्त्वे तेषां यथाक्रममुक्तरीत्या दायहरत्वेऽपि श्राद्धादिकमपि वंशाविच्छित्त्यादिवत् भ्रातृसुतेनैव कार्यमिति तदर्थमपि दत्तकपरिग्रहो नेत्यनेन प्रतिपाद्यते इति न पूर्वतो वैरूप्यम्। न च "यश्चार्थहरः स पिण्डदायी" इति विष्णुस्मृतिविरोधः। तद्बाधनार्थमेवास्य प्रवृत्तेः। तथा च "तत्र पुत्रः पितृवित्ताभावेऽपि" इत्यत्र पुत्रपदेनैकादशप्रतिनिधिवदेतस्यापि ग्रहणेनोक्तनियमस्य तदन्यविषयत्ववदेतदन्यविषयत्वमपीति न तद्विरोधः। तत्र पितृवित्ताभावेऽपीत्यस्य तस्य निर्धनत्वेन तदसत्त्वेऽपीतिवदुक्तक्रमेण स्वस्याधिकारेऽपि तत्सत्त्वेऽनधिकारेण तदप्राप्तावपीत्यर्थः। न चैवमपि कथं तस्य पितृत्वं, तस्य साक्षाज्जनके एव प्रसिद्धेरिति वाच्यम्। "पितरो यत्र पूज्यन्ते" "पञ्चैते पितरः स्मृता" इत्यादौ साक्षाज्जनकभिन्नेऽपि पितृशब्दस्य प्रयोगात्। तथा च यन्निरूपितं पुत्रत्वं तत्कार्यकरत्वे च तस्य तत्र ग्रहणमिति न दोषः। तथा च तस्य निर्धनत्वे तथा सत्त्वेऽपि सधनत्वे तदीयौर्ध्वदेहिकाद्युपयोगि तावत्पर्यन्तं तद्वृत्त्युपयोगि च तस्मै दत्त्वा ऽवशिष्टमधिकारिणा ग्राह्यम्। अत एव वित्ताभावेऽपीत्युक्तं, न त्वंशाभावेऽपीति। अत एव—

अदायिकं राजगामि योषिद्भृत्यौर्ध्वदेहिकम्।
अपास्य श्रोत्रियद्रव्यं श्रोत्रियेभ्यस्तदर्पयेत्॥

इति कात्यायनेनोक्तम्। न चैवमपि पत्ये दद्याच्च सा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पिण्डम् इतिवृद्धमनुविरोधः, तस्या अंशहरत्वे तद्दातृत्वपरत्वस्य तस्योक्तत्वेन तद्वैपरीत्यपरतया अत्र पक्षद्वये उक्तत्वादिति वाच्यम् । तस्य सङ्कल्पाग्निदानमात्रपरत्वात् । अत एव—

पूर्वं मृता त्वग्निहोत्रं मृते भर्तरि तद्धनम् ।
लभेत्पतिव्रता नारी धर्म एष सनातनः ॥
जंगमं स्थावरं सर्वं कुप्यं हेम रसाम्बरम् ।
आदाय दापयेच्छ्राद्धं मासषाण्मासिकाब्दिकम् ॥
पितृव्यगुरुदौहित्रान् भर्तुः स्वस्रीयमातुलान् ।
पूजयेत् कव्यपूर्ताभ्यां वृद्धांश्चाप्यतिथीन् स्त्रियः ॥

इति प्रजापतिः सङ्गच्छते ।

किं च । तथात्वे ऽमन्त्रकक्रियापत्तिः । सा चोक्तरीत्या तथा सम्भवति न युक्ता । अत एव—

सर्वाभावे स्त्रियः कुर्युः स्वभर्तॄणाममन्त्रकम् ।

इति भविष्यपुराणं मार्कण्डेयपुराणं च,

कुलद्वयेऽपि चोत्सन्ने स्त्रीभिः कार्या क्रिया नृप ।

इति विष्णुपुराणम्,

कुलद्वये समुच्छिन्ने स्त्रीभिः कार्या क्रिया नृप ।

इति भारतम्,

सर्वेषां पुत्रहीनानां स्वभर्तॄणाममन्त्रकम् ।
सर्वबन्धुविहीनस्य पत्नी कुर्यात्सपिण्डनम् ॥

इति स्मृत्यन्तरं च सङ्गच्छते । अत एव तत्कर्तृकमग्निदानमात्रं समन्त्रकमित्युक्तं स्मृतिषु ।

तथा च कात्यायनः,

असंस्कृतेन पत्न्या च ह्यग्निदानं समन्त्रकम् ।
कर्त्तव्यमितरत्सर्वं कारयेदन्यमेव हि ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत एव च—

अपुत्रस्य स्त्रिया कार्यं पिण्डश्राद्धं तथोदकम् ।
क्रियालोपो न कर्त्तव्यः प्रेतस्य गतिकाङ्क्षिभिः ॥

इति बौधायने क्रियालोप इत्याद्युक्तम् । अत एव च—

पितृमातृसपिण्डैस्तु समानसलिलैस्तथा ।
तत्संघातगतैश्चैव राज्ञा वा धनहारिणा ॥
पूर्वाः क्रिया मध्यमाश्च पुत्राद्यैरेव चोत्तराः ।
दौहित्रैर्वा नरश्रेष्ठ कार्यास्तु तनयैस्तथा ॥

इति विष्णुपुराणे पराशरेण पुत्राद्यैरेवेत्युक्तम् । तस्य च भ्रातृसन्तत्यन्तैरित्यर्थः ।

पुत्रः पौत्रः प्रपौत्रो वा तद्वद्वा भ्रातृसंततिः ।

इति तेनैवोक्तत्वात् इति केचित् ।

वस्तुतस्तु द्वितीयपक्षे शङ्काया एवाभावेऽपि प्रथमपक्षोक्तरीत्याऽत्र सर्वाभावे इत्युक्त्या तस्य च द्वादशपुत्राद्यभावे तादृशभ्रातृसुतयोरभावे चेत्यर्थेन कुलद्वयोच्छेदापरपर्यायेण तस्य सधनत्वे च पत्न्यैव कार्यम् इतिपरत्वं वृद्धमनोः । तदप्युक्तरीत्या कुलद्वयोच्छेदे तावन्मात्रं समन्त्रकम् अन्यदमन्त्रकम् । एतदर्थमेव अपुत्रा पुत्रवत्पत्नीत्यतिदेशः । तथा च तदर्थं धर्मपुत्रो न विधेयः । कुलद्वयान्तर्गतस्य कस्य चित्कनिष्ठस्य तदन्यस्य सत्त्वे तु तावन्मात्रं समन्त्रकं तया कार्यम्, अन्यदन्यद्वारा समन्त्रकमेव कारणीयमिति न कश्चिद्विरोध इति बोध्यम् ।

एतेन दुहितापि तादृशतत्सद्भावे निरस्ता । एवं दौहित्रोऽपि । सगोत्रसद्भावे भिन्नगोत्रस्य तदनधिकारात् । अत एव पुत्राभावे सपिण्डा मातृसपिण्डाः शिष्याश्च दद्युस्तदभावे ऋत्विगाचार्याविति गौतमः सङ्गच्छते । अत एव च " दद्युरिति बहुवचने-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नोदकदानवत्सर्वैः पिण्डदानं कार्यमिति नाशङ्कनीयं, किं तु पुत्रेणैव कार्यं, तदभावे प्रत्यासन्नेन सपिण्डानामन्यतमेन, तदभावे मातृसपिण्डादिना कार्यम्" इति विज्ञानेश्वरेण व्याख्यातमाशौचप्रकरणे। न चैवम्—

असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्।
प्रथमे ऽहनि यो दद्यात्स दशाहं समापयेत् ॥

इति गृह्यपरिशिष्टस्य,

असगोत्रः सगोत्रो वा योऽग्निं दद्यात्सखे नरः।
सोऽपि कुर्यान्नवश्राद्धं शुद्ध्येत्तु दशमेऽहनि ॥

इति दिवोदासीयस्य च का गतिरिति चेत्, पुत्राद्यसंनिधानविषयं तदिति गृहाण। न चैवं प्रागुक्तमनुविष्णुविरोध इति वाच्यम्। तस्यैतदभावविषयत्वात्। न च विनिगमनाविरहः। पिण्डाधिकारिक्रमबोधकवाक्येषु प्रागुक्तेषु पुत्रः पौत्रः प्रपौत्रः पत्नी भ्रातेत्यादिषु तदनन्तरं तदनुक्तेरेव विनिगमिकायाः सत्त्वात्। न च "यश्च" इतिविष्णूपोद्बलितपत्नीतिमूलोक्तक्रमस्य प्राबल्यम्। तदपेक्षया पुत्रस्येत्याद्युपोद्बलितप्रागुक्तवाक्यीयपिण्डदानादिक्रमस्यैवान्तरङ्गत्वेन प्राबल्यात्। न च पौत्रदौहित्रयोरित्यादिप्रागुक्तमनोस्तस्यैतोऽप्यन्तरङ्गत्वम्। भ्रातॄणामित्याद्युक्त्याऽस्य पुत्रस्थानीयत्वेन ततोऽप्यन्तरङ्गत्वात्। अत एवोक्तवाक्याद्दौहित्रसत्त्वेऽपि सापत्नपुत्रस्यैव क्रियाकरणाचारः सङ्गच्छते इति दिक्।

पित्रोस्तु प्रागुक्तरीत्यैव निरासः।

नन्वेवमपि भ्रातृतत्पुत्रसमवाये उक्तरीत्या द्विविधया क्रमेण तयोः प्राप्तिः, इतस्तु तत्पुत्रस्यैवोक्तरीत्या प्राप्तिरिति चेत्, शृणु। नानुजस्य तथाऽग्रज इति बौधायनाद्युक्तनिषेधेन पिण्डाधिकारिक्रमबोधकवाक्येषु भ्रातृपदस्य कनिष्ठभ्रातृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परत्वस्यावश्यं वक्तव्यत्वेन तयोरुक्तरीतिद्वयेन क्रमसत्त्वेऽपि भ्रातॄणामित्यादावेकशब्दस्य प्रथमार्थकतया ज्येष्ठपरत्वेन तस्यानधिकारेण तद्विषयमिदमित्यविरोधः ।

यदि तु पत्नी भ्रातेति पुत्रः पौत्र इति च न तत्र क्रमबोधकं किं तु तत्स्वरूपबोधकम्, एवं च न दोषलेशः, क्रमस्तु दायहरणीय एव, उक्तविष्णुवाक्यादित्युच्यते तदैकशब्दस्य तत्र संख्यार्थकत्वेनासङ्कोचेन तत्सत्त्वेऽपि तत्सुत एवाधिकारीत्यनेन बोध्यते । एवं च भ्रातॄणामित्यादि तत्र बहुवचनं "तावतो वारुणान्" इतिवद्यथासम्भवप्राप्तानेकत्वानुवादः ।

वस्तुतस्तु "हलोऽनन्तरा" इतिवदेकशेषस्तत्र बोध्य इति न दोषइति तत्त्वं बोध्यम् । एवं च "नापुत्रस्य लोकोऽस्ति" "जायमान" इत्यादिशास्त्रबोधितस्यापुत्रत्वप्रयुक्तदोषस्य निवृत्त्यादि प्रागुक्तत्रयं द्वादशविधपुत्रभिन्नेनापि भ्रातृसुतेनापुत्रस्य पितृव्यस्य भवतीति मन्वेकवाक्यतया यथा पूर्वार्धेन प्रतिपाद्यते, अत एव "सुते जाते" "पुत्रवान्भवेत्" इति जनिसत्तामात्राभ्यां तेषां पुत्रवत्त्वसङ्कीर्तनं, तथोत्तरार्द्धेन पिण्डादिरूपकार्यमपि तत एव तस्य भवतीति अपूर्वं प्रतिपाद्यते । अत एव—

सपितुः पितृकृत्येषु ह्यधिकारो न विद्यते ।
न जीवन्तमतिक्रम्य किञ्चिद्दद्यादिति श्रुतिः ॥

इति कात्यायनस्य नात्र प्रवृत्तिः । तथा च तदुपयोग्यंशहरत्वमपि तत्सत्त्वे तदभावे सिद्धम् । युक्तं चैतत् । स्वपुत्रेणेव भ्रातृसुतेनापि पिण्डादिनिर्वाहस्य समस्तपितॄणां वंशविच्छेदपरिहारस्य ऋणापाकरणस्य परलोकस्य च सम्भवात् । एवं च तदर्थं केवलं भ्रातुष्पुत्रवतोऽपुत्रस्य दत्तकादिस्वीकारप्रवृत्तिनिरासः । एवं सति मन्वादिवाक्यस्य तत्परत्ववत्पिण्डदानादिपर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वमपि बोध्यम्। अत एव तदेकवाक्यता सर्वतः सिद्धा। एवं सति न कस्यापि विरोधोऽनेन, नापि मिताक्षराविरोधो, नापि द्वादशसंख्याविरोधो, नापि मन्वादिवाक्ये क्रियाद्यध्याहारजक्लेशो, नापि तत्स्थाननिवेशानुपपत्तिः, पुत्रत्वेनाकृतानां भ्रातृसुतानां पत्न्यादिसत्त्वे। तदभावे पुत्रकार्यम्। ऋणापाकरणादिकारिणामपि वचनाद्रिक्थग्रहणाधिकारसंभवात्। तथा कृतानां तु तेषां भवत्येव ततः प्राक् तदधिकारः। पत्न्यादितः पूर्वं मदीयपिण्डदानरिकूथाधिकारी कश्चिद्भवेदिति कामनायां भ्रातृसुतस्यैव दत्तकविधिना स्वीकार उचित इत्यप्यनेन सूचितं भवति। उक्तफलजनकतया पुत्रसदृशस्यैव तस्य पुत्रप्रतिनिधित्वेन स्वीकरणमुचितमिति षाष्ठप्रतिनिधिन्यायसिद्धमेवानेन व्यञ्जितं च भवतीत्यलम्।

एतेन "मनुवाक्यं प्राशस्त्यपरं पराशरवाक्यं तु भ्रातृव्येण पितृवत्पितृव्यपार्वणश्राद्धमवश्यं कर्त्तव्यमित्येवं परम्।

पराशरेणैव तदग्रे—

पार्वणं तेन कार्यं स्यात्पुत्रवत् भ्रातृजेन तु।
पितृस्थाने तु तं कृत्वा शेषौ पूर्ववदुच्चरेत्॥

इत्यभिधानात्। न तु पुत्रत्वप्रतिपादकमुभयम्। त्रयोदशपुत्रत्वापत्तेः" इत्यपास्तम्। विधित्वादिसम्भवराहितस्य यथाकथंचिद्विधिसंस्पृष्टस्यान्यथानुपपत्त्या द्विविधया शक्यार्थस्य प्रकृतानुपयोगेन वाक्यस्य लक्षणया प्राशस्त्यपरत्वस्य पूर्वमीमांसायां प्रथमाध्यायस्य द्वितीयेपादे "वायुर्वै क्षेपिष्ठा देवता" इत्यादौ प्रतिपादितत्वेनात्रातथात्वेन तदसम्भवात् अतिदेशविधित्वसम्भवात्। अत एव तदकल्पनात्। अत एव तदसंस्पृष्टत्वाच्च।

न चापुत्रेणेवेत्यादि विधायकं, तस्य पुत्रप्रातिनिधिवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धायकत्वेऽपि अस्यातथात्वेन तदसम्भवात्। वाचनिकप्रतिनिधित्वस्यैकादशस्वेव सत्त्वात्। तथा च—

क्षेत्रजादीन्सुतानेतानेकादश यथोदितान्।
पुत्रप्रतिनिधीन् प्राहुः क्रियालोपान्मनीषिणः॥

इति मनुः। (अ. ९। १८०)

पुत्रप्रतिनिधीन् औरसपुत्रिकाप्रतिनिधीन्। तेन तयोरभावे तदुपादानम्। मुख्याभावे प्रतिनिध्युपादानस्य शास्त्रार्थत्वात्।

अत एव बृहस्पतिः,

आज्यं विना यथा तैलं सद्भिः प्रतिनिधिः स्मृतः।
तथैकादश पुत्राः स्युः पुत्रिकौरसयोर्विना॥ इति।

तेन तयोरसत्त्वे एव ते भवन्ति। अत एवोक्तं,

सन्तानकारणं तेषाम् औरसः पुत्रिका तथा। इति।

एतेन "सर्वाभावे धर्मपुत्रपरं तद् व्यासयमवाक्यम् अपुत्रेण सुत इति। यादृक् सपिण्डोऽसपिण्डो वा सजातीयोऽन्यजातीयो वा शूद्रान्य इति तदर्थ" इति मिश्ररत्नाकराद्युक्तमपास्तम्। तस्य द्वादशपुत्रविधिनोपसंहारात्।

अत्र पुमांस एव पुत्रा मे जायेरन्निति सूत्रे पुमांसं पुत्रमाधेहीत्यादिश्रुतौ च पुत्रपदस्य कन्यावाचित्वदर्शनात्कन्याया अपि दानप्रतिग्रहौ स्त इति कृष्णयज्वादयः।

वस्तुतस्तु चिन्त्यमिदं लोकशास्त्रविरुद्धत्वात्। तत्र विशेषणं त्वतिशयितपुंस्त्वबोधनाय। तत्त्वं चानुशिष्टत्वादि। स्पष्टं चेदं शब्दरत्नभावप्रकाशादौ। एवं च सीतायाः कुन्त्याश्च महाभारतादौ दत्तकत्वोपाख्यानात् तथैव शिष्टाचाराच्च तथेति युक्तमिति बोध्यम्। एतेन पुंस्त्वविवक्षा तत्रेति मतमपास्तमित्यग्रे स्फुटीभविष्यति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतेन मनुवाक्यस्यापि तत्त्वं निरस्तम् । मिताक्षरा तु न विरुद्धा यथा तथोक्तं प्राक् । एवमन्येषां सुयोजत्वे तथाऽस्तु । अन्यथाऽस्य प्रामादिकत्वमेवास्तु । एवं पराशरस्यापि तत्परत्वं न युक्तम्। सम्भवति प्रोक्तरीत्या शक्यार्थपरत्वे लक्षणानौचित्यात् । पूर्वार्द्धस्यैवकारस्योदकक्रियाम् इत्यस्य च भ्रान्तप्रलपितत्वापत्तेः । वक्ष्यमाणार्थमात्रप्रतिपादकत्वे च पौनरुक्त्यापातात् । उत्तरार्द्धस्याविवरणपरतया योजनेऽपि पूर्वार्द्धेन दोषतादवस्थ्यात्। पूर्वमध्यमयोः क्रिययोरनधिकारापत्तेः।एकोदिष्टे तदापत्तेश्च। न च–

सपिण्डीकरणादूर्ध्वं पित्रोरेव हि पार्वणम् ।
पितृव्यभ्रातृमातॄणामेकोद्दिष्टं सदैवहि ॥

इति कात्यायनोक्तेः—

सपिण्डीकरणादूर्ध्वं यत्र यत्र प्रदीयते ।
भ्रात्रे भगिन्यै पुत्राय स्वामिने मातुलाय च ॥
मित्राय गुरवे श्राद्धमेकोदिष्टं न पार्वणम् ।

इति वृद्धवसिष्ठाच्च —

अपुत्रा वा मृताः केचित्पुरुषा वा स्त्रियोऽपि वा ।
तेषामपि च देयं स्यात् एकोद्दिष्टं न पार्वणम् ॥

इत्यापस्तम्बप्राप्तैकोदिष्टबाधनार्थमेवेदमिति वाच्यम् ।

पितृव्यभ्रातृमातॄणां ज्येष्ठानां पार्वणं भवेत् ।
एकोद्दिष्टं कनिष्ठानां दंपत्योः पार्वणं मिथः ॥

इतिचतुर्विंशतिमतविरोधापत्तेः । न च इत एव तद् यथा कर्त्रपेक्षया कनीयःपितृव्यादिविषयम् एवं तदपि ज्येष्ठपितृव्यविषयमिति वाच्यम् । सामान्यस्मृतेः सङ्कोचेन व्याख्याने मानाभावात् । पूर्वं तेषां मध्ये कनिष्ठपरत्वस्योक्तत्वेऽपि कर्त्रपेक्षया तत्परत्वस्यानुक्तत्वेन तदविरोधात् । अत्र गुरुर्मन्त्रोप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देष्टा विद्याप्रदाता च। मातृपदं मातृसपत्नीपरम्। जनन्याः पार्वणविधानादेकोद्दिष्टविधानानुपपत्तेः। मम तु पूर्ववाक्येन द्वयोरपि तयोः सकलक्रियाप्राप्तावुत्तराक्रिया कथं कार्या ज्येष्ठस्येत्याकाङ्क्षायां तदेकवाक्यतया तेन तस्यैव पार्वणं विधीयते इति न दोषः। अत एव—

अपुत्रस्य पितृव्यस्य श्राद्धादि पितृवद्भवेत्।

इति स्मृत्यन्तरमप्युपपन्नम्। यद्वेदमुभयपरमस्तु, पितृवदाचाराद्यवस्था।

किं च। पार्वणश्राद्धमवश्यं कर्त्तव्यमित्यत्रावश्यंशब्दस्याङ्गीकारार्थत्वस्य निश्चयार्थत्वस्य चासम्भवेनावधारणार्थत्वेन तदेव कर्त्तव्यामित्यर्थोऽथवा तत्कर्त्तव्यमेवेत्यर्थो वा। नाद्यः। प्रागुक्तस्य स्मृत्या पितृवदाचारप्राप्तैकोद्दिष्टबाधापत्तेः। नान्त्यः। उक्तरीत्यैव तदकरणे दोषापत्तेरिति दिक्।

यदपि नत्वित्यादि, तदपि न। अपुत्रा पुत्रवत्पत्नीत्युशनःस्मृतेः पत्न्यां तत्त्वातिदेशेऽपि यथा न तदाधिक्यं तथाऽत्र तदातिदेशेन तदप्रतिपादकत्वेन तदनाधिक्येन तदविरोधात्। अन्यत्र अन्यशब्दः प्रयुज्यमानो विनाऽपि वतिं वत्यर्थं गमयतीति न्यायात् अस्याप्रतिनिधित्वेन दायग्रहणक्रमबोधकवाक्ये तत्र पाठोपपत्त्या तदविरोधात्। पिण्डादौ त्वयमेव ततः प्रबल इत्युक्तम्।

किं चास्तु तदाधिक्यं, न च तत्संख्याविरोधः। तदाशयानवबोधात्। तथा हि। याज्ञवल्क्येनौरसादयो द्वादशपुत्रा गणितास्ते च प्रागुक्ता एव।

हारीतोऽपि,

षड् बन्धुदायादाः षडबन्धुदायादाः। साध्व्यां स्वयमुत्पादित औरसः, क्षेत्रजः, पौनर्भवः, कानीनः, पुत्रिकापुत्रो,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गृहे गूढोत्पन्न इति बन्धुदायादाः । दत्तः, क्रीतको, ऽपविद्धः, सहोढः, स्वयमुपागतः, सहसादृष्टश्चेत्यबन्धुदायादा इति ।

यमोऽपि,

पुत्रास्तु द्वादश प्रोक्ता मुनिभिस्तत्त्वदर्शिभिः ।
तेषां षड् बन्धुदायादाः षडदायादबान्धवाः ॥
स्वयमुत्पादितस्त्वेको द्वितीयः क्षेत्रजः स्मृतः ।
तृतीयः पुत्रिकापुत्र इति धर्मविदो विदुः ॥
पौनर्भवश्चतुर्थस्तु कानीनश्चैव पञ्चमः ।
गृहे तु गूढ उत्पन्नः षडेते पिण्डदाः स्मृताः ॥
अपविद्धः सहोढश्च दत्तः कृत्रिम एव च ।
पञ्चमः क्रीतकः पुत्रो यश्चोपानयते स्वयम् ॥
इत्येते मुनिभिः प्रोक्ताः षडदायादबान्धवाः । इति ।

औरसादीनभिधाय—

एते द्वादशपुत्रास्तु सन्तत्यर्थमुदाहृताः ।
आत्मजाः परजाश्चैव लब्धा यादृच्छिकास्तथा ॥
तेषां षड् बन्धुदायादाः पूर्वेऽन्ये पितुरेव षट् ।

इति देवलोपि ।

औरसादीन् कृत्रिमरहितान् यत्रक्वचनोत्पादितसहितानभिधायैतेषां यः पूर्वः स श्रेयान्स एव दायहरः स चान्यान् बिभृयादिति विष्णुरपि ।

औरसः क्षेत्रजश्चैव पुत्रिकापुत्र एव च ।
कानीनश्च सहोढश्च गूढोत्पन्नस्तथैव च ॥
पौनर्भवोऽपविद्धश्च दत्तः क्रीतः कृतस्तथा ।
स्वयं चोपगतः पुत्रा द्वादशैते प्रकीर्तिताः ॥
एषां षड् बन्धुदायादाः षडदायादबान्धवाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वः पूर्वः स्मृतः श्रेष्ठो जघन्यो यो य उत्तरः ॥
क्रमादेते प्रवर्त्तन्ते मृते पितरि तद्धने ।
श्रेयसः श्रेयसो ऽभावे जघन्यस्तदवाप्नुयात् ॥

इति नारदोऽपि । (व्यव.१३।श्लो.४५।४६।४७।४९)

वसिष्ठोऽपि,

द्वादशैव पुत्राः पुराणदृष्टाः स्वयमुत्पादितः स्वक्षेत्रे संस्कृतायामौरसः प्रथमः, तदलाभे नियुक्तायां क्षेत्रजो द्वितीयः, तृतीयः पुत्रिका विज्ञायते, पौनर्भवश्चतुर्थः, कानीनः पञ्चम इत्यादि ।

मनुरपि, (अ. ९ । श्लो. १५८ । १५९ । १६०)

पुत्रान् द्वादश यानाह नृणां स्वायंभुवो मनुः ।
तेषां षड् बन्धुदायादाः षडदायादबान्धवाः ॥
औरसः क्षेत्रजश्चै दत्तः कृत्रिम एव च ।
गूढोत्पन्नो ऽपविद्धश्च दायादा बान्धवाश्च षट् ॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयंदत्तश्च शौद्रश्च षडदायादबान्धवाः ॥ इति ।

अत्र कैश्चित्पुत्रिकापुत्रं विहाय शौद्रमूरीकृत्य द्वादशत्वमुक्तं, कैश्चिद्विपरीतमुक्तं, कैश्चित् कृत्रिमं विहाय तमङ्गीकृत्य तदुक्तम् । न च शौद्रस्यौरसत्वेनैव संग्रहात्पृथगुक्तिर्व्यर्था । अत एव कैश्चित्तस्य गणनं न कृतम् ।

अत एव— (याज्ञ. २ । १२५)

चतुस्त्रिद्व्येकभागाः स्युर्वर्णशो ब्राह्मणात्मजाः ।
क्षत्रजास्त्रिद्व्येकभागा विड्जास्तु द्व्येकभागिनः ॥

इति भिन्नजातीयानां विभाग उक्तः । अत एव च सजातीयेष्वयमित्यत्र कानीनाद्यनुरोधेन सजातीयत्वमूरीकृत्य सू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्द्धावसिक्तादीनामौरसेऽन्तर्भावं स्वीकृत्य "शूद्रापुत्रस्त्वौरसोऽपि कृत्स्नभागमन्याभावेऽपि न लभते" इति विज्ञानेश्वरेण व्याख्यातमिति वाच्यम् । तस्य तल्लक्षणानाक्रान्तत्वात् ।

तथाहि । द्विविधस्तावत् शूद्रापुत्रः ।

तत्र, (याज्ञ. १ । श्लो. ९१ । ९२)

विप्राद्‌ मूर्द्धावसिक्तो हि क्षत्रियायां विशः स्त्रियाम् ।
अम्बष्ठः शूद्र्यां निषादो जातः पारशवोऽपिवा ॥
वैश्याशूद्र्योस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ ।
वैश्यात्तु करणः शूद्र्यां विन्नास्वेष विधिः स्मृतः ॥

इति मूलेन प्रतिपादित एकः ।

विष्णुनाऽपि, यत्र क्वचनोत्पादितश्च द्वादस इति ।

वसिष्ठेनापि, शूद्रापुत्र एव षष्ठो भवतीत्याहुरिति ।

बौधायनेनापि, द्विजातिप्रवरात् शूद्रायां जातः कामात्पारशव इति ।

मनुनाऽपि, (अ. ९ । १७८)

यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत्सुतम् ।
स पारयन्नेव शवस्तस्मात्पारशवः स्मृतः ॥ इति ।

द्वितीयस्तु द्विजातेर्दास्यामुत्पन्नः । तत्राद्यस्य न तदभावे कृत्स्नधनहारित्वम् । (अ. ९ । १५४)

यद्यपि स्यात्तु सत्पुत्रो यद्यपुत्रोऽथवा भवेत् ।
नाधिकं दशमाद्द्याच्छूद्रापुत्राय धर्मतः ॥

इति मनूक्तेः । इत एव क्षत्रियावैश्यापुत्रयोः सवर्णापुत्राभावे सर्वधनग्रहणं सिद्धम् ।

द्वितीयस्तु जातोऽपि दास्यां शूद्रेणेत्यत्र शूद्रग्रहणात्पितुरिच्छयाऽपि नांशं भजते नाप्यर्द्धं दूरत एव कृत्स्नम् । किं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वनुकूलश्चेज्जीवनमात्रं लभते इति ।

औरसलक्षणं तु मूले, औरसो धर्मपत्नीज इति ।

वसिष्ठोऽप्युक्तः ।

विष्णुरपि, अथ द्वादश पुत्रा भवन्ति स्वक्षेत्रे संस्कृतायामुत्पादितः स्वयमौरसः प्रथम इति ।

देवलोऽपि,

संस्कृतायां च भार्यायां स्वयमुत्पादितो हि यः ।
औरसो नाम पुत्रः स इति ।

आपस्तम्बोपि, सवर्णा पूर्वशास्त्रविहितां यथर्तु गच्छतः पुत्रास्तेषां कर्मभिः संबन्धो दायेनाव्यतिक्रमश्चोभयोरिति ।

बौधायनोऽपि, सवर्णायां संस्कृतायां स्वयमुत्पादितमौरसं पुत्रं विद्यादिति ।

श्रुतिश्च, अङ्गादङ्गादिति—

आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् ।
यथेह पुरुषस्यात्मा तस्मात्त्वमिह जायसे ॥
आत्मा पुत्र इति प्रोक्तः पितुर्मातुरनुग्रहात् ।
सर्वान् नस्त्रायसे यस्मात्पुत्रस्तेनासि संज्ञितः ॥

इति च । "सवर्णा धर्मविवाहोढा धर्मपत्नी तस्यां जात औरसः पुत्रो मुख्य" इत्यत एव विज्ञानेश्वरेण व्याख्यातम् ।

मनुनापि, (अ. ९ । १६६)

स्वक्षेत्रे संस्कृतायां तु स्वयमुत्पादयेद्धि यम् ।
तमौरसं विजानीयात्पुत्रं प्राथमकल्पिकम् ॥ इति ।

एवं च शूद्रापुत्रस्य द्विविधस्यापि तल्लक्षणानाक्रान्तत्वात्पृथगुक्तिः । अत एव मूर्द्धावसिक्तादीनामौरसेष्वन्तर्भाव इति विज्ञानेश्वरेणोक्तम् । शूद्रापुत्रस्त्वौरसोऽपीत्यत्र तु स यौगिको न तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रूढः । केषां चित् गणनाकरणे बीजं तु कृत्स्नधनहारित्वाभावादेव । मूलेन तु चतुरित्यादिना क्षत्रियापुत्रादिवत्तस्य कथनं प्राक् कृतमेव । मनुनाऽपि पूर्वं पुत्रिकापुत्रस्य दौहित्र एव च हरेदित्यादिना कथनात्तत्रानुक्तिरिति न न्यूनता । सर्वथा ततः पुत्राधिक्यलाभान्न द्वादशत्वं नियतम् ।

अत एव "ननु क्षेत्रजाद्यपेक्षया पुत्रिकापुत्रस्य पुत्रत्वेनाधिक्ये द्वादशसंख्यातिरेक आप्नोति । भवतु को दोषः त्रयोदशोऽयं पुत्रोऽस्तु" इति मेधातिथिना व्याख्यातम् । अत एव विज्ञानेश्वरेण भ्रातॄणामित्यस्य तथा व्याख्याने संख्याविरोधरूपदोषोद्भावनं न कृतम् ।

अत एव च बृहस्पतिः,

पुत्रास्त्रयोदश प्रोक्ता मनुना येऽनुपूर्वशः ।
सन्तानकारणात्तेषामौरसः पुत्रिका तथा ॥
आज्यं विना यथा तैलं सद्भिः प्रतिनिधिः स्मृतम् ।
तथैकादश पुत्रास्तु पुत्रिकौरसयोर्विना ॥ इति ।

एवं च तत्र तत्र द्वादशत्वोक्तिस्तत्र तत्र परिगणितानां स्फुटतया संख्याबोधनद्वारा न्यूनत्वव्यवच्छेदनार्था, नाधिक्यव्यवच्छेदार्था । तत्रान्येषां यथासंभवमन्तर्भावमभिप्रेत्य वेति न दोषः । अन्यथा तेन तत्र तस्य गणनात्तस्यान्यत्रागणनान्मिथो विरोधः स्पष्ट एव । एवमेवकारोऽपि वासिष्ठो योज्यः । तस्मात्तदाधिक्ये न दोषः ।

एतेन कौस्तुभोक्तं तद्दूषणं निरस्तम् । द्वितीयदूषणमपि प्रागेव निरस्तप्रायम् । एवं च यथा सपत्नीपुत्रस्याग्रहीतस्यापि पिण्डदानाद्यधिकारित्वात्पितृपत्न्य इत्यादिशास्त्राल्लोकव्यवहाराच्च पुत्रत्वं निर्विवादं तथा तत्र तत्सहपाठात् भ्रातृसुत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्याप्यगृहीतस्यैव पुत्रत्वं विधीयते इत्युचितम्। मनुग्रन्थेऽपि तस्य तथा बोधकं वाक्यान्तरमस्ति। एवं च तदतिदिष्टस्य वित्तालाभेऽपि तत्राधिकारो यथा तथा तदतिदेशविषयाणां पत्न्यादीनामन्याभावे तस्य निर्धनत्वे धनलाभं विनाऽपि श्राद्धाधिकारः।

एवं च विष्णुवाक्ये पुत्रशब्देन सर्वविधपुत्रो गृह्यते। तत्र अतिदेशवाक्यानि तु—अपुत्रा पुत्रवत् पत्नीत्युशना।

यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा।

इति मनुः। (अ. ९। १३०)

बह्वीनामेकपत्नीनामिति, (श्लो. १८३)

पितेव पालयेत्पुत्रान् ज्येष्ठो भ्रातॄन्यवीयसः।

पुत्रवच्चापि वर्तेरन् ज्येष्ठे भ्रातरि धर्मतः॥ (श्लो. १०८)

यो ज्येष्ठो ज्येष्ठवृत्तिः स्यान्मातेव स पितेव सः। (११०)

इति च। इत्यादीनि बोध्यानि।

तदयं निर्गलितोऽर्थः। तत्रादौ दायग्रहणक्रमः। औरसपुत्रस्तत्पुत्रस्तत्पुत्रः। तत एकादश पुत्रिकापुत्रादयः पूर्वपूर्वाभावे क्रमेण। एवं तत्पुत्रादयोऽपि। अत एव—

मनुशङ्खलिखिताः, (मनु. ९। १८४)

श्रेयसः श्रेयसोऽलाभे पापीयान् रिक्थमर्हति।

बहवश्चेत्तु सदृशाः सर्वे रिक्थस्य भागिनः॥ इति।

तदभावे पत्नी। ततो दुहिता। ततो दौहित्रः। ततो दौहित्री। ततः पिता। ततो माता। ततो भ्राता। ततो भगिनी। ततस्तयोः क्रमेण सुतः सुता च। ततो गोत्रजादय इति।

पिण्डदानादौ त्वेवं क्रमः। औरसपुत्रः। तदभावे पुत्रिकापुत्रादय एकादश क्रमेण। ततः पौत्रः। प्रपौत्रश्च तथा। ततः पत्न्यादिसत्त्वेऽपि भ्रातृसुतः। ततो भ्राता। ततः पिता। ततो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दौहित्रः। ततः पत्नी। ततो दुहिता। ततो गोत्रजादय इति।

इदमपि पुंविषये। स्त्रीविषये तु अनूढायाः पिता। तदभावे भ्रात्रादिः। ऊढायास्तु मुख्यपुत्राभावे पुत्रिकापुत्रः। तदभावे सपत्नीपुत्रः। तदभावे क्षेत्रजाद्याः प्रपौत्रान्ताः। तदभावे पतिः। तदभावे दुहितृदौहित्रौ क्रमेण। तदभावे पत्युर्भ्राता। तदभावे तत्पुत्रः। तदभावे स्नुषा। तदभावे पितृभ्रातृतत्पुत्रादयः पूर्वोक्ता इति बोध्यम्।

एतेन "पुत्रपौत्रप्रपौत्राभावे भार्या। तदभावे भ्राता। तदभावे तत्पुत्रः। भ्रातुर्भ्रातेति वचनात्" इति मिश्राद्युक्तमपास्तम्।

एवं सति भ्रातृसुतेनोक्तफलसिद्धावपि पत्न्यादितः प्राक् मदीयपिण्डदानरिक्थग्रहणोभयाधिकारी कश्चित् भवेदिति कामनायां तदर्थं जीवतो वाक्यादिकरणार्थं नामसङ्कीर्तनार्थं च दत्तकस्वीकारः। अपुत्रेणैवेत्यत्र तु पुत्रपदं मुख्यौरसपरम्। प्रतिनिधिपदसमभिव्याहारेण तथैव लाभात्। आतिदेशिकपुत्रत्वस्य पत्न्यामपि सत्त्वेन तदापि तद्ग्रहणानापत्तेश्च। तच्च पौत्रादेरुपलक्षणमित्यन्यत्। तत्रापुत्रत्वं मृतपुत्रत्वमजातपुत्रत्वं वा।

वन्ध्या वा मृतपुत्रा वा पुत्रार्थं समुपोष्य च।

इति शौनकोक्तेः। एवेन तादृशपुत्रवतोऽनधिकारः सूचितः। अत एव नामसङ्कीर्तनाय चेति मन्वादिभिरुक्तम्। तत्स्वरूपं तु मन्वादिभिरुक्तम्, (अ. ९। १६८)

माता पिता वा दद्यातां यमद्भिः पुत्रमापदि।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः॥ इति।

अत्र वाशब्दः समुच्चये। वा स्यादिति कोशात्। यद्वा तयोरन्यतरग्रहणानेकत्वार्थः सः। चं विनापि गामश्वमितिवत् पूर्वत्र समुच्चयो बोध्यः। अभ्यर्हितत्वात्पूर्वं तदुक्तिः। अद्भिरि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यनेन अन्यत्रोक्तविधिनोदकपूर्वमित्यर्थकेन अन्यथादत्तस्य अतत्त्वं सूचितम् । अत एव—

आविधाय विधानं यः परिगृह्णाति पुत्रकम् ।
विवाहविधिभागं तं न कुर्याद्धनभाजनम् ॥

इति वृद्धमनुः ।

परिग्रहविधिं विना परिगृहीतस्य विवाहमात्रं कार्यं न धनदानं, किन्तु तत्र पत्न्यादय एव धनभाजः पिण्डदाश्च । विधिं विना तस्य पुत्रत्वानुत्पादात् ।

अत एव वृद्धगौतमः,

स्वगोत्रेण कृता ये स्युर्दत्तक्रीतादयः सुताः ।
विधिना गोत्रतां यान्ति न सापिण्ड्यं विधीयते ॥ इति ।

सपिण्डता तु सर्वेषां गोत्रतः साप्तपौरुषी ।

इति मनूक्तं साप्तपौरुषं सापिण्ड्यं न विधीयते किन्तु प्रवराध्यायप्रसिद्धं त्रिपुरुषमित्यर्थः । इदं च द्व्यामुष्यायणदत्तकादिविषयमेव ।

वस्तुत इदं निर्मूलमेवेति स्पष्टं सापिण्ड्यप्रदीपे । अत एव "मात्रा भर्त्रनुज्ञया प्रोषिते प्रेते वा भर्तरि पित्रा वोभाभ्यां वा प्रतिग्रहीतृसवर्णो विधिना सवर्णाय यस्मै दीयते स तस्य दत्तकः पुत्र" इति विज्ञानेश्वरेण व्याख्यातम्। अत एव—

वन्ध्या वा मृतपुत्रा वा पुत्रार्थं समुपोष्य च ।

इति शौनकीये ऽविशेषश्रुतिसङ्गतिः । आपदि प्रतिग्रहीतुरपुत्रत्वे इत्यपरार्कः । दुर्भिक्षादौ वा । आपद्ग्रहणादनापदि न देयः । दातुरयं प्रतिषेधः इति विज्ञानेश्वरः ।

अत एव कात्यायनः,

आपत्काले तु कर्तव्यं दानं विक्रय एव वा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्यथा न प्रकर्त्तव्यमिति शास्त्रविनिश्चयः ॥ इति ।

साद्दश्यं न जातितः, किन्तु कुलानुरूपैर्गुणैः । एवं च क्षत्रियादिरपि ब्राह्मणस्य दत्तको युज्यते इति मेधातिथिः । जातित एव साद्दश्यम् । अत एव सजातीयेष्वयं प्रोक्त इति मूलं सङ्गच्छते । क्रीतलक्षणभूतमनुवाक्ये तु तदुक्तमेव व्याख्यानम् । अत एव तत्र हि सद्दशो ऽसद्दशोपि वेत्युक्तमित्यपरे । प्रीतिग्रहणं लोभभयादिप्रतिषेधार्थम् । तथा च तत् क्रियाविशेषणम् ।

किं च । एकः पुत्रो न देयः ।

तथा च वासिष्ठः—शुक्रशोणितसम्भवो हि पुरुषो मातापितृनिमित्तकः, तस्य प्रदानविक्रयपरित्यागेषु मातापितरौ प्रभवतः, न त्वेकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा, स हि सन्तानाय पूर्वेषां, न तु स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वा ऽन्यत्रानुज्ञानाद्भर्तुरिति ।

एवं च पत्न्याः पतिसत्त्वे तदनुमत्यैव दातृत्वादि । मृते तु स्वातन्त्र्यम् । न च रक्षेत्कन्यामिति पूर्वाध्याये स्त्रीणां विहिते कर्मणि स्वतन्त्राधिकारनिषेधकमुक्तमिति कथमेतदिति वाच्यम् । पूर्त्तादौ तासां स्वतन्त्राधिकारस्मरणात् । तस्य तद्रक्षणमात्रतात्पर्यकत्वात् । धनस्वामित्वप्रतिषेधकमपि न तत् । पत्नी दुहितर इत्यादिना तासामपि रिक्थग्राहित्वस्मरणात् । तन्निषेधे सहाधिकारस्याप्यसम्भवात् । न च स्थावरे तस्या अनधिकारः,

यद्विभक्ते धनं किञ्चिदाध्यादि विविधं स्मृतम् ।
तज्जाया स्थावरं मुक्त्वा लभते मृतभर्तृका ॥
वृत्तस्थाऽपि कृतेऽप्यंशे न स्त्री स्थावरमर्हति ।

इति बृहस्पतेरिति वाच्यम् । अस्य वचनस्य जायापदोपेतस्य पत्नीभिन्नासुरादिविवाहोढाविषयत्वेन निबन्धेषु व्यवस्थापनात् । दुहितृरहितपत्नीपरमिदम्, दुहितृमती तु स्थावरमपि लभते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति स्मृतिचन्द्रिकायाम् । दायादानुमतिं विना स्थावरविक्रयादिनिषेधपरमित माधवः ।

यत्तु कात्यायनः,

मृते भर्तरि भर्त्रंशं लभेत कुलपालिका ।

यावज्जीवं न हि स्वाम्यं दानाधमनविक्रये ॥

इति, तद् बन्दिचारणाद्यर्थदानादिनिरततामातिषेधपरम् । अदृष्टार्थदानतदुपयोग्याधमनादि तु भवत्येव ।

जङ्गमं स्थावरं सर्वं हेमरूप्यं रसाम्बरम् ।

आदाय दापयेच्छ्राद्धं मासषाण्मासिकाब्दिकम् ॥

पितृव्यगुरुदौहित्रान् भर्तुः स्वस्त्रीयमातुलान् ।

पूजयेत्कव्यपूर्ताभ्यां वृद्धांश्चाप्यातिथीन् स्त्रियः ॥

इति प्रजापतेः ।

सौदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकीर्तितम् ।

विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि ॥

इति नारदोक्तेश्च । एवं च पत्नीति मूलवाक्यं पत्नीपदोक्त्या स्थावरसाहितसकलरिक्थग्रहणपरमिति प्रागुक्तं युक्तमेव ।

क्रयक्रीता तु या नारी न सा पत्नी विधीयते ।

न सा दैवे न सा पित्र्ये दासीं तां कवयो विदुः ॥

इति स्मरणात् । भर्तृदत्ते तु स्थावरे न स्वातन्त्र्यम् । भर्त्रा प्रीतेन यद्दत्तमिति नारदोक्तेः । (व्यव. १ । २८) एतेन पुत्रप्रतिग्रहे विधवाया नाधिकार इत्यपास्तम् ।

एवं तस्यापि तदनुमत्यैव तत् । अत्यन्तापदि तु तदनुमत्यलाभे स्वातन्त्र्यमपि । प्रागुक्तरीत्या तस्य प्राधान्यात् । तथा, अनेकपुत्रसद्भावे ज्येष्ठो न देयः । ज्येष्ठेन जातमात्रेणेति तस्यैव पुत्रकार्यकरणे मुख्यत्वात् । स च भ्रातृसुतसम्भवे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऽन्यो न ग्राह्यः । प्रागुक्तषाष्ठन्यायात् । तस्य प्रातिकूलत्वे तु सापिण्डादिक्रमेणान्योऽपि ग्राह्यः । तत्रापि द्विजे भागिनेयदौहित्रवर्ज्जम् । विरुद्धसंबन्धापत्त्या पुत्रत्वं बुद्ध्यनर्हम् । भ्रातृपितृव्यमातुलवर्जं च । शूद्रे तु भागिनेयदौहित्रावपि ।

ब्राह्मणानां सपिण्डेषु कर्त्तव्यः पुत्रसंग्रहः ।
तदभावे ऽसपिण्डेषु अन्यत्र तु न कारयेत् ॥
ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचित् ।
दौहित्रो भागिनेयश्च शूद्राणां वाऽपि दाप्यते ॥

इति—

नैकपुत्रेण कर्त्तव्यं पुत्रदानं कदाचन ।
बहुपुत्रेण कर्त्तव्यं पुत्रदानं प्रयत्नतः ॥

इति च शौनकः । अत्र नैकपुत्रेणेत्येव सिद्धे बहुपुत्रेणेत्युक्त्या द्विपुत्रेणापि न कार्यमिति सूचितमिति कश्चित् । तन्न । तस्य सर्वथा निषेधो ऽस्य तु तदावश्यकत्वमित्येतदर्थं तदुक्तेः। अत एव तत्र कदाचनेति अत्र प्रयत्नत इति चोक्तं स्वरसतः सङ्गच्छते । एवं च तस्य तद्विधिनिषेधोभयाविषयत्वेऽपि वचनान्तरादापदि दाने न दोष इति बोध्यम् । न च प्रातिकूलत्वादेस्तत्त्वं क्वापि न दृष्टमिति वाच्यम् । ऋष्यशृङ्गोक्तावानुकूल्याद्वा पुत्रस्येत्युक्तत्वात् ।

अपुत्रा योषितश्चैषां भर्त्तव्याः साधुवृत्तयः ।
निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च ॥

इति योगीश्वरोक्तेः । (अ. २ । १४२)

पितृद्विट् पतितः षण्ढो यश्च स्यादौपपातिकः ।
औरसा अपि नैतें ऽशं लभेरन् क्षेत्रजाः कुतः ॥

इति नारदाच्च । (व्यव. १३ । २१)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत एव "एक एवौरस" इति "षष्ठं तु क्षेत्रजस्यांशम्" इति च मनुवाक्यं दत्तकादेरौरसप्रतिकूलत्वानिर्गुणत्वाभिप्रायेण व्याख्यातं विज्ञानेश्वरेण ।

किं च । जीवतो वाक्यादिकरणरूपफलासम्भवस्ततः । एवं चैकस्मिन्नौरसे ऽन्यस्मिन्वा ऽतादृशे सति अन्येऽपि ग्राह्या यावतोक्तफलसंपत्तिर्भवति । अत एव विश्वामित्रादीनां पुत्रवतामपि देवरातादिपुत्रपरिग्रहः श्रौतादिः सङ्गच्छते। किं च। तस्य स्वयंदत्तत्वेनादत्तकत्वम् । अतएव परेच्छया तदङ्गीकारो न तु स्वस्य तदर्थं प्रवृत्तिः । एवं च तत्र तथैव अत एव बह्वृचब्राह्मणे—

यथैवाङ्गिरसः सन्नुपेयां तव पुत्रताम् ।

इत्यादिना—

अधीयत देवरातो रिक्थयोरुभयोर्ऋषिः ।

इत्यन्तेनोक्तम् ।

एतेन "पुत्रवतोऽपि पुत्रानुज्ञया पुत्रान्तरपरिग्रहः ।
यन्नः पिता संजानीते तस्मिंस्तिष्ठामहे वयम् ।
पुरस्तात्सर्वे कुर्महे त्वामन्वञ्चो वयं स्मसि ॥
इति श्रौतलिङ्गात्" इत्यपास्तम् ।

उक्तयुक्तेः । तस्य ज्येष्ठीकरणे लिङ्गत्वाच्च । अत एव—

वत्सावते त्वपुत्राय वसुदेवः प्रतापवान् ।
अद्भिर्ददौ सुतं वीरं शौरिः कौशिकमौरसम् ॥
कण्डूषाय त्वपुत्राय विष्वक्सेनो ददौ सुताम् ।
इति हरिवंशे ।

रामायणे ऽयोध्याकाण्डे सीतां प्रति श्रीरामानुशासने षड्विंशे च—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

औरसानपि पुत्रान् हि त्यजन्त्यहितकारिणः ।
समर्थान्संप्रगृह्णन्ति परानपि नराधिपाः ॥
इति । तत्रैव कैकेयीवाक्यं दशरथं प्रति—
तवैव वंशे सगरो ज्येष्ठपुत्रमुपारुधत् ।
असमञ्ज इति ख्यातं तथाऽयं गन्तुमर्हति ॥ इति ।
तत्रैव सप्तोत्तरशततमे भरतं प्रति श्रीरामवाक्यम्,
एष्टव्या बहवः पुत्रा गुणवन्तो बहुश्रुताः ।
तेषां वै समवेतानामपि कश्चित् गयां व्रजेत् ॥ इति ।
एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ।
यजेत वा ऽश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥ इत्यत्रिः ।

एवं च विधेयविशेषणमप्येकत्वं पुत्रप्रतिनिधिरित्यत्राविवक्षितम् । श्रेयांसं न प्रबोधयेदित्यादौ तन्मर्यादाया उल्लङ्घितत्वाच्च। एतेन "पुरोहितं वृणीते ऽध्वर्युं वृणीतइत्यादाविव पुत्रप्रतिग्रहविधावपि प्रतिगृहीतस्य पुत्रकार्ये उपादेयतया तद्गतपुंस्त्वैकत्वयोर्विवक्षा तेनैक एव पुमानेव च ग्राह्य" इति मतमपास्तम्।

श्रेयसः श्रेयसोऽलाभे पापीयान् रिक्थमर्हति ।
बहवश्चेत्तु सदृशाः सर्वे रिक्थस्य भागिनः ॥
इति मनुः । (अ. ९ । १८४)

[1]औरसादीनां सर्वेषां पुत्राणां प्रकृतत्वात् औरसादीनुपक्रम्य तेषां पूर्वः पूर्वः श्रेयान्स एव दायहरः स चान्यान्बिभृयादिति विष्णुवचनादौरसादीनां पुत्राणां पूर्वपूर्वाभावे परः परो रिक्थमर्हति, पूर्वसद्भावे तु परसंवर्द्धनं स एव कुर्यात्, तदप्यपवादेतरविषयम् ।

यदि तु समानरूपा बहवः पुत्रास्तदा सर्वे एव विभज्य

---

१ अत्र ग्रन्थस्त्रुटितो भाति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धनं गृह्णीयुरिति तद्व्याख्यातारः। इदं च नौरसपरम्। "एक एवौरसःपुत्रः" "ऊर्ध्वं पितुश्च मातुश्च" इत्यादिनैव तद्विभागोक्तेः। किं तु गौणानेकपरम्। अनेन च दत्तकवत् कृत्रिमस्यापि सिद्धिरर्थभेदेन। न च—

दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः।

इति शौनकेन पुत्रान्तरस्य कलौ निषेधात् कथं कृत्रिमसिद्धिरिति वाच्यम्। दत्तपदेन तस्याप्युपलक्ष्यत्वात्।

औरसः क्षेत्रजश्चैव दत्तः कृत्रिमकः सुतः।

इति कालिधर्मप्रस्तावे पराशरस्मरणात्। न चैवं क्षेत्रजस्यापि तदापत्तिः। नियोगनिषेधेनैव तन्निषेधात्। तत्र क्षेत्रज इति तु औरसविशेषणम्। यदि तु तत्र क्षेत्रजवत् कृत्रिमक इति दत्तस्य विशेषणममुख्यत्वसूचनद्वारा प्रतिनिधित्वसूचकं तदा माऽस्तु सः, दत्तकांशे तु न विवाद इति दिक्।

स चायं दत्तको द्विविधः। अद्व्यामुष्यायणो द्व्यामुष्यायणश्च। तत्राद्यो माता पिता वेति गोत्ररिक्थे इति च मनूक्तः। यः कृतोपनयनो दत्तः प्रतिग्रहीत्रा च तदुत्तरविवाहादिसंस्कारैः संस्कृतः स द्व्यामुष्यायणः। तत्त्वं च तच्छाखाद्वयगोत्रद्वयभागित्वमेव। एवं यः सोपाधिकदानेन दत्तः प्रतिग्रहीत्रा जातकर्मादिभिः संस्कृतः सोऽपि तथा। तत्र प्रतिग्रहकाले या विद्यमानैकाऽनेका वा सा मुख्यमाता। तदीय एवैकोऽनेके वा मातामहाः। एकासत्त्वे तत्प्रतिग्रहे ततोऽन्यापरिणये सा सापत्नमाता। न तु तदीयमातामहाः। एवं तदा कस्या अप्यभावे ततः परिणयेऽपि बोध्यम्।

एवं क्षेत्रजोऽपि द्विविध इति प्रागुक्तम्। एवं च पूर्वोक्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

युक्तमेव । अत एवैकौरससत्त्वेऽपि ऋतौ पुनर्गमनम् । अन्यथा तदपि न स्यात् । अत एव—

देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ् नियुक्तया ।
प्रजेप्सिताऽधिगन्तव्या संतानस्य परिक्षये ॥
विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि ।
एकमुत्पादयेत्पुत्रं न द्वितीयं कथंचन ॥
द्वितीयमेके प्रजनं मन्यन्ते स्त्रीषु तद्विदः ।
अनिर्वृत्तं नियोगार्थं पश्यन्तो धर्मतस्तयोः ॥

इति क्षेत्रजप्रकरणे मनुः । (अ. ९ । ५९ । ६० । ६१)

"अत्रेप्सितेत्युक्तिरकार्यक्षमपुत्रोत्पत्तौ पुनर्गमनार्था । अत एव *अर्थद्रव्यविरोधेऽर्थो द्रव्याभावे तदुत्पत्तेर्द्रव्याणामर्थशेषत्वात् (पू. मी. ६।३।१९)इत्याधिकरणे यदा पुनरतितनुत्वान्नियोजनस्याप्ययोग्या खादिरता भवति तदापि किं मुख्यत्वात्सैवोपादेया, न हि तयोपात्तयापि कश्चिदर्थः कार्याक्षमत्वात्, अतस्तादृशे लब्धेऽपि तदनादरेण प्रतिनिधिरेव कदरः कार्यक्षम उपादेय इत्युक्तम्।

अन्ये पुनराचार्यनियोगात्पुत्रोत्पादनविधिज्ञा अपुत्र एकपुत्र इति शिष्टप्रवादादानिष्पन्नं नियोगप्रयोजनं मन्यमानाः स्त्रीषु पुत्रोत्पादनं द्वितीयं धर्मतो मन्यन्ते" इति तद्व्याख्यातारः । तस्मात्तत्रैकत्वं यदि विवक्षितं स्यात्तर्हि तदसङ्गतिर्निषेधासङ्गतिश्च स्पष्टैवेति बोध्यम् । अत एव बहुपुत्रत्वविधिः ।

एतमुप परमगामध्यासिषं तस्मान्मम त्वमेकोऽसीति ह कौषीतकिः पुत्रमुवाच रश्मींस्त्वं पर्यावर्तय बहवो वै ते भविष्यन्तीति छन्दोगाः । अस्य चायमर्थः । कौषीतकिर्नाम मुनिः स्वयमादित्यमण्डलमेक एवोपासीनः उद्गानं कृत्वा तत्फलत्वेन पुत्रमेकं प्रतिलभ्य तमुवाच "अहमेतमेकमेवादित्यमध्यासि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(७) न्यायरत्नमाला-श्रीपार्थसारथिमिश्र वि० सं० (मीमांसा) २

(८) ब्रह्मसूत्रभाष्यम्-बादरायणप्रणीत-वेदान्तसूत्रस्य यतीन्द्र श्रीमद्विज्ञान-भिक्षुकृत व्याख्यानम् । सम्पूर्णम् । (वेदान्तः) ६

(९) स्याद्वादमञ्जरी-मल्लिषेणनिर्मिता सम्पूर्णा । (जैनदर्शनम्) २

(१०) सिद्धित्रयम्-विशिष्टाद्वैत-ब्रह्मनिरूपण-परम्-श्रीभाष्यकृतां परमगुरुभिः श्री ६ श्रीयामुनमुनिभिर्विरचितम् । सम्पूर्णम् (वेदान्तः) १

(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टारकाचार्यसंगृहीतः । आचार्यचित्सुख-मुनिविरचितव्याख्योपेतः (वेदान्तः) ४

(१२) विभक्त्यर्थनिर्णयःन्यायानुसारिप्रथमादि-सप्तविभक्तिविस्तृतविचाररूपः म० म० श्रीगिरिधरोपाध्यायरचितः । सम्पूर्णः (न्यायः) ५

(१३) विधिरसायनम् । श्रीअप्पयदीक्षितकृतम् । सं० (मीमांसा) २

(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्ट-सोमेश्वरविरचिता । (मीमांसा) १६

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता । (वेदान्तः) २

(१६) मीमांसाबालप्रकाशः (जैमिनीयद्वादशाऽध्यायार्थसंग्रहः) श्रीभट्टनारायणात्मज-भट्टशङ्करविरचितः । (मीमांसा) २

(१७) प्रकरणपञ्चिका (प्रभाकरमतानुसारि-मीमांसादर्शनम्) महामहोपाध्यायश्रीशालिकनाथमिश्रविरचितं, श्रीशङ्करभट्टकृतो मीमांसा-सारसंग्रहश्च सम्पूर्णः (मीमांसा) ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीसदानन्दव्यासप्रणीत-स्तत्कृतव्याख्यासमलङ्कृतश्च । (वेदान्त) ३

(१९) कात्यायनश्रौतसूत्रम् । महामहोपाध्यायश्रीकर्काचार्यविरचितभाष्यसहितम् । १३

(२०) ब्रह्मसूत्रभाष्यम् । श्रीभास्कराचार्यविरचितम् (वेदान्तः) १

(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम् । आनन्दपूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया (विद्यासागरी) ति प्रसिद्धया समेतम् । (वेदान्तः) १३

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता । १

(२३) श्रीलक्ष्मीसहस्रम्-बालबोधिनीव्याख्ययाऽवतरणिकया च सहितम् । ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२४ ब्रह्मसूत्रवृत्तिः मरीचिका श्रीव्रजनाथभट्टकृता (वेदान्त) २
२५ क्रोडपत्रसंग्रहः । अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्याः प्रत्यक्षानुमानमाथुर्या व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि : (न्यायः) २
२६ ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम् । श्रीसुन्दरभट्टराचितसिद्धान्तसेतुकाऽभिधटीकासहितश्रीदेवाचार्यप्रणीतसिद्धान्तजाह्नवीयुतम् २
२७ षड्दर्शनसमुच्चयः । बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शन संक्षेपः । मणिभद्रकृतटीकया सहितः । हरिभद्रसूरिकृतः । १
२८ शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः । प्रमेयरत्नार्णवश्च १
२९ अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्याजागदीशी टीका । १३
३० वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा संस्कारप्रकाशात्मकः। १०
३१ वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः ५
३२ स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरत्रिपाठिसंकलितः । ४
३३ वेदान्तरत्नमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्यकृता । २
३४ प्रस्थानरत्नाकरः । गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितः २
३५ वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम् । १
३६ योगदर्शनम् । परमहंसपरिव्राजकाचार्य-नारायणतीर्थविरचित-योगसिद्धान्तचन्द्रिका-समाख्यया संवलितम् । २
३७ वेदान्तदर्शनम् । परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वती स्वामिकृत ब्रह्माऽमृतवर्षिणी समाख्य व्याख्यासंवलितम् । ४
३८ विश्वप्रकाशः । कोशः । विद्वद्वर श्रीमहेश्वरसुरिविरचितः । २
३९ श्रीसुबोधिनी । श्रीवलभाचार्यविनिर्मिता । श्रीमद्भागवतव्याख्या गोस्वामीश्रीविठ्ठलनाथदीक्षितविरचित टिप्पणीसहिता । २
४० वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः पुजाप्रकाशः ।
४१ वेदान्तसिद्धान्तसंग्रहः । श्रुतिसिद्धान्तापरनामकः । श्रीब्रह्मचारिवनमा
द्वैतदर्शनानुगतः ।
४२ स्वानुभवादर्शः । श्रीमत्परमहंसपरिव्राजकाचार्य नारायणाश्रमवि
स्वकृतटीकाविभूषितश्च ।
४३ याज्ञवल्क्यस्मृतिः । बालम्भट्टीसमाख्य वाख्यासमलङ्कृतमिताक्षरा

पत्त्राद्रिप्रेषणस्थानम् } हरिदास
चौखम्बा, बन

Registered According to Act XXV of 1867 (Act

धर्मशास्

११०४३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

December, 1912.

Registered According to Act XXV of 1867 (All

THE

CHOWKHAMBÂ SANSKRIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 180. धर्मशास्त्र १५४

व्यवहार- बालंभट्टी

इति प्रसिद्धया लक्ष्मीनामिकया
पायगुण्डे इत्युपनामकेन बालंभट्टेन स्वपत्न्याः लक्ष्मीदेव्याः
स्मारकत्वेन तन्नाम्ना रचितया बृहत्या टीकया सहिता
मिताक्षरा
श्रीयुतगोविन्ददासमहाशयप्रदर्शितरीत्या
पर्वतीयनित्यानन्दपन्तेन परिष्कृत्य संशोधिता ।

VYAVAHÂRA-BÂLAMBHATTI

THE EXTENSIVE COMMENTARY ON THE MITÂKSHARÂ
WITH THE ORIGINAL

BY

Bâlambhatta Páyagunde

EDITED BY

Pandit Nityanand Pant Parvatiya
[U]nder the supervision of Shri Govinda Das.

FASCICULUS VIII.

[PUBL]ISHED AND SOLD BY THE SECRETARY
CHOWKHAMBÂ SANSKRIT BOOK-DEPOT.
BENARES.
AGENTS:- OTTO HARRASSOWITZ: LEIPZIG:
PANDITA JYESHTHÂRAMA MUKUNDAJI BOMBAY:
PROBSTHAIN & CO., BOOKSELLERS, LONDON
Printed by Jai Krishna Dasa Gupta,
AT THE VIDYÂ VILÂSA PRESS
BENARES.
Price Rupee one.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ श्रीः ॥

-*-

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तबकः— १८०

१ अस्यां चौखम्बा-संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्त्रेषु एकःस्तबको मुद्रयित्वा प्रकाश्यते। एकस्मिन् स्तबके एक एव ग्रन्थो मुद्यते ।

२ प्राचीना दुर्लभाश्चामुद्रिता मीमांसावेदान्तादिदर्शनव्याकरण धर्मशास्त्रसाहित्यपुराणादिग्रन्था एवात्र सुपरिष्कृत्य मुद्यन्ते ।

३ काशिकराजकीयप्रधानसंस्कृतपाठशालाऽध्यापकाः पण्डिता अन्ये च शास्त्रदृष्टयो विद्वांस एतत्परिशोधनादिकार्यकारिणो भवन्ति।

४ भारतवर्षीयैः, ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्च एतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम्—मुद्राः ७ आणकाः ८

५ अन्यैर्देयं प्रतिस्तबकम् " " १ " ०

६ प्रापणव्ययः पृथग् नास्ति ।

७ साम्प्रतं मुद्यमाणा ग्रन्थाः— मुद्रिताः स्तबकाः

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता	(संस्कारः)	२
(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः	(व्याकरणम्)	१०
(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृत-न्यायरत्नाकराख्यया व्याख्यया सहितम् । सम्पूर्णम् ।		१०
(४) भाष्योपबृंहितं तत्त्वत्रयम् । विशिष्टाद्वैतदर्शनप्रकरणम् । श्रीमल्लोकाचार्य्यप्रणीतम् । श्रीनारायण तीर्थ विरचित भाट्टभाषा प्रकाशसहितम् । सं०	(वेदान्त)	२
(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः सम्पूर्णः	(ज्योतिषः)	१
(६) भाट्टचिन्तामणिः । महामहोपाध्याय-श्रीगागाभट्ट विरचितः । तर्कपादः	(मीमांसा)	

११७८४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF
धर्मशास्त्र १५४

यं ध्यानमकार्षं तस्माद् दोषान्मम त्वमेक एव पुत्रोऽसि एकपुत्रत्वं च न प्रशस्तम् अतस्त्वं बहुपुत्रतायै रश्मीन्बहूनुपास्तिवेलायामावर्तय" इति। महाभारतमपि प्रागुक्तम्।

इमां त्वमिन्द्र मीढ्वः सुपुत्रां सुभगां कृणु—

दशास्यां पुत्रानाधेहीत्यादिमन्त्राश्चैवं सति बहुपुत्रत्वविधिमुपोद्बलयन्ति। एवं च—

७ ऋतुकालाभिगामी स्यात् यावत्पुत्रो ऽभिजायते।

इति कौर्मं तादृशपुत्रपरतया योज्यमिति न विरोधः। अत एव—

यादृशं फलमाप्नोति कुप्लवैः सन्तरन् जलम्।
तादृशं फलमाप्नोति कुपुत्रैः सन्तरंस्तमः॥

इति मनुः। (अ. ९। १६१)

ज्येष्ठेन जातमात्रेणेति मनोरनुशिष्टत्वरूपज्येष्ठत्ववत्तया जातमात्रेणेत्यर्थादपि न तद्विरोधः। एवमन्यत्रापि यथासम्भवं बोध्यम्।

मेधातिथिना तु "उत्पन्नमात्रेण ज्येष्ठेन संस्काररहितेनापि मनुष्यः पुत्रवान्भवति। ततश्च नापुत्रस्य लोकोऽस्तीत्यलोकता परिहृता। तथा प्रजया पितृभ्य इति श्रुतेः पुत्रेण जातमात्रेण पितॄणामनृणश्च" इत्युक्तम्। यस्मिन्नृणमिति तु साधारणम्। अत एव तत्र "यस्मिन् जाते ऋणं शोधयति येन जातेनामृतत्वं च प्राप्नोति। तथा च श्रुतिः, ऋणमस्मिन्नित्यादि। स एव पितुर्धर्मेण हेतुना जातः पुत्रो भवति। तेनैकेनैव ऋणापनयनाद्युपकारस्य कृतत्वात्। इतरांस्तु ऐच्छिकान्मुनयो जानन्ति" इति तेनोक्तम्। सुब्रह्मण्याह्वानं तु न प्रतिनिधिना किन्तु मुख्येनैव। न स्वामित्वस्य भार्यायाः पुत्रस्य देशस्य कालस्याग्नेर्देवतायाः कर्मणः श-

११०४४
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्दस्य च प्रतिनिधिरिति सत्याषाढोक्तेः ।

जन्मज्येष्ठेन चाह्वानं सुब्रह्मण्यास्वपि स्मृतम् ।
यमयोश्चैव गर्भेषु जन्मतो ज्येष्ठता स्मृता ॥

इत्यौरसप्रकरणे मनूक्तेश्च । [अ. ९।१२६] मेधातिथिनापि तथैव व्याख्यातम् । सत्याषाढोक्तेः तन्तवे ज्योतिष्मतीं तामाशिष इत्याशीराशासनमपि तमादाय न । अत एव श्रुतिः, यस्य पुत्रो जातः स्यात्तन्तवे ज्योतिष्मतीमिति ब्रूयादिति दिक् ।

तस्मात्पुत्रातिदेशा अपि ये सोदरभ्रातृसुतसपत्नीपुत्रादयस्तेऽपि वित्तलाभाभावे पितृव्यस्य सापत्नमातुश्च श्राद्धादिपुत्रकार्यकरणार्हाः । एवं कनीयानप्यग्रजस्याकिञ्चनस्यापि ।

अपुत्रस्य पितृव्यस्य श्राद्धादि पितृवद्भवेत् ।

इति स्मृतेः । ज्येष्ठो भ्राता पितुः सम इति च । पितृपत्न्यः सर्वा मातर इति सुमन्तूक्तेश्च । मनुस्तूभयत्रोक्त एव । एवं पत्नीस्नुषाशिष्यादीनामपि बोध्यम् । अपुत्रा पुत्रवत्पत्नीत्यौशनसात् । भार्यापिण्डमित्यादिप्रागुक्तेश्च । न चापुत्रपितृव्यादेः पत्न्यां भ्रातृसुते च सति कथं कार्यमिति वाच्यम् । उभयत्र पुत्रत्वातिदेशसाम्येऽपि समन्त्रकाक्रियाकृतभेदस्य पूर्वम् उक्तत्वात्तेन तत्पुत्रकर्तृकक्रियाप्राप्तावपि अतिदिष्टादुपदिष्टं बलीय इति न्यायेन भार्यापिण्डमित्यस्य साक्षाद् विधायकत्वेनान्येषां दुर्बलत्वेन तत्र पत्न्यैव कार्या क्रियेति सिद्धान्तात् । न चामन्त्रकत्वापत्तिः । न्यायसिद्धेऽर्थे प्रागुक्तरीत्या संकल्पादौ समन्त्रकत्वेनाग्रे तथात्वापत्ताविष्टापत्तेः । अत एव भ्रातुर्भ्रातेति प्रागुक्तब्राह्मसङ्गतिरिति केचित् ।

परेतु भार्यापिण्डमिति तदभावविषयमित्यादि प्रागुक्तमेवेत्याहुः । स्त्रियास्तु पत्या । भार्यापिण्डमिति साक्षाद्विधेः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदभावे सपत्नीपुत्रेण। सर्वासामिति वचनादिति मिश्रादयः। अत्रापि तत्त्वं परेत्वित्युक्तमेवेति बोध्यम्। न च—

यज्ञेषु मन्त्रवत्कर्म पत्नी कुर्याद्यथा नृप।
तथौर्ध्वदेहिकं कर्म कुर्यात्सा धर्मसंस्कृता॥

इति स्कान्दात्तस्या अपि समन्त्रकाक्रियैवेति वाच्यम्। निबन्धाधृतत्वेन तत्रानाश्वासात्। तत्सत्त्वे वा प्रागुक्तकात्याय-नैकवाक्यतया ऽग्निदानमात्रपरत्वात्।

एतेन "स्कान्दात्सर्वा समन्त्रकक्रियैव। भविष्यपुराणादिकं त्वासुरादिविवाहोढाविषयम्" इत्यपास्तम्।

स्त्रीशूद्रस्थले ऽन्यत्रेष्टापूर्त्तादावित्थं प्रसिद्धतरम्। उ-क्तसुमन्तुवाक्यात्सपत्नीपुत्रे सति भर्त्तुरन्येषां च नाधिकारः। त-था च दौहित्रादितस्तस्य सापिण्ड्यविशेषादेव बलवत्त्वम्।

एवं दौहित्रभ्रातृसुतसमवाये मृतस्य विभक्तत्वे दौ-हित्रस्य बलवत्त्वस्यांशहरणे सत्त्वेऽपि पिण्डादौ स एव बलवा-न्। अविभक्तत्वे तु भ्रातृसुतानामेवांशहरत्वादपि।

एवं भ्रातृतत्पुत्रसमवाये तस्य तत्त्वे भ्रातुर्बलवत्त्वा-त्स्वांशहरत्वेऽपि तत्र तथैव। पत्नीस्नुषादिविषये वाक्यान्यु-क्तान्येव।

किं च दंपत्योर्मिथः शरीरार्धत्वात्स्नुषादेः शरीरार्धोपचा-राच्छिष्याचार्ययोस्तु पितापुत्रवदुपचारात्। न हि दक्षिणः पाणिरितरस्य पाणेरुपचाराद्विना ऽभ्यङ्गादि करोति। तस्माद्धन-लाभं विनाप्येतेषां श्राद्धाधिकारः। अर्थहरत्वे तु सुतरां सर्वे-षाम्। यस्त्वर्थमादायापि तन्न करोति स शास्त्रातिक्रमकारित्वा-द्दण्ड्यो निन्द्यः परलोकच्युतश्च। कुर्वतां तु सर्वमिष्टमेव।

ये तु धनलाभेच्छां विनैव कारुण्यात्स्नेहाद्वा कुर्वन्ति तेषाम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिपुण्यम् । अकरणे च न प्रत्यवायः । शास्त्रनियमाविषयत्वात् । तस्मात्पुत्राभावे एव सर्वेषां यथाक्रममधिकारः ।

तथा च व्याघ्रपात्,

पितुः पुत्रेण कर्त्तव्याः पिण्डदानोदकाक्रियाः ।
पुत्राभावे तु पत्नी स्यादिति ।

स्मृत्यन्तरमपि,

औरसे सति नान्यस्य श्राद्धादेरधिकारिता ।
तदभावे तु शिष्यादेः शास्त्राणामेष निश्चयः ॥ इति ।

यदि पुत्रे सत्यप्यन्येषामधिकारस्तदा पत्न्या किं पापमकारि, येनासौ न करोतीति शङ्का स्यात् । इयमेव हिंसा तेषाम् ऋष्यशृङ्गेणोक्ता । तस्मात्तदभावे एव पत्न्यादीनामधिकार इति सिद्धम् ।

तत्र पत्न्यंशे ऽपवादः क्वचित्,

अपुत्रा स्त्री यथा पुत्रः पुत्रवत्यपि भर्तरि ।
श्राद्धं पिण्डोदकं कुर्याज्जलमेकं तु पुत्रिणी ॥ इति केचित् ।

वस्तुत इदं निर्मूलमिति बोध्यम् । अत्र सर्वत्र वाक्यान्यन्यान्यपि सन्ति । तत्र तावत्—

बृहस्पतिः,

प्रमीतस्य पितुः पुत्रैः श्राद्धं देयं प्रयत्नतः ।
ज्ञातिबन्धुसुहृच्छिष्यैर्ऋत्विग्भृत्यपुरोहितैः ॥ इति ।

प्रचेताः,

स्वामिभृत्यकलत्रेषु मातापित्रोर्गुरौ तथा ।
ऋत्विङ्मित्रे तथा शिष्ये श्राद्धं कार्यं प्रयत्नतः ॥ इति ।

वृद्धशातातपः,

मातुलो भागिनेयस्य स्वस्रीयो मातुलस्य च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिष्यश्चैव गुरोः सख्युः सखा मातामहस्य च ॥
एतेषां चैव भार्याभ्यः स्वसुर्मातुः पितुस्तथा ।
श्राद्धदानं तु कर्तव्यमिति वेदाविदां स्थितिः ॥
प्रीत्या श्राद्धं तु कर्त्तव्यं सर्वेषां वर्णिलिङ्गिनाम् ।
एवं कुर्वन्नरः सम्यक् महतीं श्रियमाप्नुयात् ॥

इति ।

पितुः पुत्रेण कर्तव्यं न कुर्वीत पिता सुते ।
अतिस्नेहान्न कर्तव्यं सपिण्डीकरणं स्त्रियाः ॥
भ्राता वा भ्रातृपुत्रो वा बन्धुर्वा शिष्य एव वा ।
सपिण्डीकरकं कुर्यात्पुत्रहीने नरे खग ॥

इति गारुडं च ।

पुत्रः पौत्रश्च तत्पुत्रः पुत्रिकापुत्र एव च ।
पत्नी भ्राता च तज्जश्च पिता माता स्नुषा तथा ॥
भगिनी भागिनेयश्च सपिण्डः सोदकस्तथा ।
असंनिधाने पूर्वेषामपरे पिण्डदाः स्मृताः ॥

इत्यन्यत्र.चेत्यलमधिकविस्तृतेन।प्रकृतमनुसरामः॥१३५॥१३६॥

मि० अव. पुत्राः पौत्राश्च दायं गृह्णन्ति, तदभावे पत्न्यादय इत्युक्तम् । इदानीं तदुभयापवादमाह ।

या. वानप्रस्थयतिब्रह्मचारिणां रिक्थभागिनः ।
क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः ॥१३७॥

मि० वानप्रस्थस्य यतेर्ब्रह्मचारिणश्च क्रमेण प्रतिलोमक्रमेणाचार्यः सच्छिष्यो धर्मभ्रात्रेकतीर्थी च रिक्थस्य धनस्य भागिनः। ब्रह्मचारी नैष्ठिकः। उपकुर्वाणस्य धनं मात्रादय एव गृह्णन्ति। नैष्ठिकस्य तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धनं तदपवादत्वेनाचार्यो गृह्णातीत्युच्यते। यतेस्तु धनं सच्छिष्यो गृह्णाति। सच्छिष्यः पुनरध्यात्मशास्त्रश्रवणधारणतदर्थानुष्ठानक्षमः। दुर्वृत्तस्याचार्यादेरपि भागानर्हत्वात्। वानप्रस्थस्य धनं धर्मभ्रात्रेकतीर्थी गृह्णाति। धर्मभ्राता प्रतिपन्नो भ्राता। एकतीर्थी एकाश्रमी। धर्मभ्राता चासावेकतीर्थी च धर्मभ्रात्रेकतीर्थी। एतेषामाचार्यादीनामभावे पुत्रादिषु सत्स्वप्येकतीर्थ्यैव गृह्णाति।

ननु "अनंशास्त्वाश्रमान्तरगताः" इति वसिष्ठस्मरणादाश्रमान्तरगतानां रिक्थसंबन्ध एव नास्ति कुतस्तद्विभागः। न च नैष्ठिकस्य स्वार्जितधनसंबन्धो युक्तः। प्रतिग्रहादिनिषेधात्। अनिचयो भिक्षुरिति गौतमस्मरणात् भिक्षोरपि न स्वार्जितधनसंबन्धसंभवः।

उच्यते। वानप्रस्थस्य तावत्—

अह्नो मासस्य षण्णां वा तथा संवत्सरस्य वा।
अर्थस्य निचयं कुर्यात्कृतमाश्वयुजे त्यजेत्॥

इति वचनाद्धनसंबन्धोऽस्त्येव। यतेरपि—

"कौपीनाच्छादनार्थं वासो बिभृयात्" तथा—

योगसंभारभेदांश्च गृह्णीयात्पादुके तथा।

इत्यादिवचनाद्वस्त्रपुस्तकसंबन्धोऽस्त्येव। नैष्ठिकस्यापि शरीरयात्रार्थं वस्त्रादिसंबन्धोऽस्त्येवेति तद्विभागकथनं युक्तमेव॥ २३७॥

बा. १। व्यवहितसंगतिमव्यवहितेनासंभवादाह * पुत्रा इति। चेन प्रपौत्रसमुच्चयः। यद्यपि पौत्रप्रपौत्रयोस्तत्त्वं पूर्वं नोक्तं तथापि तत्रैवं क्रमो बोध्य इति अत्रैव प्रसङ्गोक्त्या सूचितम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा च मनुविष्णू, (मनु. अ. ९ । १३८)
पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः ।
तस्मात्पुत्त्र इति प्रोक्तः स्वयमेव स्वयंभुवा ॥ इति ।
हारीतोऽपि,
पुन्नामा निरयः प्रोक्तश्छिन्नतन्तुश्च नैरयः ।
तत्रैव त्रायते यस्मात्तस्मात्पुत्र इति स्मृतः ॥ इति ।
शङ्खादिरपि,
पितॄणामनृणो जायेत् दृष्ट्वा पुत्रमुखं पिता ।
स्वर्गी स तेन जातेन तस्मिन्संन्यस्यते ऋणम् ॥ इति ।
मनुशङ्खलिखितवसिष्ठहारीता अपि (मनु. अ. ९ । १३७)
पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते ।
अथ पौत्रस्य पुत्रेण बध्नस्याप्नोति विष्टपम् ॥ इति ।
लोकानन्त्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः ।
इति मूलं च । [याज्ञ. अ. १ । ७८]

अन्यान्यपि वचांसि प्रागुक्तानि । यद्यपि पौत्रांशे साक्षात्त्वसाधकं मूलं मानवं च प्रागप्युक्तमेव तथापि प्रपौत्रांशे उक्तवचांस्येव साधकानि नान्यानि । उपकारकत्वाविशेषादपि तस्य तत्त्वमिति बोध्यम् । क्रमेणेत्युभयत्र बोध्यम् ।

२। वानप्रस्थेति द्वन्द्वोत्तरपदको द्वन्द्वः । उत्तरार्धानुरोधेनैवमुक्तम् । तत्र तथोक्तिफलं तु व्याख्याने एवाग्रे स्फुटम् । क्रमेणेत्यस्य श्रुतक्रमेणेति नार्थः । तथा सति तदुक्तिं विनापि शत्रुमित्यादिवल्लौकिकस्थानाख्यप्रमाणेनैव तस्य सिद्धत्वात् । अत आह ※ प्रतिलोमेति । यद्यपि, वानप्रस्थस्याचार्यः सम्भवति "दीक्षितो गुरुणा ऽज्ञातो दिशमुपनिष्क्रम्य" इति वृद्धहारीतीयलिङ्गात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्रैवं विधिवद्राजा प्रत्यगृह्णात्कुरूद्वह ।
स दीक्षां तत्र संप्राप्य राजा कौरवनन्दनः ॥
शतरूपाश्रमे तस्मिन्निवासमकरोत्तदा ।
तस्मै सर्वविधिं राज्ञे राजा प्राह महामतिः ॥

इति धृतराष्ट्रस्य तत्त्वे भारताच्च । एवं च तत्र दीक्षयिता यः स तदाचार्यः । यतेरपि महावाक्योपदेष्टा सः । संन्यस्याचार्यमुपातिष्ठेत ब्रह्मजिज्ञासायामिति शङ्खात् । एवं चाचार्यादिचतुर्णां द्वन्द्वे क्रमेणेत्यस्याचार्यादिक्रमेणेत्यर्थसम्भवः, आदावाचार्यस्ततः शिष्यस्ततो धर्मभ्राता तत एकतीर्थीति। अत एव शिष्यसब्रह्मेत्येकवाक्यता। वानप्रस्थधनमाचार्यो गृह्णीयाच्छिष्यो वेति विष्णुसङ्गतिश्च, तथापि वानप्रस्थस्य ब्रह्मचारिणश्च शिष्याभावात्तथा व्याख्यानस्यात्रासम्भवः। वैष्णवे तु वानप्रस्थेति तयोरप्युपलक्षणम् । चार्थवाशब्देन द्वयोर्ग्रहणम् । क्रमोऽप्ययमेवेति गूढाशयः । एतेन तथा व्याख्यानं शङ्खाद्यदर्शनमूलकमित्युपेक्ष्यमिति भ्रान्तीयमपास्तम् । अत एव तदुक्तिसङ्गतिरपीति दिक् ।

३ । विशेषमाह * ब्रह्मेति । इदमेव विशदयति * उपकुर्वाणस्येति । स्वरीत्या आह * मात्रादय एवेति । अन्यथा तस्य निर्विषयतापत्तेः । अत एवास्योभयापवादत्वम् । अन्यथा ब्रह्मचार्यंशे प्रथमापवादत्वासम्भवः स्पष्ट एवेति भावः । * तदपवादत्वेनेति । मात्रादिग्रहणापवादत्वेनेत्यर्थः । अन्यथाऽस्य निर्विषयतापत्तेः । वैपरीत्यं तु न । प्रत्यासत्तितारतम्यात् ।

४। शिष्ये सत्त्वं न विद्यमानत्वं, विपरीतस्य ग्रहणस्यैवासंभवात् इत्यत आह * सच्छिष्यः पुनरिति । स त्वित्यर्थः । तत

१ टीकाकारोक्तनिष्कर्षे तु पित्रादय इत्युचितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एव योग्यतयाऽऽह * अध्यात्मेति। शिष्ये सम्यक्त्वमुपलक्षणतयाऽन्यत्रापि बोध्यम्। अतः अन्यावपि सुवृत्तावेव धनभाजौ। अत एव मूलकृता उभयत्रापि तत्सम्बन्धद्योतनार्थं सच्छिष्येति मध्ये पठितम् इत्याशयेनाह *दुर्वृत्तस्येति। आदिना ऽग्रिमपरिग्रहः। अपिना तस्यैव समुच्चयः।

५। यद्वा शिष्यसत्त्वं नादुर्वृत्तत्वमात्रं, तथा सति आचार्यादेरपि दुर्वृत्तस्य भागानर्हत्वस्याविशिष्टत्वेन तस्यैव तत्त्वकथनासङ्गतेः। किं तु योग्यतया ऽध्यात्मश्रवणादिसमर्थत्वमित्याह * सच्छिष्यः पुनरित्यादिना भागानर्हत्वादित्यन्तेन।

६। धर्मभ्रात्रेकतीर्थीत्येकम्। अन्यथा यथासंख्यानापत्तेरित्याह * धर्मेति। तत्राद्यार्थमाह * प्रतिपन्न इति। भ्रातृत्वेनाङ्गीकृत इत्यर्थः। द्वितीयार्थमाह * एकाश्रमीति। वानप्रस्थ एव स्वाश्रमनिकटवासीत्यर्थः।

तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु।

जलावतारे योनौ चेति विश्वाद्युक्तेः। नन्वेवं धर्मभ्रातेत्येवालं, कृतमग्रिमेणेति चेन्न। आचार्यादीनामभावे तेषां सर्वेषां धनं को गृह्णीयादित्याशङ्कानिरासार्थं तदुपादानात्। तथा च तत् पृथक् निमित्तं, न तु तेन समस्तमिति धर्मभ्रात्रन्तेन द्वन्द्वसमासं कृत्वा पुनर्द्वन्द्व इति तत्सर्वान्वयीत्याशयेनाह * एतेषामिति।

७। मूलायुक्तत्वं शङ्कते * नन्वनंशा इति। भागशून्या इत्यर्थः। * आश्रमान्तरेति। गृहस्थान्येत्यर्थः। प्रतिग्रहादीति आदिना याजनादि। * अनिचय इति। असंग्रह इत्यर्थः।

८। पूर्वपक्षिणा तृतीये विशिष्य असंभवात्तदसम्भवो नोक्त इत्याशयेन तावत्तत्राह * वानप्रस्थस्येति। * अह्नः, तन्मात्रभो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जनपर्याप्तस्य । एवं सर्वत्र। *षण्णां, मासानाम् । *तथा, तद्वत् । * निचयं, संग्रहम् । यतेरपीत्यस्याग्रेऽन्वयः । एवं श्रौतवचनमुक्त्वा स्मार्त्तवचनमाह * तथेति । * योगेति । योगस्य सामग्रीविशेषानित्यर्थः । तत्प्रतिपादकग्रन्थादीनिति यावत् । आदिना पादुकाकमण्डल्वादि ।

कौपीनाच्छादनार्थं हि वासो वै बिभृयाच्च सः ।

इति पूर्वार्धपाठे क्वाचित्के एकमेव वचनम् । * यात्रा, संरक्षणम् ॥ १३७ ॥

मि० इदानीं स्वर्यातस्यापुत्रस्य पत्न्यादयो धनभाज इत्युक्तस्यापवादमाह ।

या० संसृष्टिनस्तु संसृष्टी ।

मि० विभक्तं धनं पुनर्मिश्रीकृतं संसृष्टं तदस्यास्तीति संसृष्टी । संसृष्टत्वं च न येन केनापि किंतु पित्रा भ्रात्रा पितृव्येण वा ।

यथाह बृहस्पतिः,

विभक्तो यः पुनः पित्रा भ्रात्रा वैकत्र संस्थितः ।
पितृव्येणाथवा प्रीत्या स तत्संसृष्ट उच्यते ॥ इति ।

तस्य संसृष्टिनो मृतस्यांशं भागं विभागकाले अविज्ञातगर्भायां भार्यायां पश्चादुत्पन्नस्य पुत्रस्य संसृष्टी दद्यात् । पुत्राभावे संसृष्ट्येवापहरेत् गृह्णीयात् न पत्न्यादि ।

मि० संसृष्टिनस्तु संसृष्टीत्यस्यापवादमाह ।

या० सोदरस्य तु सोदरः ।

दद्याद्वाऽपहरेद्वांऽशं जातस्य च मृतस्य च ॥१३८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि० संसृष्टिनस्तु संसृष्टीत्यनुवर्तते। अतश्च सोदरस्य संसृष्टिनो मृतस्यांशं धनं सोदरः संसृष्टी संसृष्टानुजातस्य सुतस्य दद्यात्। तदभावे अपहरेदिति पूर्ववत् संबन्धः। एवंच सोदरासोदरसंसर्गे सोदरसंसृष्टिनो धनं सोदर एव संसृष्टी गृह्णाति, न भिन्नोदरः संसृष्ट्यपीति पूर्वोक्तस्यापवादः॥ १३८॥

बा० १। प्राग्वत् पूर्वतो विशेषेणाह *इदानीमिति।*उक्तस्य, तन्मात्रस्य। अत एवानयोः पौर्वापर्ये। * आहेति। द्वितीयपादरहितेनेत्यर्थः। संसृष्टिशब्दं निर्वक्तुं संसृष्टशब्दार्थमाह- * विभक्तमिति। * पुनः, विभागोत्तरम्। कर्मणि तत्र क्तः। * मिश्रीकृतमिति। संसृष्टन्धनमुभयं समाकृतमिति श्रुतेः। यदेकं सदुभौ याति तदुभयम्। विभक्तमिति यावत्। तत्समाकृतं साधारणीकृतं संसृष्टमिति तदर्थः। एवं च प्रत्यासत्त्या ययोर्विभागस्तयोरेव मिश्रणे तत्त्वमिति नान्यविभागेऽन्येन मिश्रणे तत्त्वमिति भावः।

२। प्रसङ्गात् विशेषमाह * संसृष्टत्वं चेति। तद्धनसंसर्गे तेषामपि संसर्गः सम्पन्न एवेति भावः। सहयोगे तृतीया। यो विभक्तः सन् पुनः पश्चादित्याद्यर्थः। * एकत्र, गृहे। तत्र हेतुमाह * प्रीत्येति। * तत्संसृष्ट इति। तेन संसृष्ट इत्यर्थः।

३। अयं भावः।येषामेव हि पितृभ्रातृपितृव्याणां पितृपितामहार्जितद्रव्येणाविभक्तत्वमुत्पत्तितः सम्भवति तएव विभक्ताः सन्तो मिथः प्रीत्या यदि पूर्वविभागनाशेन "यत्तव धनं तन्ममापि यन्मम धनं तत्तवापि" इत्येवम् एकत्र गृहे एकगृहिरूपतया संस्थितास्ते एव तथोच्यन्ते, न पुनरप्यनेवंरूपाणां तथाकारिणामपि संसर्गित्वम्। नापि विभक्तानां तथा तेषाम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं च तत्सम्बन्धित्वमात्रादिनिरासेन पूर्ववत्साधारणोपभोग्यतापादनमेवैकत्र स्थितिः । तच्चोक्तानुमतिरूपमेव । सा च क्वचिद्वाचनिकी, क्वचिदनन्यथासिद्धव्यवहारगम्या ।

अनुक्त्वाऽपि वचः किञ्चित्कृतं भवति कर्मणा ।

इति विष्णुपुराणात् । एवं च त्रयनियम एव । मानवमप्युक्तरीत्या त्रितयपरमेव । अन्यथा भ्रातृमात्रविषयतैव च तस्य स्यात् इति ।

विभक्ता भ्रातरो ये च संप्रीत्यैकत्र संस्थिताः ।
पुनर्विभागकरणे ज्यैष्ठ्यं तत्र न विद्यते ॥
यदा कश्चित् प्रमीयेत प्रव्रजेद्वा कथञ्चन ।
न लुप्यते तस्य भागः सोदरस्य विधीयते ॥
या तस्य भगिनी सा तु ततोंऽशं लब्धुमर्हति ।
अनपत्यस्य धर्मोऽयमभार्यापितृकस्य च ॥

इति बृहस्पतेराशयस्तूक्त एव ।

एतेन पित्रादिगणनं प्रपञ्चार्थं, नान्यपरिसंख्यार्थं, दोषत्रयापत्तेः । सामान्यतो मनूक्तेर्बृहस्पतेरनुपपत्तेश्चेति भ्रान्तोक्तमपास्तमिति ।

४। एवं पदार्थमुक्त्वा मूलाद्यपादं ससाधारणोत्तरार्धं व्याचष्टे * तस्य संसृष्टिन इति । तत्र चस्त्वर्थे, मृतस्य तु । अंशमित्यस्य व्याख्या * भागमिति ।

वचनान्तरविरोधपरिहाराय तत्संभवं प्रतिपादयन् तदर्थेन वाक्यार्थं पूरयति * विभागेति । समस्तो व्यस्तो वा पाठः । सति सप्तमी । जातस्येत्यस्यार्थमाह * उत्पन्नस्येति । शेषे षष्ठी । चोऽत्र एवार्थे। उत्पन्नाय पुत्रायैव नान्यस्मै। तत्र वाशब्द एवार्थे। दद्यादेव न स्वयं गृह्णीयात्। द्वितीयोऽपि वाशब्द एवार्थे व्यु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्क्रमे चेत्याह * संसृष्ट्येवेति। अपहरेदित्यस्य व्याख्या * गृह्णीयादिति। जातस्येत्याद्युक्त्या नेदमपि प्राग्वदुभयापवादभूतं, किं तु पत्नीत्यादिमात्रापवादभूतम्, अन्यथा तदसंगतिः स्पष्टैवेत्याशयेनाह * न पत्न्यादीति। अत्र मूले एकत्वमविवक्षितम्। अतस्तदनेकत्वे विभज्य ग्रहणं, तत्पत्न्याः पोषणं चेति भावः। अत एव तुस्तद्वैलक्षण्ये।

५। एतेन प्राचां व्याख्यानाभिप्रायो निरस्तः। अयं भावः। यदा संसृष्टिनास्त्रिप्रभृतयः, तदा तेष्वेकस्मिन्भ्रातरि स्वभार्यायां गर्भमाधाय दिवं गते ऽवशिष्टानां जीवतामनेकत्वादग्रे ऐक्यासंभवाच्च विभागः प्राप्तः। ऐकत्वे ऐक्ये च विभागाभावात्। तत्र तत्र विभागकाले ऽस्पष्टगर्भत्वेन गर्भाज्ञानेन विभागनिष्पत्तौ कालान्तरे पुत्रे उत्पन्ने तस्मै तत्पित्रंशो देयस्तदभावे संसृष्टिव्यक्तिपर्यालोचनेनांशकल्पनया संसृष्टिन एव।

उ०६। *संसृष्टीत्यस्येति। पूर्वपादोक्तस्य द्वितीयपादेनेत्यर्थः। उत्तरार्धं तु साधारणमस्त्येव। अत एवाह *संसृष्टिनस्त्विति। तथा सति संपन्नं वाक्यार्थमाह *अतश्चेति। तदनुवृत्तेरित्यर्थः। संसृष्टिनो मृतस्यांशं धनमिति पाठः। * सोदरः, स एव। * अनु, पश्चात्। अनेन विभागकाले ऽस्पष्टगर्भायां विभागोत्तरमिति सूचितम्। *जातस्य, सुतस्य। *पूर्ववदेवेति। संसृष्ट्येव गृह्णीयान्न पत्न्यादीत्येवमित्यर्थः। एवं सति अस्य तदपवादत्वमुक्तं नाप्राप्तिं विना न संभवतीति तदर्थं विशेषविषयतया त्रिशदयति * एवं चेति। उक्तसंबन्धेनेत्यर्थः। *सोदरेति। उभयसंसर्गे इत्यर्थः।

---

१ संसृष्टिभ्रातृमरणानन्तरं संसृष्टिन एकत्वे, बहुत्वेऽपि तेषां पुनरप्येकवाक्यत्वे च विभागाभावादित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत एव यमः,

अविभक्तं स्थावरं यत्सर्वेषामेव तद्भवेत् ।
विभक्तं स्थावरं ग्राह्यं नान्योदर्यैः कथं चन ॥ इति ।

बृहन्मनुः,

एकोदरे जीवति तु सापत्नो न लभेद्धनम् ।
स्थावरेऽप्येवमेव स्यात्तदभावे लभेत वै ॥ इति ।

प्रजापतिरपि,

अन्तर्द्धनं तु यत् द्रव्यं संसृष्टानां च तद्भवेत् ।
भूमिं गृहं च संसृष्टाः प्रगृह्णीयुर्यथांशतः ॥ इति ।

संसृष्टी गृह्णाति स्थावरवर्जं स्थावराणां सपिण्डसमतेति वृद्धहारीतस्तु तथा योज्यः ॥ १३८ ॥

मि० अव. इदानीं संसृष्टिन्यपुत्रे स्वर्याते संसृष्टिनो भिन्नोदरस्य सोदरस्य चासंसृष्टिनः सद्भावे कस्य धनग्रहणमिति वीक्षायां द्वयोर्विभज्य ग्रहणे कारणमाह।

या० अन्योदर्यस्तु संसृष्टी नान्योदर्यो धनं हरेत् ।
असंसृष्ट्यपि वाऽऽदद्यात्संसृष्टो नान्यमातृजः॥ १३९॥

मि० अन्योदर्यः सापत्नो भ्राता संसृष्टी धनं हरेत् । न पुनः अन्योदर्यो धनं हरेदसंसृष्टी । अनेनान्वयव्यतिरेकाभ्यामन्योदर्यस्य संसृष्टित्वं धनग्रहणे कारणमुक्तं भवति । असंसृष्टीत्येतदुत्तरेणापि संबध्यते। अतश्चासंसृष्ट्यपि संसृष्टिनो धनमाददीत । कोसावित्यत आह । संसृष्ट इति । संसृष्ट एकोदरसंसृष्टः, सोदर इति यावत् । अनेनासंसृष्टस्यापि सोदरस्य धनग्रहणे सोदरत्वं कारणमुक्तम् । संसृष्ट इत्युत्तरेणा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पि संबध्यते। तत्र च संसृष्टः संसृष्टीत्यर्थः। नान्यमातृजः। अत्रैवशब्दाध्याहारेण व्याख्यानं कार्यम्। संसृष्ट्यप्यन्यमातृज एव संसृष्टिनो धनं नाददीतेति। एवं च असंसृष्ट्यपि वाऽऽदद्यादित्यपिशब्दश्रवणात्, संसृष्टो नान्यमातृज एवेत्यवधारणनिषेधाच्च असंसृष्टसोदरस्य संसृष्टभिन्नोदरस्य च विभज्य ग्रहणं कर्तव्यमित्युक्तं भवति। द्वयोरपि धनग्रहणकारणस्यैकैकस्य सद्भावात्। एतदेव स्पष्टीकृतं—

मनुना, (अ. ९ श्लो. २१०)

विभक्ताः सहजीवन्तो विभजेरन्पुनर्यदि—

इति संसृष्टिविभागं प्रक्रम्य (अ.९श्लो.२११।२१२)

येषां ज्येष्ठः कनिष्ठो वा हीयेतांशप्रदानतः।
म्रियेतान्यतरो वाऽपि तस्य भागो न लुप्यते॥
सोदर्या विभजेयुस्तं समेत्य सहिताः समम्।
भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः॥

इति वदता। येषां भ्रातॄणां संसृष्टिनां मध्ये ज्येष्ठः कनिष्ठो मध्यमो वांऽशप्रदानतोंऽशप्रदाने, सार्वविभक्तिकस्तसिः विभागकाले इति यावत्, हीयेत स्वांशात् भ्रश्येत आश्रमान्तरपरिग्रहेण ब्रह्महत्यादिना वा म्रियेत वा तस्य भागो न लुप्यते अतः पृथगुद्धरणीयो न संसृष्टिन एव गृह्णीयुरित्यर्थः। तस्योद्धृतस्य विनियोगमाह। सोदर्या विभजेयुस्तमिति। तमुद्धृतं भागं सोदर्याः सहोदरा असंसृष्टा अपि समेत्य देशान्तरगता अपि सहिताः संभूय समं न न्यूनाधिकभावेन, ये च भ्रातरो भिन्नोदराः संसृष्टास्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च, सनाभयो भगिन्यश्च समं विभजेयुः समं विभज्य गृह्णीयुरिति तस्यार्थः ॥ १३९ ॥

बा. १। उत्तरसङ्गतिमव्यवहितेनाह *इदानीमिति । *संसृष्टिनीति । भिन्नोदरेण सहेति भावः । *वीक्षायामिति । विचारे समुत्पन्ने सतीत्यर्थः । जिज्ञासायां सत्यामिति यावत् । उभाभ्यां नियमाभ्याम् उभयोरपि प्राप्तेरिति भावः । अत एवाह * विभज्येति । * कारणं, पूर्वनियमद्वयसूचितमेव ।

२ । अन्योदर्य इत्यत्र वाक्यचतुष्टयं–विधिः, निषेधः, विधिः, निषेधश्चेति । प्रथमपादेन विधिमाह * अन्योदर्य इति । धनं हरेदित्यस्यापकर्षस्तदाह * धनमिति । पूर्वतः संसृष्टिन इत्यस्यानुवृत्त्या संसृष्टिनो धनमित्यर्थः ।

३ । अथ द्वितीयपादेन तृतीयपादाद्यार्धसहितेन निषेधमाह * न पुनरिति । न त्वित्यर्थः । अतो यन्निष्पन्नं तदाह *अनेनेति । पूर्वार्धेनेत्यर्थः । *अन्वयेति । संसृष्टिनो भिन्नोदरस्य धनहारित्वविधिरूपेणान्वयेन, असंसृष्टिनो भिन्नोदरस्य धनहारित्वनिषेधरूपेण च व्यतिरेकेणेत्यर्थः ।

४ । असंसृष्टीत्येतत् मध्यमणिन्यायेनाग्रेऽपि सम्बध्यते इति तृतीयपादेन पुनर्विधिमाह * असंसृष्टीत्येतदिति । * अतश्च, तत्सम्बन्धाच्च । तदनुवृत्तिः प्राग्वदेवेत्याह * संसृष्टिन इति । मूले वाशब्दः चार्थे इति भावः । न केवलमेतावदेवैकं वाक्यम् अपि तु उत्तरपादाद्यपदघटितं प्राग्वदेवेत्याह *कोसाविति । तत्र संसृष्टार्थे पूर्वोक्तभिन्नमाह * संसृष्टः एकोदरेति । एकस्मिन्मातुरुदरे जात इत्यर्थः ।

५ । यत्तु–एतत् पितर्यपि बोध्यम्,

पतिर्जायां प्रविशति गर्भो भूत्वेह मातरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति जायाया अपि मातृत्वस्य श्रौतत्वात्। एवं च पितुः पुत्रत्वेन सोदरत्वे तद्भ्रातुरपि तत्सोदरत्वात्तत्वं बोध्यमिति असंसृष्ट्यपि पिता पुत्र एवेति तादृशः सोऽसंसृष्ट्यपि पितुस्तद्भ्रातुः परेतस्यान्येन संसृष्टिनो भागं हरेदिति तात्पर्यं संसृष्टपदप्रयोगस्येति केचित्।

तन्न। अनिष्टापत्तेः। तदेतत् ध्वनयन्नेवाह * सोदर इति यावदिति। अस्य तात्पर्यार्थमाह * अनेनेति। पादेनेत्यर्थः। * असंसृष्टस्यापि, असंसृष्टिनोऽपि।

६। प्राग्वदेवाह * संसृष्ट इत्युत्तरेणापीति। तत्र च नान्यवहितोक्तोऽर्थः, अपि तु प्रागुक्त एवेत्याह * तत्र चेति। उत्तरवाक्यशेषभूते संसृष्ट इत्यत्रेत्यर्थः। अर्शआद्यजिति भावः।

७। तुर्यपादं व्याख्यातुं प्रतीकं धत्ते *नान्येति। मन्वनुरोधेन सर्वं वाक्यमिति न्यायेनाह * अत्रैवशब्देति। तथा तस्य तदेवाह * संसृष्ट्यपीति। इदं सर्वमनुवृत्तिलभ्यम्।

८। उत्तरार्धस्य संपूर्णस्य तात्पर्यार्थं पूर्वप्रतिज्ञातमाह *एवं चेति। उत्तरार्धस्योक्तार्थकत्वे चेत्यर्थः। *अवधारणेति। तन्निषेधादित्यर्थः। असंसृष्टेत्यादि प्राग्वत्। कृत्यानामिति कर्त्तरि षष्ठी। तत्र हेतुमाह * द्वयोरपीति। * एकैकस्येति। प्रागुक्तस्यैवेत्यर्थः। भिन्नोदरस्य संसृष्टित्वं धनग्रहणे हेतुः, सोदरस्य तत्त्वमेव हेतुर्न संसृष्टित्वमिति भावः।

९। उक्तं द्रढयति * एतदेवेति। मनुनेत्यस्य विभक्ता इत्यादि वदतेत्यन्तं विशेषणम्। * इति, इत्यनेन। * प्रक्रम्येति। सहजीवन्त इत्युक्त्या तत्प्रक्रम इति भावः।

समस्तत्र विभागः स्याज्ज्यैष्ठ्यं तत्र न विद्यते।

इति अस्योत्तरार्द्धम्। पूर्वं कथमपि विभागेऽपीदानीं सम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एव विभागः । ज्येष्ठस्य विंश उद्धार इत्याद्युक्तोद्धारो नास्तीति तदर्थः ।

१०। येषामित्यादि मानवं व्याचष्टे * येषामित्यादि । प्रक्रमादेवाह * संसृष्टिनामिति । मिथ इत्यादिः । आद्यन्तयोरुक्तेः न्यायसाम्याच्च मध्यमोऽप्युपलक्षणत्वेन वा विवक्षित इत्याशयेनाह * मध्यमो वेति । प्रदानपदोक्तेराधिक्यादाह * अंशप्रदाने इति । अत एव च तदुपपत्तिमाह * सार्वेति । आद्यादित्वादिति भावः । तथा चांशस्य प्रदानं यस्मिन्निति भावल्युडन्तेन व्यधिकरणबहुव्रीहिणा कालो विवक्षित इति नाधिक्यं तस्येति भावस्तदाह * विभागेति । अर्थादाह * स्वांशादिति । ततो भ्रंशे हेतुमाह * आश्रमान्तरेति । वानप्रस्थादीत्यर्थः । मौलमेव हानितो विकल्पमाह * म्रियेत वेति । अन्यतरोऽपीति शेषः । अन्यतम इत्यर्थः । उपात्तापेक्षया तथोक्तिः । अपिर्व्याद्यादिसमुच्चये । अस्यैव तात्पर्यमाह * अत इति । अलोपादित्यर्थः । तस्यापि तात्पर्यमाह * न संसृष्टीति ।

११।सोदर्या इति मानवं व्याख्यातुमवतारयति * तस्योद्धृतस्येति । *विनियोगमाहेति । द्वितीयश्लोकेन स एवेति भावः । भ्रातरो ये च संसृष्टा इत्युत्तरार्धे संसृष्टपदोक्त्या ऽत्र तन्मात्रोक्त्या सोदरा असंसृष्टा अपीत्यर्थलभ्यासंसृष्टाअपीतिपदान्वयेन पूर्वार्धं व्याचष्टे * तमित्यादिना । अपिना तेषां संग्रहः । तथा च साधारणमिदम् । आगमनस्यावधिसाकाङ्क्षत्वादाह *येदेशान्तरगतास्तेपि इति । देशान्तरगता अपीति पाठान्तरम् । सहिता इत्यस्य व्याख्या * सम्भूयेति । मिलित्वेत्यर्थः । सममित्यस्य व्याख्या *न न्यूनेति। उत्तरार्द्धार्थमाह *ये चेति। अत्र चोक्तेर्भ्रातर इत्युक्तेः पूर्वत्र सोदरा इत्युक्तेश्चाह * भिन्नोदरा इति । अन्यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तद्वैयर्थ्यं स्पष्टमेव । * सनाभयः, सहोदर्यः । विभजेयुरित्यस्य व्याख्या * विभज्येति । सममिति अत्रापि बोध्यम् । क्वचित्त्वत्रापि ततः प्राक् तत्पाठ एव । * तस्य, सोदर्या इत्यस्य ।

१२। अत्र भिन्नोदरा भ्रातरः समानजातीया बोध्याः । असमानजातीयभिन्नोदरसंसृष्टिभ्रातॄणां तु चतुस्त्रीत्याद्युक्तक्रमेण विभागः । समशब्दस्य भिन्नजातीयभ्रातृभिन्नसमानजातीयभिन्नोदरभ्रातृविषयत्वेनैव साफल्ये चतुस्त्रीत्येतद्बाधकत्वे मानाभावात् ।

बृहस्पतिरपि,

संसृष्टानां तु यः कश्चिद्विद्याशौर्यादिनाऽधिकम् ।
प्राप्नोति तस्य दातव्यो द्व्यंशः शेषाः समांशिनः ॥ इति ।

द्व्यंशदानं तदधिकधनप्राप्तौ ज्ञेयम् ।

शङ्खोऽपि प्रागुक्त एव, भ्रातॄणामिति ।

नारदोऽपि, (व्यव. १३ । २४)

संसृष्टानां तु यो भागस्तेषामेव स इष्यते ।
अतो ऽन्यथाऽनंशभाजो निर्बीजेष्वितरानियात् ॥ इति ।

कात्यायनोऽपि,

संसृष्टानां तु संसृष्टाः पृथक्स्थानां पृथक्स्थिताः ।
अभावेंऽशहरा ज्ञेया निर्बीजान्योन्यभागिनः ॥ इति ।

अतोऽन्यथा संसृष्टिनामभावे।निर्बीजेषु संतानरहितेषु संसृष्टिषु तेषां भाग इतरानंशहरानियात्। अभावे पुत्रादेरंशहरस्याभावे।

१३। अत्रायं निष्कर्षः। भिन्नोदरसंसृष्टिभ्रात्रभावे सोदराणां मध्ये यः संसृष्टिसोदरः स एव संसृष्टिनः सोदरस्य मृतस्य धनमादद्यात् इत्यादि । भिन्नोदरेषु तु सजातीयासजातीयत्वकृतभेद उक्त एव । यदा सोदरा असोदराश्च संसृष्टिनस्तदा सोद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रा एव गृह्णीयुः । यदा त्वसंसृष्टिनः सोदराः संसृष्टाश्च भिन्नोदरास्तदोक्तरीत्या उभाभ्यां ग्राह्यम् । एतद्वैपरीत्ये तु सोदरैरेव। सोदराणां मध्येऽपि केचित्संसृष्टा नान्ये तदा सोदरत्वसंसृष्टत्वाभ्यां संसृष्टिभिरेवेति ।

१४। यत्तु एकमातृजत्वभिन्नमातृजत्वरूपविशेषेण भ्रातृषु या व्यवस्था दर्शिता सा साक्षात्पितृव्यसापत्नपितृव्येऽपि योज्या न्यायस्य तुल्यत्वादिति । तन्न । सोदरस्य त्विति विधिवाक्ये सोदरत्वस्याविवक्षायां बीजाभावात्सोदरपदस्य पितृव्योपलक्षकत्वाभावात् । लोके ऽत्यन्तविरुद्धवचनविरोधाच्च न्यायस्य तत्राप्रवृत्तेरिति दिक् ।

१५। एतेन "अपुत्रधनं भ्रातॄणामित्युक्तं तत्र विशेषमाह। *संसृष्टिन इति । सर्वमेकं वाक्यम् । तस्मिन्मृते जातस्य पुत्रस्य दद्यादिति तु प्रासङ्गिकम् । सोदर्यत्वाभावे तु नांशभाक्त्वमिति स्पष्टयति * अन्योदर्य इति । यदात्वन्योदर्य एव संसृष्टी न सोदरस्तदाऽऽह * असंसृष्ट्यपि इति" इत्यपरार्कोक्तमपास्तम्।

अस्य भ्रातृमात्रविषयत्वे पित्रादिसंसर्गविध्यानर्थक्यापत्तेः। तन्निर्णायकवचनान्तराभावात् । प्रकरणविच्छेदकतुशब्दद्वयवैयर्थ्यात् । वानप्रस्थेत्यादिना तद्विच्छेदात् । सोदर्यनियमादेवान्यव्यावृत्तौ तदुक्तिवैयर्थ्यात् । संसृष्टिसत्त्वेऽप्यसंसृष्टिनोंऽशभाक्त्वे नारदादिविरोधाच्च ।

१६। एतेन "इदानीमित्याद्यवतरणम् अन्योदर्य इत्यस्य चिन्त्यम्। अतोऽन्यथेत्यादिनारदादिविरोधात्। पूर्वान्वितयोरग्रे ऽनुषङ्गे संसृष्टपदस्यार्थद्वयकल्पने एवकाराध्याहारे च प्रमाणाभावाच्च। अनेन अन्वयव्यतिरेकाभ्यामित्याद्यपि चिन्त्यम् । संसृष्टिवाक्यस्य पत्न्याद्यपवादत्वोक्त्यैव तदर्थसिद्धेः वाक्यानर्थक्यात् । पित्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देरपि संसृष्टित्वे पृथग् अन्योदर्ये तदुक्तिवैयर्थ्याच्च । विभक्ता इति मनोः तथा व्याख्यानमपि चिन्त्यम् । तयोर्विशेष्यविशेषणभावेनैव बृहस्पत्येकवाक्यतयाऽर्थान्तरकल्पनाया अन्याय्यत्वात् । चकारात् तथा कल्पने नारदादिविरोधात् । चद्वयस्य द्वन्द्वविग्रहवदुपपत्तेः । विशेषणानर्थक्यं तु न, भगिनीविशेषणवद्भिन्नोदरवारणार्थत्वात् । तस्मात्सापत्नो धनं हरेत्, अन्योदर्यः सोदरः संसृष्टी न चेत्, असंसृष्टयपि आदद्यात्, संसृष्टो नान्यमातृजश्चेदिति व्याख्यानमुचितम्" इति भ्रान्तोक्तमपास्तम् । आशयानवबोधात् । अत्रांशमिति सामान्योक्त्या स्थावरेऽप्येवम् । अत एव प्रागुक्तयमादिसङ्गतिः । एतेन "अंशमिति सामान्योक्तावपि स्थावरे विशेषो वृद्धहारीताद्युक्त" इति भ्रान्तोक्तमपास्तम् ॥ १३९ ॥

मि० अव. पुत्रपत्न्यादिसंसृष्टिनां यद्दायग्रहणमुक्तं तस्यापवादमाह ।

या० क्लीबोऽथ पतितस्तज्जः पङ्गुरुन्मत्तको जडः ।
अन्धोऽचिकित्स्यरोगाद्या भर्तव्याः स्युर्निरंशकाः ॥ १४० ॥

मि० क्लीबस्तृतीयाप्रकृतिः । पतितो ब्रह्महादिः । तज्जः पतितोत्पन्नः । पङ्गुः पादविकलः । उन्मत्तकः वातिकपैत्तिकश्लैष्मिकसान्निपातिकग्रहावेशलक्षणैरुन्मादैरभिभूतः । जडो विकलान्तःकरणः, हिताहितावधारणाक्षम इति यावत् । अन्धो नेत्रेन्द्रियविकलः । अचिकित्स्यरोगः अप्रतिसमाधेययक्ष्मादिरोगग्रस्तः ।

---

१ अन्योदर्य इत्यस्य व्याख्यानं सोदर इति । अन्यश्चासौ उदर्यश्चेति तत्र विग्रहः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आद्यशब्देनाश्रमान्तरगतपितृद्वेष्युपपातकिबधिरमूकनिरिन्द्रियाणां ग्रहणम् ।

यथाह वसिष्ठः, अनंशास्त्वाश्रमान्तरगता इति।
नारदेनापि, (व्यव. १३ । २१)

पितृद्विट् पतितः षण्ढो यश्च स्यादौपपातिकः ।
औरसा अपि नैतेंऽशं लभेरन्क्षेत्रजाः कुतः॥ इति।

मनुरपि, (अ. ९ श्लो. २०१)

अनंशौ क्लीबपतितौ जात्यन्धबधिरौ तथा ।
उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः ॥ इति।

निरिन्द्रियो निर्गतमिन्द्रियं यस्माद्व्याध्यादिना स निरिन्द्रियः। एते क्लीबादयोऽनंशा रिक्थभाजो न भवन्ति । केवलमशनाच्छादनदानेन पोषणीया भवेयुः। अभरणे तु पतितत्वदोषः।

(अ. ९ श्लो. २०२)

सर्वेषामपि तु न्याय्यं दातुं शक्त्या मनीषिणा ।
ग्रासाच्छादनमत्यन्तं पतितो ह्यददद्भवेत् ॥

इति मनुस्मरणात् । अत्यन्तं यावज्जीवमित्यर्थः। एतेषां विभागात्प्रागेव दोषप्राप्तावनंशत्वमुपपन्नं न पुनर्विभक्तस्य । विभागोत्तरकालमप्यौषधादिना दोषनिर्हरणे भागप्राप्तिरस्त्येव। (याज्ञ. २ । १२२)

विभक्तेषु सुतो जातः सवर्णायां विभागभाक्।

इत्यस्य समानन्यायत्वात् । पतितादिषु पुल्लिङ्गत्वमविवक्षितम् । अतश्च पत्नीदुहितृमात्रादीनामप्युक्तदोषदुष्टानामनंशित्वं वेदितव्यम् ॥ १४० ॥

बा. १ । सङ्गतिमाह *पुत्रेति । पुत्रश्च पत्नी च पुत्रपत्न्यौ ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आदी येषां ते पुत्रपत्न्यादयस्ते च संसृष्टी च तेषां त्रयाणामित्यर्थः। आदिभ्यां पौत्रादेर्दुहित्रादेश्च ग्रहणमिति न न्यूनता। एतेन आद्ये उपलक्षणतया व्याख्यानमपास्तम्। *तस्य, त्रितयस्य। मूले अथशब्दः समुच्चये। *तृतीयेति। स्त्रीपुंसभिन्नेत्यर्थः। प्रकृतिः स्वभावः प्रकार इति यावत्। तथा च स्वाभाविकतत्त्ववतस्तेन ग्रहणम्। तेन कादाचित्ककृत्रिमतत्त्ववतो निरासः।

अत एव कात्यायनः,

न मूत्रं फेनिलं यस्य विष्ठा चाप्सु निमज्जति।
मेढ्रं चोन्मादशुक्राभ्यां हीनं क्लीबः स उच्यते॥ इति।

नारदोऽपि, (व्यव. १३। श्लो. १०। ११। १२। १३)

यस्याप्सु प्लवते वीर्यं ह्रादि मूत्रं च फेनिलम्।
पुमान्स्याल्लक्षणैरेतैर्विपरीतैस्तु षण्ढकः॥
चतुर्दशविधः शास्त्रे षण्ढो दृष्टो मनीषिभिः।
चिकित्स्यश्चाचिकित्स्यश्च तेषामुक्तो विधिः क्रमात्॥
निसर्गषण्ढो बध्रश्च पक्षषण्ढस्तथैव च।
अभिशापाद् गुरो रोगाद्देवक्रोधात्तथैव च॥
ईर्ष्याषण्ढश्च सेव्यश्च वातरेता मुखेभगः।
आक्षिप्तो मोघबीजी च शालीनोऽन्यापतिस्तथा॥ इति।

निसर्गषण्ढः स्वभावतो लिङ्गवृषणहीनः। बध्रश्छिन्नमुष्कः। पञ्चदश दिनानि स्त्रियमासेव्य सकृद्भोगक्षमः पक्षषण्ढः॥ ३॥ गुरुशापषण्ढादयस्त्रयः स्पष्टाः॥ ६॥ ईर्ष्यया पुंस्त्वमुत्पाद्यते यस्य स ईर्ष्याषण्ढः॥ ७॥ स्त्र्युपचारविशेषेण पुंस्त्वशक्तिर्यस्य स सेव्यषण्ढः॥ ८॥ वातोपहतरेतस्को वातरेताः॥ ९॥ यस्य मुखे एव पुंस्त्वशक्तिर्न योनौ स मुखेभगः॥ १०॥ रेतोनिरोधात् षण्ढीभूत आक्षिप्तषण्ढः॥ ११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गर्भाधानासमर्थबीजी मोघबीजी ॥ १२ ॥ अप्रगल्भतया क्षोभाद्वा नष्टपुंस्त्वः शालीनः ॥ १३ ॥ यस्य भार्याव्यतिरेकेणान्यासु पुरुषभावः सोऽन्यापतिरिति ॥ १४ ॥

२ । क्लीबस्य जनकत्वासंभवादाह * पतितोत्पन्न इति । अकृतप्रायश्चित्तोत्पन्न इत्यर्थः । * ग्रहेति । तादृशा ये ग्रहास्तदावेशस्वरूपैरित्यर्थः । सर्वथा चैतन्यशून्यत्वस्यासंभवादाह *विकलान्तरिति । तस्यापि तात्पर्यमाह *हिताहितेति । * नेत्रेन्द्रियेति । नेत्ररूपेन्द्रियेत्यर्थः । अनेनापि स्वाभाविकमेव तत्त्वं विवक्षितमिति सूचितम् । अत एवाग्रे निरिन्द्रियग्रहणं मानवे जात्यन्धग्रहणं च । तादृशरोगस्वरूपमाह * क्षयादीति । आद्यशब्देनेति पाठः ।

३। तेषां निरंशकत्वांशे मानमाह * यथाहेत्यादिना । आश्रमान्तराणि नैष्ठिकवानप्रस्थोत्तमाश्रमाः । * क्षेत्रजाः, तदादयः । अत एवैतदन्येषां सामान्येनोक्तिः । * जात्यन्धेति । जात्या स्वभावेनान्धबधिरावित्यर्थः । मानवे तथाशब्दः चार्थे । उन्मत्तेति द्वन्द्वोत्तरपदको द्वन्द्वः । वर्णानुच्चारको मूकः । ननु निरिन्द्रियग्रहणेनैव जात्यन्धपरिग्रहे सिद्धे तदुक्तिर्व्यर्था । न च ब्राह्मणवसिष्ठन्यायेन निर्वाहः । सति गमके एव तन्न्यायविषयत्वात् । अत आह * व्याध्यादिनेति ।

४। पदार्थानुक्त्वा मूलवाक्यार्थमाह *एते इति। ननु मानवादौ तावन्मात्रोक्त्या मूलस्यापि तत्रैव तात्पर्यमस्तु न भरणे अत आह * अभरणेत्विति । सर्वेषामिति शेषे षष्ठी । क्लीबादीनामित्यर्थः । अनंशावित्यग्रिमोऽयम् । तुरेवार्थे व्युत्क्रमे च । दातुमेवेत्यर्थः । * न्याय्यं, न्यायप्राप्तम् । शक्त्येत्यनेन न्यूनाधिकभावो निरस्तः । ग्रासाच्छादनमिति समाहारद्वन्द्वः । एवार्थं स्फुटयति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

* पतित इति । * हि, यतः । अत्यन्तमित्यस्य पूर्ववाक्यान्वयिनोऽर्थमाह *यावदिति । एतेन शक्त्येत्यनेनात्यन्तमिति विरुद्धमित्यपास्तम् ।

५ । यद्यपि देवलेन पतितवर्जं भरणमुक्तं,

मृते पितरि न क्लीबकुष्ठ्युन्मत्तजडान्धकाः ।

पतितः पतितापत्यं लिङ्गिदायांशभागिनः ॥

तेषां पतितवर्जेभ्यो भक्तं वस्त्रं प्रदीयते ।

तत्सुताः पितृदायांशं लभेरन् दोषवर्जिताः ॥ इति,

लिङ्गी प्रव्राजितादिः । अत्र निषेधे पतितपदेन तत्सुतोऽपि । पतितोत्पन्नत्वेन पतितत्वात् ।

अत एव बौधायनः, अतीतव्यवहारान् ग्रासाच्छादनैर्बिभृयुरन्धजडक्लीबव्यसनिव्याधितादींश्चाकर्मिणः पतिततज्जातवर्जमिति,

तथापि तत् प्रायश्चित्तयोग्यतदिच्छुपरम् । अत एव मानवे सर्वेषामिति अत्यन्तमिति चोक्तम् । अत एव तद्विरोधो नेति दिक् ।

६ । क्वचिद्विशेषमाह *एतेषामिति । पतितादीनां स्वाभाविकदोषदुष्टभिन्नानामित्यर्थः । अत एवाग्रे वक्ष्यति *पतितादिष्विति । *दोषप्राप्तौ, अप्रत्याख्येयेत्यादिः । *न पुनः, न तु । अग्रे दोषेत्याद्यनुषङ्गः । तत्रानंशत्वमित्यस्य तत्पर्यावर्त्तनमित्यर्थः । तदानीं तत्त्वाभावात् । तच्च विशेषणं न तूपलक्षणमिति भावः ।

७। तत्रापि विशेषमादिपूरणेन सूचितमाह * विभागोत्तरेति । कालाध्वनोरिति द्वितीया । विभागात्प्रागेव दोषप्राप्तौ विभागकाले दोषदुष्टस्यापीति शेषः । तथा च स्वाभाविकवत् कृत्रिमदोषेऽपि विभागात्पूर्वं जाते यत्राचिकित्स्यत्वं तत्रैवानंशत्वं नान्यत्रेति निर्गलितमिति तात्पर्यम् । औषधादीति आदिना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रायश्चित्तस्यापि ग्रहणम् । नन्विदं केवलमयुक्तम् । अनन्तरं तेन तन्निरासेऽपि तदानीं तस्य सत्त्वात् । तस्य विशेषणत्वाङ्गीकारात् । अत आह *विभक्तेष्विति । मूलोक्तिरेवेयम् । यथा विभागादूर्ध्वमुत्पन्ने पूर्वं तदीयविभागाभावेऽपि स्वरूपोत्पत्त्या धर्मोत्पत्तिः[1], एवं तदानीं तत्सत्त्वेन तदभावेऽपि विभागोत्तरं तद्दोषविनाशे तत्त्वस्याभावेन योग्यतया तदुत्पत्तिरिति तस्मिन् पुरुषे समानन्यायत्वमित्यर्थः ।

८ । क्लीबे ऽसम्भवात्पतितादौ विशेषान्तरमाह * पतितादिष्विति । उद्देश्यगतत्वेन तदविवक्षा बोध्या । ऋदन्तानामेव द्वंद्वाभावात् दुहितृशब्दे आनङ् न । * उक्तदोषेति । पतितत्वादिदोषैर्दुष्टानामित्यर्थः । तत्रापि प्रागुक्तरीतिः सर्वा बोध्या ॥१४०॥

मि० अव. क्लीबादीनामनंशित्वात्तत्पुत्राणामप्यनंशित्वे प्राप्ते इदमाह ।

या० औरसाः क्षेत्रजास्त्वेषां निर्दोषा भागहारिणः ।

मि० एषां क्लीबादीनामौरसाः क्षेत्रजा वा पुत्रा निर्दोषा अंशग्रहणविरोधिक्लैब्यादिदोषरहिता भागहारिणोंऽशग्राहिणो भवन्ति । तत्र क्लीबस्य क्षेत्रजः पुत्रः संभवत्यन्येषामौरसा अपि । औरसक्षेत्रजयोर्ग्रहणमितरपुत्रव्युदासार्थम् ।

मि० अव. क्लीबादिदुहितॄणां विशेषमाह ।

या० सुताश्चैषां प्रभर्तव्या यावद्वै भर्तृसात्कृताः ॥ १४१ ॥

मि० एषां क्लीबादीनां सुता दुहितरो यावद्विवा-

१ पुत्रस्वरूपोत्पत्त्या धर्मस्य विभागस्योत्पत्तिरित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हसंस्कृता भवन्ति तावद्भरणीयाः । चशब्दात्संस्कार्याश्च ॥ १४१ ॥

बा. १ । सङ्गतिमव्यवहितेनाह *क्लीबादीनामिति । *इदं, वक्ष्यमाणं प्रतिप्रसवरूपम् । इदमः प्रक्रान्तार्थकत्वादाह * क्लीबादीनामिति। मूले तुः वार्थे इत्याह * वेति। अन्यादृशदोषशून्यत्वस्य प्रकृते ऽनुपयोगादाह * अंशेति । उभयग्रहणफलमाह * तत्रेति । तयोर्मध्ये इत्यर्थः । अपिना तस्य समुच्चयः । मूले बहुवचनं क्लीबादिसर्वाभिप्रायम् । अत एव बहुवचनादन्येषां ग्रहणशङ्का नेत्याह * औरसेति । अन्यथौरसादय इत्येव ब्रूयात् । * व्युदासार्थमिति । तथा च तेषामंशाभाव एव । औरससमत्वात्पुत्रिकाऽपि प्राप्नोति । साऽप्यौरसपदेनैवोपात्ता ।

उ. २ । मूले वैशब्दः निश्चये । भर्तृसात्कृता इत्यस्यार्थमाह *विवाहसंस्कृता भवन्तीति। तथा च तत्र भूतत्वमविवक्षितमिति भावः । * चशब्दादिति । व्युत्क्रमणीयादित्यर्थः ॥ १४१ ॥

मि० अव. क्लीबादिपत्नीनां विशेषमाह ।

या० अपुत्रा योषितश्चैषां भर्तव्याः साधुवृत्तयः ।
निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च॥ १४२॥

मि० एषां क्लीबादीनामपुत्राः पत्न्यः साधुवृत्तयः सदाचाराश्चेद्भर्तव्याः भरणीयाः । व्यभिचारिण्यस्तु निर्वास्याः । प्रतिकूलास्तथैव च निर्वास्या भवन्ति, भरणीयाश्चाव्यभिचारिण्यश्चेत् । न पुनः प्रातिकूल्यमात्रेण भरणमपि न कर्तव्यम् ॥ १४२ ॥

बा० १ । साधुवृत्तय इति हेतुगर्भं विशेषणमित्याह * चेदिति । तत्फलमेवाह * व्यभिचारिण्य इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२। तुर्यपादं सप्रतीकं पूर्वतो विशेषसत्त्वात्पृथक् व्याचष्टे *प्रतीति। यद्यपि अव्यवहितत्वान्निर्वास्या इत्येव प्राप्तं तथापि चशब्दबलात् भर्तव्या इत्यस्यापि सम्बन्ध इत्याह * भरणीयाश्चेति। नन्वेवं व्यभिचारिणीषु प्रतिकूलासु अनेनोभयं प्राप्तं, तृतीयपादेन तु निर्वासनमेव प्राप्तम्। तत्र हि निर्वास्या इत्यस्य सर्वं वाक्यमिति न्यायेन निर्वास्या एवेत्यर्थः, इति मिथो विरोधो ऽतं आह * अव्यभिचारिण्यश्चेदिति। तथा च भिन्नविषयत्वान्न विरोधः। अत एव विभिन्ननिमित्तोक्तिसङ्गतिः। *न पुनः, न तु। अकरणे दोषश्रवणादिति भावः॥ १४२॥

मि० अव० विभजेरन्सुताः पित्रोरित्यत्र स्त्रीपुन्धनविभागं संक्षेपेणाभिधाय पुरुषधनविभागो विस्तरेणाभिहितः। इदानीं स्त्रीधनविभागं विस्तरेणाभिधास्यन् तत्स्वरूपं तावदाह।

या० पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम्।
आधिवेदनिकाद्यं च स्त्रीधनं परिकीर्तितम्॥ १४३॥

मि० पित्रा मात्रा पत्या भ्रात्रा च यद्दत्तं, यच्च विवाहकालेऽग्नावधिकृत्य मातुलादिभिर्दत्तं, आधिवेदनिकम् अधिवेदननिमित्तम् अधिविन्नस्त्रियै दद्यादिति वक्ष्यमाणम्, आद्यशब्देन रिक्थक्रयसंविभागपरिग्रहाधिगमप्राप्तम्। एतत् स्त्रीधनं मन्वादिभिरुक्तम्। स्त्रीधनशब्दश्च यौगिको न पारिभाषिकः। योगसम्भवे परिभाषाया अयुक्तत्वात्।

यत्पुनर्मनुनोक्तम्, (अ. ९ श्लो. १९४)
अध्यग्न्यध्यावहनिकं दत्तं च प्रीतिकर्मणि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम् ॥

इति स्त्रीधनस्य षड्विधत्वं, तत् न्यूनसंख्याव्यवच्छेदार्थं नाधिकसंख्याव्यवच्छेदाय । अध्यग्न्यादिस्वरूपं च—

कात्यायनेनाभिहितम्,

विवाहकाले यत्स्त्रीभ्यो दीयते ह्यग्निसन्निधौ ।
तदध्यग्निकृतं सद्भिः स्त्रीधनं परिकीर्तितम् ॥
यत्पुनर्लभते नारी नीयमाना पितुर्गृहात् ।
अध्यावहनिकं नाम स्त्रीधनं तदुदाहृतम् ॥
प्रीत्या दत्तं तु यत्किञ्चिच्छ्वश्र्वा वा श्वशुरेण वा ।
पादवन्दनिकं चैव प्रीतिदत्तं तदुच्यते ॥
ऊढया कन्यया वाऽपि पत्युः पितृगृहेऽपि वा ।
भ्रातुः सकाशात्पित्रोर्वा लब्धं सौदायिकं स्मृतम् ॥

इति ॥ १४३ ॥

१। बा. अथ व्यवहितसंगतिमाह *विभजेरन्निति। तत्र तदपवादत्वेन मातुर्दुहितर इत्युक्तावपि प्रकारान्तरानुक्त्या न विस्तर इति भावः । * अभिहित इति । औरसो धर्मपत्नीज इत्यादिना अपुत्रा योषित इत्यन्तेनेति भावः । * अभिधास्यन्, अतीतायामित्यादिना । *तत्स्वरूपं, स्त्रीधनस्वरूपम् । *पित्रीति । अत्र द्वंद्वोत्तरपदकद्वंद्वगर्भो द्वंद्वः ।

२ । द्वितीयपादस्याग्निसमीपप्राप्तमिति शाब्दोऽर्थः । तत्फलितं वक्ष्यमाणकातीयानुरोधेनाह * यच्च विवाहेति । नित्यसमासत्वेनास्वपदविग्रहत्वादाह * अग्नावधिकृत्येति । अग्निसन्निधावित्यर्थः । एतेन विवाहकाले कन्यादानकालेऽग्निसन्निधौ होमकाले चेति कातीयव्याख्यानं कस्य चिदपास्तम् । उपागम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नवीजमाह *मातुलेति । आदिना पितृव्यमातृष्वस्रादिग्रहणम् ।

३ । * अधीति । अधिवेदनं निमित्तं यस्येत्यर्थः । आधिवेदनं च सत्यां धर्मपत्न्यां रागत एव विवाहान्तरकरणम् । तस्य निमित्तमित्याधिकारीयष्ठक् । अत्र मानमाह * अधीति । मूलकृतेति भावः । अत्र आधिवेदानिकं चैवेति प्राच्यधृतपाठो न युक्तः । एवशब्दस्य वैयर्थ्यात् । न्यूनतापत्तेः । वचनान्तरविरोधापत्तेश्च । तद् ध्वनयन्नाह *आद्यशब्देनेति ।

४ । तत्र रिक्थस्य स्त्रीधनत्वे मानं तु पत्नी दुहितरश्चैवेति प्रागुक्तं मूलं स्पष्टमेव ।

नारदोऽपि, (व्यव. १३ । ८)

अध्यग्न्यध्यावहनिकं भर्तृदायस्तथैव च ।

भ्रातृदत्तं पितृभ्यां च षड्विधं स्त्रीधनं स्मृतम् ॥ इति ।

कात्यायनोऽपि,

भर्तृदायं मृते पत्यौ विन्यसेत् स्त्री यथेष्टतः ।

विद्यमानेषु संरक्षेत् क्षपयेत्तत्कुले ऽन्यथा ॥ इति ।

मृतेइति । तदा तदनुमत्यनपेक्षा सूचिता । स्वातन्त्र्यापवादमाह । विद्यमानेष्विति । दुहित्रादिदायादेषु तत्संरक्षेन्न स्वेच्छया व्ययीकुर्यात् । अन्यथा दुहित्राद्यभावे । अत्र मृते स्वातन्त्र्योक्त्या जीवति तन्नेति गम्यते । यथेष्टविनियोगाभावे तत्कुले भर्तृकुले क्षपयेत् विनियोजयेदित्यर्थः ।

व्यासोऽपि,

द्विसहस्रपणो दायः स्त्रियै देयो धनस्य तु ।

यच्च भर्त्रा धनं दत्तं सा यथावदवाप्नुयात् ॥ इति ।

इयं संख्या प्रत्यब्दे देये । सकृदेवानेकाब्दपर्याप्तधनदाने तु नेयं संख्या । नापि स्थावरनिषेधः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दद्याद् धनं वा पर्याप्तं क्षेत्रांशं वा यदीच्छति । इति बृहस्पतेः ।
एतेन—

पितृमातृपतिभ्रातृजातिभिः स्त्रीधनं स्त्रियै ।
यथाशक्त्या द्विसाहस्राद्दातव्यं स्थावराद्दते ॥

इति कात्यायमपि व्याख्यातम् ।

एतेन "भर्त्रा प्रीतेनेतिमन्वाद्येकवाक्यतया भर्तृदायम् इत्यस्य भर्तृदत्तम्" इति प्राच्यानाम्, "इदं भर्तृदत्ताद्विविधजङ्गम-सौदायिकविषयं, भर्तृदायोपक्रमात् । एतदाग्रिमम् अपुत्रा शयन-मिति तु स्थावरविषयम्" इति भ्रान्तादेश्च व्याख्यानमपास्तम् । भर्तृदत्तमित्यपि पाठे दोषलेशाभावेन तथा पाठस्य निर्बीजत्वा-पत्तेः । तावताऽपि याज्ञवल्क्यादिविरोधस्य दुष्परिहरत्वात् । अत्रापि वचनान्तरैकवाक्यतायाः सत्त्वस्योक्तप्रायत्वाच्च । तदा-शयस्योक्तत्वाच्च ।

५ । संविभागलब्धस्यापि तत्त्वे मानं तु—

यदि कुर्यात्समानंशान्पत्न्यः कार्याः समांशकाः ।
न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वा ॥ इति—
पितुरूर्ध्वं विभजतां माताऽप्यंशं समं हरेत् । इति —
दत्ते त्वर्धांशहारिणीति च मूलं प्रागुक्तमेव ।
क्रयादिलब्धस्य तत्त्वं तु सामान्यतो लोकप्रसिद्धमेव ।
देवलोऽपि,

वृत्तिराभरणं शुल्कं लाभश्च स्त्रीधनं भवेत् ।
भोक्त्री तत्स्वयमेवेदं पतिर्नार्हत्यनापदि ॥ इति ।

७ । सर्वत्र मानं तु स्वत्वकारकहेतूनामष्टानां परिगणनपरो-
गौतम एव,

स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु, ब्राह्मणस्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धिकं लब्धं, क्षत्रियस्य विजितं, निर्विष्टं वैश्यशूद्रयोरिति।

इदं च प्राग्व्याख्यातम्। स्वत्वस्य स्वत्वहेतूनां च लोकप्रसिद्धत्वेन शास्त्रैकसमाधिगम्यत्वाभावेऽपि गौतमवचनं नियमार्थमित्यपि प्रागुक्तमेव।

८। एवं पदार्थानुक्त्वा वाक्यार्थमाह *एतदिति। एकादशधोक्तं सर्वमित्यर्थः। अप्रामाण्यशङ्कानिरासाय साकाङ्क्षमेवाह *मन्वादिभिरिति। यत्तु षड्विधं स्त्रीधनमिति मनोस्तत्परिगणितेषु षट्स्वश्वकर्णादिवत्तद्रूढ एव स्त्रीधनशब्द इति त्वदाद्यशब्देन कथं तेषां परिग्रह इति कैश्चिदुक्तम्। तन्न। वचनान्तरविरोधाच्छिष्टाचारविरोधाच्च। तस्माद्यौगिक एवायं दृष्टान्तवैषम्यादित्याह- * स्त्रीधनेति। चस्त्वर्थे। एवमग्रेऽपि। * योगेति। अक्लृप्तेति न्यायात्। न च रूढिर्योगमिति न्यायेन वैपरीत्यं शङ्क्यम्। लब्धात्मिकाया एव रूढेस्ततः प्राबल्यस्य न्यायविषयत्वात्। एवं चालब्धात्मकरूढितो योगस्यैव प्राबल्यमिति भावः।

९। किञ्चास्य तथात्वे पुरुषधनशब्दे स्त्रीपुरुषधनशब्दे मातृधनशब्दे पितृधनशब्देऽपि तथा वक्तव्यत्वापत्तेः। तद्वदत्रापि निर्वाहाच्च। सौदायिकं धनं प्राप्येत्यनेन योगस्यैव बोधनाच्च। न चैवं पुरुषधनादिवदेतस्याप्यकथनमेवोचितमिति वाच्यम्। तस्या अस्वान्तन्त्र्येणार्जनाद्यनधिकाराद्धनाभावेन मातृधनं दुहितृगामीत्यस्यासङ्गतिनिरासाय मनूक्तस्त्रीधनषट्त्वस्य न्यूनतानिरासे तात्पर्यमिति सूचयितुं मूलकृदादिभिर्बहुभिर्मुनिभिर्बहूनि तान्युक्तानीति दिक्।

१०। नन्वेवं मनुविरोधोऽत आह *यत्पुनरिति। यच्चित्यर्थः। एवमग्रेऽपि। भ्रातृ मातृ इत्यत्रोभयत्र शाकपार्थिवादिसमासः। अत एवानङ् न।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

११। मूलवचनान्तरानुरोधेनाह *तन्न्यूनेति। युक्तं चैतत्। अन्यथा हि षड्विधमध्येऽपि मूलतो मानवे नारदीये च प्रागुक्ते विशेषस्य सत्त्वेन तत्रापि विरोधदार्ढ्यमेव।

किं च तेनापि तदग्रे एवान्वाधेयं च यद्दत्तमित्यादिना तदधिकमुक्तमिति तस्यापि मिथोऽन्यथा विरोध एवेति।

१२। *अभिहितमिति। मानवोक्तक्रमेणेति भावः। *स्त्रीभ्यः, कन्याभ्यः। प्रकृतत्वात्। हिशब्दः निश्चये। तत् दानेन तदीयत्वात् स्त्रीधनम् अध्यग्निकृतमित्येवं सद्भिः परिकीर्तितमित्यन्वयः। एवमग्रेऽपि। पुनस्त्वर्थे उक्तवैलक्षण्ये। अध्यावहनं ततो नयनं तदस्ति हेतुत्वेन यस्येति अत इनिठनौ इति ठन्। *नामशब्दः निश्चये। प्रीतिदत्तं द्विविधं, प्रथमदर्शने प्रीत्या पादवन्दननिमित्तकं, तदुत्तरं सेवया प्रीत्या दत्तं च। तत्रादौ द्वितीयमाह * प्रीत्येति। आद्यमाह * पादेति। तत्प्रीतिदत्तमेवोच्यते इत्यन्वयः। अनेन मानवे प्रीतिकर्मणीति समाहारद्वन्द्वात्सप्तमी। कर्म च पादवन्दनमेव। संख्याविरोधस्तूक्तरीत्या नेति बोध्यमिति सूचितम्। भ्रातृप्राप्ताद्याह *ऊढयेति। यद्यपि कन्याशब्द ऊढायामप्यक्षतयोन्यां तथापि तत्साहचर्यादनूढापर एवात्र। ऊढया पत्युः सकाशाल्लब्धं भ्रातुः सकाशात्पित्रोर्वा सकाशाल्लब्धं वा। अथवा कन्ययाऽपि पितृगृहे स्थितयाऽपि वाऽन्यत्रास्थितया वा भ्रातुः पित्रोर्मातापित्रोः सकाशाद्यल्लब्धं तत्सर्वं सौदायिकं स्मृतमित्यर्थः। सुदाय एव सौदायिकं स्वार्थिकष्ठन्। स्वदायतो लब्धमिति वा। स्वदायसम्बन्धिभ्यो लब्धमिति तु प्राञ्चः। पूर्वं रिक्थपदार्थस्तु एतदन्यो ग्राह्यः॥ १४३॥

मि० अव. किञ्च।

या० बन्धुदत्तं तथा शुल्कमन्वाधेयकमेव च।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बन्धुभिः कन्याया मातृबन्धुभिः पितृबन्धुभिश्च यद्दत्तं, शुल्कं यद् गृहीत्वा कन्या दीयते, अन्वाधेयकं परिणयनादनु पश्चादाहितं दत्तम् ।

उक्तं च कात्यायनेन,

विवाहात्परतो यच्च लब्धं भर्तृकुलात्स्त्रिया ।
अन्वाधेयं तु तद् द्रव्यं लब्धं पितृकुलात्तथा ॥ इति।

स्त्रीधनं परिकीर्तितमिति गतेन संबन्धः ।

मि० अव. एवं स्त्रीधनमुक्तं, तद्विभागमाह ।

या० अतीतायामप्रजसि बान्धवास्तदवाप्नुयुः ॥१४४॥

मि० तत् पूर्वोक्तं स्त्रीधनमप्रजसि अनपत्यायां दुहितृदौहित्रीदौहित्रपुत्रपौत्ररहितायां स्त्रियामतीतायां मृतायां बान्धवा भर्त्रादयो वक्ष्यमाणा गृह्णन्ति ॥ १४४ ॥

बा.१। *किं चेति। अन्यदपि स्त्रीधनं मूलकृदाहेत्यर्थः।अत एव मूले *तथेति। उक्तवदित्यर्थः। प्रकृतत्वादनूढावस्थायां दत्तस्यैव तत्त्वाच्चाह * कन्याया इति । भ्रातृबान्धवयोर्बन्धुरिति कोशेऽपि भ्रातुः प्रागुपादानादाह *मात्रिति । स्वसमानत्वादात्मबन्धूनामग्रहणम् । *यदिति । तथाचार्षासुरादिविवाहविषयमिदम् । अत एव गौतमीयं भगिनीशुल्कं सोदर्याणामूर्ध्वं मातुः पूर्वं वैके इति वक्ष्यमाणं भगिनीशुल्कम् आसुरादिविवाहोढाया भगिन्या धनमिति कल्पतरुणा व्याख्यातम् । वृत्त्यपेक्षो विकल्पः ।

२। कात्यायनेन त्वन्यथैतदुक्तं,

गृहोपस्करवाह्यानां दोह्याभरणकर्मणाम् ।
मूल्यं लब्धं तु यत्किंचिच्छुल्कं तत्परिकीर्तितम् ॥ इति ।

गृहादिकर्तॄणां शिल्पिनां तत्तत्कर्मकरणाय भर्त्रादिभिर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णार्थं तस्यै यद्दानं तच्छुल्कम् । तदेव मूल्यं प्रवृत्त्यर्थत्वात् इत्यर्थः। गृहं प्रसिद्धम्। उपस्कर उलूखलादिः। वाह्यो वृषादिः। दोह्यो गवादिः। आभरणं प्रसिद्धम् । कार्मिणामिति पाठे ते दासाद्याः, तदा एतेषां मूल्यं यल्लब्धं तच्छुल्कमित्यर्थः।

३। व्यासेत त्वन्यथैतदुक्तम्,

यदानीतं भर्तृगृहे शुल्कं तत्परिकीर्तितम् इति।

भर्तृगृहगमनार्थमुत्कोचादि यद्दत्तं तादित्यर्थः । इदं चोभयं ब्राह्मादिष्वप्यविशिष्टम्। अन्वाधेयके स्वार्थे कन् इत्याशयेन योगार्थमाह * परिणयनादिति। आधेये भूतत्वं विवक्षितमित्याह * आहितमिति। तदर्थमाह * दत्तमिति। मूले एवशब्दः एतदन्यव्यवच्छेदे ।

४। तृतीये मानमाह * उक्तं चेति। स्पष्टोऽर्थः।*भर्तृकुलात्, श्वशुरादेः। * पितृकुलात्, मातापितृकुलात्। अन्यदपि तत्तेनैवोक्तम्,

ऊर्ध्वं लब्धं तु यत्किंचित्संस्कारात्प्रीतितः स्त्रिया।
भर्तुः पित्रोः सकाशाद्वा अन्वाधेयं तु तद्भवेत्॥ इति।

ततः प्रीतिप्रयुक्तोऽत्र विशेषः।

५। मूलस्य साकाङ्क्षत्वात्तथेत्यनेन सूचितमेवाह * स्त्रीधनमिति।

अत एव विष्णुः,

पितृमातृसुतभ्रातृदत्तमध्यग्न्युपागतम्।
आधिवेदनिकं बन्धुदत्तं शुल्कान्वाधेयकम्॥ इति।

प्राप्तं शिल्पैस्तु यद्वित्तं प्रीत्या चैव तदन्यतः।
भर्तुः स्वाम्यं तदा तत्र शेषं तु स्त्रीधनं स्मृतम्॥

इति कातीयं तु महानिबन्धेषु मिताक्षरादिष्वदर्शनान्निर्मूलम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समूलत्वेऽपि वा तदेत्युक्तिसाफल्याय च भर्तरि जीवति उभयविषयमात्रे तस्य स्वाम्यस्य विद्यमानत्वान्न तस्याः स्वाम्यम्।

अन्यत्सर्वं तस्या एव। उभयमपि भर्तुरभावे तस्या एवेत्यर्थे पूर्वैकवाक्यतैव।

यद्वा। भर्तरि जीवत्यपि वक्ष्यमाणदुर्भिक्षाद्याशयकम्। तदा दुर्भिक्षादौ शेषं दुर्भिक्षाद्यभाववदित्यर्थात्। अत एव सौदायिके सदा स्त्रीणामित्यत्र सदेत्युक्तम्।

तत्रापि सदेति पाठे तु भर्तुरित्यस्य मध्यमणिन्यायेनान्वयात् भर्तुः शिल्पैः तन्तुवायादिस्त्रीभिर्यद्वस्त्रवयनादिना प्राप्तं भर्तुः प्रीत्या च यदन्यैर्दत्तं तत्र भर्तुः स्वामित्वमित्यर्थः। युक्तं चैतत्। अन्यथा स्वार्जनस्य स्वत्वानापादकत्वापत्तेरिति।

६। एवमन्योऽपि स्त्रीधनत्वापवादः।

तथा च कातीयम्,

तत्र सोपधि यद्दत्तं यच्च योगवशेन वा।
पित्रा भ्रात्राऽथवा पत्या न तत्स्त्रीधनमिष्यते॥ इति।

उत्सवादौ शोभा उपधिः। संभोगाद्यर्थं छलं योगः।

स्त्रीणां सर्वथा ऽस्वातन्त्र्यस्य पूर्वमुक्तत्वात्स्वधनव्ययेऽपि भर्त्राद्यनुमतिरपेक्षिता सति संभवे ऽनापदि। अत एव तदस्तु पारतन्त्र्यं धनस्वीकारे को विरोध इति पूर्वं मिताक्षरा। सौदायिके तु न तथा।

तथा च कात्यायनः,

ऊढया कन्यया वाऽपि पत्युः पितृगृहेऽपि वा।
भ्रातुः सकाशात्पित्रोर्वा लब्धं सौदायिकं भवेत्॥
सौदायिकं धनं प्राप्य स्त्रीणां स्वातन्त्र्यमिष्यते।
यस्मात्तदानृशंस्यार्थं तैर्दत्तं तत्प्रजीवनम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सौदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकीर्तितम् ।
विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि ॥ इति ।

एतदग्रे भर्त्तुर्दायमिति, ततोऽग्रे अपुत्रा शयनमिति च पूर्वोक्तपाठः । सदेत्यस्य भर्त्तरि जीवत्यजीवति वेत्यर्थः । आनृशंस्यमनुकम्पा तन्निमित्तम् । प्रजीवनं जीवनप्रकर्षाधायकम् ।

एतेन सौदायिकमिति स्त्रीधनमात्रोपलक्षणं, यस्मात्तदिति हेतोः सर्वत्र सत्त्वादिति भ्रान्तोक्तमपास्तम् । आपद्यनापदि वेत्यर्थः । अत एवाग्रे ऽन्यथोक्तिर्दायांशे ।

७ । स्थावरे तु भर्तृदत्तमात्रे न स्त्रिया दानाद्यधिकारः । भर्त्रा प्रीतेन यद्दत्तमिति प्रागुक्तनारदात् । एतेन मृते भर्त्तरीति प्रागुक्तकातीयमपि व्याख्यातम् । तद्दत्तस्थावरान्यस्थावरं श्वशुरादिदत्तं तु देयमेव । उक्तकातीयात् ।

स्थावरादिधनं स्त्रीभ्यो यद्दत्तं श्वशुरेण तु ।
न तच्छक्यमपाहर्तुं पुत्रैरपि हि कर्हिचित् ॥

इति बृहस्पतेश्च । अन्यथा मिथो विरोधः । न च स्त्रिया दाने नाधिकार इति वाच्यम् । श्रुतिस्मृतिपुराणादौ वहुशो व्रतेष्टापूर्त्तादौ तत्प्रतिपादनात् ।

पितृभ्यां यस्य यद्दत्तं तत्तस्यैव धनं भवेत् ।

इति पूर्वं मूलोक्तेः स्वत्वाभावे परस्मै दाने ऽनधिकारेण तदसङ्गतेश्च । कथं चित् कृतेऽपि चौर्यदण्डापत्तेश्च । अनुमत्या कृते फलाभावापत्तेश्च । भर्तृदानस्यापि पुराणे प्रसिद्धत्वाच्च । दुर्भिक्षाद्यन्यत्र तु न कस्यापि तद्धनग्रहणे ऽधिकारः ।

तथा च कात्यायनः,
न भर्त्ता नैव च सुतो न पिता भ्रातरो न च ।
आदाने वा विसर्गे वा स्त्रीधने प्रभविष्णवः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदि ह्येकतरो ह्येषां स्त्रीधनं भक्षयेत् बलात् ।
स वृद्धिं प्रतिदाप्यः स्याद्दण्डं चैव समाप्नुयात् ॥
तदेव यद्यनुज्ञाप्य भक्षयेत्प्रीतिपूर्वकम् ।
मूलमेव तदा दाप्यो यदा स धनवान्भवेत् ॥
अथ चेत् स द्विभार्यः स्यान्न च तां भजते पुनः ।
प्रीत्या विसृष्टमपि चेत्प्रतिदाप्यः स तद् बलात् ॥
ग्रासाच्छादनवासानामुच्छेदो यत्र योषितः ।
तत्र स्वमाददीत स्त्री विभागं रिक्थिनां तथा ॥ इति ।

८। एतेन "अनियतसंख्यस्त्रीधनमङ्गीकृत्य षट्त्वसंख्याया अविवक्षामुक्त्वा वचनानाम् स्त्रीधनकीर्तनमात्रपरत्वमङ्गीकृत्य यत्प्रजल्पितं प्राच्यैः तदेव च स्त्रिया धनं यत् भर्तृतः स्वातन्त्र्येण ददाति विक्रीणीते भुङ्क्ते च तदिदं किञ्चित्संक्षिप्य कात्यायनेनोक्तं प्राप्तं शिल्पैस्त्विति, तेन न तत् स्त्रीधनं सौदायिकं तु तथा" इति तदपास्तम् । अनेकवचनविरोधापत्तेः । कातीयाशयस्योक्तत्वाच्चेति दिक् ।

उ० ९। तदित्यस्य व्याख्या * पूर्वोक्तमिति ।सर्वमित्यर्थः। अप्रजसीत्यसिजन्तम् । तदर्थः * अनपत्यायामिति । कन्यादौ मात्रवयवान्वयबाहुल्यात्तस्यापि स्पष्टमर्थं प्रागुक्तस्य मातुर्दुहितर इत्यस्यानुरोधेनाह * दुहित्रिति । एतत्पञ्चकरहितायामित्यर्थः। अन्यत्र[1] बान्धवशब्दस्य बन्धुत्रयपरत्वेऽपि प्रकृते वक्ष्यमाणानुरोधेनान्यार्थपरत्वमित्याह *भर्त्रादयो वक्ष्यमाणा इति । अनुपदमेवेति शेषः । विधिर्न विवक्षित इत्याह *गृह्णन्तीति ॥ १४४ ॥

१ कैश्चित् बन्धुदत्तमित्यादिकम् अतीतायामित्यादौ योजयित्वा परिणयनानन्तरं बन्धुदत्तादिकं बान्धवा भ्रातरो गृह्णन्तीति व्याख्यातं, तद्दूषयति * अन्यत्रेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि० अव. सामान्येन बान्धवा धनग्रहणाधिकारिणो दर्शिताः। इदानीं विवाहभेदेनाधिकारिभेदमाह।

या० अप्रजःस्त्रीधनं भर्तुर्ब्राह्मादिषु चतुर्ष्वपि।
दुहितॄणां प्रसूता चेच्छेषेषु पितृगामि तत्॥ १४५॥

मि० अप्रजसः स्त्रियाः पूर्वोक्तायाः ब्राह्मदैवार्षप्राजापत्येषु चतुर्षु विवाहेषु भार्यात्वं प्राप्ताया अतीतायाः पूर्वोक्तं धनं प्रथमं भर्तुर्भवति। तदभावे तत्प्रत्यासन्नानां सपिण्डानां भवति। शेषेष्वासुरगान्धर्वराक्षसपैशाचेषु विवाहेषु तत् अप्रजःस्त्रीधनं पितृगामि। माता च पिता च पितरौ तौ गच्छतीति पितृगामि। एकशेषनिर्दिष्टाया अपि मातुः प्रथमं धनग्रहणं पूर्वमेवोक्तम्। तदभावे तत्प्रत्यासन्नानां धनग्रहणम्।

सर्वेष्वेव विवाहेषु प्रसूताऽपत्यवती चेद् दुहितॄणां तद्धनं भवति। अत्र दुहितृशब्देन दुहितृदुहितर उच्यन्ते। साक्षाद् दुहितॄणां मातुर्दुहितरः शेषमित्यत्रोक्तत्वात्।

अतश्च मातृधनं मातरि वृत्तायां प्रथमं दुहितरो गृह्णन्ति। तत्र चोढानूढासमवायेऽनूढा गृह्णाति। तदभावे परिणीता। तत्रापि प्रतिष्ठिताऽप्रतिष्ठितासमवायेऽप्रतिष्ठिता गृह्णाति। तदभावे प्रतिष्ठिता।

यथाह गौतमः, स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानां चेति। तत्र चशब्दात् प्रतिष्ठितानां च। अप्रतिष्ठिता अनपत्या निर्धना वा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतच्च शुल्कव्यतिरेकेण। शुल्कं तु सोदर्याणामेव। भगिनीशुल्कं सोदर्याणामूर्ध्वं मातुरिति गौतमवचनात्।

सर्वासां दुहितॄणामभावे दुहितृदुहितरो गृह्णन्ति। दुहितॄणां प्रसूता चेदित्यस्माद्वचनात्। तासां भिन्नमातृकाणां विषमाणां समवाये मातृद्वारेण भागकल्पना। प्रतिमातृ वा स्ववर्गे भागविशेष इति गौतमस्मरणात्।

दुहितृदौहित्रीणां समवाये दौहित्रीणां किञ्चिदेव दातव्यम्।

यथाह मनुः, (अ. ९ श्लोक १९३)

यास्तासां स्युर्दुहितरस्तासामपि यथार्हतः।
मातामह्या धनात्किञ्चित्प्रदेयं प्रीतिपूर्वकम्॥इति।

दौहित्रीणामप्यभावे दौहित्रा धनहारिणः।

यथाह नारदः, (व्यव. १३। २)

मातुर्दुहितरोऽभावे दुहितॄणां तदन्वयः। इति।

तच्छब्देन सन्निहितदुहितृपरामर्शः।

दौहित्राणामभावे पुत्रा गृह्णन्ति। ताभ्य ऋतेऽन्वय इत्युक्तत्वात्। मनुरपि दुहितॄणां पुत्राणां च

मातृधनसम्बन्धं—

दर्शयति, (अ० ९ श्लो० १९२)

जनन्यां संस्थितायां तु समं सर्वे सहोदराः।
भजेरन्मातृकं रिक्थं भगिन्यश्च सनाभयः॥इति।

मातृकं रिक्थं सर्वे सहोदराः समं भजेरन्, सनाभयः भगिन्यश्च समं भजेरन्निति सम्बन्धः। न पुनः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सहोदराः भगिन्यश्च सम्भूय समं भजेरन्निति। इतरेतरयोगस्य द्वन्द्वैकशेषाभावादप्रतीतेः। विभागकर्तृत्वान्वयेनापि चशब्दोपपत्तेः। यथा देवदत्तः कृषिं कुर्याद्यज्ञदत्तश्चेति। समग्रहणमुद्धारविभागनिवृत्त्यर्थम्। सहोदरग्रहणं भिन्नोदरानिवृत्त्यर्थम्।

अनपत्यहीनजातिस्त्रीधनं तु भिन्नोदराऽप्युत्तमजातीयसपत्नीदुहिता गृह्णाति। तदभावे तदपत्यम्।

तथाच मनुः, (अ. ९ श्लो. १९८)

स्त्रियास्तु यद्भवेद्वित्तं पित्रा दत्तं कथञ्चन।
ब्राह्मणी तद्धरेत्कन्या तदपत्यस्य वा भवेत्॥इति।

ब्राह्मणीग्रहणमुत्तमजात्युपलक्षणम्। अतश्चानपत्यवैश्याधनं क्षत्रियाकन्या गृह्णाति। पुत्राणामभावे पौत्राः पितामहीधनहारिणः। रिक्थभाज ऋणं प्रतिकुर्युरिति गौतमस्मरणात्। पुत्रपौत्रैर्ऋणं देयमिति पौत्राणामपि पितामह्यृणापाकरणेऽधिकारात्। पौत्राणामप्यभावे पूर्वोक्तभर्त्रादयो बान्धवा धनहारिणः॥ १४५॥

बा. १। सङ्गतिमाह*सामान्येनेति। भर्त्रादित्वसामान्येनेत्यर्थः। *अधिकारिभेदमिति। तथा च पूर्वव्यवस्थापकमेवाग्रिममिति भावः। एतेनातीतायामित्यर्धं बन्धुदत्तमित्यनेन पूर्वत्रानान्वितेन सम्बद्धमित्यपास्तम्। मध्ये पाठासाङ्गत्याद्यापत्तेः।*पूर्वोक्तायाः, दुहित्रादिपञ्चकराहितायाः।तस्याः ब्राह्मादिना धनसम्बन्ध इत्याह * ब्राह्मेति। सप्तम्युपपत्तये आह * भार्यात्वमिति। प्रकृतत्वादाह * अतीतायाा इति। तत्रार्षः समासो लुप्तविभक्त्यन्तं तत् पृथक् वा पदमिति भावः। तत एव धनमपि न यत्किञ्चिदित्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह * पूर्वोक्तम् इति । सर्वमित्यर्थः । भर्तुरेकस्योपादानादाह *प्रथममिति । मात्रा स्वस्रा वा तद्ग्राह्यमिति। पैठीनसिरप्येवम् । एतेन "स्त्रीधनं भर्ता इति पाठाभिप्रायेणेयं मे पुत्र इत्येतत्पुत्रशेषपरामिदं, मानवं तु अस्यां यो जायते पुत्र इत्येतत् पुत्रिकापरम्" इति भ्रान्तोक्तमपास्तम् । कल्पतर्वादिविरोधात् ।

२। व्युत्क्रमेणापिना समुच्चेयमाह *तदभावे इति । तदधिकारितावच्छेदकं प्रागुक्तमन्वादेराह * तत्प्रत्यासन्नानामिति । पाठक्रमादार्थक्रमो बलीयानिति न्यायेनाकाङ्क्षत्वात्तस्योभयशेषत्वाच्चाह *शेषेष्विति । उक्तान्यत्वादाह * आसुरेति ।

अत एव मनुरपि, (अ. ९ । १३५)

अपुत्रायां मृतायां तु पुत्रिकायां कथं चन ।
धनं तत्पुत्रिकाभर्ता हरेतैवाविचारयन् ॥ इति ।

यद्यपि,

ब्राह्मदैवार्षगान्धर्वप्राजापत्येषु यद्वसु ।
अप्रजायामतीतायां भर्तुरेव तदिष्यते ॥

इति मानवैकवाक्यता मूलस्थयथाश्रुतापिना गान्धर्वसमुच्चयात्सम्भवति तथाऽपि ब्राह्मादिषु चतुर्षु विवाहेषु अप्रजायामतीतायां तद्भर्त्तुः शेषेषु च पिता हरेदिति विष्णुविरोधात् तथा नापेरर्थ इति। मानवे गान्धर्वग्रहणं विकल्पार्थमेवेति प्राञ्चः। तदित्यस्यार्थः * अप्रजःस्त्रीति । पितृशब्दे प्राग्वदेकशेषोऽभिमत इत्याह *माता चेति। तत्र क्रमोऽपि प्रागुक्त एवेत्याह*एकेति ।

अत एव कात्यायनः,

आसुरादिषु यल्लब्धं स्त्रीधनं पैतृकं स्त्रिया ।
अभावे तदपत्यानां मातापित्रोस्तदिष्यते ॥ इति ।

इदमुपलक्षणमित्याह * तदभावे इति । उभयाभावे यथा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रमम् उभयप्रत्यासन्नानामित्यर्थः।

३। सर्वशेषं तृतीयपादं व्याचष्टे * सर्वेष्वपीति। सर्वेष्वेवेति पाठान्तरम्। एवोऽन्यतरकोटिव्यवच्छेदे तदा।

अत एव विवाहेष्वित्यनुवृत्तौ विष्णुः,

सर्वेष्वेव प्रसूतायां यद्धनं तद् दुहितृगामीति।

मध्यपठितस्य दुहितॄणामित्यस्य काकाक्षिगोलकन्यायेनोभयत्रान्वयं मुन्यभिमतमभिसन्धाय तथैवाह * प्रसूतेति। प्रसूतं प्रसवस्तदस्यास्तीति प्रसूतेत्यर्शआद्यचाऽर्थ इति भावः। तथाच दुहितॄणां प्रसूतवती चेत् दुहितॄणां तद्धनं भवतीत्यर्थः। अन्यथा तु भर्त्रादेरिति भावः।

४। विशेषमपौनरुक्त्यायाह *अत्रेति। श्लोके इत्यर्थः। *दुहित्रिति। कन्यायाः कन्या इत्यर्थः। अत्र बीजं तदेवाह * साक्षादिति। * इत्यत्र, तत्रैव। तथा सति प्रागुक्तानुरोधादिनैवात्रादितः क्रममाह *अतश्चेति। तासामपि तत्त्वे चेत्यर्थः। *वृत्तायां, मृतायाम्। *दुहितरः, साक्षात्। अत्रापि तथैवेति सूचयन्प्रागुक्तमेवाह * तत्र चेति। तासां मध्ये चेत्यर्थः। * अनूढा, सैव। एवमग्रेऽपि। * तत्रापि, परिणीतामध्येऽपि।

५। द्वितीयपक्षोक्तोढानां प्राप्तमेवेत्याशयेनाह *तत्र चशब्दात्प्रतिष्ठितानामिति। गौतमीये इत्यर्थः। स्वोक्तशुल्के विशेषमाह * एतच्चेति। मातृधनं दुहितृगामीत्युक्तं चेत्यर्थः। *शुल्कं तु, तद्रूपं स्त्रीधनं तु। तद्दाने तद्ग्रहणस्य निमित्तत्वात्तस्य स्त्रीधनत्वम्। *भगिनीशुल्कमिति। व्याख्यातम्। *ऊर्ध्वमिति। मातुर्मरणादनन्तरमित्यर्थः। कल्पतरुरप्येवम्। अस्य वाक्यशेषोऽपि प्रागुक्तः। माता चात्र भगिन्येव। तथा च तद्रूपमातुरभावे दुहित्रादिषु पौत्रपर्यन्तेषु सत्स्वपि स्वभगिनीशुल्कं सोदरा एव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गृह्णीयुरित्यर्थः ।

एवेन दुहित्रादिव्यवच्छेदः। तथा च तदभावे तेषाम्। एतेन ऊर्ध्वमित्यस्य सोदर्याणामभावे इत्यर्थमभिप्रेत्यादौ तेषां ततो मातुस्तदुभयाभावे पितुर्वक्ष्यमाणबौधायनात् तत्र हि रिक्थं शुल्कम् इति भ्रान्तोक्तमपास्तम् ।

६। ननु यदा अनेककन्यानां मृतानां वैषम्येण कन्यास्तदा तासां मातामहीधने कथं विभागकल्पनेत्याशङ्कायामनेकपितृकाणामित्यनेन पौत्राणां पैतामहधनविषये उक्तमेव न्यायं स्मरन्नाह * तासामिति । कन्याकन्यानामित्यर्थः । अत्र वचनमप्याह * प्रतीति । वाशब्द एवार्थे । *स्ववर्गे, दौहित्रीवर्गे । प्रतिमातृ मातरि मातरि । स्वस्वमातृविषये । भागविशेषस्तत्कल्पना कर्त्तव्या न स्वस्वरूपापेक्षयेति । इदमुक्तरीत्याऽन्यत्रापि स्थलविशेषे बोध्यम् ।

७। नन्वेवं भ्रातृतत्पुत्रसमवाये उक्तप्रकारस्यात्राप्याप-त्तिरत आह * दुहितृदौहित्रीणामिति । दुहितरश्च दुहितृकन्याश्च तासामित्यर्थः। किञ्चिदेवेत्यनेन मातृद्वारकभागकल्पनस्य सर्वथा तदभावस्य च निरासः । * तासां, प्रागुक्तकन्यानाम्। जनन्यामित्यग्रिमामिदम् । अग्रे शेषे षष्ठी । * यथार्हतः, यथायोग्यम् । द्रव्याल्पत्वबहुत्वादियोग्यतानुसारेण । सार्वविभक्तिकस्तसिः ।

८। *मातुरिति । अत्राभावे इति दुहितृणामिति च यथेष्टमन्वेति। तदन्वय इति च तन्त्रेण सप्तम्यन्तं प्रथमान्तं च। भजेरन्नित्यस्य चानुवृत्तिः । तथा च मातुरभावे तद्धनं साक्षाद् दुहितरो गृह्णीयुः, दुहितृणामभावे तदन्वये दुहितृसन्तानमध्ये आदौ दुहितॄणां दुहितरस्तदभावे तदन्वयो दुहितृणामन्वयो दौहित्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यर्थः। तथा च तदन्वय इत्युक्त्या पुत्रीसन्तानरूपाणां दौहित्राणां ग्रहणम्, अन्यथा तदुक्तिर्व्यर्थैव स्यात्।

९। यद्वा तदन्वये इति सप्तम्यन्तपाठ एव। मातुर्धनं दुहितर आप्नुयुः, अभावे तदभावे दुहितॄणां तद्दुहितॄणां, तदभावे तदन्वये ये जाता दौहित्रास्तेषामित्यर्थः। प्रथमान्तमात्रपाठेऽप्येवम्। अग्रे यथायोग्यक्रियाध्याहारः पक्षद्वयेऽपि। तदन्वया इति प्रथमाबहुवचनान्तपाठस्तु युक्ततरः। तदा ऽऽद्यैव व्याख्या च।

१०। ननु तच्छब्देन मातृपरामर्शः कन्याकन्यापरामर्शो वा कुतो नेति चेन्न। आशयानवबोधात्। तथाहि। मातुरभावे दुहितरस्तासां दुहितॄणामभावे तदन्वय इत्येतावन्मात्रं हि मूलोक्तसमम् अभिमतं स्यात्तदाऽऽद्यपक्षो भवेत्, न तु तथा। दुहितॄणां दुहितर इत्यन्यतरस्यानतिप्रयोजनकत्वापत्तेः। मूलवत्ताद्विनैव निर्वाहे तत्पदाधिक्यापत्तेश्च। द्वितीये पक्षद्वयविधेयत्वेन प्राधान्यस्य द्वितीये पाठसंनिधेश्च सत्त्वेऽपि आद्ये पाठसंनिधेः पक्षद्वयेऽपि आर्थसन्निधेरवयवसंनिधेश्चासत्त्वाद्दौहित्रापेक्षया दौहित्रीसन्ततेर्विप्रकृष्टत्वात्। तदाह—

११। * तच्छब्देन संनिहितेति। यदीयं धनं तत्संनिहितेत्यर्थः। अतएव तत्पदसार्थक्यम्। अतएवोक्तनारदं विहायाह * ताभ्य इति। मूले एवेति भावः।

दुहितॄणामभावे तु रिक्थं पुत्रस्य तद्भवेत्।

इति कातीयमप्येवं परम्। इत्याशयिकैव मनूक्तिरिति। अत्र तत्संमतिमप्याह * मनुरपीति। * सम्बन्धं, तन्मात्रं न तु क्रमं नापि समुच्चयमिति भावः। * संस्थितायां, मृतायाम्। शब्दतः समुच्चयप्रतीतेरभिमतं मन्वर्थमाह * मातृकमिति। तत आगतामित्यर्थः। * सनाभयः, सोदर्याः। ननु शब्दतः प्रतीय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मानः परोक्त एकान्वय एवास्तु किं भिन्नान्वयेन अत आह* न पुनरिति। नत्वित्यर्थः। * सम्भूय, मिलित्वा। समं भजेरन्निति पाठः। सम्बन्ध इत्यस्याग्रेऽनुषङ्गः। तत्र हेतुमाह * इतरेतरेति। द्वन्द्वैकशेषयोरभावादित्यर्थः। इतरेतरयोगो मिलितस्यैकधर्मावच्छिन्नेतरान्वयः। मेलनं च समूहरूपता। समूह एव चेतरेतरयोगपदवाच्यः। अत एव तद्विग्रहवाक्ये चद्वयादिप्रयोगः। तेन ह्यन्योन्यस्मिन्नन्योन्यसाहित्यं गम्यते। तेन समूहरूपतासिद्धिः। अत एव चैत्रश्च मैत्रश्च पचत इत्यादौ नित्यद्विवचनाद्यन्ताख्यातप्रयोग एव। एकैकत्वेन द्वित्वादेर्विरोधेऽपि समूहबुद्धिविषयगतनानैकत्वैरविरोधात्। तस्य प्रतीतिर्हि द्वन्द्वे एकशेषे च भवति। यथा द्वन्द्वे धवखदिरपलाशा इति, सजातीयैकशेषे वृक्षा इति, विजातीयैकशेषे भ्रातराविति भ्रातृपुत्रावित्यनेन। न तु तथा प्रकृतेऽस्ति भ्रातृभगिन्य इति अपत्यानीति भ्रातराविति वा। तस्मान्नेतरेतरयोगप्रतीतिरिति भावः।

१२। ननु द्वन्द्वादेरभावेऽपि तस्य चार्थत्वाच्चस्य च एकस्य चात्र सत्त्वात्साङ्काश्यकानां पाटलिपुत्रकाणां च पाटलिपुत्रका अभिरूपतमा इत्यादाविव तत्प्रतीतिः स्यादेव, अत आह* विभागेति। कर्तृत्वान्वयेनापीति पाठः। विभागे कर्तृत्वेनान्वयेनापीत्यर्थः। क्वचित्तथा पाठ एव। तथा च दृष्टान्ते प्रकारान्तरावगततात्पर्यवशान्मिथः साहित्यावगतावप्यत्रेश्वरं गुरुं च भजस्वेत्यादाविवैकस्यान्यसहितस्यान्वयेऽप्येकस्य केवलस्यैवैकधर्मावच्छिन्नेऽन्वयाच्च चसमभिव्याहृतस्य किञ्चिदप्राधान्यप्रतीत्यैकरूपावच्छिन्ने एकरूपेणान्वयसत्त्वात् तत्कर्तृत्वांशे समुच्चयेऽपि न तथेति भावः।

१३। यद्यपि क्वचिच्चद्वयसत्त्वेऽपि न तत्प्रतीतिः क्वचित्तदभावेऽपि तत्प्रतीतिर्गमकवशात् तथापि प्रकृते न तथा। अपिरुक्तरीति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समुच्चायकः एवार्थो वा। विभागकर्तृत्वेनान्वाचयेनापीत्यपपाठः। असम्बद्धत्वात्। यत्र हि चस्य क्रियान्वयस्तत्र प्रायेणान्वाचयः। तत्र चसमभिव्याहृते आनुषङ्गिकत्वमितरसाहित्यं च मिथः फलति। तथा च क्रिययोर्मध्ये सर्वं आद्यं च अन्यनिष्पादकयत्ननिष्पाद्यत्वम्। एवं च तन्व्याप्यम् यत्रैका मुख्या ऽपरा गौणी तत्रान्वाचयाविषयत्वमिति। एवं च तस्यान्यथाऽप्युपपत्तेर्न तयोः संभूयैव विभागप्रतीतिरिति भावः

१४। तत्र दृष्टान्तमाह * देवेति। यत्तु एवं सति * समं स्यादश्रुतत्वाद्विशेषत *इति न्यायत एव समत्वप्राप्तेस्तदानर्थक्यमिति तदेव तयोः सम्भूयग्रहणार्थत्वे गमकमिति भ्रातृभगिन्योस्तुल्यवज्जननीधनाधिकारित्वे समताविधानं युक्तमिति। तन्न। तत्रापि पक्षे तन्न्यायत एव तत्प्राप्त्या तदानर्थक्यस्य तदवस्थत्वात्। अत्रापि पक्षे पितृधने इव मातृधनेऽपि विंशोद्धारादिप्रसक्तिनिवर्त्तकतया तस्य सार्थक्याच्च। तदेतदभिप्रेत्याह * समेति।

१५। कल्पतरौ तु सर्वे पुत्रा इति पाठः। तथाच सोदर्या भगिन्यः साक्षात् स्वमातृदुहितरस्तु याः, तदभावे तद्दौहित्रपर्यन्ताः, तदभावे सोदरा मृतायाः साक्षात् पुत्रा न सपत्नीपुत्राः, तदभावे पौत्रा इति मनुतात्पर्यार्थः। एतेन—

स्त्रीधनं स्यादपत्यानां दुहिताच तदंशिनी।
अपुत्रा चेत्समूढा तु लभते मानमात्रकम्॥ इति—
बृहस्पतिः,

समं सर्वे सोदर्या मातृकं रिक्थमर्हन्ति कुमार्यश्चेति शङ्खलिखितौ चेत्यादि सर्वं व्याख्यातप्रायम्। आद्ये—

अप्रत्ताचेत् समृद्धा तु न लभेन्मातृकं धनम्।
इत्युत्तरार्धे पाठान्तरम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अप्रत्ता चेत् समूढा तु लभते मानमात्रकम् ।

इति वा ।

१६। विशेषं प्रागुक्तं सूचितमेवाह *सोदरेति। सहोदरेत्यर्थः। तथाच स्वपुत्राद्यभावे एव सपत्नीपुत्रादयः। विशेषान्तरमाह *अनपत्येति । *दुहितेति । सैवेत्यर्थः। नतु हीनजातीयः सापत्नपुत्रो, नापि ब्राह्मदैवेत्यादिप्रागव्यवहितपद्यद्वयोक्ता यथायथं भर्तृमातापितर इति भावः । * अपत्यं, तदंपत्यम् । तादृग्विधो दौहित्रः ।

१७। अत्र मानमाह *यथाहेति। तथाचेति पाठान्तरम्। अत्र स्त्रिया इति पित्रेति ब्राह्मणीति कन्येति चोपादानादुक्तार्थप्रतीतिः। तथाहि पित्रा दत्तं कथमपि स्त्रिया धनं कन्या हरेदित्युक्ते स्वापेक्षयैव स्त्री स्वापेक्षयैव कन्येति स्त्रीकन्याशब्दयोर्मिथःसापेक्षशब्दत्वाभावात्सापत्नमाता सापत्नदुहितेति च गम्यते इति। * तदपत्यस्येति। ब्राह्मण्यपत्यस्येत्यर्थः। वाशब्दः व्यवस्थितविकल्पे। तेन तदभावे इति लभ्यते पूर्ववत् ।

संग्रहेऽप्युक्तम्,

ब्राह्मणी तु भवेत्कन्या हरेत् रिक्थं तु मातृकम् ।

पितुः सापत्नमातुश्च भ्रातुश्चापि हरेद्धनम् ॥ इति ।

अतएव पितृपत्न्य इति सुमन्तुरपि । नच सापिण्ड्याशौचमात्रविषयः सः। संकोचे मानाभावात्। विनिगमनाविरहाच्च।

अत्र न्यूनतां निराचष्टे * ब्राह्मणीति । * क्षत्रियाकन्या, सापि । तेन ब्राह्मणीसमुच्चयः । एवं शूद्रास्त्रीधनं ब्राह्मणी क्षत्रिया वैश्या च कन्या गृह्णाति इत्यपि बोध्यम् ।

१८। अत्रोत्तमजातीयाया एव सापत्नकन्यकाया धनग्रहणाभिधानाद्धीनजातीयपत्नीदुहितॄणामप्युत्तमजातीयसपत्नीपुत्रस-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्भावे धनग्रहणं नास्तीति गम्यते । तथा च स्वतः प्रजाशून्यत्वात् ब्राह्मेत्याद्यव्यवहितश्लोकद्वयेन भर्त्रादेराधिकारप्राप्तौ तदपवादोऽनेन क्रियते इति तयोरयं न विषय इति भावः। अत्र कथञ्चनेत्यनेन कथमपि प्रकारान्तरेण लब्धमपीत्यर्थकेन पितृदत्तातिरिक्तसर्वसंग्रहः। तेन सर्वविषयत्वमस्य।

एतेन पित्रा दत्तमिति विशेषणाद् विवाहसमयादन्यत्रापि पितृमातृदत्तं कन्याया एव इत्येतदर्थकमिदमिति मिश्राद्युक्तमपास्तम्।

१९। * रिक्थभाजइति। ये ऋणप्रतिकर्त्तारस्ते रिक्थभाज इत्यर्थेन पौत्रस्यापि तादृशत्वे पुत्राभावे स पितामहीधनभागित्यर्थः। ननु ऋणानिवारकत्वमेव तस्यासिद्धमत आह *पुत्रपौत्रैरिति। मूलोक्तिरियम् प्राक्। अपाकरणं दूरीकरणम्। तथाच वचनद्वयपर्यालोचनयोक्तार्थलाभः । अथ अतीतायामित्यादिसार्द्धश्लोकस्य तृतीयपादरहितस्य विषयमाह *पौत्राणामपीति। पूर्वपूर्वोक्ता इत्यनेन क्रमः सूचितः।

२०। यत्तु प्राच्याः— जनन्यां संस्थितायामिति मनोः, स्त्रीधनं स्यादपत्यानामिति बृहस्पतेः, समं सर्वे सोदर्या इति शङ्खलिखिताभ्याम्,

सामान्यं पुत्रकन्यानां मृतायां स्त्रीधनं स्त्रियाम्।
अप्रजायां हरेद्भर्ता माता भ्राता पिताऽपिवा॥

इति देवलाच्च आद्यत्रये द्वन्द्वाश्रवणेऽपि तत्तुल्यार्थसमुच्चयवाचकानुगतचश्रवणात् तत्र सर्वत्र प्रथमं पुत्रोपादानात् मातृधने पुत्रस्याप्यधिकारादितरेतरयुक्तयोर्भ्रातृभगिन्योर्विभज्य तद्धनग्रहणम्। अयमेव सर्ववचनतात्पर्यभूतोऽर्थः। देवलवाक्ये तु द्वन्द्वश्रवणात् तथा व्यक्तमेव।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२१। किञ्च। कुमार्या एव सर्वमातृधनाधिकारित्वे यौतकधने मन्वादेर्विशेषवचनं व्यर्थं स्यात्। तथाच पुत्रकुमार्योः तुल्यवदधिकारः। तयोरन्यतराभावेऽन्यतरस्य तद्धनम्। द्वयोरपि तयोरभावे ऊढायाः पुत्रवत्याः सम्भावितपुत्रवत्याश्च तुल्याधिकारः। स्वपुत्रद्वारेण पार्वणपिण्डदानसम्भवात्। अतएव प्रागुक्तदुहित्रभावे दौहित्रस्यैव धनाधिकारः, दौहित्रोऽपीति मनोः। न तु वन्ध्यातादृशविधवादुहित्रोः। स्वसुतादिना पार्वणपिण्डदानाभावात्।

अत एव नारदः, (। व्यव. १३। ५०)

पुत्राभावे च दुहिता तुल्यसन्तानदर्शनात्। इति।

पौत्रदौहित्रयोस्तु समवाये पौत्रस्यैव सः। पुत्रेण परिणीतदुहितुर्बाधात् बाधकपुत्रेण बाध्यपुत्रबाधस्य न्याय्यत्वात्। उक्तानां सर्वेषां दौहित्रपर्यन्तानामभावे वन्ध्यातादृशविधवयोरपि सः। द्वयोरपि तत्प्रजात्वात्। प्रजाया अभावे एव चान्येषामधिकारात्। प्रागुक्तानि गौतमनारदकात्यायनयाज्ञवल्क्यवचनानि तु उक्तदेवलादिविरोधात् यौतकद्रव्यमात्रविषयाणि।

अत एव मनुः, (अ. ९। १३१)

मातुस्तु यौतकं यत्स्यात् कुमारीभागएव सः। इति।

यौतकं परिणयनलब्धम्। यु मिश्रणइति धातोर्युतपदम्। मिश्रता चैकशरीरता तयोर्विवाहाद्भवति। अस्थिभिरस्थीनि मांसैर्मांसानि त्वचा त्वचमिति श्रुतेः। अतो विवाहकाललब्धं यौतकम्। कल्पतरुरप्येवम्।

अतएव वासिष्ठः, मातुः परिणाय्यं स्त्रियो भजेरन्निति।

परिणाय्यं परिणयनधनम् इति। तन्न।

२२। मुनीनाम् आशयानभिज्ञानात्। तथाहि। चार्थसमुच्चयस्य सहाधिकारं विनाऽप्याख्यातोपपत्तिः तत्र तावत्कृतैव। युक्ता च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सैवेत्युक्तश्च । किञ्च । उपादानमात्रेण तस्य तत्राधिकारलाभे प्रथमोपादानस्य न तत्र हेतुत्वं प्रत्युत ततः तस्य तस्याः प्रथममेवाधिकारापत्तिरिति न भवादिष्टसिद्धिः। किञ्च तदपि न, गौतमादिवाक्ये तासामेवोपादानात् प्रथममेव, प्रत्युत नारदादिभिस्त्रिभिः क्रमस्य स्पष्टतया सामान्येन प्रतिपादनात् मातुर्दुहितर इत्यत्र युक्तश्चैतदित्यादिनोक्तप्रकारेण प्रत्यासत्त्यतिशयस्य तस्यामेव सत्त्वेन तस्यैव धनग्रहणाधिकारितावच्छेदकत्वस्य मन्वाद्युक्तत्वेन च तथैवौचित्याच्च ।

२३। किञ्च। सहाधिकारित्वे उभयसत्त्वे एवाधिकारो नान्यतरसत्त्वे इति तत्रानधिकारापत्तेः। तथासति तयोरित्याद्यग्रिमग्रन्थासङ्गतेः। नहि दम्पत्योः सह विहितमाधानादिकमन्यतराधिकारिकं कस्यापि संमतम् । लोकेऽपि सहाधिकारिकं कर्मान्यतरेण न क्रियते ।

२४ । किञ्च। अनूढेत्यस्य कुतो लाभः। नहि तेषु सर्वेषु तदुपादानमस्ति । गौतमीयं तु अन्यविषयतया योजितं भवद्भिरेव। अत एव च तद्विरोधोऽपि दुष्परिहरः। कन्याशब्दस्य चाक्षतयोन्यां शक्तिः, कुमारीशब्दस्य च प्रथमवयोविशिष्टायां शक्तिः।अन्यैकवाक्यतया तु दुहितृसामान्यपरत्वमेव। अन्यथा न्यूनतापत्तेः। बृहस्पतिवाक्यं गौतमीयसमानार्थम् ।

२५। किञ्च। तत्र अप्रत्ता चेत् इत्युत्तरान्वयि न पूर्वान्वयि।अन्यथा समूढायाः कदापि तदभावे गौतमीयस्य चासङ्गतिः, स्मृत्यन्तरविरोधापत्तिश्च भवति । लिखितवचनातिरिक्तं नापि तथाबोधकं वचनमत्रास्ति ।

२६। किञ्च। तत्र मनोर्गतेरुक्तत्वेन शङ्खलिखितवाक्यस्य स्पष्टमेव तत्समानार्थत्वेन चादोषः। बृहस्पतिवाक्यस्यापि तत्समाना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्थतया, विविभक्तितया स्यात्पदघटितनिर्देशेन भवदभिमतार्थस्या- क्षरमर्यादयाऽलाभेन चशब्दस्य एवार्थकत्वेन च आदौ दुहितैव त- दंशिनी तदभावेऽपत्यानां पुत्राणां स्त्रीधनं स्यात् सम्भावनालिङ्ग तत्सत्ता सम्भवेत् इत्यर्थस्यैवानया लाभाच्च अदोषः। देवलवा- क्यन्तु मातृधनं पुत्रमात्रसत्त्वे तेनैव ग्राह्यं, कन्यामात्रस्य सत्त्वे तयैव ग्राह्यम् इत्येवं समानत्वमात्रबोधकं न क्रमबोधकं नापि स- हाधिकारबोधकमिति न दोषः।

२७। किञ्च। नारदादित्रयानुरोधेन मन्वादिचतुष्टयस्य तथा तत्परत्वमेव युक्तं, नतु मातुस्त्विवत्येवंमन्वनुरोधेन तत्परत्वम्। तदनुरोधे तु तेषां सामान्यानां विशेषपरत्वं कृत्वा तेषां तत्प- रत्वे युक्तो बहूनामनुरोध इतिन्यायाविरुद्धत्वात्।

किञ्च। चतुर्णां वचनानां सहाधिकारिताबोधकत्वेन त- दन्यचतुर्णां मन्वेकवाक्यतया यौतकविषयकत्वस्योक्तत्वेन तयो- रन्यतरस्याभावे इत्याद्यर्थस्य भवदुक्तस्य निर्मूलत्वापत्तिः। तेषामपि तत्त्वे त्वविरोधोऽस्मन्मते प्रवेशश्च।

किञ्च। तस्य न भवदुक्तोऽर्थः किं त्वन्य एवेत्यनुपदमेव स्फुटीभविष्यति।

२८। किञ्च। स्वपुत्रेत्यादिहेतुरप्ययुक्तः। यश्चार्थहरः स पिण्ड- दायीत्यौत्सर्गिकनियमसत्त्वेऽपि यस्य पिण्डदत्वं तस्यैव तद्धरत्व- मितिनियमे मानाभावस्य प्रागेव प्रपञ्चितत्वात्। अत एव—

पौत्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्मतः।

इति पूर्वार्धोक्ते—

तयोर्हि मातापितरौ संभूतौ तस्य देहतः।

इत्युत्तरार्धेन हेतुरुक्तो मनुना (अ. ९।१३९)। दुहित्रभावे दौहित्रस्यैवेत्यपि न युक्तम्। प्रत्यासत्त्यतिशयस्य तु दौहित्र्यामेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सत्त्वाद्दौहित्रोऽपीति मनोः प्रकरणात्पुत्रिकापुत्रविषयत्वाच्च । व्याख्यातं च तथैव मेधातिथिप्रभृतिभिः।

२९। उक्तहेतोरेव न तु वन्ध्येत्याद्यग्रिममपि न युक्तम्। भवदुक्तनारदस्य पितृधनविषयत्वस्य स्पष्टत्वाच्च । अत एव च पौत्रेत्यादि अधिकारादित्यन्तमपि प्रत्युक्तम् । वासिष्ठे मातुः परिणाह्यं स्त्रियो विभजेरन्निति पाठस्य सत्त्वेन भवदुक्तपाठस्यैव खपुष्पायमाणत्वेन तथाऽर्थस्य दूरोत्सारितत्वेन "अत एव वासिष्ठ" इत्याद्यपि चिन्त्यम् । परिणाय्यमिति प्रयोगस्यासाधुत्वाच्च। अत एव "आनाय्यो ऽनित्ये" "पाय्यसानाय्य" "प्रणाय्योऽसंमतौ" इति निपातनं पाणिनीयं सङ्गच्छते । अत एव कल्पतर्वादिभिरपि तथा पाठं धृत्वा परिणाह्यं परिच्छद आदर्शकङ्कणादिरिति व्याख्यातम् । अत एव स्त्रीपुरुषधर्मप्रकरणे—

शौचे धर्मेऽन्नपक्त्यां च परिणाह्यस्य वीक्षणम् ।

इति मन्वेकवाक्यताऽपि सिद्धा। तत्रापि कल्पतरुणा तथैव व्याख्यातम्। णिजन्तादचो यति तु अर्थासङ्गतिः। निवृत्तप्रेषणादिति तु तस्य सत्त्वे ऽगतिकगतिः।

३०। यदपि प्रत्यासन्नदुहितृपदेनैवान्वयपदस्यान्वयाद् दुहित्रभावे दौहित्रीणामेव स इति नारदार्थो न युक्तः। दुहितृपदस्य जन्यविशेषवचनत्वेन जनकाकाङ्क्षित्वेन तस्या जात्यन्तरेणान्वयपदोपनेयपुत्रेणान्वयस्यासमत्वेनासम्भवात् । न चाधिष्ठानलक्षणयाऽन्वयः । मात्रन्वयमात्रेणैव सर्वेषां मुख्यत्वसम्भवात् । मातृपदान्वये च दुहितृपदमुख्यत्वस्य स्वीकारात् । न च तदन्वय इति तच्छब्दोपात्तदुहितुरन्वययोग्यता। तच्छब्दस्यापि प्रकृतवाचितया दुहितृत्वरूपेणैवोपपादकत्वात् ।

किञ्च । मूलवाक्ये दुहितर इति प्रथमान्तं ताभ्य इति

९५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पञ्चम्यन्तं च षष्ठ्यन्तान्वययोग्यान्तरपदेन नान्वेति, किं तु व्यवहितमपि मातुरित्येव। तत्र तथा निश्चये नारदीयादावपि तथैवाविरोधात् इति।

३१। तदपि न। प्रागुक्तस्य नारदार्थस्याज्ञानात्। मातृप्रत्यासत्तेः प्रागुक्तत्वेन त्वादिष्टप्रत्यासत्तेरभावेन दोषस्याज्ञानविलसितत्वात्। मूलसमानार्थत्वे तदन्यतरस्य तत्पदस्य चानर्थक्यापत्तेः। अत एव दुहितृपदेनास्माकं नान्वयपदान्वय एवेति सर्वथा दुहितृपदस्य इत्याद्युक्तेरयुक्तत्वात्। तच्छब्दस्य प्रकृतपरामर्शकत्वेऽपि बुद्धिस्थत्वेनैव तद्बोधकतया दुहितृत्वरूपेण तदभावेनान्वययोग्यतायाः षष्ठ्यन्ततया सत्त्वेनात्र जनकाङ्क्षाया अभावेन प्रत्युत सम्बन्ध्याकाङ्क्षाया एव सत्त्वेन लक्षणायाश्चाभावेन प्रागुक्तनचेत्याद्युक्तेश्चासङ्गतत्वात्। तस्माद्विज्ञानेश्वरोक्तमेव युक्तमिति दिक्।

३२। रिक्थं दिवं गतेषु सुतगामीति बौधायनीयं तु पितृद्रव्यविषयकमिति ततो "न व्यवहितदौहित्राधिकार" इत्यपि तदुक्तं चिन्त्यमेव।

एतेन "विवाहलब्धं स्त्रीधनं दुहितुरेव न पुत्राणाम्। तत्रैव क्रमार्थं गौतमीयम्। तत्र पूर्वमनूढानां तदभावे सपुत्राणां तदभावे समूढानां दुहितॄणामिति। सामान्यप्राप्ते ऽप्रत्तानामित्यादेस्तु क्रमार्थत्वेनोपसंहारसमर्थत्वात्" इति परास्तम्।

विशेषाभावात्।

३३। यदपि अप्रजःस्त्रीति मूलमपि विवाहलब्धविषयमेव। ब्राह्मादिविवाहेषु यल्लब्धम् अध्यग्निधनं तत् अभावे आदौ दुहितॄणां तत्रापि प्रथमं कन्यायास्तदभावे सपुत्रायास्तदभावे ऊढायाः। सर्वदुहित्रभावे च पुत्रस्याधिकारः। अप्रजःस्त्रीधने च भर्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रधिकारः । बृहस्पतिनाऽप्यप्रजःपदेनापत्यान्तराभावे समूढाया अप्यधिकारः सूचित इति ।

३४। तदपि न । तस्य सर्वपरतयैवाचार्येण व्याख्यातत्वात् । किञ्च । भवदुक्तव्याख्यानेऽप्यपिना तदन्यस्य सर्वस्य समुच्चयात् । न च अपिसमुच्चेयं प्रागन्यदुक्तमिति वाच्यम् । शेषेष्वितिवत्तत्राप्युपलक्षणत्वेनैव तदर्थलाभेन तत्र तस्यात्यन्तमनुपयोगात् । किं च साक्षात् दुहितृपरतया व्याख्याने मातुर्दुहितर इत्यनेन पौनरुक्त्यापत्तेः ।

३५।यदपि "न च न यौतकमात्रधनाभिप्रायमिदं किं तु ब्राह्मादिना विवाहिताया यद्यावद्धनं यौतकम यौतकं वा तदभिप्रायकमिति वाच्यम् । तथा सति बन्धुदत्तमित्यव्यवहितप्रागुक्तसंपूर्णश्लोकस्य निर्विषयतापत्तेः" इति । तदपि न। बन्धुदत्तमित्यर्द्धेन तथादिशब्दस्वारस्येन स्त्रीधनस्यैवोक्तान्यस्य प्रतिपाद्यत्वेन तस्य पूर्वशेषत्वेनादोषात् । सम्पूर्णस्य तस्यैकवाक्यत्वे च तेन तस्य पूर्वशेषत्वेनोत्तरार्द्धेन सामान्येन तद्विभागस्य प्रतिपाद्यत्वेन अप्रजःस्त्रीत्यस्य तद्व्यवस्थापकत्वे तत्पदानर्थक्यापत्तेः ।

३६। किं च मनुना ऽध्यग्नीत्यादिना षड्विधं स्त्रीधनमुक्त्वा सप्रजास्थले— [अ. ९ । १९५]

अन्वाधेयं च यद्दत्तं पत्या प्रीतेन चैव यत् ।
पत्यौ जीवति वृत्तायाः प्रजायास्तद्धनं भवेत् ॥

इत्यनेन "आद्यचेनोक्तषड्विधसंग्रहो द्वितीयचेन तदन्यसर्वसंग्रहो ऽन्यथा न्यूनतापत्तेः" इत्यर्थकेन तथोक्त्वा तच्छून्यस्थले ब्राह्मेत्यादिश्लोकत्रयेण व्यवस्थया तथोक्तत्वेन तद्विरोधापत्तेश्च । एतेन " यत्तु विवाहोत्तरं पितुर्मातुर्भर्तुश्च कुलात्तया लब्धं तद् भ्रातृणामेव । तदुक्तं मूले बन्धुदत्तमित्यादिना तदवा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्नुयुरित्यन्तेन । बन्धुदत्तं मातापितृदत्तम् । तत्पुत्राश्च भ्रातर एव बान्धवाः । तदाह—

वृद्धकात्यायनः,

पितृभ्यां चैव यद्दत्तं दुहितुः स्थावरं धनम् ।
अप्रजायामतीतायां भ्रातृगामि तु सर्वदा ॥

इति । अप्रजस्त्वमात्रनिमित्तत्वेन भ्रात्रधिकारावगतेः । सर्वदा सर्वविवाहेषु । स्थावरपदाद्दण्डापूपन्यायादेवान्यस्य धनस्य सिद्धिः । बन्धुदत्तपदेन कन्यादशायां यत् पितृभ्यां दत्तं तदुच्यते । विवाहात्परतो लब्धस्यान्वाधेयपदोपात्तत्वात् । विवाहकालीने च भर्तुः पित्रोर्वा ऽधिकारात्" इत्यपि तदुक्तमपास्तम् ।

बन्ध्वादिपदस्य तत्राशक्तेश्च । वृद्धकातीयगतिस्तु वक्ष्यते इति दिक् ।

३७। नं चैवमपि मूलस्य व्याख्यानस्य च मनुविरोधः । मूले चतुर्णां विवाहानां ग्रहणम् ।

ब्राह्मदैवार्षगान्धर्वप्राजापत्येषु यद्वसु ।
अप्रजायामतीतायां भर्तुरेव तदिष्यते ॥ (९ । १९६)
यत्त्वस्याः स्याद्धनं दत्तं विवाहेष्वासुरादिषु ।
अप्रजायामतीतायां मातापित्रोस्तदिष्यते ॥ (९ । १९७)

इति मानवे आदौ पञ्चानामग्रे त्रयाणामिति तयोर्विरोधः । व्याख्यात्रा पुनर्ब्राह्मादिषु चतुर्षु विवाहेषु भार्यात्वं प्राप्ताया अतीताया इत्यादि व्याख्यातम् । मानवे तु ब्राह्मादीनाम् आसुरादीनां च शब्दानाम्[२]—

१ अस्य प्राच्योक्तं युक्तमितिवाच्यमित्यत्रान्वयः । प्राच्योक्तं युक्तमिति न वाच्यमित्यर्थः ।

२ अस्य विवाहकाललक्षणयेत्यत्रान्वयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अष्टाविमान्समासेन स्त्रीविवाहान्निबोधत। (अ. ३। २०)

इत्युपक्रम्य—

ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः। (३। २१)

इत्यादिमनोः,

अष्टौ विवाहा वर्णानां संस्कारार्थं प्रकीर्तिताः।

ब्राह्मस्तु प्रथमस्तेषामित्यादिनारदात्, (व्यव. १२। ३८)

अष्टौ विवाहा भवन्ति ब्राह्मो दैव इत्यादिविष्णोश्च तत्तल्लक्षणविवाहपरत्वेऽपि वर्त्तमानसम्बन्धेन विवाहकाललक्षणया तेषां कालार्थतया निर्देशेन अस्याः स्याद्दत्तमित्यग्रिमस्य पूर्वत्रानुषङ्गौचित्येन तत्र तत्र काले यद्धनं दत्तमिति संबन्धेन विवाहिकधनमात्रप्रतीतेर्न तदीययावद्धनविषयत्वमिति तयोर्विरोधः।

अत एव यमः,

आसुरादिषु यद् द्रव्यं विवाहेषु प्रदीयते।

इत्यादि। विवाहक्रियायां पूर्वापरीभूतायां यत् द्रव्यं प्रदीयते इत्यादिः तदर्थः। तथा च यौतकधनमात्रविषयत्वमेव तस्य। न चैवं विवाहात्पूर्वमनन्तरं वा लब्धस्य का गतिस्तेनानुक्तत्वादतो ब्राह्मादिपदं स्त्रीपरमिति वाच्यम्। तत्रान्यथा गतेर्वचनान्तरैः प्रतिपादितत्वात्। तेषां स्त्रीपरत्वे च एकत्वेन षष्ठ्या च निर्देष्टुमुचितत्वात्। यत्त्वस्याः स्यादितिवत् लक्षणायास्तुल्यत्वेऽपि अतिक्रान्तविवाहसंबन्धेनेदानीं सेति जघन्यायास्तस्या अनौचित्यात्। ब्राह्मादिपदस्य ऊढस्त्रीवाचकत्वं तु प्रागुक्तमन्वादिविरुद्धमेवेति प्राच्योक्तं युक्तमिति वाच्यम्।

३८। आर्षत्वाविशेषेणैकवाक्यताया असम्भवेन विरोधाद्गान्धर्वांशे विकल्पस्वीकारेण तयोरविरोधस्य प्रागुक्तत्वात्। मानवे एव च गान्धर्वांशे विकल्पसंभवात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकवाक्यतायां दुराग्रहे तु अपिशब्दे तन्त्राङ्गीकारादावृत्त्या द्वितीयेन तेन शेषेष्वितिवदुपलक्षणत्वेन निर्वाहेण यथाश्रुतेन तेन वा तदनुरोधेन गान्धर्वस्य समुच्चयात् । ब्राह्मादिष्वित्यत्र ब्राह्मेति भिन्नं लुप्तविभक्तिकं पदम् आदिष्विति भिन्नम्। आदिशब्दे चआकारप्रश्लेषः । स च आजशब्दैकदेशो विनापि प्रत्ययमिति न्यायादिति आः आजः ब्राह्मः आदिर्येषां दैवादिचतुर्णां तदन्येषामित्यतद्गुणसंविज्ञानबहुव्रीहिणा तदन्येषां चतुर्णां लाभाच्च तत्संभवेनादोषात् । एवं प्रकारद्वये व्याख्यानविरोधस्याप्यभावात् । परं तु द्वितीये पक्षे प्राजापत्येष्वित्यत्र व्याख्याने मूलोक्तस्य अपेः शेषः तथा पाठ एव वा। तेन गान्धर्वसमुच्चयः । अग्रे च शेषेष्वासुरराक्षसपैशाचेष्विति पाठः। गान्धर्वघटितो ऽपपाठ इति बोध्यम् ।

३९ । नचैवमप्यन्यथा प्रागुक्तव्याख्यानविरोध एवेति वाच्यम् ।

मनुना— (अ. ९ । १९०)

संस्थितस्यानपत्यस्य सगोत्रात्सुतमाहरेत् ।
तत्र यद्रिक्थजातं स्यात्तत्तस्मिन्प्रतिपादयेत् ॥

इति तन्मरणोत्तरमपि वाग्दत्तादिविषये नियोगविधिना सगोत्रात् सुतस्य उत्पादितस्य धनाधिकारित्वमनेन विधीयते इत्येवं पितृधने उक्त्वा— (९ । १९१)

द्वौ तु यौ विवदेयातां द्वाभ्यां जातौ स्त्रिया धने।
तयोर्यद्यस्य पित्र्यं स्यात्तत्स गृह्णीत नेतरः ॥

इत्यनेन—

"यद्येकरिक्थिनौ स्यातामित्यौरसक्षेत्रजयोरुक्तम्, इदं त्वौरसपौनर्भवाविषयम् । यदोत्पन्नौरसा मृतभर्तृकत्वाद्बालापत्यतया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वामिधनं स्वीकृत्य पौनर्भवभर्तुः सकाशात्पुत्रान्तरं जनयेत्, तस्यापि मृतत्वाद्रिक्थहराभावाद्धनं गृहीतवती, पश्चात् द्वाभ्यां जातयोः प्रौढयोस्तयोस्तादृशे स्त्रीधनविषये विवादेऽपि स्वस्वपित्र्यमेव तेन ग्राह्यं स्त्रीधनं नान्यदीयमन्यजेन" इत्यर्थकेनोक्त्वा, स्त्रीधनं तर्हि केन ग्राह्यमितिशङ्कानिरासाय जनन्यां संस्थितायां त्वित्यनेन तद्विषये प्रागुक्तरीत्योक्त्वा, प्रागुक्तरीत्या पितृधनवच्छङ्कानिरासाय यास्तासां स्युर्दुहितर इत्यनेन प्रागुक्तरीत्यैवोक्त्वा, स्त्रीधनं कीदृशमितिशङ्कानिरासाय अध्यग्नीत्यादिना षड्विधं स्त्रीधनमुक्त्वा, षट्त्वं न्यूनसंख्याया व्यवच्छेदकं नाधिकसंख्याया इति ध्वनयन्, प्रजा स्यात्सन्ततौ जने इति कोशात्तस्य सन्ततिपरत्वेन जनन्यामिति प्रागुक्तपद्ये पूर्वं पुत्रस्तदभावे कन्या द्वयोः संभूय वा ग्रहणमित्यसिद्धान्तसम्भावितपक्षद्वयनिरासाय कृतेन प्रजाया इति स्त्रीलिङ्गनिर्देशेन पूर्वं कन्यादेस्ततः पुत्रादेरिति सूचनद्वारा न्यूनतानिरासाय जनन्यामित्येकवाक्यतायै च चद्वयदत्तयत्पदद्वयसहितेन एवशब्दस्याग्रेऽन्वयेन "यत् अन्वाधेयं, प्रीतेन यत् पत्या दत्तं च, यच्चान्यत्, तत् प्रजाया एव सर्वं स्त्रीधनं न भर्त्रादेः" इत्यर्थकेन—

अन्वाधेयं च यद्दत्तं पत्या प्रीतेन चैव यत् ।
पत्यौ जीवति वृत्तायाः प्रजायास्तद्धनं भवेत् ॥ (९।१९५)

इत्यनेनोक्त्वा, तच्छून्यस्थलेऽपि न्यूनतानिरासाय सर्वतद्धनगतिं विवाहभेदेन प्रतिपादयता यत्त्वस्याः स्याद्धनं दत्तमित्यस्य तथोपात्तस्य यथासम्भवमुभयत्रान्वयेन तोश्चार्थकत्वेन क्वचित्तथैव पाठेन विवाहेष्वित्युक्त्या ब्राह्मादीनां विवाहमात्रवाचकत्वेन काललक्षणाया अप्यभावेन सतिसप्तम्या "तेषु आद्येषु सत्सु अस्या इति शेषषष्ठ्या अस्यै दत्तं च धनं स्यात् विवाहात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रागुत्तरं तत्र वा चेनान्यसर्वसमुच्चयस्तत्सर्वं तस्यां तादृश्यामतीतायां भर्तुरेवेष्यते, आसुरादिषु तेषु सत्सु पूर्ववत् तद्धनं मातापित्रोरिष्यते न तु भर्तुः तत्रादौ मातुस्तदभावे पितुरुच्चारणक्रमात् यौगपद्ये हि पित्रोरित्येव ब्रूयात्" इत्यर्थकेन ब्राह्मदैवेत्यादिश्लोकद्वयेनोक्त्वा, तत्रैवोभयापवादत्वेनोक्तरीत्या स्त्रियास्तु यद्धवेद्वित्तमित्यनेन सर्वधनविषये उक्तत्वेनान्यथा मनुना ऽन्यस्यानुक्तत्वेनाध्यग्नीत्यादिवैयर्थ्यापत्त्या स्वोक्तमध्ये एव सर्वथा मनुन्यूनतायाः दुष्परिहरत्वेन तद्रीत्यैव व्याख्यात्राऽपि ब्राह्मादीनां विवाहमात्रवाचकत्वं न तु क्वापि लक्षणा सतिसप्तमी च भार्यात्वं प्राप्ताया इति तु फलकथनमिति आद्येषु सत्सु तस्यास्तादृश्यास्तत्सर्वं धनं भर्तुर्द्वितीयेषु सत्सु आदौ तद्वत् तद्धनं सर्वं पितृगामि आदौ मातृगामि तदभावे पितृगामि मन्वनुरोधादेवेत्युक्तमिति तच्छङ्काया एवाभावात् ।

अत एव कुल्लूकभट्टेन सर्वधनपरतयैव ब्राह्मेत्यादिद्वयादि पूर्वं च व्याख्यातम् । एतेन मनुविरोधादप्रजःस्त्रीत्यस्य प्रागुक्ततदन्यतराभिप्रायकत्वं न युक्तमित्यपि मिश्राद्युक्तमपास्तम् । द्वितीये ब्राह्मेत्यादेर्वैयर्थ्यापत्तेश्चेति दिक् ।

४०। अत्र केचित् । मनुना मातापित्रोरित्यनेनैकदेशानुमतिद्वारा शुल्कधनविषयोऽपि गौतमबौधायनोक्तः सूचित इति न न्यूनता नापि विरोधः । तथा च—

बौधायनः,

रिक्थं मृतायाः कन्याया गृह्णीयुः सोदराः स्वयम् ।

तदभावे भवेन्मातुस्तदभावे भवेत्पितुः ॥ इति ।

सममिति पाठान्तरम् । इतोऽपि मातापित्रोरित्यादौ तथैव क्रमो विवक्षितः । गौतमस्तु प्रागुक्त एव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पितृभ्यां चैव यद्दत्तं दुहितुः स्थावरं धनम् ।
अप्रजायामतीतायां भ्रातृगामि तु सर्वदा ॥

इति वृद्धकात्यायनोक्तं तु निर्मूलम् । समूलत्वेऽपि यथासम्भवं प्रागुक्तशुल्कविषयम् । अत एव सर्वदेत्युक्तम् । तच्च सर्वविवाहेष्वित्यर्थकम् । अतो व्याख्यात्रोक्तशुल्कविषयता नेति न तद्विरोधोऽपि । मनुना तस्यैवानुक्तत्वात् ।

बन्धुदत्तं तु बन्धूनामभावे भर्तृगामि तत् ।

इति कातीयमपि शुल्कविषयमेव । बन्धूनामित्यस्य भ्रातृणामित्यर्थात् । प्रागुक्तदेवलवाक्ये तु पूर्वार्धवदुत्तरार्धमपि सर्वसाधारणमेवेत्याहुः ।

४१। एतेन "अतो विवाहकाललब्धस्त्रीधनविषयं ब्राह्मादिवचनम् । आसुरादिविवाहलब्धस्त्रीधनं तु जीवत्यपि भर्तरि मातुरादौ तदभावे पितुः । मानवेऽप्येवम् । अन्यथा पित्रोरित्येव ब्रूयात् । कन्याधने च मातुरभावे पितुरधिकारश्रवणादत्रापि तथैवौचित्यात् । तथा च रिक्थमिति बौधायनोक्तं कन्याधनविषयकम् । न च कन्याधने इवात्रापि पूर्वं भ्रातुरधिकारापत्तिः । तद्वदत्र वचनाभावात् । पित्रोरेव तच्छ्रुतेः । तदेवमादिकमप्रजःस्त्रीधनमादौ भ्रातरो गृह्णीयुः । न त्वासुरादिविवाहेषु यत्कन्याभ्यः शुल्कदानं तदभिप्रायम्, आसुरमात्रगोचरत्वात्तच्छुल्कस्य । आसुरो द्रविणादानादित्युक्तेः । अतो राक्षसादौ शुल्काभावात्तत्साहचर्येणासुरादिष्वेव यद्धनं तन्मात्रस्य भ्रातृगामित्वाभिधानं हेयमेव । तथा तस्य स्त्रीधनत्वाभावाच्च । पित्रादिगृहीतधनस्यैव शुल्कत्वात् ।

तथा च मनुः, (अ. ३ । ५१)

न कन्यायाः पिता विद्वान्गृह्णीयाच्छुल्कमण्वपि ।
गृह्णन् हि शुल्कं लोभेन स्यान्नरोऽपत्यविक्रयी ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पितेत्युपलक्षणम् । तेन भ्रात्रादिरपि तत् गृह्णन् शुल्कग्राही। तेन पित्रादिगृहीतमेव परं शुल्कं भवतीत्युक्तं भवति । अतो यदुक्तम् "आसुरादिष्वेव शुल्करूपस्त्रीधनसंभवात् तदेकवाक्यतापन्नयोर्बन्धुदत्तान्वाधेययोरपि आसुरादिविवाहगोचरयोरेव भ्रातुरधिकार" इति, तन्निरस्तम् । किं तूक्तशुल्करूपस्त्रीधनस्य सर्वविवाहेष्वेव संभवात् सर्वत्रैव भ्रातुरधिकारो वाक्याद् विशेषानवगमात् ।

प्रागुक्तगौतमीयमपि कातीयतुल्यार्थम्।अयं हि तस्यार्थः-आदौ सोदर्याणां, तदभावे मातुः ।पूर्वं वैके इति परमतम् ।अत आदौ सोदराणां तदभावे मातुस्तदभावे पितुस्तेषामभावे भर्त्तुरिति ।तथा च कातीयं, बन्धुदत्तं त्विति । बन्धूनामभावे इत्यनेन भ्रातुरभावे इत्यपि सूचितम् ।भ्रातुरभावे पित्रोर्धनाधिकारस्य दण्डापूपन्यायात्सिद्धिः" इत्यपि तदुक्तमपास्तम् ।

४२ । तस्य सर्वविषयत्वात् । बौधायनाद्युक्तस्य शुल्कविषयत्वात् । अत एव न चेत्यादेरयुक्तत्वात् । त्वद्रीत्या देवलवाक्यस्य सत्त्वात् । अत एव तदेवामित्याद्युपसंहारस्यायुक्तत्वात् यथासंभवमुक्तवचनानां शुल्कविषयत्वेन न त्वासुरादीत्यादेरयुक्तत्वात् । त्वयाऽप्यग्रे किं त्वित्यादिना तथैवोक्तत्वेन अस्य "बौधायनोक्तं कन्याधनविषयकम्" इत्यस्य च तेन विरुद्धत्वात् । तस्य स्त्रीधनत्वस्य प्रागुक्तत्वात् । पित्रादिगृहीतस्यैव तत्त्वस्य मन्वादितोऽलाभात् ।तस्य तन्निषेधकथनद्वारा ब्राह्मादिविवाहप्राशस्त्यपरत्वात्। तवाप्युपलक्षणत्वेन भ्रात्रादीत्यनेन मातुरपि ग्रहणसंभवेन मिथो विरोधात् । अत एवोपसंहारस्यायुक्तत्वात् । अत एवास्माकं तन्मतस्यैवाभावेन तन्निरासस्यादोषात्रहत्वेन अत इत्यादेरसंबद्धत्वात् । गौतमीयकातीययोर्भिन्नार्थत्वस्य प्रागुक्तत्वेन तुल्यार्थत्वाभावात् । उभयत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मध्येऽध्याहारेण व्याख्यानस्य निर्बीजत्वात्। अन्यथाऽनुपपत्त्या हि सः। न तु सा तत्रास्ति। प्रागुक्तरीत्या निर्वाहात्। अत एव कल्पतरुणाऽपि गौतमीयं तथैव व्याख्यातम्। ऊर्ध्वपदसमभिव्याहारे तथैव ऋषिशैलीसत्त्वात्। बन्धूनामभावे इत्यस्यैव तथार्थकत्वेन सूचितमित्यस्यासंबद्धत्वात्। अत एवाग्रिमोक्तेरपि क्लिष्टत्वाच्चेति दिक्।

४३। मातुस्तु यौतकमिति पुत्रिकाप्रकरणस्थमानवमपि सर्वैकवाक्यतानुरोधेन सर्वधनविषयकम्। अत एव मातुर्यद्धनं स्यात्तत् तस्यां मृतायां कुमारीभाग एवेति सामान्यत एव तद् व्याख्यातम्। मेधातिथिनाऽपि यौतकं पृथग् भूतमित्येवं व्याख्यातं, यु मिश्रणामिश्रणयोरितिधात्वनुसारात्। युक्तं चैतत्।

विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः।

इत्यग्रिममूलवाक्ये तथैव सर्वसंमतत्वात्। त्वद्रीत्याऽपि तोश्चार्थकत्वेन समुच्चायकतया सर्वधनग्रहणसंभवात्। एवं सति अन्वाधेयं चेति अध्यग्न्यध्येत्यग्रिमम् ऊढाविषयं क्रमेण दौहित्र्याद्यर्थं पुत्राद्यर्थं चेति न वैयर्थ्यं तस्य। अत एवानुरोधेनापि समञ्जसवचनानामाकुलीकरणमसंगतमेव तेषामिति दिक्।

४४। वस्तुतस्तु कातीयद्वयस्योढामात्रविषयत्वेन प्रागुक्तान्यार्थासम्भवेऽपि बौधायनीयम् अनूढा या वाग्दत्ता जीवन्ती अवाग्दत्ता वा तद्विषयकम्। कन्याशब्दस्याक्षतयोनिमात्रवाचकस्य साधारणतया तत्रापि प्रवृत्तेः। तदीयधनमाविषयं पितामहादिदत्तमेव। वक्ष्यते चेदं व्याख्यात्राऽनुपदमेव। न तु शुल्कपरं तत्। अत एव रिक्थपदोक्तिस्तत्र। तस्य दायवाचकत्ववत्सामान्यधनवाचकत्वस्यापि कोशतः सत्त्वेन तत्रापि प्रवृत्तिसम्भवात्। अत एव मातापित्रोरिति मनुना तस्यैकवाक्यता न। तस्या विवाहविशेषविषय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वाद् यावत्स्त्रीधनाविषयत्वाच्च । गौतमस्यापि ऋषिसिद्धार्थस्योक्तत्वेन तदेकवाक्यताऽपि तयोर्न । तस्य शुल्कमात्रविषयत्वस्य स्पष्टत्वाच्च ।

४५। यद्यपि पाणिनीये तदस्मिन्वृद्ध्यायेति सूत्रे "आयादिसाहचर्यात्संज्ञावृद्धेरग्रहणम्, उपदेति टाबन्तम्, उत्तमर्णेन मूलातिरिक्तं ग्राह्यं वृद्धिः, ग्रामादिषु स्वामिग्राह्यो भाग आयः, विक्रेत्रा मूल्यादधिकं ग्राह्यं लाभः, रक्षानिमित्तभृतिरूपो राजभागः शुल्कः, उत्कोच उपदा उपहार इत्यन्ये, शुल्कग्रहणं प्रपञ्चार्थं तस्याप्यायविशेषत्वात्, तथा च शौल्कशालिक इति ठगायस्थानेभ्य इति ठग् भवति" इत्यभियुक्तैर्व्याख्यातम् । तथापि अत्रत्यपरिभाषा भिन्नेति तात्पर्यम् । तथा च व्याख्यातृक्तशुल्कधनं न प्रजामात्रस्य भर्त्रादेश्च, किं तु सोदर्याणां, तदभावे मातुस्तदभावे पितुस्तदभावे तत्प्रत्यासन्नानामिति । एवं तदुक्तबन्धुदत्तमपि न प्रजामात्रस्य मात्रादेश्च, किं तु बन्धूनां भ्रातॄणां, तदभावे भर्त्रादेः ।

बन्धुदत्तं तु बन्धूनामभावे भर्तृगामि तत् ।

इति कातीयादिति बोध्यम् ।

४६। एवं वृद्धकातीयस्य समूलत्वेच तदपि जङ्गमस्थावरान्यसौदायिकधनाविशेषे । अप्रजःस्त्रीधनमित्यादि सर्वविवाहेष्वादावपवादकं, तदभावे तथैव । तत्र चेन भ्रातृपितृव्यादि । एवेन भर्तृकुलव्यवच्छेदः । धनं धनं च । अप्रजायामित्यार्षम् । अत एवान्यगृहीतो ऽप्रजायामतीतायां बान्धवा इति मूलपाठो व्याख्यात्रा त्यक्तः । मानवद्वयेऽपि तथैव बोध्यमिति तदाशयः । तुश्चार्थे तेन तदभावे तथेत्यस्य समुच्चयः । सर्वदा सर्वविवाहेषु । प्रजासत्त्वे तु तस्या एवोक्तरीत्येति बोध्यम् ।

अपुत्रायां मृतायां तु पुत्रिकायां कथञ्चन ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धनं तत् पुत्रिकाभर्ता हरेतैवाविचारयन् ॥

इति मनुस्तु (अ.९।१३५) भर्तुः अपूर्वधनसम्बन्धबोधकः। स च पुत्रिकाप्रकरणस्थः। संवित्कृता पुत्रिका। तदन्वितेन कथं चनेत्यनेन तथा न कृता किं त्वाभिमता तस्या अपि ग्रहणम्। अत एव भ्रातृमतीमिति विशेषणं तत्र सफलमित्युक्तं प्राक्।

अत एव "अपुत्रायां कथं चन पुत्रिकायां मृतायां प्रकरणात्पैतृकरिक्थरूपतद्दीयधनं पितृसत्त्वेऽपि तद्भर्तैवाविचारयन् गृह्णीयात् पुत्रिकायाः पुत्रसमत्वेनानपत्यस्य पत्नीरहितस्य मृतस्य पुत्रस्येव ब्राह्मादिष्वपि पित्रादेर्धनग्रहणप्रसङ्गे तन्निवारणार्थमिदं वचनम्" इति तद्व्याख्यातारः।

प्रेतायां पुत्रिकायां न भर्त्ता द्रव्यमर्हत्यपुत्रायां कुमार्यां मात्रा स्वस्रा वा तद् ग्राह्यमिति पैठीनसिस्तु निर्मूलः। समूलत्वे वा आर्षत्वाविशेषाद्विकल्पोऽस्तु। परं तु तत्रापि मनोः प्रामाण्यातिशयात्तदेवानुष्ठेयं न तादित्यननुष्ठानलक्षणमप्रामाण्यमेव तस्येति दिगिति बोध्यम्।

४७। एतेन अस्यां यो जायते पुत्र इति पुत्रिकाविषयं मानवम्, इयं मे पुत्र इति पुत्रिकाविषयं पैठीनसमिति। एवं भगिनीशुल्कमिति गौतमीये "ऊर्ध्वं मातुः सोदर्याणामभावे मातुरिति व्याख्याय तदुभयाभावे पितुरित्युक्त्वा तत्र बौधायनीयं मानत्वेन संलिख्य रिक्थं शुल्कमिति व्याख्याय पित्राद्यभावे तु भर्तृगाम्येवेत्युक्ते बन्धुदत्तं त्विति कातीयं मानत्वेन संलिख्य बन्धवः पित्रादय" इति उक्तम्। तथा स्त्रीधनविषये इत्थं व्यवस्था-तत्राध्यग्निकृतं तास्वपि कुमार्य एव लभन्ते नोढाः, मातुस्त्विति मनोः। तत्र यौतकं प्राच्योक्तमेव उक्तवसिष्ठात्। पारिणाय्यमित्यस्य स एवार्थः। स्त्रियः कुमार्यः। कुमारीवदप्रतिष्ठिताऽपि। स्त्रीधनमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गौतमात् । स्त्रीधनं पैतृकं कुमारी अभावे ऊढापि कन्यैव लभते न पुत्रः । गुणलोपे तु मुख्यस्येति न्यायाद्, दुहितृपदसामर्थ्याच्च । एवमप्रतिष्ठिताया अभावे प्रतिष्ठिताऽपीति । अन्वाधेयं तु स्त्रीपुंनपुंसकसाधारणप्रजायाः ।

अन्वाधेयं तु यद्दत्तं पत्या प्रीतेन वा पुनः । (अ.९।१९५)

इति मनोरिति ।

यत्तु पत्युः रिक्थत्वेन मात्रा लब्धं तत् पुत्रैर्दुहितृभिश्च समं विभाज्यम् । जनन्यामिति मनोः, भगिन्यः कुमार्यः सममिति शङ्खलिखिताभ्यां, समानमिति देवलाच्च । ऊढास्तु तुर्यांशमात्रं लभन्ते, न समम् । स्त्रीधनमिति बृहस्पतेः । अनूढानां पितृधने इवोढानां मातृधने तथैवेत्युक्तं प्राक् ।

यत्तु—

अप्रत्तायास्तु दुहितुः स्त्रीधनं परिकीर्त्तितम् ।

पुत्रस्तु नैव लभते प्रत्तायां तु समांशभाक् ॥

इति, तत् अप्रत्तासद्भावेऽपि प्रत्तायाश्चतुर्थांशस्मरणात्तदभावे समांशस्य न्यायप्राप्तत्वमित्येवंपरम् ।

भगिन्यो बान्धवैः सार्धं विभजेरन्समं ततः ।

स्त्रीधनस्येति धर्मोऽयं विभागस्तु समः स्मृतः ॥

इति कातीयात् ।

एतेन "भ्रातृभगिन्योः सम्भूयांशहरत्वं नास्ति इतरेतरयोगस्य द्वन्द्वैकशेषाभावादप्रतीतेः" इति परास्तम् । चार्थे द्वन्द्व इत्यनेन तस्य चार्थत्वात् । देवलीये द्वन्द्वश्रवणाच्च । यौतकाभिन्ने सर्वत्र दुहितृदौहित्रीसमवाये तस्या अपि किञ्चिद्देयम् । यास्तासामिति मनोः । मृतमातृकाणां तु तासां "पितृतो भागकल्पना" इति न्यायात् पुत्रदुहित्रादिभिः समवाये समांशभाक्त्वमेव । दुहित्रभावे तु पुत्र एवेति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उभयत्र तदभावे तत्प्रत्यासन्नानां ग्रहणं तु अनन्तरः सपिण्डाद्य इत्यादिमन्वाद्यनुरोधेन पत्न्यादौ पूर्वं क्लृप्तेन न्यायेनोक्तम्। अनन्तर इत्यस्य सामान्यस्य उक्तौरसाद्यनन्तरमुक्त्या तन्मात्रपरत्वे तस्य सामान्यस्य वैयर्थ्यापत्त्याऽनुक्तपत्न्यादिदायपरत्वमिवैतत्परत्वमपि। तत्रानन्तर्यमपि प्रागुक्ततादृशप्रत्यासत्त्यतिशयकृतमेवेति तत्क्रमेणैव तदधिकार इति न कोऽप्यग्रे दोष इति विज्ञानेश्वराशयः।

४८। विशेषवचनानि तु प्रकृतविषयेऽग्रे नोपलभ्यन्ते। पत्न्यादिविषये विद्यमानान्यपि वचनानि तदनुरोधेनैव योजितानि। तस्यैव मुख्यबीजत्वात्। एवं च—

मातृष्वसा मातुलानी पितृव्यस्त्री पितृष्वसा।
श्वश्रूः पूर्वजपत्नी च मातृतुल्याः प्रकीर्तिताः॥
यदाऽऽसामौरसो न स्यात्सुतो दौहित्र एव वा।
तत्सुतो बान्धवस्तासां स्वस्त्रीयाद्याः समाप्नुयुः॥

इति बृहस्पतिरप्यधिकारिमात्रबोधको न क्रमबोधक इति तदनुरोधेनैत्र योज्यः प्रागुक्तरीत्या।

तथा हि। औरसपदेन कन्यापुत्रयोर्ग्रहणम्। तयोः सर्वापवादकत्वात्। सुत इत्यनेन सपत्नीकन्यापुत्रयोर्ग्रहणम्[1]। इदं च दायग्रहणांशे। स्वस्त्रीयो भगिनीसुतः। आद्यपदेन स्वभर्तृभागिनेयदेवरपुत्रस्वभ्रातृपुत्रजामातृदेवराणां ग्रहणम्। यथा संख्यमन्वयः। दौहित्र इत्यनेन दौहित्रीदौहित्रयोर्ग्रहणम्। औरसयोः सपत्नीपुत्रयोश्चाभावे अनयोराधिकारात्। तत्सुत इत्यनेनौरससुतोभयजन्यपौत्रग्रहणं, न तु दौहित्रसुतस्य। पिण्डदानांशे अनधिकारात्। सर्वासामिति मनोः। औरसविशे-

१ सपत्न्याः कन्यापुत्रयोरित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षणत्वं तु न । वैयर्थ्यात् । अन्यथा सपत्नीपुत्रसद्भावेऽपि स्वस्रीयाद्यधिकारापत्तेः । बान्धवशब्देन भ्रातुर्भर्तुर्मातुः पितुरित्यादेर्ग्रहणम् । तदभावे स्वस्रीयादयस्तत्क्रमेणैवेत्यर्थः । एवं—

मातुलो भागिनेयस्य स्वस्रीयो मातुलस्य च ।
श्वशुरस्य गुरोश्चैव सख्युर्मातामहस्य च ॥
एतेषां चैव भार्याभ्यः स्वसुर्मातुः पितुस्तथा ।
श्राद्धदानं तु कर्तव्यमिति वेदविदां स्थितिः ॥

इति वृद्धशातातपीये पिण्डदानांशेऽपि बोध्यम् । पिण्डदत्वं न रिक्थहारित्वव्याप्यमपि तु विपरीतम् । तदप्यौत्सर्गिकमित्यादि हि प्रागेव प्रपञ्चितमिति न विस्मर्तव्यम् ।

४९। एतेन "पुत्राभावे दौहित्रस्तदभावे दौहित्रपुत्रस्तस्याप्यभावे स्वस्रीयाद्या अविशेषेण सर्वधनभाजः। मातृष्वसेति बृहस्पतेः।आद्यशब्देन यस्य मातुलानी स इत्यादि। पूर्वजोऽग्रजः। यद्यप्यत्र पुत्राभावे दौहित्रः श्रूयते तथापि पुत्रदुहितृसद्भावेऽपि दौहित्रीणां किञ्चिद्धनसंबन्धश्रवणात्तदभावे सर्वधनसंबन्धस्याप्रतिबन्धान्मातामह्यवयवाधिक्येन च दौहित्रापेक्षया प्रत्यासन्नत्वाच्च दौहित्र्यभावे दौहित्रो धनभाक् । अत्राप्ययं विशेषः । यत् पितृकुलादागतं तत्स्वस्रीयाद्याः, यत् भर्तृकुलादागतं तद्देवराद्याः, जामाता तूभयमप्यविशेषात्" इति भ्रान्ताद्युक्तम्, एतद्वचनबलान्मनूक्तत्यागेनान्यथा क्लेशेन यदाधिकारप्रतिपादनं प्राच्यानाम्—तथा हि "तदेतेषां पुत्रादीनां भ्रात्रादिभर्तृपर्यन्तानां चाभावे सत्स्वपि श्वशुरभ्रातृश्वशुरादिषु सपिण्डेषु भगिनीपुत्रादीनां धनाधिकारिता अनन्यगतेर्वचनात् स्त्रीणां मातृतुल्यताप्रतिपादनेनामीषां पुत्रत्वज्ञापनेन पिण्डदत्वसूचनस्य दायप्रकरणे धनाधिकारज्ञापनैकप्रयोज्यत्वात्। तत्र स्वस्रीयाद्या इति वचनात्पूर्वपूर्वाभावे सर्वशेषे देवरस्यैवा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धिकारापत्तेर्महाजनविरोध इति वस्तुबलमालम्ब्योच्यते। तत्र त्रयाणामिति अनन्तर इति पूर्वदायभागप्रकरणस्थमनोः, पिण्डदोंऽशेति मूलेन च पिण्डदानेनाधिकारदर्शनात्पुत्रस्यापि सातिशयपिण्डदाने नरकत्राणकारणतया मुख्यत्वेनाधिकारावगतेर्मातुल इत्यादिवृद्धशातातपवचनेनामीषां पिण्डदानप्रतिपादनादयं पिण्डदानविशेषादधिकारक्रमः। आदौ देवरः तद्भर्तृदेयपूर्वपुरुषत्रयपिण्डदातृत्वात्सपिण्डत्वाच्च तद्धनाधिकारी। तदभावे भ्रातृश्वशुरदेवराणां सुतः तद्भर्तृदेयपूर्वपुरुषद्वयपिण्डदातृत्वात्सपिण्डत्वाच्च पितृव्यस्त्रीधनेऽधिकारी। तदभावे त्वसपिण्डोऽपि भगिनीपुत्रः तत्पुत्रदेयपित्रादित्रयपिण्डदानात् मातृष्वसृधने ऽधिकारी। तदभावे स्वभर्तृभागिनेयः, पुत्राद्भर्तुर्दुर्बलवत्त्वात्तत्स्थानपातिनोऽपि तथैव बलाबलस्यापि न्याय्यत्वात्। तद्भर्तृदेयपूर्वपुरुषत्रयपिडदानात्तत्पिण्डदानाच्च मातुलानीधनेऽधिकारी। तदभावे भ्रातृसुतः तत्पितृपितामहयोस्तस्याश्च पिण्डदानात्पितृष्वसृधनेऽधिकारी। तस्याप्यभावे श्वशुरयोः पिण्डदानाज्जामाता श्वश्रूधनेऽधिकारीत्ययं क्रमो ग्राह्यः। स्वस्रीयाद्या इति न क्रमार्थं किं त्वधिकारितामात्रपरम्। षण्णां पुनरेतेषामभावे श्वशुरादेः सपिण्डने तु कृतो धनाधिकारो बोद्धव्यः। न च सपिण्डाभावे सतीदं वचनमिति वाच्यम्। अस्यामधिकारशृङ्खलायां देवरदेवरसुतयोर्भ्रातृश्वशुरस्य तस्यचाधिकारज्ञापनात्। आसन्नतरश्वशुरभ्रातृश्वशुरादेः परित्यागात्,, इति। तच्चापास्तम्। अज्ञानप्रलपितत्वात्, दोषगणस्योक्तत्वाद्, अन्यस्मृतितो मनोः प्रामाण्यातिशयेन प्राबल्यस्यान्यत्र प्रतिपादितत्वाच्चेति मात्सर्यमुत्सार्य विचारणीयमिति दिक्॥ १४९॥

मि० अव. स्त्रीधनप्रसङ्गेन वाग्दत्ताविषये किञ्चिदाह।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या० दत्त्वा कन्यां हरन्दण्ड्यो व्ययं दद्याच्च सोदयम्।

मि० कन्यां वाचा दत्त्वाऽपहरन् द्रव्यानुबन्धाद्यनुसारेण राज्ञा दण्डनीयः। एतच्चापहरणकारणाभावे। सति तु कारणे—

दत्तामपि हरेत्कन्यां श्रेयांश्चेद्वर आव्रजेत्।

इत्यपहाराभ्यनुज्ञानान्न दण्ड्यः। यच्च वाग्दाननिमित्तं वरेण स्वसंबन्धिनां कन्यासंबन्धिनां चोपचारार्थं धनं व्ययीकृतं तत्सर्वं सोदयं सवृद्धिकं कन्यादाता वराय दद्यात्।

मि० अव. अथ कथञ्चिद्वाग्दत्ता संस्कारात्प्राक् म्रियेत तदा किं कर्तव्यमित्यत आह।

या० मृतायां दत्तमादद्यात्परिशोध्योभयव्ययम् ॥१४६॥

मि० यदि वाग्दत्ता मृता तदा यत्पूर्वमङ्गुलीयकादि शुल्कं वा वरेण दत्तं तद् वर आददीत। परिशोध्योभयव्ययम्। उभयोः आत्मनः कन्यादातुश्च यो व्ययस्तं परिशोध्य विगमय्यावशिष्टमाददीत। यत्तु कन्यायै मातामहादिभिर्दत्तं शिरोभूषणादिकं वा क्रमागतं तत् सहोदरा भ्रातरो गृह्णीयुः। रिक्थं मृतायाः कन्याया गृह्णीयुः सोदरास्तदभावे मातुस्तदभावे पितुरिति बौधायनस्मरणात्॥ १४६ ॥

बा. १। प्रकृतासंबद्धत्वादाह *प्रसङ्गेनेति। *किंचित्, अर्धश्लोकोक्तम्। मुख्यदाने ऽपहारस्यैवासंभवादाह * वाचेति। *द्रव्येति। अनुबन्धो दोषोत्पादः। दोष इति यावत्। दोषोत्पादे ऽनुबन्धः स्यादित्यमरात्। द्वंद्वसमासः। आदिना जाति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गुणयोर्ग्रहणम् । अत्रैव विशेषमाहाविरोधाय *एतच्चेति । दण्डनं चेत्यर्थः । चार्थमाह * यच्चेति । * वरेणेति । तत्पित्रादिना वेत्यपि बोध्यम् । एवमग्रेऽपि। स्वं वरः। उपचारो व्यवहारः। व्ययमित्यस्य कर्मप्रत्ययान्तस्यार्थमाह *व्ययीकृतमिति । अत्रैव।

उ. २ । अथेति प्रश्ने । तमेवाह *कथञ्चिदिति । *संस्कारात्, पाणिग्रहणादितः । स्वं च शुल्कं वोढाऽर्हतीति गौतमोक्तेराह * वर इति । किं कृत्वेति शङ्कायामाह * परीति । * उभयोरिति । कन्यादातृप्रतिग्रहीतृतत्पित्रादिभिर्विवाहोद्यतैर्वर्गद्वयस्थैर्विवाहनिमित्तं वाग्दाननिमित्तं वा यद्धनं व्ययीकृतं तत् तस्मात्कन्याधनात् गृहीत्वा ऽवशिष्टं तस्मै दद्यादित्यर्थः । * विगमय्य, परिहृत्य । विगणय्येत्यपपाठः। अविरोधाय विशेषमाह * यत्त्विति । आदिना पितृव्यादिग्रहणम् । * दत्तं, वाग्दानसमये ततः पूर्वं वा प्रीत्या तस्या एव स्वत्वं कृत्वा समर्पितम् । शिर इत्युभयान्वयि । पक्षान्तरमाह *वा क्रमागतमिति । क्रमायातं वेत्यर्थः । *तदभावे इति । सोदराभावे तन्मातुर्भवति तदभावे पितुर्भवतीत्यर्थः ॥ १४६ ॥

मि० अव. मृतप्रजस्त्रीधनं भर्तृगामीत्युक्तम् । इदानीं जीवन्त्याः सप्रजाया अपि स्त्रिया धनग्रहणे कचिद्भर्तुरभ्यनुज्ञामाह ।

या० दुर्भिक्षे धर्मकार्ये च व्याधौ सम्प्रतिरोधके ।
गृहीतं स्त्रीधनं भर्ता न स्त्रियै दातुमर्हति॥१४७॥

मि० दुर्भिक्षे कुटुम्बभरणार्थं, धर्मकार्ये अवश्यकर्तव्ये, व्याधौ, सम्प्रतिरोधके च बन्दिग्रहणनिग्रहादौ द्रव्यान्तररहितः स्त्रीधनं गृह्णन् भर्ता न पुनर्दातुमर्हति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकारान्तरेणापह्नरन्दद्यात् । भर्तृव्यतिरेकेण जीवन्त्याः स्त्रिया धनं केनापि दायादेन न ग्रहीतव्यम्।

(मनु. अ. ८ श्लो. २९)

जीवन्तीनां तु तासां ये तद्धरेयुः स्वबान्धवाः।
ताञ्छिष्याच्चौरदण्डेन धार्मिकः पृथिवीपतिः॥

इति दण्डविधानात्।

तथा, (मनु. अ. ९ श्लो. २००)

पत्यौ जीवति यः स्त्रीभिरलङ्कारो धृतो भवेत्।
न तं भजेरन्दायादा भजमानाः पतन्ति ते॥

इति दोषश्रवणाच्च॥ १४७॥

बा. १।प्रकृतसङ्गतिमाह *मृतेति। *इदानीमिति। प्रसक्तानुप्रसक्त्येति शेषः। अपिना तदन्यसमुच्चयः। *क्वचित्, न तु सर्वत्र। मौलश्चो व्युत्क्रम इत्याह *संप्रतिरोधके चेति। अन्त्यार्थमाह *बन्दीति। तत्पुरुषगर्भद्वंद्वगर्भो बहुव्रीहिः। निग्रहस्ताडनम्। सर्वशेषमाह *द्रव्यान्तरेति। *पुनः, पश्चात्। द्रव्यलाभोत्तरम्। *अर्हतीति। अवश्यदेयमिति नियमो नास्तीत्यर्थः। अन्यथा न देयमित्येव ब्रूयात्। निमित्तविशेषोल्लेखफलमाह * प्रकारान्तरेति। भर्तेत्युक्तेः फलमाह * भर्तृव्यतिरेकेणेति। तस्यैवोक्तनिमित्तेऽप्यभ्यनुज्ञा नान्येषामिति भावः। * जीवन्त्या इति। मृतायास्तूक्त एव प्रकार इति भावः। * तत्, धनम्। * स्वबान्धवा, दायादाः। * शिष्यात्, शिक्षयेत्। नारदोक्तिरियम्। मानवमप्याह * तथेति। तद्वादित्यर्थः। * दायादाः, पुत्रादयः। तस्मिन्मृतेऽपीति भावः। *पतन्ति, पतिता भवन्ति। विष्णुरप्येवम्।

२। एतेन "विभागकाले पुत्रादयस्तं जीवति पत्यौ न भजेरन् किं तु यस्याः सोऽलंकारस्तत्पतिभागत्वेनैव देयो यथा सैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तं परिदध्यान्न तु जीवति पत्यौ यो धृतः स मृतेऽप्यविभाज्य इति। अदृष्टार्थतापत्तेः। एतेन "सर्वथा ऽसावविभाज्य" इत्यपि निरस्तम्। जीवतीति विशेषणान्मृते तस्मिन्नन्येनापि ग्रहणे न दोष "इति भ्रान्तोक्तमपास्तम्॥ १४७॥

मि. अव. आधिवेदनिकं स्त्रीधनमुक्तं, तदाह।

या० अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समम्।
न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्द्धं प्रकल्पयेत्॥१४८॥

मि. यस्या उपरि विवाहः साऽधिविन्ना। सा चासौ स्त्री चेत्यधिविन्नस्त्री तस्यै अधिविन्नस्त्रियै आधिवेदनिकम् आधिवेदनानिमित्तं धनं समं यावदधिवेदनार्थं व्ययीकृतं तावद्दद्यात्। यस्यै श्वशुरेण भर्त्रा वा स्त्रीधनं न दत्तम्। दत्ते पुनः स्त्रीधने आधिवेदनिकद्रव्यस्यार्द्धं दद्यात्। अर्धशब्दश्चात्र समविभागवचनो न भवति। अतश्च यावता तत्पूर्वदत्तमाधिवेदनिकसमं भवति तावद्देयमित्यर्थः॥ १४८॥

बा. १। प्रकृतसंगतिमाह * आधिवेदनिकमिति। * तत्, सविधिप्रकारं तत्स्वरूपम्। अधीत्यादि चतुर्थ्यन्तमेकं पदम्। विन्नमित्यत्र भावे क्तः। अधि उपरि विन्नं वेदनमिति सुप्सुपेति समासः। तदस्ति यस्या इति अर्शआद्यच्। तत्फलितमाह *यस्याइति। *उपरि, योग्यतया सत्त्वे। *विवाहः, ऐच्छिकः। अधिवेदनप्राप्तधनम् आधिवेदनिकम्। तस्य निमित्तमिति ठगाहींय इत्याह * अधीति। बहुव्रीहिः। तादृशविवाहान्तरमेव पूर्वस्या धर्मपत्न्या धनदाने निमित्तमिति भावः। तत्क्रियादित्याशङ्कायामाह *सममिति। तस्य सापेक्षत्वेन प्रकृतत्वादाह *या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वादिति । * व्ययीकृतम्, अलंकरणादिरूपेण । अत्र विशेषबोधकमुत्तरार्द्धमित्याह * यस्या इति । त्वर्थमाह * पुनरिति । साकाङ्क्षत्वेन प्रकृतत्वादेवाह *आधीति। प्रकल्पयेदित्यस्यार्थमाह * दद्यादिति । एतेन प्रकीर्तितमित्यपपाठः सूचितः । नन्वेवं नियतसमत्वासिद्धिः, कदाचिन्न्यूनाधिकभावस्यापि संभवात्। अत आह * अर्धेति । किं त्वंशमात्रपर इति भावः । मौलमर्द्धपदं तु न नपुंसकलिङ्गम्। येन समप्रविभागवाचकं भवेत्, अर्धं समेंऽशके इत्यमरात् । अपि तु पुंलिङ्गम् । अत एवांशमात्रवाचकं तत्। समत्वस्यैव हि अभिमतत्वमिति केचित् ।

२। वस्तुतस्तु अर्ध एकार इत्यादिमहाभाष्यप्रयोगात् अमरे वा पुंसीतिपूर्वान्वयात्, अर्धः अर्धं च समेंऽशके इत्यर्थादित्युक्तलिङ्गस्यापि समांशवाचित्वेन न तत्साधकम् । अपि तु तत्समत्वस्यैव विवक्षितत्वेन तदनुरोधेनात्र तस्यांशमात्रवाचित्वं ग्रामार्ध इत्यादाविव न तु तद्वाचित्वमिति बोध्यम् । तदाह * अतश्च यावतेति । एतावताऽपि स्त्रीधनस्य पित्रादिधनविभागकाले ऽविभाज्यत्वमेवेति न तद्बोधकवचनविरोध इति बोध्यम् ॥ १४८ ॥

मि. अव. एवं विभागमुक्त्वा इदानीं तत्सन्देहे निर्णयहेतूनाह ।

या. विभागनिह्नवे ज्ञातिबन्धुसाक्ष्यभिलेखितैः ।
विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः ॥१४९॥

मि. विभागस्य निह्नवे अपलापे ज्ञातिभिः पितृबन्धुभिः, बन्धुभिः मातुलादिभिः, साक्षिभिः, पूर्वोक्तलक्षणैः, लेख्येन च विभागपत्रेण विभागभावना विभागनिर्णयो ज्ञातव्यः । तथा यौतकैः पृथक्कृतैर्गृह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षेत्रैश्च। पृथक्कृष्यादिकार्यप्रवर्तनं पृथक्पञ्चमहायज्ञादिधर्मानुष्ठानं च—

नारदेन विभागलिङ्गमुक्तम्, (व्यव.१३।३६।३७)

विभागधर्मसन्देहे दायादानां विनिर्णयः।
ज्ञातिभिर्भागलेख्येन पृथक्कार्यप्रवर्तनात्॥
भ्रातॄणामविभक्तानामेको धर्मः प्रवर्तते।
विभागे सति धर्मोऽपि भवेत्तेषां पृथक् पृथक्॥ इति।

तथाऽपराण्यपि विभागलिङ्गानि तेनैवोक्तानि, (३९)

साक्षित्वं प्रातिभाव्यं च दानं ग्रहणमेव च।
विभक्ता भ्रातरः कुर्युर्नाविभक्ताः कथञ्चन॥ इति।

इति दायविभागप्रकरणम्॥ १४९॥

बा. १। महाप्रकरणशेषतया तेन सङ्गतिमाह*एवमिति। विभागसन्देहे सतीत्यर्थः। * अपलापे, विभागानन्तरं कालान्तरे विभागो न जात इत्येवंरूपे अन्यतरेण कृते सति। मूले प्रायो बहुवचनान्तेन द्वन्द्व इत्याह *ज्ञातिभिरित्यादि। तेषां बहूनामेकसाधकत्वात्।*पितृबन्धुभिरिति। इदमुपलक्षणमन्यद्वयस्यापि।

२। वस्तुतस्तु ज्ञातिभिरित्यस्योदासीनैः सजातीयैरित्यर्थः। बन्धुभिरित्यस्य बन्धुत्रयैर्भ्रात्रादिभिश्चेत्यर्थ उचित इति बोध्यम्। अभिलेखितेत्यस्यार्थमाह * लेख्येन चेति। अत्र बहुत्वानुपयोगोऽनिष्टावहं च तत्सत्त्वं प्रत्युत इति भावः। सर्वसमक्षं लिखापितामिति तदर्थः।*तथा, तद्वत्। यु मिश्रणामिश्रणयोरित्यनुशासनानुरोधेन तदर्थमाह *पृथगिति। *गृहेति। बहुवचनान्तद्वन्द्वः। चः समुच्चये। न्यूनतानिरासायाह *पृथगिति। पृथक्कृतगृहक्षेत्रादिसत्त्वेऽपीति भावः। * विभागधर्मेति। दायादानां विभागरूपधर्मसन्देहे सतीत्यर्थः। अग्रे ज्ञेय इति शेषः। * भा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गलेख्येन, विभागपत्रेण । भोगलेख्येनेति पाठे समाहारद्वन्द्वः । *कार्येति । कृष्यादिरूपेत्यर्थः । द्वितीयमाह * भ्रातृणामिति । *तथा, तद्वत् ।*तेनैव, नारदेनैव ।*प्रातीति । प्रतिभूत्वमित्यर्थः । * नाविभक्ता इति । अन्यथा करणे दण्डाद्याम्नानात्तत्समर्थानामेव तदुचितं नान्येषामितीदमपि क्रियमाणं तल्लिङ्गमिति भावः । * कथं चनेति ।

३ । अत एव विभक्तकृत्यमपि तेनैवोक्तम्,(व्यव.१३।४२।४३)

यद्येकजाता बहवः पृथग्धर्माः पृथक्क्रियाः ।
पृथक्कर्मगुणोपेता न ते कार्येषु सङ्गताः ॥
स्वभागानपि दद्युस्ते विक्रीणीयुरथापिवा ।
कुर्युर्यथेष्टं तत्सर्वमीशास्ते स्वधनस्य वै ॥ इति ।

विभक्ता ह्यविभक्ता वेति बृहस्पतेराशयस्तूक्त एव ।

उक्तरीत्याऽर्थनिर्णये पुनर्विभागमाह—

मनुः,

विभागे यत्र सन्देहो दायादानां परस्परम् ।
पुनर्विभागः कर्त्तव्यः पृथक्स्थानास्थितैरपि ॥ इति ।

सकृदंशो निपततीति मानवं तूक्तरीत्या शक्यनिर्णयाभिगामीति केचित् ।वस्तुतस्त्वाद्यं विभागे न्यूनाधिकभावांशे मिथः सन्देहाभिप्रायं, द्वितीयं निर्णयाभिप्रायं, मौलं यथास्थितं जातस्य तस्यैवान्यतरकृतापलापाभिप्रायम् । अत एव तत्र—

बृहस्पतिः,

स्वेच्छाकृतविभागो यः पुनरेव विसंवदेत् ।
स राज्ञांऽशे स्वके स्थाप्यः शासनीयोऽनुबन्धकृत् ॥

इतीति बोध्यम् ॥ १४९ ॥

इति दायविभागः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ सीमाविवादप्रकरणम् ॥ ९ ॥

मि. अव. अधुना सीमाविवादनिर्णय उच्यते ॥

या. सीम्नो विवादे क्षेत्रस्य सामन्ताः स्थविरादयः ।
गोपाः सीमाकृषाणा ये सर्वे च वनगोचराः ॥ १५० ॥
नयेयुरेते सीमानं स्थलाङ्गारतुषद्रुमैः ।
सेतुवल्मीकनिम्नास्थिचैत्याद्यैरुपलक्षिताम् ॥ १५१ ॥

मि. ग्रामद्वयसम्बन्धिनः क्षेत्रस्य सीम्नो विवादे तथैकग्रामान्तर्वर्तिक्षेत्रमर्यादाविवादे च सामन्ताद्यः स्थलाङ्गारादिभिः पूर्वकृतैः सीमालक्षणैरुपलक्षितां चिह्नितां सीमां नयेयुः निश्चिनुयुः । सीमा क्षेत्रादिमर्यादा, सा च चतुर्विधा । जनपदसीमा ग्रामसीमा क्षेत्रसीमा गृहसीमा चेति । सा च यथासम्भवं पञ्चलक्षणा ।

तदुक्तं नारदेन,

ध्वजिनी मात्स्यिनी चैव नैधानी भयवर्जिता ।
राजशासननीता च सीमा पञ्चविधा स्मृता ॥ इति।

ध्वजिनी वृक्षादिलक्षिता । वृक्षादीनां प्रकाशत्वेन ध्वजतुल्यत्वात् । मात्स्यिनी सलिलवती । मत्स्यशब्दस्य स्वाधारजललक्षणत्वात् । नैधानी निखाततुषाङ्गारादिमती । तेषां निखातत्वेन निधानतुल्यत्वात् । भयवर्जिता अर्थिप्रत्यर्थिपरस्परसम्प्रतिपत्तिनिर्मिता । राजशासननीता ज्ञातृचिह्नाभावे राजेच्छया निर्मिता।एवम्भूतायां बोढा विवादः सम्भवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथाह कात्यायनः,

आधिक्यं न्यूनता चांशे अस्तिनास्तित्वमेव च।
अभोगभुक्तिः सीमा च षड् भूवादस्य हेतवः॥ इति।

तथाहि। ममात्र पञ्चनिवर्तनाया भूमेराधिका भूरस्तीति केनाचिदुक्ते, पञ्चनिवर्तनैव नाधिकेत्याधिक्ये विवादः। पञ्चनिवर्तना मदीया भूमिरित्युक्ते, न, ततो न्यूनैवेति न्यूनतायाम्। पञ्चनिवर्तनो ममांश इत्युक्ते अंश एव नास्तीत्यस्तिनास्तित्वविवादः। मदीया भूः प्रागविद्यमानभोगैव भुज्यते इत्युक्ते, न, सन्तता चिरन्तन्येव मे भुक्तिरित्यभोगभुक्तौ विवादः। इयं मर्यादेयं वेति सीमाविवाद इति षट्प्रकार एव विवादः सम्भवति। षट्प्रकारेऽपि भूविवादे श्रुत्यर्थाभ्यां सीमाया अपि निर्णीयमानत्वात् सीमानिर्णयप्रकरणे तस्यान्तर्भावः। समन्ताद्भवाः सामन्ताः, चतसृषु दिक्ष्वनन्तरग्रामादयः। ते च प्रतिसीमं व्यवस्थिताः।

ग्रामो ग्रामस्य सामन्तः क्षेत्रं क्षेत्रस्य कीर्तितम्।
गृहं गृहस्य निर्दिष्टं समन्तात्परिरभ्य हि॥

इति कात्यायनवचनात्। ग्रामादिशब्देन तत्स्थाः पुरुषा लक्ष्यन्ते। ग्रामः पलायित इति यथा। सामन्तग्रहणं च तत्संसक्ताद्युपलक्षणार्थम्।

उक्तञ्च कात्यायनेन,

संसक्तकास्तु सामन्तास्तत्संसक्तास्तथोत्तराः।
संसक्तसक्तसंसक्ताः पद्माकाराः प्रकीर्तिताः॥इति।

स्थाविरा वृद्धाः। आदिग्रहणेन मौलोद्धृतयोर्ग्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हणम्। वृद्धादिलक्षणं च—
तेनैवोक्तम्,
निष्पाद्यमानं यैर्दृष्टं तत्कार्यं तद्गुणान्वितैः।
वृद्धा वा यदि वाऽवृद्धास्ते तु वृद्धाः प्रकीर्तिताः॥
ये तत्र पूर्वं सामन्ताः पश्चाद्देशान्तरं गताः।
तन्मूलत्वात्तु ते मौला ऋषिभिः परिकीर्तिताः॥
उपश्रवणसम्भोगकार्याख्यानोपचिह्निताः।
उद्धरन्ति पुनर्यस्मादुद्धृतास्ते ततः स्मृताः॥ इति।

गोपाः गोचारकाः। सीमाकृषाणाः सीमासंनिहितक्षेत्रकर्षकाः। सर्वे च वनगोचराः। वनचारिणो व्याधादयः।

ते च मनुनोक्ताः, (अ. ८ श्लो. २६०)
व्याधान् शाकुनिकान् गोपान् कैवर्तान्मूलखानकान्।
व्यालग्राहानुञ्छवृत्तीनन्यांश्च वनगोचरान्॥ इति।

स्थलम् उन्नतो भूप्रदेशः। अङ्गारोऽग्नेरुच्छिष्टम्। तुषा धान्यत्वचः। द्रुमा न्यग्रोधादयः। सेतुर्जलप्रवाहबन्धः। चैत्यं पाषाणादिबन्धः। आदिशब्देन वेणुवालुकादीनां ग्रहणम्।

एतानि च प्रकाशाप्रकाशभेदेन द्विप्रकाराणि।
तथा च मनुः, (अ. ८ श्लो. २४६। २४७। २४८)
सीमावृक्षांस्तु कुर्वीत न्यग्रोधाश्वत्थकिंशुकान्।
शाल्मलीशालतालांश्च क्षीरिणश्चैव पादपान्॥
गुल्मान्वेणूंश्च विविधान् शमीवल्लीस्थलानि च।
शरान्कुब्जकगुल्मांश्च यथा सीमा न नश्यति॥
तडागान्युदपानानि वाप्यः प्रस्रवणानि च।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सीमासन्धिषु कार्याणि देवतायतनानि च ॥
इति प्रकाशरूपाणि ।
[अ. ८ श्लो. २४९ । २५० । २५१ । २५२]
उपच्छन्नानि चान्यानि सीमालिङ्गानि कारयेत् ।
सीमाज्ञाने नृणां वीक्ष्य नित्यं लोके विपर्ययम् ॥
अश्मनोऽस्थीनि गोवालांस्तुषान् भस्मकपालिकाः ।
करीषमिष्टकाङ्गारशर्करावालुकास्तथा ॥
यानि चैवंप्रकाराणि कालाद् भूमिर्न भक्षयेत् ।
तानि संधिषु सीमायामप्रकाशानि कारयेत् ॥
एतैर्लिङ्गैर्नयेत्सीमां राजा विवदमानयोः ।
इति प्रच्छन्नालिङ्गानि ।

एतैः प्रकाशाप्रकाशरूपैर्लिङ्गैः सामन्तादिप्रदर्शितैः सीमां प्रति विवदमानयोः सीमानिर्णयं कुर्याद्राजा ॥ १५० ॥ १५१ ॥

बा. १। दायान्तर्गतस्थावरान्तर्गतगृहक्षेत्रप्रसङ्गेनाह *अधुनेति। मनूक्तक्रमस्तु नैवाभिमतोऽस्येति भावः।एवमग्रेऽपि बोध्यम्।*विवादे सतीति शेषः सीमशब्दो नान्तः डाबन्तश्च। स्त्रीलिङ्गौ द्वौ। ग्रामद्वयसंबन्धिक्षेत्रसीम्न इति पाठः। संबन्धित्वं क्षेत्रविशेषणम् । व्यस्तपाठेऽग्रेपि व्यस्त एव पाठः । युक्तं चैतत्। मूले तथैव पाठात्। विनिगमकाभावादाह *तथैकेति। तद्वदित्यर्थः। एतेषामर्थान् वक्तुमादौ सर्वविधसीमानिर्णायकत्वमेतेषामिति सिद्धान्तायाकाङ्क्षितं विशेषं मूलानुक्तमाह *सीमा क्षेत्रादीति।*सा चेति । विषयभेदादिति भावः। जनपदो ग्रामसमूहो देशः।*सा च, चतुर्विधाऽपि। *यथासंभवमिति। संभवमनतिक्रम्येत्यर्थः । न नियमेन वक्ष्यमाणपञ्चलक्षणैरुपेतैव सर्वा सीमा, अपितु क्वचिदेकेन क्वचित् द्वाभ्यां क्वचिद्बहुभिरिति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्र यथा प्राप्तिस्तत्र तथैवेति भावः। * वृक्षादिलक्षिता, वृक्षादिकृता। गौण्या योगार्थमप्याह * वृक्षादीनामिति। अत इनिठनाविति इनिः सर्वत्र। अत्र शुद्धतया तमप्याह *मत्स्येति। तद्विना तदस्थितेः। स्वाधारेत्यनेन तन्मूलसंबन्धो दर्शितः। निधीयते इति निधानं तदेव नैधानं स्वार्थे ऽण्। तदर्थमाह *निखातेति। अत्रापि गौणी वृत्तिरित्याह *तेषामिति। तुषाङ्गारादीनामित्यर्थः। * निखातत्वेन, खनित्वाऽन्तर्गुप्ततया स्थापितत्वेन। उक्तहेतोरेवाह *निधानेति। भयवर्जितेत्यस्यार्थमाह*अर्थीति। वादिप्रतिवादिनोः सत्यसंधत्वेन मिथोऽत्यन्तं विश्वस्तत्वेन इयं मदीया भूः इयं मदीयेति स्वस्वचित्तानुसंधानपुरःसरं मिथः संमत्या वाङ्मात्रादिनिर्मितेत्यर्थः। अत्रार्थित्वं प्रत्यर्थित्वं च प्रातिवेश्यत्वेन तद्योग्यत्वाशयेन न मत्सरग्रस्तत्वेनेति ज्ञेयम्। * ज्ञातृचिह्नेति। ज्ञातारश्च चिह्नानि च तेषामभावे इत्यर्थः। ज्ञातारः साक्षिसामन्तादयः। चिह्नानि वृक्षादीनि।

२। व्यासेन तु अन्यथा भेदानुक्त्वा विवृताः। तद्यथा,

निम्नोन्नता च ध्वजिनी नैधानी राजकारिता।
स्थिरा पञ्चविधा सीमा मत्स्यिनी तु चला स्मृता॥
ग्रामयोरुभयोर्यत्र गर्त्तः सीमाप्रवर्तकः।
निम्नोपलक्षिता सा तु शास्त्रविद्भिरुदाहृता॥
शरकुञ्जकवल्मीकान्यत्र देवगृहाणि च।
अश्मकूटाश्च दृश्यन्ते ज्ञेया सा तु समुन्नता॥
ग्रामयोरुभयोः सीम्नि वृक्षा यत्र समुन्नताः।
समुच्छ्रिता ध्वजाकारा ध्वजिनी सा प्रकीर्तिता॥
इष्टकाङ्गारसिकताः शर्करास्थिकपालिकाः।
निहिता यत्र दृश्यन्ते नैधानी सा प्रकीर्तिता॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तुषाङ्गारकपालैस्तु कुम्भैरायतनैस्तथा ।
सीमा प्रतिचिता कार्या नैधानी सा निगद्यते ॥
साक्ष्यभावे द्वयोर्यत्र प्रभुणा परिकीर्तिता ।
सामन्तानुमता सीमा सा ज्ञेया राजकारिता ॥
स्वच्छन्दगा बहुजला झषकूर्मसमन्विता ।
नित्यप्रवाहिणी यत्र सा सीमा मात्स्यिनी मता ॥ इति ।

३। * एवमिति। उक्तप्रकारेण यथासंभवं पञ्चलक्षणलक्षितायां भूम्यामित्यर्थः। न्यूनताचांशे इति पाठः। उक्तभूविवादे षट्प्रकारत्वं कातीयव्याख्यानेन प्रदर्शयन्नत्रादौ प्रथमप्रकारमाह * ममात्रेति। प्रदेशे इत्यर्थः। निवर्त्तनं भूपरिमाणमादावुक्तम्। द्वितीयमाह * पञ्चनिवर्तनेति। नेत्यग्रे किं त्विति शेषः। एवमग्रेऽपि। विवाद इत्यस्यानुषङ्गः। अंश इत्युत्तरान्वयीति तृतीयं तुर्यं चाह *पञ्चनिवर्तन इति। अत्र तथोक्ते अंशोऽस्ति पञ्चनिवर्तन इत्येतन्नास्तीति तृतीयपक्षं व्याख्यातृबुद्धिपरीक्षार्थं स्फुटमनुक्त्वाऽग्रिमं पक्षमेव व्यक्तीकरोति * अंश एव नास्तीति। अत एव संभूयोपसंहरति * अस्तिनास्तित्वेति। पञ्चममाह * मदीयेति। संततेत्यस्यैव व्याख्या *चिरन्तन्येवेति। तथा चाभोगभुक्तिरित्यस्य प्रागविद्यमानभोगकस्य क्षेत्रादेर्भुक्तिरित्यर्थः। षष्ठमाह * इयं मर्यादेयं वेतीति।

४। यद्वा पञ्चनिवर्त्तनो ममांश इत्यत्रैक एव प्रकारः। मदीया भूरिति तुर्यः। सीमाशब्देनोभयम्। तत्र पञ्चम इयं मर्यादेयं वेति। इयं सीमेयं वेति षष्ठः। अनेनैवाशयेन तथा सीमाविवाद इत्युक्तं मानवे। मर्यादायाः सीम्नश्च भेदं दर्शयिष्यति मर्यादायाः प्रभेदे त्वित्यत्र। तथा चात्र भेदे पूर्वत्रैक्यं तत्र भेदे सीमा-

---

१ कात्यायनवाक्यस्थमिति शेषः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मर्यादयोरेकत्वेन व्यवहार इति बोध्यम्।

५। यद्वा आधिक्यं न्यूनत्वम् अस्तित्वं नास्तित्वम् अभोगभुक्तिः सीमा चेत्यमी षट् हेतवः। क्वचिद्व्यस्ताः क्वचिन्मिलिता इति। एवमुक्ताशयगर्भितमुपसंहरति * इति षट्प्रकार एवेति।

नन्वेवं प्रकरणासंगतिरत आह * षडिति। * श्रुत्यर्थाभ्यामिति। यत्र साक्षात्सीमाविवादस्तत्र श्रुत्या, अन्यत्रार्थेनेति विवेकः। अपिना भूसमुच्चयः। * तस्य, षड्विधभूवादस्य।

६। अथ मौलं सामन्ता इत्यादि व्याचष्टे * समन्तादित्यादिना। सामन्तशब्दः पृषोदरादिः। ननु तत्रापि अन्यपार्श्ववर्तिनोऽन्यसीमानिर्णायकत्वं कथमत आह * तेचेति। आदिसंग्राह्यं प्रकटयन् अत्र मानमाह * ग्रामस्येति। ग्रामजातो ग्रामजनस्य सामन्त इत्यर्थः। एवं क्षेत्रादावपि। सामन्त इत्यस्याग्रे उभयत्रानुषङ्गः। तत्र हेतुमाह * समन्तादिति। * हि, यतः। समंतात्परिरभ्य संबध्य व्यवस्थिता इत्यर्थः। यथाश्रुतेऽनुपपत्तेराह * ग्रामादीति। आदिना क्षेत्रादिपरिग्रहः। * तत्स्था इति। ते च तत्स्वामिनोऽन्ये वा। न्यूनतां निराचष्टे * सामन्तेति। तस्यापीत्यर्थः। अत्रादिसंगृहीतान् दर्शयन्नुक्तार्थे संमतिमाह * उक्तं चेति। निकटवर्तिनः संसक्तकाः सामन्ता इति। * तथा, तद्वत्। तत्संसक्तास्तदनन्तरास्थिता उत्तरा इति, संसक्तसक्तसंसक्ताः तदनन्तरस्थिताः पद्माकारा इति च प्रकीर्तिता इत्यर्थः। सामन्तादयस्त्रयोऽपि संज्ञाद्वयभाज इति यावत्। अत एव न सर्वनामसंज्ञाः।

७। * आदीति। स्थविरादय इत्यादीत्यर्थः। वृद्धत्वं पारिभाषिकमित्याह *वृद्धादीति। * तेनैव, कात्यायनेनैव। *तत्कार्यमिति। सीमानिर्णयादिरूपं कार्यं सीमानिर्णयादिविषयकानि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुणमतित्वरूपगुणयुक्तैर्निष्पाद्यमानं यैर्दृष्टं ते इत्याद्यर्थः। यदि वाऽवृद्धा इत्यत्राकारप्रश्लेषः। *तत्र, विषये। *तन्मूलत्वात्, सामन्तत्वस्य पूर्वस्थितत्वात्। *उपेति। अत्रेयं स्थितिरिति सभ्येभ्यः श्रवणमुपश्रवणम्। उपश्रवणं च संभोगकार्यं च तयोराख्यानं तेनोपलक्षिता इत्यर्थः। सीम्नि कर्षणासंभवादाह * सीमासंनिहितेति।

* व्याधानिति।

इमानप्यनुयुञ्जीत पुरुषान्वनगोचरान्।

इत्यस्य पूर्वशेषः। व्याधा लुब्धकाः। शाकुनिकाः पक्षिवधजीविनः। कैवर्तास्तटादिखननवृत्तयः। मूलखानकाः वृक्षादिमूलोत्पाटनजीविनः। व्यालग्राहाः सर्पग्राहिण आहितुण्डिकाः। उञ्छवृत्तयः।

उञ्छः कणश आदानं कणिशाद्यर्जनं शिलम्। इति यादवः।

अन्ये च वनचारिणः फलपुष्पाद्यर्थमरण्यचारिणः।

८। अथ स्थलाङ्गारादि व्याचष्टे * स्थलमित्यादि। निम्नभूप्रदेशस्य निम्नपदेन वक्ष्यमाणत्वादाह *उन्नत इति। *अङ्गारेच्छिष्टं, कोलसा इति माहाराष्ट्रभाषया प्रसिद्धम्। द्रुमाणामुक्तत्वादाह * पाषाणादीति। चत्वर इत्यर्थः। चैत्यमायतनं तुल्ये इत्यमरः। विशेषमाह * एतानि चेति। उक्तलक्षणानीत्यर्थः। * सीमावृक्षानिति। तत्प्रकाशकवृक्षानेतान् तथा कुर्वीत यथा सीमेत्यर्थः। अत्रोभयत्र द्वन्द्वोत्तरपदको द्वन्द्वः।

पिच्छिला पूरणी मोचा स्थिरायुः शाल्मलिर्द्वयोः।

अनोकहः कुटः शालः इत्यमरः।

भागवते पञ्चमे तु भेदा उक्ताः,

---

१ कांयला इति मध्यदेशभाषया प्रसिद्धम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वनस्पत्योषधिलतात्वक्सारा वीरुधो द्रुमाः। इति।

पुष्पं विना फलतीति वनस्पतिर्वटौदुम्बरादिः। फलपाकान्ता ओषधयो गोधूमादिधान्यानि। आश्रयेणारोहति सा लता। ताम्बूलादिवल्ली तु व्रततिः। लतेति तु सामान्यम्। त्वक्सारो वंशादिः। विनाऽऽश्रयेणारोहन्तीति वीरुधो लताविशेषाः। समयेन फलन्तीति द्रुमा आम्रादय इति तदर्थः। गुल्मा अप्रकाण्डस्तम्बाः। अप्रकाण्डे स्तम्बगुल्मावित्यमरः। तृणजङ्गा वा। स्थलं कृत्रिमोन्नतभूभागः। कुब्जकगुल्मांश्चेतिपाठे गुल्मांशे पौनरुक्त्यमिति न स पाठः। किन्तु कुप्यकगुल्मांश्चेति। तत्र कुप्यसम्बन्धिनो गुल्माः कुप्यकगुल्माः। कुप्यमेव कुप्यकं स्वार्थे कन्। सुवर्णरजतभिन्नं ताम्रादि कुप्यम्।

हेमरूप्ये कृताकृते। ताभ्यां यदन्यत्तत्कुप्यमित्यमरात्।

कुप्यकस्य मलापकर्षणवर्णोत्कर्षमिथःसंश्लेषादिषूपयोगित्वात्तत्सम्बन्धित्वम्। अत एवाधिकोपयोगित्वेन गुल्मेत्यस्य पृथक् ग्रहणमिति भेदः। एवं तु सोऽपि पाठः कथञ्चित्सुयोजः। तत्रैव पाठे प्रचुरोपयोगत्वेनादरार्थं पृथक् निर्दिष्टा इति तद्व्याख्यातारः।

तथेति व्याख्यातम्। यद्वा तथा कृते सति सीमा न नश्यतीत्यर्थः। तडागशब्दो ऽर्धर्चादिः। उदपानानि कूपाः। कूप उदपानं तु पुंसि वेत्यमरः। वाप्यः पाषाणादिबद्धा दीर्घिकाः। वापी तु दीर्घिकेत्यमरः। प्रस्रवणानि निर्झरादयः। * उपच्छन्नानि, गुप्तसदृशानि। सीमाया ज्ञाने। * नित्यं, सर्वदा। * विपर्ययं, वैपरीत्यम्। वीक्ष्येति पूर्वान्वयि। अन्यस्य पुनः करणे हेतुरनेन सूचितः। तान्येवाह * अश्मन इत्यादि। आनन्त्याद्विरमन्नन्यान्यपि सू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चयन्नुपसंहरति * यानीति । उक्तसदृशान्यन्यानीत्यर्थः । सीमायां बोधनीयायां सन्धिषु तत्सान्धिषु नयेत् निश्चयेन प्रतिपादयेत् एतैरिति ।

९। मनुमात्रार्थमाह * एतैरिति । उभयोपसंहारोऽयमित्याह * प्रकाशाप्रकाशेति । सीमामित्यस्योभयत्रान्वय इत्याह * सीमां प्रतीति । द्वितीयस्य फलितमाह * सीमानिर्णयमिति । पूर्वभुक्त्या तु सततमुदकस्यागमनेन चेत्यस्य शेषो बोध्यः । अविच्छिन्नया भुक्त्या न तु त्रिपुरुषादिकया । तस्या "आधिः सीमा" इति पर्युदस्तत्वात् । ग्रामद्वयसन्धिस्थनद्यादिप्रवाहेण चेति तदर्थः ॥ १५० ॥ १५१ ॥

मि० अव. यदा पुनश्चिह्नानि न सन्ति, विद्यमानानि वा लिङ्गालिङ्गतया संदिग्धानि, तदा निर्णयोपायमाह।

या० सामन्ता वा समग्रामाश्चत्वारोऽष्टौ दशापि वा ।
रक्तस्रग्वसनाः सीमां नयेयुः क्षितिधारिणः ॥ १५२॥

मि० सामन्ताः पूर्वोक्तलक्षणाः, समग्रामाश्चत्वारोऽष्टौ दश वेत्येवं समसंख्याः प्रत्यासन्नग्रामीणाः, रक्तस्रग्विणो रक्ताम्बरधरा मूर्धारोपितक्षितिखण्डाः सीमानं नयेयुः प्रदर्शयेयुः । सामन्ता वेति विकल्पाभिधानं स्मृत्यन्तरोक्तसाक्ष्यभिप्रायम् ।

यथाह मनुः, (अ. ८ श्लो. २५३)

साक्षिप्रत्यय एव स्यात्सीमावादाविनिर्णयः । इति।

तत्र च साक्षिणां निर्णेतृत्वं मुख्यं, तदभावे सामन्तानाम् ।

तदुक्तम्, (मनुः अ. ८ श्लो. २५८)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साक्ष्यभावे तु चत्वारो ग्रामाः सीमान्तवासिनः।
सीमाविनिर्णयं कुर्युः प्रयता राजसन्निधौ॥ इति।

तदभावे तत्संसक्तादीनां निर्णेतृत्वम्।

यथाह कात्यायनः,

स्वार्थसिद्धौ प्रदुष्टेषु सामन्तेष्वर्थगौरवात्।
तत्संसक्तैस्तु कर्तव्य उद्धारो नात्र संशयः॥
संसक्तसक्तदोषे तु तत्संसक्ताः प्रकीर्तिताः।
कर्तव्या न प्रदुष्टास्तु राज्ञा धर्मं विजानता॥ इति।

सामन्ताद्यभावे मौलादयो ग्राह्याः।

तेषामभावे सामन्ता मौलवृद्धोद्धृतादयः।
स्थावरे षट्प्रकारेऽपि कार्या नात्र विचारणा॥

इति कात्यायनेन क्रमविधानात्।

एते च सामन्तादयः संख्यागुणातिरेकेण भवन्ति।

सामन्ताः साधनं पूर्वं निर्दोषाः स्युर्गुणान्विताः।
द्विगुणास्तूत्तरा ज्ञेयास्ततोऽन्ये त्रिगुणा मताः॥

इति स्मरणात्। ते च साक्षिणः सामन्तादयश्च स्वैः स्वैः शपथैः शापिताः सन्तः सीमां नयेयुः।

(अ० ८ श्लो० २५६)

शिरोभिस्ते गृहीत्वोर्वीं स्रग्विणो रक्तवाससः।
सुकृतैः शापिताः स्वैः स्वैर्नयेयुस्ते समञ्जसम्॥

इति मनुस्मरणात्। नयेयुरिति बहुवचनं द्वयोर्निरासार्थं नैकस्य। (व्यव. ११।१०)

एकश्चेदुन्नयेत्सीमां सोपवासः समुन्नयेत्।
रक्तमाल्याम्बरधरो भूमिमादाय मूर्द्धनि॥

इति नारदेनैकस्याभ्यनुज्ञानात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योऽयम्— (ना. व्यव. ११ । ९)

नैकः समुन्नयेत्सीमां नरः प्रत्ययवानपि ।
गुरुत्वादस्य कार्यस्य क्रियैषा बहुषु स्थिता ॥

इत्येकस्य निषेधः, स उभयानुमतधर्मविद्यतिरिक्तविषय इत्यविरोधः ।

स्थलादिचिह्नाभावेऽपि साक्षिसामन्तादीनां सीमाज्ञाने उपायविशेषो—

नारदेनोक्तः, (व्यव. ११ । ६)

निम्नगापहृतोत्सृष्टनष्टचिह्नासु भूमिषु ।
तत्प्रदेशानुमानाच्च प्रमाणाद्भोगदर्शनात् ॥ इति ।

निम्नगया नद्या अपहृतेनापहरणेनोत्सृष्टानि स्वस्थानात्प्रच्युतानि नष्टानि वा लिङ्गानि यासु मर्यादाभूमिषु । तत्र तत्प्रदेशानुमानादुत्सृष्टनष्टचिह्नानां प्राचीनदेशानुमानात्, ग्रामादारभ्य सहस्रदण्डपरिमितं क्षेत्रमस्य ग्रामस्य पश्चिमे भागे इत्येवंविधात्प्रमाणाद्वा, प्रत्यर्थिसमक्षमविप्रतिपन्नाया अस्मार्तकालोपलक्षितभुक्तेर्वा निश्चिनुयुः ।

बृहस्पतिना चात्र विशेषो दर्शितः,

आगमं च प्रमाणं च भोगकालं च नाम च ।
भूभागलक्षणं चैव ये विदुस्तेऽत्र साक्षिणः ॥ इति ।

एते च साक्षिसामन्तादयः शपथैः श्राविताः सन्तः कुलादिसमक्षं राज्ञा प्रष्टव्याः ।

यथाह मनुः, [अ. ८ श्लो. २५४]

ग्रामेयककुलानां तु समक्षं सीम्नि साक्षिणः ।
प्रष्टव्याः सीमलिङ्गानि तयोश्चैव विवादिनोः ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ते च पृष्टाः साक्ष्यादयः ऐकमत्येन समस्ताः सीम्नि निर्णयं ब्रूयुः । तैर्निर्णीतां सीमानं तत्प्रदर्शितसकललिङ्गयुक्तां साक्ष्यादिनामान्वितां चाविस्मरणार्थं पत्रे समारोपयेत् ।

उक्तञ्च मनुना, (अ. ८ श्लो. २६१)

ते पृष्टास्तु यथा ब्रूयुः समस्ताः सीम्नि निर्णयम् ।
निबध्नीयात्तथा सीमां सर्वांस्तांश्चैव नामतः ॥ इति ।

एतेषां च साक्षिसामन्तप्रभृतीनां सीमाचङ्क्रमणदिनादारभ्य यावत्त्रिपक्षं राजदैविकं व्यसनं चेन्नोत्पद्यते तदा तत्प्रदर्शनात्सीमानिर्णयः । अयं च राजदैविकव्यसनावधिः—

कात्यायनेनोक्तः,

सीमाचङ्क्रमणे कोशे पादस्पर्शे तथैव च ।
त्रिपञ्चपक्षसप्ताहं दैवराजिकमिष्यते ॥ इति॥१५२॥

बा. १। अथाग्रिमसङ्गतिमाह * यदापुनरिति । यदा त्वित्यर्थः । सर्वथा ऽसत्ताया विरुद्धत्वादाह * विद्यमानानीति । सन्देहबीजं कोटिद्वयमाह * लिङ्गालिङ्गेति । समग्रामा इति सामन्तविशेषणं न पृथगित्याह * प्रत्यासन्नेति । सक्ता इत्यर्थः । चत्वार इत्यादि दिक्प्रदर्शनं न परिगणनम् । अत एव अपिः । तेन तादृशबहूपादानात्तादृशा एव समुच्चीयन्ते वाशब्दो विकल्पे इत्याह .* इत्येवामिति । उक्तप्रकारेण । * समसंख्याः, न तु विषमसंख्या नाप्येते एवेत्यर्थः । रक्तत्वमुभयविशेषणमित्याह * रक्तस्रगिति । नीलरूपवदितिवत्प्रयोगद्वयम् । मूलं तु सम्यगेव । क्षितिधारिणं इत्यस्यार्थमाह * मूर्द्धेति । क्षितिशब्दो विशेषपरः । धारणमपि स्थलविशेषे एव व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्ष्यमाणमनोरिति भावः। सीमामित्यस्य व्याख्या * सीमानमिति। एवं सति वाशब्दासङ्गतिं निराचष्टे * सामन्ता वेतीति। * साक्षिप्रत्यय इति।

यदि संशय एव स्याल्लिङ्गानामपि दर्शने। (मनु.८।२५३)

इति अस्य पूर्वशेषः। एवोऽप्यर्थे। तत्र क्रममाह * तत्रेति। तयोर्मध्ये इत्यर्थः। * तदुक्तमिति। मनुनैवेति शेषः। * चत्वार इति। एतदादिसमसंख्योपलक्षणम्। प्रयता इत्यनेनाव्यवस्थितानां दुष्टानां तत्त्वं निरस्तम्। अत एव प्रदुष्टेषु न प्रदुष्टा इति कातीये उक्तम्। * स्वार्थेति। तद्विषये ऽर्थगौरवात्तल्लोभात् दोषयुक्तेषु सामन्तेषु सत्स्वित्यर्थः। तात्पर्यार्थमुपसंहरति * कर्त्तव्या इति। * सामन्ताद्यभावे इति। आदिना तत्संसक्तादिग्रहणम्। अनेन— (अ. ८। २५९)

सामन्तानामभावे तु मौलानां सीमसाक्षिणाम्।

इति मानवे सामन्तशब्दस्त्रितयपर इति सूचितम्। अत एवाविरोधः। एवमग्रिमकातीयेऽपि। * तेषां, साक्षिणाम्। * सामन्ताः, संसक्तादयस्त्रयः। * मौलेति। पूर्वपूर्वाभावे परः परः। एवं च मूलं न क्रमपरमिति भावः।

२। विशेषान्तरमाह * एतेचेति। संसक्तादयस्त्रय इत्यर्थः। संख्या च गुणाश्च ताभ्यामाधिक्येन भवन्तीत्यर्थः। अत्र मानं कातीयमेवाह * सामन्ता इति। पूर्वं साधनं सामन्ता निर्दोषाः स्युः। उत्तरास्तु गुणान्विता द्विगुणाश्च। तृतीया अपि गुणान्वितास्त्रिगुणाश्चेत्यर्थः। द्वैगुण्यादि च प्रागुक्तचतुष्ट्वादितो बोध्यम्।

३। विशेषान्तरमाह * ते चेति। स्मृत्यन्तरोक्ताश्चेत्यर्थः। * स्वैः स्वैरिति। यज्जातीयो यस्तदीयसुकृतैरित्यर्थः। * उर्वी, त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्खण्डम्। * तां, सीमाम्। समञ्जसमिति क्रियाविशेषणम्। नयेयुरिति बहुवचनादेकस्य द्वयोश्च तन्निर्णेतृत्वं न स्यादत आह * नयेयुरितीति। अत एव मूलादौ चत्वार इत्यादौ चोक्तम्। एवं च तत्रापि तदेकवाक्यतया समा एव ग्राह्या न विषमा इत्यर्थः। * भूमिं, तत्खण्डम्।

४। अव्यवहितैतत्प्राग्वर्तिनारदविरोधमेव तस्य परिहरति * यो ऽयमिति। प्रत्ययो विश्वासः। * अस्य, सीमानिर्णयरूपस्य। * उभयेति। अर्थिप्रत्यर्थीत्यर्थः।

अत एव बृहस्पतिरपि,

ज्ञातृचिह्नविनाशे तु एकोऽप्युभयसम्मतः।
रक्तमाल्याम्बरधरो मृदमादाय मूर्द्धनि॥
सत्यव्रतः सोपवासः सीमां सन्दर्शयेन्नरः। इति।

५। विशेषान्तरमाह * स्थलादीति। * साक्षिसामन्तादीनां, तेषामेव न तु अन्येषाम्। नारदीयं व्याचिख्यासुरादौ सान्दिग्धतया समासपूर्वकं पदार्थमाह * निम्नगयेति। भावे क्त इत्याह * अपहरणेनेति। निम्नगयेत्यस्योत्सृष्टादौ कर्तृत्वेनान्वयः। अत एव नलोकेति निषेधात्तत्र षष्ठी न कृता। अपहरणस्य तत्र करणत्वेनान्वयः। उत्सृष्टानीति पाठः। अत एव तथार्थमाह * स्वेति। कल्पतरौ तु उत्सृष्टेति पाठो धृतः। अर्थः स एव। यौगपद्यासम्भवादाह। * नष्टानि वेति। फलितार्थोऽयम्। समासस्तु द्वन्द्वगर्भो बोध्यः। भूमिपदं प्रकरणाद्विशेषपरमित्याह *मर्यादेति। अत्र वाक्ये उपायत्रयम् उक्तम्। तत्राद्यस्वरूपं विविच्याह *तत्रेति। तेषां त्रयाणां मध्ये इत्यर्थः। सत्पदेनोत्सृष्टादिचिह्नपरामर्शस्तदाह * उत्सृष्टेति। प्रार्थमाह * प्राचीनेति। द्वितीयस्वरूपमाह * ग्रामादिति। दण्डः परिमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णाविशेषः प्रागुक्तः। प्रदेशानुमानाच्चेति चो वार्थे उभयत्रान्वयीत्याह * प्रमाणाद्वेति। तृतीयस्वरूपमाह * प्रत्यर्थीति। एतत्समक्षं कदाऽपि विप्रतिपत्तिमप्राप्ताया इत्यर्थः। समुन्नयेयुः सीमानमित्यनुवृत्तिमभिप्रेत्याह * निश्चिनुयुरिति। मनुरप्येतद्विषयकः प्रागुक्त एव, पूर्वश्रुत्या त्विति। बृहस्पतिना चेति चस्त्वर्थे। एवमग्रेपि। * अत्र, परमप्रकृतसाक्षिसामन्तादिविषये सीमानिर्णये वा। आगमादिस्वरूपं प्रागुक्तम्। तेऽत्रेति पाठः। साक्षिपदं सामन्तादीनामप्युपलक्षणम्।

६। विशेषान्तरमाह * एतेचेति। * ग्रामेयकेति। ग्रामेयका ग्राम्यजनाः। कुलानि पूगश्रेणीकुलानीत्युक्तानि। एतेषां समक्षमित्यर्थः। यद्वा ग्रामेयका ग्राम्यजनास्तेषां कुलानि समूहाः तेषामित्यर्थः। * सीम्नि, विषये। एवमग्रेऽपि। ये साक्षिणस्ते तानि प्रष्टव्या एव। द्विकर्मकोऽयम्। गौणे कर्मणि तव्यः। विवादिनोस्तयोश्च, समक्षमित्यस्यानुषङ्गः। सीमसाक्षिण इति पाठान्तरम्। * निबध्नीयात्, पत्रे लेखयेत्। तान्सर्वान्, साक्ष्यादीन्। चेन सकललिङ्गसमुच्चयः।

७। मूलं सङ्गत्याऽवतारयितुं विशेषान्तरमाह * एतेषां चेति। राजेति। * राजिकं दैविकं च दुःखमित्यर्थः। अत्र मानमाह * अयं चेति। चस्त्वर्थे। कोशः प्रागुक्तः। त्रिपक्षेति बहुव्रीहि। यथासंख्यमन्वयः। आर्षत्वासाधुत्वमस्य। पूर्वनिपाताऽनियमो धर्मादित्वात्॥ १९२॥

मि. अव. यदा त्वमीषामुक्तसाक्ष्यवचसां त्रिपक्षाभ्यन्तरे रोगादि दृश्यते, अथवा प्रतिवादिनिर्दिष्टाभ्यधिकसंख्यागुणसाक्ष्यन्तरविरुद्धवचनता, तदा ते मृषाभाषितया दण्डनीयाः। तदाह।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या. अनृते तु पृथक् दण्ड्या राज्ञा मध्यमसाहसम् ।

मि. अनृते मिथ्यावदने निमित्तभूते सति सर्वे सामन्ताः प्रत्येकं मध्यमसाहसेन चत्वारिंशदधिकेन पणपञ्चशतेन दण्डनीयाः । सामन्तविषयता चास्य साक्षिमौलादीनां स्मृत्यन्तरे दण्डान्तरविधानादवगम्यते ।

तथाच मनुः, (अ. ८ श्लो. २५७)

यथोक्तेन नयन्तस्ते पूयन्ते सत्यसाक्षिणः ।
विपरीतं नयन्तस्तु दाप्याः स्युर्द्विशतं दमम् ॥ इति ।

नारदोऽपि—(व्यव. ११।७)

अथ चेदनृतं ब्रूयुः सामन्ताः सीमनिर्णये ।
सर्वे पृथक् पृथक् दण्ड्या राज्ञा मध्यमसाहसम् ॥

इति सामन्तानां मध्यमसाहसं दण्डमभिधाय—

शेषाश्चेदनृतं ब्रूयुर्नियुक्ता भूमिकर्मणि ।
प्रत्येकं तु जघन्यास्ते विनेयाः पूर्वसाहसम् ॥

इति तत्संसक्तादिषु प्रथमं साहसमुक्तवान् ।

मौलादीनामपि तमेव—

दण्डमाह, ना. व्यव. ११।८)

मौलवृद्धादयस्त्वन्ये दण्डगत्या पृथक् पृथक् ।
विनेयाः प्रथमेनैव साहसेनानृते स्थिताः ॥ इति ।

आदिशब्देन गोपशाकुनिकव्याधवनगोचराणां ग्रहणम् । यद्यपि शाकुनिकादीनां पापरतत्वाल्लिङ्गप्रदर्शनएवोपयोगो न साक्षात्सीमानिर्णये तथापि लिङ्गदर्शने एव मृषाभाषित्वसम्भवाद्दण्डविधानमुपपद्यतएव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनृते तु पृथक् दण्ड्या इत्येतद्दण्डविधानमज्ञानविषयम् ।

बहूनां तु गृहीतानां न सर्वे निर्णयं यदि ।
कुर्युर्भयाद्वा लोभाद्वा दण्ड्यास्तूत्तमसाहसम् ॥

इति ज्ञानविषये साक्ष्यादीनां कात्यायनेन दण्डान्तरविधानात् ।

तथा साक्षिवचनभेदेऽप्ययमेव दण्डस्तेनैवोक्तः,
कीर्तिते यदि भेदः स्याद्दण्ड्यास्तूत्तमसाहसम्।इति।

एवमज्ञानादिनाऽनृतवदने साक्ष्यादीन् दण्डयित्वा पुनः सीमाविचारः प्रवर्तयितव्यः ।

अज्ञानोक्तौ दण्डयित्वा पुनः सीमां विचारयेत् ।
इत्युक्त्वा—

त्यक्त्वा दुष्टांस्तु सामन्तानन्यान्मौलादिभिः सह।
संमिश्र्य कारयेत्सीमामेवं धर्मविदो विदुः ॥

इति निर्णयप्रकारस्तेनैवोक्तः ।

मि. अव. यदा पुनः सामन्तप्रभृतयो ज्ञातारश्चिह्नानि च न सन्ति तदा कथं निर्णय इत्यत आह ।

या० अभावे ज्ञातृचिह्नानां राजा सीम्नः प्रवर्तिता॥१५३॥

मि० ज्ञातॄणां सामन्तादीनां लिङ्गादीनां च वृक्षादीनामभावे राजैव सीम्नः प्रवर्तिता प्रवर्तयिता । अन्तर्भावितोऽत्र ण्यर्थः । ग्रामद्वयमध्यवर्तिनीं विवादास्पदीभूतां भुवं समं प्रविभज्य अस्येयं भूरस्येयमित्युभयोः समर्प्य तन्मध्ये सीमालिङ्गानि कुर्यात् । यदा तस्यां भूमावन्यतरस्योपकारातिशयो दृश्यते तदा तस्यैव ग्रामस्य सकला भूः समर्पणीया ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथाह मनुः, (अ.८ श्लो. २६५ (
सीमायामविषह्यायां स्वयं राजैव धर्मवित्।
प्रदिशेद् भूमिमेकेषामुपकारादिति स्थितिः॥
इति ॥ १५३ ॥

बा.१। एवं सति सङ्गत्या मूलमवतारयति * यदात्विति। *अमीषां, साक्ष्यादीनाम्। साक्ष्यं च वचांसि च तान्युक्तानि यैरित्यर्थः। त्रिपक्षशब्दः पात्रादिः। अभ्यधिकौ संख्यागुणौ यत्र तानि, साक्ष्यन्तरेति पाठः। *विरुद्धवचनतेति। वादिनिर्दिष्टसाक्ष्यादीनाममीषामिति भावः। *ते, वादिनिर्दिष्टसाक्ष्यादयः। राहूपरागे इतिवत्सप्तमीत्याह * निमित्तेति। * सर्वे, पार्श्वस्थाः। पृथगर्थमाह * प्रत्येकमिति। पञ्चशतशब्दे बहुव्रीहिः। तत्परिच्छिन्नपणेनेत्यर्थः। एवमग्रेऽपि। ननु अनृते त्विति सामान्योक्तस्य सामन्तमात्रविषयतैव कथम् अत आह *सामन्तेति। तन्मात्रेत्यर्थः। * यथोक्तेन, यथाशास्त्रोक्तप्रकारेण। सर्वार्थमुक्तस्य नारदोऽपीत्यस्य ल्यबन्तस्पर्शपूर्वकमुक्तवानित्यत्रान्वयः। सर्वे इत्यस्य मध्यमणिन्यायेनोभयत्रान्वयः। मध्यमेति कर्म। *दण्ड्या, ग्राह्याः। ग्रहणार्थोऽत्र दण्डिर्न तु निग्रहार्थः। व्यापारद्वयार्थत्वेन द्विकर्मकताऽस्य। एवं मूलेऽपि। अग्रेऽपि च। * शेषाः, सामन्तभिन्नाः साक्ष्यादयः भूसीमानिर्णये प्रेरिताः। * जघन्याः, दुष्टाः। * विनेयाः, दण्ड्याः। * तमेव, प्रथमसाहसाख्यमेव। *दण्डगत्या, दण्डशास्त्रोक्तरीत्या दण्डज्ञानेन। नारद एवायम्। नारदोक्तादिसंग्राह्यमाह *आदिशब्देनेति। * साक्षादिति। अधार्मिकत्वात्। तथा च तत्र दण्डस्य नोपयोग इति कथं तेषामादिना ग्रहणमिति भावः।

२। विशेषान्तरमाह * अनृते त्विति। * इत्येतदिति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यारभ्य यत् मूलमनुनारदादि प्रदर्शितमित्यर्थः। अत्र हेतुमाह * बहूनां त्विति। निर्णेतृत्वेन समाश्रितानां बहूनां साक्ष्यादीनां मध्ये यदि सर्वेऽपि साक्ष्यादयः प्रत्येकमुक्तहेतुतो निर्णयं न कुर्युरित्याद्यर्थः। अत्र भयाद्वा लोभाद्वेति हेतुत्वाऽस्य ज्ञानविषयत्वं स्पष्टमेव। तदाह * ज्ञानेति।

३। विशेषान्तरमाह * तथेति। किं चेत्यर्थः। तद्वदित्यर्थो वा। * अयमेव, उत्तमसाहसाख्य एव। * तेनैव, कात्यायनेनैव। एवमग्रेऽपि।

४। विशेषान्तरमाह * एवमिति। उक्तप्रकारेणेत्यर्थः। आदिना ज्ञानग्रहः। अत्र मानमाह * अज्ञानोक्ताविति।

ज्ञानेन हि विमुच्यन्ते सामन्ता निर्णयं प्रति।

इत्यस्यादिः। यत इत्यादिः। * संमिश्र्य, संमिश्रीकृत्य।

उ. ५। मूलमवतारयति *यदेति। ज्ञातृचिह्नानामिति द्वंद्व इत्याह *ज्ञातृणामिति। चिह्नानामित्यस्यार्थो *लिङ्गानां चेति। उक्तहेतोरेवाह *राजैवेति। यथाश्रुते बाधादाह *प्रवर्त्तयितेति। तदुपपादयति *अन्तरिति। व्यापारद्वयार्थत्वं तस्येति भावः। तत्प्रकारमाह *ग्रामेति। समं स्यादिति न्यायेनाह *समामिति। तत्र विशेषमाह *यदेति। विवादास्पदीभूतायां भुव्यन्यतरस्य ग्रामस्याधिकोपकारसंभवे यावत्युपयुक्ता तावती सर्वाऽपि तस्य देयेत्यर्थः। *सीमायामिति। लिङ्गाद्यभावेन परिच्छेत्तुमशक्यायां सीमायां धर्मज्ञान्याऽसंभवाद्राजैव स्वयं पक्षपातरहितः सन् येषामुपकारातिशयस्तेषामेव ततः प्रदिशेन्निर्दिशेदित्यर्थः॥ १५३॥

मि० अव. असत्यामप्यतद्भावाशङ्कायामस्याः स्मृतेर्न्यायमूलतां दर्शयितुमतिदेशमाह।

या० आरामायतनग्रामनिपानोद्यानवेश्मसु॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एष एव विधिर्ज्ञेयो वर्षाम्बुप्रवहादिषु ॥ १५४ ॥

मि० आरामः पुष्पफलोपचयहेतुर्भूभागः । आयतनं निवेशनं पलालकूटाद्यर्थं विभक्तो भूप्रदेशः । ग्रामः प्रसिद्धः । ग्रामग्रहणं च नगराद्युपलक्षणार्थम् । निपानं पानीयस्थानं वापीकूपप्रभृतिकम् । उद्यानं क्रीडावनम् । वेश्म गृहम् ।

एतेष्वारामादिष्वयमेव सामन्तसाक्ष्यादिलक्षणो विधिर्ज्ञातव्यः । तथा प्रवर्षणोद्भूतजलप्रवाहेषु । अनयोर्गृहयोर्मध्येन जलौघः प्रवहति अनयोर्वेत्येवंप्रकारे विवादे । आदिग्रहणात्प्रासादेष्वपि प्राचीन एव विधिर्वेदितव्यः ।

तथाच कात्यायनः,

क्षेत्रकूपतडागानां केदारारामयोरपि ।
गृहप्रासादावसथनृपदेवग्रहेषु च ॥ इति ॥ १५४ ॥

बा० १। उत्तरसंगतिमाह*असत्यामिति । तत् तादृक् स्वरूपमस्यास्तीति तद्वत् । तद्वतो भावस्तद्वद्भावस्ततो नञ्समासस्तस्य याऽऽशङ्का तस्यामसत्यामपीत्यर्थः। *अस्याः, वक्ष्यमाणायाः । अयं भावः। अतिदेशो ह्यधिकमाकाङ्क्षते इति जैमिनीयन्यायेन यत्राधिकाशङ्का तत्र पूर्वोक्तविषयसादृश्याप्रतीतेस्तद्वद्भावाभावेनातद्वद्भावाशङ्कायां पूर्वोक्तवदेतदपीत्यतिदेशो वाच्यः । यथाऽऽहिताग्नेः पिण्डपितृयज्ञं विधाय एवमनाहिताग्नेरिति तस्यातिदेशः । प्रकृते तु सीम्नो विवादइत्यादिना यो न्याय उक्तः क्षेत्रादिसीमायां तस्य आरामादेस्तस्यामत्यन्ततुल्यत्वेन संभवेन तेष्वतिदेशानपेक्षत्वेनारामेति वक्ष्यमाणवचनं निष्फलं यद्यपि तथापि न्यायप्रभवा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ण्यपि वचांसि सन्तीति शिष्यबोधार्थमुक्तन्यायसिद्धार्थमपि वि-
षयान्तरेषु वचनेनातिदिशतीति ।

२। तदर्थभूतनिवेशनमेव विशदयति *पलालेति। कूटं समूहः।
आदिना तृणान्तरकाष्ठादिपरिग्रहः। न्यूनतां निराचष्टे*ग्रामेति।
चो व्युत्क्रमे, तदुपलक्षणार्थमपि । यद्यपि—

आहावस्तु निपानं स्यादुपकूपजलाशये ।

इत्यमरेणोक्तं तथाप्युपलक्षणत्वेनाह * पानीयेति । प्रभृ-
तिना तस्यापि ग्रहणम् ।

३ । एवं पदार्थानुक्त्वा वाक्यार्थमाह * एतेष्विति । अग्रिमं
स्वतन्त्रमित्याह * तथेति । प्रवहशब्दो भयादित्वात्साधुः । के-
दारो वप्रमस्त्रियाम् । गृहं सामान्यम् ।यद्यपि प्रासादो देवभूभुजा-
मित्यमरस्तथाप्यत्र तयोः पृथगुक्तेः प्रासादो महागृहम् । प्रसादो-
ऽपि । उभयत्राधिकरणे घञ् । आङधिकआद्ये । आवसथम्
अग्निमत् गृहम् ॥ १५४ ॥

मि० अव. सीमानिर्णयमुक्त्वा तत्प्रसङ्गेन मर्यादा-
प्रभेदनादावौ दण्डमाह ।

या० मर्यादायाः प्रभेदे च सीमाऽतिक्रमणे तथा।
क्षेत्रस्य हरणे दण्डा अधमोत्तममध्यमाः ॥१५५॥

मि० अनेकक्षेत्रव्यवच्छेदिका साधारणा भूर्मर्या-
दा तस्याः प्रकर्षेण भेदने, सीमातिक्रमणे सीमाञ्मति-
लङ्घ्य कर्षणे, क्षेत्रस्य च भयादिप्रदर्शनेन हरणे, यथाक्र-
मेण अधमोत्तममध्यमसाहसा दण्डा वेदितव्याः । क्षे-
त्रग्रहणं चात्र गृहारामाद्युपलक्षणार्थम् । यदा पुनः
स्वीयभ्रान्त्या क्षेत्रादिकमपहरति तदा छिशतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दमो वेदितव्यः।

यथाह मनुः, [अ. ८ श्लो. २६४]

गृहं तडागमारामं क्षेत्रं वा भीषया हरन्।

शतानि पञ्च दण्ड्यः स्यादज्ञानाद्द्विशतो दमः॥इति।

अपह्रियमाणक्षेत्रादिभूयस्त्वपर्यालोचनया कदाचिदुत्तमोऽपि दण्डः प्रयोक्तव्यः।

अत एवाह,

वधः सर्वस्वहरणं पुरान्निर्वासनाङ्कने।

तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसे॥इति॥१५५॥

बा. १। तथाशब्दः समुच्चये।सीमातिक्रमणं तामुल्लङ्घ्य गमनं न विवक्षितं दण्डाविशेषोक्तेरित्याह*कर्षणे इति। तथार्थमाह*चेति। वक्ष्यमाणमनोराह *भयादीति। यथासंख्यमन्वय इत्याह *यथेति। अत्राप्यार्षत्वात्साधुत्वम्। एवमन्यत्रापि बोध्यम्। न्यूनतानिरासायाह *क्षेत्रेति। वचनात्तस्यापि ग्रहणम्। सामान्योक्तेर्विशेषपरतया योजनफलमाह * यदापुनरिति। * भीषयेति। भीषां भयमन्यस्मादुत्पाद्य तया हरन्नित्यर्थः। इदमुपलक्षणं लोभस्यापि। अत एव भयादीत्यादावुक्तम्।

२। विशेषान्तरमाह * अपह्रियमाणेति। तस्यां दशायामेव तत्सत्त्वादाह *कदाचिदिति। अपिना तस्यापि समुच्चयः।*आह, मनुः। * उत्तमसाहसे, विषये। *इतीति। वधादिरूपो दण्ड उक्तः इत्यर्थः। तथा च साहसं तदेवोत्तमं यत्रैतदन्यतम इति भावः। अन्यत्प्राग् व्याख्यातम्॥ १९५॥

मि० अव. यः पुनः परक्षेत्रे सेतुकूपादिकं प्रार्थनयाऽर्थदानेन वा लब्धानुज्ञो निर्मातुमिच्छति तं निषेधतः क्षेत्रस्वामिन एव दण्ड इत्याह।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या० न निषेध्योऽल्पबाधस्तु सेतुः कल्याणकारकः।
परभूमिं हरन्कूपः स्वल्पक्षेत्रो बहूदकः ॥ १५६॥

मि० परकीयां भूमिमपहरन् नाशयन्नपि सेतुर्जलप्रवाहबन्धः क्षेत्रस्वामिना न प्रतिषेध्यः, स चेदीषत्पीडाकरो बहूपकारकश्च भवति । कूपश्च अल्पक्षेत्रव्यापित्वेन अल्पबाधो बहूदकत्वेन बहूपकारकोऽतो नैव निवारणीयः । कूपग्रहणं च वापीपुष्करिण्याद्युपलक्षणार्थम् । यदा पुनरसौ समक्षेत्रवर्तितया बहुबाधो नद्यादिसमीपक्षेत्रवर्तितया वा अल्पोपकारकस्तदाऽऽसौ निषेध्य इत्यर्थादुक्तं भवति ।

सेतोश्च द्वैविध्यमुक्तं नारदेन, (व्यव. ११।१८)
सेतुश्च द्विविधो ज्ञेयः खेयो बन्ध्यस्तथैव च ।
तोयप्रवर्तनात्खेयो बन्ध्यः स्यात्तन्निवर्तनात् ॥ इति।

यदा त्वन्यनिर्मितं सेतुं भेदनादिना नष्टं स्वयं संस्करोति तदा पूर्वस्वामिनं तद्वंश्यं नृपं वा पृष्ट्वैव संस्कुर्यात् ।

यथाह नारदः, (व्यव. ११ । २० । २१)
पूर्वप्रवृत्तमुत्सन्नमपृष्ट्वा स्वामिनं तु यः ।
सेतुं प्रवर्तयेत्कश्चिन्न स तत्फलभाग्भवेत् ॥
मृते तु स्वामिनि पुनस्तद्वंश्ये वाऽपि मानवे ।
राजानमामन्त्र्य ततः कुर्यात्सेतुप्रवर्तनम्॥इति॥१५६॥

बा. १। परभूमिमिति पूर्वान्वयीत्याह *परकीयामिति। जलप्रवाहेति पाठः। नेदं सार्वत्रिकमित्याह *स इति। त्वर्थमाह *चेदिति। अल्पेत्यस्यार्थ *ईषदिति। कल्याणेत्यस्यार्थो *बह्विति । प्रागवदे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(७) न्यायरत्नमाला–श्रीपार्थसारथिमिश्र वि० सं० (मीमांसा २

(८) ब्रह्मसूत्रभाष्यम्–बादरायणप्रणीतवेदान्तसूत्रस्य यतीन्द्र श्रीमद्विज्ञानभिक्षुकृत व्याख्यानम् । सम्पूर्णम् । (वेदान्तः) ६

(९) स्याद्वादमञ्जरी–मल्लिषेणनिर्मिता सम्पूर्णा । (जैनदर्शनम्) २

(१०) सिद्धित्रयम्–विशिष्टाद्वैत–ब्रह्मनिरूपणपरम्–श्रीभाष्यकृतां परमगुरुभिः श्री ६ श्रीयामुनमुनिभिर्विरचितम् । सम्पूर्णम् (वेदान्तः) १

(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टारकाचार्यसंगृहीतः । आचार्यचित्सुखमुनिविरचितव्याख्योपेतः (वेदान्तः) ४

(१२) विभक्त्यर्थनिर्णयःन्यायानुसारिप्रथमादिसप्तविभक्तिविस्तृतविचाररूपः म० म० श्रीगिरिधरोपाध्यायरचितः । सम्पूर्णः (न्यायः) ५

(१३) विधिरसायनम् । श्रीअप्पयदीक्षितकृतम् । सं० (मीमांसा) २

(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसोमेश्वरविरचिता । (मीमांसा) १६

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता । (वेदान्तः) २

(१६) मीमांसाबालप्रकाशः (जैमिनीयद्वादशाऽध्यायार्थसंग्रहः) श्रीभट्टनारायणात्मजभट्टशङ्करविरचितः । (मीमांसा) २

(१७) प्रकरणपञ्चिका (प्रभाकरमतानुसारि–मीमांसादर्शनम्) महामहोपाध्यायश्रीशालिकनाथमिश्रविरचितं, श्रीशङ्करभट्टकृतो मीमांसासारसंग्रहश्च सम्पूर्णः (मीमांसा) ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीसदानन्दव्यासप्रणीतस्तत्कृतव्याख्यासमलङ्कृतश्च । (वेदान्त) ३

(१९) कात्यायनश्रौतसूत्रम् । महामहोपाध्यायश्रीकर्काचार्यविरचितभाष्यसहितम् । १३

१

(२०) ब्रह्मसूत्रभाष्यम् । श्रीभास्कराचार्यविरचितम् (वेदान्तः)

(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम् । आनन्दपूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया (विद्यासागरी) ति प्रसिद्धया समेतम् । (वेदान्तः) १३

१

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता । ८

(२३) श्रीलक्ष्मीसहस्रम्–बालबोधिनीव्याख्ययाऽवतरणिकया च सहितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२४ ब्रह्मसूत्रवृत्तिः मरीचिका श्रीव्रजनाथभट्टकृता (वेदान्त)

२५ क्रोडपत्रसंग्रहः । अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्य- १
क्षानुमानगादाधर्याः प्रत्यक्षानुमानमाथुर्या व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्द-
शक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि : (न्यायः)

२६ ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम् । श्रीसुन्दरभट्टरचितसिद्धान्तसेतुकाऽभिधटीकासहितश्रीदेवाचार्य- २
प्रणीतसिद्धान्तजाह्नवीयुतम्

२७ षड्दर्शनसमुच्चयः । बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शन संक्षेपः । मणिभद्रकृत- २
टीकया सहितः । हरिभद्रसूरिकृतः ।

२८ शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः । प्रमेयरत्नार्णवश्च १

२९ अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्याजागदीशी टीका । १

११

३० वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा संस्कारप्रकाशात्मकः । १०

३१ वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः ५

३२ स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरत्रिपाठिसंकलितः । ४

३३ वेदान्तरत्नमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्यकृता । २

३४ प्रस्थानरत्नाकरः । गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितः २

३५ वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम् । १

३६ योगदर्शनम् । परमहंसपरिव्राजकाचार्य-नारायणतीर्थविरचित-योगसिद्धान्तचन्द्रिका-समा-
ख्यया संवलितम् । २

३७ वेदान्तदर्शनम् । परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वती स्वामिकृत ब्रह्माऽमृतवर्षिणी
समाख्य व्याख्यासंवलितम् । ४

३८ विश्वप्रकाशः । कोशः । विद्वद्वर श्रीमहेश्वरसूरिविरचितः । १

३९ श्रीसुबोधिनी । श्रीवल्लभाचार्यविनिर्मिता । श्रीमद्भागवतव्याख्या गोस्वामीश्रीविठ्ठलनाथदीक्षि-
तविरचित टिप्पणीसहिता । १

४० वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः पूजाप्रकाशः । ४

४१ वेदान्तसिद्धान्तसंग्रहः । श्रुतिसिद्धान्तापरनामकः । श्रीब्रह्मचारिवनमालि... । द्वैत-
द्वैतदर्शनानुगतः ।

४२ स्वानुभवादर्शः । श्रीमत्परमहंसपरिव्राजकाचार्य नारायणाश्रमवि...
स्वकृतटीकाविभूषितश्च ।

४३ याज्ञवल्क्यस्मृतेः । बालम्भट्टीनामाख्य व्याख्यालङ्कृतमिताक्षरा...

पत्रादिप्रेषणस्थानम् } हरिदास गु...
चौखम्बा, बनार...

धर्मशा...

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

January 1913.

THE

CHOWKHAMBÂ SANSKRIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 181. धर्मशास्त्र १५५

व्यवहार- बालंभट्टी

इति प्रसिद्धया लक्ष्मीनामिकया
पायगुण्डे इत्युपनामकेन बालंभट्टेन स्वपत्न्याः लक्ष्मीदेव्याः
स्मारकत्वेन तन्नाम्ना रचितया बृहत्या टीकया सहिता
मिताक्षरा
श्रीयुतगोविन्ददासमहाशयप्रदर्शितरीत्या
पर्वतीयनित्यानन्दपन्तेन परिष्कृत्य संशोधिता ।

VYAVAHÂRA-BÂLAMBHATTI

THE EXTENSIVE COMMENTARY ON THE MITÂKSHARÂ
WITH THE ORIGINAL

BY

Bâlambhatta Páyagunde

EDITED BY

Pandit Nityanand Pant Parvatiya
[U]nder the supervision of Shri Govinda Das.

FASCICULUS IX.

[PUBLI]SHED AND SOLD BY THE SECRETARY,
CHOWKHAMBÂ SANSKRIT BOOK-DEPOT.
BENARES.
AGENTS:- OTTO HARRASSOWITZ LEIPZIG:
PANDITA JYESHTHÂRAMA MUKUNDAJI BOMBAY:
PROBSTHAIN & CO., BOOKSELLERS, LONDON
Printed by Jai Krishna Dasa Gupta,
AT THE VIDYÂ VILÂSA PRESS
BENARES.

Price Rupee one.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२४ ब्रह्मसूत्रवृत्तिः मरीचिका श्रीव्रजनाथभट्टकृता (वेदान्त)

२५ क्रोडपत्रसंग्रहः । अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्याः प्रत्यक्षानुमानमाथुर्याः व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि : (न्यायः) १

२६ ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम् । श्रीसुन्दरभट्टराचितसिद्धान्तसेतुकाऽभिधटीकासहितश्रीदेवाचार्यप्रणीतसिद्धान्तजाह्नवीयुतम् २

२७ षड्दर्शनसमुच्चयः । बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शन संक्षेपः । मणिभद्रकृतटीकया सहितः । हरिभद्रसूरिकृतः । २

२८ शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः । प्रमेयरत्नार्णवश्च १

२९ अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्याजागदीशी टीका । १

३० वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा संस्कारप्रकाशात्मकः। ११

३१ वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः १०

३२ स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरत्रिपाठिसंकलितः । ५

३३ वेदान्तरत्नमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्यकृता । ४

३४ प्रस्थानरत्नाकरः । गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितः २

३५ वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम् । २

३६ योगदर्शनम् । परमहंसपरिव्राजकाचार्य-नारायणतीर्थविरचित-योगसिद्धान्तचन्द्रिका-समाख्यया संवलितम् । १

३७ वेदान्तदर्शनम् । परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वती स्वामिकृत ब्रह्माऽमृतवर्षिणी समाख्य व्याख्यासंवलितम् । २

३८ विश्वप्रकाशः । कोशः । विद्वद्वर श्रीमहेश्वरसुरिविरचितः । ४

३९ श्रीसुबोधिनी । श्रीवल्लभाचार्यविनिर्मिता । श्रीमद्भागवतव्याख्या गोस्वामीश्रीविठ्ठलनाथदीक्षितविरचित टिप्पणीसहिता । २

४० वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः पुजाप्रकाशः । १

४१ वेदान्तसिद्धान्तसंग्रहः । श्रुतिसिद्धान्तापरनामकः । श्रीब्रह्मचारिवनमालि... । द्वैताद्वैतदर्शनानुगतः । ४

४२ स्वानुभवादर्शः । श्रीमत्परमहंसपरिव्राजकाचार्य नारायणाश्रमशिष्य... स्वकृतटीकाविभूषितश्च ।

४३ याज्ञवल्क्यस्मृतिः । बालम्भट्टीसमाख्य व्याख्यासमलङ्कृतमिताक्षरासहित...

पत्रादिप्रेषणस्थानम् } हरिदास गु...
चौखम्बा, बनार...

धर्मशा...

११०४४

TRIBHUVAN UNIVERSITY ... NEPAL

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

January 1913.

THE

CHOWKHAMBÂ SANSKRIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 181. धर्मशास्त्र १५५

व्यवहार- बालंभट्टी

इति प्रसिद्धया लक्ष्मीनामिकया
पायगुण्डे इत्युपनामकेन बालंभट्टेन स्वपत्न्याः लक्ष्मीदेव्याः
स्मारकत्वेन तन्नाम्ना रचितया बृहत्या टीकया सहिता
मिताक्षरा
श्रीयुतगोविन्ददासमहाशयप्रदर्शितरीत्या
पर्वतीयनित्यानन्दपन्तेन परिष्कृत्य संशोधिता ।

VYAVAHÂRA-BÂLAMBHATTI

THE EXTENSIVE COMMENTARY ON THE MITÂKSHARÂ
WITH THE ORIGINAL
BY
Bâlambhatta Páyagunde
EDITED BY
Pandit Nityanand Pant Parvatiya
nder the supervision of Shri Govinda Das.

FASCICULUS IX.

SHED AND SOLD BY THE SECRETARY,
CHOWKHAMBÂ SANSKRIT BOOK-DEPOT.
BENARES.
AGENTS:- OTTO HARRASSOWITZ: LEIPZIG:
PANDITA JYESHTHÂRAMA MUKUNDAJI BOMBAY:
PROBSTHAIN & CO., BOOKSELLERS, LONDON
Printed by Jai Krishna Dasa Gupta,
AT THE VIDYÂ VILÂSA PRESS
BENARES.

Price Rupee one.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ श्रीः ॥

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तबकः— १८१

१ अस्यां चौखम्बा-संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एकः स्तबको मुद्रयित्वा प्रकाश्यते। एकस्मिन् स्तबके एक एव ग्रन्थो मुद्र्यते ।

२ प्राचीना दुर्लभाश्चामुद्रिता मीमांसावेदान्तादिदर्शनव्याकरण धर्मशास्त्रसाहित्यपुराणादिग्रन्था एवात्र सुपरिष्कृत्य मुद्र्यन्ते ।

३ काशिकराजकीयप्रधानसंस्कृतपाठशालाऽध्यापकाः पण्डिता अन्ये च शास्त्रदृष्टयो विद्वांस एतत्परिशोधनादिकार्यकारिणो भवन्ति।

४ भारतवर्षीयैः, ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्च एतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम्—मुद्राः ७ आणकाः ८

५ अन्यैर्देयं प्रतिस्तबकम् ,, ,, १ ,, ०

६ प्रापणव्ययः पृथग् नास्ति ।

७ साम्प्रतं मुद्र्यमाणा ग्रन्थाः— मुद्रिताः स्तबकाः

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता (संस्कारः) २

(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः (व्याकरणम्) १०

(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृत—न्यायरत्नाकराख्यया व्याख्यया सहितम् । सम्पूर्णम् । १०

(४) भाष्योपबृहितं तत्त्वत्रयम् । विशिष्टाद्वैतदर्शनप्रकरणम् । श्रीमल्लोकाचार्य्यप्रणीतम् । श्रीनारायण तीर्थ विरचित भाष्यभाषा प्रकाशसहितम् । सं० (वेदान्त) २

(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः सम्पूर्णः (ज्योतिषः) १

(६) भाट्टचिन्तामणिः । महामहोपाध्यायश्रीगागाभट्ट विरचितः । तर्कपादः (मीमांसा) २

७०४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
धर्मशास्त्र १५५

वाह *कूपेति। चः प्राग्वत्। द्वितीये विशेषणसूचितं विशेषमाह *यद्वापुनरिति। * असौ, कूपादिः।* तोयेति। यत्राधो जलप्रवाहः स खेयः। तत्रोपर्येव खनित्वा काष्ठाद्यारोपणात्। यत्र सर्वात्मना जलनिरोध एव स बन्धनीयत्वाद् बन्ध्य इत्यर्थः। अत एव—

तेनैवोक्तम्, (ना. व्यव. ११।१९)

नान्तरेणोदकं सस्यं नाशश्चात्युदके भवेत्।
य एवानुदके दोषः स एवात्युदके भवेत्॥

इति।* पूर्वेति। पूर्वस्थितमित्यर्थः। स्वामिनीत्यग्रेऽध्याहारापकर्षाभ्यां तद्वंश्यमामन्त्र्येत्यादेः सम्बन्धः। तद्वंश्ये मानवेऽपि *पुनः तु मृते राजानमित्याद्यन्वयः। अन्यथा द्वितीयपादानर्थक्यं स्पष्टमेव॥ १५६॥

मि० अव. क्षेत्रस्वामिनं प्रत्युपदिष्टम्। इदानीं सेतोः प्रवर्तयितारं प्रत्याह।

या० स्वामिने योऽनिवेद्यैव क्षेत्रे सेतुं प्रवर्त्तयेत्।
उत्पन्ने स्वामिनो भोगस्तदभावे महीपतेः॥ १५७॥

मि० क्षेत्रस्वामिनमनभ्युपगमय्य तदभावे राजानं वा यः परक्षेत्रे सेतुं प्रवर्तयति असौ फलभाग् न भवति अपितु तदुत्पन्ने फलं क्षेत्रस्वामिनो भोगस्तदभावे राज्ञः। तस्मात्प्रार्थनया अर्थदानेन वा क्षेत्रस्वामिनं, तदभावे राजानं वाऽनुज्ञाप्यैव परक्षेत्रे सेतुः प्रवर्तनीय इति तात्पर्यम्॥ १५७॥

बा. १। सङ्गतिमाह *क्षेत्रेति। अनिवेद्येत्यस्य लाक्षणिकमभिमतमर्थमाह *अनभ्युपगमय्येति। यथाश्रुते तु विरोधः स्पष्ट एव।

११०४५
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यूनतां नारदतः प्राप्तां निराचष्टे * तदभावे इति । आर्षत्वात्कर्माणि चतुर्थी । अर्थादाह * परक्षेत्रेति । लिङर्थोऽविवक्षित इत्याह * प्रवर्त्तयतीति । फलितार्थमाह *तस्मादिति ॥ १५७ ॥

मि० अव. क्षेत्रस्वामिना सेतुर्न प्रतिषेध्य इत्युक्तम् । इदानीं तस्यैव प्रसक्तानुप्रसक्त्या क्वचिद्विध्यन्तरमाह ।

या० फालाहतमपि क्षेत्रं न कुर्याद्यो न कारयेत् ।

स प्रदाप्यः कृष्टफलं क्षेत्रमन्येन कारयेत् ॥ १५८ ॥

मि० यः पुनः क्षेत्रस्वामिपार्श्वे अहमिदं क्षेत्रं कृषामीति अङ्गीकृत्य पश्चादुत्सृजति न चान्येन कर्षयति तच्च क्षेत्रं यद्यपि फालाहतम् ईषद्धलेन विदारितं न सम्यग्बीजवापार्हं तथापि तस्याकृष्टस्य फलं यावत्तत्रोत्पत्त्यर्हं सामन्तादिकल्पितं तावदसौ कर्षको दापनीयः । तच्च क्षेत्रं पूर्वकर्षकादाच्छिद्यान्येन कारयेत् ।

इति सीमाविवादप्रकरणम् ॥ १५८ ॥

वा. १ । व्यवहितसङ्गतिमाह * क्षेत्रस्वामिनेति । * तस्यैव, क्षेत्रस्वामिन एव । * प्रसक्तेति । प्रस्तुतसीमानिर्णयप्रसक्तमर्यादाप्रभेदनादिदण्डानुप्रसक्तिः तन्निषेधकक्षेत्रस्वामिदण्डे तयेत्यर्थः । स्वामिसम्बन्धि क्षेत्रं, तत्सम्बन्धात्क्षेत्रगतविचार इति भावः । * क्वचित्, न तु सर्वत्र । * विध्यन्तरम्, अन्यविधिम् ।

२ । अङ्गीकारं विना तदसम्भवादाह * क्षेत्रस्वामिपार्श्वे इति । योग्यतया आदौ द्वितीयपादार्थमाह * पश्चादिति । आद्यपादार्थमाह * तच्च क्षेत्रमिति । अपिसूचितमाह * यद्यपीति । आङः फालादेश्चार्थानाह * ईषादिति । तत्फलितमाह * नेति । स प्रदाप्यः कृष्टफलमिति पाठेनाह * तस्येति । ईषत्कर्षणात्कृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्टार्थमाह * अकृष्टस्येति । स इत्यस्यार्थमाह * असाविति । प्रदाप्यइत्यस्यार्थमाह * दापनीय इति । कृष्टशदमिति पाठेऽपि शदशब्देन फलमेव ।

एतेन "तं प्रदाप्याकृष्टशदमिति, तमकृष्टशदं प्रदाप्येत्यन्वयः । अकृष्टशदमिति व्याचष्टे तस्याकृष्टस्य फलमिति" इति-प्राचोक्तमपास्तम् । असंबद्धत्वात् व्याख्यानविरोधाच्च ॥ १५८॥

इति सीमाविवादः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ स्वामिपालविवादप्रकरणम् ॥ १० ॥

मि० अव. व्यवहारपदानां परस्परहेतुहेतुमद्भावाभावात् तेषामाद्यमृणादानमित्यादिपाठक्रमो न विवक्षित इति व्युत्क्रमेण स्वामिपालविवादोऽभिधीयते ।

या० माषानष्टौ तु महिषी सस्यघातस्य कारिणी ।
दण्डनीया तदर्द्धं तु गौस्तदर्द्धमजाविकम् ॥ १५९ ॥

मि० परसस्यविनाशकारिणी महिषी अष्टौ माषान्दण्डनीया । गौस्तदर्द्धं चतुरो माषान् । अजा मेषाश्च माषद्वयं दण्डनीयाः । महिष्यादीनां धनसंबन्धाभावात्तत्स्वामी पुरुषो लक्ष्यते ।

माषश्चात्र ताम्रिकपणविंशतितमो भागः ।
माषो विंशतिमो भागः पणस्य परिकीर्तितः ।

इति नारदस्मरणात् । एतच्चाज्ञानविषयम् । ज्ञानपूर्वे तु—

पणस्य पादौ द्वौ गां तद्द्विगुणं महिषीं तथा ।
तथाऽजाविकवत्सानां पादो दण्डः प्रकीर्तितः ॥

इति स्मृत्यन्तरोक्तं द्रष्टव्यम् ।

यत्पुनर्नारदेनोक्तम्, [व्यव. ११ । ३१]

माषं गां दापयेद्दण्डं द्वौ माषौ महिषीं तथा ।
तथाऽजाविकवत्सानां दण्डः स्यादर्द्धमाषकः ॥

इति, तत् पुनःप्ररोहयोग्यमूलावशेषभक्षणविषयम् ॥ १५९ ॥

वा. १ । व्यवहिताव्यवहितसङ्गत्यभावेऽपि महाप्रकरणसङ्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिमाह * व्यवहारपदानामिति । *क्रमः, मनूक्तः । अर्थादाह *प-रेति । इदं सर्वविशेषणं यथासम्भवम् । * तदर्धमिति । समांश-वाचित्वेऽपि पाक्षिकषष्ठीतत्पुरुषः । अजाविकमिति समाहारद्वन्द्वः पाक्षिक इत्याह * अजा इति । असङ्गतिं परिहरति * माहिष्या-दीनामिति ।

२। अग्रिमोपयोगिनं विशेषमाह * माषश्चेति । एवमग्रे स-र्वत्र बोध्यम् । * ताम्रिकेति । ताम्रिकः कार्षिकः पण इति मू-ल्याध्याये कात्यायनेन द्विरुक्तेः । मूलेऽपि उक्तत्वाच्च । इदं स-र्वं मूल्याध्यायविवरणे मत्कृते स्पष्टं तत एव बोध्यम् । विंशतिम-इत्यार्षम् । कातीयमाह * पणस्येति । गां प्रति द्वौ पादौ पण-स्यार्द्धभागो दण्डः । महिषीं प्रति तद्द्विगुणं सम्पूर्णः पणो द-ण्डः । अजादीनां तु पणस्य चतुर्थो भागो दण्ड इत्यर्थः । अत्र दण्डाधिक्यादेव ज्ञानाविषयतेति गम्यते । अन्यथा विरोधापत्तेः ।

३। अन्यविरोधं परिहरति * यत्पुनरिति । तथाशब्दः उभ-यत्र समुच्चये सादृश्ये वा । * तत्पुनरिति । दण्डस्य न्यूनत्वात् ॥ १५९ ॥

मि० अव. अपराधातिशयेन क्वचिद्दण्डद्वैगुण्यमाह ।

या० भक्षयित्वोपविष्टानां यथोक्ताद् द्विगुणो दमः ।

मि० यदि पशवः परक्षेत्रे सस्यं भक्षयित्वा तत्रै-वानिवारिताः शेरते तदा यथोक्ताद्दण्डाद् द्विगुणो दण्डो वेदितव्यः । सवत्सानां पुनर्भक्षयित्वोपविष्टा-नां यथोक्ताच्चतुर्गुणो दण्डो वेदितव्यः ।

वसतां द्विगुणः प्रोक्तः सवत्सानां चतुर्गुणः ।
इति वचनात् ।

मि० अव' क्षेत्रान्तरे पश्वन्तरे चातिदेशमाह ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या० सममेषां विवीतेऽपि खरोष्ट्रं महिषीसमम् ॥१६०॥

मि० विवीतः प्रचुरतृणकाष्ठो रक्ष्यमाणः परिगृहीतो भूप्रदेशः। तदुपघातेऽपीतरक्षेत्रदण्डेन समं दण्डमेषां महिष्यादीनां विद्यात्। खराश्च उष्ट्राश्च खरोष्ट्रं तत् महिषीसमम्। महिषी यत्र यादृशेन दण्डेन दण्ड्यते तत्र तादृशेनैव दण्डेन खरोष्ट्रमपि प्रत्येकं दण्डनीयम्। सस्योपरोधकत्वेन खरोष्ट्रयोः प्रत्येकं महिषीतुल्यत्वाद्दण्डस्य चापराधानुसारित्वात्खरोष्ट्रमिति समाहारो न विवक्षितः॥ १६०॥

बा. १। उक्तहेतारेवाह * अपराधेति। उक्ते सर्वत्र। स्वयमित्यादिः। * क्वचित्, नारदाद्युक्तभिन्नविषये। * यथोक्तादिति। अज्ञाने माषानष्टाविति मूलोक्तात्। * द्विगुणो दण्डः, ज्ञानपूर्वके परसस्येति कातीयात् द्विगुणो दण्डः, अज्ञानपूर्वके तादृशे नारदोक्तात् द्विगुण इति विवेको बोध्यः। कातीयमेवाह * वसतामिति। सवत्सानामिति भावः।

२। उ. * आहेति। यथाक्रमं पादाभ्यामिति भावः। विवीत इति व्याप्त्यर्थस्य वीधातो रूपम्। विशेषेण वीतं व्यापनं तृणादेर्यस्मिन्निति व्युत्पत्तेः। तदाह * प्रचुरेति। अत एव * रक्ष्यमाण इति। अत एव * परिगृहीत इति। तस्य स्वरूपतो निमित्तत्वादाह * तदुपघातइति। * इतरेति। सस्येत्यर्थः। वृक्षादीनां फलं सस्यमित्यमरः। योग्यतयाऽऽह * विद्यादिति। महिषीसाम्यं वैवक्षिकमाह * महिषीति। यत्र क्षेत्रे पादशो यत्परिमाणो दण्डस्तस्या विहितस्तत्र तादृशेनैव तत्समेनैव दण्डेन खर उष्ट्रश्च तथैव स्वापराधे दण्ड्यो न तु विशिष्टमुभयमपीत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ननु समाहारद्वन्द्वात्तथैवोचितम् अतोऽत्र हेतुमाह *सस्योपेति। तयोस्तन्नाशकत्वे प्रत्येकं तयोस्तत्तुल्यत्वादित्यर्थः। आहाराद्यंशेऽत्यन्तभेदाभावादिति भावः। ननु वचनात् तथैव कुतो न अत आह * दण्डस्य चेति। नन्वेवं कथं समाहारोऽत आह * खरोष्ट्रमिति। अत एव पूर्वं स्वयमितरेतरयोगः कृतः॥ १६०॥

मि० अव. परसस्यविनाशे गोस्वामिनो दण्ड उक्तः। इदानीं क्षेत्रस्वामिने फलमप्यसौ दापनीय इत्याह।

या० यावत्सस्यं विनश्येत्तु तावत्स्यात्क्षेत्रिणः फलम्।
गोपस्ताड्यस्तु गोमी तु पूर्वोक्तं दण्डमर्हति॥ १६१॥

मि० सस्यग्रहणं क्षेत्रोपचयोपलक्षणार्थम्। यस्मिन् क्षेत्रे यावत्पलालधान्यादिकं गवादिभिर्विनाशितं तावत्क्षेत्रफलम् एतावति क्षेत्रे एतावद्भवतीति सामन्तैः परिकल्पितं तत्क्षेत्रस्वामिने गोमी दापनीयः। गोपस्तु ताडनीय एव न फलं दापनीयः।

गोपस्य च ताडनं पूर्वोक्तधनदण्डसहितमेव पालदोषेण सस्यनाशे द्रष्टव्यम्।

या नष्टा पालदोषेण गौस्तु सस्यानि नाशयेत्।
न तत्र गोमिनां दण्डः पालस्तं दण्डमर्हति॥ इति वचनात्।

गोमी पुनः स्वापराधेन सस्यनाशे पूर्वोक्तं दण्डमेवार्हति न ताडनम्। फलदानं पुनः सर्वत्र गोस्वामिन एव। तत्फलपुष्टमहिष्यादिक्षीरोपभोगद्वारेण तत्क्षेत्रफलभागित्वात्।

गवादिभक्षितावशिष्टं पलालादिकं गोस्वामिनैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रहीतव्यम् । मध्यस्थकल्पितमूल्यदानेन क्रीतप्राय-त्वात् ।

अत एव नारदः, [व्यव. ११ । श्लो. ३८ । ३९]

गोभिस्तु भक्षितं सस्यं यो नरः प्रतियाचते ।
सामन्तानुमतं देयं धान्यं यत्तत्र वापितम् ॥
पलालं गोमिनो देयं धान्यं वै कर्षकस्य तु।इति॥१६१॥

बा. १।* गोस्वामिनः, गवादिस्वामिनः।क्वचित् स्वामिन इत्येव पाठः । *दण्डः, राजग्राह्यः । न्यूनतानिरासायाह * सस्यग्रहण-मिति। अत एव विवीतस्यापि ग्रहणम् । तदेवाह * यस्मिन्निति। व्यवस्थार्थमाह * एतावतीति । फलितार्थमाह * तत्क्षेत्रेति । * न फलमिति । एतद्वैलक्षण्यबोधक एव तुः। नन्वेवं धनदण्डो-ऽपि तस्य वचनान्न स्यात्, अतोऽपवादं क्वचिदाह * गोपस्य चेति। अत एव न फलमित्येव प्रागुक्तम्। क्वाचित्कत्वमेवाह * पालेति । गोपालेत्यर्थः । स्वदोषेणेति यावत् । पालनं पालः तद्दोषेणेति वाऽर्थः । अत्र मानं कातीयमाह * येति। * नष्टा, अदर्शनं गता स्वामिनः ।

२। तुर्यपादं व्याचष्टे * गोमी पुनरिति । गोमी गोमानि-त्यमरः । ज्योत्स्नातमिस्रेति सूत्रेण निपातितोऽयम् । अत्रापि तुशब्दसूचितमाह * दण्डमेवार्हति न ताडनमिति । फलांशे तु तुल्यतैवेत्याह * फलेति ।

३। विशेषमाह * गवादीति * मध्यस्थेति । सामन्तादीत्यर्थः। तस्य पृथक् तदभावादाह * क्रीतप्रायेति * गोभिरिति।गोभिस्त-दादिभिर्भक्षितं सस्यं यः क्षेत्रस्वामी प्रतियाचते परावृत्य याचते तस्मै, सामन्तादिपरिकल्पितं यत् तत्र क्षेत्रे वापितं तावद्धान्यं तदुत्पाद्यं तदादि तन्मूल्यं वा देयं, भक्षितावशिष्टं पलालं तदा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दि तृणबुसादिकं शेषे षष्ठी गोस्वामिने देयम् । यो नर इति सामान्योक्तं विशेषाकाङ्क्षायामर्थप्रकरणसिद्धमपि विशेषं स्पष्टीकुर्वन्नन्यग्राह्यत्वभ्रमाभावाय विशदयति * धान्यमिति । यद्वा खलस्थलेऽप्येवमित्याह * धान्यमिति । वैशब्दः निश्चये। तस्मात्क्षेत्रस्वामिना सर्वथा तन्नाहर्तव्यमिति तात्पर्यार्थः ॥ १६१ ॥

मि० अव. क्षेत्रविशेषे अपवादमाह।

या० पथिग्रामविवीतान्ते क्षेत्रे दोषो न विद्यते ।
अकामतः कामचारे चौरवद्दण्डमर्हति ॥१६२ ॥

मि० मार्गसमीपवर्तिनि क्षेत्रे ग्रामविवीतसमीपवर्तिनि च क्षेत्रे अकामतो गोभिर्भक्षिते गोपगोमिनोर्द्वयोरप्यदोषः । दोषाभावप्रतिपादनं दण्डाभावार्थं विनष्टसस्यमूल्यदानप्रतिषेधार्थं च । कामचारे कामतश्चारणे चौरवत् चौरस्य यादृशो दण्डस्तादृशं दण्डमर्हति । एतच्चानावृतक्षेत्रविषयम् ।

(मनु. अ. ८ श्लो. २३८)
यत्रापरिवृतं धान्यं विहिंस्युः पशवो यदि ।
न तत्र प्रणयेद्दण्डं नृपतिः पशुरक्षिणाम् ॥

इति दण्डाभावस्यानावृतक्षेत्रविषयत्वेन मनुनोक्तत्वात् । आवृते पुनर्मार्गादिक्षेत्रेऽपि दोषोऽस्त्येव । वृतिकरणं च—

तेनैवोक्तम्, [मनु. अ. ८ श्लो. २३९]
वृतिं च तत्र कुर्वीत यामुष्ट्रो नावलोकयेत् ।
छिद्रं निवारयेत्सर्वं श्वसूकरमुखानुगम्॥इति॥१६२॥

बा. १।*अपवादमिति।उभयोरपि प्रागुक्तसर्वापवादमित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्तशब्दः समीपवाची त्रयाणां द्वन्द्वोत्तरं षष्ठीसमासः। अथवा षष्ठीतत्पुरुषोत्तरपदकद्वन्द्वगर्भः सः। सर्वव्याख्यात्रभिमतोऽत्र द्वितीय एव। तदाह * मार्गेति। पथि मार्गेत्यपपाठः। आद्ये ग्रामविवीतेत्यत्र ग्रामसमीपवर्तिनि विवीतसमीपवर्तिनि च क्षेत्रे चेत्यर्थः। द्वितीये ग्रामसम्बन्धि यद्विवीतं तत्समीपेत्याद्यर्थः। ग्रामाद्बहिर्यो गवादिस्थित्यर्थो भूप्रदेशः स विवीतपदेन लक्ष्यते, तत्समीपवर्त्तिनीत्याद्यर्थो वा। अकामत इति पूर्वान्वयीत्याह * अकामेति। * गोभिः, तदादिभिः। ननु प्रत्यक्षदोषस्य पापस्य च सत्त्वात्कथमदोषत्वम् अत आह * दोषाभावेति।

२। शिष्टं व्याचष्टे * कामेति। * अनावृतेति। आवरणरहितेत्यर्थः। वृञ् वरणे इत्यस्य रूपम्। एवमग्रे सर्वत्र। * तत्र, परीहारस्थाने। * मार्गादिक्षेत्रे, आदिना ग्रामादि। नन्वावरणमेव नोक्तमत आह * वृतीति। * तेनैव, मनुनैव। * वृतिम्, आवृतिम्, कण्टकादिमयीम्। * तत्र, क्षेत्रसमन्ततः। तादृशीमुन्नतामिति शेषः। कीदृशीमित्याह * यामिति। अभिलक्ष्य परपार्श्वे इति शेषः। * उष्ट्रोऽपि उन्नतोऽपि धान्यादि न पश्येदित्यर्थः। छिद्रं वा वारयेदित्यत्र वाशब्दः चार्थे। क्वचित् चवारयेदित्येव पाठः। निवारयेदिति पाठान्तरम्। यथाश्रुतो वा वाशब्दः। तयोः मुखमनु तत्समीपे गच्छति येन तादृशामित्यर्थः। मुखोन्मितामिति पाठान्तरम्। अयम्भावः। तत्र क्षेत्रे समन्ततः उष्ट्रकर्तृकधान्यादिकर्मकावलोकनायोग्यां प्राकारसदृशीम् अत्युन्नताम् आवृतिं कुर्यात्। तत्र यानि छिद्राणि श्वादिमुखप्रवेशयोग्यानि तान्यपि निबध्यात्। तस्य यथाश्रुतत्वे श्वादिमुखप्रवेशयोग्यसर्वच्छिद्ररहितं यथा तथाऽत्युन्नतां तां कुर्यादिति तत्करणे प्रकारान्तरकथनमिति ॥ १६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि॰ अव. पशुविशेषेऽपि दण्डाभावमाह ।

या॰ महोक्षोत्सृष्टपशवः सूतिकागन्तुकादयः ।
पालो येषां च ते मोच्या दैवराजपरिप्लुताः ॥१६३ ॥

मि॰ महांश्चासावुक्षा च महोक्षो वृषः सेक्ता। उत्सृष्टपशवः वृषोत्सर्गादिविधानेन देवतोद्देशेन वा त्यक्ताः। सूतिका प्रसूता अनिर्दशाहा । आगन्तुकः स्वयूथात्परिभ्रष्टो देशान्तरादागतः । एते मोच्याः । परसस्यभक्षणेऽपि न दण्ड्याः। येषां च पालो विद्यते तेऽपि। दैवराजपरिप्लुताः दैवराजोपहताः सस्यनाशकारिणो न दण्ड्याः । आदिग्रहणाद्धस्त्यश्वादयो गृह्यन्ते ।

ते चोशनसोक्ताः,

अदण्ड्या हस्तिनो ह्यश्वाः प्रजापाला हि ते स्मृताः।
अदण्ड्यौ काणकुण्ठौ च ये शश्वत्कृतलक्षणाः ॥
अदण्ड्याऽऽगन्तुकी गौश्च सूतिका वाऽभिसारिणी।
अदण्ड्याश्चोत्सवे गावः श्राद्धकाले तथैव च॥इति।

अत्रोत्सृष्टपशूनामस्वामिकत्वेन दण्ड्यत्वासंभवात् दृष्टान्तार्थमुपादानम् । यथोत्सृष्टपशवो न दण्ड्या एवं महोक्षादय इति ॥ १६३ ॥

बा. १। अपिः पूर्वसमुच्चये । पूर्वार्द्धे पदद्वयम् । यथासम्भवं द्वन्द्व उभयत्रेत्याह *महानिति। अचतुरेत्यादिना निपातितोऽयम्। सेक्ता वृष इत्यन्वयः । साण्ड इति प्रसिद्धः । वक्ष्यमाणभिन्नः । कर्मधारयोऽग्रेऽपि । तेन तेषां तद्भिन्नानां न ग्रहणम् ।

अनिर्दशाहां गां सूतां वृषान् देवपशूंस्तथा । (अ.८।२४२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सपालान्वा विपालान्वा अदण्ड्यान्मनुरब्रवीत् ॥

इति मनोराह * अनिर्दशाहेति । अनिर्गतदशाहा गौरित्यर्थः।मानवे "चक्रशूलाङ्कितोत्सृष्टा वृषाः, हरिहरादिप्रतिमासंबन्धिपशवो देवपशव" इति कुल्लूकभट्टः । चशब्दबलान्निमित्तान्तरपरतयोत्तरार्धं व्याचष्टे * येषां चेति। विभिन्नविभक्तिकत्वेन यथाश्रुतान्वयासम्भवादाह * विद्यते इति । अध्याहारः। * सस्येति । परेत्यादिः । मोच्या इत्यस्यैवार्थं प्राग्वदाह * न दण्ड्या इति ! ते चोशनसोक्ता इति पाठः । तथा च मनुरित्यपपाठः । तथा तत्रापाठात् । तत्र हेतुमाह * प्रजेति * हि, यतः । राजसम्बन्धित्वात् । एकाक्षिविकलः काणः । पादरहितः कुण्ठः। पङ्गुरिति यावत्। शश्वद् वारं वारं सस्यनाशकत्वेन कृतं लक्षणम् अङ्कनं धनग्रहणादि वा येषाम् । ते च पुनः पुनः सस्यनाशकत्वेन दण्डिता इति यावत् । आगन्तुकी सूतिका अभिसारिणी या गर्भाधानार्थमभिसरति सा चेति त्रिविधा गौश्चादण्ड्या । राजगृहे उत्सवे श्राद्धसमये चेत्याद्यर्थः । असङ्गतिमंशे परिहरति * अत्रोत्सृष्टेति । उत्सृष्टवृषाणामपि गर्भार्थं गोकुले पालैर्धारणात्सपालत्वसम्भव इति तु मनुव्याख्यातारः ॥१६३॥

मि० अव. गोस्वामिन उक्तम् । इदानीं गोपं प्रत्युपदिश्यते !

या० यथाऽर्पितान् पशून्गोपः सायं प्रत्यर्पयेत्तथा ।
प्रमादमृतनष्टांश्च प्रदाप्यः कृतवेतनः ॥ १६४ ॥

मि० गोस्वामिना प्रातःकाले यथा गणयित्वा समर्पिताः पशवस्तथैव सायंकाले गोपो गोस्वामिने पशून् विगणय्य प्रत्यर्पयेत् । प्रमादेन स्वापराधेन मृता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नष्टांश्च पशून् कृतवेतनः कल्पितवेतनो गोपः स्वामिने दाप्यः । वेतनकल्पना च—

नारदेनोक्ता, (व्यव. ६ । १०)

गवां शताद्वत्सतरी धेनुः स्याद्द्विशताद् भृतिः ।
प्रतिसंवत्सरं गोपे सन्दोहश्चाष्टमेऽहनि ॥ इति ।

प्रमादनाशश्च मनुना स्पष्टीकृतः, (अ. ८ श्लो. २३२)

नष्टं जग्धं च कृमिभिः श्वहतं विषमे मृतम् ।
हीनं पुरुषकारेण प्रदद्यात्पाल एव तु ॥ इति ।

प्रसह्य चौरैरपहृतान् न दाप्यः ।

यथाह मनुः, (अ. ८ श्लो. २३३)

विघुष्य तु हृतं चौरैर्न पालो दातुमर्हति ।
यदि देशे च काले च स्वामिनः स्वस्य शंसति ॥ इति ।

दैवराजमृतानां पुनः कर्णादि प्रदर्शनीयम् ।

(अ. ८ श्लो. २३४)

कर्णौ चर्म च वालांश्च वस्तिं स्नायुं च रोचनाम् ।
पशुस्वामिषु दद्यात्तु मृतेष्वङ्गानि दर्शयेत् ।

इति मनुस्मरणात् ॥ १६४ ॥

बा. १ । यथेति भिन्नं पदं, तदर्थो *गणयित्वेति । तथेत्यस्य * तथैवेति । तस्य च विगणय्येत्येवार्थः । मृतेति निमित्तद्वयं नैकम्, अन्यतरवैयर्थ्यापत्तेरित्याह *मृतानिति । कृतेत्यनेन तदभावे । भृतिर्वेतनम् । प्रतीति पूर्वान्वयि । गोपे इत्युभयान्वयि । भृतिरित्यस्याग्रेऽप्यनुषङ्गः । * नाशश्च, नाशादि च । * नष्टमिति । तृतीयपादस्य सर्वत्र पूर्वत्रान्वयः । गोपालसम्बन्धिरक्षणाख्यपुरुषव्यापारेण हीनं रहितं क्षतं नष्टं दृष्टिगोचरातीतं कृमिभिर्जग्धं भक्षितं श्वभिः उपलक्षणत्वेन श्वापदादिभिर्हतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषमे श्वभ्रादिप्रदेशे पतनेन मृतं च गोपाल एव स्वामिने दद्यादित्यर्थः। *प्रसह्येति। चौरैर्बलादपहृतानेतान् गवादीन् स्वामिने गोपालो न दाप्य इत्यर्थः। एतेन चौरैर्बलादपहृतस्वात् पालात् स्वामिने पशुर्न दाप्य इति व्याख्यानमपास्तम्। * विघुष्येति। चौरैः पटहाद्युद्घोषेण प्रासिद्धमपहृतं पालो दातुं नार्हति, यदि तास्मिन्नेव देशे संनिहितोद्देशे हरणे तस्मिन्नेव काले हरणोत्तरमेव स्वस्य स्वामिने कथयतीत्यर्थः। शेषत्वाविवक्षायां षष्ठी। अन्यथा तु दाप्य एव। अत एव न दातुमर्हतीत्युक्तं, न तु न दाप्य इति। *तु पुनः, मरणोत्तरम्। पुनरित्येव पाठे त्वर्थे सः। *चर्म, त्वक्। * वालान्, लोमानि चिह्नभूतानि। वस्तिर्मूत्राधारोऽङ्गविशेषः। वस्तिर्नाभेर्द्वयोरध इत्यमरः। स्नायुर्वस्नसा। अथ वस्नसा स्नायुः स्त्रियामित्यमरः। पायुमिति पाठान्तरम्। रोचना गोरोचना। एतानि, *पशुस्वामिषु वैवक्षिकसप्तमी, दद्यात्।तुश्चार्थे। मृतेष्वित्युभयान्वयि। तथा च तेषु मृतेषु अन्यान्यप्यङ्गानि ज्ञातिज्ञापकानि शृङ्गखुरादीनि दर्शयेत् इत्यर्थः। अङ्कांश्चेति पाठे पशुदेहस्थितान्मुद्रादिचिह्नानपि दर्शयेदित्यर्थः। अङ्कांश्च दर्शयन्निति पाठे तेषु मृतेषु अङ्कान् चिह्नानि दर्शयन्सः कर्णादिकं तेभ्यो दद्यादित्यर्थः। अङ्कानीति पाठेऽप्येवम्। इति मनुवचनादिति पाठः। इति स्मरणादिति पाठेऽपि तथा॥ १६४॥

मि० अव. किञ्च।

या० पालदोषविनाशे तु पाले दण्डो विधीयते।
अर्द्धत्रयोदशपणः स्वामिनो द्रव्यमेव च॥१६५॥

मि० पालदोषेण पशुविनाशे अर्द्धाधिकत्रयोदशपणं दण्डं पालो दाप्यः, स्वामिनश्च द्रव्यं विनष्टप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुमूल्यं मध्यस्थकल्पितम् । दण्डपारिमाणार्थः श्लोकोऽन्यत्पूर्वोक्तमेव ॥ १६५ ॥

बा. १। किं चेति । अन्यदपि गोपं प्रत्युच्यते इत्यर्थः । तस्यानुषङ्गेण तुर्यपादे तस्य द्रव्यं देयत्वेन विधीयते चेति शाब्दोऽर्थः। तदनुरोधेनोभयत्र फलितमेवाह * अर्धाधिकत्रयोदशपणमिति । अधिकेन समासस्य विहितत्वादेवमुक्तम् । द्रव्यमिति मौलस्य व्याख्या * विनष्टेति । पालो दाप्य इत्यस्यानुषङ्गः । षष्ठी प्राग्वत् । पौनरुक्त्यं परिहरति * दण्डेति । प्रागुक्तवचनेनैव दण्डस्य प्राप्तत्वात्तमनूद्यार्धत्रयोदशपणत्वरूपतत्परिमाणांश एव अत्र विधेय इत्यर्थः ॥ १६५ ॥

मि० अव. गोप्रसङ्गात् गोप्रचारमाह ।

या० ग्रामेच्छया गोप्रचारो भूमी राजवशेन वा ।
द्विजस्तृणैधःपुष्पाणि सर्वतः स्ववदाहरेत् ॥१६६॥

मि० ग्रामेच्छया ग्राम्यजनेच्छया भूम्यल्पत्वमहत्त्वापेक्षया राजेच्छया वा गोप्रचारः कर्तव्यः । गवादीनां चरणार्थं कियानपि भूभागोऽकृष्टः परिकल्पनीय इत्यर्थः । द्विजस्तृणेन्धनाद्यभावे गवाग्निदेवतार्थं तृणकाष्ठकुसुमानि सर्वतः स्ववदनिवारित आहरेत् । फलानि त्वपरिवृतादेव ।

गोऽग्न्यर्थं तृणमेधांसि वीरुद्वनस्पतीनां च पुष्पाणि स्ववदाददीत फलानि चापरिवृतानामिति गौतमस्मरणात् ।

एतच्च परिगृहीतविषयम् । अपरिगृहीते द्विजव्यतिरिक्तस्यापि परिग्रहादेव स्वत्वसिद्धेः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथा तेनैवोक्तम्,

स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेष्विति।

यत्पुनरुक्तम्,

तृणं वा यदि वा काष्ठं पुष्पं वा यदि वा फलम्।
अनापृच्छन् हि गृह्णानो हस्तच्छेदनमर्हति ॥

इति, तद् द्विजव्यतिरिक्तविषयमनापद्विषयं वा गवादिव्यतिरिक्तविषयं वेति ॥ १६६ ॥

बा. १। विरोधात् ग्रामशब्दस्तत्स्थजनपरः प्राग्वदित्याह *ग्राम्येति। द्वितीयपादार्थद्वयमाह * भूम्यल्पत्वेति। तात्पर्यार्थमाह *गवादीनामिति। *चरक्षार्थमिति। चरणार्थमिति पाठान्तरम्। *तृणेति। अस्वामिकतृणाद्यन्तराभावे इत्यर्थः। गवाग्नीत्यनेनान्यार्थं तदभावः सूचितः। *सर्वतः, आवृतादनावृताच्च। * स्ववत्, स्वतुल्यम्। वातिप्रत्ययसूचितमाह *अनिवारित इति। अनेन निवारितः सन्न गृह्णीयादिति सूचितम्। इदमेव ततो न्यूनत्वम्। सर्वत इति पुष्पाणीति च सूचितमाह *फलानि त्वपरिवृतादेवेति। आवरणरहितादेवाहरेन्न तु सर्वत इत्यर्थः। तत्र हेतुमाह *गोऽग्न्यर्थमिति। वैकल्पिकत्वादवङ् न। इदं देवताया अप्युपलक्षणम्। * एधांसि, काष्ठानि। वीरुदित्युभयान्वयि।*च पुष्पाणि, पुष्णाणि च। चोऽग्रे त्वर्थे। *एतच्चेति। द्विजस्तृणैध इति मूलोक्तं चेत्यर्थः। *द्विजेति। वर्णत्रयान्यशूद्रादेरपीत्यर्थः। * तेनैव, * गौतमेनैव।

२। नारदविरोधं परिहरति * यत्पुनरिति। मूले द्विजस्योक्तत्वादाह * द्विजव्यतिरिक्तविषयमिति। अनापृच्छन्नित्यनेन तस्य परिगृहीतविषयताया एव लाभादिति भावः। तृणान्तराभावे इत्युक्तेस्तत्सत्त्वे द्विजस्यापि तत्र प्रश्नपूर्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रमेव ग्रहणं नान्यथा । अन्यलाभेऽनन्यगतेरभावादित्याशयेनाह * अनापद्विषयमिति । गवादीत्यनेनान्यार्थमग्रहणं सूचितम् । तदाह * गवादीति ॥ १६६ ॥

मि० अव० इदमपरं गवादीनां स्थानासनसौकर्यार्थमुच्यते ।

या० धनुःशतं परीणाहो ग्रामक्षेत्रान्तरं भवेत् ।
द्वे शते खर्व्वटस्य स्यान्नगरस्य चतुःशतम् ॥ १६७ ॥

मि० ग्रामक्षेत्रयोरन्तरं धनुःशतपरिमितं परीणाहः सर्वतो दिक्षु अनुसस्यं कार्यम् । खर्व्वटस्य प्रचुरकण्टकसन्तानस्य ग्रामस्य द्वे शते परीणाहः । नगरस्य बहुजनसंकीर्णस्य धनुषां चतुःशतपरिमितमन्तरं कार्यम् ॥ १६७ ॥

इति स्वामिपालविवादप्रकरणम् ॥

वा. १। *इदं, वक्ष्यमाणम् । स्थानं स्थितिर्गतिनिवृत्तिः । आसनमुपवेशनम् । *अन्तरं, व्यवधानम् । चतुर्हस्तं धनुः, धनुषां शतं, तस्य परिच्छेद्यत्वेनान्वयादाह * धनुःशतपरिमितामिति । यद्यपि परिणाहो विशालतेत्यमरस्तथापि सामानाधिकरण्याय धर्मिपरमत्र । तदाह * सर्वत इति । सस्यमित्यादेर्भूस्थानमिति विशेष्यं बोध्यम् ।

अत एव मनुः, (अ. ८ २३७)
धनुःशतं परीहारो ग्रामस्य स्यात्समन्ततः ।
शम्यापातास्त्रयो वाऽपि त्रिगुणो नगरस्य तु ॥

इति । शम्या दण्डयष्टिः । सा बाहुवेगेन प्रेरिता यत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूस्थाने पतति तादृशास्त्रय इत्यर्थः । त्रैगुण्यमुक्तान्यतरापेक्षया । प्रचुरेति खर्वटशब्दार्थः । कण्टकानां सन्तानो विस्तारो यत्र ते, प्रचुरास्ते यत्र तस्येत्यर्थः । बहुकण्टकिवृक्षाक्रान्तस्येति यावत् । ※ ग्रामस्य, क्षेत्रस्य चान्तरं धनुषामिति शेषः ॥ १६७ ॥

इति स्वामिपालविवादः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ अस्वामिविक्रयप्रकरणम् ॥ ११ ॥

मि० अव. संप्रत्यस्वामिविक्रयाख्यं व्यवहारपदमुपक्रमते । तस्य च लक्षणं—

नारदेनोक्तम्, (व्यव. ७ । १)

निक्षिप्तं वा परद्रव्यं नष्टं लब्ध्वाऽपहृत्य वा ।
विक्रीयतेऽसमक्षं यत् स ज्ञेयोऽस्वामिविक्रयः॥इति।

तत्र किमित्याह ।

या० स्वं लभेतान्यविक्रीतं क्रेतुर्दोषोऽप्रकाशिते ।
हीनाद्र रहो हीनमूल्ये वेलाहीने च तस्करः ॥ १६८॥

मि० स्वमात्मसंबन्धि द्रव्यम् अन्यविक्रीतमस्वामिविक्रीतं यदि पश्यति तदा लभेत गृह्णीयात् । अस्वामिविक्रयस्य स्वत्वहेतुत्वाभावात् । विक्रीतग्रहणं दत्ताहितयोरुपलक्षणार्थम् । अस्वामिकृतत्वेन तुल्यत्वात् ।

अत एवोक्तम्,

अस्वामिविक्रयं दानमाधिं च विनिवर्तयेत् । इति ।

क्रेतुः पुनरप्रकाशिते गोपिते क्रये दोषो भवति । तथा हीनात् तद्द्रव्यागमोपायहीनात्, रहसि चैकान्ते, संभाव्यद्रव्यादपि हीनमूल्येनाल्पतरेण च मूल्येन क्रये, वेलाहीने वेलया हीनो वेलाहीनः क्रयो रात्र्यादौ कृतस्तत्र च, क्रेता तस्करो भवति । तस्करवत् दण्डादिभाग्भवतीत्यर्थः ।

यथोक्तम्, (ना. व्यव. ७ । २)

द्रव्यमस्वामिविक्रीतं प्राप्य स्वामी समाप्नुयात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकाशक्रयतः शुद्धिः क्रेतुः स्तेयं रहःक्रयात्॥इति॥१६८॥

बा० १। * उपक्रमते, वक्तुं प्रारभते। आद्येन मूलकादिति शेषः। * निक्षिप्तमिति। निक्षिप्तं परद्रव्यं नष्टं वा परद्रव्यं लब्ध्वा परद्रव्यमपहृत्य वा यत्स्वामिनोऽसमक्षं विक्रीयते इत्याद्यर्थः। तत्र स्वामिनोऽसमक्षमित्यस्य परोक्षमित्यर्थः। तदनुज्ञामन्तरेणेति यावत्।

२। अथ मूलमवतारयति * तत्रेति। *तत्र एवंविधेऽस्वामिविक्रयस्थलेऽस्वामिविक्रेतृविषये * किं शास्त्रविधानं कीदृशं भवतीत्याशङ्कायामाहेत्यर्थः। स्वशब्द आत्मीयपर इत्याह * आत्मेति। ततश्चार्थात् धनमेवेत्याह * द्रव्यमिति। शेषं पूरयति अगत्या * यदीति। प्राग्वदाह * विक्रीतग्रहणमिति। * दत्ताहितयोः, दत्ताहितयोरपि। * उक्तं, कात्यायनेन।

द्वितीयपादार्थमाह * क्रेतुरिति।

३। उत्तरार्धार्थमाह * तथेति। हीनादित्यादीनां तस्करत्वेऽन्वयः। क्रयः सर्वत्र विशेष्यभूतो बोध्यः। * तद्द्रव्येति। अपहृताद्यनीप्सितमूल्यभूतद्रव्येत्याद्यर्थः। मूले रह इत्यव्ययम्। तदर्थमाह * रहसि चेति। उक्तेनापौनरुक्त्यायाह * संभाव्येति। यद्वस्तु यावन्मूल्यद्रव्यमर्हति तस्मादपि न्यूनेन मूल्येनेत्यर्थः। प्रकारान्तरमाह * अल्पेति। तस्करत्वातिदेशफलमाह * तस्करवदिति। तदीयदण्डादीत्यर्थः। आदिना शासनादिः। * यथोक्तमिति। नारदेनेति भावः। समाप्नुयादिति पाठः। प्रकाशं यथा स्यात्तथा यः क्रयस्तस्मात्। सार्वविभक्तिकस्तासिः अपादाने इति वा। * क्रेतुः, तत्कर्तुरित्यर्थः। क्रेतुरित्यग्रेऽप्यन्वेति॥ १६८॥

मि० अव. स्वाम्यभियुक्तेन क्रेत्रा किं कर्त्तव्यमि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यत आह।

या० नष्टापहृतमासाद्य हर्त्तारं ग्राहयेन्नरम्।
देशकालातिपत्तौ च गृहीत्वा स्वयमर्पयेत्॥ २६९॥

मि० नष्टमपहृतं वाऽन्यदीयं क्रयादिना प्राप्य हर्त्तारं विक्रेतारं नरं ग्राहयेत् चौरोद्धरणकादिभिः, आत्मविशुद्ध्यर्थं राजदण्डाप्राप्त्यर्थं च। अथाविदितदेशान्तरं गतः कालान्तरे वा विपन्नस्तदा मूलसमाहरणाशक्तेर्विक्रेतारमदर्शयित्वैव स्वयमेव तद्धनं नाष्टिकस्य समर्पयेत्। तावतैवासौ शुद्धो भवतीति श्रीधराचार्येण व्याख्यातम्।

तदिदमनुपपन्नम्। विक्रेतुर्दर्शनाच्छुद्धिरित्यनेन पौनरुक्त्यप्रसङ्गात्।

अतोऽन्यथा व्याख्यायते। नष्टापहृतमिति नाष्टिकं प्रत्ययमुपदेशः। नष्टमपहृतं वाऽऽत्मीयद्रव्यमासाद्य क्रेतृहस्तस्थं ज्ञात्वा तं हर्तारं क्रेतारं स्थानपालादिभिर्ग्राहयेत्। देशकालातिपत्तौ देशकालातिक्रमे स्थानपालाद्यसन्निधाने तद्विज्ञापनकालात् प्राक् पलायनाशङ्कायां स्वयमेव गृहीत्वा तेभ्यः समर्पयेत्॥१६९॥

बा० १। दूषयितुमेकदेशीयमतमनुवदति *नष्टमित्यादिना। मूले समाहारद्वंद्व इति भावः। तत्फलमाह * आत्मेत्यादि। उत्तरार्धार्थमाह * अथेति। मूले देशकालयोरतिपत्तिरिति सुप्सुपेति सप्तमीसमासः। तत्राद्येऽतिपत्तिर्गमनम्। देशशब्दश्च विशेषपरः, कालशब्दोऽपि, द्वितीयेऽतिपत्तिर्मरणम्—इत्याह * अविदितेति। * मूलेति। विक्रेत्रित्यर्थः। यद्वा मूल्येत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्वचित्तथैव पाठः । * तद्धनं, गृहीत्वेति शेषः । * शुद्धः, राज्ञोऽदण्ड्यश्च ।

२। अयंभावः । नष्टं वाऽपहृतं वाऽन्यदीयद्रव्यं क्रयप्रतिग्रहादिभिरस्वामिनः सकाशाद्यः कश्चन प्राप्य स्वयमप्यन्यस्मै विक्रीणीते तस्मात्क्रेता पुरुषस्तं विक्रेतारं रजनीचरादिभी राजपुरुषैर्ग्राहयेत्,स्वचौर्यनिवृत्त्यर्थं राजदण्डाप्राप्त्यर्थं च। अथ केनापि प्रकारेण तं ग्राहयितुं प्रदर्शयितुं वा न समर्थस्तदा तस्माद् गृहीतं द्रव्यं मूलस्वामिने समर्प्य स्वयं शुद्धो भवतीति ।

३। दूषयति * तदिदमिति । तत्र हेतुमाह * विक्रेतुरिति। वक्ष्यमाणेन मूलेनेत्यर्थः । स्वेष्टार्थमाह * अत इति । * नाष्टिकं प्रति, न तु द्वितीयक्रेतारं प्रति । अत एव तद्विरुद्धमाह * आत्मीयमिति । आसाद्येत्यस्यार्थमाह * क्रेत्रिति । * तं, नरम् । देशकालातिपत्ताविति षष्ठीतत्पुरुष इत्याह * देशकालातिक्रमे इति । तयोरतिक्रमणे इत्यर्थः । * तद्विज्ञापनकालादिति । स्थानपालादिभ्यः कथनकालादित्यर्थः । * गृहीत्वा, तामिति शेषः ॥ १६९ ॥

मि० अव. ग्राहिते हर्तरि किं कर्तव्यमित्यत आह ।

या० विक्रेतुर्दर्शनाच्छुद्धिः स्वामी द्रव्यं नृपो दमम् ।
क्रेता मूल्यमवाप्नोति तस्माद्यस्तस्य विक्रयी ॥ १७० ॥

मि० यद्यसौ गृहीतः क्रेता न मयेदमपहृतमन्यसकाशात्क्रीतमिति वक्ति तदा तस्य क्रेतुर्विक्रेतुर्दर्शनमात्रेण शुद्धिर्भवति । न पुनरसावभियोज्यः । किं तु तत्प्रदर्शितेन विक्रेत्रा सह नाष्टिकस्य विवादः ।

यथाह बृहस्पतिः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मूले समाहृते क्रेता नाभियोज्यः कथञ्चन ।
मूलेन सह वादस्तु नाष्टिकस्य विधीयते ॥ इति ।

तस्मिन् विवादे यद्यस्वामिविक्रयानिश्चयो भवति तदा तस्य नष्टापहृतस्य गवादिद्रव्यस्य यो विक्रयी विक्रेता तस्य सकाशात्स्वामी नाष्टिकः स्वीयं द्रव्यमवाप्नोति । नृपश्चापराधानुरूपं दण्डं, क्रेता च मूल्यमवाप्नोति । अथासौ देशान्तरं गतस्तदा योजनसंख्ययाऽऽनयनार्थं कालो देयः ।

प्रकाशं वा क्रयं कुर्यान्मूलं वापि समर्पयेत् ।
मूलानयनकालश्च देयस्तत्राध्वसंख्यया ॥ इति स्मरणात् ।

अथाविज्ञातदेशतया मूलमाहर्तुं न शक्नोति तदा क्रयं शोधयित्वैव शुद्धो भवति ।

असमाहार्यमूलस्तु क्रयमेव विशोधयेत् । इति वचनात् ।

यदा पुनः साक्ष्यादिभिर्दिव्येन वा क्रयं न शोधयति मूलं च न प्रदर्शयति तदा स एव दण्डादिभाग्भवति ।

अनुपस्थापयन्मूलं क्रयं वाऽप्यविशोधयन् ।
यथाभियोगं धनिने धनं दाप्यो दमं च सः ॥
इति स्मरणात् ॥ १७० ॥

बा० १ । * हर्तरि, क्रेतरि । * किमिति । तेनैवेति भावः । * गृहीतः, ग्राहितः । * अपहृतमिति । किं त्विति शेषः । मात्रपदलब्धमेवाह * न पुनरिति । पश्चादपीत्यर्थः । * मूले, विक्रेतरि । यस्माक्रीतं तेन तस्मिन्निति यावत् । एवमग्रेऽपि । सतिसप्तमी । * नाष्टिकस्य, नष्टधनस्वामिनः ।

२ । अथाग्रिमार्थमाह * तस्मिन्नित्यादिना । आदौ तुर्यपा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दार्थमाह * तस्येति। तस्मादित्यस्यार्थमाह * तस्य सकाशादिति । दण्डाभ्रमायाह * स्वीयमिति । विशेषानुक्तेराह * अवाप्नोतीति ।

३ । विशेषमाह * अथासाविति । * विक्रेतेत्यर्थः । कातीयमाह * प्रकाशमिति । * तत्र, विवादे । * क्रयं शोधयित्वेति । स्वक्रये साक्ष्यादिप्रदर्शनेनेत्यर्थः । * शुद्धः, अतस्करः । तमेवाह * असमाहार्येति । * स एव, क्रेतैव । तमेवाह * अनुपस्थापयन्निति । अप्रदर्शयन्नित्यर्थः । * यथेति । आभियुज्यमानमनतिक्रम्येत्यर्थः । * दमं च, राज्ञेति शेषः । * सः, क्रेतेति विशेष्यम् ॥ १७० ॥

मि० अव. स्वं लभेतान्याविक्रीतमित्युक्तं, तल्लिप्सुना किं कर्तव्यमित्यत आह ।

या० आगमेनोपभोगेन नष्टं भाव्यमतोऽन्यथा ।
पञ्चबन्धो दमस्तस्य राज्ञे तेनाविभाविते ॥ १७१ ॥

मि० आगमेन रिक्थक्रयादिना उपभोगेन वा मदीयमिदं द्रव्यं, तच्चैवं नष्टमपहृतं वेत्यपि भाव्यं साधनीयं तत्स्वामिना । अतोऽन्यथा तेन स्वामिना अविभाविते पञ्चबन्धो नष्टद्रव्यस्य पञ्चमांशो दमो नाष्टिकेन राज्ञे देयः ।

अत्र चायं क्रमः । पूर्वस्वामी नष्टमात्मीयं साधयेत् । ततः क्रेता चौर्यपरिहारार्थं मूल्यलाभाय च विक्रेतारम् आनयेत । अथानेतुं न शक्नोति तदाऽऽत्मदोषपरिहाराय क्रयं साधयित्वा द्रव्यं नाष्टिकस्य समर्पयेदिति ॥ १७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बा० १ । व्यवहितसंगतिमाह *स्वामिति । *तदिति । तल्लाभेच्छुना स्वामिनेत्यर्थः। उपभोगेन वेति पाठः । *एवं, प्रकारेण। नष्टमित्युपलक्षणमित्याह *अपहृतंवेति । मूलेऽतोन्यथेत्यस्यैव विवरणं *तेनाविभाविते इति । तदर्थमाह *तेन स्वामिनेति । नाष्टिकेनेत्यर्थः । *अविभाविते, असाधिते। तस्येत्यस्यार्थमाह *नष्टद्रव्यस्येति । तत्रेति तत्र पाठान्तरम् । अर्थः स एव । यद्यपि बन्ध आधौ च बन्धने इति कोशस्तथाप्युभयत्र लक्ष्यार्थमाह *पञ्चमांश इति । तच्छोधनेनैव शुद्धेः दानाभावसंदेहाभावाय प्रागुक्तक्रमं स्पष्टयति । * अत्र चेति । * आत्मदोषेति । चौर्येत्यर्थः । * साधयित्वेति । साक्ष्यादिभिरिति भावः । * द्रव्यं, तदीयम् ॥ १७१ ॥

मि० अव. तस्करस्य प्रच्छादकं प्रत्याह ।

या० हृतं प्रनष्टं यो द्रव्यं परहस्तादवाप्नुयात् ।
अनिवेद्य नृपे दण्ड्यः स तु षण्णवतिं पणान् ॥ १७२॥

मि० हृतं प्रनष्टं वा चौरादिहस्तस्थं द्रव्यमनेन मदीयं द्रव्यमपहृतमिति नृपस्यानिवेद्यैव दर्पादिना यो गृह्णाति असौ षडुत्तरान् नवतिं पणान् दण्डनीयः। तस्करप्रच्छादकत्वेन दुष्टत्वात् ॥ १७२ ॥

बा० १ * । प्रच्छादकमिति । स्वेनैव द्रव्यस्य ततो ग्रहात्फलाभावेन कारुण्येन च राजादावप्रकाशकमित्यर्थज्ञानाय मूले परहस्तादित्युक्तम् । यद्वा । परहस्तम् अतति गच्छतीति व्युत्पत्त्या प्रथमान्तं द्रव्यविशेषणम् । तदाह * चौरादिहस्तस्थमिति । आदिनोदासीनादिग्रहणम् । तथा चादौ अग्रे च तस्करग्रहणमप्युपलक्षणमिति भावः । नृपस्येति शेषे षष्ठी । दर्पादीति आदि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ना भयप्रार्थनादि । लिङ्गर्थोऽविवक्षित इत्याह * गृह्णातीति । प्राग्वदाह * षडिति । तत्परिमितान्पणान् । तत्र दोषान्तराभावाद्धेतुमाह * तस्करेति ॥ १७२ ॥

मि० अव. राजपुरुषानीतं प्रत्याह ।

या० शौल्किकैः स्थानपालैर्वा नष्टापहृतमाहृतम् ।

अर्वाक्संवत्सरात्स्वामी हरेत परतो नृपः ॥१७३ ॥

मि० यदा तु शुल्काधिकारिभिः स्थानरक्षिभिर्वा नष्टमपहृतं द्रव्यं राजपार्श्वं प्रत्यानीतं तदा संवत्सरादर्वाक् प्राप्तश्चेत् नाष्टिकस्तद्द्रव्यमाप्नुयात् । ऊर्ध्वं पुनः संवत्सराद्राजा गृह्णीयात् । स्वपुरुषानीतं च द्रव्यं जनसमूहेषूद्घोष्य यावत्संवत्सरं राज्ञा रक्षणीयम् ।

यथाह गौतमः, प्रनष्टस्वामिकमधिगम्य राज्ञे प्रब्रूयुर्विख्याप्य संवत्सरं राज्ञा रक्ष्यमिति ।

यत्पुनर्मनुना विध्यन्तरमुक्तम् । (अ. ८ श्लो. ३०)

प्रनष्टस्वामिकं द्रव्यं राजा त्र्यब्दं निधापयेत् ।

अर्वाक् त्र्यब्दाद्धरेत्स्वामी परतो नृपतिर्हरेत् ॥

इति, तत् श्रुतवृत्तसंपन्नब्राह्मणविषयम् । रक्षणनिमित्तषड्भागादिग्रहणं च—

तेनैवोक्तम्, (मनु. अ. ८ श्लो. ३३)

आददीताथ षड्भागं प्रनष्टाधिगमान्नृपः ।

दशमं द्वादशं वापि सतां धर्ममनुस्मरन् ॥ इति ।

तृतीयद्वितीयप्रथमसंवत्सरेषु यथाक्रमं षष्ठादयो भागा वेदितव्याः । प्रपञ्चितं चैतत्पुरस्तात् ॥ १७३ ॥

बा० १ । शुल्कं राजग्राह्यः करः । आहृतमित्यस्यार्थमाह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

* राजेति। परत इत्यस्यार्थमाह *ऊर्ध्वमिति। विशेषमाह * स्वेति। * प्रब्रूयुः, तत्पुरुषाः। * विख्याप्य, जनसमूहेषूद्घोष्य।

२। विरोधं परिहरति * यत्पुनरिति। प्रनष्टस्वामिकामिति पाठः। पाठान्तरेऽदृष्टस्वामिकमित्यर्थः। एवं गतिद्वयं प्रागपि। तत्र व्यस्तपाठोऽपि। * श्रुतेति। वेदशास्त्रसदाचरणपूर्णेत्यर्थः। उत्तरसङ्गतये प्राग्वदाह * रक्षणेति। बहुव्रीहिः। एवमग्रेऽपि। आद्यर्थो वचने एव स्फुटः। * तेनैव, मनुनैव। * अथ, रक्षणानन्तरम्। * षड्भागम्, षट्त्वसंख्यापूरकभागम्। *प्रनष्टाधिगमादिति। अधिगमे कर्मणि घञ्। प्रनष्टादधिगम्यमानात् द्रव्यादित्यर्थः। यद्वा प्रनष्टस्याधिगमात्प्राप्तिपूर्वकरक्षणाद्धेतोरित्यर्थः।

३। व्यवस्थामाह * तृतीयेति। भागानुसारेण व्युत्क्रम इति भावः।

बृहस्पतिः,

राजाऽऽददीत षड्भागं नवमं द्वादशं तथा।
शूद्रविट्क्षत्रजातीनां विप्रात् गृह्णीत विंशकम्॥
त्र्यब्दादूर्ध्वं तु नागच्छेत्तत्र स्वामी कथं चन।
तदा गृह्णीत तद् राजा ब्रह्मस्वं ब्राह्मणान् श्रयेत्॥ इति।

बौधायनः,

अब्राह्मणस्य प्रनष्टस्वामिकरिक्थं संवत्सरं परिपाल्य राजा हरेदिति।

नारदः, (व्यव. ३। १८)

अस्वामिकमदायादं दशवर्षस्थितं ततः।
राजा तदात्मसात्कुर्यादेवं धर्मो न हीयते॥ इति।

एतेषामपि व्यवस्था प्रागेवोक्ता। तदाह * प्रपञ्चितमिति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र च प्रनष्टस्वामिकद्रव्ये एकवर्षत्रिवर्षदशवर्षधारणविकल्पानां व्यवस्था दूरतमदेशवर्तितदीयपुत्रादिदायादवार्तायां सत्यां नानाविधानेकगमनप्रतिबन्धसम्भवे वा ऽवगन्तव्येति तु कल्पतरुः। * पुरस्तादिति। अत्रैवाध्याये इति भावः॥ १७३॥

मि० अव. मनूक्तषड्भागादिग्रहणस्य द्रव्यविशेषे अपवादमाह।

या० पणानेकशफे दद्याच्चतुरः पञ्च मानुषे।
महिषोष्ट्रगवां द्वौ द्वौ पादं पादमजाविके॥ १७४॥

मि० एकशफे अश्वादौ प्रनष्टाधिगते तत्स्वामी राज्ञे रक्षणनिमित्तं चतुरः पणान् दद्यात्। मानुषे मनुष्यजातीये द्रव्ये पञ्च पणान्। महिषोष्ट्रगवां रक्षणनिमित्तं प्रत्येकं द्वौ द्वौ पणौ। अजाविके पुनः प्रत्येकं पादं पादम्। दद्यादिति सर्वत्रानुषज्यते। अजाविकमिति समासनिर्देशेऽपि पादं पादमिति वीप्साबलात्प्रत्येकं संबन्धोऽवगम्यते॥ १७४॥

इत्यस्वामिविक्रयप्रकरणम्।

बा. १। महिषोष्ट्रगवामित्यार्षत्वात्साधुः। * प्रनष्टाधिगते, सति। एवमग्रेऽपि। धनदाने निमित्तमाह * रक्षणेति। द्वंद्वात्समुदाये प्राप्तावाह * प्रत्येकमिति। उभयत्र। अजाविके इति प्राग्वत्। तत्र द्वितीये उपपत्तिमाह * अजेति। * वीप्सेति। एवं प्रागपि बोध्यम्॥ १७४॥

इत्यस्वामिविक्रयप्रकरणम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ दत्ताप्रदानिकप्रकरणम् ॥ १२ ॥

मि० उ. अधुना विहिताविहितमार्गद्वयाश्रयतया दत्तानपाकर्म दत्ताप्रदानिकमिति च लब्धाभिधानद्वयं दानाख्यं व्यवहारपदम् अभिधीयते।

तत्स्वरूपं च नारदेनोक्तम्, (व्यव. ४ । १)

दत्त्वा द्रव्यमसम्यग्यः पुनरादातुमिच्छति ।
दत्ताप्रदानिकं नाम व्यवहारपदं हि तत् ॥ इति ।

असम्यक् अविहितमार्गाश्रयेण द्रव्यं दत्त्वा पुनरादातुमिच्छति यस्मिन् विवादपदे तद्दत्ताप्रदानिकम् । दत्तस्याप्रदानं पुनर्हरणं यस्मिन्दानाख्ये तद्दत्ताप्रदानिकं नाम व्यवहारपदम् । विहितमार्गाश्रयत्वेन तत्प्रतिपक्षभूतं तदेव व्यवहारपदं दत्तानपाकर्मेत्यर्थादुक्तं भवति । दत्तस्यानपाकर्म अपुनरादानं यत्र दानाख्ये विवादपदे तद्दत्तानपाकर्म । तच्च देयादेयादिभेदेन चतुर्विधम् ।

यथाह नारदः, (व्यव. ४ । २)

अथ देयमदेयं च दत्तं चादत्तमेव च ।
व्यवहारेषु विज्ञेयो दानमार्गश्चतुर्विधः ॥ इति ।

तत्र देयमित्यनिषिद्धदानक्रियायोग्यमुच्यते । अदेयम् अस्वतया निषिद्धतया वा दानानर्हम् । यत्पुनः प्रकृतिस्थेन दत्तमव्यावर्तनीयं तद्दत्तमुच्यते । अदत्तं तु यत्प्रत्याहरणीयं तत्कथ्यते ।

अव. तदेतत्संक्षेपतो निरूपयितुमाह ।

मि० स्वं कुटुम्बाविरोधेन देयम् ।

मि० स्वमात्मीयं कुटुम्बाविरोधेन कुटुम्बानुपरोधे-

११०४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न कुटुम्बभरणावशिष्टमिति यावत् । तद्द्यात् । तद्भरणस्यावश्यकत्वात् ।

तथाच मनुः, (अ. ८ श्लो. ३५)

वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः।
अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत् ॥ इति।

कुटुम्बाविरोधेनेत्यनेनादेयमेकविधं दर्शयति । स्वं दद्यादित्यनेन च अस्वभूतानाम् अन्वाहितयाचितकाधिसाधारणनिक्षेपाणां पञ्चानामप्यदेयत्वं व्यतिरेकतो दर्शितम् ।

यत्पुनर्नारदेनाष्टविधत्वमदेयानामुक्तम्, (व्यव.४)

अन्वाहितं याचितकमाधिः साधारणं च यत् ।
निक्षेपः पुत्रदारश्च सर्वस्वं चान्वये सति ॥ (४)
आपत्स्वपि हि कष्टासु वर्तमानेन देहिना ।
अदेयान्याहुराचार्या यच्चान्यस्मै प्रतिश्रुतम् ॥ इति,(५)

तद् अदेयत्वमात्राभिप्रायेण । न पुनः स्वत्वाभावाभिप्रायेण । पुत्रदारसर्वस्वप्रतिश्रुतेषु स्वत्वस्य सद्भावात् । अन्वाहितादीनां स्वरूपं प्रागेव प्रपञ्चितम् ।

मि० अव. स्वं दद्यादित्यनेन दारसुतादेरपि स्वत्वाविशेषेण देयत्वप्रसङ्गे प्रतिषेधमाह ।

या० दारसुतादृते ॥
नान्वये सति सर्वस्वं यच्चान्यस्मै प्रतिश्रुतम् ॥ १७५॥

मि० दारसुतादृते दारसुतव्यतिरिक्तं स्वं दद्यान्न दारसुतमित्यर्थः । तथा पुत्रपौत्राद्यन्वये विद्यमाने सर्वं धनं न दद्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुत्रानुत्पाद्य संस्कृत्य वृत्तिं चैषां प्रकल्पयेत् ।
इति स्मरणात् ।

तथा हिरण्यादिकमन्यस्मै प्रतिश्रुतमन्यस्मै न देयम् ॥ १७५ ॥

बा. १। *अधुनेति । दानप्रसङ्गादिति भावः । तत्र तावदेतत्प्रकरणाभिधेयं प्रमेयं निष्कृष्टमाह * विहितेति । यथासंख्यमन्वयः। विहितमार्गाश्रयं दत्तानपाकर्माख्यम्, अविहितमार्गाश्रयं दत्ताप्रदानिकाख्यमित्यवान्तरभेदः । तदाह * इति चेति । किंचेतीत्यर्थः । उभयसामान्यमाह * दानाख्यमिति । चस्त्वर्थे । तत्रैकोक्तेर्न्यूनतानिरासाय नारदीयं व्याचष्टे * असम्यगिति । अस्यैवार्थमाह * अविहितेति । तत्र य इत्यस्य कश्चिदित्यर्थः । अत एवासंभवान्न तस्य तच्छब्देन परामर्श इत्याकाङ्क्षानिरासाय शेषं पूरयति * यस्मिन्निति । तस्य योगार्थमप्याह * दत्तस्येति । अप्रदानमिति च्छेदः । अत एवाह * पुनरिति । षष्ठीसमासगर्भो मत्वर्थीयष्ठन् । अविहितेत्यादिना तत्स्वरूपनिरुक्त्यैव तद्विपरीतरूपस्य दत्तानपाकर्मणः स्वरूपमर्थासिद्धमेवेति हिना सूचितमेवेति न पृथक्कथितमित्याह * विहितेति । * तदेव, दानाख्यमेव । तद्योगार्थमाह * दत्तस्येति । अनपाकर्मेत्यस्यार्थः * अपुनरिति । शास्त्रविहितमार्गेणैव दत्तत्वात्पुनरादानस्य निषिद्धत्वेनापुनर्ग्रहणमित्यर्थः ।

२ । * तच्च, द्विविधं दानाख्यं व्यवहारपदं च । एकैकस्य द्वैविध्याच्चतुर्विधत्वं, तदाह * अथदेयमिति । देयं दत्तं चेति द्वयं दत्तानपाकर्मभेदः । अदेयमदत्तं चेति द्वयं दत्ताप्रदानिकभेदः । एवं तत्र दानमार्गश्चतुर्विधो विज्ञेय इत्यर्थः । *तत्र, तेषां मध्ये । *अनिषिद्धेति । अनिषिद्धा या दानक्रिया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तद्योग्यमित्यर्थः । कुटुम्बाविरोधि स्वीयद्रव्यं हि तादृशम् । *अस्वतयेति । अन्वाहितादिकमस्वतया दानानर्हं, कुटुम्बपोषणेऽपर्याप्तं तन्मात्रपर्याप्तं वा स्वं द्रव्यं निषिद्धतया दानानर्हमिति विवेकः । *अव्यावर्तनीयमिति । अपुनर्ग्राह्यमित्यर्थः । *यत्प्रत्याहरणीयमिति । यथाकथंचिद्दत्तं पुनर्ग्राह्यमित्यर्थः ।

३ । नारदोक्तार्थपरतया मूलमवतारयति * तदेतदिति । पूर्वोक्तं सर्वमित्यर्थः । प्राग्वदाह * आत्मीयमिति । स्वतस्तस्य तदविरोधादाह * अनुपरोधेनेति । तदविघातेनेत्यर्थः । तस्यापि तात्पर्यार्थमाह * कुटुम्बभरणेति । देयमित्यस्यार्थमाह * दद्यादिति । विशेषणफलमाह * तदिति । कुटुम्बेत्यर्थः । *वृद्धौ, अशीत्युत्तरसंख्याकौ । * शिशुः, षोडशन्यूनः । * अकार्यशतमपि, अकार्यदुष्प्रतिग्रहाद्यानन्त्यमपि । * मनुरिति । इतीत्यादिः । एवमग्रेऽपि ।

४। पूर्वं नारदोक्त्या अस्वतयेत्यादिना अदेयं द्विविधमुक्तम् । अतः संक्षेपप्रकारमेवाह * स्वमिति । आद्यादेयं व्यतिरेकेण मूलकृता दर्शितमित्याह * स्वं दद्यादिति । * अन्वाहितेति । अत्र क्रमस्य वक्ष्यमाणनारदीयस्य विवक्षितत्वान्न दोषः । द्वन्द्वोत्तरपदकद्वन्द्वो वा । एवं कुटुम्बेत्यनेन तदपर्याप्तं निषिद्धतया न देयमिति द्वितीयमप्यदेयं व्यतिरेकेणैव दर्शितमित्यपि बोध्यम् । तथा च अस्वम् अदेयं, स्वमपि तदपर्याप्तमदेयमिति द्विविधमदेयमिति सिद्धमिति तात्पर्यम् ।

५। व्याख्यात्रा ऽन्वाहितादिपञ्चानामदेयत्वमुक्तं, नारदेन त्वष्टानामिति तद्विरोधमाह *यत्पुनरिति । कष्टास्वित्यापद्विशेषणम् । *कष्टासु,अत्यन्तदुःखदापत्स्वपि वर्त्तमानेनेत्याद्यर्थः । काष्ठास्विति पाठे सर्वासु दिक्षु आपत्स्वपीत्याद्यर्थः । तं परिहरति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*तदिति । मात्रं कात्स्न्र्ये । *न पुनः, न तु । अन्वाहिताद्यष्टानामेकगणपाठो ऽदेयत्वमात्रसाम्येन, न तु अस्वत्वेनेति भावः । अत्र हेतुमाह * पुत्रेति । * प्रतिश्रुतेषु, त्रिषु । चस्त्वर्थे ।

६ । एवमाद्यपादं व्याख्याय द्वितीयपादांशं व्याख्यातुमवतारयति * स्वमिति । दारसुतग्रहणमुपलक्षणमित्याह *दारसुतादेरिति । समाहारद्वन्द्वस्तत्र । तदाह * दारसुतमिति ।

७ । तृतीयपादं व्याचष्टे * तथेति । मनुमाह * पुत्रानिति । * वृत्तिं, जीविकाम् ।

८ । तुर्यपादं व्याचष्टे * तथेति । यत्पदार्थमाह *हिरण्यादिकमिति ॥ १७५ ॥

मि०अव. एवं दारसुतादिव्यतिरिक्तं देयमुक्त्वा प्रसङ्गाददेयधनग्रहणं च प्रतिग्रहीत्रा प्रकाशमेव कर्तव्यमित्याह।

या० प्रतिग्रहः प्रकाशः स्यात्स्थावरस्य विशेषतः ।

मि० प्रतिग्रहणं प्रतिग्रहः स प्रकाशः कर्तव्यः विवादनिराकरणार्थम् । स्थावरस्य च विशेषतः प्रकाशमेव ग्रहणं कार्यम् । तस्य सुवर्णादिवदात्मनि स्थितस्य दर्शयितुमशक्यत्वात् ॥

मि० अव. एवं प्रासङ्गिकमुक्त्वा प्रकृतमनुसरन्नाह ।

या० देयं प्रतिश्रुतं चैव दत्त्वा नापहरेत्पुनः ॥१७६ ॥

मि० देयं प्रतिश्रुतं चैव । यद् यस्मै धर्मार्थं प्रतिश्रुतं तत्तस्मै देयमेव, यद्यसौ धर्मात्प्रच्युतो न भवति । प्रच्युते न पुनर्दातव्यम् । प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्यादिति गौतमस्मरणात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दत्त्वा नापहरेत्पुनः । न्यायमार्गेण यद्दत्तं तत्सप्तविधमपि पुनर्नापहर्तव्यम् । किन्तु तथैवानुमन्तव्यम् । यत्पुनरन्यायेन दत्तं तद् अदत्तं षोडशप्रकारमपि प्रत्याहर्तव्यमेवेत्यर्थादुक्तं भवति ।

नारदेन च— (व्यव. ४)

दत्तं सप्तविधं प्रोक्तमदत्तं षोडशात्मकम् । (३)
इति प्रतिपाद्य दत्तादत्तयोः स्वरूपं विवृतम्,
पण्यमूल्यं भृतिस्तुष्ट्या स्नेहात्प्रत्युपकारतः ।
स्त्रीशुल्कानुग्रहार्थं च दत्तं दानविदो विदुः ॥ (८)
अदत्तं तु भयक्रोधशोकवेगरुजान्वितैः ।
तथोत्कोचपरीहासव्यत्यासच्छलयोगतः ॥ (९)
बालमूढास्वतन्त्रार्तमत्तोन्मत्तापवर्जितम् ।
कर्ता ममेदं कर्मेति प्रतिलाभेच्छया च यत् ॥(१०)
अपात्रे पात्रमित्युक्तेऽकार्ये वा धर्मसंहिते ।
यद्दत्तं स्यादविज्ञानाददत्तमिति तत्स्मृतम् ॥(११)इति ।

अयमर्थः । पण्यस्य क्रीतद्रव्यस्य यन्मूल्यं दत्तम् । भृतिर्वेतनं कृतकर्मणे दत्तम् । तुष्ट्या बन्दिचारणादिभ्यो दत्तम् । स्नेहाद् दुहितृपुत्रादिभ्यो दत्तम् । प्रत्युपकारतः उपकृतवते प्रत्युपकाररूपेण दत्तम् । स्त्रीशुल्कं परिणयनार्थं कन्याज्ञातिभ्यो यद्दत्तम् । यच्चानुग्रहार्थमदृष्टार्थं दत्तम् । तदेतत्सप्तविधमपि दत्तमेव, न प्रत्याहरणीयम् ।

भयेन बन्दिग्राहादिभ्यो दत्तम् । क्रोधेन पुत्रादिभ्यो वैरनिर्यातनायान्यस्मै दत्तम् । पुत्रवियोगादिनिमित्तशोकावेशेन दत्तम् । उत्कोचेन का-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्यप्रतिबन्धनिरासार्थमधिकृतेभ्यो दत्तम्। परिहासेनो- पहासेन दत्तम्। एकः स्वं द्रव्यमन्यस्मै ददात्यन्योऽपि तस्मै ददातीति दानव्यत्यासः। छलयोगतः शतदा- नमभिसन्धाय सहस्रमिति परिभाष्य ददाति। बा- लेनाप्राप्तषोडशवर्षेण। मूढेन लोकवेदानभिज्ञेन। अस्वतन्त्रेण पुत्रदासादिना। आर्तेन रोगाभिभूतेन। मत्तेन मदनीयमत्तेन, उन्मत्तेन वातिकाद्युन्मादग्रस्तेन वा अपवर्जितं दत्तम्।

तथाऽयं मदीयं कर्म करिष्यतीति प्रतिलाभेच्छया दत्तम्। अचतुर्वेदाय चतुर्वेदोऽहमित्युक्तवते दत्तम्। यज्ञं करिष्यामीति धनं लब्ध्वा द्यूतादौ विनियुञ्जानाय दत्तम्-इत्येवं षोडशप्रकारमपि दत्तम् अदत्तमित्युच्यते। प्रत्याहरणीयत्वात्।

आर्तदत्तस्यादत्तत्वं धर्मकार्यव्यतिरिक्तविषयम्।
स्वस्थेनार्तेन वा दत्तं श्रावितं धर्मकारणात्।
अदत्त्वा तु मृते दाप्यस्तत्सुतो नात्र संशयः॥

इति कात्यायनस्मरणात्॥

तथेदमपरं संक्षिप्तार्थवचनं सर्वविवादसाधारणम्। (मनु अ. ८ श्लो. १६५)।

योगाधमनविक्रीतं योगदानप्रतिग्रहम्।
यस्य चाप्युपधिं पश्येत्तत्सर्वं विनिवर्तयेत्॥ इति।

योग उपाधिः। येनागामिनोपाधिविशेषेणाधिक्रय- दानप्रतिग्रहाः कृतास्तदुपाधिविगमे तान् क्रयादीन्वि- निवर्तयेदित्यस्यार्थः। यः पुनः षोडशप्रकारमपि अदत्तं गृह्णाति यश्चादेयं प्रयच्छति तयोर्दण्डो—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नारदेनोक्तः, (व्यव. ४ । १२)

गृहीत्वदत्तं यो लोभाद्यश्चादेयं प्रयच्छति ।

अदेयदायको दण्ड्यस्तथाऽदत्तप्रतीच्छकः ॥ इति ।

इति दत्ताप्रदानिकं नाम प्रकरणम् ॥ १७८ ॥

बा. १। उत्तरसङ्गतिमाह * एवमिति । उक्तप्रकारेणेत्यर्थः। चो वाक्यालङ्कारे । * आहेति । अर्धेनेति भावः । अत एव तदवतरणपूर्वकं वक्ष्यति । प्रतिग्रहे भावे घञित्याह * प्रतिग्रहणमिति । स्यादिति विधिरित्याह * कर्तव्य इति । तत्फलमाह * विवादेति । इदमुभयान्वायि । तस्य विशेषेण तथा प्रतिग्रहे हेतुमाह * तस्येति । स्थावरस्येत्यर्थः ।

२ । द्वितीयार्धं प्रकरणसम्बन्धमवतारयति * एवमिति । यदि तु प्रतिग्रहशब्देन करणघञोत्सर्गो दानाख्य एवोच्यते तदपि प्रकृतसम्बद्धमेवेति बोध्यम्। पादभेदेन वाक्यद्वयं न तु देयादिभेदेनेत्याह * यदिति । विशेषमाह * धर्मार्थमिति । अनेनान्यस्यातथात्वं सूचितम् । प्राग्वदेवोक्तहेतोराह * यद्यसाविति । यस्मै दातुं प्रतिश्रुतं स इत्यर्थः ।

३ । एवं देयादेयविषयं वक्तव्यमभिधाय दत्तादत्तविषयं वक्तव्यं वक्तुं तस्य द्वितीयपादं सप्रतीकं व्याचष्टे * दत्त्वेत्यादि। * पुनः, पश्चात् । दत्तानपहरणकथनेनैव तत्प्रतिपक्षभूतस्यादत्तप्रत्याहरणस्यापि कथनमर्थसिद्धमेव नारदवादित्याह * यत्पुनरिति । चो ऽप्यर्थे । * दत्तं तत्सप्तविधमिति ।

तत्र त्वष्टावदेयानि देयमेकविधं स्मृतम् । (व्यव. ४ । ३)

इति अस्यादिः ।

४। नारदीयं सर्वं क्रमेण व्याचष्टे * अयमर्थ इति । क्रीतद्रव्यस्येति बहुव्रीहिः । * तुष्ट्या, सन्तोषेण । * दुहित्रिति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दुहितुः पुत्रादिभ्य इत्यर्थः । दृष्टस्योक्तत्वात् अनुग्रहपदेन तदित्याह * अदृष्टेति । सर्वं वाक्यमिति न्यायेनाह * दत्तमेवेति । एवव्यावर्त्यमाह *न प्रत्याहरणीयमिति । नारदीये दत्तपदं पण्यमूल्यादिशेषतया स्वतन्त्रतया च तन्त्रेणोपात्तमिति भावः । यत्त्वादृष्टार्थमित्येव पाठे ऽनुग्रहार्थमित्यस्यैव व्याख्यानं तद् बोध्यम् ।

५। अदत्तं त्विति व्याचष्टे * भयेनेत्यादि । तत्र भयं च क्रोधश्च शोकश्च तेषां वेगस्तेन रुजा पीडा तया अन्वितैरिति शाब्दोऽर्थः । तत्फलितमाह * भयेनेत्यादि । *बन्दीति कारागृहाधिकृतादिभ्य इत्यर्थः । निर्यातनं दूरीकरणम् । * अन्यस्मै, येन साकं पित्रादीनां वैरं तस्मै पुत्रादीति पाठान्तरम् । छलसंबद्धमेव योगपदं नान्येन । योगत इति तृतीयान्तात्सार्वविभक्तिकस्तासिरित्याह * उत्कोचेनेति । * तस्माइति । तस्माएव । तद् अन्यद्वा ददातीत्यर्थः । * शतदानमिति । शतं दीयमानमिति मनसि निधाय कारणोच्छ्वासादिवशात्सहस्रं दीयते इत्युक्तौ सत्यां मनसो ऽनभिप्रेतमप्युक्त्यनुसारेण यद् दीयते तादित्यर्थः । उन्मत्तान्तेन द्वंद्वोत्तरपदकद्वंद्वेनापवर्जितमित्यस्य दत्तमित्यर्थकस्य साधनं कृतेति समास इत्याह * बालेनेत्यादि । * मदनीयेति । तत्साधनद्रव्येण यो मत्तस्तेनेत्यर्थः ।

६। कर्त्तेति व्याचष्टे * तथेति । ममेदमित्यस्यार्थो * मदीयमिति । * कर्त्तेति लुडर्थानद्यतनत्वमात्रं न विवक्षितमित्याह *करिष्यतीतीति । अपात्रे इति तस्य तत्त्वविवक्षायां सप्तमी । अपात्रायेत्यर्थः । तदाह * अचतुर्वेदायेति । उक्ते इत्यत्रार्शआद्यच् । सप्तमी तथैवेत्याह * चतुरिति । अकार्ये इति छेदः । सप्तम्युभयत्र प्राग्वत् । * धर्मः संहितो येनेति आहिताग्न्यादिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्त्तव्यत्वेन धर्मं ब्रुवते, अकार्ये अकार्यं यस्य तस्मै अकार्यकर्त्रे ऽविज्ञानाद्यदत्तं स्यादित्यर्थस्तदाह * यज्ञमिति ।

७ । विशेषमाह * आर्तेति । वेत्यस्योभयत्रान्वयः । * दत्तमित्यस्य संकल्पितमित्यर्थः । अत एव साधारणमाह * अदत्त्वेति । * मृते, तस्मिन् सति । पूर्वं पूर्णे दाने तु न परावृत्तिरिति तुना सूचितम् ।

८ । कात्यायनेनैव सर्वविवादसाधारणमन्यदप्युक्तमित्याह * तथेदमिति । वक्ष्यमाणम् । * अपरम्, उक्तभिन्नम् । तदर्थमाह * योग इति । उभयत्रेति भावः । कृतसमाहारद्वंद्वाभ्यां योगयोस्तृतीयासमास इत्याह * येनेत्यादि । आधमनादीनाह * आधीति । विशेषेण क्रीतमित्याह * क्रयेति । भावे क्त इति भावः । * विगमे, तज्ज्ञाने । * अस्य, अपरस्य ।

९ । विशेषान्तरमाह *यः पुनरिति । यस्तु । अदत्तं गृह्णातीति पाठः । तद्ग्रहणे मूलमाह * लोभादिति । अत एवाज्ञः स इति भावः । यद्यपि तावुभावपि दण्ड्यावित्येव सिद्धं तथापि स्फुटार्थं व्युत्क्रमेण सांनिध्यादाह * अदेयदायक इति । * तथा, च । * अदत्तेति । अदत्तं प्रतीच्छक इति तथा । सचवर्गः प्रतीच्छधातुर्ग्रहणार्थः । धातुगणे बाहुलकोक्तेरिति भावः ॥ २७६ ॥

इति दत्ताप्रदानिकप्रकरणम् ।

अथ क्रीतानुशयप्रकरणम् ॥ १३ ॥

मि० उ. अथ क्रीतानुशयः कथ्यते ।

तत्स्वरूपं नारदेनोक्तम्, (व्यव. ९ । १)

क्रीत्वा मूल्येन यः पण्यं क्रेता न बहु मन्यते ।

क्रीतानुशय इत्येतद्विवादपदमुच्यते ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र च यस्मिन्नहनि पण्यं क्रीतं तस्मिन्नेवाह्नि तद्विकृतं प्रत्यर्पणीयमिति—

तेनैवोक्तम्, (व्यव. ९ । २)

क्रीत्वा मूल्येन यत्पण्यं दुष्क्रीतं मन्यते क्रयी ।
विक्रेतुः प्रतिदेयं तत्तस्मिन्नेवाह्न्यविक्षतम् ॥ इति ।

द्वितीयादिदिने तु प्रत्यर्पणे विशेषः—

तेनैवोक्तः, (व्यव. ९ । ३)

द्वितीयेऽह्नि ददत्क्रेता मूल्यात् त्रिंशांशमावहेत् ।
द्विगुणं तु तृतीयेऽह्नि परतः क्रेतुरेव तत् ॥ इति ।

परतोऽनुशयो न कर्तव्य इत्यर्थः । एतच्च बीजादिव्यतिरिक्तोपभोगविनश्वरवस्तुविषयम् ।

मि० अव० बीजादिक्रये पुनरन्य एव प्रत्यर्पणविधिरित्याह ।

या० दशैकपञ्चसप्ताहमासत्र्यहार्द्धमासिकम् ।
बीजायोवाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणम् ॥१७७॥

मि० बीजं व्रीह्यादिबीजम् । अयो लोहादि । वाह्यो बलीवर्दादिः । रत्नं मुक्ताप्रवालादिकम् । स्त्री दासी । दोह्यं महिष्यादि । पुमान् दासः । एषां बीजादीनां यथाक्रमेण दशाहादिकः परीक्षाकालो विज्ञेयः । परीक्ष्यमाणे च बीजादौ यदि असम्यक्त्वबुद्ध्याऽनुशयो भवति तदा दशाहाद्यभ्यन्तरएव क्रयनिवृत्तिर्न पुनरूर्ध्वमित्युपदेशप्रयोजनम् ।

यत्तु मनुवचनम्, (अ. ८ श्लो. २२२)

क्रीत्वा विक्रीय वा किञ्चिद्यस्येहानुशयो भवेत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सोऽन्तर्दशाहात् तद् द्रव्यं दद्याच्चैवाददीत च ॥ इति,

तत् उक्तलोहादिव्यतिरिक्तोपभोगाविनश्वरगृहक्षेत्रयानशयनासनादिविषयम् ।

सर्वं चैतत् अपरीक्षितक्रीतविषयम् ।

यत्पुनः परीक्ष्य न पुनः प्रत्यर्पणीयमिति समयं कृत्वा क्रीतं, तद् विक्रेत्रे न प्रत्यर्पणीयम् ।

तदुक्तम्, (ना. व्यव. ९।४)

क्रेता पण्यं परीक्षेत प्राक् स्वयं गुणदोषतः ।
परीक्ष्याभिमतं क्रीतं विक्रेतुर्न भवेत्पुनः॥ इति ॥१७७॥

बा. १। प्राग्वदाह * क्रीतेति । तत्र संगतिं सूचयन्नाह * तदित्यादि । * बहु, विपुलम् । सम्यगिति यावत् । * तत्र च, तदनुशये च । *तेनैव, नारदेनैव । एवमग्रेऽपि । षष्ठी प्राग्वत् । तस्मिन्नेवाह्न्यविक्षतमिति पाठः । नाशरहितमिति तदर्थः । अविक्षितमिति पाठेऽप्येवम् । *आवहेत्, त्यजेत् । तस्मै दद्यात् । तावता न्यूनं मूल्यं ग्राह्यमिति यावत् । *द्विगुणं, पूर्वोक्तत्रिंशांशात् द्विगुणं, पञ्चदशांशमिति यावत् । तुर्यपादस्य तात्पर्यार्थमाह *परत इति। * अनुशयो, विचारपूर्वकपश्चात्तापः ।

२। संगतये विशेषमाह * एतच्चेति । नारदोक्तं चेत्यर्थः । * बीजादीति । बीजादिव्यतिरिक्तं च तत् उपभोगादिविनश्वरं च तत् वस्तु च तद्विषयकमित्यर्थः । भोगवास्त्विति पाठे स्पष्टार्थम् । भोगेति भोग्येत्यर्थः । एवं स्मृत्यन्तरोक्तं मनसि निधायोक्तान्यविषये मूलकृत् प्रत्यर्पणप्रकारं दर्शयतीत्याह *बीजादीति । * दशैकेति । पूर्वार्धे समाहारद्वंद्वोऽग्रे पूर्वमितरेतरद्वंद्वपूर्वकसमाहारद्विगुः । अत एव वक्ष्यति दशाहादिक इत्यादि । उत्तरार्धे इतरेतरद्वंद्वः। क्रमस्य विवक्षितत्वान्न दोषः। तदाह * बीजमित्यादि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अय इत्युपलक्षणामित्याह * लोहादीति। परीक्षणपदार्थमाह * परीक्षाकाल इति। करणल्युटा कालसामान्यवाचकं तदिति भावः। एतत्कथनफलमाह * परीक्ष्यमाणेचेति।

३। मनुविरोधं तेनैकस्यैव कालस्य सामान्येनोक्तत्वात्प्राप्तं मूलनारदयोः परिहरति * यत्त्विति। * इह, व्यवहारे। द्वितीयं आह * आददीत चेति। विचारस्य तुल्यत्वात् तदेकतयैव मनुनोक्तत्वान्मूलकृताऽप्येकतयैवोक्तं, न तु भेदेन। कल्पतर्वादीनां भेदेनोक्तिस्तु स्पष्टार्थेति बोध्यम्।

४। मूलाविरोधायाह * उक्तलोहादीति। नारदाविरोधायाह * उपभोगानश्वरेति। * सर्वं, मनुमूलनारदोक्तम्।

५। परीक्षापूर्वकक्रये विशेषमाह * यत्पुनरिति। परीक्षितं सदिति शेषः। परीक्ष्येति पाठान्तरम्। * पुनः, पश्चात्। * तदुक्तमिति। नारदेनेति शेषः। * प्राक्, क्रयात्। * गुणेति। गुणदोषाभ्याम्। सार्वविभक्तिकस्तसिः। *परीक्षाभिमतामिति। परीक्षया अभिमतमित्यर्थः। परीक्ष्याभिमतामिति पाठान्तरम्। *पुनः, पश्चात्॥ १७७॥

मि० अव० दोह्यादिपरीक्षाप्रसङ्गेन स्वर्णादेरपि परीक्षामाह।

या० अग्नौ सुवर्णमक्षीणं रजते द्विपलं शते।
अष्टौ त्रपुणि सीसे च ताम्रे पञ्च दशायसि ॥१७८॥

मि० वह्नौ प्रताप्यमानं सुवर्णं न क्षीयते। अतः कटकादिनिर्माणार्थं यावत्स्वर्णकारहस्ते प्रक्षिप्तं तावत्तुलितं तैः प्रत्यर्पणीयम्। इतरथा क्षयं दाप्या दण्ड्याश्च। रजते तु शतपले प्रताप्यमानं पलद्वयं क्षीयते। अष्टौ त्रपुणि सीसे च। शते इत्यनुवर्तते। त्रपु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णि सीसे च शतपले प्रताप्यमानेऽष्टौ पलानि क्षीयन्ते। ताम्रे शतपले पञ्च पलानि । अयासि दश पलानि क्षीयन्ते । अत्रापि शते इत्येव ।

कांस्यस्य तु त्रपुताम्रयोनित्वात्तदनुसारेण क्षयः कल्प्यः । अतोऽधिकक्षयकारिणः शिल्पिनो दण्ड्याः ॥ १७८ ॥

बा० १। यद्यपि बीजाय इति बीजादिक्रमेण मूले परिगणितं तथापि दोह्ये महिष्यादौ प्रतिसवनदोहनेन तत्परीक्षायाः पयोनिष्ठाल्पत्वमहत्त्वाभ्यां सुज्ञानत्वात्तत्प्राधान्येनाह * दोह्यादीति । * परीक्षेति । तत्कालेत्यर्थः । * इतरथा, तन्न्यूनत्वे । अयं तात्पर्यार्थः । शतशब्दः प्रत्यासत्तेः पलपर इत्याह * शतपले इति । द्विपलमिति बहुव्रीहिस्तदाह * पलद्वयमिति । प्राग्वदाह * शतपले इति । अनुवृत्तिरग्रेऽपि । पञ्च दशेति पदद्वयम् । तदाह * पञ्चपलानीति । * इत्येव, तच्च पलपरमेव । प्रताप्यमाने इत्यप्युभयत्र बोध्यम् ।

२। न्यूनतां परिहरति * कांस्यस्येति । कांस्ये त्विति पाठान्तरम् । त्रपुताम्रयोनित्वादिति बहुव्रीहिः । * तदनुसारेण, तद्भागानुसारेण । क्वचित् तथैव पाठः। एवं पित्तलेऽपि बोध्यम्। तात्पर्यार्थमत्राह * अतोऽधिकमिति ॥ १७८ ॥

मि० अव० क्वचित्कम्बलादौ वृद्धिमाह ।

या० शते दशपला वृद्धिरौर्णे कार्पाससूत्रके ।

मध्ये पञ्चपला वृद्धिः सूक्ष्मे तु त्रिपला मता॥ १७९॥

मि० स्थूलेनौर्णसूत्रेण यत्कम्बलादिकं क्रियते तस्मिन् शतपले दशपला वृद्धिर्वेदितव्या । एवं कार्पाससूत्रनिर्मिते पटादौ वेदितव्यम् । मध्ये अनतिसू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्ष्मनिर्मिते पटादौ पञ्चपला वृद्धिः । सूक्ष्मसूत्ररचिते शते त्रिपला वृद्धिर्वेदितव्या । एतच्चाप्रक्षालितवासोविषयम् ॥ १७९ ॥

बा० १। * क्वचित्, कम्बलादावपि न सर्वत्र किं तु क्वचित्, वृद्धिमाहेति पाठः । सूक्ष्मे वक्ष्यमाणत्वादाह * स्थूलेनेति । और्णे शतपले कम्बलादाविति तु मूलार्थः । * निर्मिते इति । रोपधेतोः प्राचामिति वुञ् तत्रानेन सूचितः । स हि शैषिकः । शतपले दशपला वृद्धिरित्यर्थः । दशपलेति बहुव्रीहिरेव । मध्ये इति तृतीयपादप्रतीकम्, अत एवाह * अनतिसूक्ष्मेति । * पटादाविति । यद्यप्यौर्णे इत्यादिना कम्बलादितया ग्रहणं कृतं तथापि पटादावित्युक्तिः प्रतिलोमाभिप्रायेति नानुपपत्तिरिति भावः । शते इति बोध्यम् । * सुसूक्ष्मेति । अतिसूक्ष्मेत्यर्थः । * अप्रक्षालितेति । तथा च प्रक्षालिते नेयमेव वृद्धिरिति भावः ॥ १७९ ॥

मि० अव० द्रव्यान्तरे विशेषमाह ।

या० कार्मिके रोमबन्धे च त्रिंशद्भागः क्षयो मतः ।
न क्षयो न च वृद्धिः स्यात् कौशेये वल्कलेषु च ॥१८०॥

मि० कार्मिकं कर्मणा चित्रेण निर्मितम् । यत्र निष्पन्ने पटे मेचकस्वस्तिकादिकं चित्रं सूत्रैः क्रियते तत्कार्मिकमित्युच्यते । यत्र प्रावारादौ रोमाणि बध्यन्ते स रोमबन्धः । तत्र त्रिंशत्तमो भागः क्षयो वेदितव्यः । कौशेये कोशप्रभवे वल्कलेषु वृक्षत्वङ्निर्मितेषु वसनेषु वृद्धिह्रासौ न स्तः । किंतु यावद्वयनार्थं कुविन्दादिभ्यो दत्तं तावदेव प्रत्यादेयम् ॥ १८० ॥

बा० १। * विशेषमिति । क्षयमुभयाभावं च स्थलविशेषेण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यर्थः। कार्मिकमित्यस्य व्याख्या * कर्मणेति। चित्रं सूत्रम्। अत एव तस्यापि व्याख्या *यत्रेति। मेचकं मयूरपिच्छनेत्रम्। तत्र अधिकरणे घञित्याह * यत्रेति। प्रावार उत्तरासङ्गः। द्वौ प्रावारोत्तरासङ्गौ समावित्यमरः। * तत्र, उभयत्रापि। त्रिंशच्छब्दो भागपर इत्याह *त्रिंशत्तम इति। तात्पर्यार्थमाह * किंत्विति॥१८०॥

मि० अव० द्रव्यानन्त्यात्प्रतिद्रव्यं क्षयवृद्धिप्रतिपादनाशक्तेः सामान्येन ह्रासवृद्धिज्ञानोपायमाह।

या० देशं कालं च भोगं च ज्ञात्वा नष्टे बलाबलम्।
द्रव्याणां कुशला ब्रूयुर्यत्तद्दाप्यमसंशयम् ॥१८१॥

मि० शाणक्षौमादौ द्रव्ये नष्टे ह्रासमुपगते द्रव्याणां कुशलाः द्रव्यवृद्धिक्षयाभिज्ञाः देशं कालमुपभोगं तथा नष्टद्रव्यस्य बलाबलं सारासारतां च परीक्ष्य यत्कल्पयन्ति तत् असंशयं शिल्पिनो दाप्याः॥१८१॥

इति क्रीतानुशयप्रकरणम् ॥

बा० १। उत्तरसंगतिमाह *द्रव्यानन्त्यादिति। *क्षयवृद्धीति। धर्मादित्वात्साधुत्वम्। एवमग्रेऽपि। अत एव वृद्धिक्षयेत्यग्रिमविरोधो नेति बोध्यम्। उक्ताभिन्नविषयमेवास्य साफल्यायाह * शाणेत्यादि। शणसूत्रनिर्मितम्। क्षुमा अतसी तत्सूत्रनिर्मितम्। नष्टे इति मूलार्थमाह * ह्रासमिति। सर्वथा नाशोऽत्र नाभिमतः प्रकरणादिति भावः। *तथा, किं च तद्वत् वा। प्रत्यासत्तेराह * नष्टद्रव्यस्येति। तत्र तत्त्वाविवक्षया सप्तमीति भावः। एकंशो व्युत्क्रमे इत्याह *सारासारतां चेति। ज्ञात्वेत्यस्य व्याख्या *परीक्ष्येति। तुर्यपादार्थमाह * यदिति। दाप्यमित्यस्य शिल्पिकदम्बकमिति विशेष्यम्। तदाह *शिल्पिन इति ॥१८१॥

इति क्रीतानुशयप्रकरणम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथाभ्युपेत्याशुश्रूषाप्रकरणम् ॥ १४ ॥

मि० उ० साम्प्रतमभ्युपेत्याशुश्रूषाख्यमपरं विवादपदमभिधातुमुपक्रमते।

तत्स्वरूपं च नारदेनोक्तम्, (व्यव. ५ । १)

अभ्युपेत्य तु शुश्रूषां यस्तां न प्रतिपद्यते।
अशुश्रूषाऽभ्युपेत्यैतद्विवादपदमुच्यते ॥ इति।

आज्ञाकरणं शुश्रूषा। तामङ्गीकृत्य पश्चाद्यो न संपादयति तद्विवादपदमभ्युपेत्याशुश्रूषाख्यम्। शुश्रूषकश्च पञ्चविधः। शिष्योऽन्तेवासी भृतकोऽधिकर्मकृद् दास इति। तेषामाद्याश्चत्वारः कर्मकरा इत्युच्यन्ते। ते च शुभकर्मकारिणः। दासाः पुनर्गृहजातादयः पञ्चदशप्रकाराः गृहद्वाराशुचिस्थानरथ्यावस्करशोधनाद्यशुभकर्मकारिणः।

तदिदं नारदेन स्पष्टीकृतम्, (व्यव. ५)

शुश्रूषकः पञ्चविधः शास्त्रे दृष्टो मनीषिभिः।
चतुर्विधः कर्मकरस्तेषां दासास्त्रिपञ्चकाः ॥ (२)
शिष्यान्तेवासिभृतकाश्चतुर्थस्त्वधिकर्मकृत्।
एते कर्मकरा ज्ञेया दासास्तु गृहजादयः ॥ (३)
सामान्यमस्वतन्त्रत्वमेषामाहुर्मनीषिणः।
जातिकर्मकृतस्तूक्तो विशेषो वृत्तिरेव च ॥ (४)
कर्मापि द्विविधं ज्ञेयमशुभं शुभमेव च।
अशुभं दासकर्मोक्तं शुभं कर्मकृतां स्मृतम् ॥ (५)
गृहद्वाराशुचिस्थानरथ्यावस्करशोधनम्।
गुह्याङ्गस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनम् ॥ (६)
इच्छतः स्वामिनश्चाङ्गैरुपस्थानमथान्ततः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुभं कर्म विज्ञेयं शुभमन्यदतः परम् ॥ (७) इति।

तत्र शिष्यो वेदाविद्यार्थी। अन्तेवासी शिल्पशिक्षार्थी। मूल्येन यः कर्म करोति स भृतकः। कर्मकुर्वतामधिष्ठाताऽधिकर्मकृत्। अशुचिस्थानमुच्छिष्टप्रक्षेपार्थं गर्तादिकम्। अवस्करो गृहमार्जितपांस्वादिनिचयस्थानम्। उज्झनं त्यागः। भृतकश्चात्र त्रिविधः।

तदुक्तम्, (ना. व्यव. ६।२३)

उत्तमस्त्वायुधीयोऽत्र मध्यमस्तु कृषीवलः।
अधमो भारवाही स्यादित्येवं त्रिविधो भृतः॥ इति।

दासः पुनः, (ना. व्यव. ५)

गृहजातस्तथा क्रीतो लब्धो दायादुपागतः।
अनाकालभृतस्तद्वदाहितः स्वामिना च यः ॥ (२६)
मोक्षितो महतश्चर्णाद्युद्धप्राप्तः पणे जितः।
तवाहमित्युपगतः प्रव्रज्यावसितः कृतः ॥ (२७)
भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः।
विक्रेता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः॥ (२८)

गृहे दास्यां जातो गृहजातः। क्रीतो मूल्येन। लब्धः प्रतिग्रहादिना। दायादुपागतः पित्रादिदासः। अनाकालभृतो दुर्भिक्षे यो दासत्वाय मरणाद्रक्षितः। आहितः स्वामिना धनग्रहणेनाधितां नीतः। ऋणमोचनेन दासत्वमभ्युपगतः ऋणदासः। युद्धप्राप्तः समरे विजित्य गृहीतः। पणे जितः यद्यस्मिन् विवादे पराजितोऽहं तदा त्वद्दासो भवामीति परिभाष्य जितः। तवाहमित्युपगतः तवाहं दास इति स्वयं संप्रतिपन्नः। प्रव्रज्यावसितः प्रव्रज्यातश्च्युतः। कृतः एतावत्काले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वद्दास इति अभ्युपगतः । भक्तदासः सर्वकालं भक्तार्थमेव दासत्वमभ्युपगम्य यः प्रविष्टः । वडवाहृतः वडवा गृहदासी तया हृतः तल्लोभेन तामुद्वाह्य दासत्वेन प्रविष्टः । य आत्मानं विक्रीणीते असावात्मविक्रेता—इत्येवं पञ्चदशप्रकाराः ।

यत्तु मनुना (अ. ८ श्लो. ४१५)

ध्वजाहृतो भक्तदासो गृहजः क्रीतदात्रिमौ ।
पैतृको दण्डदासश्च सप्तैते दासयोनयः ॥

इति सप्तविधत्वमुक्तं, तत्तेषां दासत्वप्रतिपादनपरम् । न तु परिसंख्यार्थम् ।

तत्रैषां शिष्यान्तेवासिभृतकाधिकर्मकृद्दासानां मध्ये शिष्यवृत्तिः प्रागेव प्रतिपादिता, (याज्ञ. १।२७)

आहूतश्चाप्यधीयीत लब्धं चास्मै निवेदयेत् ।

इत्यादिना । अधिकर्मकृद्भृतकानां तु वेतनादानप्रकरणे वक्ष्यते, (याज्ञ. २। १९६)

यो यावत्कुरुते कर्म तावत्तस्य तु वेतनम् । इत्यादिना ।

मि० अव. दासान्तेवासिनोस्तु धर्मविशेषं वक्तुमाह ।

या० बलाद्दासीकृतश्चौरैर्विक्रीतश्चापि मुच्यते ।
स्वामिप्राणप्रदो भक्तत्यागात्तन्निष्क्रयादपि ॥१८२॥

मि० बलात् बलावष्टम्भेन यो दासीकृतः । यश्चौरैरपहृत्य विक्रीतः । अपिशब्दादाहितो दत्तश्च स मुच्यते । यदि स्वामी न मुञ्चति तर्हि राज्ञा मोचयितव्यः ।

उक्तं च नारदेन, (व्यव. ५ । ३८)

चौरापहृतविक्रीता ये च दासीकृता बलात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राज्ञा मोचयितव्यास्ते दास्यं तेषु हि नेष्यते॥इति।

चौरव्याघ्राद्यवरुद्धस्य स्वामिनः प्राणान् यः प्रददाति रक्षति असावपि मोचयितव्यः। तदिदं सर्वदासानां साधारणं दास्यनिवृत्तिकारणम्।

यो वैषां स्वामिनं कश्चिन्मोचयेत्प्राणसंशयात्।
दासत्वात्स विमुच्येत पुत्रभागं लभेत च॥

इति नारदस्मरणात्(व्यव.८।३०)भक्तदासीनां प्रातिस्विकमपि मोक्षकारणमुच्यते।अनाकालभृतभक्तदासौ भक्तस्य त्यागाद्दासभावादारभ्य स्वामिद्रव्यं यावदुपभुक्तं तावद्दत्त्वा मुच्येते। आहितर्णदासौ तु तन्निष्क्रयात्, यद् गृहीत्वा स्वामिना आहितो यच्च दत्त्वा धनिनोत्तमर्णान्मोचितः तस्य निष्क्रयात्सवृद्धिकस्य प्रत्यर्पणान्मुच्येते।

नारदेन विशेषोऽप्युक्तः, (व्यव. ८)

अनाकालभृतो दास्यान्मुच्यते गोयुगं ददत्।
सम्भक्षितं यद् दुर्भिक्षे न तच्छुद्ध्येत कर्मणा॥(३१)
भक्तस्योत्क्षेपणात्सद्यो भक्तदासः प्रमुच्यते।(३६)
आहितोऽपि धनं दत्त्वा स्वामी यद्येनमुद्धरेत्॥(३२)
ऋणं तु सोदयं दत्त्वा ऋणी दास्यात्प्रमुच्यते(३२)इति।

तथा तवाहमित्युपगतयुद्धप्राप्तपणाजितकृतकवडवाहृतानां च प्रातिस्विकं मोचनकारणं च तेनैवोक्तम्।

यथा,

तवाहमित्युपगतो युद्धप्राप्तः पणे जितः।
प्रतिशीर्षप्रदानेन मुच्येरंस्तुल्यकर्मणा॥ (३४)
कृतकालव्यपगमात्कृतकोऽपि विमुच्यते। (३३)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निग्रहाद्वडवायास्तु मुच्यते वडवाहृतः ॥ इति।(३६)

दासेन सह संभोगनिरोधादित्यर्थः। तदेवं गृहजातक्रीतलब्धदायप्राप्तात्मविक्रयिणां स्वामिप्राणप्रदानतत्प्रसादरूपसाधारणकारणव्यतिरेकेण मोक्षो नास्ति। विशेषकारणानभिधानात्। दासमोक्षश्चानेन क्रमेण कर्त्तव्यः। (व्यव. ५। श्लो. ४२ ४३)

स्वं दासमिच्छेद्यः कर्तुमदासं प्रीतमानसः।
स्कन्धादादाय तस्यासौ भिन्द्यात्कुम्भं सहाम्भसा॥
साक्षताभिः सपुष्पाभिर्मूर्द्धन्यद्भिरवाकिरेत्।
अदास इत्यथोक्त्वा त्रिः प्राङ्मुखं तमवासृजेत्॥
इति तेनैवोक्तम् ॥ १८२ ॥

वा. १। *साम्प्रतमिति। गृहीतादानदण्डप्रसङ्गेनेति भावः। *अपरमिति। तेषामाद्यमित्यादौ मनुनाऽपरिगणितत्वात्ततो भिन्नमेवेत्यर्थः। नारदीयं व्याचष्टे * आज्ञाकरणमिति। प्रतिपद्यते इत्यस्यार्थमाह * सम्पादयतीति। मूले व्युत्क्रमेणान्वय इत्याह *अभ्युपेत्येति। शिष्यादिचतुर्णां सामान्यसंज्ञामाह * तेषामिति। मध्ये इत्यर्थः। * कर्मकरा इति। कर्मणि भृताविति टः। यद्यपि भृतके तत्त्वं सूत्रसिद्धं भृतावित्युक्तेस्तथापि साहचर्यादन्येषामपि तत्त्वं बोध्यम्। वक्ष्यमाणानुरोधेन तेषां तत्त्वं योगरूढ्येत्याह * तेचेति। चत्वार इत्यर्थः।

२। *तदिदं, सर्वम्। *शास्त्रे, प्रोक्त इत्यर्थः। *चतुर्विधः, आदितः। * तेषां, मध्ये। * त्रिपञ्चका इति। त्रिः पञ्चेति त्रिपञ्च ते परिमाणं येषां ते। सुजर्थे समासः। तद्धितः कन्। तदेव विशदयति * शिष्यान्तेवासीति। * सामान्यमिति। * एषां, शिष्यादीनां पञ्चानां मध्ये। अस्वतन्त्रत्वं नाम सामा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यं साधारणधर्म इत्येवं मनीषिणो महर्षय आहुरित्यर्थः । *जातीति । तेषां पञ्चानां मध्ये शिष्यादिरूपचतुर्विधसमुदायस्य जात्या स्वस्वजात्यनुरूपं शुभमिति यावत् तादृशं कर्म कुर्वतस्तु कर्मकर इत्येवंरूपोऽवान्तरविशेषो मनीषिभिरुक्त इत्यर्थः । कर्मकरत्वं चतुर्णामप्यवान्तरजातिरित्यर्थः । * वृत्तिरेव चेति । विशेष इत्यनुवर्त्तते । तथा वृत्तिर्वर्तनमपि शुभकर्मकरत्वेन विशेषो विशिष्टं, शुभकर्मकरत्वं विशिष्टा वृत्तिरित्यर्थः । अत एव चसंगतिः ।

३ । उक्तमेव विविच्याह * कर्मापीति । * कर्मकृतां, चतुर्णाम् । तत्राशुभमाह * गृहद्वारेत्यादि । अत्र द्वंद्वोत्तरपदकद्वंद्वस्य शोधनेन षष्ठीसमासः । उत्तरार्द्धे प्रत्येकमितरेतरद्वंद्वद्वयगर्भेतरेतरद्वन्द्वोत्तरपदकषष्ठीसमासोत्तरपदकसमाहारद्वन्द्वः।अग्रे यथासंख्यमन्वयः। * इच्छत इति । इच्छतः स्वामिनः स्वाङ्गैरन्ततः पर्यन्ते उपस्थानं सेवनं चेत्यर्थः । *शुभमिति । अतोऽन्यत् यत् तत् परं केवलम् उत्कृष्टं वा शुभमित्यर्थः ।

४ । शिष्यान्तेवासीत्यादिनारदवचनांशं विशिष्य व्याचष्टे * तत्रेति । तेषां मध्ये इत्यर्थः । वेदग्रहणं शास्त्रस्याप्युपलक्षणम् । शिल्पं कौशलम् । * आधिष्ठाता नियन्ता ।

५ । अशुचीत्यादि तथैव व्याचष्टे *अशुचीति । शिष्याद्युद्दिष्टानां मध्ये भृतकत्रैविध्यमाह * भृतक इति । * अत्र, एषां मध्ये । * तदुक्तमिति । नारदेनेति शेषः । अत्रेति प्राग्वत् । आयुधजीवी आयुधीयः । * भारवाहीति । तद्वहनशीलः । भारवाह इति पाठान्तरम् ।

६ । दासास्त्रिपञ्चकाः दासास्तु गृहजादयः इत्युक्तं, तत्प्रपञ्चयति—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

* दासाः पुनरिति । दासास्त्वित्यर्थः । उच्यन्ते इति शेषः । तानेव नारदोक्त्या आह * गृहजात इत्यादि । क्रमेण व्याचष्टे * गृहे इत्यादि । तत्र पत्नीपरगृहशब्दस्य लक्ष्यार्थमाह *दास्यामिति । तद्वदित्यनेन किंचिन्न्यूनता सूचिता । अनाकाले इत्यस्यार्थो * दुर्भिक्षे इति । भृत इत्यस्य * रक्षित इति । *आधितामिति । अन्यत्रेति भावः । *अहं, स्याम् । * परिभाष्येति । परिभाषयित्वेत्यर्थः । * स्वयमिति । स्वयमेवागत इत्यर्थः । प्रव्रज्या संन्यासः । त्वं दास इति पाठे अग्रे इत्यभ्युपगमित इति पाठः । त्वद्दास इति पाठे अहं तव दास इत्यर्थेनाग्रे इत्यभ्युपगत इति पाठः । एतावन्तं कालमहं तव दास इत्यङ्गीकारित इति मदनरत्नेऽप्युक्तम् । भक्तमन्नम् एवेनान्यव्यवच्छेदः ।

७ । मनुविरोधमनुवदति * यस्त्विति । मानवे भक्तदासः गृहजः क्रीतश्च प्रागुक्त एव । * पैतृकः, पितुरागतः । सोऽपि दायादुपगत एव । दत्रिमोऽपि कृत एव । ध्वजाहृतः ध्वजेन तद्वता युद्धेनाहृत इति सोऽपि युद्धप्राप्त एव । प्रव्रज्यातश्च्युतस्य प्रायश्चित्तमकुर्वतः पुंसो दण्डार्थमेवामरणाद्दास्यं राज्ञो भवतीति दण्डदासः प्रव्रज्यावासित एवेति बोध्यम् । * दासेति । अयं धर्मपरः । दासत्वाश्रया दासा इति यावत् ।

८ । परिहरति * तदिति । तथा च सप्तग्रहणं न्यूनसंख्याव्यवच्छेदार्थं न तु परिगणितभिन्ननिषेधार्थम् । तदाह * न तु परीति ।

९ । एवं प्रकरणोपोद्घातत्वेन स्मृत्यन्तरोक्तमुक्त्वा मूलविषयं विवेचयितुं तदवतारयितुं चाह * तत्रैषामित्यादि । तत्र तथा सति । *अधिकर्मकृद्भृतकानामिति । अभ्यर्हितत्वात्पूर्वनिपातः । भृतकत्रैविध्याद् बहुवचनम् । वृत्तिरित्यनुषज्यते । मूलमवतारयति *दासान्तेवासीति । * अपिशब्दादिति । चौरैरित्यनुवर्तते । चौरै-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रपहृत्याहितो दत्तश्चेत्यर्थः। चः सर्वसमुच्चये इत्याह *दत्तश्चेति। * सः, सर्वविधः। अत एव स्वाम्याहितादिविषये पृथग् आह *यदीति। बलादिनेति भावः। उक्तं चेति चो ह्यर्थे। चौरेणापहृतास्सन्तो विक्रीता इत्यर्थः। *हि, यतः। *दास्यं, तदेव।

१०। उत्तरार्धैकदेशं व्याचष्टे *चौरेति। उत्तरसंगतये आह * तदिदमिति। मूलोक्तं स्वामिप्राणरक्षकत्वमित्यर्थः। * यो वैषामिति। एषां दासानां पञ्चदशानां मध्ये य एव कश्चिदित्यर्थः। न केवलं तावन्मात्रं किं त्वन्यदपीत्याह * पुत्रभागमिति। तद्भागसदृशभागमित्यर्थः।

११। नन्वेवं भक्तत्यागादित्यादि निष्फलम् अत आह*भक्तेति। आदिशब्दः प्रकारे। तेषां केषां चिदित्यर्थः। अत एवोक्तक्रमेणाह * अनाकालेति। भक्तत्यागो भुक्तिदिनादारभ्य न विवक्षितस्तस्य तत्राहेतुत्वादत आह * दासभावादिति। * तस्य, धनस्य। निश्शब्दार्थमाह * सवृद्धिकस्येति। सामान्यार्थस्य प्रकरणात्क्रीधातोर्विशेषपरत्वमित्याह * प्रत्यर्पणादिति। * विशेषोऽपीति। अनाकालभृतांशमात्रे इति भावः। * संभक्षितमिति। दुर्भिक्षे यत् संभक्षितं तत् कर्मणा न शुध्येतेत्यर्थः। यदीयमुपभुक्तं तदीयव्यापारकरणमात्रेण शुद्धिर्न, दास्यान्न निर्मुक्तिः, किं तु तत्कर्मकरणेन गोद्वयदानेन च शुद्धिरिति यावत्। अयमेव मूलतो विशेष इति बोध्यम्।

१२। भक्तस्येति। प्रागुक्त एवार्थः। *सद्यः, तत्कालमेव, न तु पूर्ववदन्यदानापेक्षेति भावः। * धनं, सोदयमित्यस्यापकर्षः। प्रमुच्यते इत्यस्यानुषङ्गः। स्वामी यद्येव नोद्धरेदिति पाठः। यदि स्वामी नैवोद्धरेत्तदाऽऽहितोऽपि सोदयं धनं दत्त्वा दास्यात्प्रमुच्यते इत्यर्थः। यद्येनमुद्धरेदिति पाठे तत्र तत्संमतिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विना नैव मुक्तिरिति बोध्यम् । ऋणदासे आह * ऋणं त्विति ।

१३। * तथा, किं च । क्रमेणाह *तवाहमित्यादि । *हृतानां च, तेषामपि । * तेनैव, नारदेनैव । प्रतिनिधिः प्रतिशीर्षपदार्थः ।तुल्यं कर्म यस्य देयसाम्येन, तुल्यव्यापारेण पुरुषान्तरदानेनेत्यर्थः । कर्मणा स्वतुल्यपुरुषान्तरं दत्त्वा मुच्येरन्निति यावत् । निग्रहादित्यस्यार्थमाह * दासेन सहेति । वडवाया इति शेषः । दासीस्वामिकृतादिति भावः । प्रागुक्तफलितं प्रागुक्तमेवोपसंहरन्नाह * तदेवमिति । तस्मादुक्तप्रकारेणेत्यर्थः । क्रमेणाह * गृहेति । स्वामिप्राणप्रदत्वमुपलक्षणमित्याह * तत्प्रसादेति । स्वामिप्रसादेत्यर्थः । स च तथा वाऽन्यथा वेति भावः । यद्वा स्वामिप्राणप्रदत्वस्य साक्षान्मोचने कारणत्वाभावादाह * तदिति । तेन यस्तत्प्रसाद इत्यर्थः ।

१४। तन्मोचने विधिमाह *दासेति । * अनेन, वक्ष्यमाणेन । * स्वं, स्वीयम् । * तस्य, दासस्य । स्कन्धात् सजलं कुम्भमादायासौ स्वामी भिन्द्याद्भूमावित्यर्थः । त्रिरिति पूर्वान्वयि । * तेनैव, नारदेनैव । यत इति शेषः ॥ १८२ ॥

मि० अव. प्रव्रज्यावसितस्य तु मोक्षो नास्तीत्याह ।

या० प्रव्रज्यावसितो राज्ञो दास आमरणान्तिकः ।

मि० प्रव्रज्या संन्यासस्ततोऽवसितः प्रच्युतः अनभ्युपगतप्रायश्चित्तश्चेद्राज्ञ एव दासो भवति । मरणमेव तद्दासत्वस्यान्तो नान्तरा प्रतिमोक्षोऽस्ति ।

मि० अव० वर्णापेक्षया दास्यव्यवस्थामाह ।

या० वर्णानामानुलोम्येन दास्यं न प्रातिलोमतः ॥१८३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि० ब्राह्मणादीनां वर्णानामानुलोम्येन दास्यम्। ब्राह्मणस्य क्षत्रियादयः। क्षत्रियस्य वैश्यशूद्रौ। वैश्यस्य शूद्र—इत्येवमानुलोम्येन दासभावो भवति, न प्रातिलोम्येन। स्वधर्मत्यागिनः पुनः परिव्राजकस्य प्रातिलोम्येनापि दासत्वमिष्यत एव।

यथाह नारदः, (व्यव. ५। ३९)

वर्णानां प्रातिलोम्येन दासत्वं न विधीयते।
स्वधर्मत्यागिनोऽन्यत्र दारवद्दासता मता॥ इति॥१८३॥

बा० १। अवशिष्टगतिमाह * प्रव्रज्येति। तुर्वैलक्षण्ये। एवं सति प्रायश्चित्तविध्यानर्थक्यापत्तेराह * अनभ्युपगतेति। तथा सति तु पुनस्तस्य प्रव्रज्यैवेति भावः। एवेनान्यव्यवच्छेदः। अवतरणार्थमेव प्रतिपादयन् आमरणेत्यस्यार्थमाह * मरणमेवेति। * अन्तो, मोक्षः। * अन्तरा, मध्ये जीवनदशायाम्। * प्रतिमोक्षः, तत्प्रतिपक्षभूतो मोक्षः। एतेन आ समन्तात् मरणमेवान्तो यस्य स एव तथेति विनयादित्वात्स्वार्थे ठगिति सूचितम्।

उ. २। * दासभावः, दासत्वम्। प्रतिलोमशब्दो धर्मपरस्तृतीयान्तात्तसिरित्याह * न प्रातिलोम्येनेति। नन्वेवम् अस्योक्तमूलविरोधोऽत आह * स्वधर्मेति। * पुनः, तु। निषेधशेषमाह * स्वधर्मेति। एवं निषेधमुक्त्वा विधिमाह * दारवदिति। यथाऽऽनुलोम्यैनैव विवाहो न प्रातिलोम्येन तथा दासत्वमपीत्यर्थः॥१८३॥

मि० अव० अन्तेवासिधर्मानाह।

या० कृतशिल्पोऽपि निवसेत्कृतकालं गुरोर्गृहे।
अन्तेवासी गुरुप्राप्तभोजनस्तत्फलप्रदः॥१८४॥

मि० अन्तेवासी गुरोर्गृहे कृतकालं वर्षचतुष्टयमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गुर्वेदादिशिल्पशिक्षार्थं त्वद्गृहे वसामीति यावदङ्गीकृतं तावत्कालं वसेत्, यद्यपि वर्षचतुष्टयादर्वागेव लब्धापेक्षितशिल्पविद्यः । कथं निवसेत् । गुरुप्राप्तभोजनः—गुरोः सकाशात् प्राप्तं भोजनं येन स तथोक्तः। तत्फलप्रदः—तस्य शिल्पस्य फलमाचार्याय प्रदद्दातीति तत्फलप्रदः। एवं भूतो वसेत्।

नारदेन विशेषोऽप्यत्र दर्शितः, (व्यव. ५)

स्वशिल्पमिच्छन्नाहर्तुं बान्धवानामनुज्ञया।
आचार्यस्य वसेदन्ते कृत्वा कालं सुनिश्चितम् ॥(१६)
आचार्यः शिक्षयेदेनं स्वगृहे दत्तभोजनम्।
न चान्यत्कारयेत्कर्म पुत्रवच्चैनमाचरेत् ॥ (१७)
शिक्षयन्तमदुष्टं य आचार्यं संपरित्यजेत्।
बलाद्वासयितव्यः स्याद्वधबन्धौ च सोऽर्हति ॥ (१८)
शिक्षितोऽपि कृतं कालमन्तेवासी समाप्नुयात्।
तत्र कर्म च यत्कुर्यादाचार्यस्यैव तत्फलम् ॥ (१९)
गृहीतशिल्पः समये कृत्वाऽऽचार्यं प्रदक्षिणम्।
शक्तितश्चानुमान्यैनमन्तेवासी निवर्तते ॥(२०)इति।

वधशब्दोऽत्र ताडनार्थः। दोषस्याल्पत्वात् ॥ १८४ ॥

इत्यभ्युपेत्याशुश्रूषाख्यं विवादपदम्।

बा० १। * अन्तेवासिधर्मानाहेति। एवं दासे धर्मानुक्त्वेत्यादि:। * कृतकालमिति। तद्विशेषणार्थं पूर्वशेषमाह * यद्यपीति। सर्वशिल्पग्रहे कालाद्यभावादाह * अपेक्षितेति। तत्र प्रकाराजिज्ञासामाह *कथमिति। *फलं, भृतिम्। * स्वशिल्पमिति। बान्धवानां भ्रात्रादीनाम् अनुज्ञया आज्ञया स्वं स्वजातिविहितं शिल्पं ग्रहीतुमित्याद्यर्थः। * अन्ते, अन्तिके।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२। एवं तद्धर्ममुक्त्वाऽऽचार्यधर्ममाह * आचार्य इति । पुनस्तद्धर्ममाह * शिक्षयन्तामिति । * बलादिति । तद्बान्धवै राज्ञा वेति भावः । अत एवाह * वधेति । * शिक्षितोऽपीति । कृतकालात्प्रागिति भावः । * समाप्नुयादिति । तन्निकटे समापयेदित्यर्थः । * तत्र, तद्गृहे । * समये, अतीते सति । * प्रदक्षिणं, सप्रदक्षिणम् । अर्शआद्यजन्तम् । यथाश्रुतं वा । आचार्यप्रदाक्षिणामिति पाठान्तरम् । शक्तितश्चानुमान्यैनमिति पाठः । * एनम् आचार्यम् यथाशक्ति * अनुमान्य तोषयित्वा स्वगृहं प्रति परावर्त्यागच्छतीत्यर्थः । * ताडनेति । दण्डादिकृतेत्यर्थः ॥ १८४ ॥

इत्यभ्युपेत्याशुश्रूषाख्यं विवादपदम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ संविद्व्यतिक्रमप्रकरणम् ॥ १५ ॥

मि० उ. संप्रति संविद्व्यतिक्रमः कथ्यते । तस्य च लक्षणं—

नारदेन व्यतिरेकमुखेन दर्शितम्, (व्यव. १०।१)
पाखण्डिनैगमादीनां स्थितिः समय उच्यते ।
समयस्यानपाकर्म तद्विवादपदं स्मृतम् ॥ इति ।

पारिभाषिकधर्मेण व्यवस्थानं समयः तस्यानपाकर्म अव्यतिक्रमः परिपालनं, तद् व्यतिक्रम्यमाणं विवादपदं भवतीत्यर्थः ॥

अव. तदुपक्रमार्थं किञ्चिदाह ।

या० राजा कृत्वा पुरे स्थानं ब्राह्मणान्न्यस्य तत्र तु ।
त्रैविद्यं वृत्तिमद् ब्रूयात्स्वधर्मः पाल्यतामिति ॥ १८५ ॥

मि० राजा स्वपुरे दुर्गादौ स्थानं धवलगृहादिकं कृत्वा तत्र ब्राह्मणान् न्यस्य स्थापयित्वा तद्ब्राह्मणव्रातं त्रैविद्यं वेदत्रयसंपन्नं वृत्तिमद् भूहिरण्यादिसंपन्नं च कृत्वा स्वधर्मो वर्णाश्रमनिमित्तः श्रुतिस्मृतिविहितो भवद्भिरनुष्ठीयतामिति तान् ब्राह्मणान् ब्रूयात् ॥१८५॥

वा. १। *संप्रतीति । अङ्गीकारत्यागस्य पूर्वत्र सत्त्वेन तत्प्रसङ्गादिति भावः । नैगमादीति आदिना श्रेण्यादित्रैविद्यादेर्ग्रहणम् । अस्यार्थमाह * पारिभाषिकधर्मेणेति।धर्मशास्त्रपरिभाषां कृत्वेत्यर्थः । एतेन तत्रत्यस्थितिशब्दो विशेषपर इति सूचितम् । तस्यार्थमाह * परिपालनमिति । यद्यपि तच्छब्दस्य प्रक्रान्तपरामर्शित्वात्परिपालनस्यैव विवादपदत्वं प्राप्नोति तथापि बाधात्तद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संभवः । कर्मेत्यन्तेनान्वयमुखेन संविद्व्यतिक्रमाख्यविवादपदस्य प्रतिपक्षभूतमुक्त्वा तद्विवादपदं स्मृतमित्युक्तं तदाह * तद्व्यतिक्रम्यमाणमिति । मूलमवतारयति * तदुपक्रमार्थमिति । प्रत्यासत्तेराह * स्वेति । नपुंसकत्वोपपत्तये बहुवचनलब्धं तत्पदार्थमाह * ब्राह्मणव्रातमिति । त्रैविद्यत्वादेरन्यतः सिद्धौ राजानियोज्यत्वासंभवादाह * कृत्वेति । शेषोऽयं, कृत्वा चेत्यर्थः ।

अत एव बृहस्पतिः,

वेदविद्याविदो विप्रान् श्रोत्रियानग्निहोत्रिणः ।
आहूय स्थापयेत्तत्र तेषां वृत्तिं प्रकल्पयेत् ॥
अनाच्छेद्यकरास्तेभ्यः प्रदेया गृहभूमयः । इति ।

स्वशब्दार्थमाह * वर्णेति । बहुव्रीहिः । धर्मशब्दार्थमाह * श्रुतीति ॥ १८५ ॥

मि० अव. एवं नियुक्तैस्तैर्यत्कर्म कर्तव्यं तदाह ।

या० निजधर्माविरोधेन यस्तु सामयिको भवेत् ।
सोऽपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः ॥ १८६ ॥

मि० श्रौतस्मार्तधर्मानुपमर्देन समयान्निष्पन्नो यो धर्मो गोप्रचारोदकरक्षणदेवगृहपालनादिरूपः सोऽपि यत्नेन पालनीयः । तथा राज्ञा च निजधर्माविरोधेनैव यः सामयिको धर्मः "यावत्पथिकं भोजनं देयम् अस्मदरातिमण्डलं तुरङ्गादयो न प्रस्थापनीया" इत्येवंरूपः, सोऽपि रक्षणीयः ॥ १८६ ॥

बा० १। * तैः, ब्राह्मणैः । निजेत्यस्यार्थः * श्रौतेति । वर्णाश्रमनिमित्तकेत्यादिः । * समयात्, पारिभाषिकधर्मेण व्यवस्थाना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त् । सोऽपीति अपिना निजधर्मसमुच्चयः । एवमग्रेऽपि । * तथा, तद्वत् । * धर्म इति । कृत इति शेषः । यावत्पाथिकमिति वीप्सायामव्ययीभावः ॥ १८६ ॥

मि० अव. एवं समयधर्मः परिपालनीय इत्युक्त्वा तदतिक्रमादौ दण्डमाह ।

या० गणद्रव्यं हरेद्यस्तु संविदं लङ्घयेच्च यः ।
सर्वस्वहरणं कृत्वा तं राष्ट्राद्विप्रवासयेत् ॥ १८७ ॥

मि० यः पुनर्गणस्य ग्रामादिजनसमूहस्य संबन्धि साधारणं द्रव्यमपहरति, संवित् समयः तां समूहकृतां राजकृतां वा यो लङ्घयेदतिक्रामेत्, तदीयं सर्वं धनमपहृत्य स्वराष्ट्राद्विप्रवासयेन्निष्कासयेत् । अयं च दण्डोऽनुबन्धाद्यतिशये द्रष्टव्यः । अनुबन्धाल्पत्वे तु—
(अ. ८ श्लो. २१९ । २२०)
यो ग्रामदेशसंघानां कृत्वा सत्येन संविदम् ।
विसंवदेन्नरो लोभात्तं राष्ट्राद्विप्रवासयेत् ॥
निगृह्य दापयेदेनं समयव्यभिचारिणम् ।
चतुःसुवर्णं षण्निष्कं शतमानं च राजतम् ॥
इति मनुप्रतिपादितदण्डानां निर्वासनचतुःसुवर्णषण्निष्कशतमानानां चतुर्णामन्यतमो जातिशक्त्याद्यपेक्षया कल्पनीयः ॥ १८७ ॥

बा० १ । * समयधर्मः, सोऽपि । तदतिक्रमादाविति आदिना गणद्रव्यहरणग्रहणम् । * पुनः, तु । आदिना देशः । अत एवाह * साधारणमिति । दण्डबाहुल्यादाह * अयं चेति । * अनुबन्धो, दोषः । अपराध इति यावत् । आदिना जात्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिपरिग्रहः । एवमग्रेऽपि । ग्रामदेशशब्दौ तत्स्थजनबोधकौ जघन्यवृत्त्या । संघो वणिगादिसमूहः । इदमस्माभिः कार्यं परिहार्यं वेत्येवंरूपं संकेतं सत्यादिशपथेन कृत्वा तन्मध्ये यो नरो लोभादिनाऽतिक्रामेदित्याद्यर्थः ।

२ । पक्षान्तराण्याह *निगृह्येति । निबध्येत्यर्थः । *समयव्यभिचारिणं, संविद्व्यतिक्रमकारिणम् । चतुःसुवर्णमित्यादि समाहारद्विगुः । चतुःसुवर्णानिति पाठान्तरम् । राजतं शतमानं च विंशत्यधिकरक्तिकाशतत्रयपरिमितं रजतम् । *निर्वासनेति । सर्वस्वहरणाद्यभावात् केवलनिर्वासनेत्यर्थः । * निष्कं, सुवर्णाश्चत्वारः । सुवर्णं कर्षमितम् । * शतमानेति । राजतेत्यादिः । इदं त्रयं विषयलाघवगौरवापेक्षया व्यस्तं समस्तं वेति तु तद्व्याख्यातारः ॥ १८७ ॥

मि० अव. इदं च तैः कर्तव्यमित्याह ।

या० कर्तव्यं वचनं सर्वैः समूहहितवादिनाम् ॥

मि० गणिनां मध्ये ये समूहहितवदनशीलास्तद्वचनमितरैर्गणानामन्तर्गतैरनुसरणीयम् ॥

अव. अन्यथा दण्ड इत्याह ।

या० यस्तत्र विपरीतः स्यात्स दाप्यः प्रथमं दमम् ॥ १८८ ॥

मि० यस्तु गणिनां मध्ये समूहहितवादिवचनप्रतिबन्धकारी राज्ञा प्रथमसाहसं दण्डनीयः ॥ १८८ ॥

वा० १। * इदं च, इदमपि । *तैः, ब्राह्मणैः । *गणिनां, समूहिनाम् । एवमग्रेऽपि । सर्वैरित्यस्य प्रकृतार्थमाह * इतरैरिति । अन्यवचनस्य अन्यकर्तृककरणासंभवादाह * अनुसरणीयमिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उ. २ । * अन्यथा, तदननुसरणे । तत्रेत्यस्यार्थो *गणिनामिति । विपरीत इत्यस्यार्थः * समूहेति । * प्रतिबन्धेति । प्रतिषेधेति पाठान्तरम् । *राज्ञेति । स इति मौल एवादिः । यच्छब्दोपादानेन तस्यार्थसिद्धत्वाच्चु तदनुक्तिरिति भावः । दममित्यस्यार्थः * साहसमिति ॥ १८८ ॥

मि० अव. राज्ञा चेत्थं गणिषु वर्तनीयमित्याह ।

या० समूहकार्यआयातान्कृतकार्यान् विसर्जयेत् ।
स दानमानसत्कारैः पूजयित्वा महीपतिः ॥ १८९ ॥

मि० समूहकार्यनिर्वृत्त्यर्थं स्वपार्श्वं प्राप्तान् गणिनो निर्वर्तितात्मीयप्रयोजनान् दानमानसत्कारैः स राजा परितोष्य विसर्जयेत् ॥ १८९ ॥

बा० १ । मूले समूहकार्ये इति सतिसप्तमी । तया च निमित्तत्वं फलति । कार्यशब्दश्च तन्निष्पात्तिपरः । तदाह * समूहकार्यनिर्वृत्त्यर्थमिति । तेनोभयथाऽर्थान्तरनिरासः । प्रकृतत्वादाह * स्वेति । कृतेत्यस्यार्थो * निर्वर्तितेति । मानोऽभ्युत्थानादिकृतः । सत्कारोऽर्घ्यपाद्यादिकृतः । स महीपतिरित्यन्वय इत्याह * सराजेति । पूजयित्वेत्यस्य तात्पर्यार्थं मुख्याभावादाह *परितोष्येति ॥ १८९ ॥

मि० अव. समूहदत्तापहारिणं प्रत्याह ।

या० समूहकार्यप्रहितो यल्लभेत तदर्पयेत् ।
एकादशगुणं दाप्यो यद्यस्मै नार्पयेत्स्वयम् ॥ १९० ॥

मि० समूहकार्यार्थं महाजनैः प्रेरितो राजपार्श्वे यद्धिरण्यवस्त्रादिकं लभते तत् अप्रार्थित एव महाज-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेभ्यो निवेदयेत् । अन्यथा लब्धादेकादशगुणं दण्डं दापनीयः ॥ १९० ॥

बा० १ । *समूहेति । समूहाय दत्तस्यापहारिणं मध्यस्थमित्यर्थः । समूहकार्याय प्रहित इति सुप्सुपेति समास इत्याह * समूहकार्यार्थमिति । तन्निष्पत्त्यर्थमित्यर्थः । प्रत्यासत्तेराह * महाजनैरिति । एवमग्रेऽपि । लिङर्थो न विवक्षित इत्याह * लभते इति । विधिफलमाह * अप्रार्थित एवेति । अत एवाग्रे स्वयमित्युक्तम् ।

२ । तुर्यपादार्थमाह * अन्यथेति । साकाङ्क्षत्वादाह * लब्धादिति । *एकादशगुणम्, एकादशभागम् । अपराधस्याल्पत्वात् ॥ १९० ॥

मि० अव. एवंप्रकाराश्च कार्यचिन्तकाः कार्या इत्याह ।

या० धर्मज्ञाः शुचयोऽलुब्धा भवेयुः कार्यचिन्तकाः ।
कर्तव्यं वचनं तेषां समूहहितवादिनाम् ॥ १९१ ॥

मि० श्रौतस्मार्तधर्मज्ञा बाह्याभ्यन्तरशौचयुक्ताः अर्थेष्वलुब्धाः कार्यविचारकाः कर्तव्याः । तेषां वचनमितरैः कार्यमित्येतदादरार्थं पुनर्वचनम् ॥ १९१ ॥

बा० १ । *एवमिति । वक्ष्यमाणेत्यर्थः । चस्त्वर्थे व्युत्क्रमे च । विनिगमनाविरहादाह * श्रौतेति । एवमग्रेऽपि । धर्मलुब्धत्वस्य गुणत्वादाह * अर्थेष्विति । चिन्तनमात्रस्यानुपयोगादाह * विचारका इति । भवेयुरित्यत्र ण्यर्थान्तर्भाव इत्याह * कर्त्तव्या इति । अत एवावतरणमपि सङ्गच्छते । * तेषामिति । समूहेत्याद्यादिः । प्रत्यासत्तेराह * इतरैरिति । उक्तार्थे पौनरुक्त्यं परिहरति * आदरेति ॥ १९१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि० अव. इदानीं त्रैविद्यानां प्रतिपादितं धर्मं श्रेण्यादिष्वतिदिशन्नाह ।

या० श्रेणिनैगमपाखण्डिगणानामप्ययं विधिः ।
भेदं चैषा नृपो रक्षेत्पूर्ववृत्तिं च पालयेत् ॥ १९२ ॥

मि० एकपण्यशिल्पोपजीविनः श्रेणयः । नैगमाः ये वेदस्याप्तप्रणीतत्वेन प्रामाण्यमिच्छन्ति पाशुपतादयः । पाखण्डिनो ये वेदस्य प्रामाण्यमेव नेच्छन्ति नग्नाटसौगतादयः । गणो व्रातः आयुधीयादीनामेककर्मोपजीविनाम् । एषां चतुर्विधानामप्ययमेव विधिः, यो निजधर्माविरोधेनेत्यादिना प्रतिपादितः । एषां च श्रेण्यादीनां भेदं धर्मव्यवस्थां नृपो रक्षेत् । पूर्वोपात्तां वृत्तिं च पालयेत् ॥ १९२ ॥

इति संविद्व्यतिक्रमप्रकरणम् ॥

वा० १ । *इदानीं, तदनन्तरम् । एकाभ्यां पण्यशिल्पाभ्यामित्यर्थः । * पाशुपतादय इति । तन्त्राध्ययनपूर्वकानुष्ठातार इत्यर्थः । आदिना पाञ्चरात्राद्यध्येतारः, नैयायिकादयश्च । नग्नाटः दिगम्बरः । * आयुधीयादीति । आयुधजीव्यादीनामित्यर्थः । साधारणमाह *एकेति । "समानकर्मकराः कारवः श्रेणयः, नानापौरसमूहा नैगमाः, प्रव्रज्यावसिताः पाषण्डिनः, गणो ब्राह्मणसमूह" इति कल्पतरुः ।

२ । एवं पदार्थानुक्त्वा वाक्यार्थमाह * एषामिति । उत्तरार्धार्थमाह * एषां चेति । प्रसिद्धार्थासंभवात्प्रकृतार्थमाह * धर्मेति । * पूर्वोपात्तां, पूर्वदत्ताम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत एव नारदः, (व्यव. १० श्लो. २।३)
पाषण्डिनैगमश्रेणिपूगव्रातगणादिषु ।
संरक्षेत्समयं राजा दुर्गे जनपदे तथा ॥
यो धर्मः कर्म यच्चैषामुपस्थानविधिश्च यः ।
यत्तेषां वृत्त्युपादानमनुमन्येत तत्तथा ॥ इति ॥ १९२ ॥

इति संविद्व्यतिक्रमप्रकरणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ वेतनादानप्रकरणम् ॥ १६ ॥

मि० उ. संप्रति वेतनस्यानपाकर्माख्यं व्यवहारपदं प्रस्तूयते ।

तत्स्वरूपं च नारदेनोक्तम्, (व्यव. ६ । १)

भृतानां वेतनस्योक्तो दानादानविधिक्रमः ।
वेतनस्यानपाकर्म तद्विवादपदं स्मृतम् ॥ इति ।

अस्यार्थः । भृतानां वेतनस्य वक्ष्यमाणश्लोकैरुक्तो दानादानविधिक्रमो यत्र विवादपदे तद् वेतनस्यानपाकर्मेत्युच्यते ।

अव. तत्र निर्णयमाह ।

या० गृहीतवेतनः कर्म त्यजन् द्विगुणमावहेत् ।
अगृहीते समं दाप्यो भृत्यै रक्ष्य उपस्करः ॥ १९३ ॥

मि० गृहीतं वेतनं येनासौ स्वाङ्गीकृतं कर्म त्यजन् अकुर्वन् द्विगुणां भृतिं स्वामिने दद्यात् । यदा पुनरभ्युपगतं कर्म अगृहीते एव वेतने त्यजति तदा समं यावद्वेतनमभ्युपगतं तावद्दाप्यो न द्विगुणम् । यद्वा अङ्गीकृतां भृतिं दत्त्वा बलात्कारयितव्यः ।

कर्माकुर्वन् प्रतिश्रुत्य कार्यो दत्त्वा भृतिं बलात् ।
इति नारदवचनात् । (व्यव. ६ । ५)

भृतिरपि तेनैवोक्ता,

भृताय वेतनं दत्त्वा कर्म स्वामी यथाक्रमम् ।
आदौ मध्येऽवसाने वा कर्मणो यद्विनिश्चितम् ॥
इति ।

तैश्च भृत्यैरुपस्कर उपकरणं लाङ्गलादीनां प्रग्रह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योक्त्रादिकं यथाशक्त्या रक्षणीयम् । इतरथा कृष्यादिनिष्पत्त्यनुपपत्तेः ॥ १९३ ॥

बा० १। *संप्रतीति । तत्प्रसङ्गादेवेति भावः। *भृतानां, भृत्यानाम् । क्वचित्तथैव पाठः । दानादानयोर्विधी तयोः क्रम इत्यर्थः । पूर्वं नोक्तोऽस्यैवारम्भे उक्तत्वात् अत आह * वक्ष्यमाणेति । अत्रैवेति भावः । तदुक्तेः शेषमाह * यत्रेति ।

२। एवं स्मृत्यन्तरोक्तलक्षणके तत्र विवादे निर्णयप्रदर्शको मूलकृदिति मूलमवतारयति * तत्रेति । उक्ताख्यविवादपदे इत्यर्थः । आवहेदित्यस्यार्थो * दद्यादिति । तृतीयपादार्थमाह *यदेति।सर्वं वाक्यमिति न्यायेनाह * अगृहीते एवेति । तत्फलमाह * न द्विगुणमिति । अत्रैव विषये पक्षान्तरमाह * यद्वाऽङ्गीति । असममिति छेदः, तस्य बलादित्यर्थो, दाप्य इत्यस्य दत्त्वा कारणीय इत्यर्थ इति भावः । प्रतिश्रुत्याङ्गीकृत्येतिपूर्वान्वयि । *कार्यः, कारणीयः। * तेनैव, नारदेनैव । तुर्यपादेनेति भावः । * भृतायेति । भृताय भृत्यायादिमध्यावसानेषु यथाक्रममैच्छिकक्रममनतिक्रम्य उक्तसमयमैच्छिकमनातिक्रम्येति यावत् । तेन क्रमेण वेतनं दत्त्वा कर्म, कारयेदिति शेषः । वेतनस्वरूपमाह *कर्मण इति । कर्मणोऽनुसारेण यत् मध्यस्थैर्विनिश्चितं कल्पितं द्रव्यं तद्वेतनमित्यर्थः । तथा चानेन भृतिस्वरूपमप्युक्तम् । तुर्यपादार्थमाह * तैश्चेति । उपकरणं तत्तत्कर्मयोग्यसामग्री । तत्र तां कृषावाह * लाङ्गलादीनामिति । प्रग्रहो रज्जुः । योक्त्रं केशादिनिर्मितम् । विधिसार्थक्यायाह * इतरथेति । तदरक्षणे इत्यर्थः ॥ १९३ ॥

मि० अव. भृतिमपरिच्छिद्य यः कर्म कारयति तं प्रत्याह ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या० दाप्यस्तु दशमं भागं वाणिज्यपशुसस्यतः ।
अनिश्चित्य भृतिं यस्तु कारयेत्स महीक्षिता ॥ १९४ ॥

मि० यस्तु स्वामी वणिक् गोमी क्षेत्रिको वा अपरिच्छिन्नवेतनमेव भृत्यं कर्म कारयति स तस्माद्वाणिज्यपशुसस्यलक्षणात्कर्मणो यल्लब्धं तस्य दशमं भागं भृत्याय महीक्षिता राज्ञा दापनीयः ॥ १९४ ॥

बा० १। *अपरिच्छिद्य, अनिश्चित्य । *यः, स्वामी । सः वाणिज्यादिभेदात्रिविध इत्याह * वणिगित्यादि । लिङर्थो ऽविवक्षित इत्याह *कारयतीति । *सः, त्रिविधः स्वामी । तस्य साकाङ्क्षत्वादाह * तस्मादिति । वाणिज्यं च पशुश्च सस्यं चेति समाहारद्वंद्वात्पञ्चम्यन्तात्सार्वविभक्तिकस्तसिरित्याह * वाणिज्येति । पशुसस्यशब्दौ तत्कर्मोपलक्षकावित्याह * कर्मण इति । यल्लब्धं तस्य इत्यनेनासंबद्धत्वं मूले निरस्तम् ॥ १९४ ॥

मि० अव. अनाज्ञप्तकारिणं प्रत्याह ।

या० देशं कालं च योऽतीयाल्लाभं कुर्याच्च योऽन्यथा ।
तत्र स्यात्स्वामिनश्छन्दोऽधिकं देयं कृतेऽधिके ॥ १९५ ॥

मि० यस्तु भृत्यः पण्यविक्रयाद्युचितं देशं कालं च पण्यविक्रयाद्यकुर्वन् दर्पादिनोल्लङ्घयेत्, तस्मिन्नेव वा देशे काले च लाभम् अन्यथा व्ययाद्यातिशयसाध्यतया हीनं करोति, तस्मिन् भृतके भृतिदानं प्रति स्वामिनः छन्द इच्छा भवेत्, यावदिच्छति तावद्दद्यान्न पुनः सर्वामेव भृतिमित्यर्थः । यदा पुनर्देशकालाभिज्ञतया अधिको लाभः कृतस्तदा पूर्वपरिच्छिन्नाया भृतेरपि किमपि ध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नमधिकं स्वामिना भृत्याय दातव्यम् ॥ १९५ ॥

बा० १। *अनाज्ञप्तकारिणम्, आज्ञामुल्लङ्घ्यकारिणं भृत्यम्। काले चेत्यस्य दर्पादिनोल्लङ्घयेदित्यत्रान्वयः। किंभूतोऽत आह *पण्येति। तत्रैवेत्यादिः। आदिना क्रयः। उत्तरत्रादिनाऽऽलस्यादिः। अतीयादित्यस्यार्थं *उल्लङ्घयेदिति। द्वितीयपादार्थमाह *तस्मिन्नेवेति। कुर्याच्चेति चो वार्थ इत्याह *वेति। प्राग्वदाह *करोतीति। तत्रेत्याद्यर्थमाह *तस्मिन्नित्यादि। तत्फलमाह *नपुनरिति। नत्वित्यर्थः। तुर्यपादार्थमाह *यदेति। स्वामितोऽपीति भावः॥ १९५ ॥

मि० अव० अनेकभृत्यसाध्यकर्मणि भृतिदानप्रकारमाह।

या० यो यावत्कुरुते कर्म तावत्तस्य तु वेतनम्।
उभयोरप्यसाध्यं चेत् साध्ये कुर्याद्यथाश्रुतम् ॥१९६॥

मि० यदा पुनरेकमेव कर्म नियतवेतनमुभाभ्यां क्रियमाणम्, उभयोरप्यसाध्यं चेत्—व्याध्याद्यभिभवादुभाभ्याम् अपिशब्दाद्बहुभिरपि यदि न परिसमापितं, तदा यो भृत्यो यावत्कर्म करोति तावत् तस्मै तत्कृतकर्मानुसारेण मध्यस्थकल्पितं वेतनं देयं, न पुनः समम्।

न चावयंवशः कर्मणि वेतनस्यापरिभाषितत्वाद्दानमिति मन्तव्यम्।

साध्ये तु—उभाभ्यां कर्मणि निर्वर्तिते यथाश्रुतं यावत्परिभाषितं तावदुभाभ्यां देयं, न पुनः प्रत्येकं कृत्स्नवेतनं, नापि कर्मानुरूपं परिकल्प्य देयम् ॥१९६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बा० १। * अनेकभृत्येति। क्षिप्रभृतिभिर्मिलित्वैतत्कर्मैतावत्या भृत्या क्रियते इति परिभाष्य क्रियमाणे कर्मणीत्यर्थः। पादत्रयस्यैकोऽर्थ इत्याह * यदा पुनरिति। आदावनेकभृत्यसाध्यकर्मस्वरूपमाह *एकमेवेति। उभयोरप्यसाध्यं चेदित्यस्यार्थमाह *व्याध्याद्यभिभवादिति। अन्यथाऽङ्गीकारस्यैवासंभवापत्तेरिति भावः। तस्येति शेषे षष्ठीत्याह * तस्माइति। वेतनस्वरूपस्य पूर्वमुक्तत्वात्तदनुरोधेन तावत्पदार्थमाह * तत्कृतेति। एकस्मिन्कर्मणि पञ्चभिः कर्मकरैर्दशभिः पणैर्भृत्या क्रियमाणे व्याध्यादिना चाशक्तैः सर्वैरपि तत्कर्म न निष्पादितं किं तु कियदेव, तत्र प्रतिपुरुषं पणद्वयं विभज्य साम्येन न देयम् अपि तु तत्तत्कर्मानुसारेण न्यूनाधिकं देयमित्यर्थः। एतेन तत्कर्मणि निष्पन्ने पूर्णे परिभाषितवेतनमपरिभाषितं स्वामिदत्तं कर्मकरा अपि स्वकृतव्यापारानुरोधेनैव विभज्य गृह्णीयुरिति सूचितम्।

२। ननु न पुनः सममित्युक्त्या तत्कृतकर्मानुसारेण वेतनदानप्राप्त्याऽवयवशो विभज्य देयमिति लब्धं, तच्चानुपपन्नम्। कर्मणि समुदितनियतवेतनस्यैव परिभाषितत्वेन पृथक् पृथक् तदनुक्त्या परिभाषानुसारेण तत्र वेतनादानस्यैवौचित्यात्। अत आह *न चेति। नापीत्यर्थः। यद्यपि विभज्य दानमपरिभाषितं तथापि व्याध्यादिना तदसमाप्तेस्तत्र दोषाभावेन कर्मानुसारेण दातुमुचितमेवेति भावः।

३। तुर्यपादार्थमाह *साध्येत्विति। अस्यार्थमाह *उभाभ्यामिति। उभाभ्यामित्युपलक्षणं, बहुभिरित्यपि बोध्यम्। यथाश्रुतमित्यस्य व्याख्या *यावदिति। प्राग्वदाह *न पुनरिति॥१९६॥

मि० अव. आयुधीयभारवाहकौ प्रत्याह।

या० अराजदैविकं नष्टं भाण्डं दाप्यस्तु वाहकः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रस्थानविघ्नकृच्चैव प्रदाप्यो द्विगुणां भृतिम् ॥ १९७ ॥

मि० न विद्यते राजदैविकं यस्य भाण्डस्य तत्तथोक्तम् । तद्यदि प्रज्ञाहीनतया वाहकेन नाशितं तदा नाशानुसारेणासौ तद्भाण्डं दापनीयः ।

तदाह नारदः, (व्यव. ६।९)

भाण्डं व्यसनमागच्छेद्यदि वाहकदोषतः ।
दाप्यो यत्तत्र नश्येत्तु दैवराजकृतादृते ॥ इति ।

यः पुनर्विवाहाद्यर्थं मङ्गलवति वासरे प्रतिष्ठमानस्य तत्प्रस्थानौपयिकं कर्म प्रागङ्गीकृत्य तदानीं न करिष्यामीति प्रस्थानविघ्नमाचरति तदाऽसौ द्विगुणां भृतिं दाप्यः । अत्यन्तोत्कर्षहेतुकर्मनिरोधात् ॥१९७॥

बा० १ । अभ्युपेत्याशुश्रूषाख्ये विवादपदे शुश्रूषकः पञ्चविध इत्युपक्रम्य चतुर्विधः कर्मकर इत्यादिना तस्य तत्त्वमुक्त्वा भृतकत्रैविध्यं दर्शितम् उत्तमस्त्वायुधीयोऽत्रेत्यनेन । तत्र गृहीतवेतनः कर्मेत्यनेनात्र कृषीवलभृतकवेतनविषये उक्तम् । अत एव तुर्यपादस्तत्र तथैव व्याख्यातः । सांप्रतमायुधीयभारवाहकभृतकौ प्रति विशेषं दर्शयतीत्याह * आयुधीयेति । यद्यप्यग्रे वचने व्युत्क्रमस्तथापि पूर्वक्रमेण पूर्वनिपातनियमेन वक्ष्यमाणाशयेन चैवमुक्तम् । भाण्डं पात्रादिकम् ।

सर्वमावपनं भाण्डं पात्रामत्रं च भाजनम् । इत्यमरः ।

स्याद्भाण्डमश्वाभरणेऽमत्रे मूले वणिग्धने—

इति स एव नानार्थप्रकरणे । * तत् , तादृशं भाण्डम् । वाहकेनेत्युपलक्षणमायुधीयस्यापि । मूले नष्टमित्यत्रान्तर्भाविवितो ण्यर्थ इत्याह *नाशितमिति । नाशानुसारेणेत्यत्र मानमाह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

* तदाहेति । *व्यसनं, नाशम् । * दोषतः, दोषेण बुद्धिहीनत्वरूपेण । * तत्र, भाण्डे । अनेनोक्तार्थलाभः ।

२ । उत्तरार्द्धार्थमाह * यः पुनरिति । * वासरे इति । *तदानीं, प्रस्थानलग्नवेलायाम् । द्वैगुण्ये हेतुमाह *अत्यन्तोत्कर्षेति । विवाहादिहेतुभूतप्रस्थाननिरोधादित्यर्थः । एवं च स्वतो दोषाल्पत्वेऽपि परतो दोषबाहुल्यमिति भावः ॥ २९७ ॥

मि० अव. किञ्च ।

या० प्रक्रान्ते सप्तमं भागं चतुर्थं पथि संत्यजन् ।
भृतिमर्द्धपथे सर्वां प्रदाप्यस्त्याजकोऽपि च ॥ १९८ ॥

प्रक्रान्ते अध्यवासिते प्रस्थाने स्वाङ्गीकृतं कर्म यस्त्यजति असौ भृतेः सप्तमं भागं दाप्यः ।

नन्वत्रैव विषये प्रस्थानविघ्नकृदित्यादिना द्विगुणभृतिदानमुक्तम्, इदानीं सप्तमो भाग इति विरोध उच्यते । भृत्यान्तरोपादानावसरसंभवे स्वाङ्गीकृतं कर्म यस्त्यजति तस्य सप्तमो भागः, यस्तु प्रस्थानलग्नसमयएव त्यजति तस्य द्विगुणभृतिदानमित्यविरोधः ।

यः पुनः पथि प्रक्रान्ते गमने वर्तमाने सति कर्म त्यजति स भृतेश्चतुर्थं भागं दाप्यः । अर्धपथे पुनः सर्वां भृतिं दाप्यः । यस्तु त्याजकः कर्मात्यजन्तं त्याजयति स्वामी पूर्वोक्तप्रदेशेषु असावपि पूर्वोक्तसप्तमभागादिकं भृत्याय दापनीयः ।

एतच्च व्याधितादिविषयम् ।
(मनु अ. ८ श्लो. २१५)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भृतोऽनार्तो न कुर्याद्यो दर्पात्कर्म यथोदितम् ।
स दण्ड्यः कृष्णलान्यष्टौ न देयं तस्य वेतनम् ॥ इति ।
यदा पुनर्व्याधावपगतेऽन्तरितदिवसान्परिगणय्य पूरयति तदा लभतएव वेतनम् ।
(अ. ८ श्लो. २१६)

आर्तस्तु कुर्यात्स्वस्थः सन् यथाभाषितमादितः ।
सुदीर्घस्यापि कालस्य स्वं लभेतैव वेतनम् ॥

इति मनुस्मरणात् । यस्त्वपगतव्याधिः स्वस्थ एव चालस्यादिना स्वारब्धं कर्माल्पोनं न करोति परेण वा न समापयति तस्मै वेतनं न देयमिति ।
यथाह मनुः, (अ. ८ श्लो. २१७)

यथोक्तमार्तः स्वस्थो वा यस्तत्कर्म न कारयेत् ।
न तस्य वेतनं देयमल्पोनस्यापि कर्मणः ॥ इति ॥१९८॥

इति वेतनादानप्रकरणम् ॥

बा० १। * किं चेति । अत्रैवान्यदप्याहेत्यर्थः । प्रक्रान्ते इत्यस्य प्रकृतत्वात्प्रस्थानमेव विशेष्यम् । मध्ये वेति तदर्थः । तदाह * प्रक्रान्ते इति । प्रत्यासत्तेराह * भृतेरिति ।

२। स्वविरोधमेव स्वस्याह * नन्विति । * अत्रैव, प्रस्थानविघ्नकरणरूपे एव । तस्य सप्तमो भाग इत्यस्योच्यतइति शेषः। तदवसरस्ततः पूर्वमेव । अत एवाध्यवसिते इति व्याख्यातं न तु कृते इति ! * प्रस्थानलग्नेति । अत एव तत्र तथैव व्याख्यातम् ।

३। द्वितीयपादार्थमाह * यः पुनरिति । प्रक्रान्ते इत्यनुवर्त्तते । मार्गे समाक्रान्ते इत्यर्थः । तत्फलितमाह * गमने इति । यद्वा पथि मार्गे प्रक्रान्ते इत्यत्र वर्तमाने क्त इति तदर्थमाह गमने इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४। त्याजकोऽपि चेति व्याचष्टे * यस्त्विति । प्रत्यासत्तेरेवाह * पूर्वोक्तेति । त्रिष्वित्यर्थः । * एतच्चेति । प्रस्थानविघ्नकृदित्यारभ्य यदुक्तं तत्सर्वमित्यर्थः । ननु एवं विषयविभागे किं मानम्, अत आह * भृत इति । यो भृतः भृतिपरिक्रीतः भृत्यः तथा पाठ एव वा * अनार्त्तः व्याध्यादिरहितः दर्पादहंकाराद्यथापरिभाषितं कर्म न कुर्यात्स कृष्णलानि अष्टौ दण्ड्यः । गुञ्जापरिमितं सुवर्णं कृष्णलम् । कृष्णलानित्यपपाठः । यावत्कर्म कृतं तस्य वेतनं च न देयमित्यर्थः । इतीत्यग्रे "अनार्ते मनुना सदण्डतददानविधानात्" इति शेषः । *आदितः आदौ यथोक्तं तथा कुर्यात् । सुदीर्घस्येति हेतौ शेषे षष्ठी । चिरकालादपीत्यर्थः । * अपगतेति । व्याध्युपसृष्टः पश्चान्निवृत्तव्याधिराद्यः । व्याध्यसंसृष्ट एव द्वितीयः । आदिना दर्पग्रहणम् । * वेतनमिति । किंचिच्छेषकस्य कृतस्य कर्मण इत्यादिः । * स्वस्थोवा, सुस्थो वेति पाठान्तरम् । तत् स्वारब्धेत्युपलक्षणं, न कुर्यादित्यपि बोध्यम् । अल्पेन कर्मणा न्यूनस्य कृतस्यापि कर्मणः वेतनं तस्य तस्मै न देयमित्यर्थः ॥ १९८ ॥

इति वेतनादानप्रकरणम् ।

अथ द्यूतसमाह्वयप्रकरणम् ॥ १७ ॥

मि० उ. अधुना द्यूतसमाह्वयाख्यं विवादपदमाधिक्रियते । तत्स्वरूपं—

नारदेनाभिहितम्, (व्यव. १६।१)

अक्षव्रध्नशलाकाद्यैर्देवनं जिह्मकारितम् ।
पणक्रीडा वयोभिश्च पदं द्यूतसमाह्वयम् ॥

अक्षाः पाशकाः । व्रध्नश्चर्मपट्टिका । शलाका द-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्तादिमय्यो दीर्घचतुरस्राः। आद्यग्रहणाच्चतुरङ्गादिक्रीडासाधनं कारितुरङ्गरथादिकं गृह्यते । तैरप्राणिभिर्यद्देवनं क्रीडा पणपूर्विका क्रियते, तथा वयोभिः पक्षिभिः कुक्कुटपारावतादिभिः चशब्दान्मल्लमेषमहिषादिभिश्च प्राणिभिर्या पणपूर्विका क्रीडा क्रियते, तदुभयं यथाक्रमेण द्यूतसमाह्वयाख्यं विवादपदम्। द्यूतं च समाह्वयश्च द्यूतसमाह्वयम्। तदुक्तं—

मनुना, (अ. ९ श्लो. २२३)

अप्राणिभिर्यत्क्रियते तल्लोके द्यूतमुच्यते ।
प्राणिभिः क्रियमाणस्तु स विज्ञेयः समाह्वयः॥ इति।

अव. तत्र द्यूतसभाधिकारिणो वृत्तिमाह ।

या० ग्लहे शतिकवृद्धेस्तु सभिकः पञ्चकं शतम् ।
गृह्णीयाद् धूर्तकितवादितराद्दशकं शतम्॥ १९९॥

मि० परस्परसंप्रतिपत्त्या कितवपरिकल्पितः पणो ग्लह इत्युच्यते। तत्र ग्लहे तदाश्रया शतिका शतपरिमितादधिकपरिमाणा वा वृद्धिर्यस्यासौ शतिकवृद्धिः तस्माद् धूर्तकितवात्पञ्चकं शतमात्मवृत्त्यर्थं सभिको गृह्णीयात्। पञ्च पणा आयो यस्मिन् शते तत्पञ्चकं शतम् । तदस्मिन्वृद्ध्यायलाभेत्यादिना कन्। जितग्लहस्य विंशतितमं भागं गृह्णीयादित्यर्थः। सभा कितवनिवासार्था यस्यासौ सभिकः कल्पिताक्षादिनिखिलक्रीडोपकरणस्तदुपचितद्रव्योपजीवी सभापतिरुच्यते । इतरस्मात्पुनरपरिपूर्णशतिकवृद्धेः धूर्तकितवाद्दशकं शतं, जितद्रव्यस्य दशमं भागं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गृह्णीयादिति यावत् ॥ १९९ ॥

बा० १। *अधुनेति। महाप्रकरणसङ्गत्येति भावः। द्यूतं च समाह्वयश्च तावाख्ये यस्य विवादपदस्य तदित्यर्थः। करणभेदेऽपि तत्स्वरूपस्यैक्यादेकत्वेन निर्देशः। अप्राणिभिरक्षादिभिः साध्यं देवनं द्यूतं, प्राणिभिः कुक्कुटादिभिः साध्यं देवनं समाह्वय इति विवेकः। तदेतदुभयं नारदीयव्याख्यानेन दर्शयति *अक्षा इत्यादिना। पाशक इत्यत्राल्पार्थे कन्। अत एवाग्रे *दीर्घेति। व्रध्नशब्दो दन्त्योष्ठ्यादिः। *दन्तेति। गजदन्तादिविकारभूता इत्यर्थः। रथादिकमिति आदिनोष्ट्रादिपरिग्रहः। मूले देवनमित्यस्यैव व्याख्या। * पणक्रीडेति। अत्र शाकपार्थिवादिसमास इत्याह * पणपूर्विकेति। * तदुभयमिति। जिह्मेन सभिकेन कारितमिति बोध्यम्। तत्र द्यूतेति नामनामिनोरभेदः। तदाह * द्यूतेति। पदमित्यस्यार्थो * विवादेति। एकवचनोपपत्तये आह * द्यूतं चेति। समाहारद्वन्द्व इति भावः। *क्रियमाणः, क्रीडाविशेषः।

२। एवं स्मृत्यन्तरोक्तलक्षणके तत्र विवादपदे सभिकवृत्तिप्रदर्शकं मूलमिति तदवतारयति * तत्रेति। उक्तपदे इत्यर्थः। संप्रतिपत्तिः संवादः। * पण इति। न तु वराटकानामित्यादिलक्षित इति भावः। * तदाश्रया, ग्लहाश्रया। शतशब्दो न्यूनसंख्याया व्यवच्छेदको नाधिकसंख्याया इति तस्या अप्युपलक्षणमित्याह * तदधिकेति। वक्ष्यमाणस्यात्रापि संबन्ध इत्याह * तस्मात् धूर्तेति। यत्र द्यूते शतेन तदाधिकैर्वा काकिण्यादिभिः परिकल्पितं पणं जयति यः स जेता शतिकादिवृद्धिः। तस्मात् द्यूतकारात्तज्जेतुः सभाधिकारी पञ्च काकिण्यादीन् गृह्णीयादिति भावः। तदाह * जितग्लहस्येति। प्रागुक्तसभाप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिरत्र नेति सूचयन् तद्व्युत्पत्तिमाह * सभेति । न राजादिसभेति भावः । व्रीह्यादीति ठन् । फलितमाह * कल्पितेति । अक्षादिरूपाणि निखिलक्रीडाया उपकरणानि सामग्रीरूपाणि कल्पितानि सम्पादितानि येनेत्यर्थः । तत्र हेतुं सूचयन्नाह * तदुपचितेति । उत्तरार्धार्थमाह * इतरस्मादिति । अस्यैव व्याख्या * अपरिपूर्णेति । अत एवायं कितव एव न तु धूर्त इति केचित् । वस्तुतोऽत्रापि तथैव पाठः ॥ १९९ ॥

मि० अव. एवं क्लृप्तवृत्तिना सभिकेन किं कर्तव्यमित्यत आह ।

या० स सम्यक्पालितो दद्याद्राज्ञे भागं यथाकृतम् ।
जितमुद्ग्राहयेज्जेत्रे दद्यात्सत्यं वचः क्षमी ॥ २०० ॥

मि० य एवं क्लृप्तवृत्तिर्द्यूताधिकारी स राज्ञा धूर्तकितवेभ्यो रक्षितस्तस्मै राज्ञे यथासंप्रतिपन्नमंशं दद्यात् ।तथा जितं यद् द्रव्यं तद् उद्ग्राहयेत्, बन्धकग्रहणेनासेधादिना च पराजितसकाशादुद्धरेत् । उद्धृत्य च तद्धनं जेत्रे जयिने सभिको दद्यात् । तथा क्षमी भूत्वा सत्यं वचो विश्वासार्थं द्यूतकारिणां दद्यात् ।

तदुक्तं नारदेन, (व्यव. १६।२)
सभिकः कारयेत् द्यूतं देयं दद्याच्च तत्कृतम्।इति॥२००॥

बा० १ ।इत्यत आहेति पाठः । इत्याहेति पाठे इत्याशङ्कायामाहेत्यर्थः। कुत इत्याकाङ्क्षायामाह * राज्ञेति।*जितं यदिति। शब्दत इति भावः। द्यूतकारिणामिति शेषे षष्ठी । दद्यादित्यस्यानुषङ्गः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२। तृतीयपादार्थे संमतिमाह * तदुक्तमिति। *तत्कृतं, कितवेन पणीकृतं देयं तत उद्धृत्य सभिको जेत्रे दद्याच्चेत्यर्थः॥२००॥

मि० अव. यदा पुनः सभिको दापयितुं न शक्नोति तदा राजा दापयेदित्याह।

या० प्राप्ते नृपतिना भागे प्रसिद्धे धूर्तमण्डले।
जितं ससभिके स्थाने दापयेदन्यथा न तु॥ २०१॥

मि० प्रसिद्धे अप्रच्छन्ने राजाध्यक्षसमन्विते ससभिके सभिकसहिते कितवसमाजे सभिकेन च राजभागे दत्ते राजा धूर्तकितवमाविप्रतिपन्नं जितं पणं दापयेत्। अन्यथा–प्रच्छन्ने सभिकरहिते अदत्तराजभागे द्यूते जितं पणं जेत्रे न दापयेत्॥ २०१॥

बा० १। ससभिके इत्यस्यार्थः *सभिकेति। धूर्तेत्यस्यार्थः *कितवेति। प्राप्ते इत्यादिव्याख्या *सभिकेनचेति। मूले स्थाने इति अन्ययं युक्तमित्यर्थकं, तदर्थमाह * अविप्रतिपन्नमिति। अर्थादाह * पणमिति। अन्यथेत्यनेनोक्तत्रितयव्यतिरेक उच्यते इत्याहोक्तक्रमेण * प्रच्छन्ने इत्यादि। *जेत्रे इति। राजेति भावः॥ २०१॥

मि० अव. जयपराजयविप्रतिपत्तौ निर्णयोपायमाह।

या० द्रष्टारो व्यवहाराणां साक्षिणश्च तएव हि।

द्यूतव्यवहाराणां द्रष्टारः सभ्यास्तएव राज्ञा नियोक्तव्याः। न तत्र श्रुताध्ययनसंपन्ना इत्यादिर्नियमोऽस्ति। साक्षिणश्च द्यूते द्यूतकारा एव कार्याः। न तत्र स्त्रीबालवृद्धकितवेत्यादिनिषेधोऽस्ति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि० अव. क्वचित् द्यूतं निषेद्धुं दण्डमाह ।

या० राज्ञा सचिह्नं निर्वास्याः कूटाक्षोपधिदेविनः ॥२०२॥

मि० कूटैरक्षादिभिरुपाधिना च मतिवञ्चनहेतुना मणिमन्त्रौषधादिना ये दीव्यन्ति तान् श्वपदादिनाऽङ्कयित्वा राजा स्वराष्ट्रान्निर्वासयेत् ।

नारदेन निर्वासने विशेष उक्तः, (व्यव. १६।६)

कूटाक्षदेविनः पापान् राजा राष्ट्राद्विवासयेत् ।
कण्ठेऽक्षमालामासज्य स ह्येषां विनयः स्मृतः ॥

इति ।

यानि च मनुवचनानि द्यूतनिषेधपराणि-
(अ. ९ श्लो. २२४)
द्यूतं समाह्वयं चैव यः कुर्यात् कारयेत वा ।
तान् सर्वान् घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः ॥

इत्यादीनि तान्यपि कूटाक्षदेवनविषयतया राजाध्यक्षसभिकराहितद्यूतविषयतया च योज्यानि ॥२०२॥

बा० १। प्रकृतत्वादाह * द्यूतेति । एतदर्थमाह * सभ्या इति । एवफलमाह * न तत्रेति । तद्विषये इत्यर्थः । वाक्यान्तरमाह * साक्षिणश्चेति । तएवेत्यस्य संबन्धादाह * द्यूतकारा एवेति । प्राग्वदाह * न तत्रेति । तद्विषये इत्यर्थः ।

उ० २। *क्वचित्, न तु सर्वत्र । कूटाक्षादिभिर्दीव्यतो दण्डविधानात्तादृशैरक्षादिभिर्देवनं निषिद्धम् । एवं सभिकराजाध्यक्षरहितस्थलेऽपि देवनं निषिद्धमिति बोध्यम् । *कूटैः, सकपटैः । अक्षपदमुपलक्षणमित्याह * अक्षादीति । * अक्षमालां, प्रकृताक्षादिमालाम् । सर्वज्ञानायेति भावः । * हि, यतः । * सः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कण्ठेऽक्षमालाबन्धपूर्वकविवासः । * एषां, कूटाक्षदेविनाम् । * विनयः, शिक्षेत्यर्थः ।

३। विरोधं परिहरति *यानिचेति । कूटेत्युपलक्षणमुपधेरपि । * राजेति । अत एव पूर्वं तथा प्रतिपादितम् ॥२०२॥

मि० अव. किञ्च ।

या० द्यूतमेकमुखं कार्यं तस्करज्ञानकारणात् ।

मि० यत्पूर्वोक्तं द्यूतं तत् एकमुखम् एकं मुखं प्रधानं यस्य द्यूतस्य तत्तथोक्तं कार्यम् । राजाध्यक्षाधिष्ठितं राज्ञा कारयितव्यमित्यर्थः । तस्करज्ञानकारणात्-तस्करज्ञानरूपं प्रयोजनं पर्यालोच्य । प्रायशश्चौर्यार्जितधना एव कितवा भवन्ति, अतश्चौरविज्ञानार्थमेकमुखं कार्यम् ॥

मि० अव. द्यूतधर्मं समाह्वयेऽतिदिशन्नाह ।

या० एष एव विधिर्ज्ञेयः प्राणिद्यूते समाह्वये॥ २०३ ॥

मि० ग्लहे शतिकवृद्धेरित्यादिना यो द्यूतधर्म उक्तः स एव प्राणिद्यूते मल्लमेषमहिषादिनिर्वर्त्ये समाह्वयसंज्ञके ज्ञातव्यः ॥ २०३ ॥

इति द्यूतसमाह्वयाख्यं प्रकरणम् ।

बा० १ । *किं चेति । अन्यत्रापि तन्निषेद्धुम् अन्यदपि द्यूतविषये आहेत्यर्थः । मुखपदार्थः * प्रधानमिति । विशिष्टतात्पर्यार्थमेवाह * राजाध्यक्षेति । कार्यते ऽनेनेति व्युत्पत्त्या कारणशब्दः फलपरः, कर्मधारयः, ल्यब्लोपे पञ्चमीत्याह * तस्करेति । अन्यथा कारणादित्यस्य वैयर्थ्यं स्पष्टमेव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तात्पर्यार्थमाह * प्रायश इति ।

अत एव मनुः, (अ. ९)

द्यूतं समाह्वयं चैव राजा राष्ट्रान्निवारयेत् ।
राज्यान्तकरणावेतौ द्वौ दोषौ पृथिवीक्षिताम् ॥ (२२१)
प्रकाशमेतत्तास्कर्यं यद्देवनसमाह्वयौ ।
तयोर्नित्यं प्रतीघाते नृपतिर्यत्नवान् भवेत् ॥ (२२२)
कितवान्कुशीलवान् चौरान् पाखण्डस्थांश्च मानवान् ।
विकर्मस्थान् शौण्डिकांश्च क्षिप्रं निर्वासयेत्पुरात् ॥ (२२५)
एते राष्ट्रे वर्त्तमाना राज्ञः प्रच्छन्नतस्कराः ।
विकर्मक्रियया नित्यं बाधन्ते भद्रिकाः प्रजाः ॥ (१२६)
द्यूतमेतत्पुरा कल्पे दृष्टं वैरकरं महत् ।
तस्मात् द्यूतं न सेवेत हास्यार्थमपि बुद्धिमान् ॥ (२२७)
प्रच्छन्नं वा प्रकाशं वा तन्निषेवेत यो नरः ।
तस्य दण्डविकल्पः स्याद्यथेष्टं नृपतेस्तथा ॥ (२२८)
क्षत्रविट्शूद्रयोनिस्तु दण्डं दातुमशक्नुवन् ।
आनृण्यं कर्मणा गच्छेद्विप्रो दद्याच्छनैः शनैः ॥ (२२९)
स्त्रीबालोन्मत्तवृद्धानां दरिद्राणामरोगिणाम् ।
शिफाविदलरज्ज्वाद्यैर्विदध्यान्नृपतिर्दमम् ॥ इति । (२३०)

अस्य द्यूतत्वाभावाल्लक्ष्यार्थं तस्याह *निर्वर्त्त्ये इति ॥ २०३ ॥

इति द्यूतसमाह्वयाख्यं प्रकरणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ वाक्पारुष्यप्रकरणम् ॥ १८ ॥

मि० उ. इदानीं वाक्पारुष्यं प्रस्तूयते ।

तल्लक्षणं चोक्तं नारदेन, (व्यव. १५ । १)

देशजातिकुलादीनामाक्रोशन्यङ्गसंयुतम् ।
यद्वचः प्रतिकूलार्थं वाक्पारुष्यं तदुच्यते ॥

देशादीनाम् आक्रोशन्यङ्गसंयुतम्, उच्चैर्भाषणमाक्रोशो न्यङ्गमवद्यं तदुभययुक्तं, यत्प्रतिकूलार्थमुद्वेगजननार्थं वाक्यं तद्वाक्पारुष्यं कथ्यते ।

तत्र कलहप्रियाः खलु गौडा इति देशाक्रोशः । नितान्तं खलु लोलुपा विप्रा इति जात्याक्रोशः । क्रूरचरिता ननु वैश्वामित्रा इति कुलाक्षेपः । आदिग्रहणात्स्वविद्याशिल्पादिनिन्दया विद्वच्छिल्प्यादिपुरुषाक्षेपो गृह्यते ।

तस्य च दण्डतारतम्यार्थं निष्ठुरादिभेदेन त्रैविध्यमभिधाय तल्लक्षणं—

तेनैवोक्तम्, (व्यव. १५ । श्लो. २ । ३)

निष्ठुराश्लीलतीव्रत्वात्तदपि त्रिविधं स्मृतम् ।
गौरवानुक्रमात्तस्य दण्डोऽपि स्यात्क्रमाद्गुरुः ॥
साक्षेपं निष्ठुरं ज्ञेयमश्लीलं न्यङ्गसंयुतम् ।
पतनीयैरुपाक्रोशैस्तीव्रमाहुर्मनीषिणः ॥ इति ।

तत्र धिङ् मूर्खं जाल्ममित्यादि साक्षेपम् । अत्र न्यङ्गमिति असभ्यमवद्यं भगिन्यादिगमनं, तद्युक्तमश्लीलम् । सुरापोऽसीत्यादिमहापातकाद्याक्रोशैर्युक्तं वचस्तीव्रम् ।

अव. तत्र निष्ठुराक्रोशे सवर्णविषये दण्डमाह ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या० सत्यासत्यान्यथास्तोत्रैर्न्यूनाङ्गेन्द्रियरोगिणाम् ।
क्षेपं करोति चेद्दण्ड्यः पणानर्द्धत्रयोदशान् ॥ २०४ ॥

मि० न्यूनाङ्गाः करचरणादिविकलाः । न्यूनेन्द्रिया नेत्रश्रोत्रादिरहिताः । रोगिणो दुश्चर्मप्रभृतयः। तेषां सत्येनासत्येनान्यथास्तोत्रेण च निन्दार्थया स्तुत्या । यत्र नेत्रयुगलहीन एषोऽन्ध इत्युच्यते तत्सत्यम् । यत्र पुनश्चक्षुष्मानेषोऽन्ध इत्युच्यते तत् असत्यम् । यत्र विकृताकृतिरेव दर्शनीयस्त्वमसीत्युच्यते तत् अन्यथास्तोत्रम् । एवंविधैर्यः क्षेपं भर्त्सनं करोत्यसौ अर्द्धाधिकद्वादशपणान् दण्डनीयः ।

(अ. ८ श्लो. २७४)

काणं वाऽप्यथवा खञ्जमन्यं वापि तथाविधम् ।
तथ्येनापि ब्रुवन् दाप्यो दण्डं कार्षापणावरम् ॥

इति यन्मनुवचनं, तत् अतिदुर्वृत्तसवर्णविषयम् ।

यदा पुनः पुत्रादयो मात्रादीन् शपन्ति तदा शतं दण्डनीया इति—

तेनैवोक्तम्, (मनु अ. ८ श्लो. २७५)

मातरं पितरं जायां भ्रातरं श्वशुरं गुरुम् ।
आक्षारयन् शतं दाप्यः पन्थानं चाददद्गुरोः ॥ इति ।

एतच्च सापराधेषु मात्रादिषु गुरुषु निरपराधायां च जायायां द्रष्टव्यम् ॥ २०४ ॥

बा० १। प्राग्वदाह * इदानीमिति । जातिर्ब्राह्मणत्वादिः। कुलं वंशपरम्परा । नारदीयं व्याचष्टे * देशादीनामिति । अवद्यं गर्ह्यम् । प्रत्येकयुक्तत्वं न विवक्षितमित्याह * तदुभयेति । अर्थशब्दः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रयोजनवाचीत्याह * उद्वेगेति । देशाद्याक्रोशानुदाहरणत आह * तत्रेति । तेषां मध्ये इत्यर्थः । * देशाक्रोशः, देशनिन्दा । लोलुपः सतृष्णः । चरितमाचरणम् । वैश्वामित्रास्तत्पुत्रास्तत्पुत्रादयः । *स्वविद्येति । साक्षात्पुरुषनिन्दामकुर्वता तन्निन्दाशयेनैव स्वयं विद्वानपि अविद्वानिव स्वीयविद्याशिल्पादिनिन्दया यत्र तद्विद्याविषयनैपुण्यमास्ति यत्र वा शिल्पविद्यायां परः कुशलस्तद्विद्वज्जनाद्यधिक्षेप इत्यर्थः ।

२ । * तस्य चेति । वाक्पारुष्यस्येत्यर्थः । त्रैविध्येऽन्वयः । तत्र चेति पाठान्तरम् । तदाऽव्यवहितान्वयः । * दण्डेति । दण्डवैषम्याभिधानार्थमित्यर्थः । * निष्ठुरेति । तद्रूपसंज्ञाभेदेनेत्यर्थः । * तल्लक्षणं, निष्ठुरादिलक्षणमपि । * तेनैव, नारदेनैव । * तदपि, वाक्पारुष्यमपि । *तस्य, त्रिविधस्य । निष्ठुराक्षेपादश्लीलाक्षेपो गुरुः, ततस्तीव्राक्षेपो गुरुरित्यर्थः । साक्षेपमित्यादि व्याचष्टे * तत्रेति । तेषां मध्ये इत्यर्थः । त्वामित्यस्य विशेषणद्वयम् । धिग्योगे द्वितीया । जाल्मो ऽसमीक्ष्यकारी स्यात् ।

३। ननु पूर्वं न्यङ्गमवद्यमित्युक्तम् । तच्चावद्यत्वं निष्ठुरादिषु त्रिषु वाक्पारुष्यभेदेषु साधारणमिति अत्राश्लीलरूपवाक्पारुष्यस्य न्यङ्गसंयुतमिति विशेषलक्षणकथनमयुक्तम्, अत आह *अत्रेति । तथा चासभ्यरूपो ऽवद्यविशेषो न्यङ्गशब्दार्थ इति भावः। तत्स्वरूपमाह *भगिनीति । पतनीयैरित्यत्र साकाङ्क्षत्वाच्छेषमाह * युक्तमिति ।

४ । अथ मूलमवतारयति *तत्रेति । तेषां मध्ये इत्यर्थः । असवर्णविषये वक्ष्यमाणत्वादाह * सवर्णेति । न्यूनाङ्गेत्यत्र द्वंद्वोत्तरपदकबहुव्रीहिपूर्वपदकद्वंद्व इत्याशयेनाह * न्यूनाङ्गा इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्य व्याख्या * करचरणादीति । न्यूनेन्द्रिया इत्यस्य व्याख्या * नेत्रेति । यथासंख्येन नान्वय इत्याह * तेषामिति । अन्यथेत्यादेर्व्याख्या * निन्दार्थेति । सत्यादिस्वरूपमुदाहरणेन वाक्यार्थमध्ये एवाकाङ्क्षानिवृत्तये आह * यत्रेति । क्षेपार्थो * भर्त्सनमिति । अर्धोऽधमेष्वितिवक्ष्यमाणैकमूलकल्पनालाघवानुरोधेनार्धन्यूनास्त्रयोदशेति मूले समास इत्याशयेनाह * अर्धाधिकद्वादशेति ।

५। नन्वेवं मनुना कार्षापणादन्यूनदण्डाभिधानात्तस्य च षोडशपणात्मकत्वात्तेन विरोध इत्याह * काणं वेति । खञ्जं पादविकलम् अन्याङ्गविकलमपिवा । *तथ्येन, सत्येनापि काणादिशब्देन । अपिना ऽसत्यादिसमुच्चयः । कार्षापणः अवरो यस्मिन्दण्डे स तादृशः, अत्यन्ताल्पः कार्षापणो न तु ततो न्यून इत्यर्थः ।

६। तं परिहरति * तदतिदुर्वृत्तेति । आचारादिभिरत्यन्तनिकृष्टसवर्णेत्यर्थः । तथा च तादृशसवर्णेन यदि सवर्ण एवाक्षिप्यते तथा, तदा तद्विषय एव दण्डो न सर्वविषय इति विषयभेदान्न विरोध इति भावः ।

७। विशेषमाह * यदा पुनरिति । * शतं, पणाः । * तेनैव, मनुनैव । * आक्षारयन्, अभिशपन् । * अददत्, अत्यजन् ।

८। ननु जायायाः शापे मात्राद्यभिशापसाम्येन दण्डविधानं न युक्तमत आह * एतच्चेति । * गुरुषु, पूज्येषु । गुरुर्भिन्नं निमित्तम् । एतेन भार्यादीनां तत्साम्येन दण्डविधानं समाधेयमिति कुल्लूकभट्टोक्तं समाहितम् । मेधातिथिस्त्वाक्षारणं भेदनमुक्त्वा तनयं गुरुमिति पाठमङ्गीकृत्य मात्रादीनां मिथो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भेदनकर्तुरयं दण्डविधिरिति व्याख्यातवान् ॥ २०४ ॥

मि० अव. अश्लीलाक्षेपे दण्डमाह।

या० अभिगन्तास्मि भगिनीं मातरं वा तवेति ह।
शपन्तं दापयेद्राजा पञ्चविंशतिकं दमम् ॥ २०५ ॥

मि० त्वदीयां भगिनीं मातरं वा अभिगन्तास्मीति शपन्तम्, अन्यं वा–त्वज्जायामभिगन्तास्मीत्येवं शपन्तं राजा पञ्चविंशतिकं–पणानां पञ्चाधिका विंशतिर्यस्मिन्दण्डे स तथोक्तः तं दमं दापयेत् ॥२०५॥

बा० १। मूले हशब्दश्चार्थे, तत्समुच्चेयमाह *अन्यं वेति। तदर्थमेवाह * त्वज्जायामिति। पञ्चविंशतिकमित्यस्य व्याख्या * पणानामिति ॥ २०५ ॥

मि० अव. एवं समानगुणेषु वर्णिषु दण्डमभिधाय विषमगुणेषु दण्डं प्रतिपादयितुमाह।

या० अर्द्धोऽधमेषु द्विगुणः परस्त्रीषूत्तमेषु च।

अधमेष्वाक्षेप्त्रपेक्षया न्यूनवृत्तादिगुणेष्वर्धो दण्डः। पूर्ववाक्ये पञ्चविंशतेः प्रकृतत्वात्तदपेक्षयाऽर्द्धः सार्द्धद्वादशपणात्मको द्रष्टव्यः। परभार्यासु पुनरविशेषेण द्विगुणः पञ्चविंशत्यपेक्षयैव पञ्चाशत्पणात्मको वेदितव्यः। तथोत्तमेषु च स्वापेक्षयाऽधिकश्रुतवृत्तेषु दण्डः पञ्चाशत्पणात्मक एव।

अव. वर्णानां मूर्द्धावसिक्तादीनां च परस्पराक्षेपे दण्डकल्पनामाह।

या० दण्डप्रणयनं कार्यं वर्णजात्युत्तराधरैः ॥ २०६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि० वर्णा ब्राह्मणादयः। जातयो मूर्द्धावसिक्ताद्याः। वर्णाश्च जातयश्च वर्णजातयः। उत्तराश्च अधराश्च उत्तराधराः। वर्णजातयश्च ते उत्तराधराश्च वर्णजात्युत्तराधराः। तैः वर्णजात्युत्तराधरैः परस्पराक्षेपे क्रियमाणे दण्डस्य प्रणयनं प्रकर्षेण नयनमूहनं वेदितव्यम्।

तच्च दण्डकल्पनमुत्तराधरैरिति विशेषोपादानादुत्तराधरभावापेक्षयैव कर्तव्यमित्यवगम्यते। यथा मूर्द्धावसिक्तं ब्राह्मणाद्धीनं क्षत्रियादुत्कृष्टं चाक्रुश्य ब्राह्मणः क्षत्रियाक्षेपनिमित्तात्पञ्चाशत्पणदण्डात्किञ्चिदधिकं पञ्चसप्तत्यात्मकं दण्डमर्हति। क्षत्रियोऽपि तमाक्रुश्य ब्राह्मणाक्षेपनिमित्ताच्छतदण्डादूनं पञ्चसप्ततिमेव दण्डमर्हति। मूर्द्धावसिक्तोऽपि तावाक्रुश्य तमेव दण्डमर्हति।

मूर्द्धावसिक्ताम्बष्ठयोः परस्पराक्षेपे ब्राह्मणक्षत्रिययोः परस्पराक्रोशनिमित्तकौ यथाक्रमेण दण्डौ वेदितव्यौ। एवमन्यत्राप्यूहनीयम्॥ २०६॥

बा० १। अश्लीलाक्षेपे एव स्थलविशेषे दण्डविशेषप्रतिपादकं मूलमित्याह * एवमिति। गुणो वृत्तादिः। * वर्णिषु, सवर्णेषु। *विषमगुणेषु, तेष्वेव। पूर्ववाक्यस्य संख्यापेक्षयाऽत्रार्द्धद्वैगुण्यादिप्रतिपादनादश्लीलाक्षेपविषयकमेवेदम्। तद् ध्वनयन्वक्ष्यति व्याख्याने पूर्वेत्यादि। साकाङ्क्षत्वादाह * आक्षेप्त्रपेक्षयेति। अधमत्वं न जातिकृतं, तत्र तस्य वक्ष्यमाणत्वात्। अत आह *न्यूनवृत्तेति। आकाङ्क्षानिरासायाह *पूर्वेति। *अविशेषेणेति। आक्षेप्त्रपेक्षया न्यूनवृत्तस्याधिकवृत्तस्य समवृत्तस्य वा भार्येति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथाकथंचित्परभार्यात्वमत्र विवक्षितम्। अत एवाविशेषेणेत्युक्तम्। अन्यूनवृत्तसंबन्धित्वे भेदेनोक्त्यसङ्गतिर्द्विगुणदण्डासङ्गतिश्च। अधिकवृत्तादिसंबन्धित्वेऽप्याद्यदोष एव। समवृत्तादिसंबन्धित्वेऽपि तथा। पूर्वत एव प्राप्तत्वात्। तस्मात्त्रितयभिन्नविषयकं तदिति भावः।

२। न च पूर्वपद्यव्याख्यावसरे "अन्यं वा त्वज्जायाम्" इत्याद्युक्त्वा पञ्चविंशतिको दम उक्तः, इह तु पञ्चाशत्पणात्मक इति मिथो विरोध इति वाच्यम्। पूर्वत्र भार्याद्वारा पुरुषस्याक्षेपे दण्डविशेष उक्तः, अत्र तु परभार्याया एवाक्षेपे विशेष उच्यतइति भेदात्।

उ. ३। *वर्णानां, ब्राह्मणादीनाम्। *कल्पनां, न तु दण्डम्। चतुर्णां युगपत् द्वंद्वभ्रमाभावायाह *वर्णाश्चेत्यादि। क्रमविवक्षया न दोषः। यथासंख्यमप्यत एव सिद्धम्। प्रत्यासत्तेरन्यस्याभावाच्चाह * परस्परमिति। कल्पनामेवाह * प्रकर्षेणेति।

४। विशेषं तत्राह * तच्चेति। विशेषो विशेषणम्। शेषो इति पाठेऽप्येवम्। * उत्तराधरभावेति। वर्णकर्तृको जातिविषयकः जातिकर्तृको वर्णविषयको वा य आक्षेपस्तदनुरोधेनेत्यर्थः। तत्र ब्राह्मणकर्तृकमूर्द्धावसिक्तविषयकाक्षेपे आह * यथेति। प्रातिलोम्येतिवक्ष्यमाणवचनेन क्षत्रियकर्तृकब्राह्मणविषयाक्षेपे ब्राह्मणकर्तृकक्षत्रियविषयाक्षेपे च क्रमेण प्रतिपादितं शतपणं पञ्चाशत्पणात्मकं च बुद्धिस्थीकृत्याह * क्षत्रियाक्षेपेति। ब्राह्मणकर्तृकक्षत्रियविषयाक्षेपेत्यर्थः। किंचित् अधिकं यस्मिन्निति बहुव्रीहिः। पदद्वयं वा। किंचिदिति पादाशयकम्। स चात्र शतापेक्षया चतुर्थांशः। तथा च तत्पादाधिकं तत्स्वरूपमाह * पञ्चसप्तत्यात्मकामिति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५। क्षत्रियकर्तृकमूर्द्धावसिक्तविषयाक्षेपे दण्डमाह * क्षत्रियोऽपीति। * तं, मूर्द्धावसिक्तम्। * ब्राह्मणाक्षेपेति। क्षत्रियकर्तृकब्राह्मणाविषयकाक्षेपेत्यर्थः। * ऊनं, पादोनम्। तदेवाह * पञ्चेति। अर्हतीत्यस्यानुषङ्गः। मूर्द्धावसिक्तस्य ब्राह्मणापेक्षया न्यूनत्वात् क्षत्रियापेक्षया अधिकत्वात् क्षत्रियकर्तृकब्राह्मणाक्षेपनिमित्ताच्छतदण्डाद् न्यूनः, ब्राह्मणकर्तृकक्षत्रियाक्षेपनिमित्तात्पञ्चाशत्पणादधिकः पञ्चसप्तत्यात्मक एव दण्ड इत्यर्थः।

६। द्वितीये आह * मूर्द्धावसिक्तोऽपीति। * तावाक्रुश्येति। ब्राह्मणक्षत्रियावाक्रुश्येत्यर्थः। यद्यपि तद्भेदेनापि दण्डव्यक्तिर्भिन्ना तथापि जात्यैक्यादाह * तमेव दण्डमिति। मूर्द्धावसिक्तस्य क्षत्रापेक्षयाऽधिकत्वेन क्षत्रकर्तृकब्राह्मणविषयाक्षेपनिमित्तकशतदण्डापेक्षया पादोनं शतं पञ्चसप्तत्यात्मक एव दण्डो मूर्द्धावसिक्तेन ब्राह्मणाक्षेपे कृते, तथा मूर्द्धावसिक्तस्य ब्राह्मणापेक्षया न्यूनत्वेन ब्राह्मणकर्तृकक्षत्रियाक्षेपनिमित्तदण्डात्पञ्चाशत्पणात्मकात्पादाधिकः पञ्चसप्तत्यात्मक एव दण्डो मूर्द्धावसिक्तेन क्षत्रियाक्षेपे कृते, इत्युभयथापि तावानेव दण्ड इत्यर्थः।

७। एवं वर्णजात्योर्मिथ आक्षेपे दण्डमुक्त्वा जातिष्वेव ब्राह्मणात् क्षत्रियायां वैश्यायां च जातयोर्मूर्द्धावसिक्ताम्बष्ठयोर्मिथ आक्षेपे दण्डमाह * मूर्द्धेति। अत्र ब्राह्मणस्थानीय आद्यः। क्षत्रियस्थानीयोऽन्त्यः। तथा चाम्बष्ठेन मूर्द्धावसिक्ताक्षेपे शतं, विपरीते तु पञ्चाशदिति व्यवस्था विज्ञेया।

८। वर्णानुलोमप्रतिलोमापवादे तु पूर्वोक्तन्यायेन पादोनः पादाधिको वा दण्डः। अत्र पञ्चाशदपेक्षया पादवृद्धिर्न शतापेक्षया। तथा च क्षत्रियापेक्षयाऽम्बष्ठस्य न्यूनत्वाद्वैश्यापेक्षया दण्डः पञ्चविंशत्यात्मकस्तस्मात्पादाधिकः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सार्द्धसप्तत्रिंशदात्मको दण्डो भवति । ब्राह्मणेन निषादाक्षेपे पादोनैकोनविंशतिपणानां दण्डः । अत्र पञ्चविंशत्यपेक्षया पादव्यवस्था । ततश्च वैश्यापेक्षया न्यूनत्वान्निषादस्य शूद्रापेक्षयाऽधिकत्वाच्च ब्राह्मणेन वैश्याक्षेपे यो दण्डः पञ्चविंशत्यात्मकस्तदपेक्षया पादन्यूनो, ब्राह्मणेनैव शूद्राक्षेपे यः सार्द्धद्वादशपणात्मको दण्डस्तदपेक्षया पादाधिकः पादोनैकोनविंशत्यात्मको दण्डः।

९ । निषादेन ब्राह्मणाक्षेपे पञ्चसप्तत्यधिकं शतं दण्डः । अत्रापि पुनः शतापेक्षयैव पादव्यवस्था । तथा च शूद्रापेक्षया निषादस्याधिकत्वेन वैश्यापेक्षया च न्यूनत्वेन शूद्रेण ब्राह्मणाक्षेपे यो दण्डो वधात्मकः शारीरस्तस्मादर्थदण्डस्य न्यूनत्वेन शूद्रकृतब्राह्मणाक्षेपनिमित्तकदण्डात्किंचिन्न्यूनो वैश्येन ब्राह्मणाक्षेपे यो दण्डः सार्धशतं तस्मात्किंचिदधिकः पञ्चसप्तत्यधिकं शतं दण्डो भवति ।

१० । अम्बष्ठेन ब्राह्मणाक्षेपे पञ्चविंशत्यधिकं शतं दण्डः । वैश्यतोऽम्बष्ठस्याधिकत्वेन क्षत्रियतो न्यूनत्वेन च वैश्येन ब्राह्मणाक्षेपे सार्धशतं यो दण्डस्तस्मान्न्यूनः, क्षत्रियकर्तृकब्राह्मणाक्षेपे यो दण्डः शतात्मकस्तस्मादधिकः पञ्चविंशत्यधिकं शतं दण्डो भवति ।

११ । मूर्द्धावसिक्तकर्तृकब्राह्मणविषयाक्षेपे यः पूर्वं दर्शितः स एव वर्णजात्यानुलोम्यप्रातिलोम्यापवादे कल्पनाक्रमः । जातिष्वेवानुलोम्यप्रातिलोम्यापवादे तु ब्राह्मणक्षत्रियविशामिव मूर्द्धावसिक्ताम्बष्ठनिषादानामपि यथाक्रमं पञ्चाशत्पञ्चविंशतिसार्द्धद्वादशसार्धशतशतपञ्चाशदात्मकदण्डस्योहनं ज्ञेयम् । यथा संनिहिताधिकापेक्षयाऽधिको दण्डो व्यवहिताधिकाक्षेपे तथैव संनिहितन्यूनापेक्षया न्यूनो दण्डो व्यवहितन्यूनाक्षेपे इति । तदाह * एवमिति ॥ २०६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि० अव. एवं सर्ववर्णविषये दण्डमभिधाय वर्णानामेव प्रतिलोमानुलोमाक्षेपे दण्डमाह ।

या० प्रातिलोम्यापवादेषु द्विगुणत्रिगुणा दमाः ।
वर्णानामानुलोम्येन तस्मादर्द्धार्द्धहानितः ॥ २०७ ॥

मि० अपवादा अधिक्षेपाः । प्रातिलोम्येनापवादाः प्रातिलोम्यापवादास्तेषु ब्राह्मणाक्रोशकारिणोः क्षत्रियवैश्ययोर्यथाक्रमेण पूर्ववाक्यीयद्विगुणपदोपात्तपञ्चाशत्पणापेक्षया द्विगुणाः शतपणास्त्रिगुणाः सार्द्धशतपणा दण्डा वेदितव्याः । शूद्रस्य ब्राह्मणाक्रोशे ताडनं जिह्वाच्छेदनं वा भवति ।

यथाह मनुः, (अ० ८ श्लो. २६७)

शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति ।
वैश्योऽध्यर्द्धशतं द्वे वा शूद्रस्तु वधमर्हति ॥ इति ।

विट्शूद्रयोरपि क्षत्रियादनन्तरैकान्तरयोस्तुल्यन्यायतया शतमध्यर्द्धशतं च यथाक्रमेण क्षत्रियाक्रोशे वेदितव्यम् । शूद्रस्य वैश्याक्रोशे शतम् ।

आनुलोम्येन तु वर्णानां क्षत्रियविट्शूद्राणां ब्राह्मणेनाक्रोशे कृते तस्माद्ब्राह्मणाक्रोशनिमित्ताच्छतपरिमितात्क्षत्रियदण्डात्प्रतिवर्णमर्द्धस्यार्द्धस्य हानिं कृत्वाऽवशिष्टं पञ्चाशत्पञ्चविंशत्यर्धत्रयोदशपणात्मकं यथाक्रमं ब्राह्मणो दण्डनीयः ।

तदुक्तं मनुना, (अ० ८ श्लो. २६८) ।

पञ्चाशद्ब्राह्मणो दण्ड्यः क्षत्रियस्याभिशंसने ।
वैश्ये स्यादर्द्धपञ्चाशच्छूद्रे द्वादशको दमः ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षत्रियेण वैश्ये शूद्रे वाऽऽक्रुष्टे यथाक्रमं पञ्चाशत्पञ्चविंशतिकौ दमौ, वैश्यस्य च शूद्राक्रोशे पञ्चाशदित्यूहनीयम् । ब्राह्मणराजन्यवत्क्षत्रियवैश्ययोरिति गौतमस्मरणात् ।

(अ. ८ श्लो. २७७)

विट्शूद्रयोरेवमेव स्वजातिंप्रति तत्त्वतः ।

इति मनुस्मरणाच्च ॥ २०७ ॥

वा० १। * एवं सर्ववर्णेति । सर्वे च वर्णाश्चेति समासः । सर्वे मूर्द्धावसिक्तादयः । वर्णाः ब्राह्मणादयः । एवेन जातिव्यवच्छेदः । मिथ इति शेषः । प्रातिलोम्यानुलोम्याभ्यामाक्षेपे इत्यर्थः। अपवादो बाधो नात्र विवक्षित इत्याह * अधिक्षेपा इति ।

अपवादस्तु निन्दायामाज्ञाविश्रम्भयोरपि । इति विश्वः ।

* ब्राह्मणेति । तद्विषयकेत्यर्थः । * पूर्ववाक्यीयाद्विगुणेति। अर्धोऽधमेषु द्विगुण इत्यत्रोपात्तद्विगुणेत्याद्यर्थः । वाक्यद्वीतिपाठे तत्संबन्धिद्विगुणपदेत्याद्यर्थः । द्वैगुण्यं त्रैगुण्यं चोदाहरणेनाह * शतेत्यादि । अविरोधायोभयोक्तेः फलं कथयन् न्यूनतां निराचष्टे * शूद्रस्येति । ब्राह्मणविषयकाक्रोशे इत्यर्थः ।* अध्यर्द्धशतमिति। सार्धशतमित्यर्थः ।तत्रैव पक्षान्तरमाह * द्वे वेति। लाघवगौरवापेक्षया विकल्पः । * वधं, ताडनादिरूपम् ।

२। अत्र दमा इति बहुवचनं निमित्तभूतवर्णापराधबाहुल्याभिप्रायेण । तथा हि । क्षत्रियवैश्याभ्यां ब्राह्मणे वैश्यशूद्राभ्यां क्षत्रिये शूद्रेण वैश्ये एवमानुलोम्येनापीति तद्बाहुल्यम् । तदेतदभिप्रेत्यैव ब्राह्मणविषयकक्षत्रियवैश्यकर्तृकापराधे यो न्याय उक्तस्तं क्षत्रियविषयकवैश्यशूद्रकर्तृकापराधेऽप्यतिदिशति * विट्शूद्रयोरपीति । अनन्तरः संनिहितः । एकान्तरः एकेन व्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वहितः। यथा ब्राह्मणादनन्तरैकान्तरयोः क्षत्रियवैश्ययोर्ब्राह्मणविषयापराधे दण्डस्तथैव क्षत्रियादनन्तरैकान्तरयोर्वैश्यशूद्रयोरपीत्यर्थः। ब्राह्मणानन्तरेण क्षत्रियेण ब्राह्मणाक्रोशे शतमिव वैश्यानन्तरेण शूद्रेण वैश्याक्रोशेऽपि शतमित्याह * शूद्रस्य चेति।

३। वर्णानामित्युत्तरार्धं व्याचष्टे * आनुलोम्ये न त्विति। शेषमाकाङ्क्षितं प्रकृतमाह * आक्रोशे इति। तस्मादिति मौलस्य व्याख्या * ब्राह्मणाक्रोशेति। क्षत्रियकर्तृकब्राह्मणविषयाक्षेपनिमित्तात् क्षत्रसंबन्धिशतपरिमितदण्डादित्यर्थः।प्रत्यासत्तेराह *प्रतिवर्णमिति। ब्राह्मणेन क्षत्राक्षेपे कृते शतादर्धं पञ्चाशत् दण्डः, तेनैव वैश्याक्षेपे कृते पञ्चाशतोऽर्धं पञ्चविंशतिः, तेनैव च शूद्राक्षेपे कृते पञ्चविंशतेरर्धं सार्द्धद्वादशपणा इति विवेकः। वीप्सेयम्। हानित इत्यपादानपञ्चम्यन्तात्तसिरित्याह * हानिं कृत्वेति। अत एव शेषं साकाङ्क्षमाह * अवशिष्टमिति। * अर्धेति। अर्धन्यूनत्रयोदशेत्यर्थः। * पञ्चाशत्, पणान्। * क्षत्रियस्येति। क्षत्रियविषयकेत्यर्थः। * वैश्ये, अभिशस्ते सति। एवमग्रेऽपि। ब्राह्मणो दण्ड्यः स्यादित्यर्थः। * द्वादशक इति। सार्द्धः। परिमाणे कन्।

४। उक्तरीत्यैवोक्तन्यायमन्यत्राप्याह * क्षत्रियेणेति। अत्राद्ये गौतमसंमतिमाह * ब्राह्मणराजन्यवदिति। तयोस्तादृशयोर्यथा न्यायस्तथाऽनयोरपि तादृशयोरित्यर्थः। द्वितीये मनुसंमतिमप्याह * विडिति। वैश्यशूद्रयोः स्वजातिं प्रति अन्योन्यजातिं प्रति आक्रोशे एवमेव ब्राह्मणक्षात्रियवत्। वैश्ये शूद्राक्रोशिनि प्रथमसाहसः, शूद्रे वैश्याक्रोशिनि मध्यमसाहस इत्येवंरूपं दण्डप्रणयनं जिह्वाच्छेदरहितं तत्त्वतो यथावत्कर्त्तव्यमिति शास्त्रनिश्चय इत्यर्थः। अस्य हि—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

छेदवर्जं प्रणयनं दण्डस्येति विनिश्चयः।
इत्युत्तरार्द्धम्। (मनु. ८। २७६)
ब्राह्मणक्षत्रियाभ्यां तु दण्डः कार्यो विजानता।
ब्राह्मणे साहसः पूर्वः क्षत्रिये त्वेव मध्यमः॥

इति पूर्वपद्यं च। ब्राह्मणक्षत्रियाभ्यां मिथः पतनीयाक्रोशे कृते दण्डशास्त्रज्ञेन राज्ञा दण्डः कार्यः। दण्डमेव विशेषेणाह *ब्राह्मणेति। ब्राह्मणे क्षत्रियाक्रोशिनि प्रथमसाहसः कार्यो ब्राह्मणाक्रोशिनि पुनः क्षत्रिये मध्यमसाहस इति तदर्थः। एवं च तदपि पतनीयाक्रोशविषयमेव यद्यपि तथापि तुल्यन्यायतयाऽत्रोपन्यस्तं व्याख्यात्रा। अनेन च मनुना—

एकजातिर्द्विजातींस्तु वाचा दारुणया क्षिपन्।
जिह्वायाः प्राप्नुयाच्छेदं जघन्यप्रभवो हि सः॥ (ना.व्यव. १५।२२)

इति स्वयमेव प्रागुक्तो जिह्वाछेदो वैश्ये निवारितो ब्राह्मणक्षत्रियाक्रोशविषयएवावतिष्ठते। शूद्रो द्विजातीन् पातकादिना वाचाऽऽक्रुश्य जिह्वाछेदं लभते, यस्मादसौ पादाख्यान्निकृष्टाङ्गाज्जात इति तदर्थः॥ २०७॥

मि० अव. पुनर्निष्ठुराक्षेपमधिकृत्याह।

या० बाहुग्रीवानेत्रसक्थिविनाशे वाचिके दमः।
शत्यस्तदर्द्धिकः पादनासाकर्णकरादिषु॥ २०८॥

मि० बाह्वादीनां प्रत्येकं विनाशे वाचिके वाचा प्रतिपादिते तव बाहू छिनद्मीत्येवंरूपे शत्यः शतपरिमितो दण्डो वेदितव्यः। पादनासाकर्णकरादिषु आदिग्रहणात्स्फिगादिषु वाचिके विनाशे तदर्द्धिकः तस्य शतस्यार्द्धं तदर्द्धं तद्यस्यास्त्यसौ तदर्द्धिकः पञ्चाशत्प-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णिको दण्डो वेदितव्यः ॥ २०८ ॥

बा० १। सत्यासत्यान्यथास्तोत्रैरित्यनेनोक्तत्वादाह * पुनरिति। सिंहावलोकनन्यायेनेति भावः। * अधिकृत्येति। बुद्धिस्थीकृत्येत्यर्थः। द्वंद्वतोऽर्थान्तरानिरासायाह * प्रत्येकमिति। युगपत्तदसंभवादिति भावः। वाचिके इत्यस्य व्याख्या * वाचेति। तदेवोदाहरणेनाह * तवेति। करादिष्विति विषयसप्तमीत्याह * वाचिके इति। अत्र वाचिके इत्युक्त्या ऽस्य निष्ठुराक्षेपविषयत्वं स्पष्टम्! एवमग्रेऽपि ॥ २०८ ॥

मि० अव. किञ्च।

या० अशक्तस्तु वदन्नेवं दण्डनीयः पणान्दश।
तथा शक्तः प्रतिभुवं दाप्यः क्षेमाय तस्य तु ॥२०९॥

मि० यः पुनर्ज्वरादिना क्षीणशक्तिः त्वद्बाह्वाद्यङ्गभङ्गं करोमीत्येवं शपति असौ दश पणान्दण्डनीयः। यः पुनः समर्थः क्षीणशक्तिं पूर्ववदाक्षिपति असौ पूर्वोक्तशतादिदण्डोत्तरकालं तस्याशक्तस्य क्षेमार्थं प्रतिभुवं दापनीयः॥ २०९ ॥

बा० १। * किं चेति। अन्यदपि तद्विषये उच्यते इत्यर्थः। त्वर्थमाह * यः पुनरिति। एवं वदन्नित्यस्यार्थमाह * त्वदिति। शक्त इत्यस्यार्थः * समर्थ इति। अर्थादाह * क्षीणशक्तिरिति। तथेत्यस्यार्थः * पूर्ववादिति। अत्र विषये दण्डस्योक्तत्वादत्रानुक्तिरित्याह * पूर्वोक्तेति॥ २०९ ॥

मि० अव. तीव्राक्रोशे दण्डमाह।

या० पतनीयकृते क्षेपे दण्डो मध्यमसाहसः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपपातकयुक्ते तु दाप्यः प्रथमसाहसम् ॥ २१० ॥

मि० पातित्यहेतुभिर्ब्रह्महत्यादिभिर्वर्णिनामाक्षेपे मध्यमसाहसो दण्डः। उपपातकसंबद्धे पुनर्गोघ्नस्त्वमसीत्येवमादिरूपे क्षेपे प्रथमसाहसं दण्डनीयः॥२१०॥

बा० १। पतनीये करणे अनीयर् इत्याह * पातित्यहेतुभिरिति। * वर्णिनामिति। मिथ इति शेषः। इदमपि क्षत्रियकर्तृकब्राह्मणाक्षेपविषयं, प्रागुक्तमनोः, अन्यत्र तथैव कल्पना बोध्या इति केचित्। वर्णिपदं मूर्द्धावसिक्तादिजातीनामप्युपलक्षणम्। तथा च जातिष्वपि मिथः पतनीयैराक्षेपे मध्यमसाहसः, उपपातकैराक्षेपे प्रथमसाहस इत्येव निर्णयः। वर्णजात्योर्मिथ आक्षेपेऽपि पूर्वोक्त एव दण्डः। वर्णिष्वपि न्यूनाधिकभावं विना मध्यमसाहसादिदण्डविधानादितरत्रापि तथा कल्पनस्य प्रामाणिकत्वात् इति बोध्यम्। युक्तेत्वित्यर्थमाह * संबद्धे पुनरिति ॥ २१० ॥

मि० अव. किञ्च।

त्रैविद्यनृपदेवानां क्षेपउत्तमसाहसः।
मध्यमो जातिपूगानां प्रथमो ग्रामदेशयोः ॥ २११ ॥

मि० त्रैविद्याः वेदत्रयसंपन्नास्तेषां राज्ञां देवानां च क्षेपे उत्तमसाहसो दण्डः। ये पुनर्ब्राह्मणमूर्द्धावसिक्तादिजातीनां पूगाः सङ्घास्तेषाम् आक्षेपे मध्यमसाहसो दण्डः। ग्रामदेशयोः प्रत्येकमाक्षेपे प्रथमसाहसो दण्डो वेदितव्यः ॥ २११ ॥

इति वाक्पारुष्यं नाम विवादपदम्।

बा० १। *किं चेति। प्राग्वत्। अत्र जातिपदमुभयपरमि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्याह * ये पुनर्ब्राह्मणेति । अन्यथा न्यूनतापत्तेरिति भावः। जातिपूगानामित्येकं निमित्तं न तु द्वंद्व इत्याह * जातीनां पूगा इति। अयं चात्र सामान्यतः समुदायवाचीत्याह * सङ्घा इति। अत्र बहुवचनबलात् तेषां प्रत्येकं सङ्घा यथाकथञ्चित् मिलितानां वा सङ्घा इति विवक्षितम् । सर्वथाऽपि स एव दण्ड इति बोध्यम् । प्राग्वदाह * प्रत्येकमिति ॥ २११ ॥

इति वाक्पारुष्यप्रकरणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ दण्डपारुष्यप्रकरणम् ॥ १९ ॥

मि० उ० दण्डपारुष्यं नाम संप्रति प्रस्तूयते ।
तत्स्वरूपं च नारदेनोक्तम्, (व्यव. १५ । ४)
परगात्रेष्वभिद्रोहो हस्तपादायुधादिभिः ।
भस्मादिभिश्चोपघातो दण्डपारुष्यमुच्यते॥इति।

परगात्रेषु स्थावरजङ्गमात्मकद्रव्येषु हस्तपादायुधैः आदिग्रहणाद्ग्रावादिभिर्योऽभिद्रोहो हिंसनं दुःखोत्पादनं, तथा भस्मना आदिग्रहणाद्रजःपङ्ककरीषाद्यैश्च य उपघातः संस्पर्शनरूपं मनोदुःखोत्पादनं, तदुभयं दण्डपारुष्यम् । दण्ड्यतेऽनेनेति दण्डो देहः तेन यत्पारुष्यं विरुद्धाचरणं जङ्गमादेर्द्रव्यस्य तद्दण्डपारुष्यम् । तस्य त्ववगोरणादिकरणभेदेन त्रैविध्यमभिधाय हीनमध्यमोत्तमद्रव्यरूपकर्मत्रैविध्यात् पुनस्त्रैविध्यं—

तेनैवोक्तम्, (व्यव. १५। श्लो. ५।६)
तस्यापि दृष्टं त्रैविध्यं हीनमध्योत्तमक्रमात् ।
अवगोरणनिःशङ्कपातनक्षतदर्शनैः ॥
हीनमध्योत्तमानां तु द्रव्याणां समतिक्रमात् ।
त्रीण्येव साहसान्याहुस्तत्र कण्टकशोधने॥इति।

निःशङ्कपातनं निःशङ्कप्रहरणम् । त्रीण्येव साहसानि—त्रिप्रकाराण्येव सहसा कृतानि दण्डपारुष्याणीत्यर्थः ।

तथा वाग्दण्डपारुष्ययोरुभयोरपि द्वयोः प्रवृत्तकलहयोर्मध्ये यः क्षमते तस्य न केवलं दण्डाभावः किंतु पूज्य एव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा पूर्वं कलहे प्रवृत्तस्य दण्डगुरुत्वम् ।
कलहे च बद्धवैरानुसन्धातुरेव दण्डभाक्त्वम् ।
तथा द्वयोरपराधविशेषापरिज्ञाने दण्डः समः ।
तथा श्वपचादिभिरार्याणामपराधे कृते सज्जना एव दण्डदापनेऽधिकारिणः, तेषामशक्यत्वे तान् राजा घातयेदेव नार्थं गृह्णीयात–इत्येवं पञ्चप्रकारा विधयः–तेनैवोक्ताः, (व्यव. १९ श्लो. ७–१४)

विधिः पञ्चविधस्तूक्त एतयोरुभयोरपि ।
पारुष्ये सति संरम्भादुत्पन्ने क्रुद्धयोर्द्वयोः ॥
स मान्यते यः क्षमते दण्डभाग्योऽतिवर्तते ।
पूर्वमाक्षारयेद्यस्तु नियतं स्यात्स दोषभाक् ॥
पश्चाद्यः सोऽप्यसत्कारी पूर्वे तु विनयो गुरुः ।
द्वयोरापन्नयोस्तुल्यमनुबध्नाति यः पुनः ॥
स तयोर्दण्डमाप्नोति पूर्वो वा यदि वेतरः ।
पारुष्यदोषावृतयोर्युगपत्संप्रवृत्तयोः ॥
विशेषश्चेन्न लक्ष्येत विनयः स्यात्समस्तयोः ।
श्वपाकषण्डचण्डालव्यङ्गेषु वधवृत्तिषु ॥
हस्तिपव्रात्यदासेषु गुर्वाचार्यनृपेषु च ।
मर्यादातिक्रमे सद्यो घात एवानुशासनम् ॥
यमेव ह्यतिवर्तेरन्नेते सन्तं जनं नृषु ।
स एव विनयं कुर्यान्न तद्विनयभाङ् नृपः ॥
मला ह्येते मनुष्याणां धनमेषां मलात्मकम् ।
अतस्तान्घातयेद्राजा नार्थदण्डेन दण्डयेत् ॥ इति ।

अव० एवंभूतदण्डपारुष्यनिर्णयपूर्वकत्वाद्दण्डप्रणयनस्य तत्स्वरूपसंदेहे निर्णयहेतुमाह ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या० असाक्षिकहते चिह्नैर्युक्तिभिश्चागमेन च।
द्रष्टव्यो व्यवहारस्तु कूटचिह्नकृतो भयात् ॥ २१२॥

मि० यदा कश्चिद्रहसि अहमनेन हत इति राज्ञे निवेदयति तदा चिह्नैर्व्रणादिस्वरूपगतैर्लिङ्गैः युक्त्या कारणप्रयोजनपर्यालोचनात्मिकया आगमेन जनप्रवादेन चशब्दाद्दिव्येन च कूटचिह्नकृतसंभावनाभयात्परीक्षा कार्या ॥ २१२ ॥

बा० १। अथ द्वितीयं पारुष्यमाह * दण्डेति। चस्त्वर्थे। गात्रशब्द उपलक्षणमन्यस्यापि । तच्च विनिगमकाभावात् सर्वमित्याह * स्थावरेति । तात्पर्यार्थद्वयं * हिंसनामित्यादि। अत्र दुःखं कायिकं वोध्यम् । करीषेति पाठः । उपघातपदस्य तस्यासम्भवात् तदन्वयासम्भवेन पृथगुक्तेराह * संस्पर्शनेति। अत एवाह * मन इति । अस्यान्वर्थत्वमाह * दण्ड्यते इति । पर इति शेषः। दुःखयुक्तः क्रियते इत्यर्थः।

२। एवं नारदोक्त्या दण्डपारुष्यस्वरूपमुक्त्वा तयैव तद्भेदानप्याह * तस्य चेति। दण्डपारुष्यस्य चेत्यर्थः। * अवगोरणादिकरणभेदेनेति । तद्रूपसाधनभूतकारकभेदेनेत्यर्थः । * द्रव्यरूपकर्मेति । तद्रूपकर्मकारकत्रैविध्यादित्यर्थः । * पुनः, अपि । * त्रैविध्यं, तदेव । * तेनैव, नारदेनैव । दण्डपारुष्यं शरीरस्य विरूक्षीकरणं तत्र विरूक्षीकरणाख्ये व्यापारेऽवगोरणादीनि त्रीणि करणानि तद्भेदात्त्रैविध्यं, यत्र शरीरे विरूक्षीकरणं भवति तत्कर्मकारकं तस्य हीनत्वादिनाऽपि त्रैविध्यमेवेत्यर्थः। * तस्यापीति। दण्डपारुष्यस्य। * हीनमध्योत्तमक्रमात्, तत्क्रममादाय।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल्यब्लोपे पञ्चमी । प्रवृत्तैरवगोरणादिभिस्त्रिभिः करणैर्हीनमध्योत्तमानां द्रव्याणां समतिक्रमात् त्रैविध्यमपि दृष्टमित्यर्थः । चः पादपूरणे । तथा चावगोरणादिषु करणेषु पाठक्रमादेव हीनत्वादिकं बोध्यम् ।

३ । ननु करणकारककर्मकारकभेदात्षाड्विधत्वं, त्रैविध्यमनुपपन्नम्, अत आह * त्रीण्येवेति । तत्र कण्टकशोधने इति पाठः । तत्र एवंविधे दण्डपारुष्ये कण्टकशोधने दुष्टशिक्षायां क्रियमाणायाम् अपराधानुसारेण शिक्षार्थं दण्डपारुष्यरूपाणि साहसानि हीनदण्डपारुष्यमध्यमदण्डपारुष्योत्तमदण्डपारुष्यरूपप्रकारत्रययुक्तानि त्रीण्येवेत्यर्थः । कर्मकरणभेदेऽपि हीनत्वादिनाऽनुगमेन तद्व्यपदेशयुक्तत्वात्त्रिप्रकारकमेवेति भावः । ननु साहसतोऽस्य भेदस्य वक्ष्यमाणत्वात्कथं साहसानीत्यत आह * त्रीण्येवेति । साहससामान्यलक्षणाक्रान्तत्वस्यात्रापि वक्ष्यमाणत्वादिति भावः ।

४ । एवं नारदोक्त्या सभेदं दण्डपारुष्यस्वरूपमुक्त्वा वाक्पारुष्यसाधारणधर्मान् तयैव प्रतिपादयितुं तेषां स्वरूपं क्रमेणाह * तथेति । उभयोरपीति विषयसप्तमी । प्रवृत्तकलहयोर्द्वयोर्मध्ये इत्यन्वयः । पूज्य एवेति एवोऽप्यर्थे । तृतीयप्रकारमाह * कलहे चेति । बद्धमनुबद्धं यत्पूर्ववैरं तत्स्मर्तुरित्यर्थः । एवेनान्यव्यवच्छेदः । * सज्जना एव, आर्या एव । * दापने, भृत्यादिद्वारा । * तेषां, आर्याणाम् । स्फुटार्थम् एवव्यवच्छेद्यमाह * नार्थमिति । न धनमित्यर्थः ।

५ । * तेनैव, नारदेनैव । * एतयोरुभयोरपि, वाग्दण्डपारुष्ययोः । पञ्च विधाः प्रकारा यस्य तादृशो विधिर्विधानमुक्तमित्यर्थः । तान्येवाह उक्तक्रमेण * पारुष्ये सतीत्यादिना । संरम्भात्पौर्वापर्याभावः । तदेव ध्वनयन्नाह * दण्डेति । योऽतिक्रम्य ग-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(७) न्यायरत्नमाला-श्रीपार्थसारथिमिश्र वि० सं० (मीमांसा २

(८) ब्रह्मसूत्रभाष्यम्-बादरायणप्रणीत-वेदान्तसूत्रस्य यतीन्द्र श्रीमद्विज्ञानभिक्षुकृत व्याख्यानम् । सम्पूर्णम् । (वेदान्तः) ६

(९) स्याद्वादमञ्जरी-मल्लिषेणानिर्मिता सम्पूर्णा । (जैनदर्शनम्) २

(१०) सिद्धित्रयम्-विशिष्टाद्वैत-ब्रह्मनिरूपणपरम्-श्रीभाष्यकृतां परमगुरुभिः श्री ६ श्रीयामुनमुनिभिर्विरचितम् । सम्पूर्णम् (वेदान्तः) १

(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टारकाचार्यसंगृहीतः। आचार्यचित्सुखमुनिविरचितव्याख्योपेतः (वेदान्तः) ४

(१२) विभक्त्यर्थनिर्णयःन्यायानुसारिप्रथमादिसप्तविभक्तिविस्तृतविचाररूपः म० म० श्रीगिरिधरोपाध्यायरचितः । सम्पूर्णः (न्यायः) ५

(१३) विधिरसायनम् । श्रीअप्पयदीक्षितकृतम् । सं० (मीमांसा) २

(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसोमेश्वरविरचिता । (मीमांसा) १६

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता । (वेदान्तः) २

(१६) मीमांसाबालप्रकाशः (जैमिनीयद्वादशाऽध्यायार्थसंग्रहः) श्रीभट्टनारायणात्मजभट्टशङ्करविरचितः । (मीमांसा) २

(१७) प्रकरणपञ्चिका (प्रभाकरमतानुसारि-मीमांसादर्शनम्) महामहोपाध्यायश्रीशालिकनाथमिश्रविरचितं, श्रीशङ्करभट्टकृतो मीमांसासारसंग्रहश्च सम्पूर्णः (मीमांसा) ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीसदानन्दव्यासप्रणीत-स्तत्कृतव्याख्यासमलङ्कृतश्च । (वेदान्त) ३

(१९) कात्यायनश्रौतसूत्रम् । महामहोपाध्यायश्रीकर्काचार्यविरचितभाष्यसहितम् । १३

(२०) ब्रह्मसूत्रभाष्यम् । श्रीभास्कराचार्यविरचितम् (वेदान्तः) १

(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम् । आनन्दपूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया (विद्यासागरी) ति प्रसिद्धया समेतम् । (वेदान्तः) १३

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता । १

(२३) श्रीलक्ष्मीसहस्रम्-बालबोधिनीव्याख्ययाऽवतरणिकया च सहितम् । ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२४ ब्रह्मसूत्रवृत्तिः मरीचिका श्रीव्रजनाथभट्टकृता (वेदान्त) २
२५ क्रोडपत्रसंग्रहः । अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्याः प्रत्यक्षानुमानमाथुर्या व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि : (न्यायः) २
२६ ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम् । श्रीसुन्दरभट्टराचितसिद्धान्तसेतुकाऽभिधटीकासहितश्रीदेवाचार्यप्रणीतसिद्धान्तजाह्नवीयुतम् २
२७ षड्दर्शनसमुच्चयः । बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शन संक्षेपः । मणिभद्रकृतटीकया सहितः । हरिभद्रसूरिकृतः । १
२८ शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः । प्रमेयरत्नार्णवश्च १
२९ अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्याजागदीशी टीका । १३
३० वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा सस्कारप्रकाशात्मकः। १०
३१ वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः ९
३२ स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरत्रिपाठिसंकालितः । ४
३३ वेदान्तरत्नमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्यकृता । २
३४ प्रस्थानरत्नाकरः । गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितः २
३५ वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम् । १
३६ योगदर्शनम् । परमहंसपरिव्राजकाचार्य-नारायणतीर्थविरचित-योगसिद्धान्तचन्द्रिका-समाख्यया संवलितम् । २
३७ वेदान्तदर्शनम् । परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वती स्वामिकृत ब्रह्माऽमृतवर्षिणी समाख्य व्याख्यासंवलितम् । ४
३८ विश्वप्रकाशः । कोशः । विद्वद्वर श्रीमहेश्वरसूरिविरचितः । २
३९ श्रीसुबोधिनी । श्रीवलभाचार्यविनिर्मिता । श्रीमद्भागवतव्याख्या गोस्वामीश्रीविठ्ठलनाथदीक्षितविरचित टिप्पणीसहिता । २
४० वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः पुजाप्रकाशः । ४
४१ वेदान्तसिद्धान्तसंग्रहः । श्रुतिसिद्धान्तापरनामकः । श्रीब्रह्मचारिवनमालिमिश्रविरचितः । द्वैताद्वैतदर्शनानुगतः । २
४२ स्वानुभवादर्शः । श्रीमत्परमहंसपरिव्राजकाचार्य नारायणाश्रमशिष्यमाधवाश्रमविरचित । स्वकृतटीकाविभूषितश्च । १
४३ याज्ञवल्क्यस्मृतिः । बालम्भट्टीसमाख्य वाख्यासमलङ्कृतमिताक्षरासहिता । व्यवहाराध्याय ९

पत्रादिप्रेषणस्थानम् } हरिदास गुप्तः, चौखम्बा, बनारस, सिटी,

११०४५ ·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ashadha badi 10 *vara budha*. It is fairly accurate and has no corrections. The *Achara* bears the date *Samvata* 1831 *Nagpanchami*. The copy has been afterwards extensively added to and corrected, all these are in a bold rough hand and I take it that they are the author's autograph corrections.

p. 52. The square bracket] at the end of the third line has been dropped out by the printer. Thus making it difficult to fined out where the additional matter interpolated from p. 46 ends.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

p. 27 l. 33. for not, read nought.

p. 45. In the geneological table there is some little confusion. To begin with, the name of Vaidyanatha's ...y Dr. Hall (*Bibliography* p. 175) as ...hile Dr. Keilhorn (preface to Paribha-...ives it as Mahadeva and mother's as ...n the statement in the table that ... the wife of Balam Bhatta is evidently ...zy traditional memory which confuses ...th his father Vaidyanatha and which ... in the light of the opening stanzas. ... *Dharma Shastra Sangraha* as reproduced in the India Office Catalogue. There we see most unmistakeably stated by Bâlam Bhatta that his mother was Lakshmi and father Vaidyanatha.

p. 49. Owing to the mistake of the State librarian I was betrayed into the statement that there was a second Ms. of Balambhatti also in the library. This Ms. on a personal examination turned out to be a copy of the *Mitakshara*. The Ms. of Balambhatti I believe came into the Palace library through the above-mentioned Mahadeva Swamin and who is much better known to people here by his *alias* of Kâshtha-jihva Swamin and who is said to have been the spiritual Guru of the present Maharaja of Benares. The *Prayashchitta adhyaya* of this, Ms. is very incorrectly copied, has never been corrected and has no date. The *Vyavahara* is in a neat Maharashtri hand and bears the date *Samvata* 1843

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

February 1913.

THE

CHOWKHAMBÂ SANSKRIT SERIES:

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 182. धर्मशास्त्र १५६

व्यवहार- बालंभट्टी

इति प्रसिद्धया लक्ष्मीनामिकया
पायगुण्डे इत्युपनामकेन बालंभट्टेन स्वपत्न्याः लक्ष्मीदेव्याः
स्मारकत्वेन तन्नाम्ना रचितया बृहत्या टीकया सहिता
मिताक्षरा
श्रीयुतगोविन्ददासमहाशयप्रदर्शितरीत्या
पर्वतीयनित्यानन्दपन्तेन परिष्कृत्य संशोधिता ।

VYAVAHÂRA-BÂLAMBHATTI

THE EXTENSIVE COMMENTARY ON THE MITÂKSHARÂ
WITH THE ORIGINAL

BY

Bâlambhatta Páyagunde

EDITED BY

Pandit Nityanand Pant Parvatiya
Under the supervision of Shri Govinda Das.

FASCICULUS X.

UBLISHED AND SOLD BY THE SECRETARY,
CHOWKHAMBÂ SANSKRIT BOOK-DEPOT.
BENARES.
AGENTS:- OTTO HARRASSOWITZ LEIPZIG:
PANDITA JYESHTHÂRAMA MUKUNDAJI BOMBAY:
PROBSTHAIN & CO., BOOKSELLERS, LONDON
Printed by Jai Krishna Dasa Gupta,
AT THE VIDYÂ VILÂSA PRESS
BENARES.

Price Rupee one.

Registered According to Act XXV of 1867.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ श्रीः ॥

-*-

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तबकः— १८२

१ अस्यां चौखम्बा-संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एकःस्तबको मुद्रयित्वा प्रकाश्यते। एकस्मिन् स्तबके एक एव ग्रन्थो मुद्र्यते।

२ प्राचीना दुर्लभाश्चामुद्रिता मीमांसावेदान्तादिदर्शनव्याकरण धर्मशास्त्रसाहित्यपुराणादिग्रन्था एवात्र सुपरिष्कृत्य मुद्र्यन्ते।

३ काशिकराजकीयप्रधानसंस्कृतपाठशालाऽध्यापकाः पण्डिता अन्ये च शास्त्रदृष्टयो विद्वांस एतत्परिशोधनादिकार्यकारिणो भवन्ति।

४ भारतवर्षीयैः, ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्च एतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम्-मुद्राः ७ आणकाः ८

५ अन्यैर्देयं प्रतिस्तबकम् ,, ,, १ ,, ०

६ प्रापणव्ययः पृथग् नास्ति।

७ साम्प्रतं मुद्र्यमाणा ग्रन्थाः- मुद्रिताः स्तबकाः

(१) संस्काररत्नमाला। गोपीनाथभट्टकृता	(संस्कारः)	२
(२) शब्दकौस्तुभः। भट्टोजिदीक्षितकृतः	(व्याकरणम्)	१०
(३) श्लोकवार्तिकम्। भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृत-न्यायरत्नाकराख्यया व्याख्यया सहितम्। सम्पूर्णम्।		१०
(४) भाष्योपबृंहितं तत्त्वत्रयम्। विशिष्टाद्वैतदर्शनप्रकरणम्। श्रीमल्लोकाचार्य्यप्रणीतम्। श्रीनारायण तीर्थ विरचित भाष्टभाषा प्रकाशसहितम्। सं०	(वेदान्त)	२
(५) करणप्रकाशः। श्रीब्रह्मदेवविरचितः सम्पूर्णः	(ज्योतिषः)	१
(६) भाट्टचिन्तामणिः। महामहोपाध्याय-श्रीगागाभट्ट विरचितः। तर्कपादः	(मीमांसा)	२

११०४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च्छति स दण्डभागित्यर्थः । एवं प्रथमं तमुक्त्वा द्वितीयमाह * पूर्वमिति ।* आक्षारयेत्, पारुष्यं कुर्यात् । * नियतम्, अवश्यम् । * पश्चाद्यः, आक्षारयेत् । * असत्कारी, दोषभाक् । विशेषमाह * पूर्वेत्विति । * विनयो, दण्डः ।

६ । कलहे चेत्युक्तं तृतीयप्रकारमाह * द्वयोरिति । तुल्यम् अन्यूनाधिकं कलहमापन्नयोः प्राप्तयोः द्वयोर्मध्ये यः पुनः यस्तु वैरमनुबध्नाति दृढतरं स्मरति तयोर्मध्ये स एव दण्डभाक् भवति, पूर्वो वा पूर्वं प्रवृत्तो वा यदि वा अथ वा इतरः पश्चात्प्रवृत्त इत्यर्थः ।

७ । चतुर्थमाह * पारुष्येति । स्पष्टम् । पञ्चममाह * श्वपाकेति । वधवृत्तिष्विति श्वपाकादेरेव विशेषणम् । वधजीविष्विति तदर्थः । अत एवैते तदवान्तरभेदा एवात्र । नृपेष्विति विषयसप्तमी । चो भिन्नक्रमः । तथा च वधवृत्तिषु श्वपाकादिषु चतुर्षु हस्तिपत्रात्यदासेषु च सद्यस्तत्कालं घात एवानुशासनं, कस्मिन्सति, गुर्वाचार्यनृपविषये मर्यादातिक्रमे सतीत्यर्थः । गुर्वाचार्यान्तगेषु चेति पाठान्तरम् । तत्रान्तं चरममाश्रमं गच्छतीत्यन्तगो यतिः । यद्वा अन्तं नाशं गच्छन्ति गमयन्तीत्यन्तगाः गुर्वाचार्ययोरन्तगास्तेषु गुर्वाचार्यद्रोहिषु । अत्र चो यथाश्रुत एव । तथा च वधवृत्तिषु श्वपाकादिषु हस्तिपादिषु गुर्वाचार्यान्तगेषु च सद्यो घात एवानुशासनं शिक्षा । उत्तरश्लोकपर्यालोचनया सत्सु इत्यर्थलभ्यम् । कस्मिन्सति, सत्सु विषये मर्यादातिक्रमे सतीत्यर्थः । गुर्वाचार्यानुगेष्विति पाठेऽप्येवम् ।

श्वपाकपशुचाण्डालवेश्यासूकरवृत्तिषु ।

इति गुर्वाचार्यातिगेष्विति चेति कल्पतरौ पाठः ।

आद्यपक्षे नृपेत्याद्युपलक्षणमिति सूचयन् घातमेव द्वेधा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पद्याभ्यामाह * यमेवेति । * नृषु, नृणां मध्ये । एते श्वपाकादयो यमेव हि सन्तं जनमित्याद्यर्थः । * विनयं, दण्डम् । एवव्यवच्छेद्यमेवाह * न तदिति । * एते, पूर्वोक्ताः ।

१। एवं स्मृत्यन्तरोक्तमुक्त्वा तत्सङ्गत्या मूलमवतारयति *एवंभूतेति । उक्तप्रकारं प्राप्तेत्यर्थः । * प्रणयनस्य, वक्ष्यमाणमूलोक्तस्य । * तादिति । दण्डपारुष्यस्वरूपेत्यर्थः । * हेतुमिति जातावेकवचनम् । असाक्षिकं हतं हननं यत्र निवेदने इति बहुव्रीहिः । तदाह * यदेत्यादिना निवेदयतीत्यन्तेन । व्रणादिस्वरूपं प्राप्तैः । युक्त्येति जातावेकवचनं व्याख्याने । तत्स्वरूपमाह * कारणेति । द्वन्द्वगर्भः षष्ठीतत्पुरुषादिरयम् । कारणपर्यालोचनात्मिकया प्रयोजनपर्यालोचनात्मिकया चेत्यर्थः । आगमोऽत्रान्य एवेत्याह * जनप्रवादेनेति । मौलमेकं चं व्याचष्टे * चशब्दादिति । सर्वसमुच्चायकं द्वितीयं तमाह * दिव्येन चेति । मूले कुतो भयादित्यत्र कृदिति सम्पदादित्वाद्भावे क्विप् । तस्य करणस्य भयादित्यर्थः । तस्यानिश्चयादाह * कृतसम्भावनाया इति । करणसम्भावनाया इत्यर्थः । तृतीयपादार्थमाह * परीक्षेति ॥ २१२ ॥

मि० अव० एवं निश्चिते साधनाविशेषेण दण्डविशेषमाह ।

या० भस्मपङ्करजःस्पर्शे दण्डो दशपणः स्मृतः ।
अमेध्यपार्ष्णिनिष्ठ्यूतस्पर्शने द्विगुणस्ततः ॥ २१३ ॥
समेष्वेवं परस्त्रीषु द्विगुणस्तूत्तमेषु च ।
हीनेष्वर्द्धदमो मोहमदादिभिरदण्डनम् ॥ २१४ ॥

मि० भस्मना पङ्केन रेणुना वा यः परं स्पर्शयत्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सौ दशपणं दण्डं दाप्यः। अमेध्यमिति अश्रुश्लेष्मनखकेशकर्णविट्दूषिकाभुक्तोच्छिष्टादिकं च गृह्यते। पार्ष्णिः पादस्य पश्चिमो भागः। निष्ठ्यूतं मुखनिःसारितं जलम्। तैः स्पर्शने ततः पूर्वाद्दशपणात् द्विगुणो विंशतिपणो दण्डो वेदितव्यः। पुरीषादिस्पर्शने पुनः—

कात्यायनेन विशेष उक्तः,

छर्दिमूत्रपुरीषाद्यैरापादू यः स चतुर्गुणः।
षड्गुणः कायमध्ये स्यान्मूर्ध्नि त्वष्टगुणः स्मृतः॥ इति।

आद्यग्रहणात् वसाशुक्रासृङ्मज्जानो गृह्यन्ते। एवंभूतः पूर्वोक्तो दण्डः सवर्णविषये द्रष्टव्यः।

परभार्यासु चाविशेषेण, तथोत्तमेषु स्वापेक्षया आधिकश्रुतवृत्तेषु पूर्वोक्ताद्दशपणाद्विंशातिपणाच्च दण्डाद् द्विगुणो दण्डो वेदितव्यः।

हीनेषु स्वापेक्षया न्यूनश्रुतादिषु पूर्वोक्तस्यार्द्धदमः पञ्चपणो दशपणश्च वेदितव्यः।

मोहश्चित्तवैकल्यम्। मदो मद्यपानजन्योऽवस्थाविशेषः। आदिग्रहणाद्ग्रहावेशादिकम्। एतैर्युक्तेन भस्मादिस्पर्शने कृतेऽपि दण्डो न कर्तव्यः॥२१३॥२१४॥

बा० १। * एवम्, अव्यवहितोक्तप्रकारेण। * निश्चिते, दण्डपारुष्ये। न समुदायस्पर्शो विवक्षित इत्याह * रेणुना वेति। तेषां स्पर्शे हेतुभूते सतीति वाच्योऽर्थः। तत्फलितमाह * य इति। * इति, अनेन। कर्णविट् कर्णमलम्। दूषिका नेत्रमलम्। त्रयाणां द्वंद्व इत्याह * तैरिति। द्विगुणस्तत इति मूले व्युत्क्रम इत्याशयेन तदर्थमाह * ततः पूर्वादिति। पूर्वोक्तात्। पूर्वादीति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विकल्पात् न स्मादादेशः। *पुरीषादीति। तैः स्पर्शने कृते त्वित्यर्थः। * छर्दिमूत्रेति। छर्दिर्वमनं छर्द्यादिभिः परगात्राभिद्रोहे आपात् पादमारभ्य नाभिपर्यन्तं यो दण्डः स चतुर्गुणः, दशपणापेक्षया तत्त्वं, चत्वारिंशत्पणः स्यात्। कायमध्ये नाभेरूर्ध्वं मुखादर्वाक् तैस्तथा सति षड्गुणः षष्टिपणः स्यात्। मूर्ध्नि तु तैस्तथा सति अष्टगुणः अशीतिपणः स्मृत इत्यर्थः।

२। एतेन पारिशेष्यात्पूर्वोक्तश्चतुर्गुणो दण्डो नाभेरधस्तात् द्रोहे विज्ञेय इति व्याख्यानमपास्तम्। आपादित्यस्यार्थाज्ञानात्। समासान्तस्तत्र लोप आर्षः।

३। कातीयं व्याचष्टे * आद्येति। समेष्वेवमिति व्याचष्टे *एवमिति। तत्र एवमित्यस्यैवंभूत इत्यादि व्याख्या। समेष्वित्यस्य च सवर्णेति।

४। परस्त्रीषु द्विगुण इत्यादि व्याचष्टे * परेति। * अविशेषेणेति। सवर्णत्वोत्तमवर्णत्वहीनवर्णत्वविशेषमन्तरेणेत्यर्थः। तथा च परस्त्रीमात्रे भस्मादिभिः स्पर्शने दशपणात् द्विगुणो विंशतिपणः, अमेध्यादिभिः स्पर्शने विंशतिपणात् द्विगुणश्चत्वारिंशत्पण इत्यर्थः।

५। एवमुत्तमेषु चेत्यत्रापीत्याह *तथोत्तमेष्विति। अत्रोत्तमत्वं न जातिः, तत्रानुपदमेव वक्ष्यमाणत्वात्, अत आह *स्वेति। एवमग्रेऽपि। *हीनेष्विति। आदिना वृत्तादि। *दशपणश्चेति। भस्मादिभिः स्पर्शने इत्यर्थः। तुर्यपादं व्याचष्टे * मोह इति। उपलक्षणे तृतीयेत्याह * युक्तेनेति ॥ २१३ ॥ २१४ ॥

मि० अ० प्रातिलोम्यापराधे दण्डमाह।

या० विप्रपीडाकरं छेद्यमङ्गमब्राह्मणस्य तु।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उद्गूर्णे प्रथमो दण्डः संस्पर्शे तु तदर्द्धिकः ॥ २१५॥

मि० ब्राह्मणानां पीडाकरमब्राह्मणस्य क्षत्रियादेर्यदङ्गं करचरणादि तच्छेत्तव्यम् । क्षत्रियवैश्ययोरपि पीडां कुर्वतः शूद्रस्याङ्गच्छेदनमेव ।

(मनु. अ. ८ श्लो. २७९)

येन केनचिदङ्गेन हिंस्याच्छ्रेयांसमन्त्यजः ।
छेत्तव्यं तत्तदेवास्य तन्मनोरनुशासनम् ॥

इति द्विजातिमात्रस्यापराधे शूद्रस्याङ्गच्छेदविधानात् । वैश्यस्यापि क्षत्रियापकारिणोऽयमेव दण्डस्तुल्यन्यायत्वात् । उद्गूर्णे वधार्थमुद्यते शस्त्रादिके प्रथमसाहसो दण्डो वेदितव्यः । शूद्रस्य पुनरुद्गूर्णेऽपि हस्तादिच्छेदनमेव ।

(अ. ८ श्लो. २८०)

पाणिमुद्यम्य दण्डं वा पाणिच्छेदनमर्हति ।

इति मनुस्मरणात् । उद्गोरणार्थं शस्त्रादिस्पर्शने तु तदर्द्धिकः प्रथमसाहसादर्द्धदण्डो वेदितव्यः । भस्मादिसंस्पर्शे पुनः क्षत्रियवैश्ययोः—

प्रातिलोम्यापवादेषु द्विगुणत्रिगुणा दमाः—

इति वाक्पारुष्योक्तन्यायेन कल्प्यम् । शूद्रस्य तत्रापि हस्तच्छेद एव ।

(अ. ८ श्लो. २८२)

अवनिष्ठीवतो दर्पाद्द्वावोष्ठौ छेदयेन्नृपः ।
अवमूत्रयतो मेढ्रम् अवशर्द्धयतो गुदम् ॥

इति मनुस्मरणात् ॥ २१५ ॥

बा० १ ।*प्रातिलोम्येति । तेनापराधे इत्यर्थः । बहुवचनान्ते-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न समास इत्याह * ब्राह्मणानामिति । अत्र वर्णत्वेन सादृश्यादाह * क्षत्रियादेरिति । विशेषमाह * क्षत्रियेति । * श्रेयांसम्, उत्तमजातिम् । द्विजातिम् इति यावत् । अत एवाह * अन्त्यज इति । अङ्गमध्येऽन्त्यात् निकृष्टात्पादाज्जात इत्यर्थः । अन्ते भवोऽन्त्यः शूद्रवर्णस्तस्माज्जात इति वा । अन्त्यः सन् जात इति इति वा । * अस्य, शूद्रस्य । मात्रं कात्स्न्र्ये । तन्मात्रविषयकापराधे इत्यर्थः । अत्र तेन तत् साक्षात्परम्परासाधारणं बोध्यम् । तदित्यस्येदमित्यर्थः । मनुग्रहणमादरार्थम् । मानवमेवेदम् ।

२ । उक्तन्यायमन्यत्रातिदिशति * वैश्यस्यापीति । वैश्यस्य क्षत्रियानन्तरभावित्वेन न्यूनत्वेनान्त्यजत्वात्क्षत्रियस्य तदपेक्षया ज्यायस्त्वेनोत्कृष्टत्वाच्छूद्रतुल्यत्वेनायमेवाङ्गच्छेदनरूपो दण्ड इत्यर्थः । * शस्त्रादीति । शस्त्रादेः स्पर्शे इत्यर्थः । तदर्द्धिक इति प्राग्वत् । तत्फलितमाह * प्रथमेति ।

३ । ननु भस्मादिभिर्निष्ठ्यूतान्तैः प्रागुक्तैः प्रातिलोम्यापराधे को दण्ड इत्यत आह * भस्मादीति । उक्तमूलमाह * प्रातिलोम्येति । भस्मादिभिः स्पर्शने सवर्णविषये यो दशपणो दण्ड उक्तस्तस्यैव प्रातिलाम्येत्यनेन तथोक्तत्वात्स एवात्रापि । तत्र क्षत्रियेण ब्राह्मणं प्रति भस्मादिभिरभिद्रोहे कृते प्रातिलोम्यापवादत्वेन द्विगुणो विंशतिपणो दण्डः । तैरेव वैश्यकर्तृके क्षत्रियापराधे तत्रोक्ताद्विंशतिपणात् द्विगुणश्चत्वारिंशत्पणो दण्डः । तैरेव वैश्यकर्तृकब्राणापराधे विंशतिपणादेव त्रिगुणः षष्टिपणो दण्ड इति बोध्यम् ।

४ । * तत्रापि, भस्मादिकरणकब्राह्मणापराधेऽपि । दर्पादिति निष्ठीवनादौ हेतुः । अवेत्येते ऽवमानसूचकाः ॥ २१८ ॥

मि० अव. एवं प्रातिलोम्यापराधे दण्डमभिधाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनः सजातिमधिकृत्याह।

या० उद्गूर्णे हस्तपादे तु दशविंशतिकौ दमौ।
परस्परं तु सर्वेषां शस्त्रे मध्यमसाहसः॥ २१६॥

मि० हस्ते पादे वा ताडनार्थमुद्गूर्णे यथाक्रमं दशपणो विंशतिपणश्च दण्डो वेदितव्यः। परस्परवधार्थं शस्त्रे उद्गूर्णे सर्वेषां वर्णिनां मध्यमसाहसो दण्डः॥ २१६॥

बा. १। व्यवहितसङ्गतिमाह * एवमिति। *पुनः, पुनरपि। * सजातिं, सवर्णम्। सिंहावलोकनन्यायेनेति भावः। हस्तेति समाहारद्वन्द्व इत्याह * हस्ते इति। * उद्गूर्णे, उद्यते। दशविंशतिकावित्यत्र द्वन्द्वोत्तरं परिमाणे कनित्याह *यथेति। परस्परमित्यस्य लक्ष्यार्थमाह * परस्परेति। सर्वेषामित्यस्य मध्यमणिन्यायेनान्वयः। वर्णानामिति तदर्थः। उद्गूर्णे इत्यस्यानुवृत्तिः, तदाह * उद्गूर्णे इत्यादि॥ २१६॥

मि० अव. किञ्च।

या० पादकेशांशुककरोल्लुञ्चनेषु पणान् दश।
पीडाकर्षांशुकावेष्टपादाध्यासे शतं दमः॥ २१७॥

मि० पादकेशवस्त्रकराणामन्यतमं गृहीत्वा य उल्लुञ्चति झटित्याकर्षति असौ दशपणं दण्ड्यः। पीडा च आकर्षश्च अंशुकावेष्टश्च पादाध्यासश्च पीडाकर्षांशुकावेष्टपादाध्यासं तस्मिन् समुच्चिते शतं दण्ड्यः।

एतदुक्तं भवति। अंशुकेनावेष्ट्य गाढमापीड्याकृष्य च यः पादेन घट्टयति तं शतं पणान् दापये-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिति ॥ २१७ ॥

बा. १ । * किं चेति । सवर्णविषये ऽन्यदप्याहेत्यर्थः । एवमग्रेऽपि । * पादेति । अत्र करशब्दस्यापूर्वनिपातः । तत्प्रकरणस्यानित्यत्वात् । अत एवाग्रे करपादेत्युक्तिसङ्गतिर्मूले । वस्त्रग्रहणान्न समाहार इत्याह * कराणामिति । अत एवाह *अन्यतममिति । मुख्यार्थोऽत्र न विवक्षित इत्याह *झटितीति । समाहारद्वन्द्वाद्दण्डबाहुल्याद्विरोधाच्चाह * समुच्चिते इति । असम्भवनिरासायाह * एतदिति । मूले भावे प्रत्यया इत्याह * अंशुकेनावेष्ट्येत्यादि । अध्यासपदार्थमाह * घट्टयतीति । ताडयति ॥ २१७ ॥

मि० अव. किञ्च ।

या० शोणितेन विना दुःखं कुर्वन्काष्ठादिभिर्नरः ।
द्वात्रिंशतं पणान्दण्ड्यो द्विगुणं दर्शनेऽसृजः ॥२१८॥

मि० यः पुनः शोणितं यथा न दृश्यते तथा मृदु ताडनं काष्ठलोष्टादिभिः करोति असौ द्वात्रिंशतं पणान् दण्ड्यः । यदा पुनर्गाढताडनेन लोहितं दृश्यते तदा द्वात्रिंशतो द्विगुणं चतुःषष्टिपणान् दण्डनीयः ।

त्वङ्मांसास्थिविभेदे पुनर्विशेषो—
मनुना दर्शितः (अ. ८ श्लो. २८४)
त्वग्भेदकः शतं दण्ड्यो लोहितस्य च दर्शकः ।
मांसभेत्ता च षण्णिष्कान्प्रवास्यस्त्वस्थिभेदकः ॥
इति ॥ २१८ ॥

बा. १ । आद्यर्थमाह * लोष्टेति । त्वग्भेदक इत्यादौ शेषषष्ठ्या समासः । निमित्तान्तरे मूलोक्तमेवाह * लोहितस्येति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चस्तु दण्डसमुच्चायको न तु समुच्चयनिमित्तत्वसूचकः । सर्वत्र तथैव सत्त्वात् । तद्व्याख्यातृभिरपि तथैव व्याख्यातत्वाच्च ।

२ । एतेन समुच्चिते शतदण्डो न त्वङ्मात्रभेदके, चस्य समुच्चयबोधकत्वादिति व्याख्यानमपास्तम् । नन्वेवं चतुःषष्टिपणो दण्डो मूले रक्तदर्शने उक्तः, मनुना तु शतमिति मिथो विरोध इति चेन्न । मर्मस्थले तद्दर्शकस्य मनूक्तम्, अन्यत्र मूलोक्तमिति विवेकात् । अग्रे चस्त्वर्थे ॥ २१८ ॥

मि० अव. किञ्च ।

या० करपाददतो भङ्गे छेदने कर्णनासयोः ।
मध्यो दण्डो व्रणोद्भेदे मृतकल्पहते तथा ॥ २१९ ॥

मि० करपाददन्तस्य प्रत्येकं भङ्गे, कर्णनासस्य च प्रत्येकं छेदने, रूढव्रणस्योद्भेदने, मृतकल्पो यथा भवति तथा हते ताडिते मध्यमसाहसो वेदितव्यः । अनुबन्धादिना विषयस्य साम्यमत्रापादनीयम् ॥ २१९ ॥

बा. १ । करेति समाहारद्वन्द्वे पाददन्तेति ददादेश इत्याह * करेति । अग्रिमानुरोधेन दण्डस्य तुल्यत्वाच्चाह * प्रत्येकमिति । मूले कर्णनासयोरित्यार्षम् । तत्सूचक इतरेतरद्वन्द्व एवेत्याह * कर्णनासस्य च प्रत्येकमिति । अपूर्वव्रणोत्पत्तेरत्रानुद्देश्यत्वं किं तु जातव्रणभङ्गस्येत्याह * रूढेति । जातेत्यर्थः । ननु करादिभङ्गस्याल्पत्वेनैकरूपेण सर्वत्र मध्यमसाहसदण्डविधानमयुक्तम्, अत आह * अनुबन्धादिनेति । अनुबन्धो दोषोत्पादः । दोषोत्पादे ऽनुबन्धः स्यादित्यमरः । आदिना व्यवहारासौकर्यम् । कर्णनासाछेदनादौ दोषाधिक्यं प्रत्यक्षसिद्धं, करपादादेस्तु साक्षाच्छरीरावयवत्वेन तद्भङ्गे व्यव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हारसौकर्याभावेन शरीरयात्राया दुर्लभत्वाद्दोषाधिक्यम् । एवं दन्तभङ्गे ऽभ्यवहरणसौकर्याभावेन परम्परया जीवनसङ्कोचाद्दोषाधिक्यम् । इत्थमनुबन्धादिना करादिभङ्गादिरूपविषयस्य साम्यमूह्यमित्यर्थः ॥ २१९ ॥

मि० अव. किञ्च ।

या० चेष्टाभोजनवाग्रोधे नेत्रादिप्रतिभेदने ।
कन्धराबाहुसक्थ्नां च भङ्गे मध्यमसाहसः ॥ २२० ॥

मि० गमनभोजनभाषणनिरोधे, नेत्रस्य आदिग्रहणाज्जिह्वायाश्च प्रतिभेदने, कन्धरा ग्रीवा बाहुः प्रसिद्धः सक्थि ऊरुः तेषां प्रत्येकं भञ्जने मध्यमसाहसो दण्डः ॥ २२० ॥

बा. १ । *चेष्टेति । अत्र वाचो ऽपूर्वानिपातः प्राग्वत् । एवं कन्धरेत्यत्रापि । तत्रेतरेतरयोगोऽप्येवम् । अत एवेह चेष्टार्थो *गमनेति।प्रत्येकमिति वक्ष्यति । मूले चो व्युत्क्रमे सर्वसमुच्चये। अग्रे मूले चस्त्वर्थे ॥ २२० ॥

मि० अव. अपिच ।

या० एकं घ्नतां बहूनां च यथोक्ताद् द्विगुणो दमः ।

मि० यदा पुनर्बहवो मिलिता एकस्याङ्गभङ्गादिकं कुर्वन्ति तदा यस्मिन्यस्मिन् अपराधे यो यो दण्ड उक्तस्तत्र तस्माद्द्विगुणो दण्डः प्रत्येकं वेदितव्यः । अतिक्रूरत्वात्तेषाम् । प्रातिलोम्यानुलोम्यापराधयोरप्येतस्यैव सवर्णविषयेऽभिहितस्य दण्डजातस्य वाक्पारुष्योक्तक्रमेण हानिं वृद्धिं च कल्पयेत् ।

वाक्पारुष्ये यएवोक्ताः प्रातिलोम्यानुलोमतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तएव दण्डपारुष्ये कार्या राज्ञा यथाक्रमम् ॥
इति स्मरणात् । (ना. व्यव. १६ । २९)

या० कलहापहृतं देयं दण्डश्च द्विगुणस्ततः ॥२२१॥

मि० कलहे वर्तमाने यद्येनापहृतं तत्तेन प्रत्यर्पणीयम् । अपहृतद्रव्याद्द्विगुणश्चापहारनिमित्तो दण्डो देयः ॥ २२१ ॥

बा. १। यथोक्तादित्यस्यार्थमाह * यस्मिन्निति । अपराधबहुत्वादाह * प्रत्येकमिति । तदेवाह * अतीति । एवं सवर्णविषयापराधे मूलोक्तं दण्डं वाक्पारुष्योक्तन्यायेनात्र तदनुक्तत्वात्प्रातिलोम्यानुलोम्यापराधयोर्योजयति * प्रातिलोम्येति । *एतस्यैव, मूलीयस्यैव । * दण्डजातस्य, तत्समूहस्य । प्रातिलोम्यापराधे दण्डस्य वृद्धिः, आनुलोम्यापराधे दण्डस्य हानिरित्यर्थः ।

२ । न च विप्रपीडाकरमितिमूलव्याख्यावसरे भस्मादिसंस्पर्शे पुनरित्यादिनाऽयमर्थ उक्तः, स एवात्रोच्यते इति पौनरुक्त्यमिति वाच्यम् । भस्मादिभिः करणविशेषैः प्रातिलोम्यापराधे सति तत्रैवापराधे प्रागुक्तः प्रातिलोम्यापराधदण्डप्रसङ्गेन, अत्र तु प्रातिलोम्यानुलोम्यापराधयोरुभयोरपि वाक्पारुष्योक्तस्य सकलस्यापि दण्डस्य कल्पनाप्रकारो बालावबोधार्थमुच्यते इति भेदात् । मानवे प्रातिलोम्यानुलोमत इति धर्मपरम् । पञ्चमीद्विवचनान्तात्तसिः । * कार्याः, कर्त्तव्याः दण्डाः । दाप्या इति पाठान्तरम् ।

उ. ३ । कलहेति सप्तमीसमासः । तदाह *कलहे इति । * वर्तमाने, न तु समाप्ते । तत इत्यस्यार्थमाह * अपहृतेति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र हेतुं सूचयन्नाह * अपहारेति । बहुव्रीहिः ॥ २२१ ॥

मि० अव. किञ्च ।

या० दुःखमुत्पादयेद्यस्तु स समुत्थानजं व्ययम् ।
दाप्यो दण्डं च यो यस्मिन् कलहे समुदाहृतः ॥२२२॥

मि० यो यस्य ताडनाद् दुःखमुत्पादयेत्स तस्य व्रणरोपणादौ औषधार्थे पथ्यार्थे च यो व्ययः क्रियते तं दद्यात् । समुत्थानं व्रणरोपणम् । यस्मिन्कलहे यो दण्डस्तं च दद्यात् न समुत्थानजव्ययमात्रम् ॥२२२॥

बा. १। *ताडनात्, ताडितादिति पाठेऽपि भावे क्तः । समुत्थानजमित्यादेरर्थमाह * तस्य व्रणेति । क्रियते अनेन सम्यगुत्थानमिति व्युत्पत्त्याऽऽह * व्रणरोपणमिति । व्युत्पत्त्या तस्य सम्यक् स्वरूपतः करणमित्यर्थः ।दण्डं चेत्याद्यर्थमाह *यस्मिन्निति । अस्य तात्पर्यार्थमाह * नेति । मात्रमवधारणे।

मनुरपि, (८। २८७)

अङ्गानां पीडनायां च प्राणशोणितयोस्तथा ।
समुत्थानव्ययं दाप्यः सर्वदण्डमथापि वा ॥ इति ।

अङ्गानां करादीनां प्राणशोणितयोश्च पीडनायां सत्यां समुत्थानव्ययं यावता कालेन पूर्वावस्थाप्राप्तिरूपसमुत्थानसम्बन्धो भवति तावता कालेन पथ्यौषधादिना यावान् व्ययो भवति तमसौ दापनीयः । यदि तं व्ययं पीडोपपादको न दातुमिच्छति तदा यः समुत्थानव्ययो यश्च दण्डस्तमेव सर्वं राज्ञा दण्डत्वेन दाप्य इत्यर्थ इति तद्व्याख्यातारः ॥ २२२ ॥

मि० अव. परगात्राभिद्रोहे दण्डमुक्त्वाऽनन्तरं बहिरङ्गार्थनाशे दण्डमाह ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या० अभिघाते तथा भेदे छेदे कुड्यावपातने ।
पणान्दाप्यः पञ्च दश विंशतिं तद्व्ययं तथा ॥ २२३ ॥

मि० मुद्गरादिना कुड्यस्याभिघाते विदारणे द्वैधीकरणे च यथाक्रमं पञ्चपणो दशपणो विंशतिपणश्च दण्डो वेदितव्यः । अवपातने पुनः कुड्यस्यैते त्रयो दण्डाः समन्विता ग्राह्याः । पुनः संपादनार्थं च धनं स्वामिने दद्यात् ॥ २२३ ॥

बा० १। उत्तरवचनस्य प्रसङ्गसङ्गतिरित्याह *परगात्रेति । गृहादितो हस्तादीनामन्तरङ्गत्वात्तदपराधे तावत्तत एव दण्डमुक्त्वाऽन्तरङ्गप्रसङ्गाद् बहिरङ्गगृहकुड्याभिघातादौ दण्डकथनमित्यर्थः । एतेन वैपरीत्येन कथनशङ्काऽपि निरस्ता । अर्थो गृहादिरूपः । भेदे छेदे इति पाठः । पञ्चेत्यादि पदत्रयम् । योग्यतयाऽऽह *मुद्गरेति । प्रत्यासत्तेराह *कुड्यस्येति । अभिघात आघातमात्रम् । भेदे इत्यस्यार्थो * विदारणइति । छेदे इत्यस्यार्थो * द्वैधीति । चतुर्थदण्डाभावादपराधबाहुल्याच्चाह * एते त्रय इति । तद्व्ययमित्यस्यार्थमाह * पुनरिति ॥ २२३ ॥

मि० अव. अपिच ।

या० दुःखोत्पादि गृहे द्रव्यं क्षिपन्प्राणहरं तथा ।
षोडशाद्यः पणान्दाप्यो द्वितीयो मध्यमं दमम् ॥ २२४ ॥

मि० परगृहे दुःखजनकं कण्टकादि द्रव्यं प्रक्षिपन् षोडश पणान् दण्ड्यः । प्राणहरं पुनर्विषभुजङ्गादिकं प्रक्षिपन् मध्यमसाहसं दण्ड्यः ॥ २२४ ॥

बा० १ । अर्थादाह *परेति । दुःखोत्पादीति द्रव्यविशेषण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मित्याह *दुःखेति। जनिवध्योरिति वृद्धिनिषेधः। जननमिति पाठान्तरम्। करणे ल्युट्। द्रव्यस्वरूपमाह *कण्टकादीति। अत्र आद्यः द्वितीय इति च यथासंख्यान्वयसिद्धार्थकथनपरं, नास्ति सफलं, वाक्यभेदाभावादित्याशयेन तद्विशायैवाह * प्राक्षिपन् षोडशेति। * प्राणेति। हरतेरनुद्यमनेऽजित्यच्॥ २२४॥

मि० अव० पशुवाभिद्रोहे दण्डमाह।

या० दुःखे च शोणितोत्पादे शाखाङ्गच्छेदने तथा॥
दण्डः क्षुद्रपशूना तु द्विपणप्रभृतिः क्रमात्॥ २२५॥

मि० क्षुद्राणां पशूनाम् अजाविहरिणप्रायाणां ताडने दुःखोत्पादने, असृक्स्रावणे, शाखाङ्गच्छेदने-शाखाशब्देन चात्र प्राणसंचाररहितं शृङ्गादिकं लक्ष्यते। अङ्गानि करचरणप्रभृतीनि। शाखा चाङ्गं च शाखाङ्गं तस्य छेदने द्विपणप्रभृतिर्दण्डः। द्वौ पणौ यस्य दण्डस्य स द्विपणः। द्विपणः प्रभृतिरादिर्यस्य दण्डगणस्यासौ द्विपणप्रभृतिः।

स च दण्डगणो द्विपणश्चतुष्पणः षट्पणोऽष्टपण इत्येवंरूपो, न पुनर्द्विपणस्त्रिपणश्चतुष्पणः पञ्चपण इति। कथमिति चेत्, उच्यते। अपराधगुरुत्वात्तावत्प्रथमदण्डाद्गुरुतरमुपरितनदण्डत्रयमवगम्यते। तत्र चाश्रुतत्रित्वादिसंख्याश्रयणाद्वरं श्रुतद्वित्वसंख्याया एवाभ्यासाश्रयणेन गुरुत्वसंपादनमिति निरवद्यम्॥२२५॥

बा० १। पशुपदोक्तेराह * अजावीति। अजश्चाविश्चेत्यादिः द्वन्द्वः। अत एव तस्य पूर्वनिपातः। औचित्यादाह * ताडनइति। लक्ष्यार्थमाह * दुःखोत्पादने इति। मुख्यार्थबाधा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दाह * शाखाशब्देनेति । * अत्र, अत्रैव । आदिना खुरपरिग्रहः । करचरणेति समाहारद्वन्द्वः प्राण्यङ्गत्वात् । दण्डशब्द उभयत्र तत्समूहपर इत्याह * दण्डगणस्येति । क्रमादिति तु व्युत्क्रमभ्रमनिरासाय ।

२ । तुर्यपादोक्तमेवाभिप्रायतो विवेचयति * सचेति । *न पुनः, न तु । दार्ढ्यायोक्तमाक्षिपति *कथमिति । समाधातुं सिद्धार्थमनुवदति *अपराधेति । *तावत्, आदौ । अवगमनेऽन्वयः । ततः किम्, अत आह * तत्र चेति । उपरितनदण्डत्रये चेत्यर्थः । द्विपण इत्यत्र द्वित्वं तावच्छ्रुतम् । तत्र च श्रुतद्वित्वसंख्यात आधिक्यम् अश्रुतत्रित्वादिरूपधर्मिकल्पनया वा श्रुतद्वित्वगताभ्यासात्मकचतुष्ट्वादिरूपधर्मकल्पनया वा भवति । तत्राद्येऽश्रुतकल्पना धर्मिकल्पनाचेति गौरवं, द्वितीये तु श्रुतद्वित्वगताभ्यासरूपधर्मकल्पनैवेति लाघवम् । तथा च न्यायविदः धर्मिकल्पनातो वरं धर्मकल्पनेति । अतः श्रुतद्वित्वाभ्यासाश्रयणमेवोचितमिति भावः ॥ २२५ ॥

मि० अव० किंच ।

या० लिङ्गस्य छेदने मृत्यौ मध्यमो मूल्यमेव च ।
महापशूनामेतेषु स्थानेषु द्विगुणो दमः ॥ २२६ ॥

मि० तेषां क्षुद्रपशूनां लिङ्गच्छेदने मारणे च मध्यमसाहसो दण्डः । स्वामिने च मूल्यं दद्यात् । महापशूनां पुनर्गोगजवाजिप्रभृतीनामेतेषु स्थानेषु ताडनलोहितस्रावणादिनिमित्तेषु पूर्वोक्ताद्दण्डाद् द्विगुणो दण्डो वेदितव्यः ॥ २२६ ॥

वा० १ । पूर्वार्द्धं पूर्वशेष इत्याह *तेषामिति । पूर्वोक्तानामि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यर्थः। मृत्युशब्दस्य लक्ष्यार्थमाह * मारणे चेति। अत एव तयोः सामानाधिकरण्यम्।

२। उत्तरार्धार्थमाह *महापशूनामिति। स्थानशब्दो निमित्त-पर इत्याह * ताडनेति। तत्कृतदुःखोत्पादेत्यर्थः। आदिना शाखाङ्गच्छेदनादिसंग्रहः। दुःखे चेत्याद्युक्तनिमित्तेष्वित्यर्थः। * द्विगुणः, चतुष्पणादिः ॥ २२६ ॥

मि० अव० स्थावराभिद्रोहे दण्डमाह।

या० प्ररोहिशाखिनां शाखास्कन्धसर्वविदारणे।
उपजीव्यद्रुमाणां च विंशतेर्द्विगुणो दमः ॥ २२७ ॥

मि० प्ररोहा अङ्कुरास्तद्वत्यः शाखाः प्ररोहिण्यः। याश्छिन्नाः पुनरुप्ताः प्रतिकाण्डं प्ररोहन्ति ताः शाखा येषां वटादीनां ते प्ररोहिशाखिनः। तेषां शाखाच्छेदने, यतो मूलशाखा निर्गच्छन्ति स स्कन्धस्तस्य छेदने, समूलवृक्षच्छेदने च यथाक्रमं विंशतिपणदण्डादारभ्य पूर्वस्मात् पूर्वस्मादुत्तरोत्तरदण्डो द्विगुणः। एतदुक्तं भवति। विंशतिपणश्चत्वारिंशत्पणोऽशीतिपण इत्येवं त्रयो दण्डा यथाक्रमं शाखाछेदनादिष्वपराधेषु भवन्तीति।

अप्ररोहिशाखिनामप्युपजीव्यवृक्षाणामाम्रादीनां पूर्वोक्तेषु स्थानेषु पूर्वोक्ता एव दण्डाः। अनुपजीव्याप्ररोहिशाखिषु पुनर्वृक्षेषु कल्प्याः ॥ २२७ ॥

बा० १। पुनः स्पष्टार्थं तदर्थमाह * या इति। *उप्ताः, क्षेत्रनिक्षिप्ताः। *प्रतिकाण्डं, काण्डं काण्डं प्रति। ताः शाखा येषामिति शाखादिभ्य इतीनिस्तदन्तादपि बोध्यः। *मूलेति। मूल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संवद्धशाखा इत्यर्थः ।

अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधिस्तरोः । इत्यमरः ।

२ । सर्वेत्यस्यार्थमाह * समूलेति । मूलेति पाठेऽर्शआद्यच् बोध्यः । विदारणे इत्यस्य सर्वत्र सम्बन्धः । क्रमादित्यनुवृत्तेः स्थानाख्यलोकप्रमाणाद्वाऽऽह * यथेति । विंशतेरिति पञ्चमी न तु षष्ठीत्याह * विंशतीति । तदुपपत्तये आह * आरभ्येति । फलितमाह * एतादिति ।

३ । वैयर्थ्यं परिहरन्नुत्तरार्धार्थमाह *प्ररोहीति । *उपजीव्येति । पत्रपुष्पफलादिनेति भावः । *पूर्वोक्तेष्विति । प्रागुक्तेषु निमित्तेष्वित्यर्थः । *पूर्वोक्ता एव, विंशतिपणादयः । दमशब्दस्तत्समूहपर इत्याह * दण्डा इति । न्यूनतां निराचष्टे * अऽनुपजीव्येति ॥ २२७ ॥

मि० अव० वृक्षविशेषान्प्रत्याह ।

या० चैत्यश्मशानसीमासु पुण्यस्थाने सुरालये ।
जातद्रुमाणां द्विगुणो दमो वृक्षेऽथ विश्रुते ॥ २२८॥

मि० चैत्यादिषु जातानां वृक्षाणां शाखाच्छेदनादिषु पूर्वोक्ताद्दण्डाद्द्विगुणः । विश्रुते च पिप्पलपलाशादिके द्विगुणो दण्डः ॥ २२८ ॥

बा० १ । *द्विगुण इति । शाखाच्छेदनादिषु त्रिषु यथाक्रमं चत्वारिंशत्पणोऽशीतिपणः षष्ट्यधिकशतपणश्चेत्यर्थः । अन्यत्राप्येवमेवेत्याह * विश्रुते इति । अथशब्दार्थमाह * पिप्पलेति । अत्र विश्रुतत्वं प्रसिद्धत्वं, तच्च शास्त्रीयं बोध्यमिति नातिप्रसङ्गः ॥ २२८ ॥

मि० अव० गुल्मादीन् प्रत्याह ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या० गुल्मगुच्छक्षुपलताप्रतानौषधिवीरुधाम् ।
पूर्वस्मृतादर्द्धदण्डः स्थानेषूक्तेषु कर्तने ॥ २२९ ॥

मि० गुल्मा अनतिदीर्घनिबिडलता मालत्यादयः। गुच्छा अवल्लीरूपाः असरलप्रायाः कुरण्टकादयः। क्षुपाः करवीरादयः सरलप्रायाः । लता दीर्घयायिन्यो द्राक्षातिमुक्ताप्रभृतयः । प्रतानाः काण्डप्ररोहरहिताः सरलयायिन्यः सारिवाप्रभृतयः । ओषध्यः फलपाकावसानाः शालिप्रभृतयः । वीरुधः छिन्ना अपि या विविधं प्ररोहन्ति ताः गुडूचीप्रभृतयः । एतेषां पूर्वोक्तेषु स्थानेषु कर्तने छेदने पूर्वोक्ताद्दण्डादर्द्धदण्डो वेदितव्यः ॥ २२९ ॥

इति दण्डपारुष्यप्रकरणम् ॥

बा० १ । *प्रत्याहेति । तदभिद्रोहमभिलक्ष्य दण्डमाहेत्यर्थः। एवं प्रागपि । * अनतिदीर्घेति । त्रयाणां कर्मधारयः, बहुव्रीहुत्तरपदको द्वयोः कर्मधारयो वा । यद्यपि लतात्वं सामान्यं तथापि समभिव्याहारादाह * दीर्घेति ।

अप्रकाण्डे स्तम्बगुल्मौ वल्ली तु व्रततिर्लता ।
लता प्रतानिनी वीरुत् गुल्मिन्युलप इत्यपि ॥ इत्यमरः ।

अवसानं समाप्तिर्नाश इति यावत् । पूर्वोक्तेषु इत्यादि प्राग्वत् । पूर्वस्मृतादित्यस्यार्थः * पूर्वोक्तादिति । प्रकृतिभूतविंशतिचत्वारिंशदशीतिपणरूपात्पूर्वोक्ताद्दण्डादर्धदण्डो दशविंशतिचत्वारिंशत्पणात्मक इत्यर्थः ।

अत्र मनुः, (अ. ८ श्लो. २९९–३००)
प्रमापयेत्प्राणभृतः तत्र दण्डोऽविचारितः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मनुष्यमारणे क्षिप्रं चोरवत् किल्विषं भवेत् ।
प्राणभृत्सु महत्स्वर्द्धं गोगजोष्ट्रहयादिषु ॥
क्षुद्रकाणां पशूनां तु हिंसायां द्विशतो दमः ।
पञ्चाशत्तु भवेद्दण्डः शुभेषु मृगपक्षिषु ॥
गर्दभाजाविकानां तु दण्डः स्यात्पञ्चमाषकः ।
माषकस्तु भवेद्दण्डः श्वशूकरनिपातने ॥
भार्या पुत्रश्च दासश्च प्रेष्यो भ्राता च सोदरः ।
प्राप्तापराधास्ताड्याः स्युः रज्ज्वा बेणुदलेन वा ॥
पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कदाचन ।
अतोऽन्यथा तु प्रहरन् प्राप्तः स्याच्चौरकिल्विषम् ॥ इति ।
प्राकारस्य च भेत्तारं परिखाणां च पूरकम् ।
द्वाराणां चैव भङ्क्तारं क्षिप्रमेव प्रवासयेत् ॥
इति च । [मनु. अ. ९ । २८९]

विष्णुः, गजाश्वोष्ट्रगोघाती त्वेककरपादः कार्यो, विमांसविक्रयी ग्रामपशुघाती कार्षापणशतं दण्ड्यः पशुस्वामिने च तन्मूल्यं दद्यात्, आरण्यपशुघाती पञ्चाशतं कार्षापणान्, पक्षिघाती मत्स्यघाती च दश कार्षापणान्, कीटोपघाती कार्षापणमिति ।

विमांसं शृगालादिमांसम् ॥ २२९ ॥

इति दण्डपारुष्यप्रकरणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ साहसप्रकरणम् ॥

मि० अव० संप्रति साहसं नाम विवादपदं व्याचिख्यासुस्तल्लक्षणं तावदाह ।

या० सामान्यद्रव्यप्रसभहरणात्साहसं स्मृतम् ।

मि० सामान्यस्य साधारणस्य यथेष्टं विनियोगानर्हत्वाविशेषेण परकीयस्य वा द्रव्यस्यापहरणं साहसम् । कुतः, प्रसभहरणात् प्रसह्य हरणात् बलावष्टम्भेन हरणादिति यावत् । एतदुक्तं भवति । राजदण्डं जनाक्रोशं चोल्लङ्घ्य राजपुरुषेतरजनसमक्षं यत्किञ्चिन्मारणपरदारप्रधर्षणादिकं क्रियते तत्सर्वं साहसमिति साहसलक्षणम् । अतः साधारणधनपरधनयोर्हरणस्यापि बलावष्टम्भेन क्रियमाणत्वात्साहसत्वमिति ।

नारदेनापि साहसस्य स्वरूपं विवृतम्, (व्यव. १४।१

सहसा क्रियते कर्म यत्किञ्चिद्बलदर्पितैः ।

तत्साहसमिति प्रोक्तं सहो बलमिहोच्यते ॥ इति।

तदिदं साहसं चौर्यवाग्दण्डपारुष्यस्त्रीसंग्रहणेषु व्यासक्तमपि बलदर्पावष्टम्भोपाधितो भिद्यते इति दण्डातिरेकार्थं पृथगभिधानम् ।

तस्य च दण्डवैचित्र्यप्रतिपादनार्थं प्रथमादिभेदेन त्रैविध्यमभिधाय—

तल्लक्षणं तेनैव विवृतम्, [व्यव. १४।श्लो. ३–८]

तत्पुनस्त्रिविधं ज्ञेयं प्रथमं मध्यमं तथा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उत्तमं चेति शास्त्रेषु तस्योक्तं लक्षणं पृथक् ॥
फलमूलोदकादीनां क्षेत्रोपकरणस्य च ।
भङ्गाक्षेपोपमर्दाद्यैः प्रथमं साहसं स्मृतम् ॥
वासःपश्वन्नपानानां गृहोपकरणस्य च ।
एतेनैव प्रकारेण मध्यमं साहसं स्मृतम् ॥
व्यापादो विषशस्त्राद्यैः परदाराभिमर्शनम् ।
प्राणोपरोधि यच्चान्यदुक्तमुत्तमसाहसम् ॥
तस्य दण्डः क्रियापेक्षः प्रथमस्य शतावरः ।
मध्यमस्य तु शास्त्रज्ञैर्दृष्टः पञ्चशतावरः ॥
उत्तमे साहसे दण्डः सहस्रावर इष्यते ।
वधः सर्वस्वहरणं पुरान्निर्वासनाङ्कने ॥
तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसे ॥ इति ।

वधादयश्चापराधतारतम्यादुत्तमसाहसे समस्ता व्यस्ता वा योज्याः ।

अव. तत्र परद्रव्यापहरणरूपे साहसे दण्डमाह ।

या० तन्मूल्याद् द्विगुणो दण्डो निह्नवे तु चतुर्गुणः॥ २३०॥

मि० तस्यापहृतद्रव्यस्य मूल्यात् द्विगुणो दण्डः । यः पुनः साहसं कृत्वा नाहमकार्षमिति निह्नुते तस्य मूल्याच्चतुर्गुणो दण्डो भवति । एतस्मादेव विशेषदण्डविधानात्प्रथमसाहसादिसामान्यदण्डविधानमपहारव्यतिरिक्तविषयं गम्यते ॥ २३० ॥

बा० १। * आहेति । मूलकृद् अर्द्धेनेति भावः । शब्दार्थमाह *साधारणस्येति । मौलं सामान्येत्युपलक्षणं परकीयस्यापि । तत्र साधारणधर्मस्य हेतुत्वप्रदर्शनद्वारा ऽनुगतम् अभिमतं लक्ष्यार्थं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्य सूचयन्नाह *यथेष्टेति । यौगपद्यासम्भवादाह *वेति। यथा साधारणस्यानेकस्वत्वाक्रान्तस्य न यथेष्टविनियोगार्हत्वं तथा परद्रव्यस्यापीति तदपहरणमपि साहसं भवतीति भावः। * कुत इति। योगो वा रूढिर्वा योगरूढिर्वेति प्रश्नाशयः। प्रसभं हरणादिति समासः। तद्दाह * प्रसह्येति। तथा च यौगिकोऽयमिति भावः।

२। नन्वेवं मूलस्य न्यूनता तथापि तदवस्थैव स्मृत्यन्तरविरोधोऽपीति चेन्न। हेतुनैवान्यसंग्रहस्यापि सूचनेन दोषलेशाभावात्। तदेतत् ध्वनयन् तत्फलितमेवाह * एतदिति। *राजेति। राजदण्डभयं जनाक्षेपभयं चेत्यर्थः। *राजपुरुषेति। राजपुरुषाश्चेतरजनाश्च तेषां समक्षमित्यर्थः। असमक्षं तु क्रियमाणस्य स्तेयत्वमेवेति भावः। यत्किंचिदर्थमेवाह * मारणेति। *साहसमिति। सहसा क्रियमाणत्वात्। * साहसलक्षणमिति। साहससामान्यलक्षणमित्यर्थः। अत एवाह * अत इति। उक्तहेतोरित्यर्थः। अपिना तत्समुच्चयः। तत्र आदिना एतस्यापि परिग्रहः। एवं च सर्वं मूलमुपलक्षणमिति स्वयमेव सूचितमिति न दोषः।

३। अत एवाह * नारदेनापीति। * साहसस्य, तत्सामान्यस्य। बलस्य दर्पो गर्वः स सञ्जातो येषां तैः। ननु सहसा कृतं साहसमिति योगमात्रलब्धं तत्सामान्यलक्षणं चौर्यादिष्वविशिष्टमिति तेष्वेवान्तर्भावादस्य प्रकरणस्य पृथगुक्तिरयुक्तेत्यत आह * तदिदमिति। पूर्वोक्तं साहससामान्यलक्षणमित्यर्थः। * व्यासक्तमपि, सम्बद्धमपि। बलसम्बन्धिदर्पस्यावष्टम्भरूपोपाधितो भिद्यते इत्यर्थः। नन्वेवं किमित्येवं भेदाङ्गीकारः, अत आह * दण्डेति। तद्भेदस्य शास्त्रकृद्भिः प्रति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पादनादित्यर्थः । यद्यपीदं प्रागुक्तसामान्यलक्षणं तत्र सर्वत्रानुस्यूतं तथापि तादृशावान्तरोपाधिभेदाद्भिन्नमिति तद्घटितविशेषलक्षणेन लक्षितमत्र साहसपदवाच्यमिति रूढमपि । तत्र तु शुद्धयौगिकमिति भावः ।

४ । यदि तु तत्साधारणं लक्षणमपीष्टं तर्हि योगमात्रलब्धं तदप्यस्तु, प्रकरणभेदस्तूक्तनिमित्तकः, तदा चौर्यादिष्वपि विशेषलक्षणानि वक्ष्यमाणानि बोध्यानि । बलदर्पयोरवष्टम्भयोरुपाधित्वमिति व्याख्यानं तु बलावष्टम्भेनेतिव्याख्याविरोधात् सहो बलमितिनारदविरोधाच्चोपेक्ष्यम् ।

५ । तदेतत् ध्वनयन्नेवाह * तस्य चेति । साहसविशेषस्येत्यर्थः । * प्रथमादीति । प्रथमसाहसमध्यमसाहसोत्तमसाहसभेदेनेत्यर्थः । एतानि कर्मनामानि न तु दण्डस्येति बोध्यम् । * तल्लक्षणं, तेषां त्रयाणां लक्षणानि । जातावेकवचनम् । * तेनैव, नारदेनैव । * तत्पुनः, तत्तु । शास्त्रेष्वित्युत्तरान्वयि । * तस्य, त्रिविधस्य । क्षेत्रोपकरणं तत्सामग्री । एवमग्रेऽपि । भङ्गो भञ्जनम् । आक्षेपो दोषोत्पादः । उपमर्दो म्लानतापादनम् । आद्यशब्देन छेदनादिकम् । वासो वस्त्रम् । पूर्वनिपातप्रकरणस्यानित्यत्वान्न दोषः । * एतेनैवेति । प्रागुक्तभङ्गादिनैवेत्यर्थः । व्यापादो मारणम् । *प्राणोपरोधीति । तन्नाशकमित्यर्थः । *तस्य, त्रिविधस्य । क्रिया करणं कर्मेति यावत् । तदपेक्षः प्रथमसाहसादिरूपकर्मापेक्षः, न तद्विरुद्धः । तदेव विविच्याह * प्रथमस्येति । पञ्चशतेति बहुव्रीहिः । तृतीये अन्यदप्याह * वध इति । उत्तमसाहसे इति सप्तम्यन्तपाठः । कर्मनामेदम् । व्याख्यातमिदं प्राक् ।

६ । सहस्रावरदण्डस्य नियतत्वेऽप्यग्रे कथमिति शङ्कानिरासायोक्तमेव ध्वनयन्व्यवस्थामाह * वधादयइति । * स-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मस्ता, मिलिताः । * व्यस्ता, भिन्नाः ।

उ. ७। एवं स्मृत्यन्तरोक्तं विशेषमुक्त्वा तत्सङ्गत्या प्रकृतमवतारयति * तत्रेति । तेषां मध्ये इत्यर्थः । आदिना सामान्यद्रव्यपरिग्रहः । अत एव तच्छब्दस्य प्रक्रान्तपरामर्शित्वात्तस्येत्यस्योभयसंग्रहार्थमाह * अपहृतद्रव्यस्येति । अत्र साहसं कृत्वेत्यनेन सूचितं, निह्नवानन्तरं साक्ष्यादिभिर्भावितोऽपि यदि पुनस्तथैव करोति स चतुर्गुणदण्डार्हो न निह्नवमात्रेणेति ।

८। ननु प्रथमसाहसादिषु नारदेन शतावरादयो दण्डा उक्ताः, मूले तु द्विगुणचतुर्गुणावुक्ताविति मिथो विरोधादप्रामाण्यम् । पाक्षिकं प्रामाण्यं तु विकल्पस्याष्टदोषदुष्टत्वादयुक्तम् । अत आह *एतस्मादेवेति । मूलोक्तादेवेत्यर्थः। *विधानं, नारदीयम् । *अपहारद्रव्येति । अपह्रियमाणद्रव्येत्यर्थः। अपहारव्यतिरिक्तेति पाठस्तु सुगम एव । द्रव्यापहारव्यतिरिक्तेति पाठान्तरम् । अत्र विशेषसामान्यपदोल्लेखेन तक्रकौण्डिन्यन्यायविषयता सूचिता । तथा च नाप्रामाण्यं, नापि विकल्पः, किं तु विशेषस्य सामान्यापवादकत्वेनापहाररूपाविषयाविशेषे द्वैगुण्यादिविधायकेनानेन विशेषवाक्येन सामान्यतो विधायकं नारदीयं बाध्यते इति भावः ॥ २३० ॥

मि० अव. साहसिकस्य प्रयोजयितारं प्रत्याह ।

या० यः साहसं कारयति स दाप्यो द्विगुणं दमम् ।
यश्चैवमुक्त्वाऽहं दाता कारयेत्स चतुर्गुणम् ॥ २३१ ॥

मि० यस्तु साहसं कुर्वित्येवं वाचैव कारयति असौ साहसिकाद्दण्डात् द्विगुणं दण्डं दाप्यः।यः पुनः "अहं तुभ्यं धनं दास्यामि त्वं कुरु" इत्येवमुक्त्वा साहसं कारय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ति स चतुर्गुणं दण्डं दाप्योऽनुबन्धातिशयात् ॥२३१॥

बा० १ । साहसं विद्यते यस्य स साहसिकः । अत इनिठनौ इति ठन् । तस्य । *प्रयोजयितारं, द्विविधं प्रति । एवेनार्थदानव्यवच्छेदः । अत एवापौनरुक्त्यम् । साकाङ्क्षत्वात्प्रत्यासत्तेराह * साहसिकेति । पूर्वोक्तादित्यर्थः । दातेति तृजन्तस्य । भावित्वाद्भविष्यामीत्यध्याहारः । तत्फलितमाह * दास्यामीति । यद्वा भविष्यत्सामान्ये व्यत्ययेन लुट् । न्यूनतां निराचष्टे * त्वमिति । लिङर्थोऽविवक्षित इत्याह * कारयतीति । एवमग्रे सर्वत्र बोध्यम् । तत्र हेतुमाह * अनुबन्धेति । दोषाधिक्यादित्यर्थः ॥ २३१ ॥

मि० अथ साहसिकविशेषं प्रत्याह ।

या० अर्घ्याक्रोशातिक्रमकृद् भ्रातृभार्याप्रहारदः ।
संदिष्टस्याप्रदाता च समुद्रगृहभेदकृत् ॥ २३२ ॥
सामन्तकुलिकादीनामपकारस्य कारकः ।
पञ्चाशत्पणिको दण्ड एषामिति विनिश्चयः ॥ २३३॥

मि० अर्घ्यस्यार्घार्हस्याचार्यादेराक्षेपमाज्ञातिक्रमं च यः करोति, यश्च भ्रातृभार्यां ताडयति, तथा संदिष्टस्य प्रतिश्रुतस्यार्थस्याप्रदाता, यश्च मुद्रितगृहमुद्घाटयति, तथा स्वगृहक्षेत्रादिसंसक्तगृहक्षेत्रादिस्वामिनां, कुलिकानां स्वकुलोद्भवानाम्, आदिग्रहणात् स्वग्रामस्वदेशीयानां च योऽपकर्ता-ते सर्वे पञ्चाशत्पणपरिमितेन दण्डेन दण्डनीयाः ॥ २३२ ॥ २३३ ॥

बा० १ । अर्घ्ये पादार्घाभ्यां चेति यत् । अर्घ्यस्याक्रोशातिक्रमौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

करोतीति समासः। तदाह * अर्घ्यस्यार्घार्हस्येति। तस्य सापेक्षत्वादन्यार्थे पूर्वेण सिद्धत्वाच्चाह * आज्ञेति । नात्र भेदो विदारणम् । समुद्रेत्यस्य वैयर्थ्यापत्तेः। तत्र दण्डान्तरविधानाच्च। अत आह *उद्घाटयतीति । सामन्तपदार्थमाह * स्वगृहेति। कुलिके अत इनीति ठन्। तत्फलितमाह * स्वेति। * ते सर्वे इति। प्रत्येकमिति भावः ॥ २३२ ॥ २३३ ॥

मि० अव. किंच।

या० स्वच्छन्दं विधवागामी विक्रुष्टे नाभिधावकः।
अकारणे च विक्रोष्टा चण्डालश्चोत्तमान् स्पृशेत्॥२२४॥
शूद्रप्रव्रजितानां च दैवे पित्र्ये च भोजकः।
अयुक्तं शपथं कुर्वन्नयोग्यो योग्यकर्मकृत् ॥ २३५॥
वृषक्षुद्रपशूनां च पुंस्त्वस्य प्रतिघातकृत्।
साधारणस्यापलापी दासीगर्भविनाशकृत् ॥ २३६ ॥
पितापुत्रस्वसृभ्रातृदम्पत्याचार्यशिष्यकाः।
एषामपतितान्योन्यत्यागी च शतदण्डभाक् ॥ २२७ ॥

मि० नियोगं विना यः स्वेच्छया विधवां गच्छति। चौरादिभयाकुलैर्विक्रुष्टे यः शक्तोऽपि नाभिधावति। यश्च वृथाऽऽक्रोशं करोति। यश्चण्डालो ब्राह्मणादीन् स्पृशति। यश्च शूद्रप्रव्रजितान् दिगम्बरादीन् दैवे पित्र्ये च कर्मणि भोजयति। यश्चायुक्तं मातरं ग्रहीष्यामीत्येवं शपथं करोति। तथा यश्च अयोग्य एव शूद्रादिर्योग्यकर्माध्ययनादि करोति। वृषो बलीव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दं, क्षुद्रपशवोऽजादयः, तेषां पुंस्त्वस्य प्रजननशक्तेर्विनाशकः। वृक्षक्षुद्रपशूनामिति तु पाठे हिङ्ग्वाद्यौषधप्रयोगेण वृक्षादेः फलप्रसूनानां पातयिता। साधारणद्रव्यस्य वञ्चकः। दासीगर्भस्य पातयिता च। येच पित्रादयोऽपतिता एव सन्तोऽन्योन्यं त्यजन्ति। ते सर्वे प्रत्येकं पणशतं दण्डार्हा भवन्ति ॥ २३४ ॥ २३५ ॥ २३६ ॥ २३७ ॥

इति साहसप्रकरणम्।

बा० १। * किं चेति। साहासिकविशेषान्तरं प्रत्यन्यदप्याहेत्यर्थः। स्वच्छन्दामिति क्रियाविशेषणम्। तदर्थमाह * नियोगमिति। ताच्छील्ये णिनिस्तत्र। * विक्रुष्टे, महता शब्देनाहते। * शक्तोपीऽति। तन्निवारणे इत्यादिः। एतेनाशक्तस्य दण्डाभावस्तथा अकुर्वतः सूचितः। अपिर्विरोधे ऽनौचित्ये वा, न तु समुच्चये। अकारणे इत्यस्यार्थो * वृथेति। अत्र विक्रोशो निन्देत्याह * आक्रोशमिति। शूद्राः सन्तः प्रव्रजिताः। शूद्रप्रव्राजितानामित्येकम्। तदाह * दिगम्बरादीनिति। * तु पाठे, पाठेतु। * फलेति। तथा च प्रजननशक्तेर्नाशेन वन्ध्यता तेषां सम्पन्नेति भावः। एषां पित्रादीनां मध्ये ऽपतितम् अन्योन्यं मिथस्त्यजतीति शाब्दोऽर्थः। तत्फलितमाह * पित्रादयइति ॥ २३४ ॥ २३५ ॥ २३६ ॥ २३७ ॥

इति साहसप्रकरणम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि० अव. साहसप्रसङ्गात्तत्सदृशापराधेषु निर्णेजकादीनां दण्डमाह ।

या० वसानस्त्रीन्पणान् दण्डयो नेजकस्तु परांशुकम् ।
विक्रयावक्रयाधानयाचितेषु पणान्दश ॥ २३८ ॥

मि० नेजको वस्त्रस्य धावकः । स यदि निर्णेजनार्थं समर्पितानि वासांसि स्वयमाच्छादयति तदाऽसौ पणत्रयं दण्ड्यः । यः पुनस्तानि विक्रीणीते, अवक्रयं वा "एतावत्कालमुपभोगार्थं वस्त्रं दीयते मह्यमेतावद्धनं देयम्" इत्येवं शाटकं यो ददाति, आधित्वं वा नयति, स्वसुहृद्भ्यो याचितं वा ददाति, असौ प्रत्यपराधं दश पणान् दण्डनीयः ।

तानि च वस्त्राणि श्लक्ष्णशाल्मलफलके क्षालनीयानि न पाषाणे, न च व्यत्यसनीयानि, न च स्वगृहे वासयितव्यानि । इतरथा दण्ड्यः ।

(अ. ८ श्लो. ३९६) ।

शाल्मले फलके श्लक्ष्णे नेनिज्यान्नेजकः शनैः ।
न च वासांसि वासोभिर्निर्हरेन्न च वासयेत् ॥

इति मनुस्मरणात् । यदा पुनस्तानि प्रमादान्नाशयति तदा—

नारदेनोक्तं द्रष्टव्यम्, (व्यव. ९ श्लो. ८।९)

मूल्याष्टभागो हीयेत सकृद्धौतस्य वाससः ।
द्विः पादस्त्रिस्तृतीयांशश्चतुर्द्धौतेऽर्द्धमेव च ॥
अर्द्धक्षयात्तु परतः पादांशापचयः क्रमात् ।
यावत्क्षीणदशं जीर्णं जीर्णस्यानियमः क्षये ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अष्टपणक्रीतस्य सकृद्धौतस्य वस्त्रस्य नाशितस्याष्टमभागोनं पणन्यूनं मूल्यं देयम्। द्विर्धौतस्य तु पादोनम् पणद्वयन्यूनम्। त्रिर्धौतस्य पुनस्तृतीयांशन्यूनम्। चतुर्धौतस्यार्द्धं पणचतुष्टयं देयम्। ततः परं प्रतिनिर्णेजनमवशिष्टं मूल्यं पादापचयेन देयं यावज्जीर्णम्। जीर्णस्य पुनर्नाशितस्येच्छातो मूल्यदानकल्पनम् ॥ २३८ ॥

बा० १। एतदवान्तरप्रकरणसङ्गतिमाह *साहसेति। * तत्सदृशेति। यथा तेषां समक्षं तत् क्रियमाणं साहसं तथा वस्त्रधावकादिभिरपि सकलजनसमक्षं परवस्त्राच्छादनादि क्रियमाणमिति तस्य तत्सादृश्यात्तत्प्रसङ्गात्तदपराधकर्तॄणां तेषां दण्डमाहेत्यर्थः। नेजको वस्त्रधावकः। आदिना वक्ष्यमाणसर्वपरिग्रहः। अत एव दण्डमिति जातावेकवचनम्। निर्णेजनं प्रक्षालनम्। * अवक्रयमिति। करोतीति शेषः। अवक्रयार्थमाह * एतावदिति। ददातीत्यन्तेन। * इत्येवमिति। सम्भाष्य। *शाटकं, वस्त्रमित्यर्थः। माटकमिति पाठे तत्त्वेनोपलक्षितं वस्त्रमित्यर्थः। तथा च तथा दानमवक्रय इति भावः। अत्र न धनग्रहणमित्याह * स्वेति।

२। विशेषमाह * तानि चेति। शाल्मलेर्विकारादावण्।

पिच्छिला पूरणी मोचा स्थिरायुः शाल्मलिर्द्वयोः। इत्यमरः।

व्यत्यासो विनिमयः। * स्वगृहे इति। चिरमिति भावः। एवमग्रेऽपि। *दण्ड्यः, नेजकः। *फलके, पाटीति प्रसिद्धे। *नेनिज्यात्, प्रक्षालयेत्। * निर्हरेत्, विनिमयं प्रापयेत्। *प्रमादादिति। अप्रमादे तु अन्यथा द्रष्टव्यमिति भावः।

३। नारदीयमाश्रितो व्याचष्टे * अष्टपणेति। बहुव्रीहिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मूल्यमन्यपदार्थः। अवधिं विनाऽष्टमांशादितो न्यूनताया दुर्वच-त्वादिङ्मात्रप्रदर्शनायेदमुक्तमिति बोध्यम्। क्षये इति चरमे उक्तेराह * नाशितस्येति। *पणन्यूनं, सप्तपणात्मकम्। धौत-स्येत्यादेरग्रेऽपि सम्बन्धादाह * द्विर्धौतेति। *पादोनं, चतुर्था-शन्यूनम्। तदाह * पणेति। षट्पणात्मकमित्यर्थः। अर्धक्ष-यादिति व्याचष्टे * ततः परमिति। इदं परत इत्यन्तस्य व्याख्यानम्। सार्वविभक्तिकः प्रथमान्तात्तसिः। प्रतिनिर्णेजन-मिति वीप्सायामव्ययीभावः। * अवशिष्टम्, अर्धम्। *अपच-येन, तत्क्रमेण। क्वचित् तथैव पाठः। जीर्णमित्यन्तं पूर्वान्व-यीत्याह * यावज्जीर्णमिति। जीर्णता च दशासु क्षीणासु ज्ञे-येत्येतदर्थं मूले क्षीणदशमित्युक्तम्। अर्धक्षयोत्तरं पञ्चमप्रक्षा-लनादिषु अवशिष्टस्यार्धमूल्यस्य पादपादापचयक्रमेण मूल्यक-ल्पनेति पञ्चमप्रक्षालने पणचतुष्टयात्मकमूल्यादेकपणोनं पण-त्रयात्मकं, षष्ठे तत्र पणत्रयात्तस्मात्पादोनं सपादपणद्वयात्मकं, सप्तमे तत्र सपादपणद्वयात्पादोनं किञ्चिदधिकसार्द्धपणात्मक-मित्यादि बोध्यमिति भावः।

४। जीर्णस्यानियम इति व्याचष्टे * जीर्णस्येति। * अ-नियम इति। अस्य प्राक् वाचनिकनियमाभाव इत्यर्थः। तथा-सति सर्वथा तदभावो नेति ध्वनयितुं नियमपदमूचितमाह *इ-च्छात इति। परीक्षकाणामिच्छात इत्यर्थः। तथा च जीर्णना-शे परीक्षकाणामिच्छैव मूल्यदानकल्पनायां प्रमाणं न प्रागु-क्तवचनप्रवृत्तिर्नापि स्वेच्छाप्रवृत्तिरिति भावः॥ २३८॥

या. पितापुत्रविरोधे तु साक्षिणां त्रिपणो दमः।
अन्तरे च तयोर्यः स्यात्तस्याप्यष्टगुणो दमः॥२३९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि. पितापुत्रयोः कलहे यः साक्ष्यमङ्गीकरोति न पुनः कलहं निवारयति असौ पणत्रयं दण्ड्यः। यश्च तयोः सपणे विवादे पणदाने प्रतिभूर्भवति असौ, चकारात्तयोर्यः कलहं वर्द्धयति सोऽपि त्रिपणादष्टगुणं चतुर्विंशतिं पणान्दण्डनीयः। दम्पत्यादिष्वयमेव दण्डोऽनुसरणीयः ॥ २३९ ॥

बा० १। अथ प्रागुक्तादिशब्दसंग्राह्याणां क्रमेण दण्डानाह *पितेत्यादि । पण्यस्योपरीत्यन्तैः पञ्चदशभिः पद्यैः केवलं तत्साक्षिणो दण्डो नाभिमतः। तथा सति साक्षित्वोच्छेदापत्तेः। तदभावे क्वचित् विवादपरिसमाप्त्यभावापत्तेश्च। किं तु यः कलहनिवारणसमर्थः सन्नपि तमनिवारयन् साक्ष्यमङ्गीकरोति तस्य दण्ड इत्याशयेन व्याचष्टे * पितेति। तथा च न तावन्मात्रं दण्डप्रयोजकं किं तु अन्यदपीत्याह * न पुनः कलहमिति। इदमग्रेऽप्युभयत्र ज्ञेयम्। त्रिपण इति बहुव्रीहिरित्याह * पणत्रयमिति। साकाङ्क्षत्वात्प्रत्यासत्तेराह * त्रिपणादिति। चतुर्विंशतिमिति व्यस्तः पाठः। तुल्यन्यायत्वादाह * दम्पत्यादीति। आदिना गुरुशिष्यादिपरिग्रहः ॥ २३९ ॥

या० तुलाशासनमानानां कूटकृन्नाणकस्य च।
एभिश्च व्यवहर्ता यः स दाप्यो दममुत्तमम् ॥२४०॥

मि० तुला तोलनदण्डः। शासनं पूर्वोक्तम्। मानं प्रस्थद्रोणादि। नाणकं मुद्रादिचिह्नितं द्रम्मनिष्कादि। एतेषां यः कूटकृत देशप्रसिद्धपरिमाणादन्यथा न्यूनत्वमाधिक्यं वा द्रम्मादेरव्यवहारिकमुद्रात्वं वा ताम्रादिगर्भत्वं वा करोति, यश्च एतैः कूटैर्जानन्नपि व्यवहर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ति, तावुभौ प्रत्येकमुत्तमसाहसं दण्डनीयौ ॥ २४० ॥

बा. १ । * पूर्वोक्तं, प्रथमाध्यायान्ते उक्तं राजपत्रम् । द्रम्मनिष्कादयो मूल्याध्यायविवृतौ प्रपञ्चिताः । कूटं कैतवम् । तत्स्वरूपं सर्वत्र क्रमेण प्रतिपादयन् कूटकादिति व्याचष्टे *देशेत्यादि । स्थलत्रये ऽन्यथेत्यन्तं तत्स्वरूपं, तदपि द्वेधेत्याह *न्यूनेति । एवमग्रेऽपि द्वेधेत्याह *द्रम्मादेरिति ।

२ । उत्तरार्धं व्याचष्टे * यश्चैतैरिति । * कूटैरिति । अर्शआद्यच् । पूर्वोक्तैः कूटकाद्भिरित्यर्थः । जानन्नित्यनेनाज्ञानतो व्यवहारे दण्डाभावः सूचितः । व्यवहारमात्रं न तावद्दण्डप्रयोजकं, दोषस्य स्वल्पत्वादिति जानन्नित्युक्तमिति बोध्यम् ॥२४०॥

मि० अव० नाणकपरीक्षिणं प्रत्याह ।

या० अकूटं कूटकं ब्रूते कूटं यश्चाप्यकूटकम् ।
स नाणकपरीक्षी तु दाप्य उत्तमसाहसम् ॥२४१॥

मि० यः पुनर्नाणकपरीक्षी ताम्रादिगर्भमेव द्रम्मादिकं सम्यगिति ब्रूयात्, सम्यञ्चं वा कूटकमिति, असावुत्तमसाहसं दण्ड्यः ॥ २४१ ॥

बा. १। *परीक्षिणं, परीक्षकम् । दण्डमिति शेषः । * कुर्यादिति । ब्रूयादित्यर्थः । क्वचित्तथैव पाठः । उभयत्र स्वार्थे कन् । सनाणकेत्यस्य सान्निध्याद् व्युत्क्रमेण व्याचष्टे * ताम्रादीति । इतीत्यस्य उभयत्र ब्रूयादिति शेषः ॥ २४१ ॥

मि० अव० चिकित्सकं प्रत्याह ।

या० भिषङ् मिथ्याऽऽचरन्दण्ड्यस्तिर्यक्षु प्रथमं दमम् ।
मानुषे मध्यमं राजपुरुषेषूत्तमं दमम् ॥ २४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि० यः पुनर्भिषक् मिथ्या आयुर्वेदानभिज्ञ एव जीवनार्थं चिकित्सितज्ञोऽहमिति तिर्यङ्मनुष्यराजपुरुषेषु चिकित्सामाचरति असौ यथाक्रमेण प्रथममध्यमोत्तमसाहसान् दण्डनीयः।

तत्रापि तिर्यगादिषु मूल्यविशेषेण वर्णविशेषेण राजप्रत्यासत्तिविशेषेण दण्डस्य लघुगुरुभावः कल्पनीयः ॥ २४२ ॥

बा. १। त्रितयं सहैव लाघवेन व्याचष्टे * यः पुनरिति। मिथ्याऽऽचरन्नित्याद्यर्थं सहेतुकमाह * जीवनेति। जीवनार्थमित्यस्य अग्रिमे चिकित्सामाचरतीत्यत्रान्वयः। इतीत्यस्य ब्रुवन् इति शेषः। तिर्यञ्चः पशुपक्ष्यादयः।

२। विशेषमाह * तत्रापीति। उक्तदण्डेष्वपीत्यर्थः। त्रिषु यथाक्रमेणाह * मूल्येत्यादि। तिर्यक्षु मूल्यविशेषेण, मानुषेषु ब्राह्मणत्वादिवर्णविशेषेण, राजपुरुषेषु तत्प्रत्यासत्तिविशेषेण दण्डस्य लघुत्वं गुरुत्वं च कल्पनीयमित्यर्थः। विशेषशब्दा भेदपराः ॥ २४२ ॥

या० अबन्ध्यं यश्च बध्नाति बद्धं यश्च प्रमुञ्चति।
अप्राप्तव्यवहारं च स दाप्यो दममुत्तमम् ॥२४३॥

मि० यः पुनर्बन्धनानर्हमनपराधिनं राजाज्ञया विना बध्नाति, यश्च बद्धं व्यवहारार्थमाहूतम् अनिर्वृत्तव्यवहारं चोत्सृजति असौ उत्तमसाहसं दाप्यः ॥ २४३ ॥

बा. १। अनर्हत्वे हेतुं सूचयन्नाह * अनपराधिनमिति। अत एवाह * राजेति। अस्यानुषङ्गेणाग्रे उभयत्र मुख्य उपयोग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति तत्त्वम् । प्रमुञ्चतीत्यस्य मध्यमणिन्यायेनोभयत्रान्वय इत्याह * यश्च बद्धमिति । अप्राप्तव्यवहारमित्यस्यार्थमाह * अनिर्वृत्तेति ॥ २४३ ॥

या० मानेन तुलया वाऽपि योंऽशमष्टमकं हरेत् ।
दण्डं स दाप्यो द्विशतं वृद्धौ हानौ च कल्पितम्॥२४४॥

मि० यः पुनर्वाणिक् व्रीहिकार्पासादेः पण्यस्याष्टमममंशं कूटमानेन कूटतुलया वा अन्यथा वा अपहरति असौ पणानां द्विशतं दण्डनीयः। अपहृतस्य द्रव्यस्य पुनर्वृद्धौ हानौ च दण्डस्यापि वृद्धिहानी कल्प्ये ॥ २४४ ॥

बा. १ । * पण्यस्य, विक्रेयस्य । योग्यतयाऽऽह * कूटेति । अपिसमुच्चेयमाह * अन्यथावेति । मूले द्विशतमिति बहुव्रीहिः । दण्डः अन्यपदार्थः । तत्फलितमाह * पणानां द्विशतमिति । अत्रापि बहुव्रीहिरेव, समूहोऽन्यपदार्थ इति विशेषः ।
२ । तुर्यपादं व्याचष्टे * अपहृतस्येति । कूटमानादिनाऽपहृतस्य अष्टमांशादप्यधिकत्वे न्यूनत्वे वा दण्डद्रव्यस्यापि द्विशताद् वृद्धिर्हानिश्च कल्प्येत्यर्थः ॥ २४४ ॥

या० भेषजस्नेहलवणगन्धधान्यगुडादिषु ।
पण्येषु प्रक्षिपन् हीनं पणान् दाप्यस्तु षोडश॥२४५॥

मि० भेषजमौषधद्रव्यम् । स्नेहो घृतादिः । गन्धद्रव्यमुशीरादि । आदिशब्दाद्धिङ्गुमरीचादि । एतेषु असारद्रव्यं विक्रयार्थं मिश्रयतः षोडशपणो दण्डः॥२४५॥

बा. १। भेषजेति द्वंद्वे गतिः प्राग्वत् । गन्धशब्दोऽत्र तादृश-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्रव्यवाची न तु गुणमात्रवाची, वहति जलमियं पिनष्टि गन्धा-नित्यादिप्रयोगादित्याह * गन्धद्रव्यमिति । तद्विशिष्टं द्रव्यमि-त्यर्थः । हीनपदार्थमाह * असारेति ॥ २४५ ॥

मि० अव० किञ्च ।

या० मृच्चर्ममणिसूत्रायःकाष्ठवल्कलवाससि ।
अजातौ जातिकरणे विक्रेयाष्टगुणो दमः ॥ २४६ ॥

मि० न विद्यते बहुमूल्या जातिर्यस्मिन्मृच्चर्मादिके तदजाति तस्मिन् जातिकरणे विक्रयार्थं गन्धवर्णर-सान्तरसञ्चारणेन बहुमूल्यजातीयसादृश्यसम्पादने। यथा मल्लिकामोदसञ्चारेण मृत्तिकायां सुगन्धामल-कमिति । मार्जारचर्मणि वर्णोत्कर्षापादनेन व्याघ्र-चर्मेति । स्फटिकमणौ वर्णान्तरकरणेन पद्मराग इति। कार्पासिके सूत्रे गुणोत्कर्षाधानेन पट्टसूत्रमिति । कार्ष्णायसे वर्णोत्कर्षाधानेन रजतमिति । बिल्वकाष्ठे चन्दनामोदसञ्चारणेन चन्दनमिति । वल्कले कङ्कोले त्वगाण्ध्यं लवङ्गमिति । कार्पासिके वाससि गु-णोत्कर्षाधानेन कौशेयमिति । विक्रेयस्यापादितसा-दृश्यस्य मृच्चर्मादेः पण्यस्याष्टगुणो दण्डो वे-दितव्यः ॥ २४६ ॥

बा. १ । * किं चेति । ईदृशो विषयोऽन्योऽप्युच्यते इत्य-र्थः । मूले वाससीति सप्तम्यन्तं, समाहारद्वंद्व इत्याह * न वि-द्यते इति । जातिरुत्कर्ष इत्याह * बह्विति । * तस्मिन्निति । जातिशून्यमृदादिके इत्यर्थः । तृतीयादिष्विति पुंवद्भावान्नुम्ने-ति भावः । जातिकरणे इत्यस्य मुख्यजातेस्तत्र ब्रह्मणाऽपि दु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्करत्वात् सहेतुकमर्थमाह *विक्रयार्थमित्यादिना संपादने इत्यन्तेन । गन्धेत्यादिः द्वंद्वगर्भो मयूरव्यंसकादिः । जातीयस्य सादृश्येत्यर्थः । उक्तमेवोदाहरणतो विशदयति * यथेत्यादि । तदेकान्तत्वाभावात्सुगन्धेत्यत्र इत्वं न । आमलकं मृत्तिकाया एव बोध्यम् । गुणोत्कर्षेत्यर्थः । क्वचित्तथैव पाठः । एवमग्रेऽपि। * कार्ष्णायसेइति । कृष्णायसो विकारादावित्यर्थः । पुनर्गन्धोदाहरणमाह * बिल्वेति। रसोदाहरणमाह * कङ्कोले इति। प्रसिद्धदेवकुसुमव्यावृत्तये आह * त्वगिति । तद्रसमध्ये तन्निक्षेपेण तद्रसाभिव्यक्तेरिति भावः। पुनर्वर्णस्योदाहरणमाह * कार्पासिकेइति । तत्सूत्रनिर्मिते इत्यर्थः । विक्रेयेत्यस्य व्याख्या *पण्यस्येति । तत्स्वरूपमाह *आपादिते इति । वर्णान्तराद्यापादनेनापादितपद्मरागाद्यात्मकस्य स्फटिकादेरित्यर्थः । यन्मूल्यं तस्मादिति शेषः ॥ २४६ ॥

या० समुद्गपरिवर्तंच सारभाण्डं च कृत्रिमम् ।
आधानं विक्रयं वाऽपि नयतो दण्डकल्पना ॥ २४७ ॥
भिन्ने पणे तु पञ्चाशत् पणे तु शतमुच्यते ।
द्विपणे द्विशतो दण्डो मूल्यवृद्धौ च वृद्धिमान् ॥२४८॥

मि० मुद्गं पिधानं मुद्गेन सह वर्तते इति समुद्गं करण्डकं, परिवर्तनं व्यत्यासः। योऽन्यदेव मुक्तानां पूर्णं करण्डकं दर्शयित्वा हस्तलाघवेनान्यदेव स्फटिकानां पूर्णं करण्डकं समर्पयति, यश्च सारभाण्डं कस्तूरिकादिकं कृत्रिमं कृत्वा विक्रयमाधिं वा नयति, तस्य दण्डकल्पना वक्ष्यमाणा वेदितव्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृत्रिमककस्तूरिकादेर्मूल्यभूते पणे भिन्ने न्यूने न्यूनपणमूल्ये इति यावत् । तस्मिन् कृत्रिमे विक्रीते पञ्चाशत्पणो दण्डः । पणमूल्ये पुनः शतम् । द्विपणमूल्ये द्विशतो दण्ड इत्येवं मूल्यवृद्धौ दण्डवृद्धिरुन्नेया ॥ २४७ ॥ २४८ ॥

बा० १ । *करण्डकमिति । समुद्गकः संपुटक इत्यमरः । महाभाष्ये तु "नैतत् उब्जे रूपं किं तूपसर्गद्वयपूर्वकाद्गमेरन्येष्वपीति ड" इत्युक्तम् । परिवर्ते भावे क्त इत्याह * परीति । परिवर्तं चेत्यस्यापि नयति इत्यत्रान्वयः । अतस्तात्पर्यार्थमाह * योऽन्यदेवेति । अन्यदेवेत्यस्य व्याख्या * मुक्तानां पूर्णमिति । शेषे षष्ठी । एवमग्रेऽपि । सारभाण्डमित्यस्य सरभाख्यपश्वण्डोद्भवमित्यर्थः । तदाह * कस्तूरीति । अर्थाच्छेषमाह * कृत्वेति । * वक्ष्यमाणेति । भिन्ने पणे त्वित्यनेनैवेति भावः ।

२ । तामेव कथयन् तत्पद्यमुक्तरीत्योक्तव्युत्क्रमेण व्याचष्टे *कृत्रिमेति । आदिना तत्परिवर्तग्रहः । * मूल्येति । वस्तुत इति भावः । भिन्नत्वमन्यत्वम् । तच्च द्वेधा । तत्र वृद्धेर्वक्ष्यमाणत्वादाह * न्यूने इति । तात्पर्यार्थमाह * न्यूनेति । बहुव्रीहिः । एवमग्रेऽपि । तदाह * तस्मिन्निति । तादृशे इत्यर्थः । पञ्चाशत्पणेति बहुव्रीहिः । वाच्यार्थस्योक्तत्वात्तात्पर्यार्थमाह * पणेति । एवमग्रेऽपि । द्विपणमूल्ये इति बहुव्रीहिगर्भो बहुव्रीहिः ।

३ । अनेनैव वृद्धेरुक्तत्वात्तुर्यपादवैयर्थ्यं परिहरति *इत्येवमिति । अनेन प्रकारेणेत्यर्थः । तथा चाधिकसंग्रहार्थं तदिति भावः ॥ २४७ ॥ २४८ ॥

या० संभूय कुर्वतामर्घं साबाधं कारुशिल्पिनाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्घस्य ह्रासं वृद्धिं वा जानतां दम उत्तमः ॥२४९॥

मि० राजनिरूपितार्घस्य ह्रासं वृद्धिं वा जानन्तोऽपि वणिजः संभूय मिलित्वा कारूणां रजकादीनां शिल्पिनां चित्रकारादीनां साबाधं पीडाकरमर्घान्तरं लाभलोभात्कुर्वन्तः पणसहस्रं दण्डनीयाः ॥ २४९ ॥

बा० १ । * वणिज इति । समुदितान्प्रतीत्यर्थः । दोषस्य समुदायनिष्ठत्वात् । पूर्वं तु प्रत्येकं प्रति तद्दोषेणोक्तमिति ततोऽस्य भेदः । वक्ष्यमाणोक्तेराह * राजेति । आबाधजनकत्वात्साबाधत्वमित्याह * पीडेति । उक्तहेतोरेवार्घमित्यस्यार्थमाह *अर्घान्तरमिति । तत्करणे बीजमाह * लाभेति । यद्यपि मूलमते ऽशीत्यधिकसहस्रपणात्मक उत्तमसाहसस्तथापि विहिते इति वक्ष्यमाणोक्तेः— (अ. ८ । १३८)

पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः ।
मध्यमः पञ्च विज्ञेयः सहस्रं त्वेव चोत्तमः ॥

इतिमन्वनुरोधेन चाह * पणेति ॥ २४९ ॥

मि० अव० किञ्च ।

या० सम्भूय वणिजां पण्यमनर्घेणोपरुन्धताम् ।
विक्रीणतां च विहितो दण्ड उत्तमसाहसः ॥२५०॥

मि० ये पुनर्वणिजो मिलित्वा देशान्तरादागतं पण्यमनर्घेण हीनमूल्येन प्रार्थयमाना उपरुन्धन्ति महार्घेण वा विक्रीणते तेषामुत्तमसाहसो दण्डो विहितो मन्वादिभिः ॥ २५० ॥

बा० १ । समुदितान्प्रत्येवान्यदप्युच्यतइत्याह * किं चेति । अर्थादाह * देशान्तरादिति । अनर्घेणेत्यत्र नञ् अल्पा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्थे इत्याह * हीनेति। * प्रार्थयमानाः, सन्तः। * उपरुन्धन्ति, प्रतिबद्धविक्रयकं कुर्वन्ति। यथास्थितविक्रये दोषाभावादाह * महेति ॥ २५० ॥

मि० केन पुनरर्घेण वर्तितव्यमित्यत आह।

या० राजनि स्थाप्यते योऽर्घः प्रत्यहं तेन विक्रयः।
क्रयो वा निःस्रवस्तस्माद्वणिजां लाभकृत्स्मृतः॥२५१॥

मि० राजनि संनिहिते सति यस्तेनार्घः स्थाप्यते निरूप्यते तेनार्घेण प्रतिदिनं क्रयो विक्रयो वा कार्यः। निर्गतः स्रवो निःस्रवोऽवशेषः। तस्मात् राजनिरूपितार्घाद्यो निःस्रवः स एव वाणिजां लाभकारी न पुनः स्वच्छन्दपरिकल्पितात्। मनुना चार्घकरणे—
विशेषो दर्शितः, (अ. ८ श्लो. ४०२)
पञ्चरात्रे पञ्चरात्रे पक्षे मासे तथा गते।
कुर्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृपः॥
इति॥ १५१॥

बा० १। *वर्तितव्यं, व्यवहर्त्तव्यम्। राजनि इति वटे गाव इतिवत्सामीपिकमधिकरणमित्याह *संनिहिते इति। अर्थादाह * यस्तेनेति। राज्ञेत्यर्थः। प्रत्यहमिति शेषः। मूले तस्योभयान्वयित्वात्। स्रवान्निवर्तते इति नार्थः, तस्मादित्यस्यानन्वयापत्तेः। अत आह *निर्गत इति। स्रवपदार्थः *अवशेष इति। अत एवाह * तस्मादिति। मौलस्यार्थो *राजेति। तात्पर्यं सर्वमिति न्यायेनाह * स एवेति। एवव्यवच्छेद्यमाह * न पुनरिति। वणिगिच्छाकल्पितार्घादवशेष इत्यर्थः।

२। मनुविरोधपरिहारं स्पष्टत्वात् हृद्येवानुसन्दधान आ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह * मनुनेति । चस्त्वर्थे । * पञ्चरात्रे इति । तथेत्यनेन अग्रेऽप्युभयत्र वीप्सा सूचिता । तथा चास्थिरार्घाणां पञ्चसु दिनेषु गतेषु, किञ्चित्स्थिरार्घाणां पक्षे गते, स्थिरार्घाणां मासे गते सति राजा आप्तपुरुषैः एषामर्घविदां वणिजां प्रत्यक्षं स्वसमक्षमित्यादि तद्व्याख्यातारः ।

३ । एषां पूर्वोक्तानां सर्वपण्यानामर्घस्य व्यवस्थापनं प्रत्यक्षं स्वसमक्षं स कुर्यादित्यर्थ इत्यन्ये । (अ. ८ । ४०३)

तुलामानं प्रतीमानं सर्वं च स्यात्स्वलक्षितम् ।
षट्सु षट्सु च मासेषु पुनरेव परीक्षयेत् ॥

इत्यपि तेनोक्तम् । पक्षे पक्षे ऽथ वा गते इति पाठान्तरं व्याख्याकृदादिसम्मतम् । अत्र वीप्सया दशसु दिनेषु मासे वा गते इति नार्थः, किं तु पञ्चदिनानन्तरं पक्षानन्तरमित्येवम् । वीप्सा तु अवश्यकर्तव्यतया यावज्जीवं कर्तव्यतया च नित्यतां बोधयति "वसन्ते वसन्ते ज्योतिषा" इतिवदिति भावः ॥२५१॥

मि० किञ्च ।

या० स्वदेशपण्ये तु शतं वणिग्गृह्णीत पञ्चकम् ।
दशकं परदेश्ये तु यः सद्यः क्रयविक्रयी ॥ २५२ ॥

मि० स्वदेशप्राप्तं पण्यं गृहीत्वा यो विक्रीणीते असौ पञ्चकं शतं, पणशते पणपञ्चकं लाभं गृह्णीयात् । परदेशात्प्राप्ते पुनः पण्ये शतपणमूल्ये दश पणान् लाभं गृह्णीयात्—यस्य पण्यस्य ग्रहणदिवस एव विक्रयः संपद्यते । यः पुनः कालान्तरे विक्रीणीते तस्य कालोत्कर्षवशाल्लाभोत्कर्षः कल्प्यः ।

एवं च यथाऽर्घे निरूपिते पणशते पञ्चपणो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लाभो भवति तथैवार्घो राज्ञा स्वदेशपण्यविषये स्थापनीयः ॥ २५२ ॥

बा० १ । पूर्वोत्तरयो राजधर्मत्वेन मध्यमस्य असम्बद्धत्वादप्रामाण्यनिरासायाह * किं चेति । अर्घकरणे विशेषान्तरमाहेत्यर्थः । स्वदेशेत्यत्र अर्शआद्यच् । तदाह * स्वेति । बहुव्रीहिर्वा । स्वदेश्येति पाठस्तु सुगमः । ततः तत्र भव इत्यर्थे दिगादित्वाद्यत् । एवमग्रेऽपि । शतमित्यस्य प्रतीति शेषः । तत्फलितमाह * पणशते इति । परदेश्ये शाब्दोऽर्थ उक्तः । तत्फलितमाह * प्राप्ते इति । परदेशात्प्राप्ते पण्येत्वित्यर्थः । शतेति त्रिपदो बहुव्रीहिः । तुर्यपादोक्तमुभयोः शेष इत्याह * यस्येति । वणिज इत्यर्थः । एतेन य इति व्याख्यातम् । क्रयेत्यत्र द्वन्द्वान्मत्वर्थे इनिरित्याह *पण्यस्येति । सद्यःपदार्थो * दिवसेइति । एतत्फलितं वक्ष्यमाणरीत्याऽऽह * यः पुनरिति ।

२ । नन्वत्र वणिग्धर्मस्योक्तत्वेन राजानं प्रत्यनुक्तत्वात्किंचेत्यसङ्गतिः, मध्येऽसम्बद्धत्वापत्तिश्च, अत आह * एवं चेति । उक्तार्थस्य शाब्दत्वे चेत्यर्थः । * यथा, यादृशा । * स्थापनीय इति । फलितमिति शेषः । अन्यथा परदेशविषये वक्ष्यमाणत्वेनात्रानुक्त्या न्यूनतेति भावः ॥ २५२ ॥

मि० परदेश्यपण्येऽर्घनिरूपणप्रकारमाह ।

या० पण्यस्योपरि संस्थाप्य व्ययं पण्यसमुद्भवम् ।
अर्घोऽनुग्रहकृत्कार्यः क्रेतुर्विक्रेतुरेव च ॥ २५३ ॥

मि० देशान्तरादागते पण्ये देशान्तरगमनप्रत्यागमनभाण्डग्रहणशुल्कादिस्थानेषु यावानुपयुक्तोऽर्थस्तावन्तमर्थं परिगणय्य पण्यमूल्येन सह मेलयित्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथा पणशते दशपणो लाभः संपद्यते तथा क्रेतृविक्रेत्रोरनुग्रहकार्यर्घो राज्ञा स्थापनीयः ॥ २५३ ॥

बा० १। तदेवाह * परदेश्येति । यद्यप्यत्र सामान्येनार्घनिरूपणप्रकारः प्रतीयते इतीदमवतरणमयुक्तं तथापि "व्ययं पण्यसमुद्भवम्" इत्युक्तेः परदेशादानीयमानद्रव्यस्यैव बहुव्ययसम्भवात्स्वल्पव्ययनाशे तथाक्षत्यभावात्तत्परत्वमेवास्येत्याह *देशान्तरादित्यादिना । * भाण्डेति । तदुपयोगिपात्रादिग्रहणेत्यर्थः । * अर्थः, द्रव्यव्ययः । द्रव्यं पण्यस्योपरीत्यस्यार्थमाह * पण्यमूल्येनेति । प्रागुक्तैकवाक्यतया ऽऽह * यथेति । अनुग्रहक्वादित्यस्यार्थमाह * अनुग्रहकार्यर्घइति । कार्य इत्यस्यार्थः * स्थापनीय इति ।

मनुरपि, (अ. ८। ४०१)

आगमं निर्गमं स्थानं तथा वृद्धिक्षयावुभौ ।
विचार्य सर्वपण्यानां कारयेत्क्रयविक्रयौ ॥ इति ॥ २५३॥

इति प्रासङ्गिकप्रकरणम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ विक्रीयासंप्रदानप्रकरणम् ॥ २१ ॥

मि० उ. प्रासङ्गिकं परिसमाप्याधुना विक्रीयासंप्रदानं नाम प्रक्रमते ।

तत्स्वरूपं च नारदेनाभिहितम्, (व्यव. ८ । १)
विक्रीय पण्यं मूल्येन क्रेतुर्यन्न प्रदीयते ।
विक्रीयासंप्रदानं तद्विवादपदमुच्यते ॥ इति ।

तत्र विक्रेयद्रव्यस्य चराचरभेदेन द्वैविध्यमभिधाय पुनः षड्विधत्वं—
तेनैव प्रत्यपादि, (व्यव. ८)
लोकेऽस्मिन्द्विविधं पण्यं जङ्गमं स्थावरं तथा ।(श्लो.२)
षड्विधस्तस्य तु बुधैर्दानादानविधिः स्मृतः ।
गणितं तुलितं मेयं क्रियया रूपतः श्रिया ॥ इति ।(३)

गणितं क्रमुकफलादि । तुलितं कनककस्तूरीकुङ्कुमादि । मेयं शाल्यादि । क्रियया वाहदोहादिरूपयोपलक्षितमश्वमहिष्यादि । रूपतः पण्याङ्गनादि । श्रिया दीप्त्या मरकतपद्मरागादीति ॥

मि० एतत्षट्प्रकारकमपि पण्यं विक्रीयासंप्रयच्छतो दण्डमाह ।

या० गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति ।
सोदयं तस्य दाप्योऽसौ दिग्लाभं वा दिगागते ॥२५४॥

मि० गृहीतं मूल्यं यस्य पण्यस्य विक्रेत्रा तद् गृहीतमूल्यं, तद्यदि विक्रेता प्रार्थयमानाय स्वदेशव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णिजे क्रेत्रे न समर्पयति, तच्च पण्यं यदि क्रयकाले बहुमूल्यं सत् कालान्तरेऽल्पमूल्येनैव लभ्यते तदाऽर्घ-ह्रासकृतो य उदयो वृद्धिः पण्यस्य स्थावरजङ्गमात्मकस्य तेन सहितं पण्यं विक्रेता क्रेत्रे दापनीयः।

यदा मूल्यह्रासकृतः पण्यस्योदयो नास्ति, किन्तु क्रयकाले यावदेव यतो मूल्यस्येयत्पण्यमिति प्रतिपन्नं, तदा तत्पण्यमादाय तस्मिन्देशे विक्रीणानस्य यो लाभस्तेनोदयेन सहितं द्विकं त्रिकमित्यादिप्रतिपादितवृद्धिरूपोदयेन वा सहितं क्रेतुर्वाञ्छावशाद्दापनीयः।

यथाह नारदः, (व्यव. ८।५)

अर्घश्चेदवहीयेत सोदयं पण्यमावहेत्।
स्थानिनामेष नियमो दिग्लाभं दिग्विचारिणाम्॥ इति।

यदा त्वर्घमहत्त्वेन पण्यस्य न्यूनभावस्तदा तस्मिन्पण्ये वस्त्रगृहादिके य उपभोगस्तदाच्छादनसुखनिवासादिरूपो विक्रेतुस्तत्सहितं पण्यमसौ दाप्यः।

यथाह नारदः, (व्यव. ८।४)

विक्रीय पण्यं मूल्येन यः क्रेतुर्न प्रयच्छति।
स्थावरस्य क्षयं दाप्यो जङ्गमस्य क्रियाफलम्॥ इति।

विक्रेतुरुपभोगः क्षय उच्यते। क्रेतृसंबन्धित्वेन क्षीयमाणत्वात्। न पुनः कुड्यपातसस्यघातादिरूपः। तस्य तु— (ना. व्यव. ८।६)

उपहन्येत वा पण्यं दह्येतापह्रियेत वा।
विक्रेतुरेव सोऽनर्थो विक्रीयासंप्रयच्छतः॥

इत्यत्रोक्तत्वात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदा त्वसौ क्रेता देशान्तरात्पण्यग्रहणार्थमागतस्तदा तत्पण्यमादाय देशान्तरे विक्रीणानस्य यो लाभस्तेन सहितं पण्यं विक्रेता क्रेत्रे दापयितव्यः।

अयं च क्रीतपण्यसमर्पणनियमोऽनुशयाभावे द्रष्टव्यः। सति त्वनुशये "क्रीत्वा विक्रीय वा किञ्चित्" इत्यादिमनूक्तं वेदितव्यम् ॥ २५४ ॥

बा० १। सङ्गतिमाह * प्रासङ्गिकमिति। विक्रयप्रसङ्गादाह *अधुनेति। *मूल्येन, तस्य ग्रहणेन। क्रेतुरिति सम्बन्धे षष्ठी। एवमग्रेऽपि। * तत्र, प्रारभ्यमाणे विवादपदे। घटकत्वं सम्पर्यर्थः। * चराचरेति। जङ्गमस्थावरेत्यर्थः। * पुनरिति। यथासम्बन्धे षष्ठी। द्विविधस्य तस्येत्यर्थः। * तेनैव, नारदेनैव। * तस्य त्विति। तस्य द्विविधस्य बुधैर्मन्वादिभिर्दानादानयोर्विधिक्रमो विधानक्रमः करणप्रकारो यथासम्भवं षड्विधः कथित इत्यर्थः।

कल्पतरौ तु—

लोके ऽस्मिन् द्विविधं पण्यं जङ्गमं स्थावरं तथा।
क्रयविक्रयधर्मे तु सर्वं तत्पण्यमुच्यते॥

षड्विधस्तस्य तु बुधैर्दानादानविधिः स्मृतः—इति पाठः। तदेवाह * गणितमिति। संज्ञाशब्दा एते। रूपत इति तृतीयान्तात्तसिः। *कर्पूरेति। कुङ्कुमादीति पाठान्तरम्। अनन्वयनिरासायाह * उपलक्षितामिति। एवमग्रेऽपि उभयत्र। पण्याङ्गना वेश्या। आदिना वस्त्रादि। उक्तसङ्गत्या मूलमवतारयति *एतदिति। तस्य तत्त्वेन विवक्षायां षष्ठी तत्रेत्याह * क्रेत्रे इति।

२। तृतीयपादार्थमाह * तच्चेति। अल्पेति कर्मधारयः। अर्घो मूल्यम्। अर्थादाह *पण्यमिति। प्राग्वत् तस्येत्यस्यार्थ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

माह * क्रेत्रे इति ।

३ । तस्यैवान्यथाऽर्थमाह *यदेति। यावदित्यस्य प्रतिपन्नमित्यत्रान्वयः । * यतः, यस्य । * प्रतिपन्नमिति । निश्चितमित्यर्थः । * तावदेवेति । अस्तीति शेषः । "किं तु" इत्यस्यात्रान्वयः । अत्रैव पक्षे उदयांशे पक्षान्तरमाह * द्विकमिति । अनयोर्व्यवस्थामाह * क्रेतृवाञ्छेति । * आवहेत्, दद्यात् । अत्र अवहानिः उक्तस्याप्युपलक्षणम् । * स्थानिनां, स्वदेशमात्रस्थितिकानां वणिजाम् । अत इनीति इनिः । स्थायिनामिति कल्पतरौ पाठः ।

४ । विशेषमाह *यदा त्विति । उपभोगस्वरूपमाह *तदाच्छादनेति । * मूल्येन, तद्ग्रहणेन । * स्थावरस्य, ग्रामक्षेत्रादेः । *जङ्गमस्य, गवादेः । *क्रियाफलं, दोहादेः क्षीरादिकम् ।

५ । यत्तु क्षयं सस्याद्युपघातजापक्षयमिति कल्पतर्वादयः । तन्न । पौनरुक्त्यापत्तेरित्याह * विक्रेतुरिति । ननु तस्य तत्त्वंविरुद्धम्, अत आह * क्रेत्रिति । तावत्पर्यन्तं तत्सम्बन्धस्य तत्र क्षीणत्वात्तद्वैशिष्ट्येन तस्यापि क्षीणत्वमिति भावः । क्षय इत्यत्र कर्मण्यच् । नारदमाह * उपहन्येतेति । * इत्यत्रेति । इत्यनेनेति पाठान्तरम् ।

वस्तुतस्तु क्षि निवासगत्योरित्युक्तेः क्षयो निवासे इत्युक्तेश्चायं निवासार्थक इति न कोऽपि क्लेश इति बोध्यम् ।

६ । मौलं तुर्यपादं व्याचष्टे * यदात्विति । तत्रोभयत्र सप्तमीपञ्चमीसमासावित्याह * देशान्तरादिति । मूले वाशब्दश्चार्थे । तेन पण्यसमुच्चयः । तत्फलितमाह * तेनेति ।

७ । वक्ष्यमाणैतदवान्तरप्रकरणसङ्गत्यर्थमाह * अयं चेति । क्रीतस्य पण्यस्य समर्पणेत्यर्थः । * मनूक्तमिति । क्रयवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रयानुशयाख्यविवादप्रकरणे इति भावः। एवं च मनुना तेनैवास्य कथितप्रायत्वादिदं पृथङ् नोक्तमिति बोध्यम्।

यस्येहानुशयो भवेत्। (अ. ८। २२२)
सोऽन्तर्दशाहे तत् द्रव्यं दद्याच्चैवाददीत वा॥
इति तच्छेषः॥ २५४॥

मि० अव. किंच।

या० विक्रीतमपि विक्रेयं पूर्वक्रेतर्यगृह्णति।
हानिश्चेत्क्रेतृदोषेण क्रेतुरेव हि सा भवेत्॥ २५५॥

मि० यदा पुनर्जातानुशयः क्रेता पण्यं जिघृक्षति तदा विक्रीतमपि पण्यमन्यत्र विक्रेयम्। यदा पुनर्विक्रेत्रा दीयमानं क्रेता न गृह्णाति तच्च पण्यं राजदैविकेनोपहतं तदा क्रेतुरेवासौ हानिर्भवेत्। पण्याग्रहणरूपेण क्रेतृदोषेण नाशितत्वात्॥ २५५॥

बा० १। अत एवानुशयेऽन्यदप्युच्यते इत्याह *किं चेति। तदेवाह *जातेति। पूर्वेत्युभयत्रान्वयि। तत्राद्ये धातोस्तदिच्छायां लक्षणेत्याह * जिघृक्षतीति। अजातानुशये आह * यदा पुनरिति। आलस्यादिरग्रहणे हेतुः। अत्र न लक्षणेति भावः॥२५५॥

मि. अव. अपिच।

या० राजदैवोपघातेन पण्ये दोषमुपागते।
हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः॥ २५६॥

मि० यदा पुनः क्रेत्रा प्रार्थ्यमानमपि पण्यं विक्रेता न समर्पयति अजातानुशयोऽपि, तच्च राजदैविकेनोपहतं भवति, तदाऽसौ हानिर्विक्रेतुरेव। अतोऽन्यत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अदुष्टं पण्यं विनष्टसदृशं क्रेत्रे देयम् ॥ २५६ ॥

बा० १ । अपि चेति प्राग्वत् । एवमग्रेऽपि । अपिना जातानुशयसमुच्चयः । राजदैवे इदमर्थेऽण् इति फलितमाह * राजेति । तात्पर्यार्थमाह * अत इति । अस्माद्धेतोरित्यर्थः ॥ २५६॥

मि० अव. किञ्च ।

या० अन्यहस्ते च विक्रीतं दुष्टं वाऽदुष्टवद्यदि ।
विक्रीणीते दमस्तत्र मूल्यात्तु द्विगुणो भवेत् ॥ २५७॥

मि० यः पुनर्विनैवानुशयमेकस्य हस्ते विक्रीतं पुनरन्यस्य हस्ते विक्रीणीते सदोषं वा पण्यं प्रच्छादितदोषं विक्रीणीते तदा तत्पण्यमूल्याद् द्विगुणो दमो वेदितव्यः । नारदेनाप्यत्र—

विशेषो दर्शितः, (व्यव. ८)

अन्यहस्ते च विक्रीय योऽन्यस्मै तत्प्रयच्छति ।
द्रव्यं तद्द्विगुणं दाप्यो विनयं तावदेव तु ॥ (८)
निर्दोषं दर्शयित्वा तु सदोषं यः प्रयच्छति ।
स मूल्याद्द्विगुणं दाप्यो विनयं तावदेव तु ॥(७)इति।

सर्वश्चायं विधिर्दत्तमूल्ये पण्ये द्रष्टव्यः । अदत्तमूल्ये पुनः पण्ये वाङ्मात्रक्रये क्रेतृविक्रेत्रोर्नियमकारिणः समयादृते प्रवृत्तौ निवृत्तौ वा न कश्चिद्दोषः ।

यथाह नारदः, (व्यव. ८ । १०)

दत्तमूल्यस्य पण्यस्य विधिरेष प्रकीर्तितः ।
अदत्तेऽन्यत्र समयान्न विक्रेतुरविक्रयः ॥ इति ॥२५७॥

बा० १ । किञ्चेति प्राग्वत् । जातानुशये मनूक्तत्वादाह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*त्रिनैवेति। *अन्यस्येति। एकस्येति पाठान्तरम्। * पुनः, पश्चात्। अर्थादाह * अन्यस्येति। अदुष्टवादिति वत्यन्तस्यार्थमाह * प्रच्छादितेति। * तदेति। तत्रेति शेषो मौल एव। विक्रेतरीति तदर्थः। * अत्र, उक्तविषये। अपिर्भिन्नक्रमः। विशेषोऽपीत्यर्थः। आपिनोक्तसमुच्चयः। मूले मूल्यांशे न्यूनाधिकभावानुक्तत्वेन समताप्राप्तौ तत्र द्वैगुण्यरूपो विशेषः, दण्डांशे द्वैगुण्यं तु तुल्यमेवेति भावः। यद्वा यथाश्रुत एवापिरन्यमुनिसमुच्चायकः। * विनयं, दण्डम्। *तावत्, अव्ययमिदम्। तावन्तमेव। द्विगुणमेव।

विशेषमाह * सर्वत्रेति। न त्वव्यवहितोक्त एवेति भावः। *अयं विधिः, सकलदण्डविधिः। *अदत्ते, पण्ये॥२५७॥

मि० अव० इति विक्रयानुशयोऽभिहितः। क्रीतानुशयस्वरूपं तु प्राक् प्रपञ्चितम्। अधुना तदुभयसाधारणं धर्ममाह।

या० क्षयं वृद्धिं च वणिजा पण्यानामविजानता।
क्रीत्वा नानुशयः कार्यः कुर्वन् षड्भागदण्डभाक्॥२५८॥

मि० परीक्षितक्रीतपण्यानां क्रयोत्तरकालं क्रयकालपरिमाणतोऽर्घकृतां वृद्धिमपश्यता क्रेत्रा अनुशयो न कार्यः। विक्रेत्रा च महार्घनिबन्धनं पण्यक्षयमपश्यता नानुशयितव्यम्। वृद्धिक्षयपरिज्ञाने पुनः क्रेतृविक्रेत्रोरनुशयो भवतीति व्यतिरेकादुक्तं भवति। अनुशयकालावधिश्च—

नारदेनोक्तः, (व्यव. ९। श्लो. २। ३)
क्रीत्वा मूल्येन यत्पण्यं दुष्क्रीतं मन्यते क्रयी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विक्रेतुः प्रतिदेयं तत्तस्मिन्नेवाह्न्यविक्षतम् ॥
द्वितीयेऽह्नि ददत्क्रेता मूल्यात्त्रिंशांशमावहेत् ।
द्विगुणं तु तृतीयेऽह्नि परतः क्रेतुरेव तत् ॥ इति ।

अपरीक्षितक्रयविक्रये पुनः पण्यवैगुण्यनिबन्धनानुशयावधिः दशैकपञ्चसप्ताहेत्यादिना दर्शित एव । तदनया वाचोयुक्त्या वृद्धिक्षयपरिज्ञानस्यानुशयकारणत्वमवगम्यते ।

तथा पण्यपरीक्षाविधिबलात्पण्यदोषाणामनुशयकारणत्वम् ।

अतः पण्यदोषतद्वृद्धिक्षयकारणात्रितयाभावेऽनुशयकालाभ्यन्तरेऽपि यद्यनुशयं करोति तदा पण्यषड्भागं दण्डनीयः ।

अनुशयकारणसद्भावेऽप्यनुशयकालातिक्रमेणानुशयं कुर्वतोऽप्ययमेव दण्डः । उपभोगेनाविनश्वरेषु स्थिरार्घेष्वनुशयकालातिक्रमेणानुशयं कुर्वतो—

मनूक्तो दण्डो द्रष्टव्यः । (अ० ८ श्लो. २२३)
परेण तु दशाहस्य न दद्यान्नापि दापयेत् ।
आददानो ददच्चैव राज्ञा दण्ड्यः शतानि षट् ॥

इति ॥ २५८ ॥

इति विक्रीयासंप्रदानं नाम प्रकरणम् ॥

बा० १ । अवान्तरप्रकरणसमाप्तिमाह * इति विक्रयेति । न्यूनतां पौनरुक्त्यं च परिहरति * क्रीतेति । क्रयेत्यर्थः । भावे क्तः । परीक्षाया अभावे ऽनुशये दोषाभावादाह * परीक्षितेति । कर्मधारयौ । क्रीत्वेत्यस्यार्थः *क्रयोत्तरेति । परिमाणमर्था-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्मूल्यस्य । विशेषणेन व्यावर्त्यतया बोधितमर्थमाह *वृद्धीति । निषेधस्य शाब्दत्वेन तदसम्भवादाह * व्यतिरेकादिति । भेदादित्यर्थः । पूर्वमुक्तमपि पुनः अभिप्रायं वक्तुमाह *अनुशयेति । वस्त्वर्थे । *क्रीत्वेति । व्याख्यातमिदं प्राक् । विरोधपरिहारमपि प्रागुक्तमेव तथा आह * अपरीक्षितेति । अपरीक्षितवस्तुक्रयेत्यर्थः । * दशैकेति । मानवमिदम् । उक्तफलितार्थमुपसंहरति * तदिति । तस्मादित्यर्थः । * अनया, क्षयं वृद्धिं चेतिविशेषघटितयेत्यर्थः । अभिप्रायमेव प्रकाशयति * यथेति । * दोषाणामिति । अनुशयकारणत्वमवगम्यते इत्यस्यानुषङ्गः ।

२ । तुर्यपादार्थमाह * अत इति । तेषां तस्य च तत्कारणत्वादित्यर्थः । * तत्, मूल्येत्यर्थः । * क्षयेति । एतद्रूपकारणत्रितयेत्यर्थः । * अनुशयकालेति । नारदोक्तानुशयकालादिमध्येऽपीत्यर्थः । पूर्वसाम्यप्रदर्शनसाफल्याय तुल्ययुक्त्याऽऽह * अनुशयकारणेति । एतत्प्रसङ्गेन विशेषमाह * उपभोगेनेति । अनेन पण्यदोषाभावः सूचितः । स्थिरेत्यनेन वृद्धिक्षयाभावः सूचितः । * परेणेति । क्रीत्वा विक्रीयेति शेषः । *न दद्यात्, न त्यजेत् । * दापयेत्, विक्रेता बलेन न ग्राहयेत् । विक्रीतं बलेन गृह्णन् परित्यजंश्चेत्यर्थः । * षट् शतानि, पणान् ॥ २५८ ॥

इति विक्रीयासम्प्रदानम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ संभूयसमुत्थानप्रकरणम् ॥ २२ ॥

मि० अव. संभूयसमुत्थानं नाम विवादपदमिदानीमभिधीयते ।

या० समवायेन वणिजां लाभार्थं कर्म कुर्वताम् ।
लाभालाभौ यथाद्रव्यं यथा वा संविदा कृतौ ॥२५९॥

मि० सर्वे वयमिदं कर्म मिलिताः कुर्म इत्येवंरूपा संप्रतिपत्तिः समवायः। तेन ये वणिङ्नटनर्तकप्रभृतयो लाभलिप्सया प्रातिस्विकं कर्म कुर्वते तेषां लाभालाभौ उपचयापचयौ यथाद्रव्यं येन यावद्धनं पण्यग्रहणार्थं दत्तं तदनुसारेणावसेयौ ।

यद्वा । प्रधानगुणभावपर्यालोचनयाऽस्य भागद्वयमस्यैको भाग इत्येवंरूपया संविदा समयेन यथा संप्रतिपन्नौ तथा वेदितव्यौ ॥ २५९ ॥

बा० १ । समयप्रसङ्गादाह * संभूयेति । *सम्प्रतिपत्तिरिति । निश्चय इत्यर्थः । वणिजामित्युपलक्षणमित्याह *वणिङ्नटेति । द्वितीयपादार्थमाह * लाभेति । लभ्यत इति लाभस्तल्लाभेच्छयेत्यर्थः । लिप्सव इति पाठान्तरम् । तथा सत्त्वेऽपि तस्य प्रत्येकसाध्यत्वादाह * प्रातिस्विकमिति । यथाद्रव्यमिति योग्यतायामव्ययीभावः । तदाह * येनेति ।

२ । तुर्यपादार्थमाह * यद्वेति । कृतावित्यस्यार्थः * संप्रतिपन्नाविति । अर्थादाह * तथेति । एवं प्रागपि ॥ २५९ ॥

मि० अव. किञ्च ।

प्रतिषिद्धमनादिष्टं प्रमादाद्यच्च नाशितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स तद्दद्याद्विप्लवाच्च रक्षिताद्दशमांशभाक् ॥ २६० ॥

मि० तेषां संभूय प्रचरतां मध्ये पण्यमिदमित्थं न व्यवहर्तव्यमिति प्रतिषिद्धमाचरता यन्नाशितम्, अनादिष्टमननुज्ञातं वा कुर्वाणेन तथा, प्रमादात्प्रज्ञाहीनतया वा येन यन्नाशितं, स तत्पण्यं वणिग्भ्यो दद्यात् । यः पुनस्तेषां मध्ये चौरराजादिजनिताद्व्यसनात्पण्यं पालयति स तस्माद्रक्षितात्पण्याद्दशममंशं लभते ॥ २६० ॥

वा० १ । अन्यदप्याह *किं चेति । *तथा, यन्नाशितम् । प्रमादादित्यस्य व्याख्या *प्रज्ञेति । चो वाऽर्थे इत्याह *वेति । तथा च नाशितमित्यस्य सर्वत्र सम्बन्ध इति भावः । * वणिग्भ्यः, स्वसमवायिभ्यः । अत एव प्रातिस्विकमिति प्रागुक्तम् । विप्लवाच्चेत्याद्यर्थमाह * य इति । विप्लवार्थमाह *व्यसनादिति । नाशादित्यर्थः । स्वशक्त्येति भावः । इदमधिकम् । तस्य ततो लाभादि तु प्रागुक्तमेव ।

तथा नारदोपि, (व्यव. ३ । ६)

दैवतस्कर राजाग्निव्यसने समुपस्थिते ।

यस्तत्स्वशक्त्या रक्षेत्तु तस्यांशो दशमः स्मृतः ॥ इति ॥२६०॥

या० अर्घप्रक्षेपणाद्विंशं भागं शुल्कं नृपो हरेत् ।

व्यासिद्धं राजयोग्यं च विक्रीतं राजगामि तत् ॥२६१॥

मि. इयतः पण्यस्येयन्मूल्यमित्यर्घस्य प्रक्षेपणात् राजतो निरूपणाद्धेतोरसौ मूल्याद्विंशतितममंशं शुल्कार्थं गृह्णीयात् । यत्पुनर्व्यासिद्धम् "अन्यत्र न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विक्रेयम्" इति राज्ञा प्रतिषिद्धं, यद्राजयोग्यं मणिमाणिक्याद्यप्रतिषिद्धमपि, तद् राज्ञेऽनिवेद्य लाभलोभेन विक्रीतं चेद्राजगामि । मूल्यदाननिरपेक्षं तत्सर्वं पण्यं राजाऽपहरेदित्यर्थः ॥ २६१ ॥

बा. १ । एवं तेषामुक्त्वा राज्ञ आह * अर्घेति ।

मनुरपि, (अ. ८ । श्लो. ३९८ । ३९९)

शुल्कस्थानेषु कुशलाः सर्वपण्यविचक्षणाः ।
कुर्युरर्घं यथापण्यं ततो विंशं नृपो हरेत् ॥
राज्ञः प्रख्यातभाण्डानि प्रतिषिद्धानि यानि च ।
तानि निर्हरतो लोभात्सर्वहारं हरेन्नृपः ॥ इति ।

* अर्घस्येति । तस्येति पाठान्तरम् । हेतौ पञ्चमीत्याह * हेतोरिति । * असौ, नृपः । शुल्कमित्यस्यार्थः *शुल्कार्थमिति । करार्थमित्यर्थः । पूर्वेणापौनरुक्त्यायाह *प्रतिषिद्धमिति । राजगामित्वे विक्रीतत्वं दोषो हेतुरित्याह *लाभेति । अन्यत्रेति शेषः । अत एव फलितमाह * मूल्येति । *सर्वं, द्विविधम् ॥ २६१ ॥

या० मिथ्या वदन्परीमाणं शुल्कस्थानादपासरन् ।
दाप्यस्त्वष्टगुणं यश्च सव्याजक्रयविक्रयी ॥ २६२ ॥

मि० यः पुनर्वणिक् शुल्कवञ्चनार्थं पण्यपरिमाणं निह्नुते, शुल्कग्रहणस्थानाद्वाऽपसरति, यश्चास्येदमस्य वेत्येवं विवादास्पदीभूतं पण्यं क्रीणाति विक्रीणीते वा, ते सर्वे पण्यादष्टगुणं दण्डनीयाः ॥ २६२ ॥

बा० १ । अथ दण्डमाह *मिथ्येति । राजदण्डे बीजमाह *शुल्केति । शुल्कपदं लाक्षणिकमित्याह * शुल्कग्रहणेति । क्रयश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विक्रयश्च क्रयविक्रयौ, व्याजो विवादस्तत्सहितस्य पण्यस्य तौ, ततो मत्वर्थे इनिरित्याह * यश्चेति।

मनुरपि, (अ. ८। ४००)

शुल्कस्थानं परिहरन्नकाले क्रयविक्रयी।
मिथ्यावादी च संख्याने दाप्योऽष्टगुणमत्ययम् ॥इति॥२६२॥

मि० अव. अपि च।

या० तरिकः स्थलजं शुल्कं गृह्णन् दाप्यः पणान्दश।
ब्राह्मणप्रातिवेश्यानामेतदेवानिमन्त्रणे ॥ २६३ ॥

मि० शुल्कं हि द्विविधं स्थलजं जलजं च। तत्र स्थलजम्–

अर्घप्रक्षेपणाद्विंशं भागं शुल्कं नृपो हरेत्–

इत्यत्रोक्तम्। जलजं तु–

मानवेऽभिहितम्, (अ. ८ श्लो. ४०४।४०५)

पणं यानं तरे दाप्यः पौरुषेऽर्द्धपणं तरे।
पादं पशुश्च योषिच्च पादार्द्धं रिक्तकः पुमान्॥
भाण्डपूर्णानि यानानि तार्यं दाप्यानि सारतः।
रिक्तभाण्डानि यत्किञ्चित्पुमांसश्चापरिच्छदाः॥

इति।

शुल्कद्वयेऽप्ययमपरो विशेषः;

न भिन्नकार्षापणमस्ति शुल्कं
न शिल्पवृत्तौ न शिशौ न दूते।
न भैक्षलब्धे न हृतावशेषे
न श्रोत्रिये प्रव्रजिते न यज्ञे॥

इति। तीर्यतेऽनेनेति तरिः नावादिः। तज्जन्यशुल्केऽधिकृतस्तरिकः। स यदा स्थलोद्भवं शुल्कं गृह्णा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ति तदा दश पणान् दण्डनीयः। वेशो वेश्म। प्रतिवेश इति स्ववेश्माभिमुखं स्ववेश्मपार्श्वस्थं चोच्यते। तत्र भवाः प्रातिवेश्याः। ब्राह्मणाश्च ते प्रातिवेश्याश्च ब्राह्मणप्रातिवेश्याः। तेषां श्रुतवृत्तसंपूर्णानां श्राद्धादिषु विभवे सति अनिमन्त्रणे एतदेव दशपणात्मकं दण्डनं वेदितव्यम् ॥ २६३ ॥

बा० १। दण्डान्तरमाहेत्याह *अपि चेति। वचनं व्याख्यातुमुपोद्घातमाह *शुल्कं हीति। मूलमाह * अर्धप्रक्षेपणादिति। *पणमिति। * तरे, नौकादौ। * यानं, रिक्तशकटादिकं प्रति पणं दाप्यः। पौरुषे पुरुषभारविषये तरेऽर्द्धपणं दाप्यः। पशुर्गवादिः योषित् वक्ष्यमाणभिन्नस्त्रीमात्रं पादं पणचतुर्थांशं दाप्यः। रिक्तकः भाररहितः पुमान् मनुष्यः पादार्द्धं पणाष्टमभागं दाप्यः। भाण्डं पण्यद्रव्यं तेन पूर्णानि यानानि शकटादीनि सारतः द्रव्यगतोत्कर्षापेक्षया तार्यं तरणमूल्यं दाप्यानि। रिक्तभाण्डानि पण्यद्रव्यराहितानि गोण्यादीनि अपरिच्छदा दरिद्राश्च उक्तपादार्धदानापेक्षया यत् किञ्चित् दापनीया इत्यर्थः। किं च—

दीर्घाध्वनि यथादेशं यथाकालं तरो भवेत्। (अ.८।४०६)
नदीतारेषु तद्विद्यात्समुद्रे नास्ति लक्षणम् ॥ इति मनुः।

पूर्वं पारावारे तरणार्थमुक्तम्। इदानीं नदीमार्गेण दूराध्वनि गन्तव्ये प्रबलवेगस्थिरोदकनद्यादिदेशग्रीष्मवर्षादिकालापेक्षया तरमूल्यं कल्पनीयम्। एतच्च नदीतारे बोध्यम्। समुद्रे तु वाताधीनपोतगमनत्वात्स्वायत्तत्वाभावेन तरपणविशेषज्ञापकं नदीवद्योजनादिकं तत्र नास्ति, ततस्तत्रोचितमेव तरमूल्यं ग्राह्यमिति तद्व्याख्यातारः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२ । * शुल्कद्वयेपि, स्थलजे जलेज च । *न भिन्नेति । मानवं वासिष्ठं चेदम् । भिन्नो न्यूनः कार्षापणो मूल्यं यस्य वस्तुनस्तत्तथा तन्निमित्तः शुल्कोऽपि भिन्नकार्षापणः । तेन कार्षापणादर्वाग्यस्य मूल्यं तस्य शुल्को न ग्राह्य इत्यर्थः । शुल्कशब्दः अर्द्धर्चादिः । शिल्पं वृत्तिर्यस्य तत्र । भैक्षे वृत्तं वर्तनं जीवनं यस्य तत्र । भैक्षलब्धे इति पाठान्तरम् । हृतादवशेषो यस्य तत्र । यज्ञस्तदुपकरणं, दीक्षितो वा, तत्र गन्तुकामो जनसमूहो वा ।

मनुरपि, (अ. ८ । ४०७)

गार्भिणी तु द्विमासादिस्तथा प्रव्रजितो मुनिः ।

ब्राह्मणा लिङ्गिनश्चैव न दाप्यास्तारिकं तरे ॥ इति ।

सञ्जातगर्भा स्त्री मासद्वयादूर्ध्वं, तथा प्रव्रजितो भिक्षुर्मुनिर्वानप्रस्थः ब्राह्मणाश्च लिङ्गिनो ब्रह्मचारिणश्च । एते मूल्यं तरे न दाप्या इत्यर्थः ।

३ । अथ मूलार्थमाह *तीर्यतइति । स च शुल्के लाक्षणिकः । ततः अत इनीति ठन् । तत्फलितमाह * तज्जन्येति । *वेश्मेति । तं प्रतीति सामीप्ये ऽव्ययीभावः । तदाह * स्ववेश्मेति । गृहमिति शेषः । * तत्रेति । अव्ययीभावाच्चेति ञ्यप्रत्यय इति भावः । विशेषानाह * श्रुतेत्यादि ॥ २६३ ॥

मि० अव. देशान्तरमृतवणिग्रिक्थं प्रत्याह ।

या० देशान्तरगते प्रेते द्रव्यं दायादबान्धवाः ।

ज्ञातयो वा हरेयुस्तद् आगतास्तैर्विना नृपः ॥२६४॥

मि० यदा संभूयकारिणां मध्ये यः कश्चिद्देशान्तरगतो मृतस्तदा तदीयमंशं दायादाः पुत्राद्यपत्यवर्गो,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बान्धवा मातृपक्ष्या मातुलाद्याः, ज्ञातयोऽपत्यवर्गव्यतिरिक्ताः सपिण्डा वा। आगताः संभूयव्यवहारिणो ये देशान्तरादागतास्ते वा गृह्णीयुः । तैर्विना दायादाद्यभावे राजा गृह्णीयात् ।

वाशब्देन च दायादादीनां वैकल्पिकमधिकारं दर्शयति । पौर्वापर्यनियमस्तु "पत्नी दुहितर" इत्यादिप्रतिपादित एवात्रापि वेदितव्यः । शिष्यसब्रह्मचारिब्राह्मणनिषेधो वणिक्प्राप्तिश्च वचनप्रयोजनम् ।

वणिजामपि मध्ये यः पिण्डदानऋणदानादिसमर्थः स गृह्णीयात् । सामर्थ्याविशेषे सर्वे वणिजः संसृष्टिनो विभज्य गृह्णीयुः । तेषामप्यभावे दशवर्षं दायादाद्यागमनं प्रतीक्ष्यानागतेषु स्वयमेव राजा गृह्णीयात् ।

तदिदं नारदेन स्पष्टीकृतम्, (व्यव. ३)

एकस्य चेत्स्यान्मरणं दायादोऽस्य तदाप्नुयात ।
अन्यो वाऽसति दायादे शक्ताश्चेत्सर्वएव ते ॥(७)
तदभावे तु गुप्तं तत्कारयेद्दश वत्सरान् । (१७)
अस्वामिकमदायादं दशवर्षस्थितं ततः ।
राजा तदात्मसात्कुर्यादेवं धर्मो न हीयते (१८)

इति ॥ २६४ ॥

बा० १ । प्रेतपदार्थो * मृत इति । द्रव्यपदं योग्यतया विशेषपरमित्याह * तदीयमंशमिति । तदित्यस्य तत्रान्वय इति भावः । यद्यपि दायादशब्दो ऽन्यत्राप्यस्तीति प्रागुक्तं तथापि ब्राह्मणवसिष्ठन्यायेनाह * पुत्रेति । मातृपक्षे भवाः । दिगादित्वाद्यत् । * सपिण्डेति । सगोत्रसपिण्डेत्यर्थः । आदिना सोदकादिः । तैरित्यनेन सर्वपरामर्श इत्याह * दायादेति। च-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्त्वर्थे। एवमग्रेऽपि। *वैकल्पिकमिति। न तु युगपदिति भावः।

२। नन्वेवं क्रमे नियामकाभावेनैच्छिकविकल्पापत्तौ व्रीहियवादिवत् "पत्नी दुहितर" इतिक्रमबोधकवचनविरोधापत्तिः, अत आह * पौर्वापर्येति। तथा च व्यवस्थितोऽयं विकल्पो न त्वैच्छिकः। व्यवस्था च पत्नी दुहितर इति बोधितपौर्वापर्याबाधेन ज्ञेयेति भावः।

३। नन्वेवं सति फलाभावाद्देशान्तरेति नारभ्यम्, अत आह *शिष्येति। "गोत्रजा बन्धुशिष्य" इत्यनेन "सर्वेषामप्यभावे तु" इत्यनेन च क्रमेण प्रतिपादिताधिकारित्वकशिष्यादिनिवृत्तिः, वणिजस्तत्रानुक्तत्वेन तत्प्राप्तिश्च एतद्वचनप्रयोजनमित्यर्थः। अतः पुत्रादिबन्धुपर्यन्तानामभावे संभूयकारिणो वणिजो गृह्णीयुरिति भावः।

४। तत्र विशेषमाह * वणिजामपीति। पिण्डदातृत्वस्य तद्व्याप्यत्वस्य प्रागुक्तत्वादाह * ऋणेति। ऋणं प्रतिकुर्युरित्यनेनेदमुक्तं प्राक्। आदिना दत्तऋणोद्धारपरिग्रहः।

५। विशेषान्तरमाह * सामर्थ्येति। विभज्य ग्रहणे हेतुं सूचयन्नाह * संसृष्टिन इति। यद्यपि नात्र मुख्यं संसृष्टित्वं तथापि तेन न्यायेनात्रापि तथैवेति भावः।

६। विशेषान्तरमाह * तेषामपीति। दशवर्षमिति बहुव्रीहिः।*तदिदमिति। दशवर्षपर्यन्तं स्थापनमित्यर्थः। *एकस्येति। संभूय कर्म कुर्वतां वणिजां मध्ये यद्येकस्य मरणं भवेत् तदाऽस्य मृतस्य तद्वस्तु दायादः पुत्रादिः बन्धवन्तो जनः पूर्वपूर्वाभावे उत्तरोत्तर आप्नुयात्। दायादे उक्तरूपे असति अन्यो वणिग्वा शक्तश्चेत् ऋणदानादिसमर्थश्चेदाप्नुयात्। एकस्य तत्रासामर्थ्ये सर्वेषां च सामर्थ्ये तादृशाः ते वणिजः सर्वे एवाप्नुयुरित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*तदभावे वणिजामभावे * गुप्तं रक्षितं * तत् तदीयधनं *ततः तावत्पर्यन्तस्थापनोत्तरमस्वामिकत्वादिविशिष्टं * तद् धनं राजा स्वीयं कुर्यात्, एवं सति न धर्मस्य हानिरित्यर्थः॥२६४॥

मि० अव. किंच।

या० जिह्मं त्यजेयुर्निर्लाभमशक्तोऽन्येन कारयेत्।

मि० जिह्मो वञ्चकः तं निर्लाभं निर्गतलाभं लाभमाच्छिद्य त्यजेयुर्बहिः कुर्युः। यश्च संभूयकारिणां मध्ये भाण्डप्रत्यवेक्षणादिकं कर्तुमसमर्थोऽसावन्येन स्वं कर्म भाण्डभारवहनं तदायव्ययपरीक्षणादिकं कारयेत्॥

मि० अव. प्रागुपदिष्टं वणिग्धर्ममृत्विगादिष्वतिदिशति।

या० अनेन विधिराख्यात ऋत्विक्कर्षककर्मिणाम्॥२६५॥

मि० अनेन लाभालाभौ यथाद्रव्यमित्यादिवणिग्धर्मकथनेन ऋत्विजां होत्रादीनां कृषीवलानां नटनर्तकतक्षादीनां च शिल्पकर्मोपजीविनां विधिर्वर्त्तनप्रकार आख्यातः। तत्र च ऋत्विजां धनविभागे विशेषो-- मनुना दर्शितः, (अ. ८ श्लो. २१०)

सर्वेषामर्धिनो मुख्यास्तदर्द्धेनार्धिनोऽपरे।

तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिनः॥ इति।

अस्यायमर्थः। ज्योतिष्टोमे तं शतेन दीक्षयन्तीति वचनेन गवां शतमृत्विगानातिरूपे दक्षिणाकार्ये विनियुक्तम्। ऋत्विजश्च होत्रादयः षोडश। तत्र कस्य कियानंश इत्यपेक्षायामिदमुच्यते।

सर्वेषां होत्रादीनां षोडशर्त्विजां मध्ये ये मुख्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्चत्वारो होत्रध्वर्युब्रह्मोद्गातारः ते गोशतस्यार्द्धिनः सर्वेषां भागपरिपूरणोपपत्तिवशादष्टाचत्वारिंशद्रूपार्द्धेनार्द्धभाजः।

अपरे मैत्रावरुणप्रतिप्रस्थातृब्राह्मणाच्छंसिप्रस्तोतारस्तदर्द्धेन तस्य मुख्यांशस्यार्द्धेन चतुर्विंशतिरूपेणार्धभाजः।

ये पुनस्तृतीयिनः अच्छावाकनेष्टाग्नीध्रप्रतिहर्तारस्ते तृतीयिनो मुख्यांशस्य षोडशगवरूपतृतीयांशेन तृतीयांशभाजः।

येतु पादिनः ग्रावस्तुदुन्नेतृपोतृसुब्रह्मण्यास्ते मुख्यभागस्य यश्चतुर्थांशो द्वादशगवरूपस्तद्भाजः।

ननु कथमयमंशनियमो घटते। न तावदत्र समयो, नापि द्रव्यसमवायो, नापि वचनं यद्वशाद्भागनियमः स्यात्। अतः "समं स्यादश्रुतत्वात्" इति न्यायेन सर्वेषां समांशभाक्त्वं, कर्मानुरूपेण वांऽशभाक्त्वमिति युक्तम्।

अत्रोच्यते। ज्योतिष्टोमप्रकृतिके द्वादशाहेऽर्द्धिनस्तृतीयिनः पादिन इति सिद्धवदनुवादो न घटते, यदि तत्प्रकृतिभूते ज्योतिष्टोमे अर्द्धतृतीयचतुर्थांशभाक्त्वं मैत्रावरुणादीनां न स्यात। अतो वैदिकार्धिप्रभृतिसमाख्याबलात् प्रागुक्तोंऽशनियमोऽवकल्प्यते इति निरवद्यम्॥ २६५॥

इति संभूयसमुत्थानप्रकरणम्॥

बा० १। वणिजं प्रत्यन्यदप्युच्यते इत्याह * किं चेति। निर्गतलाभमिति बहुव्रीहिः। तस्याप्यर्थमाह * लाभमिति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तमदत्त्वेत्यर्थः। सम्भूयकारिण इति शेषः। अशक्त इत्यस्यार्थमाह * संभूयेति। * भाण्डेति। भाण्डस्य भारः संरक्षणादिरूपः तस्य वहनमित्यर्थः। * तत्, भाण्डम्।

नारदोऽपि, (व्यव. ३।४)

भाण्डपिण्डव्ययोद्धारभारसारान्ववेक्षणम्।

कुर्युस्ते ऽव्यभिचारेण समये स्वे व्यवस्थिताः॥ इति।

भाण्डं विक्रेयद्रव्यम्। पिण्डः पाथेयम्।

उ. २। * प्रागिति। प्रकरणारम्भे इत्यर्थः। आदिग्राह्यं वचने एव स्फुटम्। अनेनेत्यस्यैतत्प्रकरणादौ उक्तेनेत्यर्थः। अन्यथा असंभवात्। तदाह *लाभेति। श्रुतिक्रमेणाह *होत्रेति। कर्षकपदार्थमाह *कृषीति। कर्मिपदे अत इनीतीनिः। तदर्थमाह *नटेति। कर्मपदार्थमाह *शिल्पेति। *तत्र च, तेषां मध्ये च। श्रुतिविहितदक्षिणया विभागप्रकरणस्य मनूक्तत्वाद्दक्षिणाप्रापकं वचनमाह * तं शतेन दीक्षयन्तीति। पूर्वं गवां प्रस्तुतत्वाच्च शतेन गवां शतेन तं यजमानम् अध्वर्य्वादयो दीक्षयन्तीत्यर्थः। यतो दक्षिणाग्रहणेन यजमानायत्ताः भवन्ति।

३। ननु अतो दीक्षोद्देशेन गोशतग्रहणं प्रतीयते न दक्षिणाया विधिः, तत्कथं दक्षिणाप्रापकमिदम्, अत आह *इति वचनेनेति। अयं भावः। यथा भुजिक्रियासाध्ये तृप्त्यात्मके कार्ये पयसा तृप्तिं कुर्वीतेति पयोद्रव्ये विहिते तत्पयो भोजनसाधनस्यौदनस्य स्थाने निपतति तथाऽत्रापि दीक्षयन्तीति णिजर्थभूतं दीक्षाकरणम् ऋत्विजामानतिरूपं दक्षिणादानस्य कार्यं, तेषामानतिर्नम्रभावः स्वायत्ततेति यावत्। भृतिं गृहीत्वा भृत्या इव दक्षिणां गृहीत्वा स्वायत्ता भवन्ति हि ऋत्विजः। तस्मिन् तेषामानतिरूपे दक्षिणादानस्य कार्ये गोशतं विधीयमानं दक्षिणादानरूपव्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पारसाधनभूतदक्षिणायाः स्थाने निपततीत्यर्थाद्गोशतमेव दक्षिणा भवतीति दक्षिणाप्रापकमिदं वचनमिति गोशतं दक्षिणात्वेन विधीयतइति।

४। अथ मानवं व्याख्यातुमवतारयति * ऋत्विजश्चेति। *तत्र, तेषां मध्ये गोशते वा। * इदं, मानवम्। अथ व्याचष्टे * सर्वेषामिति। उक्तरीत्यैवाह * होत्रेति। ब्रह्मत्वस्योभयसाधारण्यादाह * ब्रह्मेति। शतार्धत्वस्य पञ्चाशति सत्त्वात्तथैव विभागप्राप्तौ आशयं प्रकाशयन् विशेषमाह * सर्वेषां भागेति। भागस्य त्रिभागस्य यत्परिपूरणं तदर्थं योपपत्तिस्तस्या वशेन तदधीनतया तदनुरोधेनायातः प्राप्तश्चासावष्टचत्वारिंशद्रूपश्चासावर्धश्च तेन, धान्येन धनवानितिवत्तृतीया, सामान्यविशेषयोरभेदान्वयः। तद्रूपार्धभाज इत्यर्थः। एवमग्रेऽपि। मत्वर्थीय इनिः सर्वत्र। प्रकारान्तरेण दक्षिणाविभागस्य कर्तुमशक्यत्वादीषन्न्यूनत्वेऽपि सामीप्येन तद्ग्रहणमिति भावः। तच्छब्देन श्रुतानुमितयोरिति न्यायेन श्रुतपरामर्शस्यैवौचित्यादाह * मुख्यांशस्येति। अष्टाचत्वारिंशद्रूपस्येत्यर्थः। एतेनावशिष्टद्विपञ्चाशद्रूपस्यैव कुतो न परामर्श इत्यपास्तम्। उक्तरीत्या स्थलद्वये निर्वाहेऽप्यन्ते आनिर्वाहाच्च। तृतीयिनः पादिन इति तयोः श्रौती संज्ञा। योगोऽपि उक्त एव। मानवे तृतीयांशा इति बहुव्रीहिः। एवमग्रेऽपि। तत्फलितमाह *मुख्यांशेति। प्रत्यासत्तेरिति भावः। एवमग्रेऽपि। षोडशगवरूपेति पाठः। गोरूपेत्यपपाठः। एवं द्वादशगवरूपेत्यत्रापि। अयं मनूक्तः। बृहस्पतिरप्येवमेव।

५। तत्र मूलोक्तप्रकारद्वयाविषयत्वमाह * नतावदिति * नापीति च। प्रधानस्याधिकांशो ऽन्येषां न्यूनन्यूनत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रन्यूनतमांशा इति न समयः कृतः। नाप्येकेन दशान्येनाष्टावन्येन षडित्यादिरूपेण वाणिज्ये इव द्रव्यसमवायः कृत इत्यर्थः। *नापि वचनं, श्रौतम्। *यद्वशात्, यद्बलात्। *अतः, परिशेषात्। युक्तमित्यत्रान्वयः।

६। दशमतृतीयपादाधिकरणं "समं स्यादश्रुतत्वात्" इति। ज्योतिष्टोमे श्रूयते गावश्चाश्वाश्चाश्वतराश्च गर्दभाश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणेति पूर्वतराधिकरणे गवां द्वादशशतमितराण्यश्वादीनि च दक्षिणेति उपपादितम्।

पूर्वाधिकरणे त्वियमेव दक्षिणा विभाज्येत्यप्युक्तम्।

तत्र स्थिते विभागे चिन्ता, किं समो विभाग उत प्रयासानुरूप उतार्धिन इत्यादिसमाख्यानुरूप इति संशयः। तत्र विशेषाश्रवणात्समो विभागः सर्वेषामृत्विजां स्यादिति प्राप्ते सिद्धान्त्येकदेशी आह *लोकवत्, प्रयासानुरूपेण विभाग इति। तदभिप्रेत्योभयं शङ्कक आह * सममिति। विशेषाश्रवणात्सममित्यर्थः। * सर्वेषाम्, ऋत्विजाम्। * कर्मेति। ऋत्विजां स्वस्वकर्माणि वैषम्यात्कर्मानुरूपेणेत्यर्थः। अथैवं प्राप्ते तत्र सिद्धान्ती आह। द्वादशाहे दीक्षाक्रमवाक्ये अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति तत उद्गातारं ततो होतारं ततस्तं प्रतिप्रस्थाता दीक्षयित्वाऽर्द्धिनो दीक्षयति ततस्तं नेष्टा दीक्षयित्वा तृतीयिनो दीक्षयति ततस्तमुन्नेता दीक्षयित्वा पादिनो दीक्षयतीत्येवंविधा अर्ध्यादिसमाख्याः श्रूयन्ते। अतस्तद्वशात् ब्राह्मणाच्छंसिप्रभृतीनां तदनुरूपो विभागो द्वादशाहप्रकृतौ ज्योतिष्टोमेऽध्यवसीयते इति। तदिमं सिद्धान्तम् अवलम्ब्याह * ज्योतिष्टोमप्रकृतिके इति। कदेत्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काङ्क्षायामाह * यदीति । * तत्, द्वादशाहः । उपसंहरति * अत इति । श्रुत्यादीनि षट् प्रमाणानि शेषत्वबोधकानि । समाख्या नाम यौगिकसंज्ञा । ज्योतिष्टोमविकृतिभूते द्वादशाहेऽर्द्धिन इत्यादयस्समाख्याः श्रूयन्ते । अतः समाख्यारूपप्रमाणबलात्तत्प्रकृतौ ज्योतिष्टोमे तथैव दक्षिणाविभागः कार्यः । अन्यथा विकृतौ द्वादशाहेऽर्धिन इत्यादिसिद्धानुवादो न स्यात् । तथा च विकृतिगतसमाख्यान्यथानुपपत्त्या प्रकृतौ प्रागुक्तदक्षिणाविभागावसाय इत्यर्थः । तदुक्तं "तुथो वो विश्ववेदा विभजतु" इति । तां यजमानश्चतुर्धा कृष्णाजिनेन व्युत्रास्य चतुर्थमध्वर्युभ्यो विभजति, यावदध्वर्यवे ददाति तस्यार्धं प्रतिप्रस्थात्रे, तृतीयं नेष्ट्रे, चतुर्थमुन्नेत्रे, एतेनेतरेषां दानमुक्तमिति ॥ २६८ ॥

इति संभूयसमुत्थानं नाम प्रकरणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ स्तेयप्रकरणम् ॥ २३ ॥

मि० उ० इदानीं स्तेयं प्रस्तूयते । तल्लक्षणं च—मनुनाऽभिहितम्, (अ. ८ श्लो. ३३२)

स्यात्साहसं त्वन्वयवत्प्रसभं कर्म यत्कृतम् ।
निरन्वयं भवेत्स्तेयं कृत्वा यन्निह्नुते भयात् ॥ इति ।

अन्वयवत् द्रव्यरक्षिराजाध्यक्षादिसमक्षम् प्रसभं बलावष्टम्भेन यत्परधनहरणादिकं क्रियते तत्साहसम् । स्तेयं तु तद्विलक्षणं निरन्वयं द्रव्यस्वाम्याद्यसमक्षं वञ्चयित्वा यत्परधनहरणं तदुच्यते । यच्च सान्वयमपि कृत्वा न मयेदं कृतमिति भयान्निह्नुते तदपि स्तेयम् ।

नारदेनाप्युक्तम्, (व्यव. १४ । १७)

उपायैर्विविधैरेषां छलयित्वाऽपकर्षणम् ।
सुप्तमत्तप्रमत्तेभ्यः स्तेयमाहुर्मनीषिणः ॥ इति ।

अव० तत्र तस्करग्रहणपूर्वकत्वाद्दण्डनस्य ग्रहणस्य च ज्ञानपूर्वकत्वात् ज्ञानोपायं तावदाह ।

या० ग्राहकैर्गृह्यते चौरो लोप्त्रेणाथ पदेन वा ।
पूर्वकर्मापराधी च तथाचाशुद्धवासकः ॥ २६६ ॥

मि० यश्चौरोऽयमिति जनैर्विख्याप्यते असौ ग्राहकै राजपुरुषस्थानपालप्रभृतिभिर्ग्रहीतव्यः । लोप्त्रेणापहृतभाजनादिना वा चौर्यचिह्नेन । नाशदेशादारभ्य चौर्यपदानुसरणेन वा ग्राह्यः । यश्च पूर्वकर्मापराधी प्राक् प्रख्यातचौर्यः, अशुद्धोऽप्रज्ञातो वासः स्था

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नं यस्यासौ अशुद्धवासकः, सोऽपि ग्राह्यः ॥ २६६ ॥

बा० १ । महाप्रकरणसंगत्याऽऽह *इदानीमिति । चस्त्वर्थे । मानवं व्याचष्टे *अन्वयवदिति । मतुबन्तमिदम् । अग्रे अन्वयः संबन्धः, स चक्षुरादेर्विवक्षित इत्याह * द्रव्येति । द्रव्यस्वामीत्यर्थः । कर्मपदार्थमाह * परेति । आदिना साधारणद्रव्यहरणम् । द्वंद्वोऽयम् । * कृतमिति । भूतत्वमविवक्षितमित्याह * क्रियते इति । अतस्तत्र स्तेयदण्डो न कार्यः । एतदर्थमेव प्रकरणभेद इति भावः । तदाह * स्तेयं त्विति । * तत्, साहसात् । आदिना राजाध्यक्षादि । बलावष्टम्भो नात्रेत्याह * वञ्चयित्वेति ।

२ । कृत्वा यन्निह्नुते भयादिति तुर्यपादपाठं व्याचष्टे * यच्चेति । अपिना निरन्वयसमुच्चयः । परधनहरणादिकमिति शेषः । कृत्वा निह्नूयते च यदिति पाठान्तरम् । कृत्वाऽपव्ययते च यदिति तु प्रचुरः पाठः । तदाऽयं तात्पर्यार्थो बोध्यः । अपव्ययते संवृणोति आच्छादयतीति यावदिति तु शाब्दोऽर्थः । व्येञ्संवरणे इत्युक्तेः । वञ्चयित्वेत्यस्य समूलत्वं ध्वनयन्स्तेयलक्षणांशे मानान्तरमप्याह *नारदेनापीति । *एषां, द्रव्यस्वामिनां सुप्तादीनाम् । कर्मणि शेषे षष्ठी । छलेऽन्वयः । द्रव्यस्येति शेषः । सुप्तादेरपकर्षणेऽन्वयः ।

३ । मूलमवतारयति * तत्रेति । प्रारभ्यमाणे स्तेये इत्यर्थः । * ज्ञानेति । तस्करत्वज्ञानेत्यर्थः । यद्यपि योगिना ग्राहकग्राह्यत्वमेव तत्रोपाय उक्तस्तथापि तत्रापि निमित्तमाह [illegible]य इति । राजपुरुषाश्च स्थानपालाश्चेति द्वंद्वः । लोप्त्रपदार्थमाह * अपहर्तेति । गृह्यते इति लेडित्याह * ग्रहीतव्यइति । अपहारतो नष्टं वस्त्रादिर्यस्य गृहे हस्ते वा दृश्यते तेन चि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह्नेन स पुरुषो ग्राह्य इत्यर्थः । अथशब्दार्थमाह * वेति । पदेन वेति व्याचष्टे * नाशेति । पूर्वकर्म चौर्याख्यमेव । भूम्निइनिरित्याह * प्रागिति । अत एव परिग्रहः । * वास इति । उष्यतेऽस्मिन्निति वासो निवासः । पुंस्ययम् । तदाह * स्थानमिति । न तु वासस्थानमित्येकं पदमिति भावः । तथाचेति समुच्चये इत्याह * सोऽपीति ॥ २६६ ॥

मि० अव० किञ्च ।

या० अन्येऽपि शङ्कया ग्राह्या जातिनामादिनिह्नवैः ।
द्यूतस्त्रीपानसक्ताश्च शुष्कभिन्नमुखस्वराः ॥ २६७ ॥
परद्रव्यगृहाणां च पृच्छका गूढचारिणः ।
निराया व्ययवन्तश्च विनष्टद्रव्यविक्रयाः ॥ २६८ ॥

मि० न केवलं पूर्वोक्ता ग्राह्याः किन्त्वन्येऽपि वक्ष्यमाणैर्लिङ्गैः शङ्कया ग्राह्याः । जातिनिह्नवेन "नाहं शूद्र" इत्येवंरूपेण । नामनिह्नवेन "नाहं डवित्थ" इत्येवंरूपेण । आदिग्रहणात्स्वदेशग्रामकुलाद्यपलापेन च लक्षिता ग्राह्याः । द्यूतपण्याङ्गनामद्यपानादिव्यसनेष्वतिप्रसक्तास्तथा । कुतस्त्योऽसि त्वमिति चौरग्राहिभिः पृष्टो यदि शुष्कमुखो भिन्नस्वरो वा भवति तर्ह्यसावपि ग्राह्यः । बहुवचनात् स्विन्नललाटादीनां ग्रहणम् ।

तथा ये निःष्कारणं कियदस्य धनं किं वाऽस्य गृहमिति पृच्छन्ति, वेषान्तरधारणेनात्मानं गूहयित्वा ये चरन्ति, ये च आयाभावेऽपि बहुव्ययकारिणः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ये च विनष्टद्रव्याणां जीर्णवस्त्रभिन्नभाजनादीनामविज्ञातस्वामिकानां विक्रायकास्ते सर्वे चौर्यसंभावनया ग्राह्याः।

एवं नानाविधचौर्यलिङ्गान्पुरुषान् गृहीत्वा एते चौराः किं वा साधव इति सम्यक्परीक्षेत, न पुनर्लिङ्गदर्शनमात्रेण चौर्यनिर्णयं कुर्यात्। अचौरस्यापि लोप्त्रादिलिङ्गसम्बन्धसंभवात्।

यथाह नारदः,

अन्यहस्तात्परिभ्रष्टमकामादुत्थितं भुवि।
चौरेण वा प्रतिक्षिप्तं लोप्त्रं यत्नात्परीक्षयेत्॥

तथा, (ना. अ. १।७१)

असत्याः सत्यसंकाशाः सत्याश्चासत्यसन्निभाः।
दृश्यन्ते द्विविधा भावास्तस्माद्युक्तं परीक्षणम्॥

इति॥ २६७॥ २६८॥

बा० १। तत्र उपायान्तरमाह * किं चेति। केवलमवधारणे। शङ्कायां जातिनिह्नवादेर्हेतुत्वमित्याह * वक्ष्यमाणैरिति। तान्येवाह * जातीति। निह्नवपदस्य प्रत्येकं संबन्धः। डवित्थ इति याहच्छिकी संज्ञा। देशो व्यापकः। ग्रामो व्याप्यः। उपलक्षणे इयं तृतीयेत्याह * लक्षिता इति। * द्यूतेति। द्वंद्वोत्तरपदको द्वंद्वः। समभिव्याहारात् स्त्री विशेषरूपा न तु सामान्यभूतेत्याह * द्यूतपण्याङ्गनेति। इदमुपलक्षणमित्याह * आदीति। तात्पर्यार्थमाह * अतिप्रसक्ता इति। शुष्कं च भिन्नश्च शुष्कभिन्नौ, मुखं च स्वरश्च मुखस्वरौ, ततो बहुव्रीहिर्यथासंख्यं चेत्याह * यदीति। अत्र कारणमुक्तं कुतस्त्योऽसीत्यादिना। ननु अत्र द्वयोरेवोक्तत्वाज्जात्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वग्रहणे सिद्धे व्यक्त्याशयेन बहुत्वस्यानुपयोगाद् बहुवचनासंगतिः, अत आह *बहुवचनादिति। तथा च प्रकृतिरन्येषामप्युपलक्षणम् अर्द्धर्चा इति वत्। *वेति। तद्विवक्षया बहुवचनम्। अत एव प्रकृतिप्रत्ययविरोधो ऽपि नेति भावः। अनतिप्रसङ्गायाह * निष्कारणमिति। गूढं यथा तथा चरन्तीति शाब्दोऽर्थः। तत्फलितमाह * वेषान्तरेति। * गूहयित्वेति। आच्छादयित्वेत्यर्थः। आवश्यकव्यये ऽदोषादाह * बहुव्ययेति। भूम्नि तत्र मतुप्। विनष्टद्रव्याणि विक्रीणते इति पचाद्यच् गङ्गाधरवत्। तत्फलितमाह * ये चेति। * विक्रायकाः, तत्कर्तारः। ण्वुलन्तम्। शङ्कयेत्यस्यात्राप्यन्वय इत्याह * चौर्यसम्भावनयेति।

२। वक्ष्यमाणसङ्गतये तत्सूचितमेव विशेषमाह *एवमिति। नानाविधेति बहुव्रीहिः। मात्रपदेन परीक्षाव्यवच्छेदः। * चौर्येति। चौर एवायमिति निश्चयमित्यर्थः। * अन्यहस्तादिति। कात्यायनोऽप्येवमेव। अन्यस्य चोरस्य हस्तात्परिभ्रष्टं च्युतं, भुवि खन्यमानायामन्यार्थम् अत एवाकामादनिच्छयोत्थितं प्राप्तमन्यदीयं पूर्वं, प्रातिक्षिप्तं त्यक्तम् इत्यर्थः। तथा च इदमेवमुतानेनापहृतमिति परीक्षा कार्येति भावः। तदाह * यत्नादिति।

३। नारदान्तरमाह * तथेति। यत इति शेषः। यतो द्विविधा भावाः पदार्थाः दृश्यन्ते तस्मादित्याद्यर्थः। द्वैविध्यमेवाह * असत्याः सत्येति। अत एव विविधा इत्यपपाठः॥ २६७॥ २६८॥

मि० अव० एवं चौर्यशङ्कया गृहीतेनात्मा संशोधनीय इत्याह।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या० गृहीतः शङ्कया चौर्ये नात्मानं चेद्विशोधयेत् ।
दापयित्वा हृतं द्रव्यं चौरं दण्डेन दण्डयेत् ॥ २६९ ॥

मि० यदि चौर्यशङ्कया गृहीतस्तन्निस्तरणार्थमात्मानं न शोधयति तर्हि वक्ष्यमाणधनदानवधादिदण्डभाग्भवेत् । अतो मानुषेण तदभावे दिव्येन वाऽऽत्मा शोधनीयः ।

ननु नाहं चौर इति मिथ्योत्तरे कथं प्रमाणं संभवति । तस्याभावरूपत्वात् । उच्यते । दिव्यस्य तावद्भावाभावगोचरत्वं "रुच्यावाऽन्यतरः कुर्यात्" इत्यत्र प्रतिपादितम् । मानुषं पुनर्यद्यपि साक्षाच्छुद्धमिथ्योत्तरे न संभवति तथापि कारणसंसृष्टे भावरूपमिथ्याकारणसाधनमुखेनाभावमपि गोचरयत्येव । यथा नाशापहारकाले अहं देशान्तरस्थ इत्यभियुक्तैर्भाविते चौर्याभावस्याप्यर्थात्सिद्धेः शुद्धिर्भवत्येव॥२६९॥

बा. १ । अत एवाह * एवमिति । उक्तप्रकारेणेत्यर्थः । *आत्मा, स्वस्वरूपम् । चौर्ये इति विषयसप्तमी शङ्कायामन्वेति । तदाह * यदि चौर्येति । *तत्, ततः तच्छङ्कातः । लिङर्थो न विवक्षित इत्याह * शोधयतीति । उत्तरार्द्धमग्रिमस्य विशेषस्य सामान्येनानुवादो ऽन्यथा पौनरुक्त्यापत्तेः । अत आह * वक्ष्यमाणेति । अनुपदमेवेति भावः । धनदानेति पाठः । यद्यपि दापनं वक्ष्यमाणं तथापि तस्य राजधर्मत्वेन चोरानिष्ठत्वात् ततोऽर्थसिद्धस्य दानस्यात्र ग्रहणम् । अत एव दापनेत्यपपाठः । आदिना तदग्रिमपरिग्रहः । अनुवादत्वादेवाह * दण्डभाग्भवेदिति । सम्भावने लिङ् । अनुवादफलं प्रदर्शयन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वचनसार्थक्याय तात्पर्यार्थं प्रतिज्ञातमाह * अत इति ।

२ । नन्वयमप्यस्य नार्थः प्रमाणस्य भावगोचरत्वेन निःस्वरूपे ऽभावात्मके तुच्छे मिथ्योत्तरे प्रमाणाप्रसक्तेरित्याशयेन शङ्कते * नन्विति । उक्तत्वादाह * दिव्यस्येति । * साक्षात्, तद्विषयतया । *तथापीति । *मानुषं, कारणम् । *संसृष्टे, मिथ्योत्तरे। भावरूपमिथ्यात्वे यत्कारणं तस्य यत्साधनं तन्मुखेन तद्द्वारा अभावमपि गोचरयत्येवेत्यन्वयः । अत एव पूर्वपक्षे साक्षादित्युक्तम् । तथा च शुद्धमिथ्योत्तरे दिव्यमेव संसृष्टे तु मानुषमप्यनया रीत्येति भावः । एतदेवोदाहरणेन विशदयति * यथा नाशेति । द्रव्यनाशापहारयोः काले ऽहं देशान्तरस्थित इति चौर्यशङ्कया गृहीतेनाभियुक्तैः साक्ष्यादिभिर्भाविते साधिते चौर्याभावस्याप्यर्थात् सिद्धेस्तस्य शुद्धिरेवेत्यर्थः ॥२६९॥

मि० अव० चौरे दण्डमाह ।

या० चौरं प्रदाप्यापहृतं घातयेद्विविधैर्वधैः ।

मि० यस्तु प्रागुक्तपरीक्षया तन्निरपेक्षं वा निश्चितचौर्यस्तं स्वामिने अपहृतं धनं स्वरूपेण मूल्यकल्पनया वा दापयित्वा विविधैर्घातैर्घातयेत् ।

एतच्चोत्तमसाहसदण्डप्राप्तियोग्योत्तमद्रव्यविषयम् । न पुनः पुष्पवस्त्रादिक्षुद्रमध्यमद्रव्यापहारविषयम् ।

साहसेषु य एवोक्तस्त्रिषु दण्डो मनीषिभिः ।
स एव दण्डः स्तेयेऽपि द्रव्येषु त्रिष्वनुक्रमात् ॥

इति नारदवचनेन (व्यव. १४ । २१) वधरूपस्योत्तमसाहसस्योत्तमद्रव्यविषये व्यवस्थापितत्वात् ।

---

१ अस्य साधिते इत्यत्रान्वयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्पुनर्वृद्धमनुवचनम्—

अन्यायोपात्तवित्तत्वाद्धनमेषां मलात्मकम्।
अतस्तान् घातयेद्राजा नार्थदण्डेन दण्डयेत्॥

इति, तदपि महापराधविषयम्॥

मि० अव० चौरविशेषेऽपवादमाह।

या० सचिह्नं ब्राह्मणं कृत्वा स्वराष्ट्राद्विप्रवासयेत्॥२७०॥

मि० ब्राह्मणं पुनश्चौरं महत्यपराधे न घातयेदपि तु ललाटेऽङ्कयित्वा स्वदेशान्निष्कासयेत्। अङ्कनं च श्वपदाकारं कार्यम्।

तथाच मनुः, [अ. ९ श्लो. २३७]

गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः।
स्तेये च श्वपदं कार्यं ब्रह्महण्यशिराः पुमान्॥ इति।

एतच्च दण्डोत्तरकालं प्रायश्चित्तमचिकीर्षतो द्रष्टव्यम्।

यथाह मनुः, (अ. ९ श्लो. २४०)

प्रायश्चित्तं तु कुर्वाणाः पूर्वे वर्णा यथोदितम्।
नाङ्क्या राज्ञा ललाटे तु दाप्यास्तूत्तमसाहसम्॥

इति॥ २७०॥

बा० १। चौरपदं तथापरमित्याह *यस्तु प्रागुक्तेति। दापने प्रकारद्वयमित्याह * स्वरूपेणेति। स्मृत्यन्तराविरोधायाह *एतच्चेति। * उत्तमद्रव्येति। द्रव्यापहारेत्यर्थः।

२। अत्र मानमाह * साहसेष्विति। साहसाख्येषु प्रागुक्तेषु त्रिषु कर्मसु उत्तममध्यमाधमरूपेषु यो दण्ड उक्तः उत्तममध्यमाधमसाहसरूपः स एव त्रिषु द्रव्येषु उत्तममध्यमाधम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रूपेषु स्तेयेऽपि तद्विषयस्तेयाख्ये कर्मण्यपि अनुक्रमात्तेनैव क्रमेण दण्डो भवतीत्यर्थः । तथा चोत्तमद्रव्यापहारे उत्तमसाहसदण्डविधानाद्वधस्यास्याप्युत्तमसाहसात्मकदण्डत्वेनोत्तमद्रव्यापहारविषयत्वमेव युक्तमिति भावः । तदाह * वधेति ।

२ । अन्यविरोधं परिहरति * यत्पुनरिति । अन्यायेति बहुव्रीहिः । * एषां, चोराणाम् । वृद्धशातातपोऽप्येवम् ।

उ. ३ । * अपवादमिति । वधस्येति भावः ।

* महत्यपराधे, तत्रापि ।

तथा च गौतमः,

न शारीरो ब्राह्मणस्य दण्डः, कर्मवियोगविख्यापनविवासनाङ्ककरणानि, अवृत्तौ प्रायश्चित्ती स इति ।

शारीरस्ताडनाङ्गच्छेदनरूपः । कस्तर्हि दण्ड इत्याह * कर्मेत्यादि । तेन सह सर्वक्रियानारम्भः । विख्यापनं डिण्डिमकेन परिभ्रामणं स्तेयलक्षणस्तेयप्रकाशनार्थम् । विवासनं देशान्निष्कासनम् । अङ्ककरणं श्वपदेनाङ्कनम् । अवृत्तौ अन्येन प्रकारेण जीवनासंभवेन यदि स्तेयं करोति तदा तस्य प्रायश्चित्तमात्रं न दण्ड इति तदर्थः । वक्ष्यमाणमनोराह * ललाटे इति । आकारशब्दः सदृशवाची । विशेषमाह * एतच्चेति । श्वपदाकारमङ्कनं चेत्यर्थः । अनेन दण्डप्रायश्चित्तयोः क्रमः सूचितः । * पूर्वे, ब्राह्मणक्षत्रियविशः । * यथोदितं, यथाशास्त्रविहितम् प्रायश्चित्तमित्यन्वयः ॥ २७० ॥

मि० अव. चौरादर्शने अपहृतद्रव्यप्राप्त्युपायमाह ।

या० घातितेऽपहृते दोषो ग्रामभर्तुरनिर्गते ।
विवीतभर्तुस्तु पथि चौरोद्धर्तुरवीतके ॥ २७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि० यदि ग्राममध्ये मनुष्यादिप्राणिवधो धनापहरणं वा जायते तदा ग्रामपतेरेव चौरोपेक्षादोषः, तत्परिहारार्थं स एव चौरं गृहीत्वा राज्ञेऽर्पयेत्। तदशक्तौ हृतं धनं धनिने दद्यात्, यदि चौरपदं स्वग्रामान्निर्गतं न दर्शयति। दर्शिते पुनस्तत्पदं यत्र प्रविशति तद्विषयाधिपतिरेव चौरं धनं वाऽर्पयेत्।

तथा च नारदः, (परिशिष्टेश्लो. १६। १७)

गोचरे यस्य लुप्येत तेन चौरः प्रयत्नतः।
ग्राह्यो दाप्योऽथवाऽशेषं पदं यदि न निर्गतम्॥
निर्गते पुनरेतस्मान्न चेदन्यत्र पातितम्।
सामन्तान्मार्गपालांश्च दिक्पालांश्चैव दापयेत्॥इति।

विवीते त्वपहारे विवीतस्वामिन एव दोषः। यदा त्वध्वन्येव तद्धृतं भवत्यवीतके वा विवीतादन्यत्र क्षेत्रे तदा चौरोद्धर्तुर्मार्गपालस्य दिक्पालस्य वा दोषः॥ २७१॥

बा. १। ग्रामेत्युक्तेराह *यदि ग्रामेति। घातितापहृतयोर्भावयोर्विकल्प इत्याह * मनुष्येति। सर्वं वाक्यमिति न्यायेनाह *एवेति। तत्प्रयुक्तदोष इत्यर्थः। प्रतिज्ञातं तात्पर्यार्थमाह * तत्परिहारार्थमिति। अनिर्गते इति सति सप्तमी तत्र प्रतियोगी लक्ष्योऽर्थ इत्याशयेन सतात्पर्यार्थं तद्व्याचष्टे * तदशक्ताविति।

२। * ताद्विषयेति। तद्देशाधिपतिरित्यर्थः। एतेन ग्रामपतिनिरासः। * चौरं धनं वेति। आदौ चौरमर्पयेत्तदशक्तौ धनमित्यर्थः। * गोचरे, विषये। ग्रामादिरूपे। * ग्राह्यः, ग्रहणीयः। अशेषमिति छेदः। अथवा अशेषधनं दापनीयः। त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च्छेषमाह * यदीति । अशेषपदेन दण्डस्यापि ग्रहणम् । पुनस्त्वर्थे । * एतस्मात्, तद्विषयात् । नेति । उभयं कुर्यादिति शेषः । निर्गते तु पदे दद्यान्नेति पाठान्तरम् । * तादिति । यदि तदेति शेषः । यदि तत्पदमन्यत्र पातितं तदा यथासम्भवं सामन्तादीन् दापयेदित्यर्थः । अत एव चेदन्यत्रेति पाठान्तरम् । एवेन तद्व्यावृत्तिः ।

३ । उत्तरार्द्धार्थमाह * विवीतेत्वित्यादिता । प्रचुरतृणकाष्ठो रक्ष्यमाणः परिगृहीतो भूप्रदेशो विवीतः इति स्वामिपालप्रकरणे उक्तम् । एवः प्राग्वत् । विवीते इत्यर्थाल्लब्धम् । मूले पथीत्युत्तरान्वयि । मार्गाविवीतकयोर्विकल्पोऽर्थात् । अत एव चौरोद्धर्तुरित्यस्यार्थद्वयमित्याह * यदा त्विति । अवीतके इत्यस्यार्थो * विवीतादिति । यथासंख्येनाह *मार्गेति ॥ १७१ ॥

मि० अव. किञ्च ।

या० स्वसीम्नि दद्याद् ग्रामस्तु पदं वा यत्र गच्छति ।
पञ्चग्रामी बहिः क्रोशाद्दशग्राम्यथवा पुनः ॥२७२॥

मि० यदा पुनर्ग्रामाद्बहिः सीमापर्यन्ते क्षेत्रे मोषादिकं भवति तदा तद्ग्रामवासिन एव दद्युः, यदि सीम्नो बहिश्चौरपदं न निर्गतम् । निर्गते पुनर्यत्र ग्रामादिके चौरपदं प्रविशति स एव चौरार्पणादिकं कुर्यात् । यदा त्वनेकग्राममध्ये क्रोशमात्राद्बहिः प्रदेशो घातितो मुषितो वा, चौरपदं च जनसंमर्दादिना भग्नं, तदा, पञ्चानां ग्रामाणां समाहारः पञ्चग्रामी दशग्रामसमाहारो दशग्रामी वा दद्यात् । विकल्पवचनं तु यथाप्रत्यासत्ति अपहृतधनप्रत्यर्पणादिकं कुर्यादित्येवमर्थम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदा त्वन्यतोऽपहृतं द्रव्यं दापयितुं न शक्नोति तदा स्वकोशादेव राजा दद्यात्।

चौरहृतमवजित्य यथास्थानं गमयेत्स्वकोशाद्वा दद्यादिति गौतमस्मरणात्।

मुषितसन्देहे मानुषेण दिव्येन वा निर्णयः कार्यः।

यदि तस्मिन् दाप्यमाने भवेन्मोषे तु संशयः।
मुषितः शपथं दाप्यो बन्धुभिर्वापि साधयेत्॥
इति वृद्धमनुस्मरणात्॥ २७२॥

बा. १। स्वसीम्नीत्यस्यार्थमाह *सीमेति। ग्रामाद्बहिरित्यनेन ग्रामपतिव्यवच्छेदः। एवमग्रेऽपि। आदिना वधः। ग्रामपदं जने लाक्षणिकमित्याह * तद्ग्रामेति। पदं वेति व्यवस्थितविकल्प इत्याह * यदीत्यादि। ग्रामादीति आदिना विवीतादिपरिग्रहः। चौरार्पणादीति आदिना धनार्पणादि। इदमेकग्रामादिपरम्।

२। उत्तरार्धं हि तत्समूहपरमित्याह * यदा त्विति। एकवचनादाह * क्रोशमात्रादिति। तत्तद्ग्रामादित्यादिः। घातित इत्यादिः प्रथमान्तपाठः। प्रागुक्ताविषयत्वायाह * चौरेति। आर्थिकविकल्पमाह * वा दद्यादिति। ग्रामसमूहसंख्याया अनियतत्वादिदमपि दिक्प्रदर्शनम्। अत एव यथासम्भवं व्यवस्थितविकल्पोऽयम्।

३। नन्वेवम् "अथ वा पुनः" इति व्यर्थम्, उक्तरीत्या नियतपक्षद्वयस्यैवाभावेन तत्परतयाऽपि तस्यात्यन्तमनुपयोगात् इत्यत आह * विकल्पेति। प्रत्यासत्तिमनतिक्रम्येत्यव्ययीभावः। तत्प्रत्यासत्तीति पाठे तयोः प्रत्यासत्तीत्याद्यर्थः। अपहाराधारभूप्रदेशात् ये ग्रामाः प्रत्यासन्नास्ते एव दद्युर्न तु पञ्चग्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म्येव दशग्राम्येवेत्येवं नियम इत्येवंनियमनिवृत्त्यर्थम् अथ वेति विकल्पवचनमित्यर्थः ।

४ । विशेषमाह * यदा त्विति । * अन्यतः, चोरग्रामाधिपादितः । दापनेऽन्वयः । * अवाजित्य, ततः परावर्त्य । परीक्षणोत्तरमपि दापनसमये कारणान्तरवशात्संदेहे विशेषमुक्तरीत्यैवाह * मुषितेति । * यदीति । तस्मिन् उक्तलिङ्गवशाच्छङ्कया ग्रहणोत्तरं परीक्षिते चौर इति निश्चित्य गृहीते पुरुषे धनं दाप्यमाने सति यदि मोषे चौर्ये सन्देहो भवेत् कारणान्तरतः, तदा बन्धुभिः धर्मबन्धुभिः साक्षिभिः साधयेत् सन्देहनिवृत्तिं कुर्यात्, अथ वा शपथं दाप्यः स इत्यर्थः । यद्यप्यत्रादौ दिव्यमुक्तं तथाप्यस्य क्रमाबोधकत्वात्तयोः क्रमस्य पूर्वं स्पष्टमुक्तत्वात्तथैवेति भावः । अत एव प्रतिज्ञायां तथैवोक्तम् । शुद्धमिथ्योत्तरे तदसम्भवात्तस्यैवावश्यकत्वमभिप्रेत्य मनुना तथोक्तम् । एतदभिप्रायेणापि दिव्यस्येति प्रागुक्तं व्याख्यात्रेति बोध्यम् ॥२७२॥

मि० अव. अपराधविशेषेण दण्डविशेषमाह ।

या० बन्दिग्राहांस्तथा वाजिकुञ्जराणां च हारिणः ।
प्रसह्य घातिनश्चैव शूलानारोपयेन्नरान् ॥ २७३ ॥

मि० बन्दिग्राहादीन् बलावष्टम्भेन घातकांश्च चोरान् शूलानारोपयेत् । अयं च वधप्रकारोपदेशः ।

(अ. ९ श्लो. २८०)
अग्न्यगारायुधागारदेवतागारभेदकान् ।
हस्त्यश्वरथहर्तॄंश्च हन्यादेवाविचारयन् ॥
इति मनुस्मरणात् ॥ २७३ ॥

बा० १ । तथाशब्दः किंचेत्यर्थे आदौ बोध्यः । बन्दिग्राहा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिकं चोरविशेषणमित्याह * बन्दीति । आदिना वाजिकुञ्जरहारिग्रहणम् । तत्र चेन गोरथादिग्रहणम् । प्रसह्येत्याद्यर्थो *बलावष्टम्भेनेति । * घातकान्, तांश्च । क्वचित्तथैव पाठः । नरानित्यस्य व्याख्या * चोरानिति । बन्दि निरोधस्थानं ग्राहयन्ति ते बान्दिग्राहाः । ननु शूलानारोपयेदित्यनेन तेषां तावन्मात्रं प्रतीयते न वधः । तथा च श्रोत्रियायोपकल्पयेदित्यत्रेवात्रापि तावन्मात्रेणैव विधिसिद्धेस्तन्मात्रमेव कृत्वा पुनरुत्तारणं कार्यं न वध इत्यत आह * अयं च वधेति । अत्र मानमाह * अग्न्यगारेति । हर्तॄंश्चेति पाठः । *अविचारयन्, अविलम्बयन् । अनेन तेषामपि एकदेशानुमतिद्वारा वधे सिद्धे केन प्रकारेण स इति विशेषाकाङ्क्षायां शूलारोपणरूपप्रकारविशेषो मूले उक्त इति भावः ॥ २७३ ॥

मि० अव. किंच ।

या० उत्क्षेपकग्रन्थिभेदौ करसन्दंशहीनकौ ।
कार्यौ द्वितीयापराधे करपादैकहीनकौ ॥ २७४ ॥

मि० वस्त्राद्युत्क्षिपत्यपहरतीत्युत्क्षेपकः । वस्त्रादिबद्धं स्वर्णादिकं विस्रस्योत्कृत्य वा योऽपहरत्यसौ ग्रन्थिभेदकः । तौ यथाक्रमं करेण, सन्दंशसदृशेन तर्जन्यङ्गुष्ठेन च हीनौ कार्यौ । द्वितीयापराधे पुनः करश्च पादश्च करपादं तच्च तदेकं च करपादैकं तद्धीनं ययोस्तौ करपादैकहीनकौ कार्यौ । उत्क्षेपकग्रन्थिभेदकयोरेकमेकं करं पादं च छिन्द्यादित्यर्थः ।

एतदप्युत्तमसाहसप्राप्तियोग्यद्रव्यविषयम् ।
तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति नारदवचनात् । (व्यव. १४ । ८) तृतीयापराधे तु वध एव ।

तथा च मनुः, (अ. ९ श्लो. २७७)

अङ्गुली ग्रन्थिभेदस्य छेदयेत्प्रथमे ग्रहे ।

द्वितीये हस्तचरणौ तृतीये वधमर्हति ॥ इति ।

जातिद्रव्यपरिमाणतो मूल्याद्यनुसारतो दण्डः कल्पनीय इति ॥ २७४ ॥

बा० १ । *विस्रस्य, ग्रन्थिं विमुच्य । *उत्कृत्य, छित्त्वा । उत्क्षेपकः करहीनो, ग्रन्थिभेदस्तर्जन्यङ्गुष्ठेन हीन इति भावः । सन्दंशपदं गौणलाक्षणिकमित्याह * सन्दंशसदृशेनेति । तर्जन्यङ्गुष्ठेनेति मध्यमपदलोपिसमासः । इदमर्थात्प्रथमापराधविषयम् । अत एवाह * द्वितीयापराधे पुनरिति । * करपादैकमिति । यद्यपि पूर्वकालैकेति समासे वैपरीत्यमुचितं तथापि बाहुलकान्मयूरव्यंसकादित्वाद्वा निर्वाहो बोध्यः । प्राग्वत् प्रतीयमानयथासंख्यस्य वक्ष्यमाणमन्वनुरोधेन निरासायाह * उत्क्षेपकेति ।

२ । विशेषमाह * एतदपीति । अपिना पूर्वसमुच्चयः । * द्रव्येति । तदपहारेत्यर्थः । तत्र मानमाह * तदङ्गेति ।

३ । न्यूनतां निराचष्टे * तृतीयेति । अङ्गुली इति द्विवचनम् । तद्द्वयं च तर्ज्जन्यङ्गुष्ठात्मकमेव । संभवेन पूर्वं संदंशपदेन तस्यैव ग्रहात् । * प्रथमे इति । प्रथमे ग्रहणे इत्यर्थः । प्रथमचौर्ये इति यावत् । *हस्तेति । अत्रेतरेतरद्वंद्व आर्षः ।

४ । *जातीति । जातिश्च द्रव्यं च परिमाणं चेति द्वंद्वः । ततो यन्मूल्यादि तदनुरोधेनेत्यर्थः । अनुक्तदण्डस्थले इति भावः । * इतीति । इत्यन्यत्रोक्तत्वादित्यर्थः ॥ २७४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि० अव. जातिद्रव्यपरिमाणपरिग्रहविनियोगवयःशक्तिगुणदेशकालादीनां दण्डगुरुलघुभावकारणानामानन्त्यात्प्रतिद्रव्यं वक्तुमशक्तेः सामान्येन दण्डकल्पनोपायमाह।

या० क्षुद्रमध्यमहाद्रव्यहरणे सारतो दमः।
देशकालवयःशक्ति सञ्चिन्त्यं दण्डकर्मणि॥ २७५॥

मि० क्षुद्राणां मध्यमानामुत्तमानां च द्रव्याणां हरणे सारतो मूल्याद्यनुसारतो दण्डः कल्पनीयः। क्षुद्रादिद्रव्यस्वरूपं च—

नारदेनोक्तम्, (व्यव. १४। श्लो. १४। १५।१६)
मृद्भाण्डासनखट्वास्थिदारुचर्मतृणादि यत्।
शमीधान्यं कृतान्नं च क्षुद्रं द्रव्यमुदाहृतम्॥
वासः कौशेयवर्जं च गोवर्जं पशवस्तथा।
हिरण्यवर्जं लोहं च मध्यं व्रीहियवा अपि॥
हिरण्यरत्नकौशेयस्त्रीपुङ्गजवाजिनः।
देवब्राह्मणराज्ञां च द्रव्यं विज्ञेयमुत्तमम्॥

अत्र त्रिप्रकारेष्वपि द्रव्येष्वौत्सर्गिकः प्रथममध्यमोत्तमसाहसरूपो दण्डनियमः—

तेनैव दर्शितः, (व्यव. १४। २१)
साहसेषु य एवोक्तस्त्रिषु दण्डो मनीषिभिः।
स एव दण्डः स्तेयेऽपि द्रव्येषु त्रिष्वनुक्रमात्॥ इति।

मृन्मयेषु मणिकमल्लिकादिषु, गोवाजिव्यतिरिक्तेषु च महिषमेषादिपशुषु, ब्राह्मणसंबन्धिषु च कनकधान्यादिषु तरतमभावोऽस्तीति उच्चावचदण्डवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शेषाकाङ्क्षायां मूल्याद्यनुसारेण दण्डः कल्पनीयः। तत्र च दण्डकर्मणि दण्डकल्पनायां तद्धेतुभूतं देशकालवयःशक्ति सम्यक् चिन्तनीयम् ।

एतच्च जातिद्रव्यपरिमाणपरिग्रहादीनामुपलक्षणम् । तथाहि । अष्टापाद्यं स्तेये किल्बिषं शूद्रस्य द्विगुणोत्तराणीतरेषां प्रतिवर्णं विदुषोऽतिक्रमे दण्डभूयस्त्वमिति । अयमर्थः । किल्बिषशब्देनात्र दण्डो लक्ष्यते । यस्मिन्नपहारे यो दण्ड उक्तः स विद्वच्छूद्रकर्तृकेऽपहारे अष्टगुण आपादनीयः । इतरेषां पुनर्विद्क्षत्रब्राह्मणानां विदुषां स्तेये द्विगुणोत्तराणि किल्बिषाणि षोडशद्वात्रिंशच्चतुःषष्टिगुणा दण्डा आपादनीयाः । यस्माद्विद्वच्छूद्रादिकर्तृकेऽपहारे दण्डभूयस्त्वम् !

मनुनाऽप्ययमेवार्थो दर्शितः, (अ. ८ श्लो. ३३७।३३८)

अष्टापाद्यं तु शूद्रस्य स्तेये भवति किल्बिषम् ।
षोडशैव तु वैश्यस्य द्वात्रिंशत्क्षत्रियस्य तु ॥
ब्राह्मणस्य चतुःषष्टिः पूर्णं वापि शतं भवेत् ।
द्विगुणा वा चतुःषष्टिस्तद्दोषगुणवेदिनः ॥ इति ।

तथा परिमाणकृतमपि दण्डगुरुत्वं दृश्यते ।

यथाह मनुः, (अ. ८ श्लो ३२०)

धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं वधः ।
शेषेत्वेकादशगुणं दाप्यस्तस्य च तद्धनम् ॥ इति ।

विंशतिद्रोणकः कुम्भः । हर्तृह्रियमाणस्वामिगुणापेक्षया सुभिक्षदुर्भिक्षकालाद्यपेक्षया च ताडनाङ्गच्छेदनवधरूपा दण्डा योज्याः । तथा संख्याविशेषादपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दण्डविशेषो रत्नादिषु,
(ना. परि. २७)
सुवर्णरजतादीनामुत्तमानां च वाससाम् ।
रत्नानां चैव सर्वेषां शतादभ्यधिके वधः ॥
पञ्चाशतस्त्वभ्यधिके हस्तच्छेदनमिष्यते।(म.८।१२२)
शेषेष्वेकादशगुणं मूल्याद्दण्डं प्रकल्पयेत् ॥ इति ।
तथा द्रव्यविशेषादपि, (अ. ८ श्लो. ३२३)
पुरुषाणां कुलीनानां नारीणां वा विशेषतः ।
मुख्यानांचैव रत्नानां हरणे वधमर्हति ॥
अकुलीनानां तु दण्डान्तरम् । (ना. परि. २८)
पुरुषं हरतो दण्ड उक्त उत्तमसाहसः ।
स्त्र्यपहारे तु सर्वस्वं कन्यां तु हरतो वधः॥ इति ।
क्षुद्रद्रव्याणां तु माषतो न्यूनमूल्यानां-
मूल्यात्पञ्चगुणो दमः । (ना. परि. २२।२३।२४)
काष्ठभाण्डतृणादीनां मृन्मयानां तथैवच ।
वेणुवैणवभाण्डानां तथा स्नाय्वस्थिचर्मणाम् ॥
शाकानामार्द्रमूलानां हरणे फलमूलयोः ।
गोरसेक्षुविकाराणां तथा लवणतैलयोः ॥
पक्वान्नानां कृतान्नानां मत्स्यानामामिषस्य च ।
सर्वेषामल्पमूल्यानां मूल्यात्पञ्चगुणो दमः ॥
इति नारदस्मरणात् । यः पुनः प्रथमसाहसः क्षुद्रद्रव्येषु शतावरः पञ्चशतपर्यन्तः, असौ माषमूल्ये तदधिकमूल्ये वा यथायोग्यं व्यवस्थापनीयः । यत् पुनर्मानवं क्षुद्रद्रव्यगोचरं वचनं "तन्मूल्याद् द्विगुणो दम" इति, तत् अल्पप्रयोजनशरावादिविषयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा अपराधगुरुत्वादपि दण्डगुरुत्वम्। (मनु. ९।२७६)

सन्धिं छित्त्वा तु ये चौर्यं रात्रौ कुर्वन्ति तस्कराः।
तेषां छित्त्वा नृपो हस्तौ तीक्ष्णशूले निवेशयेत्॥

इति। एवं सर्वेषामानन्त्यात्प्रतिद्रव्यं वक्तुमशक्तेर्जातिपरिमाणादिभिः कारणैर्दण्डगुरुलघुभावः कल्पनीयः। पथिकादीनां पुनरल्पापराधे न दण्डः।

यथाह मनुः, अ. ८ श्लो. ३४१)

द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके।
आददानः परक्षेत्रान्न दण्डं दातुमर्हति॥

तथा,

चणकव्रीहिगोधूमयवानां मुद्गमाषयोः।
अनिषिद्धैर्ग्रहीतव्यो मुष्टिरेकः पथि स्थितैः॥

तथैव सप्तमे भक्ते भक्तानि षडनश्नता। (म. ११।१६)
अश्वस्तनविधानेन हर्तव्यं हीनकर्मणः॥ इति॥२७५॥

बा० १। इदमप्युपलक्षणमित्याह * जातीति। जातिश्च द्रव्यं च परिमाणं च परिग्रहश्च विनियोगश्च वयश्च शक्तिश्च गुणश्च देशश्च कालश्च तदादीनां स्मृत्यन्तरोक्तानामित्यर्थः। तत्र ब्राह्मणपरिगृहीताया गोर्हरणादधिको दण्ड इति ब्राह्मणपरिग्रहोऽधिकदण्डकारणम्। तथा यदि सैवाग्निहोत्रार्थदोहाय विनियुक्ता तदा तस्या हरणे ततोऽप्यधिको दण्ड इति तथा विनियोगोऽप्यधिकदण्डकारणम्। एवंविधपरिग्रहविनियोगयोरभावे तावेव न्यूनदण्डकारणे इति बोध्यम्। महदर्थे *उत्तमानामिति। बहुवचनान्तानां द्वन्द्व इति भावः।

२।उत्तरार्द्धं व्याख्यातुमेतद्विषयं विवेचयितुं चोपयुक्तमाह * क्षुद्रादीति। *मृद्भाण्डेति। यथाऽत्र प्रयोगासिद्धिर्भवति तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वन्द्वाः कार्याः। एवं हिरण्यरत्नेत्यत्रापि। मृद्भाण्डं मृन्मयम्। शमीधान्यं माषादि।

माषादयः शमीधान्ये शूकधान्ये यवादय इत्यमरः।

कृतान्नं साधितान्नम् ओदनादि। वर्जमिति णमुल्। वर्जयित्वेत्यर्थः। *लोहं च, रजतादिकम्। *मध्यमिति। द्रव्यमुदाहृतमित्यस्यानुषङ्गः। अग्रे सर्वानुषङ्गो यथासम्भवम्। व्रीहीति बहुवचनान्तयोः "विभाषा वृक्ष" इति पाक्षिक इतरेतरद्वन्द्वः। *गोगजेति। एवं च गोवर्जमित्यत्र गोपदमनयोरप्युपलक्षणमिति भावः। * देवेति। अभ्यर्हितत्वात्पूर्वनिपातः। *च द्रव्यं, द्रव्याणि च।

३। एतत्प्रसङ्गादविरोधायाह * अत्रेति। * औत्सर्गिकः, सामान्यविहितः। *तेनैव, नारदेनैव। तच्चानुपदमेव व्याख्यातम्। नन्वेवं मूलविरोधस्तस्येति मूलस्य का गतिः, अत आह *मृन्मयेष्विति। मणिकादयस्तत्पात्रविशेषाः। इदं क्षुद्रद्रव्यमात्रोपलक्षणम्। * गोवाजीति। इदं मध्यमद्रव्यमात्रस्य। अभ्यर्हितत्वान्महिषस्य पूर्वनिपातः। एवं कनकेत्यत्रापि। इदमप्युत्तमद्रव्यमात्रस्योपलक्षणम्। तरतमभावोऽस्तीति पाठः। तारतम्येति पाठे स्वार्थे ष्यञ्। यद्वा तारतम्यस्यावान्तरवैलक्षण्यस्य भावः सत्ताऽस्तीत्यर्थः। प्रत्येकमिति शेषः त्रिष्वपि। अत एव मणिकादीत्यादिना प्रत्येकमुत्तमाधमयोर्ग्रहणं कृतम्। *उच्चावचेति। यद्यप्ययं मयूरव्यंसकादिः, तत्र च उदक् चावाक् चोच्चावचमित्यभियुक्तैर्व्याख्यातं तथाप्युच्चनीचमित्यर्थे स इति मतेनेदम्। तत्र लक्षणा वेति भावः। तथा च नारदतो यथाक्रमं तेषु त्रिषु त्रिविधोक्तरूपदण्डस्याविशेषेण प्राप्तौ अवान्तरतारतम्येन तद्विशेषाकाङ्क्षायां विशेषबोधकम् मूलवचनपूर्वार्द्धमि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ति अयं तात्पर्यार्थ इति आशयः।

४। मूल्यादीत्यादिशब्दसङ्ग्राह्यप्रदर्शकमूलोत्तरार्धं व्याचष्टे * तत्र चे ति। तस्यां पूर्वोक्तायामित्यर्थः। दण्डकर्मणीति मौलस्य व्याख्या * दण्डकल्पनायामिति। बीजमाह *तद्दोत्विति। * शक्तीति। अनेन मूलेऽपि समाहारद्वन्द्वः सूचितः। पूर्वनिपातः प्राग्वत्। सम्–शब्दार्थमाह *सम्यगिति।

५। नन्वत्रैते एव चत्वार उक्ताः अवतरणे त्वन्येऽप्युक्ता इति विरोधः, अत आह * एतच्चेति। * परिग्रहादीनां, तेषामपि। आदिना विनियोगादिपरिग्रहः। तथा चात्रोपात्ता एव दण्डकल्पनायां हेतव इति न, किं तूपलक्षणतया स्मृत्यन्तरोक्ता अन्येऽपि। अत एव तद्विरोधोऽपि नेति भावः।

६। तदेव स्मृत्यन्तरजातमनुक्रमेण दर्शयति * तथाहीत्यादिना। तत्र तावद्वर्णरूपजात्यपेक्षया गुणापेक्षया च स्तेयविशेषेण दण्डविशेषबोधकं वासिष्ठमाह * अष्टापाद्यमिति। अत्र दण्डानुक्तेरसम्बद्धत्वनिरासायाह * अयमर्थ इति। *लक्ष्यते इति। तस्य तत्कार्यत्वात्। अतिक्रमे इत्यस्य मध्यमणिन्यायेनोभयत्रान्वयः। तदाह * स विद्वदिति। अष्टन्शब्दोऽपि लाक्षणिक इत्याह * अष्टगुण इति। विदुष इति वचनविपरिणामेन विडादिविशेषणम्। * स्तेये, विषये। प्रतिवर्णमिति शेषः। *द्विगुणोत्तराणीति। उत्तरमुत्तरं द्विगुणानीत्यर्थः। मयूरेति समासः। तदर्थमाह * षोडशेति। उक्तहेतोः अतिक्रमे इत्यादि हेतुपरमित्याह *यस्मादिति। अनेन यत इति शेषः सूचितस्तत्र। इतिरर्थसमाप्तौ। आपिना—

येन दोषेण शूद्रस्य दण्डो भवति धर्मतः।
तेन विट्क्षत्रविप्राणां द्विगुणो द्विगुणो भवेत्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति कातीयस्य समुच्चयः। *अष्टापाद्यमिति। अर्थः प्राग्वत्। एवशब्दः पूर्वपद्ये एव पूर्वोत्तरयोरपि सम्बध्यते। तद्दोषेत्यस्य तु सर्वत्र पद्यद्वये सम्बन्धः। तस्य वस्तुनो दोषगुणयोर्वेदने ज्ञाने सतीत्यर्थः। एवं वासिष्ठे विद्वत्ताऽप्येतद्विषयैव। तदर्थमेव मनूक्तिः। तद्दोषगुणवेदिन इति तत्र पाठान्तरं कल्पतर्वादिसंमतम्। गुणविद्विष इति त्वपपाठः। अर्थासङ्गतेः। ब्राह्मणस्य तु तत्रापि गुणाद्यपेक्षया पक्षत्रयमाह * ब्राह्मणस्येति। अत एव पूर्वत्रैवकारः सफलः। तथा चायं दण्डः शूद्रत्वादिजात्यपेक्षो विद्वत्त्वरूपगुणापेक्षश्चेति तयोरत्र हेतुत्वमिति भावः।

७। द्रव्यतः परिमाणेति भिन्नमिति सूचयन्व्युत्क्रमेणाह *तथा परिमाणेति। * धान्यमिति। दशसंख्येभ्यः कुम्भेभ्यो ऽभ्यधिकं धान्यं हरतो वधः। शेषे त्विति पाठः। शेषेऽपीति पाठे अपिस्त्वर्थे। शेषेष्विति पाठान्तरम्। एकस्मादारभ्य दशकुम्भपर्यन्तं हरणे अपहृतादेकादशगुणं दण्डो दाप्यः। स्वामिनश्चापहृतं धनं दाप्य इत्यर्थः। कुम्भोऽत्र न प्रसिद्धः, किं तु परिमाणविशेष इत्याह * विंशतीति। द्विपलशतं द्रोणः।

८। नन्वत्र वधदण्ड उक्तः स च ताडनादिप्राणवियोजनान्तव्यापाररूपः। तथा च सर्वत्र समुच्चयापत्तिः, अत आह *हर्तृह्रियमाणेति। हर्तुर्गुणापेक्षया ह्रियमाणस्य द्रव्यस्य गुणापेक्षया स्वामिनो गुणापेक्षया चेत्यर्थः।

९। परिमाणशब्दः परिच्छेदकमात्रपर इत्याह * तथा संख्येति। तत्रादौ नारदमाह *सुवर्णेति। *सर्वेषां, साधारणानाम्। अभ्याधिकमिति पाठः। एवं प्रागपि। मनुमाह * पञ्चाशत इति।

तथा धटितमेयानां शतादभ्यधिके वधः। (म. ८।३२१)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुवर्णरजतादीनामुत्तमानां च वाससाम् ॥

इति पूर्वमितः। धटितमेयानां तुलापरिच्छेद्यानां पूर्वोक्तानामेव पञ्चाशतोऽभ्यधिके हस्तच्छेदः। शतादि पलसम्बन्धि बोध्यम्। * शेषेषु, एकपलादारभ्य पञ्चाशत्पर्यन्तमपहारे ऽपहृतद्रव्यमूल्यादेकादशगुणं दण्डं दापयेदित्यर्थः। स्वामिने वस्तुदानं तु समानमेवेति भावः। * द्रव्यविशेषादपि, दण्डगुरुत्वं दृश्यते इत्यस्यानुषङ्गः। मनुमाह * पुरुषाणामिति। मुख्यानां चैव रत्नानामिति सर्वसंमतस्तृतीयपादे पाठः। रत्नानां चैव सर्वेषामित्यपपाठः। अत एव प्रागुक्तनारदाविरोधो न। अत एव च महाकुलजातानां मनुष्याणां विशेषेण स्त्रीणां महाकुलजातानां मनुष्याणां विशेषेण स्त्रीणां महाकुलप्रसूतानां श्रेष्ठानां च रत्नानां वज्रवैदूर्यादीनामपहारे वधमर्हतीति तद्व्याख्यातारः।

१०। कुलीनानामित्युक्तेः फलमाह * अकुलीनानामिति। स्त्रीणां चेत्यर्थः। नारदमाह *पुरुषमिति। *स्त्र्यपराधेन, तदपहारे। *सर्वस्वं, तदपहारो दण्डः प्रोक्तः। स्त्र्यपहारे तु सर्वस्वमिति पाठान्तरम्। तत्रैव विशेषमाह * कन्यामिति। * वधः, दण्डः प्रोक्तः। सर्वस्वं हरतो नारीमिति कल्पतरौ तृतीयपादपाठः।

कात्यायनोऽपि,

सर्वस्वं हरतः स्त्रीं तु कन्यायाः हरणे वधः।
वाजिवारणबालानां चाददीत बृहस्पतिः॥ इति।

सर्वस्वमित्यस्यानुषङ्गः।

११। एवं दण्डगुरुत्वमुक्त्वा क्षुद्रद्रव्यविषये एव संभवादल्पानुसारेण लघुदण्डमाह * क्षुद्रेति। * माषेति। माषतो न्यूनेत्यर्थः। क्वचित्तथैव पाठः। अत्र मानमाह * काष्ठेति। तस्य भाण्डेत्यर्थः। अभ्यर्हितत्वात्पूर्वनिपातः। एवं लवणे त्यत्रापि। वे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णुश्च तद्विकारभाण्डानि चेत्यर्थः। आर्द्रं मूलं येषां तेषां शाकानाम्। अल्पमूल्यानामिति कल्पतरुपाठस्तु न युक्तः। पौनरुक्त्यापत्तेः। *पक्वान्नानाम्, अपूपादीनाम्। *कृतान्नानाम्, ओदनादीनाम्। *मत्स्यानाम्, मद्यानामिति कल्पतरौ पाठः। आमिषम् मांसम्। ओदनस्य चेति कल्पतरुधृतपाठस्तु न युक्तः। कृतान्नानामित्यनेन पौनरुक्त्यापत्तेः। * अल्पेति। माषतो न्यूनेत्यर्थः।

१२। तदेतत्साधयन् अस्य नारदस्य—

तस्य दण्डः क्रियापेक्षः प्रथमस्य शतावरः।
मध्यमस्य तु शास्त्रज्ञैर्दृष्टः पञ्चशतावरः॥ (व्यव. १४।७)

इति साहसप्रकरणोक्तनारदविरोधं परिहरति *यःपुनरिति। साहसप्रकरणे उक्त इति शेषः। ततोऽप्यस्य यावन्न्यूनमल्पद्रव्यविषयकत्वमिति भावः।

१३। नारदस्य मनुविरोधं परिहरति *यत्पुनरिति। तदेवाह * तन्मूल्यादिति। (मनु. ८)

सूत्रकार्पासकिण्वनां गोमयस्य गुडस्य च।
दध्नः क्षीरस्य तक्रस्य पानीयस्य तृणस्य च॥ (३२६)
वेणुवैदलभाण्डानां लवणानां तथैवच।
मृन्मयानां च हरणे मृदो भस्मन एव च॥ (३२७)
मत्स्यानां पक्षिणां चैव तैलस्य च घृतस्य च।
मांसस्य मधुनश्चैव यच्चान्यत्पशुसम्भवम्॥ (३२८)
अन्येषां चैवमादीनाम् मद्यानामोदनस्य च।
पक्वान्नानां च सर्वेषां तन्मूल्याद्द्विगुणो दमः॥ (३२९)

इति हि मनुना तु तत्र द्विगुणत्वमुक्तमिति विरोधः स्पष्ट एव। सूत्रम्ऊर्णादि, कार्पासं सूत्रम्, किण्वं सुराबीजद्रव्यम्, वेणुखण्डनि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्मितजलाहरणपात्राणि, यच्चान्यत् पशुसम्भवं मृगचर्मखड्गशृङ्गादि, अन्येषामप्येवंविधानाम् असारप्रायाणां मनःशिलादीनां, पक्वान्नानामोदनभिन्नानामपूपादीनाम्, अन्येषां प्रसिद्धानां चापहारे कृते मूल्यात् द्विगुणो दण्ड इति तद्व्याख्यातारः । अल्पमूल्ये उक्तत्वादाह * अल्पप्रयोजनेति ।

इदं च अवतरणोक्तकालादीनामित्यादिसंग्राह्यं दण्डाल्पत्वे।

१४ । अन्यदपि दण्डगुरुत्वे तत्सङ्ग्राह्यमाह *तथाऽपराधेति । उक्तं मनुनेति शेषः सन्धिमित्यादेः ।

१५ । उक्तमुपसंहरति *एवमिति । उक्तप्रकारेणेत्यर्थः। विशेषमाह * पाथिकादनिामिति । कर्तरि षष्ठी । तादृशद्विजकर्तृकाल्पापहारे इत्यर्थः । * अध्वगः, पथिकः । * क्षीणवृत्तिः, क्षीणपाथेयश्च । * द्विजो, द्विजातिरित्यर्थः ।

१६ । अन्यदपि तदुक्तमेवाह * तथेति । व्रीह्यादिद्वन्द्वोत्तरपदको द्वन्द्वः । *अनिषिद्धैः, स्वाम्यादिकृतनिषेधरहितैः । *भक्ते, चतुर्थदिनस्थे । तस्मिन्प्राप्ते सति । *अश्वस्तनेति । द्वितीयदिवसे यथा नोर्वरति तेन प्रकारेणेत्यर्थः। *हीनेति । अल्पाचाराद्धर्तव्यो न तूत्कृष्टात्, नापि हीनजातेरित्यर्थः । किं च ।

वानस्पत्यं फलं मूलं दार्वग्न्यर्थं तथैव च ।
तृणं च गोभ्यो ग्रासार्थमस्तेयं मनुरब्रवीत् ॥

इति मनुः । अनिरुद्धेति प्रागुक्तगौतमादपरिवृतवनस्पत्यादीनां वानस्पत्यं पत्रपुष्पादि मूलं फलं होमीयाग्न्यर्थं दारु गोग्रासार्थं तृणं परकीयमस्तेयं मनुराह । तस्मान्न दण्ड इत्यर्थः ॥ २७५ ॥

मि० अव. अचौरस्यापि चौरोपकारिणो दण्डमाह ।

या० भक्तावकाशाग्न्युदकमन्त्रोपकरणव्ययान् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दत्त्वा चौरस्य वा हन्तुर्जानतो दम उत्तमः॥२७६॥

मि० भक्तमशनम्। अवकाशो निवासस्थानम्। अग्निश्चौरस्य शीतापनोदाद्यर्थः। उदकं तृषितस्य। मन्त्रश्चौर्यप्रकारोपदेशः। उपकरणं चौर्यसाधनम्। व्ययः अपहारार्थं देशान्तरं गच्छतः पाथेयम्। एतानि चौरस्य हन्तुर्वा दुष्टत्वं जानन्नपि यः प्रयच्छति तस्योत्तमसाहसो दण्डः। चौरोपेक्षिणामपि दोषः।

शक्ताश्च यउपेक्षन्ते तेऽपि तद्दोषभागिनः।

इति नारदस्मरणात् (व्यव. १४। १९)॥ २७६॥

बा० १। * चौरोपकारिणइति। तथा च अथ तदतिदेश उच्यते इति भावः। भक्तेति द्वन्द्वः प्राग्वत्। अज्ञाने दोषाभावाय जानत इति। पदार्थानाह * भक्तमित्यादि। * चोरस्य, तदादेः। एवमग्रेऽपि बोध्यम्। वाक्यार्थमाह * एतानीति। भक्तादिव्ययान्तानि वस्तूनीत्यर्थः। एतानिंति पाठस्तु सम्यगेव। उभयसङ्ग्रहायाह * दुष्टत्वमिति।

मनुरपि, (अ.९।श्लो.२७१।२७२।२७३।२७४।२७५)

ग्रामेष्वपि च ये केचिच्चौराणां भक्तदायकाः।
भाण्डावकाशदाश्चैव सर्वांस्तानपि घातयेत्॥
राष्ट्रेषु रक्षाधिकृतान्सामन्तांश्चैव चोदितान्।
अभ्याघातेषु मध्यस्थान् शिष्याच्चोरानिव द्रुतम्॥
यश्चापि धर्मसमयात्प्रच्युतो धर्मजीवनः।
दण्डेनैव तमप्योषेत्स्वकाद्धर्माद्धि विच्युतम्॥
ग्रामघाते हिताभङ्गे पथि मोषाभिदर्शने।
शक्तितो नाभिधावन्तो निर्वास्याः सपरिच्छदाः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राज्ञः कोशापहर्तॄंश्च प्रतिकूलेषु च स्थितान् ।
घातयेद्विविधैर्दण्डैररीणां चोपजापकान् ॥ इति,
अग्निदान्भक्तदांश्चैव तथा शस्त्रावकाशदान् । (२७८)
सन्निधातॄंश्च मोषस्य हन्याच्चौरानिवेश्वरः ॥ इति,
योऽदत्तादायिनो हस्ताल्लिप्सेत ब्राह्मणो धनम् ।(अ.८।३४०)
याजनाध्यापनेनापि यथा स्तेनस्तथैव सः ॥

इति च । रक्षेति । ग्रामनिवासिनः प्रजानां चौरादिभिरुपघाते क्रियमाणे मध्यस्थानुपेक्षकान् चौरवद्दण्डयेत् । हिताभङ्गः परक्षेत्रोत्पन्नसस्याविनाशनम् । मोषाभिदर्शने अपहृतद्रव्यदर्शने । मोषस्यापहृतद्रव्यस्य । अदत्तादायिनश्चौरस्य हस्ताद्यो ब्राह्मणो याजनाध्यापनप्रतिग्रहैरपि परकीयधनं ज्ञात्वा लब्धुमिच्छेत्स चोरतुल्यस्तद्वद् दण्ड्यः इत्यर्थः । विशेषमाह *चौरोपेक्षिणामिति । * दोषः, स एव दोषः ॥ २७६ ॥

मि० अव. किंच ।

या० शस्त्रावपाते गर्भस्य पातने चोत्तमो दमः ।
उत्तमो वाऽधमो वापि पुरुषस्त्रीप्रमापणे ॥ २७७ ॥

मि० परगात्रेषु शस्त्रस्यावपातने दासीब्राह्मणगर्भव्यतिरेकेण गर्भस्य पातने चोत्तमो दमः दण्डः । दासीगर्भनिपातने तु दासीगर्भविनाशकृदित्यादिना शतदण्डोऽभिहितः । ब्राह्मणगर्भविनाशे तु हत्वा गर्भमविज्ञातमित्यत्र ब्रह्महत्यातिदेशं वक्ष्यति । पुरुषस्य स्त्रियाश्च प्रमापणे शीलवृत्ताद्यपेक्षयोत्तमो वाऽधमो वा दण्डो व्यवस्थितो वेदितव्यः ॥ २७७ ॥

बा० १ । *किं चेति । अतिदेशप्रसङ्गादन्यस्यापि दण्डमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हेत्यर्थः । एवमग्रेऽप्युभयत्र । पुरुषस्त्रीति आर्षम् । स्मृत्यन्तराविरोधायाह * दासीब्राह्मणेति । तदेवाह *दासीगर्भेत्यादिना । * अभिहित इति । साहसप्रकरणे इति भावः । *विनाशे तु, विनाशने तु । * वक्ष्यतीति । प्रायश्चित्ताध्याये इति भावः । * प्रमापणे, मारणे । नायमैच्छिकविकल्प इत्याह *शीलेति । शीलं स्वभावः । वृत्तम् आचरणम् । आदिना धर्मः । तद्विशिष्टस्य पुरुषस्य तथा स्त्रियाश्च मारणे उत्तमसाहसः तद्राहित्ये तु प्रथमसाहस इति विकल्पव्यवस्था । द्वितीयवाशब्देन ईषच्छीलादिवैशिष्ट्ये तथा सति पारिशेष्यान्मध्यमसाहसपरिग्रह इति बोध्यम् ॥ २७७ ॥

मि० अव. किंच ।

या० विप्रदुष्टां स्त्रियं चैव पुरुषघ्नीमगर्भिणीम् ।
सेतुभेदकरीं चाप्सु शिलां बध्वा प्रवेशयेत् ॥२७८॥

मि. विशेषेण प्रदुष्टा विप्रदुष्टा भ्रूणघ्नी स्वगर्भपातिनी च, या च पुरुषस्य हन्त्री सेतूनां भेत्त्री च । एता गर्भरहिताः स्त्रीर्गले शिलां बध्वा अप्सु प्रवेशयेत् यथा न प्लवन्ते ॥ २७८ ॥

बा. १ । विप्रेण दुष्टामित्यर्थनिरासायाह * विशेषेणेति । तस्यार्थद्वयमाह * भ्रूणेति । सेतुभेदकरीत्यत्र टप्रत्ययः । तदाह * सेतूनामिति । अगर्भिणीमिति सर्वविशेषणं, स्त्रियमिति सर्वविशेष्यमित्याह * एता गर्भेति । साकाङ्क्षत्वादाह * गले इति । तात्पर्यार्थमाह * यथेति । तथा च घाते तात्पर्यं तत्र न तात्पर्यमिति भावः ॥ २७८ ॥

मि० अव. किंच ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या० विषाग्निदां पतिगुरुनिजापत्यप्रमापणीम् ।
विकर्णकरनासौष्ठीं कृत्वा गोभिः प्रमापयेत् ॥२७९॥

मि० अगर्भिणीमित्यनुवर्तते । या च परवधार्थमन्नपानादिषु विषं ददाति क्षिपति, या च दाहार्थं ग्रामादिष्वग्निं तथा, या च निजपतिगुर्वपत्यानि मारयति, तां छिन्नकरकर्णनासौष्ठीं कृत्वा अदान्तैर्दुष्टबलीवर्दैः प्रवाह्य मारयेत् । स्तेयप्रकरणे यदेतत्साहसिकस्य दण्डप्रदानं तत्प्रासङ्गिकमिति मन्तव्यम् ॥ २७९ ॥

बा. १ । विषेति आर्षम् । विकर्णेत्यत्राप्येवम् । युक्तिसाम्यादाह * अगर्भिणीमिति । अन्यथा दाने ऽदोषायाह * परेति * दाहार्थमिति च । अत्र क्रियानुषङ्गः । निजत्वं सर्वविशेषणमित्याह * निजपतीति । स्पष्टार्थमिदमिति बोध्यम् । *तां, सर्वाम् । बीत्यस्यार्थः *छिन्नेति । करकर्णेति प्राग्वत् । अन्यथा तदसंभवादाह *अदान्तैरित्यादि । *प्रवाह्य, वाहयित्वा ।

२ । ननु शस्त्रावपात इत्यादेरत्रानुपयोगस्तस्य साहसत्वात्, अत आह * स्तेयेति । तत्फलं तु विशेषलक्षणभेदे ऽपि तत्सामान्यलक्षणस्यात्रापि सत्त्वमिति सूचनम् । * साहसिकस्य, तदवच्छिन्नवस्तुनः । सामान्ये नपुंसकम् । *दण्डप्रदानं, तदभिधानम् । क्वचित्तथैव पाठः ॥ २७९ ॥

मि० अव. अविज्ञातकर्तृके हनने हन्तृज्ञानोपायमाह ।

या० अविज्ञातहतस्याशु कलहं सुतबान्धवाः ।
प्रष्टव्या योषितश्चास्य परपुंसि रताः पृथक् ॥२८०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि० अविज्ञातपुरुषेण घातितस्य सम्बन्धिनः सुताः प्रत्यासन्नाश्च बान्धवाः "केनास्य कलहो जात" इति कलहमाशु प्रष्टव्याः। तथा मृतस्य सम्बन्धिन्यो योषितो, याश्च परपुंसि रता व्यभिचारिण्यस्ता अपि प्रष्टव्याः ॥ २८० ॥

बा० १। एतत्प्रसङ्गादेवाग्रिममित्याह * अविज्ञातकर्तृके, इति। अविज्ञातेन हत इति समास इत्याह * अविज्ञातपुरुषेणेति। तस्य कलहे च शब्दोऽन्वय इत्याह * संबन्धीति। बान्धवपदार्थः * प्रत्यासन्ना इति। अस्येत्यस्यार्थो * मृतस्येति। चो व्युत्क्रमे इत्याह * याश्चेति। न वेश्या विवक्षिताः शब्दस्वारस्याभावादित्याह *व्यभीति। पृथगिति शेषः॥२८०॥

मि० अव. कथं प्रष्टव्या इत्यत आह।

या० स्त्रीद्रव्यवृत्तिकामो वा केन वाऽयं गतः सह।
मृत्युदेशसमासन्नं पृच्छेद्वापि जनं शनैः ॥ २८१ ॥

मि० किमयं स्त्रीकामो द्रव्यकामो वृत्तिकामो वा। तथा कस्यां किंसम्बन्धिन्यां वा स्त्रियामस्य रतिरासीत्। कस्मिन् वा द्रव्ये प्रीतिः। कुतो वा वृत्तिकामः। केन वा सह देशान्तरं गत इति नानाप्रकारं व्यभिचारिण्यो योषितः पृथक्पृथक् विश्वास्य प्रष्टव्याः। तथा मरणदेशनिकटवर्तिनो गोपाटविकाद्या ये जनास्तेऽपि विश्वासपूर्वकं प्रष्टव्याः। एवं नानाप्रकारैः प्रश्नैर्हन्तारं निश्चित्य तदुचितो दण्डो विधातव्यः॥२८१॥

बा० १। चरमे एवोक्तज्ञानाभावाद्विशेषशङ्केत्याह * कथ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मिति । इत्यत आहेति पाठः । इत्याहेति पाठे इत्याशङ्कायामाहेत्यर्थः । वृत्तिर्नियतजीवनम् । द्वंद्वान्ते श्रूयमाणस्य कामस्य प्रत्येकं संबन्धादाह * किमयमिति । एवं स्त्रीद्रव्येति सामान्येन व्याख्याय संभवात्तदेव विशिष्य व्याचष्टे * तथेति । तत्रापि प्रकारद्वयमाह *कस्यामिति । *कुतो वा, राजादितः । २ । द्वितीयपादं व्याचष्टे * केन वेति । * अन्यथेति । तत्रापीष्टासिद्धेराह * विश्वास्येति । अभयं दत्त्वेत्यर्थः । उत्तरार्द्धं व्याचष्टे * तथेति । गोपाश्च आटविकाश्च तदाद्या इत्यर्थः । मूले जातावेकवचनमिति भावः । शनैरित्यस्यार्थो * विश्वासेति । तात्पर्यार्थमाह * नानेति । एवमित्यादिः । क्वचिदस्य पाठ एव ॥ २८१ ॥

मि० अव. किञ्च ।

या० क्षेत्रवेश्मवनग्रामविवीतखलदाहकाः ।
राजपत्न्यभिगामी च दग्धव्यास्ते कटाग्निना॥२८२॥

मि० क्षेत्रं पक्कफलसस्योपेतम्, वेश्म गृहम्, वनमटवीम् क्रीडावनं वा, ग्रामम्, विवीतमुक्तलक्षणम्, खलं वा ये दहन्ति, यश्च राजपत्नीमभिगच्छति, तान्सर्वान् कटैर्वीरणमयैर्वेष्टयित्वा दहेत् । क्षेत्रादेर्दाहकानां मारणदण्डप्रसङ्गाद्दण्डविधानम् ॥ २८२ ॥

इति स्तेयप्रकरणम् ।

बा० १ । पक्कानि फलानि येषां तादृशानि यानि सस्यानि तदुपेतं, पक्काभ्यां फलसस्याभ्यामुपेतं युक्तं वा । यद्यप्ययं द्वंद्वस्तथापि यौगपद्यासंभवादाह *खलंवेति । खलं खर्याण इति प्रसिद्धम् । कटसंबन्ध्यग्निनेत्यर्थे इष्टासिद्धेराह *कटैरिति । ततश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र मध्यमपदलोपिसमास इति भावः। यस्य तृणस्योशीरं मूलं तृणविशेषः।

वीरणं स्याद्वीरतरं मूलेऽस्योशीरमस्त्रियामित्यमरः।

ननु इदमपि नोपयुक्तमत्रेत्यत आह * क्षेत्रादेरिति ॥ २८२॥

इति स्तेयप्रकरणम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ स्त्रीसङ्ग्रहणप्रकरणम् ॥ २४ ॥

मि० उ० स्त्रीसङ्ग्रहणाख्यं विवादपदं व्याख्यायते। प्रथमसाहसादिदण्डप्राप्त्यर्थं त्रेधा तत्स्वरूपं—व्यासेन विवृतम्,

त्रिविधं तत्समाख्यातं प्रथमं मध्यमोत्तमम्।
अदेशकालसंभाषा निर्जने च परस्त्रियाः।
कटाक्षावेक्षणं हास्यं प्रथमं साहसं स्मृतम्॥
प्रेषणं गन्धमाल्यानां मृष्टभूषणवाससाम्।
प्रलोभनं चान्नपानैर्मध्यमं साहसं स्मृतम्॥
सहासनं विविक्तेषु परस्परमुपाश्रयः।
केशाकेशिग्रहश्चैव सम्यक् संग्रहणं स्मृतम्॥
स्त्रीपुंसयोर्मिथुनीभावः सङ्ग्रहणम्।

मि० अव. संग्रहणज्ञानपूर्वकत्वात्तत्कर्तुर्दण्डविधानस्य तज्ज्ञानोपायं तावदाह।

या० पुमान्संग्रहणे ग्राह्यः केशाकेशि परस्त्रिया।
सद्यो वा कामजैश्चिह्नैः प्रतिपत्तौ द्वयोस्तथा॥ २८३ ॥

मि० संग्रहणे प्रवृत्तः पुमान् केशाकेश्यादिभिर्लिङ्गैर्ज्ञात्वा ग्रहीतव्यः। परस्परस्य केशग्रहणपूर्विका क्रीडा केशाकेशि। "तत्र तेनेदमिति सरूपे" इति बहुव्रीहौ सति "इच् कर्मव्यतिहारे" इति समासान्त इच्प्रत्ययः। अव्ययत्वाच्च लुप्ता तृतीया विभक्तिः। तथाचायमर्थः। परभार्यया सह केशाकेशिक्रीडनेना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भिनवैः कररुहदशनादिकृतव्रणैः रागकृतैर्लिङ्गैर्द्वयोः संप्रतिपत्त्या वा ज्ञात्वा संग्रहणे प्रवृत्तो ग्रहीतव्यः । परस्त्रीग्रहणं नियुक्तावरुद्धादिव्युदासार्थम् ॥ २८३ ॥

बा० १ । साहसप्रकरणादाह *स्त्रीति । *त्रेधा, प्रथमादिभेदेन । * तत्, स्त्रीसंग्रहणम् । * मध्यमोत्तमामिति । समाहारद्वंद्वः । तत्राद्यमाह * अदेशेति । अदेशे अकाले च संभाषा संभाषणमित्यर्थः । * निर्जने च, अरण्ये च । क्वचित्तथैव पाठः । संभाषणामिति शेषः । कटाक्षेत्यत्रार्शआद्यच् । सकटाक्षावेक्षणमित्यर्थः । परास्त्रिया इति षष्ठ्यन्तस्य सर्वत्रान्वयः । क्वचित्तृतीयान्तपाठः ।

२ । द्वितीयमाह * प्रेषणमिति । * मृष्टेति । शुद्धेत्यर्थः । समीचीनेति यावत् । धूपेति पाठान्तरम् । उभयविशेषणमिदम् ।

३ । तृतीयमाह * सहेति । शय्यासने इति पाठान्तरम् । * विविक्ते, एकान्ते । उभयान्वयीदम् । * परस्परामिति । आलिङ्गनहस्तावलम्बादिभिरन्योन्यसंश्रय इत्यर्थः । * केशाकेशिग्रहः, क्रीडासंबन्धिग्रहणम् । * सम्यक्, अर्थवत् संपूर्णम् उत्तममिति यावत् । अत एव ज्ञेय उत्तमसंग्रह इति पाठान्तरम् ।

४ । विशेषे उक्तेऽपि सामान्यस्य केनाप्यनुक्तत्वात्स्वयं सामान्यलक्षणं तत्सूचितमेवाह * स्त्रीति । एवं सलक्षणं त्रैविध्यमुक्त्वा मूलमवतारयति * संग्रहेति । * तत्कर्त्तुः, संग्रहणकर्त्तुः । तत् संग्रहणम् । सामान्येनार्थमाह * संग्रहणेइति । सप्तम्युपपत्तये आह *प्रवृत्त इति । तद्विषये प्रवृत्त इत्यर्थः । वक्ष्यमाणाशयेनाह * केशाकेश्यादिभिरिति । अर्थादाह * लिङ्गैर्ज्ञात्वेति । ननु केशाकेशीति किमर्थकं कथं वा तृतीयान्तम्, अत आह * परस्परेति । एतल्लाभार्थमाह *तत्रेति । सप्तम्यन्ते क्रि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

याविषये सरूपे पदे तृतीयान्ते च क्रियाविषये सरूपे पदे इदं क्रियारूपं वस्त्वित्यर्थे समस्येते कर्मव्यतिहारे स बहुव्रीहिसंज्ञ इति तदर्थः । इतिशब्दादयं विषयविशेषो लभ्यते । * इच् कर्मेति । कर्मव्यतिहारे यो बहुव्रीहिः तस्मादिच्समासान्त इति तदर्थः । क्रियाविनिमयः कर्मव्यतिहारः । इचि कर्मव्यतिहारे बहुव्रीहौ पूर्वपदान्तस्य दीर्घ इत्यर्थकेन "अन्येषामपि दृश्यते" इत्यनेन पूर्वपदे दीर्घः । *अव्ययत्वादिति । तिष्ठद्गुप्रभृतिष्विच्प्रत्ययपाठादव्ययीभावत्वे ऽव्ययत्वे च तृतीयाया अनदन्तत्वेन अव्ययादाबिति लुगिति भावः ।

५ । विशिष्यार्थमाह *तथा चेति । तस्य तथार्थकत्वे सतीत्यर्थः । परस्त्रियेति मूले "सह युक्ते" इति तृतीयान्तमित्याह * परभार्ययेति । लिङ्गान्तरमाह * आभिनवैरिति । सद्य इत्यस्यार्थोऽयम् । *करजेति। कररुहेति पाठान्तरम् । ननु नखादिकृतव्रणानां नैतल्लिङ्गत्वं क्रोधप्रमादादितोऽपि तत्सम्भवात्, अत आह * रागकृतैरिति । कामजैश्चिन्हैरित्यस्यार्थोऽयम् ।

६ । तुर्यपादार्थं तृतीयं तदाह * द्वयोरिति । * प्रतिपत्ताविति । सत्सप्तम्या फलितमाह * संप्रतिपत्त्येति । द्वयोः स्वैरिणीजारयोः संप्रतिपत्त्या अङ्गीकारेणेत्यर्थः ।

७ । ननु परग्रहणं व्यर्थं, स्वभार्यायां तथाकरणे दोषाभावात् वेश्यायां दोषस्य वक्ष्यमाणत्वात्, अत आह *परस्त्रीग्रहणमिति । अत एव परभार्ययेत्येवं तद्व्याख्यातम् । वैधपाणिग्रहणे एव भार्यात्वात् । यद्यपि नियुक्तायां नखक्षतादिचिह्नाभावः घृताभ्यङ्गविधानेन मिथुनीभावाविधानान्नखक्षतादिकरणस्य निषिद्धत्वात्, तथापि द्वयोः संप्रतिपत्तिरस्तीति बोध्यम् । अवरुद्धादिषु तु पूर्वोक्तानि सर्वाणि साधारणानि लिङ्गानि सन्ति,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(७) न्यायरत्नमाला-श्रीपार्थसारथिमिश्र वि० सं० (मीमांसा २
(८) ब्रह्मसूत्रभाष्यम्-बादरायणप्रणीत-वेदान्तसूत्रस्य यतीन्द्र श्रीमद्विज्ञान-भिक्षुकृत व्याख्यानम् । सम्पूर्णम् । (वेदान्तः) ६
(९) स्याद्वादमञ्जरी-मल्लिषेणनिर्मिता सम्पूर्णा । (जैनदर्शनम्) २
(१०) सिद्धित्रयम्-विशिष्टाद्वैत-ब्रह्मनिरूपण-परम्-श्रीभाष्यकृतां परमगुरुभिः श्री ६ श्रीयामुनमुनिभिर्विरचितम् । सम्पूर्णम् (वेदान्तः) १
(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टा-रकाचार्यसंगृहीतः। आचार्यचित्सुख-मुनिविरचितव्याख्योपेतः (वेदान्तः) ४
(१२) विभक्त्यर्थनिर्णयःन्यायानुसारिप्रथमादि-सप्तविभक्तिविस्तृतविचाररूपः म० म० श्रीगिरिधरोपाध्यायरचितः । सम्पूर्णः (न्यायः) ५
(१३) विधिरसायनम् । श्रीअप्पयदीक्षितकृतम् । सं० (मीमांसा) २
(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्ट-सोमेश्वरविरचिता । (मीमांसा) १६
(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता । (वेदान्तः) २
(१६) मीमांसाबालप्रकाशः (जैमिनीयद्वादशा-ऽध्यायार्थसंग्रहः) श्रीभट्टनारायणात्मज-भट्टशङ्करविरचितः । (मीमांसा) २
(१७) प्रकरणपञ्चिका (प्रभाकरमतानुसारि-मीमांसादर्शनम्) महामहो-पाध्यायश्रीशालिकनाथमिश्रविरचितं, श्रीशङ्करभट्टकृतो मीमांसा-सारसंग्रहश्च सम्पूर्णः (मीमांसा) ३
(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीसदानन्दव्यासप्रणीत-स्तत्कृतव्याख्यासमलङ्कृतश्च । (वेदान्त) ३
(१९) कात्यायनश्रौतसूत्रम् । महामहोपाध्यायश्रीकर्का-चार्यविरचितभाष्यसहितम् । १३
(२०) ब्रह्मसूत्रभाष्यम् । श्रीभास्कराचार्यविरचितम् (वेदान्तः) १
(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम् । आनन्दपूर्ण-विरचितया खण्डनफक्किकाविभजनाख्यया व्या-ख्यया (विद्यासागरी) ति प्रसिद्धया समेतम् । (वेदान्तः) १३
(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता । १
(२३) श्रीलक्ष्मीसहस्रम्-बालबोधिनीव्याख्यया-ऽवतरणिकया च सहितम् । ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२४ ब्रह्मसूत्रवृत्तिः मरीचिका श्रीव्रजनाथभट्टकृता (वेदान्त) २

२५ क्रोडपत्रसंग्रहः । अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्याः प्रत्यक्षानुमानमाथुर्या व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि : (न्यायः) २

२६ ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम् । श्रीसुन्दरभट्टरचितसिद्धान्तसेतुकाऽभिधटीकासहितश्रीदेवाचार्यप्रणीतसिद्धान्तजाह्नवीयुतम् २

२७ षड्दर्शनसमुच्चयः । बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शन संक्षेपः । मणिभद्रकृतटीकया सहितः । हरिभद्रसूरिकृतः । १

२८ शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः । प्रमेयरत्नार्णवश्च १

२९ अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्याजागदीशी टीका । १३

३० वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा सस्कारप्रकाशात्मकः । १०

३१ वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः ९

३२ स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरत्रिपाठिसंकलितः । ४

३३ वेदान्तरत्नमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्यकृता । २

३४ प्रस्थानरत्नाकरः । गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितः २

३५ वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम् । १

३६ योगदर्शनम् । परमहंसपरिव्राजकाचार्य–नारायणतीर्थविरचित–योगसिद्धान्तचन्द्रिका–समाख्यया संवलितम् । २

३७ वेदान्तदर्शनम् । परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वती स्वामिकृत ब्रह्माऽमृतवर्षिणी समाख्य व्याख्यासंवलितम् । ४

३८ विश्वप्रकाशः । कोशः । विद्वद्वर श्रीमहेश्वरसुरिविरचितः । २

३९ श्रीसुबोधिनी । श्रीवलभाचार्यविनिर्मिता । श्रीमद्भागवतव्याख्या गोस्वामीश्रीविठ्ठलनाथदीक्षितविरचित टिप्पणीसहिता । २

४० वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः पुजाप्रकाशः । ४

४१ वेदान्तसिद्धान्तसंग्रहः । श्रुतिसिद्धान्तापरनामकः । श्रीब्रह्मचारिवनमालिमिश्रविरचितः । द्वैताद्वैतदर्शनानुगतः । २

४२ स्वानुभवादर्शः । श्रीमत्परमहंसपरिव्राजकाचार्य नारायणाश्रमशिष्यमाधवाश्रमविरचित । स्वकृतटीकाविभूषितश्च ।

४३ याज्ञवल्कस्मृतिः । बालम्भट्टीसमाख्य वाख्यासमलङ्कृता

पत्त्रादिप्रेषणस्थानम् } हा...
चौखम्...

धर्मशास्त्र

११७४६

TRIBHUVAN UNIVERSITY ... KATHMANDU ... NEPAL

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

December 1914.

THE

CHOWKHAMBÂ SANSKṚIT SEṚIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 204.

धर्मशास्त्र १५८

व्यवहार- बालभट्टी

इति प्रसिद्धया लक्ष्मीनामिकया
पायगुण्डे इत्युपनामकेन बालंभट्टेन स्वपत्न्याः लक्ष्मीदेव्याः
स्मारकत्वेन तन्नाम्ना रचितया बृहत्या टीकया सहिता
मिताक्षरा
श्रीयुतगोविन्ददासमहाशयप्रदर्शितरीत्या
पर्वतीयनित्यानन्दपन्तेन परिष्कृत्य संशोधिता ।

VYAVAHRA-BÂLAMBHATTI

THE EXTENSIVE COMMENTARY ON THE MITÂKSHARÂ
WITH THE ORIGINAL
BY
Bâlambhatta Páyagunde
EDITED BY
Pandit Nityanand Pant Parvatiya
[U]nder the supervision of Shri Govinda Das.

FASCICULUS XI-१२

[PUB]LISHED & SOLD BY THE SECRETARY;
CHOWKHAMBA SANSKRIT BOOK-DEPOT.
BENARES.

AGENTS:— OTTO HARRASSOWITZ, LEIPZIG:
PANDITA JYESHTHARAMA MUKUNDAJI BOMBAY:
PROBSTHAIN & CO., BOOKSELLERS, LONDON.

Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press.
BENARES.

Price Rupee one.

Registered According to Act XX

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ श्रीः ॥

—:०:—

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तवकः—२०४

१. अस्यां चौखम्बा—संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एकः स्तवको मुद्रयित्वा प्रकाश्यते । एकस्मिन् स्तवक एक एव ग्रन्थो मुद्र्यते ।

२ प्राचीना दुर्लभाश्चामुद्रिता मीमांसावेदान्तादिदर्शनव्याकरणधर्मशास्त्रसाहित्यपुराणादिग्रन्थां एवाऽत्र सुपरिष्कृत्य मुद्रयन्ते ।

३ काशिकराजकीयप्रधानसंस्कृतपाठशालाऽध्यापकाः पण्डिता अन्ये च शास्त्रदृष्टयो विद्वांस एतत्परिशोधनादिकार्यकारिणो भवन्ति ।

४ भारतवर्षीयैः,ब्रह्मदेशीयैः,सिंहलद्वीपवासिभिश्चैतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम्—मुद्राः ७ आनकाः ८

५ अन्यैर्देयं प्रतिस्तवकं ... ... " " १ " ०

६ प्रापणव्ययः पृथग् नास्ति । ... ...

साम्प्रतं मुद्र्यमाणा ग्रन्थाः—

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता खण्डे २
(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः १०
(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृतन्यायरत्नाकराख्यया व्याख्यया सहितम् । सम्पूर्णम् । १०
(४) भाष्योपबृंहितं तत्त्वत्रयम् । विशिष्टाद्वैत-दर्शनप्रकरणम् । श्रीमल्लोकाचार्यप्रणीतम् । श्रीनारायणतीर्थविरचितभाट्टभाषाप्रकाश-सहितं सम्पूर्णम् (वेदान्तः) २
(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः १
(६) भाट्टचिन्तामणिः । महामहोपाध्यायश्री-गागाभट्टविरचिता । तर्कपादः(मीमांसा) २
(७) न्यायरत्नमाला श्रीपार्थसारथिमिश्रविर-चिता सम्पूर्णः (मीमांसा) २
(८) ब्रह्मसूत्रभाष्यम्—बादरायणप्रणीतवेदान्त-सूत्रस्य यतीन्द्रश्रीमद्विज्ञानभिक्षुकृतव्या-ख्यानम् । सम्पूर्णं । (वेदान्तः) ६
(९) स्याद्वादमञ्जरीमल्लिषेणानिर्मिता सम्पूर्णा २
(१०) सिद्धित्रयम्—विशिष्टाद्वैतब्रह्मनिरूपणपरम् श्रीभाष्यकृतां परमगुरुभिः श्री ६ श्रीयामु-नमुनिभिर्विरचितम् । सम्पूर्ण(वेदान्तः)१
(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टार-काचार्यसंगृहीतः । आचार्यचित्सुखमुनि-विरचितव्याख्योपेतः (वेदान्तः) ४
(१२) विभक्त्यर्थनिर्णयो न्यायानुसारिप्रथमादि-सप्तविभक्तिविस्तृताविचाररूपः म० म० श्रीगिरिधरोपाध्यायविरचितः सम्पूर्णः (न्यायः) ५
(१३) विधिरसायनम् । श्रीअप्पयदीक्षितकृतम् । सम्पूर्णम् (मीमांसा) २
(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसो-मेश्वरविरचिता । (मीमांसा) १६

११०४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा च तैर्ग्रहणे प्राप्ते परभार्येत्यनेन तद्व्युदासः। आद्यायां नियोगसत्त्वेन तदावश्यकत्वादन्यस्यामप्यवरुद्धात्वेनैव तत्त्वासम्भवादिति भावः॥ २८३॥

मि० अव. किंच।

या० नीवीस्तनप्रावरणसक्थिकेशावमर्शनम्।
अदेशकालसंभाषं सहैकस्थानमेव च॥ २८४॥

मि० यः पुनः परदारपरिधानग्रन्थिप्रदेशकुचप्रावरणजघनमूर्द्धरुहादिस्पर्शनं साभिलाष इवाचरति, तथा अदेशे निर्जने जनताकीर्णे वाऽकालेऽन्धकाराकुले वा संलापनं करोति, परभार्यया सहैकमञ्चकादौ रिरंसयेवावतिष्ठते, सोऽपि संग्रहणे प्रवृत्तो ग्राह्यः। एतच्चाशङ्क्यमानदोषपुरुषविषयम्। इतरस्य तु न दोषः।

यथाह मनुः, (अ. ८ श्लो. ३५५)

यस्त्वनाक्षारितः पूर्वमभिभाषेत कारणात्।
न दोषं प्राप्नुयात्किञ्चिन्न हि तस्य व्यतिक्रमः॥ इति।

यः परस्त्रिया स्पृष्टः क्षमते असावपि ग्राह्यः इति-
तेनैवोक्तम्, अ. ८ श्लो. ३५८)

स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत्तथा।
परस्परस्यानुमते सर्वं संग्रहणं स्मृतम्॥ इति।

यश्च मयेयं विदग्धाऽसकृद्रमितचरेति श्लाघया भुजङ्गजनसमक्षं ख्यापयति असावपि ग्राह्य इति-
तेनैवोक्तम्, (ना. व्यव. १२। ६९)

दर्पाद्वा यदि वा मोहाच्छ्लाघया वा स्वयं वदेत्।
पूर्वं मयेयं भुक्तेति तच्च संग्रहणं स्मृतम्॥ इति॥ २८४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बा० १। उपायान्तरमप्युच्यते इत्याह * किं चेति। नीवी कट्यंशुकग्रन्थिरिति कोशादाह *परिधानेति। तद्रूपप्रदेशेत्यर्थः। स्तनप्रावरणेत्येकमित्याह *कुचप्रावरणेति। इदमप्युपलक्षणमित्याह *आदीति। अन्यथा दोषाभावायाह *साभिलाष इति। [1]अस्यायोग्यत्वादाह * इवेति। अन्वयाय योग्यक्रियां पूरयति * आचरतीति। एवमग्रेऽपि बोध्यम्। अदेशेत्यनेन व्यासोक्तोभयं संगृह्णाति * निर्जने जनताकीर्णे वेति। तथा च तत्र अदेशे इत्यनेन जनताकीर्णे इत्यस्यैव ग्रहः। निर्जने इत्यस्य पृथगुपादानादिति बोध्यम्।

तथा च मनुः, (अ. ८। ३५६)

परस्त्रियं योऽभिवदेत्तीर्थेऽरण्ये वने ऽपि वा।
नदीनां चापि सम्भेदे स संग्रहणमाप्नुयात्॥

इति। अकाले इत्यस्यार्थोऽन्धकाराकुले वेति। अकाले इति च्छेदः। सहैकेत्यस्य तया सहैकत्र स्थानं स्थितिं करोतीति शाब्दोऽर्थः। तत्फलितमाह * परेति। तत्र एवोऽप्यर्थे। तदाह * सोऽपीति।

२। विशेषमाह * एतच्चेति। संग्रहणप्रवृत्तग्रहणं चेत्यर्थः। आशङ्क्यमानेति बहुव्रीहिः। * यस्त्विति। यः पूर्वमनाक्षारितः परस्त्रीप्रार्थनाभिशापरहितः असौ विट इति न निन्दितः, केनचित् कारणेन जनसमक्षमप्याभिभाषणं कुर्यात्, न स दण्ड्यत्वादिदोषं प्राप्नुयात्, यस्मान्न कश्चित्तस्यापराधोऽस्तीत्यर्थः। एवं भिक्षुकादावपि न दोष इत्यपि—

तेनैवोक्तं, (अ. ८। ३६०)

भिक्षुका वन्दिनश्चैव दीक्षिताः कारवस्तथा।

---

१ पराभिलाषस्य प्रत्यक्षायोग्यत्वादित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सम्भाषणं सह स्त्रीभिः कुर्युरप्रतिवारिताः ॥ इति ।

भिक्षुकाः भिक्षाजीविनः यतयो वा । वन्दिनः स्तुतिपाठकाः । दीक्षिता यज्ञार्थं कृतदीक्षाः । कारवः सूपकारादयः । एते भिक्षादिकार्यार्थं गृहिस्त्रीभिः सह सम्भाषणमनिवारिताः कुर्युः । एवं चैषां सम्भाषणं ता अपि कुर्युरित्यर्थः । निवारणे तु नैवमिति अप्रतिवारिता इत्यनेन सूचितम् ।

३ । विशेषान्तरमाह * य इति । * तेनैव, मनुनैव । एवमग्रेऽप्युभयत्र । * स्त्रियमिति । यः स्प्रष्टुमनुचिते स्तनजघनादिदेशे परस्त्रियं स्पृशेत्, तया वा वृषणादिके देशे स्पृष्टः क्षमते, तथाऽन्योन्याङ्गीकरणे सति यत्प्रवर्त्तमानं सङ्ग्रहणम्, इदं सर्वं सङ्ग्रहणं मन्वादिभिः स्मृतमित्यर्थः । * असकृदिति । भूतपूर्वे चरडिति चरट् ॥ २८४ ॥

मि० अव. प्रतिषिद्धयोः स्त्रीपुंसयोः पुनः संलापादिकरणे दण्डमाह ।

या० स्त्री निषेधे शतं दद्याद् द्विशतं तु दमं पुमान् ।
प्रतिषेधे तयोर्दण्डो यथा संग्रहणे तथा ॥ २८५ ॥

मि० प्रतिषिध्यते इति प्रतिषेधः । पतिपित्रादिभिर्येन सह संभाषणादिकं निषिद्धं तत्र प्रवर्तमाना स्त्री शतपणं दण्डं दद्यात् । पुरुषः पुनरेवं निषिद्धे प्रवर्तमानो द्विशतं दद्यात् । द्वयोस्तु स्त्रीपुंसयोः प्रतिषिद्धे प्रवर्तमानयोः संग्रहणे संभोगे वर्णानुसारेण यो दण्डो वक्ष्यते स एव विज्ञेयः ।

एतच्च चारणादिभार्याव्यतिरकेण । (अ.८श्लो.३६२)

नैष चारणदारेषु विधिर्नात्मोपजीविषु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सज्जयन्ति हि ते नारीः निगूढाश्चारयन्ति च ॥
इति मनुस्मरणात् ॥ २८५ ॥

बा॰ १। प्रतिषिद्धयोरिति। अनेन सह त्वया न सम्भाष्यमनया च सह त्वयेत्येवं पूर्वं प्रतिषिद्धयोः स्वैरिणीजारयोरित्यर्थः। *पुनः, पश्चात्। प्रत्यासत्त्या प्रतिषेधपदार्थमाह *प्रतीति। कर्मणि घञ्। अनेन निषेध इत्यत्राप्येवमिति सूचितम्।

२। वाक्यार्थमाह * पतीति। शेषमाह * प्रवर्तमानेति। द्वितीयपादार्थमाह * पुरुष इति।

३। उत्तरार्द्धमतिदेशाविधिरित्याह *द्वयोस्त्विति। अनुक्तत्वादाह *वक्ष्यते इति। सर्वं वाक्यमितिन्यायेनाह *स एवेति।

४। विशेषमाह *एतच्चेति। उक्तदण्डनं चेत्यर्थः। चारणा नटादयः। आत्मनोपजीविनश्च तद्भिन्नाः वेशवृत्तिजीविनां दाराः। विधिर्नात्मोपेति पाठान्तरम्। तथा च एषः परस्त्रियं नाभिवदेदित्यादिः संम्भाषणादिनिषेधविधिः नटगायनादिदारेषु नास्ति। तथा भार्या पुत्रः स्वका इत्युक्तत्वात् भार्यैवात्मा तयोपजीवन्ति धनलाभाय तस्या लाभं क्षमन्ते ये तेषां नटादिभिन्नानां ये दाराः तेष्वपि निषेधविधिर्नास्ति। हि यस्मात् ते चारणा आत्मोपजीविनश्च परपुरुषानानीय तैः स्वभार्याः संश्लेषयन्ते, स्वयमागतांश्च पुरुषान् प्रच्छन्ना भूत्वा स्वाज्ञानं विभावयन्तो व्यवहारयन्तीत्यर्थः। तत्रापि विशेषः—

तेनैवोक्तः, (८। ३६३)
किञ्चिदेवतु दाप्यः स्यात्सम्भाषां ताभिराचरन्।
प्रैष्यासु चैकभक्तासु रहः प्रव्रजितासु च ॥ इति।

रहो निर्जनदेशे चारणादिस्त्रीभिः सम्भाषणं कुर्वन् स्वल्पं दण्डलेशं राज्ञा दाप्यः। तासामपि परकीयत्वात्। तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दासीभिः अवरुद्धाभिः बौद्धाभिः ब्रह्मचारिणीभिः सम्भाषां कुर्वन् किञ्चिद्दण्डमात्रं दाप्य इत्यर्थः ॥ २८५ ॥

मि० अव. तमिदानीं संग्रहणे दण्डमाह ।

या० स्वजातावुत्तमो दण्ड आनुलोम्ये तु मध्यमः ।
प्रातिलोम्ये वधः पुंसो नार्याः कर्णादिकर्तनम् ॥२८६॥

मि० चतुर्णामपि वर्णानां बलात्कारेण सजातीयगुप्तपरदाराभिगमने साशीतिपणसहस्रं दण्डनीयः । यदा त्वानुलोम्येन हीनवर्णां स्त्रियमगुप्तामभिगच्छति तदा मध्यमसाहसं दण्डनीयः । यदा पुनः सवर्णामगुप्तामानुलोम्येन गुप्तां वा व्रजति तदा—
मानवे विशेष उक्तः, (अ. ८ श्लो. ३७८।३८३)
सहस्रं ब्राह्मणो दण्ड्यो गुप्तां विप्रां बलाद् व्रजन् ।
शतानि पञ्च दण्ड्यः स्यादिच्छन्त्या सह संगतः ॥
सहस्रं ब्राह्मणो दण्डं दाप्या गुप्ते तु ते व्रजन् ।
शूद्रायां क्षत्रियविशोः सहस्रं तु भवेद्दमः ॥ इति ।
एतच्च गुरुसखिभार्यादिव्यतिरेकेण द्रष्टव्यम् । (व्यव. १२)
माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा ।
पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी स्नुषा ॥(७३)
दुहिताऽऽचार्यभार्या च सगोत्रा शरणागता ।
राज्ञी प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या ॥(७४)
आसामन्यतमां गच्छन् गुरुतल्पग उच्यते ।
शिश्नस्योत्कर्तनात्तत्र नान्यो दण्डो विधीयते ॥(७५)

इति नारदस्मरणात् । प्रातिलोम्ये उत्कृष्टवर्णस्त्रीगमने क्षत्रियादेः पुरुषस्य वधः । एतच्च गुप्ताविष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यम् । अन्यत्र तु धनदण्डः ।

(अ. ८ श्लो. ३७७ । ३७६)

उभावपि हि तावेव ब्राह्मण्या गुप्तया सह ।
विप्लुतौ शूद्रवद्दण्ड्यौ दग्धव्यौ वा कटाग्निना ॥
ब्राह्मणीं यद्यगुप्तां तु सेवेतां वैश्यपार्थिवौ ।
वैश्यं पञ्चशतं कुर्यात्क्षत्रियं तु सहस्रिणम् ॥

इति मनुस्मरणात् । शूद्रस्य पुनरगुप्तामुत्कृष्टवर्णां स्त्रियं व्रजतो लिङ्गच्छेदनसर्वस्वापहारौ, गुप्तां तु व्रजतस्तस्य वधसर्वस्वापहाराविति—

तेनैवोक्तम्, (अ. ८ श्लो. ३७४)

शूद्रो गुप्तमगुप्तं वा द्वैजातं वर्णमावसन् ।
अगुप्तमङ्गसर्वस्वैर्गुप्तं सर्वेण हीयते ॥ इति ।

नार्याः पुनर्हीनवर्णं व्रजन्त्याः कर्णयोः, आदिग्रहणान्नासादेश्च कर्तनम् । आनुलोम्येन वा सवर्णं वा व्रजन्त्या दण्डः कल्प्यः ।अयं च वधाद्युपदेशो राज्ञ एव । तस्यैव पालनाधिकारात् । न द्विजातिमात्रस्य । तस्य “ब्राह्मणः परीक्षार्थमपि शस्त्रं नाददीत”इति शस्त्रग्रहणनिषेधात् । यदा तु राज्ञो निवेदने कालविलम्बनेन कार्यातिपाताशङ्का तदा स्वयमेव जारादीन् हन्यात् ।

(मनु. अ. ८ श्लो. ३४८)

शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते ।

तथा, (मनु अ. ८ श्लो. ३५१)

नाततायिवधे दोषो हन्तुर्भवति कश्चन ।
प्रकाशं वाऽप्रकाशं वा मन्युस्तं मन्युमृच्छति ॥

इति शस्त्रग्रहणाभ्यनुज्ञानाच्च । तथा क्षत्रियवै-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वयोरन्योन्यस्त्र्यभिगमने यथाक्रमं सहस्रपञ्चशतपणात्मकौ दण्डौ वेदितव्यौ ।

तदाह मनुः, (अ. ८ श्लो. ३८२)

वैश्यश्चेत्क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजेत् ।
योब्राह्मण्यामगुप्तायां तावुभौ दण्डमर्हतः ॥ इति ॥ ३८६ ॥

बा० १ । *तामिति । यस्यातिदेशः पूर्वं कृतस्तमित्यर्थः । स्वजाताविप्युक्तिस्वारस्यादाह *चतुर्णामिति । मूलानुरोधेनाह *साशीतीति । द्वितीयपादार्थमाह * यदात्विति । आनुलोम्यादौ स्वार्थे ष्यञ् । अभिगमने इति शेषः । सर्वत्र तत्फलितमाह *आनुलोम्येनेति ।

२ । उभयत्र दत्तयोर्गुप्तत्वागुप्तत्वयोर्मूलानुक्तयोर्विशेषणयोः फले आह * यदा पुनरिति । तत्रादौ अगुप्तासवर्णागमने दण्डमाह * सहस्रमिति । अत्र पूर्वार्द्धं स्वजाताविति मूलप्रथमपादोक्तसमानविषयम् । ब्राह्मणपदं विप्रपदं च क्षत्रियादेरप्युपलक्षणम् । तथाच क्षत्रियादीनामपि गुप्तसवर्णपरदारगमने एष एव विधिर्ज्ञेयः । एतदुपयोगस्तु गुप्तां बलादिति विषयाविशेषस्य तत्र लाभ एव । एवंच पूर्वप्रकरणसिद्धिरपीति इदमपि व्याख्यात्रोक्तम् । प्रकृतोपयुक्तं तूत्तरार्धमेव । तथाच रक्षितां सवर्णां सवर्णो बलेनोपगच्छन्सहस्रं दण्ड्यः स्यात् । व्रजन्नित्यत्र व्रजेदिति पाठे वाक्यभेदो बोध्यः । उत्तरार्धे इच्छन्त्येति बलादित्यस्य विपरीतोक्त्या तस्योक्तविपरीतार्थपरत्वावधारणेन अगुप्तयेत्यर्थाल्लब्धम् । तथाच अरक्षितया इच्छन्त्या सवर्णया तु सह सङ्गतः सकृन्मैथुनः पञ्च शतानि दण्ड्यो भवेदित्यर्थः ।

३ । आनुलोम्येन गुप्तागमने दण्डमाह *सहस्रम् इति । इदं च तत्र पूर्वतः पद्यचतुष्टयेन व्यवहितम् । तत्रेतोऽप्यव्यवहिते—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वैश्यश्चेत्क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजेत् ।
यो ब्राह्मण्यामगुप्तायां तावुभौ दण्डमर्हतः ॥ (८। ३८२)

इत्यत्र क्षत्रियावैश्ययोः प्रकृतत्वात् ते क्षत्रियावैश्ये गुप्ते रक्षिते अनिच्छन्त्यौ गच्छन् ब्राह्मणः सहस्रं दण्डं दापनीयः। शूद्रायां रक्षितायां गमने क्षत्रियवैश्ययोरपि सहस्रमेव दण्डो भवेदित्यर्थः ।

४ । अगुप्तास्थले तेनैवैतदग्रे उक्तं, (८ श्लो. ३८४।३८५)

क्षत्रियायामगुप्तायां वैश्ये पञ्चशतो दमः ।
मूत्रेण मौण्ड्यमिच्छेत्तु क्षत्रियो दण्डमेववा ॥
अगुप्ते क्षत्रियावैश्ये शूद्रां वा ब्राह्मणो व्रजन् ।
शतानि पञ्च दण्ड्यः स्यात्सहस्रं त्वन्त्यजास्त्रियम् ॥ इति ।

मूत्रं गर्दभस्य । मुण्डनस्य दण्डस्य च विकल्पः । दण्डश्च पञ्चशतरूपः । शूद्रामित्यत्रापि अगुप्तामिति बोध्यम् । अन्त्यजश्चाण्डालादिः ।

५ । विशेषमाह * एतच्चेति । मूलाद्युक्तमुभयं चेत्यर्थः । सखा मित्रम् । आदिग्राह्यं वचने व्यक्तम् । माता सपत्नमाता । स्त्रीत्यस्य त्रिषु सम्बन्धः। अभ्यर्हितत्वात् तस्य पूर्वनिपातः। आचार्यो गुरुः । प्रव्रजिता बौद्धाभिक्षुकी । धात्री उपमाता। साध्वी पतिव्रता। * वर्णोत्तमेति । पुरुषोत्तम इतिवत्समासः। बहुव्रीहिर्वा। आतिदेशमाह * गुर्विति । अतएवाह * शिश्नेति । * उत्कर्तनात्, छेदनात् । अन्ययोगे पमी । * अन्यः, धनदण्डः ।

६ । मूलद्वितीयार्धाद्यपादं व्याचष्टे *प्रातिलोम्ये इति । इदं लाक्षणिकमित्याह *उत्कृष्टेति। पुंस इत्यस्यार्थः * क्षत्रियादेरिति।

७ । विशेषमाह * एतच्चेति । वधरूपदण्डनं चेत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*अन्यत्र तु, अगुप्तायां तु। यद्यपि मानवे वक्ष्यमाणवाक्ययोर्व्युत्क्रमेणाऽव्यवाहितपाठः, अतएव तावित्यनेन वैश्यक्षत्रियपरामर्शः, तथापि अत्र एतच्चेतिमूलोक्ते अन्यत्रेत्यत्र च उक्तक्रमेणैव मानाकाङ्क्षेति तत्क्रमेण कथयन्नादावाद्ये मानमाह *उभावपीति। हिर्निश्चये। *तावेव, पूर्वोक्तावेव। तथा च क्षत्रियवैश्यावुभावपि रक्षितया ब्राह्मण्या सह विप्लुतौ सङ्गतौ कृतमैथुनौ शूद्रवत् दण्ड्यौ। गुप्ते सर्वेण हीयते इत्यत्रोक्तप्रकारेण सर्वेण शरीरेण धनेनच हीनौ कार्यौ। सर्वस्वं गृहीत्वा वध्यावित्यर्थः।

८। पक्षान्तरमाह *कटाग्निनेति। अत्र सर्वस्वग्रहणं नास्ति। कटाग्नीति मारणप्रकारविशेषोपदेशः। सच स्तेयप्रकरणे उक्तः।

वसिष्ठेन तत्र विशेष उक्तः,

शूद्रश्चेत् ब्राह्मणीमभिगच्छेद्वीरणैर्वेष्टयित्वा शूद्रमग्नौ प्रास्येत्, ब्राह्मण्याः शिरसि वापनं कृत्वा सर्पिषाऽभ्यज्य नग्नां खरमारोप्य महापथमनुव्राजयेत्, पूता भवतीति विज्ञायते। वैश्यश्चेत् ब्राह्मणीमभिगच्छेत् लोहितदर्भैर्वेष्टयित्वा वैश्यमग्नौ प्रास्येत्। अग्रे प्राग्वत्। राजन्यश्चेत् ब्राह्मणीमभिगच्छेत् शरपत्रैर्वेष्टयित्वा राजन्यमग्नौ प्रास्येत्। अग्रे प्राग्वत्। एवं वैश्यो राजन्यायां मैथुनमाचरन्, शूद्रश्च राजन्यावैश्ययोरिति।

इदं च प्राणान्तिकदण्डविधानं अत्यन्तश्रोत्रियदारत्वादिगुणवद्ब्राह्मणीविषयम्। दण्डगुरुत्वात्।

वैश्यः सर्वस्वदण्डः स्यात्संवत्सरनिरोधतः।
सहस्रं क्षत्रियो दण्ड्यो मौण्ड्यं मूत्रेण चार्हति॥

इति मनुना(८ ३७५)इतः पूर्वमन्यत्र दण्डान्तरविधानाच्च।

९। एवमाद्ये संमतिम् उक्त्वा द्वितीये तामाह *ब्राह्मणीमिति। सेवेतामिति पाठः। गच्छतामिति तदर्थः। पञ्चशतमि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यत्र बहुव्रीहेरर्शआद्यच् । अरक्षितां ब्राह्मणीं तु यदि वैश्य-क्षत्रियौ गच्छतः तदा वैश्यं पञ्चशतदण्डयुक्तं कुर्यात् क्षत्रियं तु सहस्रदण्डोपेतं कुर्यात् इत्यर्थः । रक्षाद्यर्थमधिकृतत्वेन क्षत्रियस्य वैश्यापेक्षयाऽधिकदण्डविधिरिति भावः । वैश्ये चायं पञ्चशतदण्डः शूद्रान्नमादिना निर्गुणजातिमात्रोपजीविब्राह्मणी-गमनविषयः । तद्भिन्नब्राह्मणीगमने तु वैश्यस्यापि सहस्रदण्ड एवेति बोध्यम् ।

१०। अथ शूद्रे आह *शूद्रस्येति। *गुप्तांतु, उत्कृष्टवर्णाम् । * तस्य, शूद्रस्य । * तेनैव, मनुनैव । *शूद्र इति । अत्र सर्वत्र सामान्ये नपुंसकम् ॥ द्वैजातमित्यत्र तस्येदमित्यण् । गच्छेदिति यदि तदेतिच शेषः ।

अगुप्तमङ्गसर्वस्वी गुप्तं सर्वेण हीयते ।

इत्युत्तरार्द्धपाठः । तथाच भर्त्रादिभिः रक्षितामरक्षितां वा द्विजातिस्त्रियं यदि शूद्रो गच्छेत्तदा तयोर्मध्ये अरक्षिताम् आवसन् गच्छन्, अङ्गं च सर्वस्वं च ते दण्डो यस्य तादृशो भवति । अत्र विशेषाश्रवणेऽपि अङ्गं लिङ्गमेव ।

आर्यस्त्र्यभिगमने लिङ्गोद्धारः सर्वस्वहरणंच गुप्तां चेद् वधोऽधिक इति गौतमवचनात् ।

तथाच लिङ्गच्छेदः सर्वस्वहरणञ्च कार्यम् । रक्षितां तु गच्छन् धनेन शरीरेणच हीनः कार्यः । सर्वस्वं गृहीत्वा वध्य इत्यर्थः । अङ्गसर्वस्वैरिति पाठे व्यक्त्याभिप्रायं बहुवचनम् । अत्र पाठान्तरं धृत्वा प्राचां व्याख्यानम् असम्बद्धं स्पष्टमेवेत्युपेक्षितम् । आविशेदिति पाठान्तरम् । अभिगच्छेदिति तदर्थः । येनाङ्गेनापराद्धं तेन हीन इति कल्पतरूक्तं तु न युक्तम् उक्तगौतमविरोधात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

११। नार्या इति तुर्यपादं व्याचष्टे *नार्याः पुनरिति। विनिगमनाविरहादाह * कर्णयोरिति । अयं न त्रितयशेषः । वधान्तर्गताङ्गच्छेदविधानात् । तथाच चरमशेषत्वेनास्य स्थलद्वये तदनुक्त्या न्यूनतापत्तिः, तां निराचष्टे * आनुलोम्येन वा सवर्णे वेति । प्रातिलोम्यस्थले प्रोक्तदण्डविधानात् तदन्यत्र गमने ऽल्पदोषत्वेनाङ्गच्छेदाभावस्य युक्तिसिद्धत्वेनानुलोम्यगमने गुणवदगुणवदाद्यपेक्षयोचितधनदण्डः सवर्णगमने तु धिक्कारादिदण्ड इति देशाद्यनुसारेण दण्डः कल्प्य इत्यर्थः ।

मनुना तु— (८ । ३६१)

न सम्भाषां परस्त्रीभिः प्रतिषिद्धः समाचरेत् ।
निषिद्धो भाषमाणस्तु सुवर्णं दण्डमर्हति ॥

इति सामान्येनोक्तम् । षोडशमाषात्मकं सुवर्णम् ।

१२ । विशेषमाह * अयं चेति । राज्ञः अभिषेकादिगुणयुक्तस्य दुष्टशासनकर्तव्यतयेति भावः । * न द्विजातीति । न वर्णत्रयस्येत्यर्थः । मात्रं कार्त्स्न्ये । गौतममाह * ब्राह्मण इति ।

१३ । तत्रापि विशेषमाह * यदात्विति ।

* स्वयमेव, द्विजातिरेव । कार्यातिपातशङ्कया हेतुत्वस्योक्तत्वाद्धेत्वन्तरं मानवमाह * शस्त्रमिति । उपरुध्यते इत्यग्रे नाततायीत्यतः पूर्वम्— (मनु. अ. ८)

द्विजातीनां च वर्णानां विप्लवे कालकारिते ॥ (३४८)
आत्मनश्च परित्राणे दक्षिणानाञ्च सङ्गरे ।
स्त्रीविप्राभ्युपपत्तौ च घ्नन् धर्मेण न दुष्यति ॥ (३४९)
गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम् ।
आततायिनमायान्तं हन्यादेवाविचारयन् ॥ (३५०)

इति पाठः । एतत्सूचनार्थमेव मध्ये तथेत्युक्तम् । ब्राह्म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णादिभिः खड्गाद्यायुधं ग्राह्यं यत्र काले वर्णानामाश्रमाणां च साहसकारादिभिर्धर्मः कर्तुं न दीयते, तथा तेषामराजकेषु राष्ट्रेषु परचक्रादिना कालजनितसङ्करादौ आत्मरक्षार्थं च दक्षिणानां गोधनाद्यपहारनिमित्ते सङ्ग्रामे च स्त्रीब्राह्मणापत्तिनिवारणार्थं च धर्मयुद्धेनानन्यगतिकतया परान् हिंसन् न दोषभाग्भवति, परमारणे ऽप्यत्र साहसदण्डो न कार्यः। गुरुबालवृद्धबहुश्रुतब्राह्मणानाम् अन्यतमं वधोद्यतमागच्छन्तं विद्यावित्तादिभिरुत्कृष्टं पलायनादिभिरपि स्वानिस्तरणाशक्तौ निर्विचारं हन्यात्। अतएवोशना, गृहीतशस्त्रमाततायिनं हत्वा न दोषः।

कात्यायनोऽपि,

आततायिनि चोत्कृष्टे तपःस्वाध्यायजन्मभिः।
वधस्तत्र तु नैव स्यात्पापे हीने वधो भवेत्॥ इति।

मेधातिथिगोविन्दराजौ तु स्त्रीविप्रेति पूर्वस्यायमनुवादः। गुर्वादीनपि हन्यात् किमुतान्यामिति व्याचक्षाते। *नाततायीति। जनसमक्षे रहसि वा वधोद्यतस्य मारणे हन्तुर्न कश्चिदपि अधर्मदण्डप्रायश्चित्ताख्यो दोषो भवति, यतो हन्तृगतो मन्युः क्रोधाभिमानिनी देवता तं हन्यमानगतं क्रोधम् ऋच्छति विवर्जयति नाशयतीत्यर्थः। अप्रकाशमितिच्छेदः।

१४। विशेषान्तरमाह * तथेति। अत्र न समुच्चयो विवक्षितः। प्रत्येकस्यैव पापहेतुत्वात्। सा च रक्षितेत्यपि बोध्यम्। मानवे तथोक्तेः। * योब्राह्मण्यामिति। यो दण्डो ब्राह्मण्यामरक्षितायां गमने तयोः प्रतिपादितः—

वैश्यं पञ्चशतं कुर्यात्क्षत्रियं च सहस्रिणम्।

इत्यनेन तमेव दण्डं दण्डद्वयं यथाक्रमं तावुभौ वैश्यक्षत्रियावर्हत इत्यर्थः। क्षत्रियस्य वैश्यापेक्षयोत्कृष्टत्वेऽपि रक्षा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यामधिकृतत्वादधिकदण्ड इति उक्तम् । अयं च वैश्यस्य रक्षितक्षत्रियागमने पञ्चशतरूपो दण्ड उक्तः स लघुत्वाद् गुणवद्वैश्यस्य निर्गुणजातिमात्रोपजीविक्षत्रियायाः शूद्राभ्रान्त्यादिगमनविषयो बोध्यः । अन्यत्र तु प्रागुक्तमेव । क्षत्रियस्यतु तत्र ज्ञानतो युक्त एव सहस्रं दण्ड इति भावः ॥ २८६ ॥

मि० अव. पारदार्यप्रसङ्गात् कन्यायामपि दण्डमाह।

या० अलङ्कृतां हरेत्कन्यामुत्तमं ह्यन्यथाऽधमम् ।
दण्डं दद्यात्सवर्णासु प्रातिलोम्ये वधः स्मृतः ॥ २८७॥

मि० विवाहाभिमुखीभूतामलङ्कृतां सवर्णां कन्यामपहरन्नुत्तमसाहसं दण्डनीयः । तदनभिमुखीं सवर्णां हरन् प्रथमसाहसम् । उत्कृष्टवर्णजां कन्यामपहरतः पुनः क्षत्रियादेर्वध एव । दण्डविधानाच्चापहर्तृसकाशादाच्छिद्यान्यस्मै देयेति गम्यते ॥ २८७ ॥

बा० १ । भिन्नविषयत्वात्सङ्गतिमाह * पारदार्येति । परदारगमनदण्डेत्यर्थः । * कन्यायामपि, तद्विषयहरणेऽपि । अलंकृतामित्यस्यैव व्याख्या *विवाहाभिमुखीभूतामिति । उत्तमं दण्डं दद्यादित्यस्यार्थ * उत्तमेति । अन्यथेत्यस्यार्थः * तदनभिमुखीमिति । विवाहानभिमुखीमित्यर्थः । * सवर्णामिति । अनेन सवर्णास्विति पाठः सूचितः । सवर्णास्विति पाठे भिन्नं वाक्यम् । तद्विषये पूर्वोक्तं बोध्यमित्यर्थः ।

२ । तुर्यपादार्थमाह * उत्कृष्टेति । ब्राह्मणस्य तदसम्भवादाह *क्षत्रियेति । प्रातिलोम्ये इति तत्र तद्धर्तृपरमिति भावः । तात्पर्यार्थमाह * दण्डेति । तस्य दुष्टत्वेनायोग्यत्वेनानाधिकृतत्वेनानधिकारिणा कृतमकृतमेवेति न्यायेन तस्याः कन्यात्वाक्ष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्या विवाहो भवत्येवेति भावः ॥ २८७ ॥

मि० अव. आनुलोम्यापहरणे दण्डमाह ।

या० सकामास्वनुलोमासु न दोषस्त्वन्यथा ऽधमः ।

मि० यदि सानुरागां हीनवर्णां कन्यामपहरति तदा दोषाभावान्न दण्डः । अन्यथा त्वनिच्छन्तीमपहरतः प्रथमसाहसो दण्डः ।

मि० अव. कन्यादूषणे दण्डमाह ।

या० दूषणे तु करच्छेद उत्तमायां वधस्तथा ॥२८८॥

मि० अनुलोमास्वित्यनुवर्तते । यद्यकामां कन्यां बलात्कारेण नखक्षतादिना दूषयति तदा तस्य करश्छेत्तव्यः । यदा पुनस्तामेवाङ्गुलिप्रक्षेपेण योनिक्षतं कुर्वन्दूषयति तदा मनूक्तषट्शतसहितोऽङ्गुलिच्छेदः । (अ. ८ श्लो. ३६७)

अभिषह्य तु यः कन्यां कुर्याद्दर्पेण मानवः ।
तस्याशु कर्त्ये अङ्गुल्यौ दण्डं चार्हति षट्शतम् ॥ इति ।

यदा पुनः सानुरागां पूर्ववद् दूषयति तदापि तेनैव-विशेष उक्तः, (अ. ८ श्लो. ३६८)

सकामां दूषयंस्तुल्यो नाङ्गुलिच्छेदमर्हति ।
द्विशतं तु दमं दाप्यः प्रसङ्गविनिवृत्तये ॥ इति ।

यदा तु कन्यैव कन्यां दूषयति विदग्धा वा तत्रापि विशेषस्तेनैवोक्तः, (अ. ८ श्लो. ३६९ । ३७०)

कन्यैव कन्यां या कुर्यात्तस्याः स्याद् द्विशतो दमः ।
या तु कन्यां प्रकुर्यात् स्त्री सा सद्यो मौण्ड्यमर्हति ।
अङ्गुल्योरेव वच्छेदं खरेणोद्वहनं तथा ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कन्यां कुर्यादिति कन्यां योनिक्षतवर्तीं कुर्यादित्यर्थः।

यदा पुनरुत्कृष्टजातीयां कन्यामविशेषात्सकामामकामां वाऽभिगच्छति तदा हीनस्य क्षत्रियादेर्वध एव।

(अ. ८ श्लो. ३६६)

उत्तमां सेवमानस्तु जघन्यो वधमर्हति।

इति मनुस्मरणात्।

यदा सवर्णां सकामामभिगच्छति तदा गोमिथुनं शुल्कं तत्पित्रे दद्यात् यदीच्छति। पितरि तु शुल्कमनिच्छति दण्डरूपेण तदेव राज्ञे दद्यात्। सवर्णामकामां तु गच्छतो वध एव।

यथाह मनुः, (अ. ८ श्लो. ३६६। ३६४)

शुल्कं दद्यात्सेवमानः समामिच्छेत्पिता यदि॥

योऽकामां दूषयेत्कन्यां स सद्यो वधमर्हति।

सकामां दूषयंस्तुल्यो न वधं प्राप्नुयान्नरः॥इति२८८॥

बा० १। *दण्डामिति। दण्डाभावपूर्वकं दण्डामित्यर्थः। तात्पर्यार्थमाह *न दण्डइति। अन्यथा त्वित्यस्यैव व्याख्या *अनिच्छन्तीमिति। अधम इत्यस्यार्थः * प्रथमेति।

उ० २। कन्येति। एवमपहारे दण्डमुक्त्वेत्यादिः। अत्र सर्वत्र कन्यापदमविवाहितापरं लक्षणया। प्रातिलोम्यादौ वक्ष्यमाणत्वादाह * अनुलोमास्विति। आद्यपादं व्याचष्टे * यदीति। सकामादौ विशेषाणां वक्ष्यमाणत्वादाह * अकामामित्यादिना। नखक्षतादिनेत्यस्य फलमाह * यदापुनरिति। * तामेव, अकामां बलात्कारितां कन्यामेव। *अभिषह्येति। यो मनुष्योऽभिषह्य बलात्कारेण अभिभूयेति तु कल्पतरुः। * दर्पेणेति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दर्पादिभिः समानजातीयां कन्यां गमनवर्जम् अङ्गुलिप्रक्षेपमात्रेणैव कुर्यात् नाशयेत् योनिक्षतवतीं कुर्यादिति यावत्। तस्य क्षिप्रमेवाङ्गुलिद्वयं छेतव्यं, स षट्शतं दण्डं चार्हतीत्यर्थः।

३। अकामामित्यस्य फलमाह * यदापुनरिति। अत एव न बलात्कार इति भावः। * पूर्ववत्, अङ्गुलिप्रक्षेपादिमात्रेण योनिक्षतकरणेन। *तेनैव, मनुनैव। एवमग्रेऽपि। दूषयंस्तुल्यो नाङ्गुलीति पाठः। तुल्यः समानजातिः इच्छन्तीं कन्यामङ्गुलिप्रक्षेपमात्रेण नाशयन्नङ्गुलिच्छेदं नार्हति न प्राप्नोति, किन्तु अतिप्रसक्तिनिवारणाय द्विशतं दण्डं दाप्य इत्यर्थः। दूषयन् कन्यां नाङ्गुलीति पाठान्तरम्। दूषयानस्तु नाङ्गुलीति च।

४। विशेषान्तरमाह * यदात्विति। एवेन पुरुषव्यवच्छेदः। एवं मानवेऽपि। अतएवाह * विदग्धावेति। * तत्रापि, उभयत्रापि। विशेष इत्यादि जातावेकवचनम्। * कन्यैवेति। या कन्यैव परां कन्याम् अङ्गुलिप्रक्षेपमात्रेण कुर्यान्नाशयेत् तस्या द्विशतो दण्डः स्यादित्यर्थः। अस्योत्तरार्ध-(अ.८।३६९)

शुल्कं च द्विगुणं दद्याच्छिफाश्चैवाप्नुयाद्दश। इति।

सा तत्कन्या शुल्कं यत्तत् द्विगुणं तत्कन्यापित्रे दद्यात्। दश शिफाः अत्र जटारज्ज्वादिप्रहारास्तांश्चाप्नुयादिति तदर्थः। एवमाद्यायामुक्त्वा द्वितीयायामव्यवहितमाह * यात्विति। अत्र स्त्रीति सामान्यमप्यर्थाद्विदग्धापरम्। या तु विदग्धा कन्यां प्रकुर्यात् नाशयेद् दूषयेत् अङ्गुलिप्रक्षेपमात्रेण सा सद्यस्तत्क्षणमेव शिरोमुण्डनम् अर्हति। अपिचेति तथेति च समुच्चये। विदग्धात्वादेवाङ्गुलिद्वयव्यापार इत्याह * अङ्गुल्योरिति। तर्जन्यङ्गुष्ठयोरित्यर्थः। तयोश्छेदनं चार्हति गर्दभेन राजमार्गे वहनं चार्हतीत्यर्थः। अपिवेति पाठे अपिवाशब्दः चार्थे। एव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेति एवचेतिच पाठेऽप्येवम् । आद्ये मानवे कुर्यादित्यस्य विकुर्याद् दूषयेदित्यर्थः । तत्फलितमाह * कन्यामिति ।

५ । उत्तमायामिति द्वितीयपादं व्याचष्टे * यदापुनरिति । अस्याभिगमनपरत्वे संमतिमाह * उत्तमामिति । हीनजातिः उत्कृष्टामिच्छन्तीं गच्छन् जात्यपेक्षया ऽङ्गच्छेदनमारणात्मकं वधमर्हतीत्यर्थः ।

६ । अनुक्तविशेषानाह * यदेत्यादिना । * मिथुनं, तद्रूपं शुल्कम् । * इच्छति, पिता । * तदेव, गोमिथुनमेव । सर्वत्र मानमाह । * यथाहेति । * शुल्कमिति । इदं तदुत्तरार्धम् । * समां समानजातीयां तु इच्छन्तीं गच्छन् यदि पिता इच्छेत्तदा पितुः शुल्कं दद्यादात्मरूपं, तथाच न दण्ड्यः। साच कन्या तेनैव वोढव्येत्यर्थः । तृतीये मानमाह * योऽकामामिति । तत्पूर्वम् एकपद्यव्यवाहितोऽयं श्लोकः । यस्तुल्यजातिरनिच्छन्तीं कन्यामभिगच्छति स तत्क्षणे एव विमेतरो लिङ्गच्छेदनादिकं वधमर्हति इत्यर्थः । इच्छेदिति सूचितं द्वितीये मानमाह * सकामामिति । इच्छन्तीं तु गच्छन्न वधार्हो मनुष्यो भवति किं तु तत्रोक्तरीतिरेवेत्यर्थः ॥ २८८ ॥

मि० अव. किंच ।

या० शतं स्त्रीदूषणे दद्याद् द्वे तु मिथ्याभिशंसने ।
पशून् गच्छन् शतं दाप्यो हीनां स्त्रीं गां च मध्यमम् ॥ २८९ ॥

मि० स्त्रीशब्देनात्र प्रकृतत्वात्कन्याऽवमृश्यते । तस्या यदि कश्चिद्विद्यमानानेवापस्माररराजयक्ष्मादिदीर्घकुत्सितरोगसंसृष्टमैथुनत्वादिदोषान्प्रकाश्य इयमकन्येति दूषयति असौ शतं दाप्यः । मिथ्याभिशंसने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनरविद्यमानदोषाविष्कारेण दूषणे द्वे शते दापनीयः। गोव्यतिरिक्तपशुगमने तु शतं दाप्यः। यः पुनर्हीनां स्त्रियमन्त्यावसायिनीमविशेषात्सकामामकामां वा, गां चाभिगच्छति, असौ मध्यमसाहसं दण्डनीयः॥२८९॥

बा० १। * किञ्चेति। कन्यास्थले प्रसङ्गादन्यदप्याहेत्यर्थः। पूर्वैकवाक्यत्वायाह *स्त्रीति। *अपस्मारेति। मिर्गीति प्रसिद्धः। राजयक्ष्मा क्षयः। आदिना कुष्ठी इत्यादिरूपाः दीर्घाः अचिकित्स्याः कुत्सिता रोगाः। संसृष्टं प्राप्तं मैथुनं सम्भोगो यया तस्या भावस्तत्त्वं, तेचैतदादयश्च, ते च ते दोषाश्च, तानित्यर्थः। मिथ्येत्यस्यैव व्याख्यानम् * अविद्यमानेति।

नच—

अदुष्टां च त्यजन् दण्ड्यो दूषयंस्तु मृषा शतम्।

इति प्राक् स्वोक्तविरुद्धमिदं, तत्र मिथ्याभिशंसने शतस्योक्तत्वादिति वाच्यम्। तस्य प्रकृतत्वात् वरविषयत्वात् एतस्य तदन्यविषयत्वादिति भावः।

ममतु प्रतिभाति। कन्यैव कन्यामितिमनूक्तविषयकमाद्यपादोक्तं, मिथ्याभिशंसनेत्यत्र भावप्रत्ययान्तादर्शआद्यजन्तादाप्। स्त्री विशेष्यभूता। तथाच तादृशस्त्रीविषयको द्वितीयपाद इति न विरोधशङ्काऽपि।

आद्ये मूलोक्तमनूक्तयोर्विकल्प इति।

२। गोः पृथग्वक्ष्यमाणत्वादाह *गोव्यतिरिक्तेति।

गौतमोऽपि, पशून् गच्छन् शतन्दाप्य इत्यादि।

मात्स्येऽपि,

तिर्यग्योनौ तु गोवर्जं मैथुनं यो निषेवते।

स शतं प्राप्नुयाद्दण्डं तस्याश्च यवसोदकम्॥ इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हीनामित्यस्य व्याख्या * अन्त्येति । अन्त्यगामिनीं नत्वन्त्यामित्यर्थः । तत्र विशेषस्य वक्ष्यमाणत्वात् ।

अतएव नारदः, (व्यव. १२ । ७६)

पशुयोनावतिक्रामन्विनेयः सततं शतम् ।
मध्यमं साहसं गोषु भवेदन्त्यावसायिषु ॥ इति ।

अकन्येति तु यः कन्यां ब्रूयात् द्वेषेण मानवः ।
स शतं प्राप्नुयाद्दण्डं तस्या दोषमदर्शयन् ॥ इति —

मनुरपि (अ.८।२२५) दूषयंस्तु मृषाशतमिति मूलोक्तसमानविषयः। तत्र तस्या इत्यादि हेतुगर्भविशेषणम्। यत उक्तदोषं क्षतयोनित्वादिकमाविभावयन् अतो युक्तोऽस्यायं पणशतात्मको दण्ड इत्यर्थः।

यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति ।
तस्य कुर्यान्नृपो दण्डं स्वयं षण्णवतिं पणान् ॥

इति अत्रैवानुशयप्रसङ्गे प्राग्वन्मनूक्तन्तु— (८ । २२४)

अनाख्याय ददद्दोषं दण्ड्य उत्तमसाहसम्।(याज्ञ.अ.१।६६)

इति मूलोक्तविषये पक्षान्तरं बोध्यम् । नोन्मत्ताया इति सामान्येनोक्तत्वात् तत्र दण्डविशेषोक्त्यर्थं वा तत् । अतएव दोष उन्मादादिः । स्वयमित्यादरार्थम् ।

यत्तु, (अ. ८ । २२६)

पाणिग्रहणिका मन्त्राः कन्यास्वेव प्रतिष्ठिताः ।
नाकन्यासु क्वचिन्नृणां लुप्तधर्मक्रिया हि ताः ॥

इति तत्रैव मनुः, तस्यायम्भावः । "अर्यमणं नु देवं कन्या अग्निमक्षयत" इत्यादयो वैदिका मनुष्याणां विवाहसम्बन्धिनो मन्त्राः कन्याशब्दश्रवणात् कन्यास्वेव व्यवस्थिताः । अकन्याविषये क्वचिद्धर्मशास्त्रे विवाहासिद्धये न व्यवस्थिताः । असमवेतार्थतापत्तेः । अतएव हि यतः ताः क्षताः वैवाहिकमन्त्रैः सं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्क्रियमाणा अपि अपगतधर्मविवाहादिशालिन्यो भवन्ति। नासौ विवाहो धर्म्य इत्यर्थः ।

न तु क्षतयोनेर्विवाहादिमन्त्रहोमादिनिषेधकमिदम् ।

"या गर्भिणी संस्क्रियते" तथा "वोढुः कन्यासमुद्भवम्" इति क्षतयोनेरपि मनुनैव विवाहसंस्कारस्योक्तत्वात्

देवलेन च,

गान्धर्वेषु विवाहेषु पुनर्वैवाहिको विधिः ।
कर्त्तव्यश्च त्रिभिर्वर्णैः समयेनाग्निसाक्षिकः ॥

इति गान्धर्वेषु विवाहेषु होममन्त्रादिविधिरुक्तः । गान्धर्वश्चोपगमनपूर्वकोऽपि भवति । तस्य क्षत्रियविषये सुधर्मत्वमपि मनुनोक्तम् । अतः सामान्यविशेषन्यायेनान्याविषयोऽयं क्षतयोनिविवाहस्याधर्मत्वोपदेश इति ॥ २८९ ॥

मि० साधारणस्त्रीगमने दण्डमाह ।

या० अवरुद्धासु दासीषु भुजिष्यासु तथैव च ।
गम्यास्वपि पुमान्दाप्यः पञ्चाशत्पणिकं दमम् ॥२९०॥

मि० गच्छन्नित्यनुवर्तते । उक्तलक्षणा वर्णस्त्रियो दास्यः। ता एव स्वामिना शुश्रूषाहानिव्युदासार्थं गृह एव स्थातव्यमित्येवं पुरुषान्तरोपभोगतो निरुद्धाः अवरुद्धाः । पुरुषनियतपरिग्रहाः भुजिष्याः । यदा दास्योऽवरुद्धा भुजिष्या वा भवेयुस्तदा तासु, तथाचशब्दाद्वेश्यास्वैरिणीनामपि साधारणस्त्रीणां भुजिष्याणां ग्रहणम्, तासु च सर्वपुरुषसाधारणतया गम्यास्वपि गच्छन् पञ्चाशत्पणं दण्डनीयः । परपरिगृहीतत्वेन तासां परदारतुल्यत्वात् । एतच्च स्पष्टमुक्तम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नारदेन, (व्यव. १२। श्लो. ७८ ७९)

स्वैरिण्यब्राह्मणी वेश्या दासी निष्कासिनी च या।
गम्याः स्युरानुलोम्येन स्त्रियो न प्रतिलोमतः॥
आस्वेव तु भुजिष्यासु दोषः स्यात्परदारवत्।
गम्यास्वपि हि नोपेयाद्यत्ताः परपरिग्रहाः॥ इति।

निष्कासिनी स्वाम्यनवरुद्धा दासी।

ननु स्वैरिण्यादीनां साधारणतया गम्यत्वाभिधानमयुक्तम्। नहि जातितः शास्त्रतो वा काश्चन लोके साधारणाः स्त्रिय उपलभ्यन्ते। तथाहि। स्वैरिण्यो दास्यश्च तावद्वर्णस्त्रिय एव। (याज्ञ. १।६७)

स्वैरिणी या पतिं हित्वा सवर्णं कामतः श्रयेत्॥
वर्णानामानुलोम्येन दास्यं न प्रतिलोमतः॥ (याज्ञ. २।१८३)

इति स्मरणात्। न च वर्णस्त्रीणां पत्यौ जीवति मृते वा पुरुषान्तरोपभोगो घटते।

(मनु० अ. ५ श्लो. १५४। १५७)

दुःशीलः कामवृत्तो वा गुणैर्वा परिवर्जितः।
परिचर्यः स्त्रिया साध्व्या सततं देववत्पतिः॥
कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः।
न तु नामापि गृह्णीयात् पत्यौ प्रेते परस्य तु॥

इति निषेधस्मरणात्। नापि कन्यावस्थायाः साधारणत्वम्। पित्रादिपरिरक्षितायाः कन्याया एव दानोपदेशात्। दात्रभावेऽपि तथाविधाया एव स्वयंवरोपदेशात्। न च दासीभावात् स्वधर्माधिकारच्युतिः। पारतन्त्र्यं हि दास्यं न स्वधर्मपरित्यागः। नापि वेश्या साधारणी। वर्णानुलोमजव्यतिरेकेण गम्यजा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यन्तरासम्भवात्। तदन्तःपातित्वे च पूर्ववदेवागम्यत्वम्। प्रतिलोमजत्वे तु तासां नतरां गम्यत्वम्। अतः पुरुषान्तरोपभोगे तासां निन्दितकर्माभ्यासेन पातित्यात् पतितसंसर्गस्य निषिद्धत्वाच्च न सकलपुरुषोपभोग्यत्वम्।

सत्यमेवम्। किं त्वत्र स्वैरिण्याद्युपभोगे पित्रादिरक्षकराजदण्डभयादिदृष्टदोषाभावाद् गम्यत्ववाचोयुक्तिः। दण्डाभावश्च "अवरुद्धासु दासीषु" इति नियतपुरुषपरिग्रहोपाधितो दण्डविधानात्तदुपाधिरहितासु अर्थादवगम्यते। स्वैरिण्याद्यानां पुनर्दण्डाभावो विधानाभावात्,

कन्यां भजन्तीमुत्कृष्टं न किञ्चिदपि दापयेत्।

इति लिङ्गदर्शनाच्चावगम्यते। प्रायश्चित्तं तु स्वधर्मस्खलननिमित्तं गम्यानां गन्तॄणां चाविशेषाद्भवत्येव।

यत्तुनर्वेश्यानां जात्यन्तरासम्भवेन वर्णान्तःपातित्वमनुमानादुक्तम्, वेश्याः वर्णानुलोमाद्यन्तःपातिन्यो मनुष्यजात्याश्रयत्वात् ब्राह्मणादिवदिति। तन्न। कुण्डगोलकादिभिरनैकान्तिकत्वात्। अतो वेश्याख्या काचिज्जातिरनादिः वेश्यायामुत्कृष्टजातेः समानजातेर्वा पुरुषादुत्पन्ना पुरुषसम्भोगवृत्तिर्वेश्येति ब्राह्मण्यादिवल्लोकप्रसिद्धिबलादभ्युपगमनीयम्। न च निर्मूलेयं प्रसिद्धिः।

स्मर्यते हि स्कन्दपुराणे, पञ्चचूडा नाम काञ्चनाप्सरसस्तत्सन्ततिर्वेश्याख्या पञ्चमी जातिरिति। अतस्तासां नियतपुरुषपरिणयनाविधि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विधुरतया समानोत्कृष्टजातिपुरुषाभिगमने नादृष्टदोषो नापि दण्डः। तासु चानवरुद्धासु गच्छतां पुरुषाणां यद्यपि न दण्डस्तथाप्यदृष्टदोषोऽस्त्येव। स्वदारनियतः सदेति नियमात्।

पशुवेश्याभिगमने प्राजापत्यं विधीयते।

इति प्रायश्चित्तस्मरणाच्चेति निरवद्यम्॥ २९०॥

बा० १। *साधारणेति। तत्त्वं च सर्वपुरुषगामित्वम्। अन्वयायाह *गच्छन्निति। *उक्तेति। अभ्युपेत्याशुश्रूषाख्यप्रकरणे "गृहजातः तथा क्रीत" इत्यादिना साम्यादुक्तप्रायलक्षणा इत्यर्थः। निमित्तान्तरत्वनिरासायाह * ता एवेति। अत एव नारीष्विति कल्पतर्वादिपाठेनैकवाक्यता। *पुरुषान्तरोपभोगेति। स्वभोग्यत्वं तु नैवेति भावः। * पुरुषेति। स्वामिभिन्नेत्यर्थः।

२। एवं पदार्थानुक्त्वा वाक्यार्थमाह * यदेति। एवो दाप्य इत्यत्रान्वेतीत्याह * तथाचशब्दादिति। समुच्चयार्थकात्समुदितादित्यर्थः।

स्वैरिणी या पतिं हित्वा सवर्णं कामतः श्रयेत्।(याज्ञ.१।६७)

इत्युक्तलक्षणा स्वैरिणी। आसां साधारणत्वं प्राग्वदेव। सान्निध्यात्सम्भवाच्चाह * भुजिष्याणामिति। तदेवाह * सर्वेति। गम्यास्वपीत्यनेन सूचितमिदम्। अनुवृत्तिलब्धमाह। * गच्छन्निति। अपिः विरोधे। ननु साधारणत्वे कथं दण्डः, अतआह * परेति। एतदर्थमेव विशेषणद्वयमिति भावः। अब्राह्मणीति स्वैरिणीविशेषणम्। तादृशी साच। ब्राह्मणीत्युपलक्षणम्। अतः क्षत्रियादिस्त्रियोऽपि स्वैरिण्यो गृह्यन्ते। दासी चासौ निष्कासिनी चेति व्याख्यानमपास्तम्। मूलाशुद्धेः। कल्पतर्वाद्यसंमतत्वात्। पूर्वनिपातवैपरीत्यापत्तेः। पृथक्पद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वस्य व्याख्यातृसंमततया स्पष्टत्वाच्चेति दिक् । दोषमुपपादयति * गम्यास्वपीति । आस्वित्यर्थः । गम्या अपीति पाठान्तरम् । हिः निश्चये । * यत्, यस्मात् । * ताः, भुजिष्याः स्वैरिण्यादयः । परेषां परिग्रहो यासामित्यर्थः । यास्ता इति पाठे हिर्हेतौ । निष्कासिनीति पृथक् पदं दासीविशेषणमिति आह * निष्कासिनीति ।

३ । तदर्थं कथयन्नाद्ये आह * स्वैरिणी येति । द्वितीये आह *वर्णानामिति । अध्यायभेदेन भिन्नमिदम् ।

नन्वस्तु आसां वर्णस्त्रीत्वं तथापि सर्वपुरुषगामित्वेन साधारणत्वमित्याविरोधेन तत्कथनं युक्तमेवेति तदभावः कथम्, अत आह * नचवर्णस्त्रीणामिति । स्वपुरुषपरत्वविधानात् पुरुषान्तरपरत्वनिषेधाच्चेति भावः । तत्राद्यं तु स्वदारनिरतः सदेत्यग्रे स्फुटीभविष्यति । द्वितीयमाह * दुःशील इति । दुष्टस्वभावः । * कामेति । यथेच्छाचारी । इदं जीवद्विषयम् । अथ मृते आह * कामं त्विति । मानवमिदं वचनद्वयम् । * तथाविधाया इति । रक्षिताया इत्यर्थः । अदुष्टाया इति यावत् ।

४ । * नचदासीभावादिति । दासीत्वादित्यर्थः । यथा सूतकादिवशात् स्वधर्मभूतसन्ध्याद्यधिकाराभावः तथा दासीत्वात्स्वधर्मभूतस्वपुरुषपरत्वाद्यभावेन सर्वपुरुषगामित्वेन साधारणत्वमिति भावः । * हि, यतः । सूतकादौ वचनात्तदभावो न स्वरूपेण । अत्र तु न वचनं, नापि स्वरूपतः । यतो दास्यं पारतन्त्र्यमेव शिष्यत्वादिवत्, अतो न स्वधर्मपरित्यागो, येन साधारण्यं स्यादिति भावः ।

५ । ननु माभूद्दासीस्वैरिण्योः साधारणत्वाभावाद्गम्यात्वं, वेश्यायास्तु तत्त्वेन तत्त्वं भवतु, इत्यत आह * नापीति । कि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मियं वेश्या वर्णानुलोमजभिन्नगम्यजात्यन्तरान्तःपातिनी, उत वर्णानुलोमजान्तःपातिनी, उत प्रतिलोमजान्तःपातिनी। तत्राद्यं दूषयति * वर्णानुलोमेति। तादृशजात्यन्तराभावादेव तदन्तःपातित्वेन गम्यत्वाभाव इत्यर्थः। न द्वितीय इत्याह * तदन्तरिति। तत्त्वे च सति स्वैरिण्यादिवदेव तासां पतिपरायणत्वाविधानादगम्यात्वमित्यर्थः।

६। नापि तृतीय इत्याह * प्रतिलोमजत्वे इति। * नतरामिति। आतिशायितगम्यत्वाभाव इत्यर्थः। नितरामिति पाठे न तासामिति पाठः। अगम्यत्वमिति पाठे प्रतिलोमजानां दुष्टात्वेन तद्गमनस्य निषिद्धत्वादित्यर्थः। गम्यात्वमिति पाठः। गम्यत्वमिति पाठे सामान्ये नपुंसकम्। एवमन्यत्रापि। स्वैरिण्यादयो न परपुरुषगम्या इत्याक्षेपमुपसंहरति * अत इति। उक्तहेतुजातादित्यर्थः। * तासां, वर्णानुलोमप्रतिलोमजानां सर्वासां स्वैरिण्यादीनाम्। * निन्दितेति। परपुरुषोपभोगस्य निषिद्धत्वात्। * संसर्गस्य च, तस्यापि।

७। समाधत्ते * सत्यमित्यादिना। सत्यमित्यर्द्धाङ्गीकारे। तथापि योजयति * किं त्विति। * अत्र, नारदीयादौ। * पित्रादीति। पित्रादिरक्षकश्च राजदण्डश्च तयोर्भयादिरूपदृष्टदोषाभावाद् गम्यत्वरूपवाचोयुक्तिर्वचनमात्रमित्यर्थः। अथ तासामेव दण्डोऽस्तु अत आह *स्वैरिण्याद्यानामिति। हेत्वन्तरं मानवमाह *कन्यामिति। सम्भोगार्थमुत्कृष्टम् उत्कृष्टजातिं पुरुषं भजन्तीं सेवमानां कन्यां किञ्चिदपि स्वल्पमपि दण्डं न दापयेदित्यर्थः। ननु अयं निषेधः कन्याया एव न स्वैरिण्याद्याः, अत आह *लिङ्गेति। लिङ्गदर्शनं निमित्तमात्रं नाव्यभिचरितो हेतुः। अतः कन्यापि स्त्री स्वैरिण्यादयोऽपि स्त्रिय इत्युभयत्र स्त्रीत्वाविशेषा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्कन्धाया इव स्वैरिण्यादीनामपि दण्डाभाव इति भावः । ननु यदि दण्डाद्यभावस्तर्हि प्रायश्चित्तमपि न स्यात्, अत आह * प्रायश्चित्तमिति । * स्वधर्मेति । बहुव्रीहिणा पूर्वविशेषणम् । * गम्यानां, स्त्रीणाम् उक्तानाम् । * गन्तॄणां, पुरुषाणाम् ।

८ । वेश्यास्थले विशेषं प्रतिपादयितुं वेश्यानां वर्णाद्यन्तः-पातित्वं कस्यचिदनुमानप्रमाणक्रमभिमतं, तन्मतमाह *यत्पुन-रिति । वेश्या इति पक्षः । वर्णेति साध्यम् । आदिना प्राति-लोम्यपरिग्रहः । मनुष्यजात्येति हेतुः । यत्र यत्र तथा, तत्र तत्त्वम्, यथा ब्राह्मणादिष्विति दृष्टान्तः । आदिना मूर्द्धावसि-क्तादिपरिग्रहः । हेतोर्व्यभिचारितत्वेन दूषयति * तन्न कुण्डेति । तैर्हेतोर्व्यभिचरितत्वादित्यर्थः । कुण्डादीनामाचाराध्याये वर्णा-द्यन्तःपातित्वाभावस्योक्तत्वेन तत्र हेतुसत्त्वेऽपि साध्यस्या-भावादिति भावः ।

९ । स्वमतमाह * अत इति । उक्तहेतोरित्यर्थः । तामेव जातिमाह * वेश्यायामिति । अनिषिद्धपुरुषोत्पन्नत्वे सति तत्र पुरुषसम्भोगवृत्तित्वं वेश्यात्वमित्यर्थः । एतद्घटकवेश्याया अपी-दमेव लक्षणमिति ध्वनयन् दृष्टान्तमाह । * ब्राह्मण्यादिवदिति । अनादित्वाच्च संसारस्य न दोषः । एतत्सूचनार्थमेवानादिरि-त्युक्तम् । * हि, यतः । पञ्चमीति । ब्राह्मणत्वादिचतुष्टया-पेक्षया पञ्चमीत्यर्थः । प्रकृतं तमेव सविशेषमाह * अत इति । इदमनवरुद्धायाम् । तत्रापि विशेषमाह * तासु चेति । वेश्या-स्वपीत्यर्थः । * पशुवेश्येति । पश्वभिगमने वेश्याऽभिगमने चेत्यर्थः ॥ २९० ॥

मि० अव. अवरुद्धासु दासीष्वित्यनेन दासीस्वैरि-ण्यादिभुजिष्याभिगमने दण्डं विदधता तास्वभुजि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्वासु दण्डो नास्तीत्यर्थादुक्तं, तस्यापवादमाह।

या० प्रसह्य दास्यभिगमे दण्डो दशपणः स्मृतः।
बहूनां यद्यकामाऽसौ चतुर्विंशतिकः पृथक्॥ २९१॥

मि० पुरुषसंभोगजीविकासु दासीस्वैरिण्यादिषु शुल्कदानविरहेण प्रसह्य बलात्कारेणाभिगच्छतो दशपणो दण्डः। यदि बहव एकामनिच्छन्तीमपि बलात्कारेणाभिगच्छन्ति तर्हि प्रत्येकं चतुर्विंशतिपरिमितं दण्डं दण्डनीयाः। यदा पुनस्तदिच्छया भाटिं दत्त्वा पश्चादनिच्छन्तीमपि बलाद् व्रजन्ति तदा तेषामदोषः। यदि व्याध्याद्यभिभवस्तस्या न स्यात्।

व्याधिता सश्रमा व्यग्रा राजकर्मपरायणा।
आमन्त्रिता चेन्नागच्छेददण्ड्या वडवा स्मृता॥

इति नारदवचनात्॥ २९१॥

बा० १। उत्तरसङ्गत्यर्थं फलितमाह * अरुद्धास्विति। विदधतेत्यस्यैव विशेषणम्। दण्डविधानादिति पाठान्तरम्। तास्वभुजिष्यास्विति पाठः। * तस्य, अभुजिष्यागमने दण्डाभावस्य। तत्र हेतुं सूचयन्नाह * पुरुषेति। दासीग्रहणमुपलक्षणमित्याह * स्वैरिण्यादिष्विति। प्रसह्येत्यस्य व्याख्या * बलादिति। तस्यैव विवरणं * शुल्केति। अत एवाभुजिष्यास्वपि तस्य दण्डः। एतावतैवास्य वचनस्य सार्थक्यम्। अन्यथाऽसंबद्धत्वं वैयर्थ्यं च स्पष्टमेव।

२। उत्तरार्धतात्पर्यार्थमाह * यदि बहव इति। मूलेऽसौ दास्यादिः। अत एव व्याख्यानं सामान्येन। * परीति। तत्परिच्छिन्नं समुदितं वास्त्वित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३। विशेषमाह * यदा पुनरिति । * भाटिं, सर्वमूल्यम् । * तेषां, बहूनाम् । शुल्कस्य दत्तत्वात् । तत्रापि विशेषमाह * यदीति । तथाच तत्र तथाकरणे पुनरपि तेषां दोष एवेति भावः । आदिसंग्राह्यं वचने एव व्यक्तम् । * वडवा, गृहदासी ॥ २९१ ॥

या० गृहीतवेतना वेश्या नेच्छन्ती द्विगुणं वहेत् ।
अगृहीते समं दाप्या पुमानप्येवमेव च ॥ २९२ ॥

मि० यदा तु शुल्कं गृहीत्वा स्वस्थाऽपि अर्थपतिं नेच्छति तदा द्विगुणं शुल्कं दद्यात् । तथा शुल्कं दत्त्वा स्वयमनिच्छतः स्वस्थस्य पुंसः शुल्कहानिरेव ।

शुल्कं गृहीत्वा पण्यस्त्री नेच्छन्ती द्विगुणं वहेत् ।
अनिच्छन्दत्तशुल्कोऽपि शुल्कहानिमवाप्नुयात् ॥

इति तेनैवोक्तम् । (व्यव. ६ । १८)

तथाऽन्योऽपि विशेषः—

तेनैव दर्शितः,

अप्रयच्छंस्तथा शुल्कमनुभूय पुमान् स्त्रियम् ।
आक्रमेण च संगच्छन् घातदन्तनखादिभिः ॥
अयोनौ वाऽभिगच्छेद्यो बहुभिर्वापि वासयेत् ।
शुल्कमष्टगुणं दाप्यो विनयं तावदेव तु ॥
वेश्याः प्रधाना यास्तत्र कामुक्यस्तद्गृहोषिताः ।
तत्समुत्थेषु कार्येषु निर्णयं संशये विदुः ॥ इति ॥ २९२ ॥

बा० १ । ननु यदा पुनरित्यादिना तेषामदोष एवेति भाटिप्रतिपादनेन तस्या एव तत्र दोषलाभेन स वक्तव्यः, अत आह *गृहीतेति । मौलमिदम् । किं चेत्यपपाठः । अत्रापि वेश्याः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रहणमुपलक्षणम् । अत एव सामान्येन व्याचष्टे *यदा त्विति । नारदोक्तेरेवाह * स्वस्थाऽप्यर्थपतिमिति ।

२ । तृतीयपादस्यायमर्थः । शुल्के निश्चितेऽप्यगृहीते सति नेच्छन्ती सा समं यावन्निश्चितं तावदेव दाप्येति । स्पष्टत्वाद्व्याख्यात्रा नोक्तम् ।

३ । तुर्यपादार्थमाह *तथेति । *स्वयं, स्वयमेव । *शुल्केति । यद्दत्तं तस्य हानिरेवेत्यर्थः । स्पष्टत्वाय नारदीयमाह *शुल्कमिति । यत इत्यादिः । *तथा, तद्वत् । * तेनैव, नारदेनैव । * अप्रयच्छन्निति । शुल्कमप्रयच्छन्पुमान् तथा बलात्कारेण व्याध्याद्यभिभूतां स्त्रियं भुक्त्वा शुल्कमष्टगुणं यावन्निर्णीतं तदष्टगुणं दाप्यः । घातस्ताडनम् । पादेति पाठान्तरम् । तथा च ताडनदन्तक्षतनखक्षतादिभिः करणैर्य आक्रमो वशीकरणं तेन सङ्गच्छंश्च तथा । अयोनौ योनिभिन्नइत्यर्थः । मुखादौ योऽभिगच्छेत्स च तथा । शुल्कमदत्त्वा एकमेव वा शुल्कं दत्त्वा यो बहुभिर्वासयेत्सङ्गमयति तां सोऽपि तथेत्यर्थः । * विनयं, दण्डम् । ननु कथं दोषनिर्णयस्तत्र, अत आह *वेश्या इति । तत्र तदीयगृहे याः कामुक्यः साभिलाषास्तद्गृहवासिन्यः प्रधानाः वृद्धाः वेश्याः सन्ति ताः मिथः समुत्पन्नविवादरूपकार्यविषयकसंशये सति तत्परिहाय निर्णयं जानन्तीत्यर्थः । वेश्याप्रधाना ये तत्र कामुका इति पाठान्तरम् । तदा तत्र वेश्यैव प्रधानमुपजीव्यमेषामेतादृशास्तद्गृहनिवासिनो ये कामुका विटाः सन्तीत्याद्यर्थः ॥ २९२ ॥

मि० अव. किञ्च ।

या० अयोनौ गच्छतो योषां पुरुषं वाऽभि मेहतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतुर्विंशतिको दण्डस्तथा प्रव्रजितागमे ॥ २९३ ॥

मि० यस्तु स्वयोषां मुखादावभिगच्छति पुरुषं वाऽभिमुखो मेहति तथा प्रव्रजितां वा गच्छति असौ चतुर्विंशतिं पणान्दण्डनीयः ॥ २९३ ॥

बा० १ । * किं चेति । एतत्प्रसङ्गादन्यदप्युच्यते इत्यर्थः । एवमग्रेऽपि । अन्यत्र दण्डाल्पत्वस्य गमनादौ सत्त्वादाह *स्वेति । अयोनावित्यस्यार्थो * मुखादाविति । आदिना पायुपरिग्रहः । * पुरुषं वेति । तदभिमुखः सन्मेहति मूत्रादिकं करोति सोऽपि । वाशब्दः चार्थे । प्रव्रजिता प्रागुक्ता । नन्विदं राज्ञी प्रव्राजिता धात्रीतिप्रागुक्तनारदविरुद्धम् । अत्र हि पणानां चतुर्विंशतिर्दण्ड उक्तः, तत्र शिश्नस्योत्कर्तनं दण्ड उक्त इति चेन्न । अत्यन्तगुणवत्प्रव्रजितागमनविषयकं तत्रैवाभ्यासविषयकं वा नारदीयम्, इदं तु तदन्यविषयकमिति भेदात् ॥ २९३ ॥

मि० अव. किञ्च ।

या० अन्त्याऽभिगमने त्वङ्क्य कुबन्धेन प्रवासयेत् ।
शूद्रस्तथाऽन्त्य एव स्यादन्त्यस्यार्यागमे वधः ॥ २९४ ॥

मि० अन्त्या चाण्डाली तद्गमने त्रैवर्णिकान्प्रायश्चित्तानभिमुखान् सहस्रं त्वन्त्यजास्त्रियामिति मनुवचनात्पणसहस्रं दण्डयित्वा कुबन्धेन कुत्सितबन्धेन भगाकारेणाङ्कयित्वा स्वराष्ट्रान्निर्वासयेत् । प्रायश्चित्ताभिमुखस्य पुनर्दण्डनमेव । शूद्रः पुनश्चाण्डाल्यभिगमेऽन्त्य एव चाण्डाल एव भवति । अन्त्यजस्य पुनश्चाण्डालादेरुत्कृष्टजातिस्त्र्यभिगमे वध एव ॥ २९४ ॥

इति स्त्रीसंग्रहणप्रकरणम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बा० १ । स्वङ्क्ष्वेति ल्यबन्तपाठः । त्वङ्क्ष्वेति पाठे आर्षो ल्यप् व्याख्यानानुसारात् । यदा त्वङ्क्ष इति प्रथमान्तपाठः, तेनाङ्क्षः, स तं प्रवासयेदित्यर्थस्तदा । व्याख्यानं फलितार्थकथनपरतया नेयम् । शूद्रस्याग्रे विशिष्योक्तेराह * त्रैवर्णिकानिति । न्यूनं मध्ये समूलं पूरयति * सहस्रमिति । बध्यतइति बन्धः । कुत्सितश्चासौ बन्धश्च कुबन्धः । तदर्थमाह * भगेति । प्रागुक्तमनोरिति भावः । दत्तविशेषणफलमाह * प्रायश्चित्तेति । *दण्डनमेवेति । नाङ्कनमित्यर्थः । तथेत्यस्यार्थः * चाण्डाल्यभीति । सर्वसंग्रहायाह * उत्कृष्टेति ॥ २९४ ॥

इति स्त्रीसंग्रहणप्रकरणम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ प्रकीर्णकप्रकरणम् ॥ २५ ॥

मि० उ० व्यवहारप्रकरणमध्ये स्त्रीपुंसयोगाख्यमप्यपरं विवादपदं मनुनारदाभ्यां विवृतम् ।

तत्र नारदः, (व्यव. १२ । १)

विवाहादिविधिः स्त्रीणां यत्र पुंसां च कीर्त्यते ।
स्त्रीपुंसयोगसंज्ञं तद्विवादपदमुच्यते ॥ इति ।

मनुरप्याह, (अ. ९ श्लो. २)

अस्वतन्त्राः स्त्रियः कार्याः पुरुषैः स्वैर्दिवानिशम् ।
विषयेषु च सज्जन्त्यः संस्थाप्या ह्यात्मनो वशे ॥
इत्यादि ।

यद्यपि स्त्रीपुंसयोः परस्परमर्थिप्रत्यर्थितया नृपसमक्षं व्यवहारो निषिद्धस्तथापि प्रत्यक्षेण कर्णपरम्परया वा विदिते तयोः परस्परातिचारे दण्डादिना दम्पती निजधर्ममार्गे राज्ञा स्थापनीयौ । इतरथा दोषभाग्भवतीति व्यवहारप्रकरणे राजधर्ममध्ये अस्य स्त्रीपुंसधर्मजातस्योपदेशः । एतच्च विवाहप्रकरण एव सप्रपञ्चं प्रतिपादितमिति योगीश्वरेण न पुनरत्रोक्तम् ।

सांप्रतं प्रकीर्णकाख्यं व्यवहारपदं प्रस्तूयते । तल्लक्षणं च कथितम्—

नारदेन, (व्यव. १७)

प्रकीर्णके पुनर्ज्ञेया व्यवहारा नृपाश्रयाः ।
राज्ञामाज्ञाप्रतीघातस्तत्कर्मकरणं तथा ॥ (१)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुरप्रदानं सम्भेदः प्रकृतीनां तथैव च ।
पाखण्डिनैगमश्रेणिगणधर्मविपर्ययाः ॥ (२)
पितापुत्रविवादश्च प्रायश्चित्तव्यतिक्रमः ।
प्रतिग्रहविलोपश्च कोप आश्रमिणामपि ॥ (३)
वर्णसङ्करदोषश्च तद्वृत्तिनियमस्तथा ।
न दृष्टं यच्च पूर्वेषु सर्वं तत्स्यात्प्रकीर्णके॥ इति।(४)

प्रकीर्णके विवादपदे ये विवादा राजाज्ञोल्लङ्घनतदाज्ञाकरणादिविषयास्ते नृपसमवायिनः । नृप एव तत्र स्मृत्याचारव्यपेतमार्गे वर्तमानानां प्रतिकूलतामास्थाय व्यवहारनिर्णयं कुर्यात् । एवं वदता यो नृपाश्रयो व्यवहारस्तत्प्रकीर्णकमित्यर्थाल्लक्षितं भवति ॥

अव. तत्रापराधविशेषेण दण्डविशेषमाह ।

मि० ऊनं वाऽभ्यधिकं वापि लिखेद्यो राजशासनम् ।
पारदारिकचौरं वा मुञ्चतो दण्ड उत्तमः ॥२९५॥

मि० राजदत्तभूमेर्निबन्धस्य वा परिमाणान्न्यूनत्वमाधिक्यं वा प्रकाशयन् राजशासनं यो लिखति यश्च पारदारिकं चौरं वा गृहीत्वा राज्ञेऽनर्पयित्वा मुञ्चति तावुभावुत्तमसाहसं दण्डनीयौ ॥ २९५ ॥

बा० १ । * स्त्रीपुंसयोगाख्यमिति । तदाख्यमपरमपीत्यर्थः । *विवाहादीति । यत्र विवादपदे स्त्रीणां पुंसां च विवाहादिविधिः कीर्त्यते अनुमतितदभावाभ्यां प्रसिद्धो भवति तद्विवादपदं स्त्रीपुंसयोगसंज्ञमुच्यते इत्यर्थः । यत्र विवाहे स्त्रीपुंसयोर्व्यतिक्रमो भवति, तद्यथा, कन्यका यं वरमेकं क्वचित् वृणीते स त्रियमागः पुमान् न तां दोषशङ्कादिना, एवमेव पुरुषोऽपि यां का-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चित्कन्यकां परिणेतुमिच्छति कन्या तु न तं दोषशङ्कादिना, एवं चैतादृशस्थले तत्र व्यवहारप्रवृत्तिरेव। विवाहादीत्यादिना परपुरुषतः स्त्री रक्षणीया सर्वात्मना स्त्रियाऽपि भर्तृपरया भाव्यमित्यादिनियमपरिग्रहः। एतत्सर्वं स्त्रीपुंसयोगाख्यं विवादपदमिति भावः। आदिग्राह्यमेवाह * मनुरपीति। अत एव च आदौ नारदमुक्त्वाऽग्रे मनूक्तिरिति बोध्यम्। स्वैः स्वीयैर्भ्रात्रादिभिः दिवानिशं सदा विषयेषु अनिषिद्धेष्वपि रूपरसादिविषयेषु सज्जन्त्यश्च प्रसक्ता अपि आत्मनो वशे आयत्ततायां संस्थाप्याः आत्मवशाः कार्या इत्यर्थः।

पुरुषस्य स्त्रियाश्चैव धर्म्ये वर्त्मनि तिष्ठतोः। (अ. ९। १)
संयोगे विप्रयोगे च धर्मान्वक्ष्यामि शाश्वतान्॥ इति अस्यादिः।

इत्यादीत्यादिना—

पिता रक्षति कौमारे भर्ता रक्षति यौवने।
रक्षन्ति स्थाविरे पुत्रा न स्त्री स्वातन्त्र्यमर्हति॥

इत्यादिपरिग्रहः। इदं च यथासम्भवं द्रष्टव्यम्। *निषिद्ध इति। पूर्वमिति भावः। * प्रत्यक्षेण, साक्षात्। * अतिचारे, व्यतिक्रमे। * धर्मजातस्य, तत्समूहस्य। न्यूनतामत्र परिहरति * एतच्चेति। स्त्रीपुंसधर्मजातमित्यर्थः। * पुनः, पश्चात्।

इति स्त्रीपुंसयोगप्रकरणम्।

२। चस्त्वर्थे। एवं पुनरपि। यथेति पाठे आदौ संयोज्यः। तानेव दर्शयतीत्यर्थः। तथेति पाठे समुच्चयार्थः सः। * तत्कर्मेति। राजकार्याज्ञाविषयकर्मेत्यर्थः। * पुनः प्रदानमिति कर्त्रा कृतस्य कर्मणः प्रत्यर्पणं राज्ञे इत्यर्थः। पुरप्रदानमिति पाठे दुर्गकुल्यास्थानादिरूपपुराणां पालनाय दानमित्यर्थः। पु त्रप्रधानसम्भेद इति कल्पतरुपाठः। प्रकृतीनां सम्भेदो मेलनम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्तर्जातः परस्परविरोधो वा। पाषण्ड्यादिचतुर्णां लक्षणान्युक्तानि, तेषां धर्मव्यत्यया इत्यर्थः। प्रतिग्रहस्य विलोपो नाशः, यथा ब्राह्मणाय प्रतिग्रहयोग्याय पात्रभूतायादानम्। यद्वा प्रतिग्रहस्य शूद्रादौ प्रतिग्रहप्रवृत्तेर्विलोपः सः। प्रतिग्रहविवादश्चेति पाठान्तरम्। आश्रमिणां ब्रह्मचार्यादीनां कोपः प्रकोपः उद्रेकः, स्वधर्मभ्रंश इति यावत्। मिथो विरोधो वा तेषां कोपः। लोपश्चाश्रमिणामपीति तु कल्पतरौ पाठः। वर्णसङ्करयोर्दोषश्च। तेषां वर्णानां सङ्कराणां च वृत्तेर्नियमः। व्यस्तपाठो न युक्तः। पूर्वोक्तेषु ऋणादानादिपदेषु यद्व्यवहारपदं न दृष्टं तच्च सर्वं प्रकीर्णके स्यादित्यर्थः।

प्रकीर्णकं पुनर्ज्ञेयो व्यवहारो नृपाश्रयः।

इति कल्पतरूक्तपाठाभ्रमाय तावन्मात्रं प्रतिज्ञासिद्ध्यर्थं व्याचष्टे * प्रकीर्णके इति। तदाख्ये इत्यर्थः। नृपाश्रया इति व्याचष्टे * नृपसमवायिन इति। तात्पर्यार्थमाह * नृप एवेति। एवेन प्राड्विवाकादिव्यवच्छेदः। * तत्र, तद्विषयविवादेषु। आस्थाय, निश्चित्य।

३। नन्वेतावताऽपि तल्लक्षणं नोक्तमिति प्रतिज्ञाहानिरेव, अत आह * एवं वदतेति। इत्येवं परिगणितानां विवादानां निर्णयोऽत्र प्रकीर्णके इति वदता नारदेनेत्यर्थः। एवं च वदतेति पाठान्तरम्। * यो नृपेति। केवलं नृपाश्रयः तन्मात्रनिर्णेयो व्यवहारः स इत्यर्थः।

४। अथ मूलमवतारयति * तत्रेति। प्रकीर्णके इत्यर्थः। पारदारिकचौरमिति समाहारद्वन्द्वः। समुद्राभ्रादितिवत्प्रयोगः। तदाह * पारदारिकं चौरंवेति॥ २९५॥

मि० अव. प्रसङ्गान्नृपाश्रयव्यतिरिक्तव्यवहारविष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यमपि दण्डमाह ।

या० अभक्ष्येण द्विजं दूष्य दण्ड्य उत्तमसाहसम् ।
मध्यमं क्षत्रियं वैश्यं प्रथमं शूद्रमर्द्धिकम् ॥ २९६॥

मि० मूत्रपुरीषादिना अभक्ष्येण भक्षानर्हेण ब्राह्मणं दूष्य अन्नपानादिमिश्रणेन स्वरूपेण वा दूषयित्वा खादयित्वोत्तमसाहसं दण्ड्यो भवति । क्षत्रियं पुनरेवं दूषयित्वा मध्यमम् । वैश्यं दूषयित्वा प्रथमम् । शूद्रं दूषयित्वा प्रथमसाहसस्यार्द्धं दण्ड्यो भवतीति सम्बन्धः । लशुनाद्यभक्ष्यदूषणे तु दोषतारतम्याद्दण्डतारतम्यमूहनीयम् ॥ २९६ ॥

बा० १। असंबद्धत्वादाह *प्रसङ्गादिति । अपिना तस्यापि समुच्चयः । भक्ष्ये ऽर्हार्थे कृत्य इत्याह * भक्षानर्हेणेति । क्षत्रियादेरग्रे उपादानाद् द्विजपदं ब्राह्मणपरमित्याह * ब्राह्मणमिति । तत्रापि सम्भवात्प्रकारद्वयमाह * अन्नपानेति । दूष्येत्यत्रार्षो ल्यबित्याह * दूषयित्वेति । तत्तात्पर्यार्थमाह * खादयित्वेति । *दण्ड्यः, तथा कारकः । *एवम्, उक्तप्रकारेण । अस्याग्रेऽप्यनुषङ्गः । प्रत्यासत्तेराह * प्रथमेति । अर्द्धिके ऽत इनीति ठन् ।

२ । न्यूनतां निराचष्टे * लशुनाद्येति । भक्षार्हत्वेऽपि निषेधात्तत्त्वम् । * ऊहनीयमिति । दोषतारतम्यं च प्रायश्चित्तविधिपर्यालोचनया ब्राह्मणत्वादिवर्णसगुणानिर्गुणत्वादिपर्यालोचनया च ज्ञेयमिति भावः ॥ २९६ ॥

मि० अव० किञ्च ।

या० कूटस्वर्णव्यवहारी विमांसस्य च विक्रयी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अङ्गहीनस्तु कर्तव्यो दाप्यश्चोत्तमसाहसम् ॥२९७॥

मि० रसवेधाद्यापादितवर्णोत्कर्षैः स्वर्णैर्व्यवहारशीलः यः स्वर्णकारादिः यश्च विमांसस्य कुत्सितमांसस्य श्वादिसंबद्धस्य विक्रयशीलः सौनिकादिः । चशब्दात्कूटरजतादिव्यवहारी च । ते सर्वे प्रत्येकं करनासाकर्णरूपैस्त्रिभिरङ्गैर्हीनाः कार्याः। चशब्दादङ्गच्छेदनसमुच्चितमुत्तमसाहसं दण्डं दाप्याः ।

यत्पुनर्मनुनोक्तम् , (अ. ९ श्लो. २९२)

सर्वकण्टकपापिष्ठं हेमकारं तु पार्थिवः ।
प्रवर्तमानमन्याये छेदयेल्लवशः क्षुरैः ॥

इति, तद् देवब्राह्मणराजस्वर्णविषयम् ॥ २९७ ॥

बा० १ । *किं चेति। प्रकृते ऽपराधविशेषेण दण्डविशेषान्तरमाहेत्यर्थः । एवमग्रेऽपि । कूटैरित्यस्य व्याख्या * रसेत्यादिः । रसवेधः रसान्तरप्रवेशः । आदिना तेन घर्षणम् । णिन्यर्थमाह * शील इति । एवमग्रेऽपि । विर्विरोधे इत्याह * कुत्सितेति । तत्स्वरूपमाह * श्वादिसंबद्धस्येति । * सौनिकः, सूना वधस्थानं तत्र भवः सौनिकः । आद्यचार्थमाह *चशब्दादिति । अङ्गेति सामान्योक्तावपि स्मृत्यन्तरानुरोधेनाह * करनासाकर्णरूपैस्त्रिभिरिति । नासाकर्णकरैस्त्रिभिरित्यपपाठः । दोषद्वयसत्त्वात् । मूले यथाश्रुते दण्ड्यद्वयं दण्डद्वयं चोक्तमिति यथासंख्यं प्रत्येकं दण्ड इति भ्रमनिरासाय द्वितीयं चार्थमाह * चशब्दादिति । अङ्गच्छेदनसमुच्चितमिति पाठः । पूर्वचेन तृतीयस्य समुच्चयाद्दण्ड्यत्रयं दण्डद्वयमिति वैषम्याद्यथासंख्याप्रवृत्तेरिति भावः । मनुविरोधं परिहरति * यत्पुनरिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कण्टका दुष्टाः तेषु पापिष्ठम् । * लवशः, अल्पशः ॥ २९७ ॥

मि० अव. विषयविशेषे दण्डाभावमाह ।

या० चतुष्पादकृतो दोषो नापेहीति प्रजल्पतः ।

काष्ठलोष्टेषुपाषाणबाहुयुग्यकृतस्तथा ॥ २९८ ॥

मि० चतुष्पादैर्गोगजादिभिः कृतो यो दोषो मनुष्यमारणादिरूपोऽसौ गवादिस्वामिनो न भवति अपसरेति प्रकर्षेणोच्चैर्भाषमाणस्य । तथा लकुटलोष्टसायकपाषाणोत्क्षेपणेन बाहुना युग्येन च युगं वहताऽश्वादिना कृतो यः पूर्वोक्तो दोषः सोऽपि काष्ठादीन्प्रास्यतो न भवति अपसरेति प्रजल्पतः । काष्ठाद्युत्क्षेपणेन हिंसायां दोषाभावकथनं दण्डाभावप्रतिपादनार्थम् । प्रायश्चित्तं पुनरबुद्धिकरणनिमित्तमस्त्येव। काष्ठादिग्रहणं च शक्तितोमरादेरुपलक्षणार्थम् ॥ २९८॥

बा० १ । चतुष्पादेत्यत्र समासान्तविधेरनित्यत्वाल्लोपो नेत्याह * चतुष्पादैरिति । किं सर्वस्य, नेत्याह * अपसरेतीति । अपेहीत्यस्यायमर्थः । प्रार्थमाह * प्रकर्षेणेति । तस्याप्यर्थमाह * उच्चैरिति । काष्ठलोष्टेत्यत्र इषुपाषाणयोर्द्वन्द्वं कृत्वा काष्ठलोष्टाभ्यां द्वंद्वे मत्वर्थीयाचं कृत्वा बाहुशब्देन कर्मधारयं कृत्वा युग्यशब्देन शाकपार्थिवादिः, द्वंद्वो वा । पूर्वनिपातप्रकरणमनित्यमिति बोध्यम् । तदाह * तथेति । काष्ठपदार्थो * लकुटेति । लोष्टं मृत्पिण्डः इत्यर्थः । सायकेति पाषाणानामुत्क्षेपणं येनेति बहुव्रीहिणा बाहुविशेषणम् । पाषाणोत्क्षेपकेणेपि पाठान्तरम् । एतेन बाहुना कृत्वा पाषाणोत्क्षेपणेन करणेन यो दोषः कृतः स इत्यर्थः इति व्याख्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नमपास्तम्। * पूर्वोक्तः, मनुष्यमारणादिरूपः। * प्रास्यतः, प्रक्षिपतः। अपेहीत्यादेर्मध्यमणिन्यायेनान्वय इत्याह * अपसरेतीति। बाहुः स्वतन्त्रं निमित्तं व्याख्यात्रभिमतामित्यन्ये। दृष्टदोषाभावेऽप्यदृष्टदोषोऽस्त्येवेति भाग्वदाह * काष्ठादीति। अल्पत्वायाह *अबुद्धीति। बहुव्रीहिः। न्यूनतां परिहरति *काष्ठादीति। चोऽप्यर्थे व्युत्क्रमे च। तोमरादिकस्यापि ॥ २९८ ॥

मि० अव. किञ्च।

या० छिन्ननस्येन यानेन तथा भग्नयुगादिना।
पश्चाच्चैवापसरता हिंसने स्वाम्यदोषभाक् ॥ २९९ ॥

मि० नसि भवा रज्जुर्नस्या छिन्ना शकटादियुक्तबलीवर्दनस्या रज्जुर्यस्मिन् तत् छिन्ननस्यं शकटादि तेन, तथा भग्नयुगेन, आदिग्रहणाद्भग्नाक्षचक्रादिना च यानेन पश्चात्पृष्ठतोऽपसरता, चशब्दात्तिर्यगागच्छता प्रतिमुखं चागच्छता च मनुष्यादिहिंसने स्वामी प्राजको वा दोषभाङ् न भवति। अतत्प्रयत्नजनितत्वाद्धिंसनस्य।

तथा च मनुः, (अ. ८ श्लो. २९१।२९२)

छिन्ननस्ये भग्नयुगे तिर्यक्प्रतिमुखागते।
अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च ॥
छेदने चैव यन्त्राणां योक्त्ररश्म्योस्तथैव च।
आक्रन्दे चाप्यपेहीति न दण्डं मनुरब्रवीत् ॥ इति ॥ २९९ ॥

बा० १। अन्यत्रापि दोषाभावमाह * किं चेति। फलितार्थमाह। * नसीति। निमित्तान्तरमाह। * पश्चात्पृष्ठत इति। भूमिवैषम्यादिनेति भावः। यानेनेत्यस्यानुषङ्गः। अत एवाह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

* चशब्दादिति । * हिंसने, तत्रैव । एवस्यात्रान्वयात् । तेनान्यत्र दोषसत्ता सूचिता । स्वामिग्रहणमुपलक्षणमित्याह *भाजक इति । यन्तेत्यर्थः । नायं पर्युदासः, किं तु प्रसज्यप्रतिषेध इत्याह * दोषभाङ्नेति । तत्रानुक्तं बीजमाह * अतत्प्रयत्नेति । तस्य तत्त्वाभावादित्यर्थः । चादिसंग्राह्यांशे मानं कथयन्नाह * तथा चेति । (अ. ८ । २९०)

यानस्य चैव यातुश्च यानस्वामिन एव च ।
दशातिवर्त्तनान्याहुः शेषे दण्डो विधीयते ॥

इति अस्यादिः । यानस्य रथादेः यातुः सारथ्यादेः यानस्वामिनश्च यस्य तद्यानं, तेषां छिन्ननस्यादीनि दश निमित्तानि दण्डमतिक्रम्य वर्तन्ते । एषु निमित्तेषु सत्सु प्राणिमारणे द्रव्यनाशे च तेषां दण्डो न भवति इति मन्वादय आहुः । एतदन्यनिमित्ते तु दण्डोऽनुष्ठीयते इति तदर्थः । छिन्नेति । इदं पूर्वार्धोक्तं सर्वं पूर्वोक्तरीत्या यानविशेषणम् । नस्येत्यत्र शरीरावयवादिति यत् । सा च तादृशबलीवर्दादिसंबन्धिनी न तु या काचिदिति प्रागुक्तमेव । यानं च यथासम्भवं बलीवर्दादिकं बोध्यम् । युगं काष्ठविशेषः । तादृशे रथादौ तिर्यक् तिरश्चीनं प्रतिमुखं वा ऽऽगते रथादौ । भूमिवैषम्यादिना यानस्य चक्रान्तःप्रविष्टाक्षाख्यकाष्ठभङ्गे, तथैव चक्रभङ्गे च, यन्त्राणां चर्मबन्धनानां छेदने च, तथैव योक्त्ररश्म्योश्छेदने च । योक्त्रं युग्यबलीवर्दादिग्रीवासंबन्धिरज्जुः काष्ठं वा । रश्मिः सामान्यरज्जुः प्रहरणं वा । दशमं निमित्तमाह * आक्रन्दे चापीति । अपसरेत्युच्चैः शब्दे सारथ्यादिना कृते च यानेन प्राणिहिंसाद्रव्यनाशयोः कृतयोः सारथ्यादेर्दण्डो नास्तीति मनुराहेत्यर्थः । चैत्रेत्येवः प्राग्वत् ॥ २९२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि० अव. उपेक्षायां स्वामिनो दण्डमाह ।

या० शक्तो ह्यमोक्षयन्स्वामी दंष्ट्रिणां शृङ्गिणां तथा ।
प्रथमं साहसं दद्याद्विक्रुष्टे द्विगुणं तथा ॥ ३०० ॥

मि० अप्रवीणप्राजकप्रेरितैर्दंष्ट्रिभिर्गजादिभिः शृङ्गिभिर्गवादिभिर्वध्यमानं समर्थोऽपि स्वामी यद्यमोक्षयन् उपेक्षते तदा अकुशलप्राजकनियोजननिमित्तं प्रथमं साहसं दण्डं दद्यात् । यदा तु मारितोऽहमिति विक्रुष्टेऽपि न मोक्षयति तदा द्विगुणम् ।

यदा पुनः प्रवीणमेव प्राजकं प्रेरयति तदा प्राजक एव दण्ड्यो न स्वामी ।

यथाह मनुः, (अ. ८ श्लो. २९४)

प्राजकश्चेद्भवेदाप्तः प्राजको दण्डमर्हति । इति ।

प्राजको यन्ता । आप्तोऽभियुक्तः ।

प्राणिविशेषाच्च दण्डविशेषः कल्पनीयः ।

यथाह मनुः, (अ. ८ श्लो. २९६ । २९७ । २९८)

मनुष्यमारणे क्षिप्रं चौरवत्किल्बिषी भवेत् ।
प्राणभृत्सु महत्स्वर्द्धं गोगजोष्ट्रहयादिषु ॥
क्षुद्रकाणां पशूनां तु हिंसायां द्विशतो दमः ।
पञ्चाशत्तु भवेद्दण्डः शुभेषु मृगपक्षिषु ॥
गर्दभाजाविकानां तु दण्डः स्यात्पञ्चमाषकः ।
माषकस्तु भवेद्दण्डः श्वशूकरनिपातने ॥इति॥३००॥

वा. १ । यत्रापवर्त्तते युग्यं वैगुण्यात्प्राजकस्य तु ।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विशतं दमम् ॥

इति मनोः (अ. ८ । २९३) यत्र सारथेरकौशल्याद्यान-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्यथा व्रजति तत्र हिंसायामशिक्षितसारथ्यनियोगस्वामी द्विशतं दाप्यः स्यादित्यर्थस्यानुरोधेनाह * अप्रवीणेति । तत्र शेषे षष्ठीत्याह * गजादिभिरिति । शेषमाह * वध्यमानमिति । तत्र तथाशब्दः चार्थे । ह्यर्थमाह *यदीति । नियोजनेति बहुव्रीहिः । * विक्रुष्टेऽपि, आक्रोशनेऽपि ।

२ । विशेषमाह * यदा पुनरिति । * तदेति । अन्यथा भावे इति शेषः । * अभियुक्तः, कुशलः । यदि स तादृशस्तदा स एवोक्तं द्विशतं दण्डं, वक्ष्यमाणं च मनुष्यमारणे इत्यादिना, तं सर्वमर्हति न स्वामीत्यर्थः ।

किञ्च, (अ. ८)

युग्यस्थाः प्राजकेऽनाप्ते सर्वे दण्ड्याः शतं शतम् ॥ [२९४]
स चेत्तु पथि संरुद्धः पशुभिर्वा रथेन वा ।
प्रमापयेत्प्राणभृतस्तत्र दण्डो ऽविचारितः॥ इति मनुः(२९५)

अकुशले तस्मिन्स्वामिसारथिभिन्ना अन्येऽपि यानारूढा अकुशलसारथिकयानारोहणात्सर्वे प्रत्येकं शतं शतं दण्ड्याः । स चेत्प्राजकः प्रचुरगव्यादिभी रथान्तरेण वा संरुद्धस्स्वरथगमनानवधानात्प्रत्यक्समर्पणाक्षमः तुरगैः रथेन रथावयवैर्वा प्राणिनो व्यापादयति तत्राविचारितो दण्डः कार्य एवेत्यर्थः ।

३ । विशेषान्तरमाह * प्राणीति । तस्मादपीत्यर्थः । उक्तसर्वस्थले एवेति भावः । मनुष्यमारणे प्राजकस्यानवधानाद्यानेन कृते शीघ्रमेव तद्वत् किल्बिषी दण्डवान् भवेत् । किल्बिषमिति पाठान्तरम् । तत्र चोरदण्ड उत्तमसाहसरूपो भवेत् न तु मारणरूपः । अग्रे अर्द्धमिति श्रवणात् । गवादिषु महत्सु प्राणिषु हतेषु उत्तमसाहसस्यार्द्धं पञ्चशतात्मको भवेत् । क्षुद्रकाणां पशूनाम् । अपचितपरिमाणकाः क्षुद्रकास्तु तत्र वयसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जातिस्वभावतो वा । तत्राद्या वत्सकिशोरादयः । अन्त्या अजादयः । तत्रान्त्येषु वक्ष्यमाणत्वादाद्यानामेवात्र ग्रहणम् । तथा च वत्सकिशोरादीनां मारणे द्विशतो दण्डः स्यात् । शुभेषु आकारतो लक्षणतश्च, मृगेषु रुरुपृषतादिषु, पक्षिषु च शुकहंससारसादिषु हतेषु पञ्चाशत् दण्डो भवेत् । स्वार्थे कः । द्वंद्वोत्तरपदको द्वंद्वः । गर्दभच्छागैडकादीनां तु मारणे रूप्यपञ्चमाषपरिमितो दण्डः स्यात् । सौवर्णमाषग्रहणं तु नात्र । उत्तरोत्तरं लघुदण्डोक्तेः । श्वसूकरानिपातने रौप्यमाषपरिमितो दण्डः स्यादित्यर्थः । पञ्चमाषको माषक इति पाठः । परिमाणे कन् । पञ्चमाषिकादिपाठे अत इनीति ठन् ॥ ३०० ॥

मि० अव० किञ्च ।

या० जारं चौरेत्यभिवदन् दाप्यः पञ्चशतं दमम् ।
उपजीव्य धनं मुञ्चंस्तदेवाष्टगुणीकृतम् ॥ ३०१ ॥

मि. स्ववंशकलङ्कभयाज्जारं पारदारिकं "चौर निर्गच्छ" इत्यभिवदन् पञ्चशतं पणानां पञ्च शतानि यस्मिन् दमे स तथोक्तस्तं दमं दाप्यः । यः पुनर्जारहस्ताद्धनमुपजीव्य उत्कोचरूपेण गृहीत्वा जारं मुञ्चति असौ यावद् गृहीतं तावदष्टगुणीकृतं दण्डं दाप्यः ॥ ३०१ ॥

बा. १ । अन्यदप्युच्यते इत्याह * किं चेति । एवमग्रेऽपि । जारस्यार्थः * पारेति । साकाङ्क्षत्वादाह * निर्गच्छेति । एकवचनोपपत्तये तद्व्युत्पत्तिमाह * पणानामिति । समाहारद्विगौ तु पञ्चशतीति स्यादिति भावः । उत्कोच उपदानम् । जर इति प्रसिद्धः । तदेवेति व्याचष्टे * यावदिति । अनुषङ्गेणाह * दण्डमिति ॥ ३०१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि० अव० किञ्च ।

या० राज्ञोऽनिष्टप्रवक्तारं तस्यैवाक्रोशकारिणम् ।
तन्मन्त्रस्य च भेत्तारं छित्त्वा जिह्वां प्रवासयेत् ॥३०२॥

मि. राज्ञोऽनिष्टस्यानभिमतस्यामित्रस्तोत्रादेः प्रकर्षेण भूयोभूयो वक्तारं, तस्यैव राज्ञ आक्रोशकारिणं निन्दाकरणशीलं, तदीयस्य च मन्त्रस्य स्वराष्ट्रविवृद्धिहेतोः परराष्ट्रपक्षक्षयकरस्य वा भेत्तारम् अमित्रकर्णेषु जपन्तं तस्य जिह्वामुत्कृत्य स्वराष्ट्रान्निष्कासयेत् । कोशापहरणादौ पुनर्वध एव ।

(अ. ९ श्लो. २७५)

राज्ञः कोशापहर्तॄंश्च प्रतिकूलेषु च स्थितान् ।
घातयेद्विविधैर्दण्डैररीणां चोपजापकान् ॥

इति मनुस्मरणात् । विविधैः सर्वस्वापहाराङ्गच्छेदवधरूपैरित्यर्थः । सर्वस्वापहारेऽपि यद् यस्य जीवनोपकरणं तन्नापहर्तव्यम्, चौर्योपकरणं विना ।

यथाह नारदः, (व्यव. १७ । श्लो. १० । ११)

आयुधान्यायुधीयानां वाद्यादीन्वाद्यजीविनाम् ।
वेश्यास्त्रीणामलङ्कारान् वाद्यातोद्यादि तद्विदाम् ॥
यच्च यस्योपकरणं येन जीवन्ति कारुकाः ।
सर्वस्वहरणेऽप्येतन्न राजा हर्तुमर्हति ॥ इति ।

ब्राह्मणस्य पुनः "न शारीरो दण्ड" इति निषेधाद्वधस्थाने शिरोमुण्डनादिकं कर्तव्यम् ।

ब्राह्मणस्य वधो मौण्ड्यं पुरान्निर्वासनाङ्कने ।
ललाटे चाभिशस्ताङ्कः प्रयाणं गर्दभेन तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति [1]मनुस्मरणात् ॥ ३०२ ॥

ब. १।अनिष्टप्रवक्तारमिति शेषषष्ठ्या समासः । *अमित्रेति । शत्रुस्तुत्यादेरित्यर्थः । सकृत्तथा करणे दोषाभावाय मार्थमाह * प्रकर्षेणेति । तस्याप्यर्थमाह * भूय इति । तस्यैवेत्यस्य व्याख्या * राज्ञ इति । णिन्यर्थमाह * शीलमिति ।

२ । तन्मन्त्रेति व्याचष्टे *तदीयेति । राजकीयेत्यर्थः । स च द्विविध इत्याह *स्वराष्ट्रेत्यादि । परस्य राष्ट्रपक्षयोः क्षयकरस्येत्यर्थः । कृञो हेत्विति टः । परराष्ट्रापक्षयकरस्येति पाठान्तरम् । तस्य भेदनासंभवादाह * अमित्रेति । तस्य राज्ञः शत्रुकर्णेष्वित्यर्थः ।

३। विशेषमाह * कोशेति । राज्ञ इत्यादिः । *राज्ञ इति । नित्यसाकाङ्क्षत्वादेकदेशान्वयः । प्रतिकूलेष्विति धर्मपरम् । तस्य प्रातिकूल्यविषये इत्यर्थः । उपजापकाः प्रोत्साहकाः । घातयेदिति स्वारस्यात्क्रमेणाह * सर्वस्वेति । तथा च घातो नाश इति बोध्यम् ।

४ । तत्राद्ये विशेषमाह * सर्वस्वेति । तत्रापि विशेषमाह * चौर्योपकरणमिति । आयुधैर्जीवन्ति ते तथा । वाह्यैर्वहनीयैर्बलीवर्दादिभिर्ये जीवन्ति ते तथा । अत्र वाह्यग्रहणमुपलक्षणमित्युक्तं * वाह्यादीनिति । * वेश्येति । वेश्यारूपस्त्रीणाम् । * तद्विदां, तज्ज्ञानाम् । वाद्यं चातोद्यं च तदादि । यद्यपि—

चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम् ।

इति अमरात्पर्यायता तथापि वीणादिसर्ववाद्यावान्तरभेदाभिप्रायकं पृथगुपादानम् । आनन्त्यात्सामान्येनाह * य-

---

१ इदं मनुस्मृतौ नोपलब्धम् । किन्तु नारदस्मृतावुपलभ्यते । व. १४ । १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च्चेति। * कारुकाः, शिल्पिनः । * एतत्, प्रागुक्तमुपकरणत्वावच्छिन्नम् । तृतीये विशेषमाह * ब्राह्मणस्यात्विति । गौतमं मानमाह * न शारीर इति । आदिग्राह्यं वचने एव व्यक्तम् । तच्च प्राग्व्याख्यातम् ॥ ३०२ ॥

मि० अव० किञ्च ।

या० मृताङ्गलग्नविक्रेतुर्गुरोस्ताडयितुस्तथा ।
राजयानासनारोढुर्दण्ड उत्तमसाहसः ॥ ३०३ ॥

मि. मृतशरीरसंबन्धिनो वस्त्रपुष्पादेर्विक्रेतुः गुरोः पित्राचार्यादेस्ताडयितुः तथा राजानुमतिं विना तद्यानं गजाश्वादि आसनं सिंहासनादि आरोहतश्चोत्तमसाहसो दण्डः ॥ ३०३ ॥

बा. १ । लग्नविक्रेतुरिति शेषषष्ठीसमासः । एवमग्रेऽपि । अङ्गं नैकदेश इत्याह * शरीरेति । गुरुपदमुपलक्षणमित्याह * पित्रेति । अनुमतौ दोषाभावायाह * राजानुमतिमिति । आरोहति तस्येति पाठः । आरोहतश्चेति पाठान्तरम् ॥ ३०३॥

मि. अव. किञ्च ।

या० द्विनेत्रभेदिनो राजद्विष्टादेशकृतस्तथा ।
विप्रत्वेन च शूद्रस्य जीवतोऽष्टशतो दमः ॥ ३०४॥

मि० यः पुनः क्रोधादिना परस्य नेत्रद्वयं भिनत्ति, यश्च ज्योतिःशास्त्रवित् गुर्वादिहितेप्सुर्व्यतिरिक्तो राज्ञो द्विष्टमनिष्टं "संवत्सरान्ते तव राज्यच्युतिर्भविष्यति" इत्यादिरूपमादेशं करोति तथा यः शूद्रो भोजनार्थं यज्ञोपवीतादिब्राह्मणलिङ्गानि दर्शयति—तेषाम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्टशतो दमः। अष्टौ पणशतानि यस्मिन्दमे स तथोक्तः। श्राद्धभोजनार्थं पुनः शूद्रस्य विप्रवेषधारिणः तप्तशलाकया यज्ञोपवीतवद्वपुष्यालिखेदिति स्मृत्यन्तरोक्तं द्रष्टव्यम्। वृत्त्यर्थं यज्ञोपवीतादिब्राह्मणलिङ्गधारिणो वध एव। द्विजातिलिङ्गिनः शूद्रान्घातयेदिति स्मरणात्॥ ३०४॥

बा. १। तथेति समुच्चये। भेदनेऽनुक्तं निमित्तमाह * क्रोधेति। आदिना लोभादि। व्यवहारदशायामपीति भावः। द्विनेत्रेत्यत्र समाहारद्विगुः पात्रादित्वं च। तदाह *नेत्रद्वयमिति। तत्र योग्यत्वायाह * ज्योतिरिति। ननु तेनापि तथोक्तावनिष्टापत्तिः, अत आह *गुर्वादीति। आदिना स्वस्यापि ग्रहणम्। द्विष्टं द्वेषाविषयः, तदाह * अनिष्टमिति। तत्स्वरूपमाह * संवत्सरेति। द्विष्टादेशेति कर्मधारय इत्याह * रूपमादेशमिति। आदिश्यमानं वचनं भाषते इत्यर्थः। जीवत इत्यस्यार्थमाह *भोजनार्थमिति। विप्रत्वस्य वस्तुतस्तत्र बाधादाह *यज्ञोपेति। तेषां त्रयाणां प्रत्येकं तथोक्तिफलविशेषमाह * श्राद्धेति। *विप्रवेषेति। यज्ञोपवीतादिलिङ्गेत्यर्थः। एवमग्रेऽपि। क्वचित्तथा पाठ एव।

२। विशेषान्तरमाह * वृत्त्यर्थमिति। यावदायुर्जीविका वृत्तिः। * लिङ्गधारिणः, शूद्रस्य। व्यधिकरणबहुव्रीहेर्गमकसाध्यत्वादाह * द्विजातिलिङ्गिन इति॥ ३०४॥

मि० अव. रागलोभादिनाऽन्यथा व्यवहारदर्शने दण्डमाह।

या० दुर्दृष्टांस्तु पुनर्दृष्ट्वा व्यवहारान्नृपेण तु।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सभ्याः सजयिनो दण्ड्या विवादाद् द्विगुणं दमम्॥३०५॥

मि० दुर्दृष्टान्स्मृत्याचारप्राप्तधर्मोल्लङ्घनेन रागलोभादिभिरसम्यग्विचारितत्वेनाशङ्क्यमानान् व्यवहारान्पुनः स्वयं सम्यग्विचार्य निश्चितदोषाः पूर्वसभ्याः सजयिनः जयिसहिताः प्रत्येकं विवादपदे यो दमः पराजितस्य तद्द्विगुणं दाप्याः।

अप्राप्तजेतृदण्डविधिपरत्वाद्वचनस्य रागाल्लोभादित्यादिना श्लोकेनापौनरुक्त्यम्।

यदा पुनः साक्षिदोषेण व्यवहारस्य दुर्दृष्टता तदा साक्षिण एव दण्ड्या न जयी नापि सभ्याः।

पादो गच्छति कर्तारं पादः साक्षिणमृच्छति।
पादः सभासदः सर्वान् पादो राजानमृच्छति॥

इति वचनात्। (ना. अ. ३। १२) एतच्च प्रत्येकं राजादीनां दोषप्रतिपादनपरं न पुनरेकैकस्यैव पापापूर्वस्य विभागाय। कर्तृसमवायिफलजननस्वभावत्वादपूर्वस्य॥ ३०५॥

बा. १। * दर्शने, सभ्यादीनामिति शेषः। दुर्दृष्टानित्यत्र मतिबुद्धीति वर्त्तमाने क्त इत्याशयेन तदर्थमाह *स्मृत्येत्याद्याशङ्क्यमानानित्यन्तेन। रागेत्याद्युभयान्वयि। पुनर्दृष्ट्वेति व्याचष्टे * पुनरिति। पश्चादित्यर्थः। * स्वयं, राजा। विवादविषयभूतधनादिति नार्थः, प्रागुक्तयुक्तेः।अतआह *विवादेति।

२। अस्य "रागाल्लोभाद्भयाद्वापि" इत्येनन प्रागुक्तेन पौनरुक्त्यं परिहरति * अप्राप्तजेतृदण्डेति। यः पूर्वव्यवहारे जितस्तस्य सदोषत्वं यदि विचार्यमाणेऽस्ति तदा दुष्टत्वेन स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जयी दण्ड्य इत्यनेन जेतृदण्डो विधीयते वचनान्तरेणाप्राप्तत्वात्, इतरांशे तु तेन प्राप्तत्वादनुवाद इति न पुनरुक्तिः। तत्र हि सभ्यमात्रग्रहणं न जयिनोऽपीति भावः ।

३। विशेषान्तरमाह *यदा पुनरिति । *दोषेण, दोषेणैव ।

४। विशेषान्तरमाह * यदा त्विति । उक्तप्रतिज्ञायां मानमाह * पादो गच्छतीति । कर्त्रादीनां सर्वेषामपि पापप्राप्तिप्रतिपादकैतद्वचनबलात्सर्वेऽपि दुष्टत्वेन दण्ड्या इत्यर्थः । नन्वेकस्यैव पापस्य कर्त्रादीनां पादरूपांशतः प्राप्तेरितो लाभेन दण्डोऽप्येतेषामेक एव स्यान्न पृथक् पृथगित्यत आह * एतच्चेति। उक्तवचनं चेत्यर्थः । अस्य वचनस्य दोषप्रतिपादने तात्पर्यं न त्वंशतो दोषप्रापणे इत्यर्थः । उक्तेऽर्थे न्यायस्य जैमिनीयस्य मानत्वं सूचयन् हेतुमाह * कर्तृसमवायीति । इतः प्राक् यथोक्तमित्यपपाठः । "शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात्" इति जैमिनीयन्यायेन यः कर्ता तस्मिन्नेव फलं समवेतमिति लभ्यते । तत्र फलं द्विविधम्, ऐहिकं पारलौकिकं च । तत्र प्रकृते ऐहिकं धर्मशास्त्रोक्तदण्डादि, पारलौकिकं नरकादि । एवं स्थिते रागाल्लोभादित्युपक्रम्य सभ्याः पृथक् पृथक् दण्ड्या इति प्रतिपुरुषमैहिकदण्डरूपसम्पूर्णफलसम्बन्धविधानादपूर्वस्य च यत्र कर्तरि स्वयमुत्पन्नं तत्रैव फलोत्पादकत्वस्वभावकत्वात्प्रत्येकं समग्रफलसम्बन्धविध्यनुपपत्त्या प्रत्येकं समग्रदुरितापूर्वसम्बन्ध इति भावः ॥ ३०९ ॥

मि० अव. न्यायतो निर्णीतव्यवहारस्य प्रत्यावर्तयितुर्दण्डमाह ।

या० यो मन्येताजितोऽस्मीति न्यायेनापि पराजितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तमायान्तं पुनर्जित्वा दापयेद् द्विगुणं दमम् ॥३०६॥

मि० यः पुनर्न्यायमार्गेण पराजितोऽपि औद्धत्यान्नाहं पराजितोऽस्मीति मन्यते तमायान्तं कूटलेख्याद्युपन्यासेन पुनर्धर्माधिकरणमधितिष्ठन्तं धर्मेण पुनः पराजयं नीत्वा द्विगुणं दण्डं दापयेत् ।

नारदेनाप्युक्तम्, [अ. १ । ६५]

तीरितं चानुशिष्टं वा यो मन्येत विधर्मतः ।
द्विगुणं दण्डमास्थाय तत्कार्यं पुनरुद्धरेत् ॥ इति ।

तीरितं साक्षिलेख्यादिनिर्णीतमनुद्धृतदण्डम् । अनुशिष्टमुद्धृतदण्डं दण्डपर्यन्तं नीतमिति यावत् ।

यत्पुनर्मनुवचनम्, (अ. ९ श्लो. २३३)

तीरितं चानुशिष्टं च यत्र क्वचन विद्यते ।
कृतं तद्धर्मतो ज्ञेयं न तत्प्राज्ञो निवर्तयेत् ॥ इति,

तत्, अर्थिप्रत्यर्थिनोरन्यतरवचनाद्व्यवहारस्याधर्मतो वृत्तत्वाशङ्कायां पुनर्द्विगुणदण्डप्रतिज्ञापूर्वकं व्यवहारं प्रवर्तयेत्, न पुनर्धर्मतोवृत्तत्वनिश्चयेऽपि राज्ञा लोभादिना प्रवर्तयितव्य इत्येवंपरम् ।

यत्पुनर्नृपान्तरेणापि न्यायापेतं कार्यं निर्वर्तितं तदपि सम्यक्परीक्षणेन धर्म्ये पथि स्थापनीयम् ।

न्यायापेतं यदन्येन राज्ञा ऽज्ञानकृतं भवेत् ।
तदप्यन्यायविहितं पुनर्न्याये निवेशयेत् ॥

इति स्मरणात् ॥ ३०६ ॥

बा. १ । * प्रत्यावर्त्तयितुः, वादिप्रतिवाद्यन्यतरस्य । औद्धत्यादिनेति भावः । अपिर्व्युत्क्रमे इत्याह * पराजितोऽपी-

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ति। लिङ्गर्थो ऽविवक्षित इत्याह * मन्यतइति। आयान्तमित्यस्य व्याख्या * कूटेति। आदिना तथासाक्ष्यादिपरिग्रहः। *पुनः, पश्चात्। एवमग्रेऽपि। * धर्माधिकरणमिति। तन्निर्णयस्थानमित्यर्थः। आधिशीङिति कर्मत्वम्। तेनाधर्मे कृते ऽपि स्वयमधर्मो न कार्यो दोषादित्याह * धर्मेणेति। विरोधं परिहर्तुं सविशेषनारदसम्मतिमाह * नारदेनेति। तीरितमित्यस्य व्याख्या * साक्षीति। आदिना भुक्त्यादिपरिग्रहः। * अन्विति। अगृहीतदण्डामित्यर्थः। अनुशिष्टमित्यस्य व्याख्या * उद्धृतेति। गृहीतदण्डामित्यर्थः। तथा निर्णयपूर्वकामिति भावः, तदाह * दण्डेति। विधर्मत इत्यत्र तृतीयान्तात्तसिः। अधर्महेतुकं मन्येतेत्यर्थः। तामिति शेषः। *आस्थाय, दापयित्वा। * पुनः, पश्चात्। * उद्धरेत्, निश्चिनुयात्।

२। ननु नारदतो निर्णीतस्यापि व्यवहारस्य तथा सति दण्डाविष्टम्भपुरःसरं पुनः करणं प्रतीयते, मानवे तु तद्वैपरीत्यमिति मिथो विरोध इत्याह, * यत्पुनरिति। यत्र क्वचन धर्माधिकरणे यत् व्यवहारपदं धर्मतस्तीरितं, पार तीर कर्मसमाप्तौ, तया निश्चितम् असौ न पुनः प्रवर्त्तेतेति। यच्च न केवलं वाचा सत्यत्वेनोक्तं किं तु अनु शब्दोत्तरं शिष्टं च सदण्डं च कृतं तत् प्राज्ञो राजा कृतमेव विद्यान्न पुनर्निवर्तयेदित्यर्थः।

परिहरति * तादिति। मानवमित्यर्थः। अग्रेऽस्यान्वयः। तत्रादौ नारदतात्पर्यमाह * अर्थीति। वृत्तत्वं निष्पन्नत्वम्। अत एव तत्र विधर्मत इत्युक्तम्। *पुनः, पश्चात्। मनुतात्पर्यमाह * न पुनरिति। न त्वित्यर्थः। अत एव तत्र धर्मत इत्युक्तम्। धर्मतो व्यवहारो निर्णीत इति निश्चये न पुनस्तथेति मनुतात्पर्यम्। धर्मतो निर्णीतं न वेति सन्देहे तु पुनस्तथेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नारदतात्पर्यम् । तथा च नारदीयं संशयविषयं, मानवं निश्चिताविषयमिति भावः ।

४। विशेषमाह * यत्पुनरिति । * न्यायापेतं, तद्रहितम् । न्यायापेतत्वे हेतुः अज्ञानकृतमिति । पुनः करणे हेतुमाह * अन्यायविहितमिति । अन्यायविहितं तदपीत्यर्थः ॥ ३०६ ॥

मि० अव. अन्यायगृहीतदण्डधनस्य गतिमाह ।

या० राज्ञाऽन्यायेन यो दण्डो गृहीतो वरुणाय तम् ।
निवेद्य दद्याद्विप्रेभ्यः स्वयं त्रिंशद्गुणीकृतम् ॥ ३०७॥

मि० अन्यायेन यो दण्डो राज्ञा लोभाद् गृहीतस्तं त्रिंशद्गुणीकृतं वरुणायेदमिति संकल्प्य ब्राह्मणेभ्यः स्वयं दद्यात् । यस्माच्च दण्डरूपेण यावद् गृहीतमन्यायेन तावत्तस्मै प्रतिदेयम् । इतरथाऽपहारदोषप्रसङ्गात् । अन्यायदण्डग्रहणे पूर्वस्वामिनः स्वत्वविच्छेदाभावाच्चेति ॥ ३०७ ॥

इति श्रीमत्पद्मनाभभट्टोपाध्यायात्मजस्य श्रीमत्परमहंसपरिव्राजकाचार्यविज्ञानेश्वरभट्टारकस्य कृतौ ऋजुमिताक्षराख्यायां याज्ञवल्कीयधर्मशास्त्रविवृतौ द्वितीयोऽध्यायो व्यवहाराख्यः समाप्तिमयात् ॥

बा. १ । * गृहीतेति । अन्यायेन गृहीतस्य दण्डरूपस्य धनस्येत्यर्थः । क्वचिद्दण्डस्येत्येव पाठः । अन्यायेनेति छेद इत्याह * अन्यायेनेति । तत्र निमित्तमाह * लोभेति । वरुणाय निवेद्येत्यस्यार्थमाह * वरुणायेदमिति । न ममेति शेषः । *स्वयं, स्वयमेव । दोषख्यापनार्थमिदम् । न्यूनतां परिहरति *यस्माच्चेति । चः समुच्चये व्युत्क्रमे च । विपक्षे बाधकमाह * इत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रथेति । तददाने इत्यर्थः । ननु दण्डस्वामित्वं राज्ञ एवेति कथमपहारदोषोऽत आह * अन्यथेति । सति सप्तमी । एवं च परस्वग्रहणात्तथेति बोध्यम् ।

२ । यत्तु मनुनोक्तम्, (अ. ९ । २४४ । २४५)

अप्सु प्रवेश्य तं दण्डं वरुणायोपपादयेत् ।
श्रुतवृत्तोपपन्ने वा ब्राह्मणे प्रतिपादयेत् ॥
ईशो दण्डस्य वरुणो राज्ञां दण्डधरो हि सः ।
ईशः सर्वस्य जगतो ब्राह्मणो वेदपारगः ॥

इति, तत् पातकविषयं न्यायगृहीतविषयं च ।

अत एव, (अ. ९ । २४३)

नाददीत नृपः साधुर्महापातकिनो धनम् ।
आददानः स तल्लोभात्तेन दोषेण लिप्यते ॥

इति पूर्वमेव विहितम् ।

यत्र वर्जयते राजा पापकृद्भ्यो धनागमम् ।
तत्र कालेन जायन्ते मानवा दीर्घजीविनः ॥
निष्पद्यन्ते च सस्यानि यथोप्तानि विशां पृथक् ।
बालाश्च न प्रमीयन्ते विकृतं न च जायते ॥

इत्यग्रे च तथोक्तम् । (अ. ९ । २४६ । २४७)

प्रवेश्य प्रक्षिप्य । वरुणायेदमिति प्राग्वत् । ईश इति । पूर्वस्य प्रतिपत्तिविधेरर्थवादोऽयम् । एवमग्रिमावपि । जायन्त इति वर्त्तमानत्वमविवक्षितम् । विकृतत्वं करणादिहीनत्वमित्यर्थ इति शिवम् ॥ ३०७ ॥

इति श्रीमन्मिताक्षराव्याख्याने महादेवभट्टात्मजोमाङ्गजवैद्यनाथार्द्धाङ्गभूतबालकृष्णजननी– पायगुण्डे– इत्युपाख्यश्रीलक्ष्मीविरचिते लक्ष्म्यभिधे व्यवहारप्रकरणम् ॥ शम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

THE

CHOWKHAMBÂ SANSKṚIT SERIES;

A COLLECTION OF RARE AND IMPORTANT WORKS.

Nos. 173, 174, 175, 176, 177, 178, 179, 180, 181, 182 & 204.

व्यवहार- बालंभट्टी

इति प्रसिद्धया लक्ष्मीनामिकया
पायगुण्डे इत्युपनामकेन बालंभट्टेन स्वमातुः लक्ष्मीदेव्याः
स्मारकत्वेन तन्नाम्ना रचितया बृहत्या टीकया सहितः
मिताक्षरायाः व्यवहाराध्यायः
श्रीयुतगोविन्ददासमहाशयप्रदर्शितरीत्या
पर्वतीयश्रीनित्यानन्दपन्तेन परिष्कृत्य संशोधितः ।

VYAVAHÂRA-BÂLAMBHATTI

AN EXTENSIVE COMMENTARY

BY

Bâlam Bhatta Páyagunde

WITH THE VYAVAHÂRA MITÂKSHARÂ

EDITED BY

Pandit Nityânand Pant Parvatiya

Under the supervision of, and with an Introduction by

SHRI GOVINDA DAS.

PUBLISHED & SOLD BY THE SECRETARY

CHOWKHAMBA SANSKRIT BOOK-DEPOT. BENARES.

AGENTS:—

OTTO HARRASSOWITZ, LEIPZIG:
PANDITA JYESHTHARAMA MUKUNDAJI, BOMBAY:
PROBSTHAIN & CO., BOOKSELLERS, LONDON.

Printed by Jai Krishna Das Gupta, at the Vidya Vilas Press. Benares.

1914

Registered According to Act XXV. of 1867.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

* श्रीगणेशायनमः *

भूमिका

धर्म एव सुखसाधनं भवेत् । स च वेदैकप्रमेयः । तत्त्वं च वेदतदुपजीविप्रमाणान्यतरगम्यत्वम् स्मृत्यादीनां वेदोपजीवित्वान्न तत्प्रमेयेऽव्याप्तिः । नापि शाक्यादिस्मृतिगम्येऽतिव्याप्तिः । तासां वेदोपजीवित्वाभावेन तद्गम्ये तदन्यतरागम्यत्वात् । न च अर्हदादीनामीश्वरावतारत्वोक्त्या तदुक्तस्य वेदत्वमाशङ्कनीयम् । आस्तिकपरिगृहीतवेदविरुद्धार्थाभिधायित्वेन तेषामीश्वरावतारत्वासिद्धेः । न च विनिगमनाविरहात् परस्परं विरोधादुभयोरप्रामाण्यम् । बन्धनिवर्तकब्रह्मात्मैक्यज्ञानसाधनस्य महावाक्यस्यैव मुख्यवेदत्वेन अन्येषां च तदुपयोग्यन्तःकरणशुद्ध्यादिप्रतिपादकत्वेन वेदत्वात् तदेकवाक्यतयैव वेदत्वस्य वाच्यत्वात् साक्षात् परम्परया वा तदेकवाक्यतापन्नानामेव वेदत्वस्य सिद्धौ तद्विरुद्धार्थाभिधायिनामीश्वरावतारत्वस्य साधयितुमशक्यत्वात् । बन्धनिवर्तकत्वं तु महावाक्यजन्यब्रह्मात्मैक्यज्ञानस्यैवेति आचार्यादीनामीश्वरावतारत्वेन परिगृहीतानां गुरुशिक्षितानामन्येषां चानुभवान्निश्चीयते ।

ये तु महावाक्यजन्यब्रह्मात्मैक्यज्ञानस्य बन्धनिवर्तकत्वे विवदन्ते ते न गुरुशिक्षिताः, किं तु स्वप्रतिभामात्रेण ग्रन्थलापनशीलाः संशयगुहां प्रविष्टाः, तस्मात् ते श्रेयोऽर्थिभिः दूरत एव हेयाः इत्यास्तां तावत् ।

प्रकृतमनुसरामः । तत्सिद्धं शाक्यादिस्मृतिगम्यस्य न धर्म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वमिति । धर्मस्यैव सुखसाधनत्वात्तदर्थिभिः तत्प्रतिपादकमेत्र शास्त्रमाश्रयणीयं नान्यत् ।

ननु लोके बहूनामुपायानां सुखसाधनत्वस्य दृष्टत्वात् उपदिष्टत्वाच्च कथं तदर्थमेतच्छास्त्रमेवाश्रयणीयम् । मैवम् । तेषां सुखसाधनत्वस्य भ्रान्तिगोचरत्वात् ।

सत्स्वपि द्रव्याद्युपायेषु असति च धर्मविशेषे सुखानुपलब्धेः। क्वचित् अहं सुखी इति सुखोपलब्धिरपि भ्रान्तिरेव।

व्यसनिनां मादकादिद्रव्यसेवने अहं सुखीतिप्रत्ययवत् । सात्त्विवृत्तिविशेषस्य सुखस्य तत्साधनत्वेन शास्त्रबोधितधर्मविशेषं विनाऽनुपपत्तेः । राजससुखादावपि सत्त्वलेशानुवृत्तिरस्त्येवेति शास्त्रप्रामाण्यादङ्गीकार्यमिति न तत्र व्यभिचारः।

धर्मशास्त्रं च मन्वादिप्रणीतम् । तदन्तर्गतं च याज्ञवल्क्यप्रोक्तं बह्वङ्गपूर्णम् ।

तस्य च द्वितीयोऽध्यायो व्यवहारप्रतिपादकः । यथोक्तव्यहवारप्रचारं विना आचारप्रचारानुपपत्तेः । तद्व्याख्यानं च विज्ञानेश्वरकृतं सर्वदेशेषु आद्रियते । तट्टीका च बालभट्टनिर्मिता पूर्णा विद्यमानाऽपि व्यवहारकाण्डीया लोकैरतिशयेनापेक्ष्यमाणा संस्कृतपुस्तकमुद्रणतत्परेण हरिदासगुप्तपुत्रेण जयकृष्णदासेन बाबूगोविन्ददासमहाशयात् एकमेव पुस्तकं द्वित्रपुस्तकेभ्यः शोधितमुपलभ्य स्वकीये (चौखम्बासिरीज्) इतिनाम्नि यन्त्रालये मुद्रायित्वा प्रकाशिता । सा च उभाभ्यां प्रोत्साहितेन पर्वतीयानित्यानन्दपन्तेन यथामति संशोधिता । मिताक्षराप्रतीकपदानि च टीकायाम् (*) एताच्चिन्हेन अङ्कितानि स्थापितानि । इतिशब्दरहितानि च प्रतीकानि आदौ *

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतच्चिन्हेन अङ्कयित्वा अन्ते (,) एतच्चिन्हेन आङ्कितानि प्रतीकपरिमाणज्ञानार्थम् ।

यत्र इतिशब्दरहितं प्रतीकम् एकपदस्वरूपमेव तत्र क्वचित् अन्ते (,) एतच्चिन्हानुपलम्भेऽपि * एतच्चिन्हाङ्कितपदमात्रं प्रतीकत्वेन ग्राह्यम् । (ना.) एतच्चिन्हं नारदस्मृतिबोधकम् । तदुत्तरं (व्यव.) एतच्चिन्हं व्यवहारपदबोधकम् । (ना.) एतदुत्तरम् (अ.) इति चिन्हम् अध्यायबोधकम् ।

[अ.] एतदुत्तरस्थः अङ्कः अध्यायसंख्याबोधकः । [व्यव.] एतदुत्तरस्थः अङ्कः व्यवहारपदसंख्याबोधकः । नारदस्मृतौ च पूर्वं त्रयोऽध्यायाः अनन्तरं सप्तदश व्यवहारपदानि, अन्ते च एकं परिशिष्टम् । तद् गृहीत्वा अष्टादश व्यवहारपदानि । [याज्ञ.] इति चिन्हं याज्ञवल्क्यस्मृतिबोधकम् । [मनु.] इति चिन्हं तु स्पष्टमेव ।

अज्ञानात् प्रमादात् अक्षरयोजकदोषाच्च जाता अशुद्धय उपलभ्य शुद्धिपत्रे निवेशिताः । तस्मात् शुद्धपाठजिज्ञासुभिः प्रथमं शुद्धिपत्रतः पुस्तकं शोधनीयम् । येनार्थावबोधाय क्लेशो न भवेत् ।

टीकाकारो बालभट्टश्च नागेशभट्टशिष्यः । तस्य च त्रयः शिष्याः सुप्रसिद्धा अभवन्, भास्करशास्त्री, गोविन्दाचार्यः, राघवेन्द्राचार्यश्च । भास्करशास्त्रिणः पौत्रः अद्यत्वे पुण्यपत्तने [फर्ग्युसन् कालेज] इति प्रसिद्धपाठशालायामध्यापकः । गोविन्दाचार्यस्य पुत्रः श्रीदत्युतकाशीनाथशास्त्री अस्माकं परमेष्ठी गुरुः ।

राघवेन्द्राचार्यस्तु त्रिपथगाविषमीकारत्वेन जागर्ति ।

इयं च आख्यायिका भास्करशास्त्रिणः शिष्यः रामशा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्त्री यः पुण्यपत्तने अद्यापि निवसति तच्छिष्यात् बाबाशास्त्रिणः अवगता ।

एनया च आख्यायिकया टीकाकारस्य शतवर्षाधिकः सार्धशतन्यूनश्च कालोऽवगम्यते । ग्रन्थाश्च एतत्कृताः—शब्दरत्नटीका भावप्रकाशः, परिभाषेन्दुशेखरटीका गदाख्या, मञ्जूषाटीका, मिताक्षराटीका इयं च । एते प्रसिद्धाः । तस्मादस्य विद्वत्तमत्वात् एतत्कृतव्याख्यानस्य आदरणीयत्वात् इयमवश्यं विद्वद्भिः संग्राह्या आस्वादनीया चेत्यलम् । शम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ श्रीगणेशायनमः ॥

मिताक्षराटीकायाः शुद्धिपत्रम् ।

अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ
दात्मसंस्कारा	त्संस्कारा	१६	२२
दानेषु इत्यनन्तरम्	अदृष्टार्थेषु इत्यधिकमपेक्षितम्	१७	२२
दण्ड्यो	दण्ड्यो	२४	१६
काचिक	काचित्क	२४	२४
बहूव्रीहिः	बहुव्रीहिः	३०	७
न भवति	भवति	४४	४
त्याह	त्याह	५२	३
चैवं विधे	चैवंविधे	५३	९
भवः	भावः	५३	१७
बहूवीहिः	विषेति बहुव्रीहिः	६०	१८
भ्रमो	भ्रमो	६९	२१
विषयो	विषययो	८०	११
त्यर्यः	त्यर्थः	८१	८
त्यन्वयः	त्यत्रान्वयः	८८	६
यद्वा	यद्वाऽनेन	९२	१६
स्वत्वेमव	स्वत्वमेव	९८	२५
त्रत	तत्र	१०५	१
उपनिधिना	उपनिधित	१०७	२
परस्तहे	परहस्ते	१०७	७
निवर्मासनं	निर्वासनं	११६	१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ
एतेन	एवेन	१३३	२२
देशातरं	देशान्तरं	१३९	६
त्यर्थेः	त्यर्थः	१४७	२
सत्समत्वं	तत्समत्वं	१५१	९
व्युत्यत्तावपि	व्युत्पत्तावपि	१५९	३
द्विविधमित्यर्थः	द्विविधमितिमिलित्वा ऋणादानंसप्तविधमित्यर्थः	१५९	११
भृतिर्वतनम्	भृतिर्वेतनम्	१६४	१०
तद्रिवथ	तद्रिक्थ	१७८	१४
सबन्धः	संबन्धः	१७९	१९
द्व्याणि	द्रव्याणि	१८०	१५
प्रश्लेषेः	प्रश्लेषः	१९८	१२
प्राप्तिभाव्या-	प्रातिभाव्या-	२०५	१०
जायति	जायेति	२०७	३
नुमत्यक्षा	नुमत्यपेक्षा	२०९	५
स्यादिति	स्यादितिसंततिः	२१९	२४
आत्यन्तिककमिति	आत्यन्तिकमिति	२३०	१६
आधिशब्दो	अथशब्दो	२३१	५
सूचिम्	सूचितम्	२३२	६
सवृद्वीति	सवृद्धीति	२३६	१
वृद्वीति	वृद्धीति	२४१	७
वृद्विशेष-	वृद्धिशेष-	२४१	१६
स्यष्ट	स्पष्ट	२८०	२५
घर्म	धर्म	२८१	६
विश्वरूपार्यः	विश्वरूपाचार्यः	२८६	२५
साहसावित्यर्थः	द्वौमध्यमौसाहसा-वित्यर्थः	२९१	३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ
मध्यमाणि	मध्यमाणि	२९२	२२
चाब्राण	चाब्राह्मण	२९४	१८
इत्यनेमा	इत्यनेना	३३१	२५
आह्	आह	३३६	९
चस्त्वर्थौ	चस्त्वर्थे	३५२	२०
ज्ञापकेनाय	ज्ञापकेनायं	३६६	१९
सत्या एव	सत्य एव	३६७	१८
"अलुब्धाइति" इत्यस्यानन्तरं	"छेदः। नृपे इति विषयसप्तमी। नृपम् इति" इत्यधिकमपेक्षितम्	३६७	२१
तावत्सूत्र्या	तावत्सूत्रेण।सप्तसूत्र्या	३७१	२
मविवाक्षितामित्याह	मविवक्षितं किंतु तद्घटितत्वमात्रं विवक्षितामित्याह	३७३	१७
समाहाद्वन्द्वः	समाहारद्वन्द्वः	४०७	१०
लौकिमेव	लौकिकमेव	४२४	१२
विभा—	विभागा—	४३२	२५
१२	१३	४३९	१५
मूलाशयक	मूलाशयाशयक	४४८	९
"* अत इति।" इत्यस्यानन्तरं	"* सर्वस्मिन्निति। जीवदजीवद्विभागे इत्यर्थः" इत्यधिकमपेक्षितम्।	४५४	१०
"समांशिन"इत्यस्यानन्तरं	"पैतृकंतुपिताद्रव्यमनवाप्तमवाप्नुयात्।" इत्यधिकमपेक्षितम्।	४५८	८
त्वाधिकारात्	त्वधिकात्	४५९	१९
वाक्येभ्यः॥	वाक्येभ्यः—	४५९	२५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ
रवगमात् कालान्तरे	रवगमात् । कालान्तरे	४६०	८
प्रकीतिताः	प्रकीर्तिताः	४६०	२०
दायादि	दायादादि	४६९	११
शेषेत्वादेव	शेषत्वादेव	४७०	१४
क्त्वचित्	त्क्वचित्	४७२	१३
क्किञ्चित्	त्किञ्चित्	४७४	९
न्यूनतां	मौलचेन संग्रहात् न्यूनतां	४७६	१२
मेध्यातिथ्यादे-	मेधातिथ्यादे-	४८८	१२
पित्र्यमिस्यै-	पित्र्यमित्यस्यै-	४९२	१५
दन्यवहित	दव्यवहित	४९३	२१
ब्राह्मणी	ब्राह्मणी	५०३	१९
बह्वर्थाल्पा	बहल्पार्था	५०९	७
तन्नाशादन्यस्याधिकारीति	तन्नाशादन्यस्या धिकारिणोऽभावात्त- स्याप्ययमेवाधिकारीति	५२०	१६
विजातीयात्	विजानीयात्	५३८	२०
दितिति	दिति	५३९	४
मह	माह	५३९	७
सहैवति	सहैवेति	५४३	१
"मातेति" इत्यनन्तरं	"तदन्यतरेणेत्यपि बो- ध्यम् । * उत्सृष्ट इति।" इत्यधिकमपेक्षितम् ।	५४७	१०
चोऽन्वान्वये	चोऽन्वाचये	५४८	२
कार्तान	कानीन	५५१	११
रिक्कथा	रिक्था	५५३	२४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ
क्षेत्रजैश्चव	क्षेत्रजश्चैव	५५९	१३
मूलकृत	मूलकृता	५६२	५
तद्रूपत्वाच्च	तद्रूपत्वाच्च	५९३	२३
उरार्धेन	उत्तरार्धेन	६०१	२३
इत्यन्तन	इत्यन्तेन	६१४	३
विरोधोपत्तेः	विरोधापत्तेः	६२५	१३
प्रवर्त्तते	प्रवर्तते	६२८	२२
भार्यासुतविहीनस्यतनयस्य	भार्या सुतविहीनस्य तनयाऽस्य	६३६	१३
अत्र	तत्र	६४५	७
दृष्टान्तेन	दृष्टान्तेनद्वन्द्वसत्त्वेन	६४५	११
परत्वं	परत्वं न श्रोत्रियमात्र-परत्वं	६४९	२३
प्रोक्तच्छिन्न	प्रोक्ताश्छिन्न	६५८	१५
भर्तुधन	भर्तुर्धन	६६०	१०
रितासु	रितरासु	६६१	१०
प्रपौत्रौ	प्रपौत्रो	६६१	१२
प्रदशर्न	प्रदर्शन	६६१	१६
प्राप्नुपुः	प्राप्नुयुः	६६४	१०
पित्रो	पित्रे	६६४	१६
द्वादश द्वादश	द्वादश	६६६	८
विभभक्त	विभक्त	६७४	५
सधनत्वे च	साधनत्वेनिर्धनत्वे च	६७९	१५-१६
क्षेत्रजश्चै	क्षेत्रजश्चैव	६८७	१३
वध्या	वन्ध्या	६९३	२०
परमित	परमिति	६९५	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ
पुंस्त्वे	पुंस्त्वै	६९८	१४
श्रेयसः	अत एव–श्रेयसः	६९८	१६
सुक्ता	मुक्ता	७१२	१८
१३	१२	७२३	१०
विशेषपादि	विशेषमादि	७२९	२१
व्यासेत	व्यासेन	७३५	५
भ्रातराविति	भ्रातराविति पुत्राविति	७४६	१४
वीक्षणम्	वीक्षणे (मनु. ९।११)	७५३	१३
दौहित्रीणामेव	दौहित्राणामेव	७५३	१८
जनकाङ्क्षाया	जनकाकाङ्क्षाया	७५४	१०
भिप्राप्राय	भिप्राय	७५५	९
तत् ।	तत् । मानाभावात्	७६३	२२
पिंड	पिण्ड	७६९	१२
व्यारव्यात्	व्याख्यात्	७८२	१४
त्याह * प्रत्यासन्नेति ।	त्याह * समेति । तदर्थमाह * प्रत्यासन्नेति ।	७८९	१८
पाठान्तम्	पाठान्तरम्	७९२	१४
"त्रेत्यर्थ" इत्यनन्तरं	"*साक्षीति । तेषां तत्रैतद्विरुद्धदण्डविधेर्मूलोक्तदण्डस्यतन्मात्रविषयत्वमेवयुक्तमित्यर्थः" इत्यधि.	७९५	१४
हेता	हेतो	८०६	१०
परसस्येति	पणस्येति	८०६	१३
प्रत्याहण	प्रत्याहरण	८३६	२०
"इतरैरिति" इत्यनन्तरं	"अनतिप्रसङ्गायाह*गणान्तर्गतैरिति" इत्यधिकमपेक्षितम्	८६०	२३
क्षीणशक्तिरिति	क्षीणशक्तिमिति	८९४	१८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ
जात इति	जात	१०६	६
ब्राणा	ब्राह्मणा	१०६	२१
ब्राह्माण	ब्राह्मणा	१०६	२३
तद्विज्ञाय	तद्विहाय	११४	४
माह * पिप्पलेति	माह * चेति। तत्स्वरूपमु-क्तभिन्नमाह *पिप्पलेति	११७	२१
क्षब्देन	शब्देन	१२३	१७
शब्देनाहते	शब्देनाहूते	१२७	११
द्विविधस्य	द्विविधस्यपण्यस्य	१४५	१२
जलेज	जलजे	१५७	१
तत्फूलित	तत्फलित	१५७	१६
भारः	योभारः	१६२	२
वधस्यास्या	वधस्या	१७४	३
अवीतके	अविवीतके	१७६	११
व्यंसकादि	व्यंसकादि	१८०	१४
स्त्रीणांमहाकुलजातानां मनुष्याणांविशेषेण स्त्रीणां महा-	स्त्रीणां महा-	१८८	११
किण्वनां	किण्वानां	१८९	१६
*भक्ते,	भक्तम् अन्नम्। * स-प्तमेभक्ते,	१९०	१४
* अरुद्धास्विति	* अवरुद्धास्विति	१०२७	१४
परिहाय	परिहाराय	१०२९	१९
क्षेपकेणेपि	क्षेपकेणेति	१०३८	२३
विशेषान्तरर	विशेषान्तर	१०४७	१९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मिताक्षरायाः शुद्धिपत्रम् ।

अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ
कर्त ब्धम्	कर्तव्यम्	७	२०
लोभाल्लिप्सा	लोभाद्वा लिप्सा-	१३	१३
संत्रासात्स्मृ	संत्रासाद्वा स्मृ-	१३	१४
शतमष्टोत्तरंभवेत्	द्वात्रिंशदधिकंशतम्	१९	३
दर्शति	दर्शयति	१९	६
प्रत्यर्थिन इत्यस्यावतरणम्	"प्रत्यर्थिनिमुद्रालेख्य-पुरुषाणामन्यतमेनानीते-किं कुर्यात् इत्यत आह ।" इत्यपेक्षितम्	२५	९
एवञ्च	एतच्च	२९	१
बह्वव्रीहिः	बहुव्रीहिः	३०	७
न सत्यं	सत्यं	३६	१०
अत्र	अत्रच	३७	४
यत्र	यत्रच	३७	१६
प्रातिदास्यामि	दास्यामि	३८	९
ज्ञात	जात	४०	८
ततोऽर्थी	तथा, अर्थी	४०	११
अर्थिनं	अर्थिने	५७	११
दण्ड्यश्चापि	दण्ड्यस्यापि	६४	९
दाप्यः	दण्डं दाप्यः	६८	२०
देकशान्तरे	देकदेशान्तरे	७१	२२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ
करणाना	करणानां	७८	७
सार्थवन्नान्यथा	सार्थकंनान्यथा	७८	१८
स्वामिना	स्वामिनां	८७	४
१२४	१२५	१०१	५
एतेषां	एतेषांच	१०१	१०
साहसः	साहसे	१०१	२२
प्रसङ्गात्	संभवात्	१२०	१७
संपूर्णं	संपूर्णता	१२३	११
पुरुष-	पुरुषे	१२४	२५
परेतः	परेतः स्यात्	१३६	१४
इष्टवियोगोऽनिष्टप्राप्ति-स्तज्जनितं	इष्टवियोगा-निष्टप्राप्तिजनितं	१४१	१०-११
प्रवेशयाति	प्रविशति	१४२	११
ध्याधिकार्ये	धर्मकार्ये	१४२	१४
ऋणदान	ऋणादान	१५७	१
दृष्टव्यः	द्रष्टव्यः	१५८	७
३ अधुना	अधुना	१६५	५
मधर्णेन	मधमर्णेन	१६१	१७
दमशमंशं	दशममंशं	१७३	२
मातृपितृ	मातापितृ	१९१	३
योषिद्ग्राहो यश्चतस्तृणां	यश्चतस्तृणां	१९२	७
समांशिकाः	समांशकाः	२०५	५
कस्मिंश्चित्ततः	कस्मिंश्चित्तत्सुतः	२१४	११
विश्वासर्थं	विश्वासार्थं	२२२	६
अधमर्णे ऽधिक्रियते	अधमर्णेनोत्तमर्णेऽधिक्रियते	२२२	६-७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ
नत्वेवाधो	नत्वेवाधौ	२२६	२
ऊर्ध्वं	ऊर्ध्वं धनं	२३६	११
सबन्धी	सम्बन्धी	२५१	२
७६	७८	२७६	१०
तत्रोक्तो दण्ड	तत्रोक्तोऽर्थदण्ड	२८८	२०
त्रिभिरेरेव	त्रिभिरेव	३१२	३
लेरव्य	लेख्य	३१९	२४
अधमर्णो वाउगपतं	उत्तमर्णोवाउपगतं	३२२	१३
कमः	क्रमः	३५८	७
आदित्यभिमुखं	आदित्याभिमुखं	३९७	२१
परिहर्य	परिहार्य	३९८	१९
ताम्र	तत्र	४००	१७
जीवत्यपि	जीवत्येव	४४०	२३
मृणावशिष्ठ	मृणावशिष्ट	४५२	५
भोक्ते	भोक्त्रे	४६६	१९
नचात्म	न चात्रात्म	५००	२
"ब्राह्मणोत्पन्ना"इत्यनन्तरं	"यथाक्रमंचतुस्त्रिद्वयेकभागाः स्युः भवेयुः। एतदुक्तं भवति, ब्राह्मणेन ब्राह्मण्यामुत्पन्ना" इत्यधिकमपेक्षितम्।	५०७	२२
अनेन	अनेन विधानेन	५१९	१३
पूर्ववत् तथैकं	पूर्ववत्। तथैकं	५३४	६
एतेषां	एषां	५३४	२५
पूर्वस्मिन् पूर्वस्मिन्	पूर्वस्मिन्	५३५	८
दद्यात्तत्पिडं	दद्यात्तत् पिण्डं	५७६	२३
कार्तिताः	कीर्तिताः	५७७	९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ
इति। अनेन	इत्यनेन	६७८	२२
पुस्तक	पुस्तकादि	७०६	२०
नारदेनापि	नारदोऽपि	७२२	४
पूर्वोक्त	पूर्वपूर्वोक्त	७४१	१६
मृतप्रज	मृताप्रज	७७१	१७
प्रभेदनादादौ	प्रभेदनादौ	७९८	१६
अत एवाह	अत एवाह (ना. व्यव. १४।८)	७९९	७
भक्तदासीनां	भक्तदासादीनां	८५८	७
षावत्	यावत्	८६८	१७
स्तएव	स्तएव क्कित-वाएव	८७७	२०
गृहात्वा	गृहीत्वा	९०७	१८
पोदन	पादेन	९०७	२३
वोल्लङ्घ्य	चोल्लङ्घ्य	९२०	८
जिघृक्षाति	नजिघृक्षाति	९४७	९
द्रष्ठव्यः	द्रष्टव्यः	९४८	१७
निःष्कारणं	निष्कारणं	९६८	२१
घातैयेत्	घातयेत्	९७२	१७
विवीत	विवीते	९७५	१२
१२२	३२२	९८३	५
दाप्या	दाप्यो	१००५	१२
सभ्या इत्यनन्तरं	यदातु राजानुमत्याव्य-वहारस्य दुर्द्दष्टत्वन्तदा सर्वे एव राजसहिताः सभ्यादय दण्ड्या इत्यधिकमपे-क्षितम्	१०४८	१[illegible]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

INTRODUCTION.

The real character of Hindu Law.

The true nature of the works going under the name of Hindu Law—*Dharma-Shāstra*—and the trend of mind of its composers, has not been realised by any of its European students, be they merely Orientalists interested in a new body of thought, or lawyers who have to administer that law. If the old-world Shāstrīs, the hereditary custodians of the learning, do not recognise its doctrinaire character, it should be no wonder, seeing that long and firmly established vested interests of the priestly class are involved. But when the English-trained Hindu lawyers who have no axe of their own to grind like the Shāstrīs, for they come from every caste and sub-caste, and are more or less conversant with at least the customs prevalent in their own special sub-caste, when even these fail to see that the whole body of Dharma Shāstra is artificial, ritualistic in nature, deduced not from experience of life, but the necessities of the conventions of Nyāya Shāstra and Mīmānsā one can only wonder at the sort of training given in a score of law colleges in the country, turning out many hundreds of LL. Bs. every year. There must be something radically defective in the training, when the glamour of these ceremonial-choked priestly books is so strong that the great divergences between the actual daily practice of the community and the 'pious wishes' and precepts of ecclesiasticism, are as blindly passed over as if they were altogether non-existent. A faint echo of this exists even in the west, for European law has its fictions, its Canonical fetters and word-splittings and scholastic pedantries and antiquated technicalities inherited from the dark ages in great abundance, even yet.

A few concrete examples will help to bring home to the reader the validity of the remarks made above. Take the

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

case of marriages. Every day, all over the country, in every caste and sub-caste—not excluding the Brâhman,—marriages have been, and are, and will continue to be, celebrated in spite of all the law-book regulations against them, within the 'prohibited' degrees. Does any sensible person regard these as sinful concubinage? Take the case of adoption. If there is no money at stake, not a single one of the defenders of Dharma considers it worth while disputing an adoption in a British law Court however contrary to the Smriti-rules it may be. But if there is valuable property concerned, then the reversioners wake up to the enormity of the 'sin' committed by the adoptee and fight the adoption right up to the Privy Council, leaving no stone unturned in their efforts to see that *Sadāchāra* (holy usage) is not flouted! Take again the diametrically opposed rules of Inheritance as propounded by the *Mitāksharā* and the *Dāya-bhāga.* How many Bengal fathers disinherit their children and dispose of their properties in any but the way of natural affection; how many *Mitāksharā* children demand partition in the lifetime of their fathers? Not one in a hundred thousand. According to the good old law, no *Shûdra* can own property or inherit. Is this followed? Yet again, while every Sanskrit law book is as explicit as it can possibly be with regard to the inheritance of *Strîdhan*, in practice it is a dead-letter all over India. Another huge fiction, is the joint-family. When the European who is used to setting up a house of his own as soon as he marries, sees all the male children of a family, married or not, living together under the rule of the head till the latter dies, he imagines that the joint-family is real and not merely nominal; the Hindu law actually favours the early disruption of joint-families from theological motives and is in fact quite opposed to the system.

Not even the Feudatory Indian States follow the *Smriti* injunction about appointing only Brâhmans as Ministers and

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Judges. Similarly all over the country, the teacher is no longer only the Brâhman, even the Vedas being taught by Europeans; and no wonder, seeing that the most carefully critical Vedic studies are the fruits of German, American and English universities.

The works on *Dharma-Shāstra* are not primarily meant for the adjudication of worldly interests—these are merely unavoidable and unpleasant incidents in a life meant to be devoted to spiritual purposes. The *Dharma Sûtras*, which are the earliest expositions of 'law' in a separate form are every one of them composed for the guidance of the Brâhmans belonging to the many different *charaṇas*, 'schools' of the Vedas, into which the sacerdotal community was very early broken up. The metrical *Smritis* are reconstructions of these *Sûtras*, to suit a later age and like them are overloaded with minute directions about rituals, ceremonials, penances and purifications. But there is one basic difference between the two. The Sûtras are the especial property of the charaṇas, not so the Smritis. These latter have advanced somewhat from the position of the Dharma Sûtras, and have been forced to open their eyes to the glaring deficiencies of these Sûtras with regard to worldly matters, and so driven to provide remedies, and as they were not advanced enough to drop the theological side, they emphasised that also along with the filling up of the gaps in the civil law. They also took on the character of school-books at the same time for the instruction of all students irrespective of their Shākhās. They had also dropped minutiæ in favour of general statements, for these with the continuous disappearance of the Charaṇas were losing their interest and authority. Be it remembered however that the *Dharma-Sûtra* and the metrical *Smriti* periods are not always mutually exclusive but that they overlap to some extent. All Civil and Criminal offences are looked at from the point of view of an ecclesiastic in both and consequently regarded as Sin and to be expiated not for their bearing on the social and civil life of the community

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

but for their effect on the offender's life after death. The modern European juridical concept of law—civil, criminal, commercial—directly concerned with the daily life of the community, wholly unconcerned with its theological entanglements, never arose before the minds of its priestly administrators.

The late Mr. Mandlik's contention in his *Hindu Law* when controverting the position of authority assigned to the *Dattaka Mīmānsā* of Nanda Pandita and standing up in defence of the Bhattas, the authors of works belonging to the *Mayūkha* school of law, that they were men belonging to the people and hence in touch with the life of the world, whose expositions of the law should be taken as *accurate* and therefore authoritative, is wholly untenable. There is nothing to choose between one latter-day Pandit and another. They, one and all, belong to the same class of closet scholars and lawyers, untouched by the myriad activities of the world. *Vyavahāra* occupies but a small fragment of their energies and their learning—which is all spent on *Āchāra* and *Prāyashchitta.* Take for instance the well-known *Vīramitrodaya*; the *Vyavahāra* portion—which is the biggest of all known works on that subject—occupies barely one-twentieth of the space of that enormous digest which is twice the size of the *Mahābhārata.* Similarly the *Vyavahāra-Mayūkha* is but a tiny fragment of the *Bhagavanta-Bhāskara.* Not a single one of these multitudinous commentaries and digests is ever betrayed into taking any notice of the outside world. There is never a hint of any other system of law being prevalent in the country or known to the authors. Islam was predominant, but no mention is made of Islamic law. The magnificent empire of Vijayanagar was utterly destroyed and its splendid capital razed to the ground to be a source of archeological wonder to later generations; but never a word about the deadly struggle in the works of the *protege* of the Emperor the "omnicient" Mâdhava and his brother Sāyaṇa. So also the *Vīramitrodaya*, the *Saraswatī Vilâsa*, and every

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

other work. The death-grapple of Vîra Sinha Deva of Orchha with the great Akbar and the submission of the Bundelas, or the devastation of Orissa and the overthrow of the power of Pratâp Rudra Deva is silently passed over. While Hindu Kingdoms were falling like nine-pins round him, the Brâhman was busy carefully calculating the exact amount of expiation necessary for the helpless individual who had become impure by the touch of the house lizard (pallî-patan), the idea of national welfare never rose before him. Omenology, Astrology, and Theology these three were the forces that brought grist to his mill, and they were worked for all they were worth, and this they did by effectually enslaving the intelligence of the people, by killing out all liberty of action and by killing out all joy in life by a pessimistic philosophy. The germs of a corporate national life were effectually blasted.

And it is no wonder that it is so. For while the *Smritis*, with very few exceptions, as for instance Devala, were written under an overpowering sense of the meanness and worthlessness of the life of the world by their ascetic-minded Rishi authors and hence dwelt very largely on and gave a quite disproportionate space to super-worldly concerns, these latter-day commentators, not even excepting Medhātithi whose voluminous *Manu-bhāshya* was composed in the 9th century A. C. while the first Islamic invasion of India occurred in the 7th century A. C. (for the prior *Nārada-bhāshya* of Asahāya is only met with in a form 'restored' by Kalyāṇa Bhatta, and even of this no complete and correct MSS. are available,) also took the same lines, but for very different reasons. Even Medhātithi is reputed to have been 'restored' by the Court Pandits of King Madan Pāla of Digh, a jāt sovereign of the 15th century A. C., by which time the *Bhāshya* is said to have become very corrupt. But this restoration, as the late Prof. Buhler has remarked in his very informing introduction to his translation of Manu, means probably nothing more than that copies of

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

the work had become very scarce and fragmentary and that the king completed his own palace library copy with the help of a manuscript brought from some distant place. Hindu law never had a chance of orderly evolution and growth.

Every one of these Commentaries and Digests was composed after the Moslem hordes had begun to pour into India, from the 7th Century A. C., and down to the days of full conquest and consolidated rule and then its final destruction at the hands of the English in 1857 A. C., when the last Delhi Emperor was deported and both his young sons shot, and the Government of the country assumed by the British Crown. During the thousand years of Moslem rule orthodox Hinduism was thrown back upon itself. It could not assimilate these ravaging conquerors as it had done the divers races that before their time poured into India. The Brâhman regarded with terror and horror the Islamic flood that wiped out the ancient landmarks for ever. He would not reconcile himself to the new order of things and being hurled from his seat of unquestioned power, retired within his carapace, and his outlook on the world steadily narrowed till it was confined to the four walls of his room. Denied an outlet to his keen intellectuality, and his superabundant energy and humiliated by being thrust into the background by those whom he deemed unpolished barbarians, *Mlechchhas*, who respected none of his conventions, and in fact took a delight in outraging them as often as they could, he concentrated his attention more and more on acquiring "other-world" riches. By these means he not only succeeded in keeping the respect of the non-Brâhman, as the custodian of his ancient faith which was being so ruthlessly uprooted, but succeeded far beyond his probable original intention. He riveted his authority so strongly that he came to be regarded as Divine to whom more than respect—unquestioned worship—had to be paid. With ample leisure, and with the natural human craving for being something so amply satisfied, he turned his attention to elaborating most minutely the few and

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

simple *Grihya* and *Dharma Sûtra* rituals into the formidable structure of superstition the like of which the world has never seen.

The *Dharma-Shāstris* (the knowers of the sacred law) were never appealed to by the people on questions of civil law, except perhaps in the case of some Brâhman communities in remote corners of India. All such disputes were dealt with in the light of custom by Caste Panchayets, by *Shreshthis* (bankers), by *Mahājanas* (Merchant-guilds) or trade-guilds according as the question in dispute came under their several jurisdictions, whose decisions were generally enforced by those in political authority,—whether Hindus or Moslems, while questions on impurities, purifications, ritual etc. were invariably referred for opinion and guidance to the Brâhman. As authority came to be usurped more and more by the priest, he began to meddle more actively with the civil law proper and began deducing rules of *Vyavahāra* from the artificial premises of *Āchāra* and *Prāyashchitta* by a *tour-de-force* of Mîmāmsā and Nyāya. Custom came to be expressly over-ruled when in conflict with *Shruti* and *Smriti* and thus gradually, supported by the powerful arm of political authority, wielded by Chieftains who were being rapidly Hinduised, and were desperately anxious to be regarded as Kshatriyas, the very basis of our Civil law was revolutionised, and instead of Usage, sacerdotal law was installed in the seat of authority, and tried with varying success to make itself pre-eminent. The Brâhman of that time was only too anxious to help these would-be Kshattriyas, for unlike his latter-day successors he was far too keen-sighted and large-minded not to be acutely alive to the necessity of making converts of such formidable warriors to his system of theology and social order, and thus enlisting their powerful support in upholding and enforcing his egregious claim to worship as the 'super-man' to use a word made popular by Bernard Shaw and which claim was in deadly peril owing to the Jain and Buddhist schisms.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

It is a profound error to regard the *Smritis* as *complete* codes of law or as getting all their 'rules' rigidly enforced by the political authorities of their times. Sir Henry S. Maine's observations on this point, though he mentions only Manu, are very true, and apply to every other 'code' equally well. He says :—"It does not, as a whole, represent a set of rules ever actively administered in Hindustan. It is in great part, an ideal picture of that which, in the view of the Brahmins, *ought* to be the law." (Ancient Law p. 17). With regard to incompleteness, the same author in his *Village Communities* (p. 51) has pointed out that in these codes "large departments of law are scantily represented or not at all"; an uncontrovertible statement, and easily borne out since the days when Maine penned the above sentence by the enormous mass of judge-made law and the very large output from the various legislative machineries —which are certainly not working up to their full capacities— at work in the various parts of the country. The *Smritis* nowhere mention imprisonment as a punishment, though we know from old literary works, that jails existed and people were imprisoned. This omission can arise either because the authors would not admit the power of political authority to imprison Brâhmans, or to their deliberate ignoring of actualities in favor of an abstract, speculative treatment of law. The spy is very prominent, but there is no mention of the Civil Police for purposes of watch and ward ; nor of Bankers (*Shreshthis*), Bankers-guilds (*Mahājanas*) or the various trade-guilds. The constitution of the *Parishad* is given but by no stretch of language can it be called a law-court or even a caste-panchayet. The Digests and Commentaries have slavishly stuck to the written texts before them and dared not to open wide their eyes to the world surrounding them. The truth of the matter seems to be that administrative methods were loose and haphazard and the people allowed to go their own way without much meddling and interference as long as they paid the taxes—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

from which Brāhmans always claimed to be exempt—and were not contumacious. In one sense it was a very democratic government.

Some of the later *Smritis*, which continued to be composed, I believe, almost up to the period of the early Moslem inroads into the outlying Provinces of India, Sindha, Kamboja (Kabul), Gāndhāra (Kandahar), *etc.*, were, however, somewhat progressive in the sense that they took a little more account of the actual state of some of the points of civil usage; but the Commentaries and Digests reverted to the earlier narrow spirit and in fact went one better in their insistence on ritualism. But even the *Smritis* could not in the very nature of things be so progressive as, for instance, Roman Law, to say nothing of course of modern legal systems, because of their theological entanglements. B. Golap Chandra Sirkar has hit the point truly. He remarks in comparing the Brahmanic with the Roman system that "The Brāhmans on the other hand adopted and taught the religious principle of asceticism inconsistent with worldly prosperity and political greatness, established a caste-system causing an exclusiveness that prevents the introduction of a stranger into the Hindu Community and thus rendered themselves incapable of deriving any advantage from the observation of the laws of other people whom they were interested to despise and hold up to contempt." "Brahmanism, caste-system and Brahmanical superiority are convertible terms, and people without caste could not but be looked upon by the Brāhmans with derision at least externally, and represented as *Mlechchas*, or barbarous or irreligious." "The greatest impediment in the way of progress of Hindu jurisprudence was offered by the theory of its divine origin which stamped a stationary character upon it." (The Hindu Law of Adoption—Tagore Law-lectures—A. C., 1888., p. 84). G. C. Sirkar's remarks on p. 85 of the same book with regard to the great commentators is no less true. The

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Brāhmans "keenly alive to the interests of their own religion and of their *class*, which would have very materially been endangered in the eye of Hindu Society had they taken the false step of seeking worldly prosperity and political position, ... adopted the proper course of severing their connection with, and of withdrawing from the political government of the country, and chose to retain their position of religious and social supremacy among the Hindu Community. Thenceforth they devoted their undivided attention to religious matters, *ceased to be practical lawyers*, and *became more narrow-minded than ever*. The worship of the various idols and the innumerable religious ceremonies mentioned in the Purānas were thrust into prominence by the Brahminical writers of this period, such as Bhavadeva, Raghunandana, Kamalākara and Nīlkantha, who busied themselves in preparing elaborate works for teaching the members of this class, the method of performing the religious rites, *so that they might earn their livelihood by officiating at them*." (The italics are mine.) The theological basis of all that goes under the name of Hindu law can very easily be realised by studying that all-important *vivāda-sthāna*, 'bone of contention,' the law of inheritance, and the stupendous difference between the Bengal and the Mitāksharā view of the question, due solely to the ridiculous difference of meaning assigned by the two schools to the ritualistic word *Sapinda*! If it were urged that parallels are not wanting, even in modern times, where a new 'interpretation' of a single section of an Act has altered the whole course of procedure or business and 'shaken vested interests' till remedied by a new Act of legislation, the reply is, that such interpretations have nothing to do with religious rituals, but are due to defective draftsmanship.

The notion that there are *Smritis* which treat purely of *Vyavahāra* is due to the incomplete state of preservation of some of the older *Smritis*. For instance, Nārada is certainly only a torso, shorn by merciless time of its *Āchāra* and

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Prāyashchitta portions. Prof. Jolly mentions in the preface to his edition of the text of the *Nārada Smriti* that there exists a MS. written in the Grantha script in the India Office library of Nārada but which treats only of *Āchāra* and *Prāyashchitta*. It is strange that he dismisses the MS. so curtly; it never seems to have struck him that it would be worth while examining carefully the work which might turn out to be the lost first and third chapters of the *Smriti*. Similarly other Smritis. The large mass of the latter-day *Smritis*, whether with the later sectarian interpolation or without, as for instance the *Hārīta*, one version of which is full of the shibboleths of the Ramanuja sect, deal only with *Āchāra* or *Prāyashchitta* or both. In passing, it may be pointed out, that the work available in print as *Kātyāyana-Smriti*, is not the *Smriti* of Kātyāyana, but the *Chhandoga-parishishta*, wrongly taken to be a *Smriti*. There seems to be some confusion of ideas with regard to *Vriddha* and *Brihat* recensions of many of the *Smritis*. Some even go so far as to deny the existence of any such in those cases where only quotations are to be met with in the digests and commentaries and manuscripts of the work not forthcoming. It is a very hazardous position to take up. We see every day manuscripts turning up whose existence has been strenuously denied; to give an instance the late Dr. Weber denied the existence of the eight *Brāhmaṇas* of the Sāma Veda, but himself lived to edit some of them! So far *three* recensions of not even a single Smriti has been met with, but two of a good many, and so possibly *Vriddha* and *Brihat* mean only *large*. Farther it also seems that *Vriddha* does not mean an older redaction from which the *laghu*, the smaller has been abstracted. The process has been the other way; the larger versions being amplifications, 'second editions' of the smaller ones.

After all that has gone above, it scarce needs pointing out that Vijnyāneshwara and Jīmūtvāhana are not less speculative than any other writers in their works. Would

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

any legislature promulgating a Civil Code worry itself farther after it had conceded absolute rights of ownership and full Testamentary powers into laying down stringent and precise rules for devolution of property as Jīmūtvāhana has done? It is only possible for one who was composing a work for *educative* purposes and not for actual enforcement. The Testamentary powers permitted to the Hindus governed by the *Dattaka Mīmāmsā* and the *Mitākshara* can and do play havoc with the law as laid down in them. If these writers had had the misfortune to leave to posterity more works than one, as the famous Nanda Pandita has done, it is quite probable that they too would have been betrayed into advocating conflicting views as poor Nanda Pandita has done on the question of adoption in *Dattaka Mīmāmsā* and the commentaries on the *Parāshara* and *Vishnu Smritis*! Golap Chandra Sirkar is perfectly justified in his contention that the weight attached to the *Dattaka Mīmāmsā* by the British Courts is wholly undeserved and works a great deal of practical mischief. Although when he attempts to prove that while Nanda Pandita is speculative, Vijnyāneshwar and Jīmūtavāhana are not, and that in fact they are "*practical*" lawyers, he makes assertions which are not easy to maintain. The old-world Pandits use them as two amongst a host of others to be *consulted* and do not treat them as of "paramount" and "binding" authority. Their present supreme vogue is due to the fact that these were the works that were the first to be published in English by Colebrooke, Sutherland and others and so with every year that passes they acquire more and more the paramount and binding character, thanks to the doctrine of 'precedent' and of 'settled facts' of the English lawyers. So strongly entrenched is prejudice about this matter that even such a learned and thoughtful man as Sir Ashutosh Mukerji, Judge of the Calcutta High Court, fondly imagines that the *Vyavahāra-mātrikā* of Jīmūtavāhana which he has so ably edited for the Asiatic Society of Bengal is a great find and that it will throw considerable light on Pro-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

cedure in ancient India. It is no better nor worse than a score of other similar works. I shall give just one reference from *Saraswatīvilāsa* about *Mitāksharā* to show in what light these works were regarded by rival authors. It is a digest prepared in the reign of Pratāpa-Rudra Deva (A. C. 1503 to A. C. 1524) and under his direct supervision in which (p. 60 of Foulke's ed.) on a disputed point about *Strīdhan* the author bluntly says: विज्ञानेश्वरेण स्वमतिमात्रपरिकल्पितत्वात्, *i. e.* (the dictum) is a product of Vijnyāneshwar's brain (and so has no force, being unsupported!). If the *Loka-prakāsha* of Khsemendra were to be edited with the same minute care as Jīmūtavāhana's work has been by Sir Ashutosh Mukerji and an English translation made of it, probably it would supply much more information about the practical administration of a Hindu kingdom about a thousand years ago and let in light on judicial procedure, a subject which has not at all been properly investigated yet. There are other similar works from other parts of India, and some of them give even draft forms of treaties between sovereigns, for instance in the *Lekha-panchāshikā* discovered by Sir R. G. Bhandarkar; a careful working up of the hints in such works would supply much material for the condition of public as well as private international law, on which the 'orthodox' works are completely silent. The Feudatory States will not afford much light, as they all have been largely Europeanised. Nepal is probably the only State, which preserves the old methods to some extent, and these should be investigated and committed to paper before the onrush of the west sweeps off these old-world ways.

The real nature of the Nibandhas—the digests—will be fully realised only when the nature of the *Vyavasthās*—the responses of the learned Pandits on any special point of law—is fully analysed.

Whenever any person is in doubt upon any question of *Āchāra* or *Prāyashchitta* or there is any dispute over any points arising out of these between members of a caste, the person most involved selects a Pandit from among a number

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

of those whose opinion would command respect in his community, and who is likely to hold views favorable to the person interested. This man negotiates either directly or through an intermediary for a stipulated fee for a written opinion upholding the interested person's point of view and to further strengthen the 'opinion' various sums of money are presented to other Pandits and their signatures, concurring with the pronouncement, obtained on the document. As this method is a considerable source of income to the Pandits, irregularities are usually winked at, and it is no disgrace and nothing unusual to have contradicting documents prepared and signed by the very same Pandits! This is a well known fact and within the personal experience of many of us who have had occasion to obtain *Vyavasthās*. It will be clear from this that these 'opinions', '*responsa prudentum*', are not the works of independent judges, maintained at the public expense, but of advocates seeking a livelihood by upholding the case of their clients—no better and no worse than the barristers, advocates, pleaders, of modern law who will strenuously oppose or defend in the British Courts one set of actions to-day and to-morrow change sides in an analogous case, the opponents becoming the defenders and *vice versa*. Manuscript copies of these *Vyavasthās* were generally preserved and a digest prepared from them in time. The conflict in the digests is due to the bias of the writer, as he selected one or another point of view from the vast mass of conflicting *Vyavasthās* as his own.

Naturally, to give a completeness to his work, the digest-writer generally, though not invariably, wrote on civil law also, for which he was so ill-prepared by his training and religious convictions, and he made a sad mess of customary law. It is these Nibandhas which have been made the law of India by ill-informed British Judges and legislators and interested Brāhman lawyers. These have been given the rigidity of the type of the legislative acts, such as they never had before. The result is endless trouble, confusion, and litigation, and

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

the peace-loving poor Hindu is branded by the official as very litigious, while the official is blissfully ignorant that it is all due to the uncertainty of the law, produced by his own half-hearted and hesitating interference. How very narrow the commentators have become compared to the originals they are commenting on is best brought out by comparing the earlier and later rules about marriage, divorce and legitimacy. The old law allowed eight different ways of marriage, besides intermarriage also amongst the different castes (very soon restricted to *Anuloma*, *pratiloma* being tabood), seventeen grounds for the dissolution of marriage and the *re-marriage* of the woman concerned (*vide* Mr. Justice Ranade's Religious and Social Reform p. 71, Kolasker's ed.), and thirteen (not twelve only as ordinarily supposed, *vide* G. C. Sirkar's Tagore Law Lectures) kinds of sons. Now such wide-reaching liberal rules, like those of the Moslems, made illegitimacy all but impossible. In those "uncivilised" days the necessity for the prevention of conception either, by surgical, medical or physiological methods did not arise, because sex-morality had not become unnatural and divorced from human Psychology.

The late Professor Maitland speaking about the poverty of English law and its stunted and hide-bound nature at a certain period of its existence says:—"The sacred canon was closed, the age of gloss and comment, and it must be added, of evasion and non-natural interpretation had begun." (page 33, *Justice and Police*). The above remark of the great historian of English Law applies unfortunately with even greater force to Hindu Law of the period which followed on the closing of the Smriti period, some time before the age of Kumārila. A similar and even more serious blight had fallen, some millenniums earlier on Hinduism itself, when the age of the Mantras gave place to that of the Brāhmaṇas, but from which we were rescued by Shrī Krishṇa and his teaching of the Gītā. May we not continue to hope that the British Government will rescue us from the legal bog into which all unwittingly it has landed us?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

The Brāhmanic pretensions do not recognise the existence of the fourfold caste system in India since the beginning of the Kaliyuga. According to a well-known Purānic saying—*Kalāvādyantayohsthitih*, in the Kaliyuga, there are only Brāhmans and Shūdras. And with regard to Shūdras one has only to turn to Manu and see what it says. Menial service is his duty and means of livelihood (ch. X. Sh. 121, 123,125). He is not permitted to amass wealth, and if he is possessed of wealth, a Brāhman might take away from him as much as he wishes (ch. X. 129; viii, 417). It would not be to the purpose in hand to call attention to the cruel ecclesiastical, criminal and civil disabilties imposed on the Shūdra by Manu and other Smritis which unfortunately are fully paralleled to-day in the treatment meted out to non-whites, in the United States and South Africa by the whites. The position assigned to women is scarcely any better, they are to be always under tutelage and never allowed freedom (V. 155, IX. 18). No evidence has yet been produced to prove that these laws were ever actualities and enforced vigorously. If they ever had been, the Shūdra would have been far worse off than the Jew in Medieval Europe. After this can one seriously contend that Hindu law was in the main ever more than a pious wish of its metaphysically-minded, ceremonial-ridden priestly promulgators, and but seldom a stern reality? Purely secular works, like the *Artha-Shāstra* of Kautilya, or the *Nīti-Sāra* of Kāmandaka are not referred to even once by the hereditary ecclesiastical commentators and digest-writers. But with all their impenetrability and tough-mindedness actuality proved an irresistable argument, and the glaring contradictions and discrepancies between precept and practice forced them to evolve the legal fiction of *Āpaddharma* (law for the distressed) for the Brāhmans and also a 'code' for the Shūdras. If the Brāhmanic theory of there being only Brāhmans and non-Brāhmans is accepted, then should not all the vast majority of Hindus be governed and guided by the very much laxer and 'lower' rules than by the 'higher'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

and rigid, rules outlined in the Smritis?

The sacerdotal basis of the law is again shown by the fact that large portions of what is regarded by all jurists as pertaining to Civil Law is not to be found in the portions treating of *Vyavahāra*, but in the Canon Law. For instance, the law relating to gifts, to ownership in works of public utility—like tanks, wells, orchards, etc.—to liens on family property for purposes of marriages, pilgrimages, shrâddhas, etc. are all treated in works on *Āchāra*, *Dāna*, *Pratishthā*, *Utsarga*, etc. and which are as yet wholly unknown outside of the small circle of the Pandits; while the British law courts, intrenched behind the impenetrable ramparts of dense ignorance, most complacently continue to grind out case-law on all disputed points in the 'light' of their western knowledge! The law of adoption is treated of, not in the chapters dealing with Civil Law, but in the *Āchāra* portions. The supreme necessity for adoption is not the need of leaving one's property to some one, but for the purpose of saving the soul of the adoptive father from a special hell, and the property concerned was merely a bribe, a lure!

Unfortunately, to make confusion worse confounded, Hindu law, even as it is, is unknown in its *entirety* to our modern judges and lawyers. They have arbitrarily selected a *few* portions out of a *few* books and say that this and this only is the law to be applied to the Hindus. Seven or more schools of Hindu law have been evolved out of the untrained imagination of British-trained lawyers, who seldom know any Sanskrit, and even when they happen to know some, it is much too elementary to allow of a full-bodied ability to construe the tough sentences of the digest-writers, over-loaded as they are with a plethora of the most intricate and technical Mīmānsā and Nyāya concepts and methods. While no European University ever grants a degree in law without some knowledge of Roman law in the *original*, here in India where Hindu law is supposed to be a living vital force, many

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

hundreds of law graduates every year pass out of the five Universities, wholly ignorant of Hindu law in the original. So woeful is the ignorance and so second-hand the knowledge that even Brāhman High Court Judges are to be found who think the *Mayūkha* to be a commentary on Yājnyavalkya as was said in a famous adoption judgment!

All this brings me to the point that it is absolutely necessary for the British Government to move in the matter and utilise the present expanded Legislative Councils to codify the personal laws which have been now too long left to the tender mercies of chance and chaos. The plea of the necessity for neutrality is too late in the day to serve the purpose. When a Sikh Marriage Act can be passed, when an Act can be passed permitting the Borahs and the Khojas and other converts from Hinduism to Islam to register themselves under the Act by which they repudiate the Hindu law of inheritance in favor of the Muhammadan law and bind their descendants too; surely the British Government could do at least as much for the Hindus by enlightened codification embodied in *permissive* Acts. It should hearten the timid modern legislator to remember that Jīmūtvāhan, who is unknown before the 15th Century (*vide* Sarvadhikari's Tagore Law Lectures on Inheritance), produced a radical change in the Bengal Law of Inheritance, supplanting by his diametrically opposed views the earlier law of *Mitākshara* and other similar works. What was possible to a mere jurist unbacked by political authority should not prove a sacrosanct unsurmountable obstacle to the modern legislatures.

Attention may be called here to the works of the late Shyama Charan Sircar on Hindu Law, namely the Vyavasthâ Chandrikā in two volumes, dealing with the Mitāksharā law, and the Vyavasthā Darpaṇa in one volume dealing with the Dāyabhāga law. These seem to be the only efforts to codify the personal law of the Hindus. But these works have gone into an undeserved oblivion, from which they might well be

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

rescued. As things are to-day little encouragement is held out to a scholarly study of Hindu Law either in India or in England apart from its professional aspect. Generation after generation of lawyers is being bred whose sole pabulum is Mayne's admirable compendium of case-law. In India the Calcutta University with its magnificent endowment of the Tagore Law Lectureships is the only body that can easily offer inducements for a historical, critical, and comparative study of Hindu Law and Law books. Something has been done, but the lecturers, with perhaps the single exception of Dr. Jolly, have all been practising lawyers engrossed in professional work and not profound orientalists Anthropologists interested in a body of thought apart from its merely practical aspect. There has been another serious drawback also in the fact that the appointments as a rule are made only for one year, and for the kind of work suggested above not less than a four years' continuous tenure of office unhampered by any other work seems to be necessary. The lecturer would also have to be familiar with German, so that he might be able to use as models, the great works of German jurists on Roman Law.

As a preliminary process all available *Smritis* should be critically edited and all quotations in the digests and commentaries verified, and the whole legal literature fully analysed. It is a great pity that even yet we have no full and complete history of Hindu or rather Sanskrit Law, on the lines, say, of Pollock and Maitland's *History of English Law*. Such a history would have to deal not only with the development of the law and the juridical concepts underlying them, but also with the history of the various and many treatises in the original language, whether commentaries or digests. With such a standard work before the legislator, the task of codification would become comparatively easy.

We may now turn our attention to the *Yājnyavalkya Smriti*, which is the basis of our present day law as interpreted by the *Mitākshara*, and on which Bālam Bhatta has written his lengthy commentary.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Yājnyavalkya Smriti.

This law book ascribed to the ancient Vedic Rishi is no more his work than the older *Mānava-Ḍharma-Shāstra* is the work of Manu, the mythical divine king. The *Mitākshará* clearly states in the opening sentences that it is the work of some unnamed pupil of the Rishi. Now this statement can only have proceeded from well-preserved and widely current tradition, embodied in the many earlier commentaries on the *Smriti*, only one of which, namely by the author's own teacher Vishwarūpa is referred to by name, and not from any definite and direct knowledge. It is curious that the author was not deterred from making such a revolutionary remark by what is stated in the body of the Smriti itself! Not only in its opening stanzas does it purport to have been given out by the Rishi, but in shloka 110 of the *Prāyashchitta* portion the author definitely identifies himself as the author of the *Brihadāranyaka.* This seems to be an intentional fabrication in order to prove that the work possesses divine authority and hence must be implicitly obeyed by all Āryas. So whether the composer of the *Smriti* was a direct pupil of Yājnyavalkya or not is more than a doubtful point, and the utmost that can be affirmed with any approximation to certainty is that the work was composed by some one who belonged to the school of the White Yajurveda and was conversant not only with the *Pāraskara Grihya Sūtra*, but with the *Mānava Grihya Sūtra*, the *Shrāddha-Kalpa-Sūtra* of Kātyāyana, and other works of the Yajurveda school. The linguistic gap between *Brihadāraṇyaka* and the *Smriti* is so great as to be unbridgeable even in 500 years, so no great-grand-pupil even could have written the work. This makes it very difficult to assign any rough date even to the time of the composition of the work. The date assigned to the work by the Orientalists is the beginning of the 2nd Century A. C. (*vide* Stenzler's Introduction to his edition of the Smriti). The whole work

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

has been translated into English by the late Mr. V. N. Mandlik in his *Hindu Law.*

With regard to the dates assigned to the *Smritis* it may be pointed out here, that the work done in this field by the European Orientalists may have to be modified now in the light of the long-lost but recently discovered works of the ancient poet and dramatist Bhāsa so long known to fame only through the references to him by Kālidās and others. Thirteen of his plays have been recovered in the Indian State of Travancore, the only remote corner of India—if we except Nepal—which was never ravaged by Moslem bigotry, and did not have its libraries and temples burnt and destroyed by their fanatic hordes from the North. For instance, Benares was plundered and wrecked three separate times. The first sack occurring so early as 1193 A. C., and it speaks much for the vitality of Hinduism that all this iconoclastic ferocity did not wipe it out as it did the Buddhists at Sārnātha, and that so much of Sanskrit learning and such enormous numbers of manuscripts are still surviving. This Bhāsa is quoted in *Artha-Shāstra* (*vide* Mr. T. Ganapati Shastrier's edition of his dramas in the Trevandrum Sanskrit Series), which is attributed to Kautilya-Chāṇakya, the Minister of the famous Chandra Gupta, the Maurya, according to the *Mudrā rākshasa* (*vide* Telang's ed.). Whether Chāṇakya was actually the author of the work or not, the work itself bears internal evidence, dealing as it does with the complicated system of administration of a large empire, of its having been composed about that time, for no such extensive empire existed in the India of a later day. A *Mānava Dharma Shāstra*—which could scarcely have been the *Mānava Dharma Sūtra* belonging to one of the little known shākhās (schools) of the Yajur Veda—is named by him in such a connection as to show that the work was of undoubted and universal authority, being the prescribed text-book for kings and which Rāvaṇa had learnt. If it was not the Manu known to us, at most

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

it could only have been an earlier recension of it. This takes the work back to a fairly early time, not later than Alexander's time, but how much earlier it is not possible to determine yet, for want of materials. It has farther to be remembered that there is absolutely no reference in Manu either to Greek astrology or Grecian coinage. If further examination fully bears out this contention, then naturally it will throw into confusion the chronology accepted as correct at present and it may turn out that all the arguments so finely spun out on the insertion of one or two Greek words may have to be wholly discarded and the existence of these words in those works accounted for in some other way as Buhler himself has pointed out in his Introduction to Manu, and Max Muller in his *History of Ancient Sanskrit Literature* (p. 170, reprint by the Panini Office, Allahabad). It should not be forgotten that all these works also—like the *Manu-bhāshya* and the *Nārada-bhāshya*—have passed through the reviser's hands, not once but many times most likely. The statement of Megasthenes that the Hindus administered law according to "memory" if rightly interpreted would show that he was using the word not in its general sense but in its special one of *Smritis*, works on Dharma Shāstra, and would thus prove that many of these works were recognised as canonical about the time of Alexander's raid into India.

The age of Yājnyavalkya himself and certain incidents of his life are, however, pretty well-known, from references to him in the *Shata-patha-brāhmana* and the *Brihadāranyaka-Upanishad.* He flourished long before classical Samskṛiṭ came into existence, in which language the *Smriti* is composed. The attempt to father the *Smriti* on this ancient Rishi in the opening stanzas is only a rhetorical devise very common among Samskṛiṭ writers by which they tried to gain a meretricious authority and age which would not have been their portion if they had depended upon their own individual merits and given the genuine historical facts in connection with these works. The *Smritis*, the *Purānas*, and

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

especially the *Tantras* are full of this long-invented literary trick and which has unfortunately so completely hood-winked the latter-day Hindus, who are such blind worshippers of the *shabda pramāṇa*—the written word, provided it is in Sanskrit!

With regard to the character of this Veḍic Rishi, it does not seem to have been a very estimable one, as portrayed in the ancient books, though intellectually he was one of the most, if not the most brilliant, man of his time, and an ornament of the Court of Janaka and almost a final authority on all doctrinal matters. The king held frequent disputations with him on the mystic meanings of the ritual practices. This was a weak point with the Rishi and "this fellow of a Rajanya" often posed him and he could not answer the questions. It was the Kshatriya Janaka that taught the Gupta-vidyā to the Brāhmana Yājnyavalkya, who was profoundly versed only in ritual mummeries (Sh. Br. xi. 6. 12). To begin with, he quarrelled so angrily with his teacher as not only to repudiate all his obligations to him, but attempted to crush him completely and wipe his name and fame off the face of the earth, by composing a new Veḍa himself which he gave out as having been given to him by the Sun-God. Max Muller's statement, that he felt so much animus against him and his charaṇa as to say in the 30th Adhyāya of the Vājasaneya Samhitā, where he gives a list of persons to be sacrificed in the Purushamedha, that the proper victim to Dushkrita or sin was Charakāchārya, the teacher of the Charakas (A History of Ancient Sanskrit Literature p. 179), is entirely beside the mark. The Mantra is an ancient one, occurring in the older shākhās of the Yajurveda and which not even the bold Yājnyavalkya could tamper with. Then again his covetousness, his love of disputation, his irascibility, his intellectual vanity, and finally his polygamous instincts and love of good living—(even though the Adhvaryu is prohibited from eating the flesh of ox or cow he would not desist, saying "I for one, eat it, provided

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

that it is tender". Sh. Br. iii. 1. 2. 2)—throws a queer light on the social life of those days, and shows that human nature was neither better nor worse than what it is to-day, and that there was quite as much Kaliyuga in those golden days of India's existence as to-day. His life can be matched any day in the India of to-day and for the matter of that, not only in India, but all the world over. Even Vidyāraṇya in his *Jīwan-Mukti-Viveka* (p. 45, Anandāshrama ed.) could not help noting these demerits of the 'great man.' But one great quality will cover a multitude of 'weaknesses,' as even modern history shows in the case of Bacon, Napoleon, etc; and Yājnyavalkya's learning must be his excuse for his demerits. And this is what Vidyāraṇya means when he says that though Yājnyavalkya suffered from many evil moods and even killed the Brāhmaṇa Shākalya, and was thus guilty of the sin of Brahmahatyā, yet he was not debarred from Moksha, because he was a knower of Brahman. We must also remember that the moral standard of one race or one time is not a universal criterion of what is right or wrong. Each people are to be judged according to the standard they recognise; as they come up to it or fall away from it, are they behaving rightly or wrongly.

Coming back to our Smriti, (which, by the way, like the Nārada, the Parāshara, and many other *Smritis*, is available in also a larger recension—the *Brihat-Yājnya-valkya*) we find it is composed in 3 chapters running to 1110 Shlokas in the polished classical anushtup metre, and mentions twenty earlier teachers of law, including Yājnyavalkya, namely Manu, Atri, Vishṇu, Hārīta, Yājnya-valkya, Ushanas, Angiras, Yama, Āpastamba, Samvarta, Kātyāyana, Brihaspaṭi, Parāshara, Vyāsa, Shankha, Likhita Daksha, Gautama, Shātātapa, and Vasishtha. In passing it may also be mentioned that the Garuda and Agni Purāṇas have embodied in them large portions of this Smriti. With regard to the number of Smritis, it is legion, and it is impossible to arrive at a consensus of

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

opinion with regard to the authoritativeness and authenticity of the majority of them. But it seems that 72 of these are fairly universally recognised, divided up into four groups of eighteen each. The Hindus seem to have a strange fascination for this number eighteen which is constantly cropping up, so that one cannot escape it anywhere. Fully twice this number of *Smritis*, however, is available either in print or manuscripts and nearly every one of these is quoted in one or the other of the Digests composed since the 13th Century, A. C. The *Nirṇayasindhu* quotes about 130 (*vide* Mandlik's Hindu Law). The *Vīramitrodaya*, however, recognises only fifty-one as authentic in his huge Digest. There are also two very old collections, going under the name of the *Chatur-vimshati-smriti* and the *Shat-trinshat-smriti* which summarise the teachings of twenty-four and thirty-six *Smritis* respectively, and thus seem to recognise as authoritative only so many and no more.

A more reasonable grouping, however, would be secured by discarding this artificial, arbitrary and late classification in groups of 18 each and adopting a more natural and likely one, namely that of assigning each Smriti to one of the seven groups into which they fall almost automatically. The seven groups would be (1) Metrical redactions of Dharma Sūtras. (2) Metrical redactions of Grihya Sūtras. (3) Composite metrical redactions of both, Dharma and Grihya Sūtras. (4) Secondary redactions of the metrical Smritis. All those works having *Vriddha* or *Brihat* prefixed to their names belong to this group, as also Vyāsa, Daksha, Devala, Atri, etc., that is, all those which contain no indications of connection with any Vedic School (Charaṇa). It would not be right to doubt their genuineness simply because of the imperfect and fragmentary condition in which we possess them at present. That they are ancient can be confidently asserted, because some of the verses quoted as from them in Commentaries and Digests are met with in them; and that they are mere fragments of one extensive work can be equally confidently asserted, for the

4

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

larger number of quotations are not to be found in the works as extant. (5) Later independent compilations, that is, works not basing themselves on some particular Smriti for their inspiration, but ranging over a large field and making their own selections from them, like the *Lohita Smriti.* (6) Sectarian forgeries like the *Brihat-Hārīta*, the *Vashishtha*, etc. (7) Supplemental Smritis, like Brihaspati, that this work was a *Vārtika* on Manu is the happy hit of Prof. Jally; *Kātyāvana Smriti* will probably be found to be similarly a *Vārtika* on *Yājnyavalkya.* In the case of a fair number of Smritis the part of the country in which they were composed or prevalent can also be ascertained; for some like Devala and Yājnyavalkya expressly state the part of the country in which they were composed, while those which are connected with some Charaṇa may very well have been composed in those portions of India where that Charaṇa was prevalent, still others give some internal evidence about the part of the country they were composed in. Some rough sort of time order for the composition of the various Smritis can also be compiled, by noting references either bodily to names of the other Rishis or merely to their special doctrines contained in these. Even Manu has had predecessors which any one, whose orthodoxy is not robuster than his common sense, can find out by a careful study of the work.

It is to be always borne in mind that the Smritis are works, which unlike modern Acts were never promulgated by the sanction and under the patronage of political authority and there were no pains and penalties and disabilities attaching to any infringement of the rules imposed by executive power as in modern days. These were works, written by Rishis, in the interests of, and for the guidance of other Rishis and not under the prescription of kings; as also for the Kshatriyas, who too had attained to the position of a privileged caste, by the protection and help they gave to the Brāhmaṇas. The mass of the population were considered so low in the scale of humanity as to be put on a level

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

with beasts, and it was scarcely 'good form' for these great personages to trouble themselves with regard to their laws and customs. The contradictions of which the Smritis are full, are mostly due to the necessity under which their redactors were of preserving, as far as possible, all the old work and introducing all the newer legal speculations into the body of the works; and finally the inability and also unwillingness of the later commentators to distinguish between these two sources of confusion and also their firmly rooted theological prejudice, which made them regard all these as divine, and made it impossible for them to take into account the differences due to the varying *dates* of their composition and the various *localities* in which they were composed. The attempt of the commentators and the digest-writers to deduce a coherent and mutually uncontradictory set of laws binding on *all* Hindus has been a dismal failure and a woeful waste of vast and intricate but misapplied learning.

There are some points of similarity between the best Greek culture and the culture outlined in the *Smritis*, and a comparative study of the two would be very suggestive and fruitful. For there is nothing so provocative of thought and destructive of age-long prejudices and ruts formed by the endless passage of close human aggregations, as a comparative study of the religious, social, and political institutions and ways of thought that have given birth to these various modes of human activity. Self-centred smug complacency gets effectually startled and disturbed, never more to be re-established. To begin with, both these civilisations were based on slavery and on the utter callousness and indifference even to the elementary needs of all below the caste of the elect, the privileged few. The mass of the people counted for not. A condition of affairs far from unknown even in this twentieth century after Christ; witness the treatment meted out to the non-whites by the colonising whites all over the world. Again neither the ancient Greek

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

nor the ancient Hindu was a worshipper at the shrine of vulgar, gross, materialistic success as the Englishman is, to whom super-abounding wealth and social rank is something almost divine to be bowed down to in abject obeisance.

The points of dissimilarity are no less instructive. The Hindu culture was spiritual, unæsthetic, ascetic, regarding the cult of the beautiful with the greatest horror possible, as something of the devil, soul-enslaving. The Greek on the other hand was vibrant with life, sensuous, artistic, anti-ascetic, full to overflowing of the cult of the beautiful, keenly responsive to all that a highly cultivated intelligence can extract from the world. In both the 'elect' were given up to a ridiculous estimate of themselves and of their unique importance for the maintenance of social order; but notwithstanding this ludicrous over-valuation of their own importance in the life of the world, there is an almost inexplicable difference in their mental constitutions. The Greek was restless, alert, sceptical, an individualist, ever open to new ideas and a hater of abject formalism; while the Brāhmaṇa with his heavy inaccessibility to ideas, his tedious and often grotesque formalism and ostentatious orthodoxy whose terrible and paralysing tyrrany we, who are born in India, realise only too well, was an exact counterpart of the ancient Jew and the modern British Philistine.

I may be permitted a digression here on the meaning of the three important words Purāṇa, Nyāya, and Mīmānsā, as three of the fourteen sources of the Sciences and Dharma, mentioned in all the Smritis and occurring in the third verse of Yājnyavalkya. As commonly interpreted these three words are taken respectively to mean the many (over sixty in number) Purāṇas ascribed to Veda-Vyāsa, the Nyāya of Goutama and the Mīmānsā of Jaimini. I respectfully submit that notwithstanding a universal consensus of authority for the meanings as given above, there is reason to suppose that the Smriti writers had no such meaning in their minds. To begin with, the word Purāṇa is used in the singular, while the

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

word Veda is used in the plural, thus denoting all the four. Surely there would be less chance of a misunderstanding about the number of the Vedas than about the number of the Purāṇas. At the most this refers to one single original Purāṇa. This is also the tradition as embodied in the Purāṇas themselves. For instance, the *Brahmāṇda* and the *Vāyu* explicitly state that Vyāsa composed only one Purāṇa, which he taught to Sūta, and he composed one more and his disciples composed some more, and so on. This clear unequivocal statement was somehow missed by the late Mr. Jackson, who has thrown considerable light on the problem of the numberless Purāṇas in his article on the subject in the Centenary volume of the journal of the Bombay Branch of the Royal Asiatic Society. He has made out a very strong case for a single original Purāṇa based on other grounds than the one given above. Then again the two words Nyāya and Mīmānsā are used by a large number of recognised Samskṛiṭ writers and Mīmānsakas indiscriminately for Mīmānsā. Besides, in those ancient days, the Nyāya of Goutama had not risen to the prominence it attained in the post-Buddhist period, when it became necessary to develop it for purposes of disputations with the Buddhists against whom Mīmānsā was powerless, for they cut off the ground from under the feet of the Mīmānsaka by denying the authority of the Vedas. An ancient Smriti writer is not likely to use two words to indicate one single subject, especially when he was aiming at conciseness. If the objection is urged that the word Ḍharma-Shāsṭra is also used in the singular, it is easily refuted by pointing out that it is not the various *works* on Ḍharma-shāsṭra that are indicated there as the *substantive law* itself. For otherwise, there would be no necessity for enumerating the twenty law books in shlokas four and five. No such enumeration of the Purāṇas is made, and no other Smritis either make any such enumeration. I humbly submit, therefore, that all this is due to a total misapprehension of the meaning of the early writers by the later commen-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

tators and which unfortunately has worked endless mischief, by elevating the Purāṇas to a place of equal authority with the Vedas and the Smritis. Numberless forgers have been at work not only on the original single Purāṇa till the number has risen to over sixty, but also on the various copies of these, so that we find to-day that the variations in readings and the omissions and additions in the manuscripts of these are endless—reducing the whole mass to a state of utter unreliability, and by quotations from which any and everything between Heaven and Hell, the most grotesque, the most irrational and diametrically opposed, can all be bolstered up.

I would suggest, therefore, that we cast aside the meanings given to these words by prescribed authority and try to find out for ourselves what they meant to the Rishis. I believe the three words meant nothing else than Precedent (Purāṇa), Equity (Nyāya), and Exegesis, Interpretation of Statutes, (Mīmānsā). Interpreted thus we at once perceive the full reasonableness of the statement, and how it correlates the ancient system of dealing out justice to the modern methods of adjudication. We need not be startled into a repudiation of the meanings assigned above solely on the ground of their being so modern! Development of legal doctrines is not always continuously progressive, it is a good many times regressive also!

Mitāksharā.

Of the many commentaries on the *Yājnyavalkya Smriti*, five complete ones only are available yet, namely, Aparārka (printed in the Ānandāshram Series, Poona), Mitāksharā (often printed, and also translated in Hindi, Marathi, and English), the Vīramitrodaya (I possess a complete copy of all the three chapters and it is going to be printed soon by my friend R. B. Srish Chandra Basu) by Mitra Mishra, and earlier than the huge Digest of the

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

same name and by the same author, that of Vishwarūpa (the *Dāvabhāga* portion of which was printed in Madras some years ago with an English translation, and recently the whole of the Vyavahāra has been printed by Mr. S. S. Setlur in his edition of the *Mitāksharā* with the Vyavahāra portions of the *Subodhini* and the *Bālambhatti*; while a complete and more correct edition is being brought out by Mr. T. Ganapat Shastri in the Trivandrum Sanskrit Series), and the very brief Dīpa-kalikā of Shūlapāṇi, the author of a large Digest, six chapters of which namely, the *Prāyashchitta Viveka*, the *Shrāddha Viveka*, *Āchāra Viveka*, *Sambandha Viveka*, *Tithi Viveka* and *Vratakāla Viveka* are available.

If the existence of commentaries were to be accepted as the sole test of the authenticatedness, popularity and authoritativeness of a *Smriti*, nearly all the 150 odd Smritis would be put out of court. The only other *Smriti* which emerges triumphant from such a test is of course Manu. Nārada seems to have been most unaccountably neglected, for Asahāya has had no successors, can it be because of the extra large amount of Civil matter in it, so distasteful to the theologian-commentators? Parāshara and one or two others can scarcely count seeing how late they were in securing commentators. This great paucity in the existence of commentaries on even twenty or thirty of the universally accepted *Smritis* is a great hindrance in settling accurately their original texts; the only help available being of a very secondary nature, namely of the numerous Digests, all compilations of the fifteenth and later centuries.

We here are concerned only with the *Mitāksharā* and its author Vijnyāneshwar. The full name of the work as given in the colophon of the work by the author himself is *Riju-Mitāksharā*. Further in a number of Shlokas the author praises his patron the King Vikramārka of Kalyāṇa, gives his own father's name as Padmanābha Bhatta Upādhyāya of the gotra of Bharadwāja, his own social condition as that of a Sannyāsin, the name of his Guru as Uttama-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

pāda, his name as Yogī Vijnyāneshwar, and eulogises the overpowering might of his patron whose rule extended up to the Eastern and the Western Oceans and the Rāmeshwaram in the South and the lord of the mountains, *i. e.* Vindhyāchal—the dividing line between Northern and Southern India,—in the North. His date according to Buhler (J. B. B. R. A. S. 1868) would fall in the reign of the third king of that name, known through his inscriptions, ranging between 1076-1127 A. C. It is impossible that the first Vikramāditya could be meant, seeing that our author is a good deal later than Kumārila and Shankarāchārya (7th and 8th centuries A. C. respectively), who preceded these authors by several centuries; nor can it very well be the second, for he was a contemporary of Bhoja of Dhāra and this Bhoja is freely quoted in the *Mitāksharā*. It would be against Indian literary etiquette and against all principles of political loyalty that a contemporary author should be quoted as an authority especially when that author happens to be a neighbouring sovereign (for Bhoja's Kingdom Dhāra, the modern Mālwā, was bounded on the South by the Vindhyāchal ranges) and more likely to be an enemy than a friend; the inevitable rivalry between Kalyān and Ujjain, the capitals of the respective kingdoms, could not have permitted very amicable relations between the dependents and subjects of the rival kings. Finally, positive proof is forthcoming to show that there was no love lost between the two neighbouring kingdoms and that the potentates were constantly at war with each other. Bilhaṇa the court-poet and historiographer (*Vide* Buhler's ed. of the *Vikramānka-Deva-Charit*, in the Bombay Sanskrit Series) gives a glowing account of one of the wars in which the father of Vijnyāneshwara's patron invaded and ravaged Bhoja's kingdom and captured the capital. The third king of that name reigned from Shaka 998 to 1049 and was known as Kali-Vikrama and in the vernacular as Permadi-rāya and was the most powerful Chalukya King, and it is to this King only

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

that the author's praise can apply. Some farther light is thrown on the subject in West and Buhler's "Digest of Hindu Law" 3rd ed. But all the above-mentioned sources of information have become out of date and to some extent inaccurate owing to the fresh discoveries, since those days, of Archæological records and inscriptions. All these have been fairly well summarised by Mr. A. Venkataram Aiyer in his pamphlet "The Life and Times of Chalukya Vikramāditya vi", which was presented to the Madras University as his M. A. thesis. It will be seen that while Buhler is substantially correct in his statements, new discoveries correct him in two essential points. The first is that the king is not the 3rd but the 6th of his line, and the length of his life was almost 95 years, he was about 45 when he ascended the throne by killing his eldest brother, who was the reigning sovereign at the time. Later he killed his younger brother also. In this he resembled Aurangzeb of a very much later day; and also like him he was very pious and a great stickler for religious forms; his life was longer than Aurangzeb's by some years, though both reigned for nearly fifty years and both spent the larger portion of their lives in wars. The Hindu king, however, was a very much married man which the Moslem Emperor was not.

Kalyan, his capital still exists near Bidar and is in the Nizam's Dominions, being about a hundred miles from Hyderabad. It is a great pity that in this premier Indian Feudatory state there is no well-organised department for Archæological research and for the search of Sanskrit and Vernacular manuscripts; large numbers are sure to be in hiding in this large state covering as it does eighty-two thousand square miles.

Buhler's contention that Colebrooke is wrong in his statement about the author having been a follower of Shankarāchārya, is due to a total misapprehension of the theology of this great Vedantist teacher and reformer, very strange for a scholar who is generally so sound in his views. Shankarāchārya was first and foremost an advaita vedāntin

5

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

and to him Shiva and Vishṇu are both equally equal and both equally illusory—māyāvic. His hymns praise both, he is no sectary. It should also be borne in mind that Dwārkā, his pontifical seat, is a place sacred to Krishṇa and full of Vaishṇavism. If Buhler had paid any attention even to the colophon of the work, he would have been preserved from being betrayed into this curious error. It will have been noticed that really much less is known—except as to date—of this comparatively late author, compared to what is known about the life of the Vedic rishi Yājnyavalkya.

Schools of Law.

It would be helpful for future discussion to say something about the modern English-education-engendered notion about there being seven different and often conflicting 'schools' of Hindu law having 'territorial' authority. This is not the view of the Paṇdits. They hold that in all essentials Hindu law is one and the differences are not deep-seated or radical, except in one or two points. At most they recognise a Northern and a Southern School, that is to say, the old division of Pancha Gaudas and the Pancha Drāvidas, and even here, because of the Vedas being the primary fountain of all law, the differences arise over minutiæ and not over deep-lying essentials. All commentaries and all digests are equally authoritative and they are all consulted; of course there is a little leaning towards one or the other, but there is no such thing as complete exclusion. An investigation into the history of the law books would show how untenable is the modern position taken up with regard to their territorial jurisdiction, and which unfortunately has been so loudly and persistently promulgated these hundred years and more, that even the Paṇdits are beginning to forget their old traditions and are falling into line about this idea. Take this *Mitāksharā*; it was composed in far away Deccan among the Kanarese speaking people and has been made by our English rulers the law of Northern India. The *Mayūkha* was composed at the instance of a petty Chief of Bundelkhand

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ancient Chedi) by a Benares Paṇdit and it has been made the law of Gujerat. It has not yet been ascertained who Jīmūtavāhana was, what part of the country he belonged to, or what was his date. If a complete copy of his *Dharma-ratna* (of which the famous Dāyabhāga forms a part) is ever discovered it will throw light, it is expected, on all these points. Now if the 'territorial' idea of the law books has any substratum behind it, should not then the works composed in certain geographical areas be of binding authority in those areas? Every day cases come up before the British law courts where the enforcement of this territorial-jurisdiction-notion works endless mischief. I will give an instance which was told me by a sub-judge in the Presidency of Madras. When he was posted in Bellary he had to decide a case about an adoption, and much against the grain and with the feeling that while meeting out justice according to the letter of the law, as he felt bound to do, he was really and substantially thwarting justice; the case was a hotly contested one and went up in appeal to the Madras High Court and of course was upheld. As the sub-judge remarked, for the sin of being born a few yards on the wrong side of the Provincial boundary, the *Mayūkha* law of adoption would not apply but the *Mitākshharā*, however great the hardship; while members of his caste on the Bombay side of the Tungbhadrā river continued to be governed by the *Mayūkha*.

The fashion of dividing the Hindu Law books into "Schools" and assigning them territorial Jurisdiction was started by Colebrooke in a letter to Sir Thomas Strange (*vide* Colebrooke's Life by his son) and since then it has become an accepted canon of Anglo-Indian jurisprudence. Nobody seems, however, to have taken the trouble to put side by side the many and varying dogmatic assertions made by the writers on the subject. It would probably come as a surprise to most modern lawyers to be told that there is no such thing as a concensus of opinion on this point which is the very basis of the administration of Hindu Law. It would

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

take me too far afield to attempt a complete history of the idea, but I shall just note one or two points. Morley in his Analytical Digest gives as authoritative in Bengal the three Digests namely, the *Vivādārṇava Setu* (Halhed's Gentoo code A. C. 1781), the *Vivāda Sārārṇava* and the *Vivāda Bhangārṇava* (Colebrooke's Digest A. C. 1797). Then again the *Parāshara Mādhavīya* and the *VivādaTāṇḍava* are foisted as binding in the Benares " School." The Dravid "School" has been subdivided into three, and the *Saraswatīvilāsa*—an Orissa compilation—is alleged to be authoritative in all the three. Such are the vagaries of the creators of the mutually exclusive "Schools of Hindu Law". For a wonder Kashmere, Nepal, Rajputana, etc. have escaped the ken of these gentlemen and of having authoritative and binding law books imposed on them.

To say that there is historical basis for the doctrine of "Schools" of Law is to make a statement for which no proofs are forthcoming. The assertion that as a great many of the Digests and Commentaries were composed by the orders of ruling chiefs and that, therefore, they ought to be binding on the people, conveniently ignores two unsurmountable objections namely, that there are a great many Commentaries and Digests which have *not* been composed by the orders of any political authority nor are they recognised as binding in any special locality, as I point out above the *Mayūkha* and the *Vīramitrodaya* were composed in Bhareha and Orchha, both principalities situated in Bundelkhand and of very limited territorial extant and the *Mitākshara* in a far off corner of the Bombay Presidency. If territorial jurisdiction is to be the criterion then the little known *Todarānanda* compiled under Akbar's orders by his famous finance minister Todar Mal ought to be the law for the whole of India that acknowledged Akbar's away. The Digests were compiled not so much to meet any actual necessities of the case but mostly for the self-glorification of either the independent Brāhman Paṇdit or of the chiefs, and to provide an outlet for the

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

energies of the court Paṇḍits who were left very much to their own devices and ideas of what was right and wrong uncontrolled and undirected by political authority; each Digest mirroring the particular idiosyncrasies of its compiler as any one may convince himself by a comparative study of them. It requires no pointing out that not a single one of these works is wholly and absolutely followed anywhere. Every community, every province picks and chooses what it will follow and what it will not, from the whole mass of these.

Bālambhatti.

Of the many commentaries on the Mitāksharā most of them are known only by name for instance, those of Vājpeyin, Madhusūdan Goswāmi, Rādhā Mohan Sharman, Mukundalāla, Halāyudha Bhatta etc., and it is more than likely that the Catalogue entries with regard to these are inaccurate, as they give no quotations from the beginnings and ends of the manuscripts. The commentaries, however, of Balambhatta, Nanḍa Paṇḍita and Vishweshwara Bhatta are available. Of the earliest of these, that by Vishweshwara Bhatta, a Telegu Brāhman, the chapter on *Vyavahāra* has been printed recently in Madras by Mr. S. S. Setlur, and in Bombay by Mr. J. R. Gharpure and his colleagues. That the *Āchāra* and *Prāyashchitta* portions were also composed is certain, for I was shown a fragmentary MS. of the third chapter of *Subodhini* extending to about one-third of the *Prāyashchitta* portion of the *Mitākshara*. The second in point of time—the *Pramitāksharā* of Nanḍa Paṇḍita—was probably never completed, for the MS. in possession of his descendent Paṇḍit Nāgeshwar Pant Dharmādhikārī, Professor, Government Sanskrit College, Benares, extends to about a little more than one-third of the *Āchāra* portion of the *Mitāksharā*. The latest, the largest, and the completest commentary is the Bālambhatti here printed.

One fact in this connection is rather noticeable. It is this, that the *Mitāksharā* is the only commentary that has been

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

commented on in its turn. The earliest known commentator is the Telegu, Vishweshara Bhatta, son of Peddi Bhatta who also later composed his digest the *Madan Pārijāṭa* (printed in the Bibliotheca Indica) under the patronage of King Madan Pāla of Digha in the 15th century A. C., and from whom probably the present Maharaja of Bharatpur traces his descent. Why this work was selected to the exclusion of fuller and better works like *Aparārka* is hard to say. May it be because it was a briefer work and so easier to copy while also its very brevity made it obscure and incomplete and hence one requiring exegesis? Once such a work began, there would naturally follow a host of imitators. But because of the fact that it was one of the first works made available in English and that too by such a genius as Colebrooke, the other works never had a chance.

Bālam Bhatta was a contemporary of Colebrooke and it is quite likely that he was stimulated to write his Commentary on the Mitāksharā, by the fact that the English were beginning to take so much interest in Hindu law as not only to attempt translations of the existing works, but also to commission learned Paṇdits to write independent Digests under European guidance and protection. It might well be claimed for this work that it is the last comprehensive treatise on Ḍharma Shāstra. It was composed independently of any patronage either.

One of the main reasons for founding the Government Sanskrit College, opened on the 28th October, 1791. A. C., was the necessity of coming into more direct touch with the hereditary custodians of Hindu law and of getting together a library of all those books which would be easily available to the non-Brāhman public. There was also the necessity of getting a regular supply of Paṇdits trained in Hindu law as advisers to the English Judges, as Musalmān Kāzis were already attached to the Courts for purposes of advising on Moslem law. The History of

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

the Sanskrit College printed at the Government Press, Allahabad, is a valuable and instructive document and well worthy of a careful study by all those interested in the social life of the great Benares Paṇdits of those days and of the ideas and purposes of the British Government in founding the College. It is one long woeful record of the misbehaviour of these learned gentlemen, and if tradition speaks true, it is a very moderate account of the things that used to happen. The first Principal of the College, Kāshīnātha Shastrī Bhattāchārya, a Bengali Paṇdit, is described as "the greatest villain" going! One wonders at the ability of the Managing Committee of the College which, composed as it was, of all the high English officials about the place, could only hit upon such a notorious character to give the tone to the newly started enterprise! In fact, not unlike the Medieval monks of Europe who not unoften combined a great deal of ecclesiastical learning with much more than their fair share of worldly rascality, these great Paṇdits were an astounding mixture of vast learning and vaster hooliganism.

A few concrete examples of the behaviour of the Paṇdits and their Vidyārthis would help to explain the above rather startling assertion. When the famous Jagannātha Paṇdita-rāja, so well known for his rhetorical and poetical gifts and equally for his bubbling vanity, (he abuses the even more famous and certainly more learned Paṇdit of South India, Appaya Dīkshita, as a *lamba-karṇa*, long-eared gentleman) came to Benares with all the paraphernalia of an Āchārya of the Rāmānuja sect, with torches burning at mid-day in front of his palankeen, carried crosswise blocking up the narrow lanes, he was mercilessly assaulted, beaten with shoes, his torches put out, and his palankeen smashed by Hari Dīkshita and his pupils headed by Nāgesha, who lived to become so famous as the indefatigable writer of endless works on Vyākaraṇa, Sāhitya, Ḍharma-Shāstra, Purāṇa, and the Darshanas. The offence of Jagannātha Paṇdita-rāja,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(who was a co-disciple of Bhattoji's he too being a pupil of Shesha Vishweshwara of Benares) was that he wrote a critique on the *Manoramā* of Bhattoji Dīkshita, the grand-father of Hari Dīkshita, and gave it, according to his wont of insulting any and everybody, the very offensive and vulgar title of *Manoramā kucha-mardana*. Coming down to the 19th Century A. C., we see similar things happening. The great Sāraswata Paṇdit, of exquisite simplicity of character, and the author of the well-known commentary on the *Ātma-Purāṇa* —Kākārāma—when he was once on his way back from his morning bath in the Gangā, was assaulted by persons, who had been worsted in a discussion and who made a necklace of old shoes and put it round the neck of the Paṇdit. A nearly similar fact overtook the great modern reformer, revivalist and reactionary, Swāmī Dayānanda Saraswatī, when he first came to Benares to preach to stiff-necked orthodoxy, a usage coming down from hoary antiquity, as we gather from the examples of Buddha, Jina, Shankara, Kabīra, and a whole host of teachers and reformers, all trying to capture Kāshī. No body would give even a place for the learned Sannyāsin to sleep in till my father hearing of his plight came to his rescue and put him up in one of our garden-houses and also arranged fo[illegible] *shaāstrārtha*. The time honored inevitable [illegible] and instead of arguments and proofs, brickba[illegible] of at his head and, but for my father's prompt [illegible] of a large number of retainers, the Swāmī w[illegible]ment escaped with his life. Durgā Ghat is a place notoriou[illegible] Benares for the rowdyism that flourishes on the bank[illegible] river there and many a famous Mahārāshtra P[illegible]ndit like Kāshīnātha Shāstrī and others of those days used to confute the disputatious pre-eminence of some other Paṇdit by the stern and irrefutable logic of their stronger fists! In fact in the freer and more spacious life of Benares, before *Pax Britannica* killed out all illegal outbursts of physical energy, the place was no better than the Continental and English University

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

towns where "town and gown rows" and duelling have flourished since the very beginning. The literary man, all the world over, is a vain and jealous creature, and, with a student following of high spirited young men, unburdened by sickly reflection, what else can be expected, but such an outlet for their superabounding physical energies.

Nearly a hundred years ago, in the preface to his translation of portions of the *Mitākshara*, Colebrooke called attention to the importance of the work under publication for the interpretation of the *Mitākshara*. The cheap sneer which Messrs. West and Buhler in the Introduction to their *Digest* indulge over the work and its author by saying that "her opinions are held in small esteem.............. Her commentary is generally considered as a performance highly creditable to the female intellect, but as showing a good deal the author's intellectual petticoats", is all due, I fancy, to their belief that the wretched author was not a lordly male, but only a poor woman who had no business to meddle with such serious subjects as law! At any rate this is not the opinion of the Paṇḍits, who rate the work very high. What is most likely is, that Messrs. West and Buhler misled by the fictitious authorship of the work did not examine it as carefully as they ought to have done before pronouncing their [illegible]rdic[illegible] During all this time, however, no attempt has been and [illegible] h the work, nor was the task of collecting even m[illegible] sy one; it took me nearly ten years to get South [illegible] essary manuscripts for a critical edition g[illegible] succeeded, however, in securing five manuscripts [illegible] a, six of the *Vyavahāra*, and one of the [illegible] ection. The existence of two more manuscripts [illegible] ame to know of later. The two manuscripts of [illegible] *yavahāra* section belonging to Colebrooke and deposited in the India Office Library I was not able to secure. The examination of MSS. collected has led me to the conclusion that there are two distinct recensions of the work, the later one being the more correct and valuable, as embodying

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

the author's maturer views. It would perhaps be more correct to regard these as two "editions." When the first was under preparation, pupils and friends were allowed to take copies, all of which may be said to represent the "first edition." After the whole work was completed the author, in course of revision, made large additions and some small changes. This process can be accurately studied in the *Āchāra* portion of the manuscript belonging to H. H. the Maharaja of Benares which seems to be almost certainly an autograph copy. In the present edition, it is the later and the improved recension that has been invariably followed.

The work is of very unequal merit. The first, the *Āchāra* portion, comprises 17,000 *shlokas* ; it is a commentary only in name ; it is practically an independent digest covering all the ground covered by the original, and much more. The original was made merely a peg on which to hang his own vast learning. The second, the *Vyavahāra* portion, comprising 10,000 *shlokas*, is extremely well done ; it is a word for word commentary explaining the whole of the text lucidly, shirking no difficulties ; the author has even ventured to criticise the conclusions of such a standard work as the *Vīramitrodaya.* One point that will specially appeal to the modern student is that the author carefully discusses different readings, and is successful in arriving at a definitive text. This is a rare merit in a Hindu writer, who avoids even the mention of a different reading. The third, the *Prāyashchitta* portion is rather poor ; it comprises 8,000 *shlokas* ; the author apparently felt that he had fully discharged his duty to the original and to the public when he completed the *Vyavahāra* portion ; and he did this last section more for the sake of giving completeness to the work than for adding any further useful information.

Bālam Bhatta was a pupil of the famous Nāgesha and like his master a very prolific writer also. I know of ten works by him, namely his commentaries on six grammatical

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

works—the *Paribhashendu-shekhar*, the *Laghu-Shabdendu-shekhar*, the *Laghu-Manjūshā*, the *Laghu-Shabda-Ratna*, (all these are complete and expound the whole works), the *Shabda-Kaustubha* and the *Vivaraṇa* on Kayyata (on these two he has commented only up to the Navāhnika). There is a tradition also that he completed the *Shabda-Kaustubha* of Bhattoji Dīkshita, who died while composing the fifth chapter (there is a copy of the fifth chapter in the Palace library of H. H. The Maharaja of Benares), two Dharma-shāstra works, namely his commentary on the Mitāksharā—the Vyavahāra chapter of which is printed here—, and a voluminous commentary on the Kāla-Mādhava, and two on rhetoric, namely commentaries on the *Kāvya-Prakāsha (Udāharaṇa Chandrikā)* and the *Kāvya-Pradīpa*. His parent's names as given by him in his grammatical works are Mahādeva and Veṇi. His wife's father was named Mahādeva Dīkshita, his father Gaṇesha, and his father, Krishṇa. They were Kherade Mahārāshtra Brāhmaṇs of the Mudgala Gotra. The superlative adjectives describing this Mahādeva as a person honored by kings and as a person well-versed in the meanings of the Shrutis and Smritis and knowing the Veda by heart in all its intricacies of Pada, Krama and Jatā—three out of the eight modes of recitation—are scarcely more than mere poetry meant merely to please his wife, coming as they do ostensibly from her pen in praise of her father! Everybody knows that the Vaidikas, that is to say, the knowers by heart of the Vedas, are as a rule illiterate folk, and that all their energies are taken up in memorising the whole vast mass of the Vedic literature belonging to their own Shākhā. I have known Vaidikas in Benares who knew by heart all this mass running up almost to the extent of one hundred thousand Shlokas. In fact these people serve as living store-houses in the same way as the slave ants do in some of the ant communities in whose bodies honey is stored up for the use of worker ants, who go up to these torpid and bloated living 'sacks' from time to time to

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

renovate their energy by licking them. All this oratorical flourish about the greatness of his father-in-law when reduced to its proper proportions by being shorn of its rhetorical encumbrances really means nothing more than that he was a well-trained Vaidika. He gives his wife's name as Lakshmī, the reputed author of the work here printed, as also of the commentary on the Kāla-Mādhava.

The question why the work is ascribed by him to his wife Lakshmī Devī is hard to answer satisfactorily. That the work was not actually written by the lady is clear both from internal evidence as also from the Benares tradition about the authorship which regards the work as Bālam Bhatta's and not of his wife. In the portion on *Āchāra*, while commenting on a grammatical point, the author forgot to keep up the fiction and quotes from one of Bālam Bhatta's works as his own. Perhaps the very unusual colophon which is a sort of *Smāraka*—in memoriam—,as it mentions Lakshmī Devī as the mother of Bāla-Krishṇa, may serve to explain the ascription of authorship to his wife; it was to console his wife for the death of their son that he composed the two *Dharma-Shāstra* works in her name, and so to say dedicated them to the memory of a beloved son. But be it remembered that all this is mere speculation and surmise. The one little point that helps to strengthen this surmise is that in the genealogical table which is given below, and which has been given to me by Nārāyaṇa Shāstrī Payaguṇde, it will be noticed that no mention is made of Bāla Krishna, who most likely died very young and unmarried.

Neither the birth-date nor the death-date of Vaidyanātha Bhatta Pāyagunde, commonly known by his pet name of Bālam Bhatta can be ascertained accurately to-day. It is not known to his descendants, one of whom I questioned on the point. But his time can be fixed very accurately from a note in *The Paṇdit* of January 1st, 1873 A. C., p. 185, on the life of Mahādeva Swamī by Professors Bechan Rāma Tripāthī and Shītala Prasāda Tripāthī of the Government Sanskrit Coll-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ege. According to these gentlemen, the subject of the note who was born in Samvat 1833 (A. C. 1776), became, when he was sixteen, a pupil in grammar of Bālam Bhatta, that is to say, in A. C. 1792—the year after the Government Sanskrit College was opened. According to information supplied to me by the learned librarian of the Government Sanskrit College, Paṇdit Vindheshwarī Prasāda Dvivedin, his father Paṇdit Devendra Datta Dvivedin came to Benares in Samvat 1886 (A. C. 1829) and he often used to meet Bālam Bhatta, who, though a very old man then, was still teaching pupils as of old, at the Gaibi—a semi-jungly place with fifty-two hillocks and fifty-two pools, behind the Central Hindu College; and a famous natural park and morning and evening resort for the people of Benares. The tradition is, that he lived to be over ninety. His Mitāksharā commentary must have been written before the close of the 18th century, A. C., for Colebrooke in his preface to his translation of portions of the Mitāksharā (1810, A. C.) refers in high terms of commendation to the work, and calls it a "modern" work. We might safely then fix his birth and death dates between the years 1740 and 1830, A. C., assigning him about 90 years of life.

The table of descent runs thus—

Bālam Bhatta (wife Lakshmī Bāi)
|
Rājārāma (wife Bachchī Bāi)
|
Baijnātha [adopted son of Mainā, daughter of the above mentioned Rājārāma and married to an ancestor of Nāgeshwara Pant Dharmādhikārī of the Government Sanskrit College), known by the pet name of Bhattoo Shāstrī. He was thus a *putrikā-putra.*]
|
Gopāla Shāstrī (wife Rādhā Bāi)
|
Nārāyaṇa Shāstrī and Dāmodara Bhatta (both alive).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[Since the foregoing was sent to press, I was searching for some definite statements about Colebrooke's relations with the Pandits of Benares. From the Preface to the *Digest* which is dated from Mirzapur, I naturally inferred that being so close to Benares he must have had dealings with the Pandits of that place occupied as he was with investigations in Hindu Law. I therefore turned to his *Life* by his son for light on the point. According to the *Life*, Colebrooke who was posted at Rajshahi at the time of the death of Sir W. Jones in 1794 was entrusted by the Governor-General Sir John Shore with the work of translating the *Vivādabhangārṇava* of Jagannatha, as he was the only person then in the East India Company's service who could be trusted to do the work, which as originally arranged was to have been done by Jones himself. To enable Colebrooke to do the work satisfactorily, he was posted to Mirzapur where he would be within easy reach of the newly started Sanskrit College and the Benares Pandits (*Life* p. 78). He was posted as Judge there from 1795 to 1801. He soon established relations with the Benares Pandits and dissatisfied as he was with Jagannatha's work, he started the compilation of a supplementary Digest and subsidised some of the Pandits of Benares for the purpose, at the expense of the Government (p. 211), and hence he regarded it as a matter of duty (p. 212) which he was bound to see completed. He found however that he could not get the Pandit to work with the necessary speed and he complains of his great dilatoriness. He writes in a letter dated 24th July 1800, "the venerable old pandit employed by me at Benares has supplied me with so little text, that I have set about the compilation myself from the books I brought with me" (p. 135) Again in a letter dated January 10th 1801, he writes "My compilation and translation (for I execute both tasks) of a supplementary Digest advances well". (p. 138).

Neither the original nor the translation of this was ever completed. The translation was among the papers of

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Colebrooke and is in the possession of his son (p. 275) but not the original, and which I believe is no other than the *Mss.* numbered 1535, 1536, and 1537, in the India office library. Two statements however in the *Life* namely the reference to the "venerable old Pandit" and "the supplementary digest is ready, as far as the compilation of the work goes, but the translation is not so far advanced as I could wish" (Letter dated 9th June 1806, p. 226) set me investigating farther. It struck me that all these original Sanskrit texts must have been deposited by Colebrooke with his other *Mss.* in the India Office library, and so it turns out on looking into the catalogue. I give below the results which though clearly given by Dr. Eggeling have strangely been missed so long. It brings out the fact that Bālam Bhatta was in direct relations with Colebrooke having been employed by him to prepare another Digest, and it was no other than he who was his "venerable old pandit" referred to above. Incidentally, the notice of this work, number 1507 p. 458 of the catalogue, raises important questions, namely the age of Bālam Bhatta; who was Bāla sharman Pāyagunde; and why Colebrooke failed to discover in the author of the *tikā* on the *Mitākshara* his whilom employee of the uncompleted Digest (*vide* Colebrooke's preface to his translation of the *Mitākshara* 1810), Prof. Eggeling's note after describing the *Mss.* goes on to say "*Dharmashāstra Samgruha*, a portion of a digest of Civil Law which was to have been compiled, for Colebrooke, by *Bāla Śarman Pāyaguṇda* (then eighty years of age), son of *Vaidyanātha* and *Lakshmī*, assisted by three other Pandits, but was left incomplete." "The margin of fall. 1 and 2 has the following note in Colebrooke's handwriting (with slight alterations of spelling):—

"1st May, 1800. The first sheets were received from *Bāla Sarma Payagunda* on this date.—This is little else but the *Viramitrodaya* revised. As it is a scarce book and very little known, Bālasarma and his pupil *Menudeva* (*sic.* the correct spelling is *Mannudeva,*) did not suspect I could detect

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

the plagiarism. But as *Mitra Misa's* works is far better than the *Pāyagunda* is capable of producing himself, there is no reason to regret this imposition. I shall nevertheless pay him the promised reward and continue his monthly establishment until the work be completed and the reward be delivered to him. After the experience I have had, that no Pandit is capable, (or adapted by his habits of thinking) to compile a digest in the form I require, I must now seriously set about compiling it myself. I shall take the arrangement of this compilation for the basis; because the public have, no doubt, more confidence in the Pandits than in me. 3rd May 1800 H. C".

It seems that Colebrooke could not stand very much longer the combined forces of such bare-faced plagiarism with extreme dilatoriness and worse still, the temperamental incompetence heightened by the orthodox old world ways of training, and so the unsatisfactory relation was soon brought to a close. But though Colebrooke did actually start compiling a digest himself, the feeling that the public would not repose a similar amount of confidence in him to that which they would in one of their own hereditary expounders, led him to renew the attempt and this time with much greater success. He commissioned Chitrapati a Maithila Pandit and he completed the work in *Shake* 1728 (A. C. 1803), and it is with reference to this work that he writes to his father in his letter dated from Calcutta June 9th 1806 that the compilation in Sanskrit is ready and again in a letter to Sir Thomas strange bearing the date of 31st March 1823 he writes. "The Supplementary Digest, which I long ago announced, has been many years by me complete in Sanskrit, and in great forwardness in translation, and might be sent to the press at very short warning, and finished as the press proceeded." (p. 346). Some more details about this little known work *Vyavahāra Siddhānta Pīyūsha* are given in the Catalogue of the Calcutta Sanskrit College library. No more graceful tribute to the memory of this

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

great scholar and pioneer of Sanskrit legal studies could be paid than by the Asiatic Society of Bengal rescuing this work from its present oblivion by publishing it in its *Bibliotheca Indica* with all the available portion of Colebrooke's translation.

To come back to the points raised about Bālam Bhatta's age by Prof. Eggeling's note. If he was 80 in 1800 and was alive in 1830 he then lived to be 110 years at least. With regard to the date of the composition of the *Mitākshara* commentary, I am able now, thanks to the help of Babu Thakur Das, Chief Inspector of State Banks and Industries in the State of Benares, and who is in charge of the palace library also, to make a definitive statement about it. One manuscript of the library is dated S. 1831 (A. C. 1775) and the other S. 1849 (A. C. 1793). It is clear then that the work was composed before A. C. 1775.

Pandit Vindheshwari Prasad also informs me that in his old age Bālam Bhatta who was a great devotee of Batuk Bhairava whose temple is situated just behind the Central Hindu College, was engaged in compiling a *tantra* work the *Bhairavārchā Pārijāta*—detailing the special modes of worship of his *Ishta-deva.* This huge work was never completed, when death overtook the author he had composed or compiled up to 36,000 Shlokas. Only one copy of the work in the handwriting of the author's pupil Mannu Deva exists.

Another question namely, whether Bālam Bhatta was merely a pet name of the author, his real name being Vaidyanātha as is generally believed, is solved by the opening Shlokas of the Digest he was compiling for Colebrooke. It is clearly stated there that his father's name was Vaidyanātha, his mother's Lakshmi Devi. It seems then that all his works on grammar were composed in his father's name and all his law works in his mother's name. There is a Benares tradition that his father took the child to Nāgesh, for whom he had great respect and asked him to bless the youngster,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nāgesh did it and said that he would grow up to write commentaries on his works. If all this is true, it would prove that Bālam Bhatta became a pupil of the famous Nāgesh only towards the close of his life.

With regard to the two works on Rhetoric ascribed to our author, it is very doubtful whether it is he or some other Vaidyanātha, as I have not been able to examine the manuscripts of the works myself, I cannot say for certain that they are Bālam Bhatta's works. Most likely they are not, and our author has been confused with another Vaidyanātha.

I give below the first eight out of the twelve opening stanzas of the *Dharma Shāstra Sangraha* as given in the India office Catalogue. These verses show his relation to Colebrooke and give in unmistakable language his parentage.

मंगलास्पदममंगलहारी मंगलेप्सुजनमंगलकारी ।
मंगलप्रदसुमंगलकीर्त्तिर्मंगलं दिशतु मंगलमूर्तिः ॥ १ ॥
काशी वः कुशलं करोतु कुरुतान्मंदाकिनी मंगलं
विश्वेशस्तनुमातनोतु तनुताच्छ्रीदंडपाणिः श्रियं ।
दुर्गा दुर्गतिं धुनोतु सततं छिंद्याद्भवानी भयं
लोलार्कः सदुदर्कदोऽस्तु भवतां स्यात्केशवः क्लेशहा ॥ २ ॥
सर्वतंत्रार्थतत्त्वज्ञः परध्वांतनभोमणिः
इंगरेजकुलाब्धिग्लौरयाचित सुरद्रुमः ॥ ३ ॥
श्रीविश्वनाथसुदयापरिपूर्वलब्ध-
देशप्रजादिपरिपालनगीतकीर्तिः
धैर्यौदार्यवीर्यश्रुतशास्त्रनयप्रवीणः
श्रीकोंपणी विजयते रणरंगधीरः ॥ ४ ॥
श्रीशं नत्वा श्रीनिवासी दाक्षिणात्यो निबन्धकृत् ।
नागेशपादनिरतो वैद्यनाथात्मजः सुधीः ॥ ५ ॥
सुमनःकुलवुरुकसाहेवाल्लुब्धजीविकः ।
लक्ष्मीसूनुर्भवान्यंबोविप्रद्वयविलेखकः ॥ ६ ॥
धर्मशास्त्रिमहादेवमन्नुदेवसहायकः ।
बालशर्माऽबालबुद्धिः पायगुंडोपनामकः ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्वादिस्मृतिवाक्यानि प्राच्यवाचीनिबंधकान् ।
परिभाव्य व्यवहृतेः पदानां परिपूरणं ॥ ८ ॥

How or why Bālam Bhatta came to be confused with Vaidyanātha, whom he distinctly calls his father, I cannot find an explanation for.

The Mannu Deva referred to above was a favorite pupil of Bālam Bhatta and was himself an author of several grammatical commentaries, in which he refers to his Guru as Bālam Bhatta and never as Vaidyanātha. This ought to prove conclusively that Vaidyanātha and Bālam Bhatta were distinct persons, father and son, and not different names for the same person; for as a pupil it would not be becoming in him to refer to his guru by a pet name instead of his real formal name.

In passing it may be pointed out that Mahamahopadhyaya Hara Prasad Shastri's article in the Indian Antiquary for January 1912 headed "Dakshini Pandits at Benares" is full of mistakes and overbold and unsupportable generalisations, but as this introduction has already become very lengthy it is not possible to go into a detailed criticism. But for example's sake I will just mention here that he gives our author's name as Annam Bhatta and says that he commented only on the *Vyavahāra* chapter! Surely the great Telegu Pandit and co-disciple of the famous Bhattoji Dīkshit, best known to fame by his universally used *Tarka Sangraha* and author of huge commentaries on *Tatva—Chintamani—Āloka* (Nyāya), *Kayyata* (Vyākarṇa) and *Rāṇāka* or *Nyāya Sudhā* (mimansa) ought not to have been confounded with the very much later Bālam Bhatta. The article ignores wholly the great Panchgauda Pándits, and it was they who were regarded as authorities by the people of Benares who are Hindustanis and not Mahārashtras. The latter have always been a very small community in Benares, whose existence had depended very largely on the bounty of the Peshwas and their influence was confined to

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

their own people. Among a Brahman population numbering nearly a lakh in the District of Benares, the Mahārashtra's number barely three thousand all told.

Coming now to our present edition of the work, it has been a long and arduous labor extending over sixteen years. I began to collect Mss. for the purposes of the edition about 1895. In the course of my MS. hunting I succeeded in securing six Mss. of the *Vyavahāra* portion, from the gentlemen and places noted below (1) Maharaja of Benares' Palace library (2) the late Munshi Hanuman Prasad, High Court Vakil, Allahabad. (3) Pandit Amba Das Shastri, Professor of Vedanta, Central Hindu College, Benares, (4) the Deccan College library, Poona (5) The late Pandit Bal Mukund Karmakandi, Gāyaghat, Benares and finally (6) Pandit Narayan Pati, Ramapura, Benares. This last represents the 'second' edition of the work, while the first five represent the 'first' edition. I did not use the Benares Government Sanskrit library Mss. as it is only an indifferent copy of Mss. number 2. With the help of these six Mss. my venerable and learned tutor Pandit Hari Shastri Manekar prepared a Press Copy and I commenced an edition in the Bibliotheca Indica in 1902, the first fasciculus appearing in 1904, but the work progressed very slowly and for various other reasons, and by the time four fasciculi had appeared I gave up the editing of the work for the Asiatic Society of Bengal. I finally decided, as my continuous ill-health and my consequent long absences from Benares, made proof-reading a very difficult task—to hand over the Press copy, to my friend Pandit Nityanand Pant Parvatiya, one of the most learned and all-round Pandits of the younger generation, and he has with indefatiguable labor seen the work through the Press. He secured two or three other Mss. also, but there were practically no differences of readings available from them, so they were of little use.

With regard to the text of the *Mitāksharā* besides the

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

earlier and more correct Bombay edition, the edition of the *Vyavahāra* only with the Marathi translation was used, as also two old and correct Benares manuscripts ; but reliance has been placed largely on the tika and as far as possible his readings only have been embodied in the text as printed here.

While about this question of the text of the *Mitākshara* as printed here, I may point out that really critical, scholarly editions of the various Commentaries and Digests which are recognised by the British Law Courts as 'binding' are not at all available. What scientific textual criticism means is understood by few Hindus and its supreme importance realised by fewer still. To give an instance, Dr. Hoernle's article in the J. R. A. S. not long ago, critically treating the text of *Sushruta* will appeal to how few people, unless they be professional scholars. In fact such elaborate text-studies are resented and the labor, learning and the historical temper brought to bear on the ancient texts is stigmatised as a reprehensible tampering with accepted texts tending to produce an unsettling of time-honored beliefs. But unless similar drastic measures are meted out to the cheap prints of the Hindu law books, which have not even the value of a good manuscript, is it not reprehensible that faith should be pinned to these and millions worth of property annually put into jeopardy by their being accepted as accurate by the Courts and their dicta enforced. The British Government has been very remiss in this part of its most solemn duty to the people of the country. When guaranteeing to us our 'personal law' they ought to have taken good care to find out what it was. The Government has simply sat supine letting the work be done, whether well or ill by private agency. It neither attempted to make a comprehensive and exhaustive survey of customary law and usage, not did it appoint responsible committees and commissions for bringing out authoritative editions and translations of 'binding' texts. A careful perusal of the various law-reports will show the

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

immense amount of mischief done by early mistranslations, which have got embodied in judgments and have now become binding precedents, upsetting the old law in many places. It is now beyond the power of the Judges to undo the harm done, only the legislature can undo it, by boldly tackling the problem of the codification of the whole of the Civil law.

Three notable features of this edition in the Chowkhamba Sanskrit Series, Benares are, firstly, the treatment of the *Pratikas*; these were given in such a brief, misleading shape by Bālam Bhatta, that it was often hard work to find the sentence of the *Mitāksharā* on which Bālam Bhatta was commenting; all these with infinite patience have been filled out by Pandits Hari Shastri and Nityanand; and as the Benares type does not allow of a thicker-faced type being used with the same body, all these have been marked by asterisks, secondly, the breaking up of the *Bālambhatti* into short numbered sections after the fashion of the legislative Acts of the British Government of India, and thirdly, instead of the meaningless iteration of the name of the book as page-heading an attempt has been made to denote the contents of each page at its top as heading. All this will it is hoped facilitate the task of translation and of reference very considerably. The list of *errata* has unfortunately become rather formidable, but anyone who has had dealings with Benares Printing Presses knows how hopeless it is to expect good or accurate printing from them.

Originally I had intended to give a complete translation of the *Mitākshārā* and the *Bālambhatti* but failing health has so delayed my intentions that since then three distinct translators have come into the field, namely my friend Rai Srish Chandra Basu Bahadur, in his Sacred Laws of the Aryas Series, Mr. J. R. Gharpure and his colleagues in a quarterly law Magazine (Bombay) and Mr. Setlur of Madras. I have therefore abandoned my intention, knowing that the

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

work was in very good hands and I might as well divert my remaining energies to some more as yet unedited works. For this reason I have also given up the idea of editing the *Āchāra* and *Prāyashchitta* portions, handing over my Mss to Mr. J. R. Gharpure.

Durgakund,
BENARES,
Sepr. 15th, 1912.

GOVINDA DAS.

P. S. Since the above was in type, I have had an opportunity of reading two books by Mr. J. H. Nelson namely—"Indian Usage and Judge-made Law in Madras" (1887) and "A Prospectus of the Scientific Study of the Hindu Law" (1881) and also Mr. Justice Inne's "Examination of Mr. Nelson's views of Hindu Law" (1882). This last is a small pamphlet in which Mr. Innes has tried in smart language to uphold the orthodox view about the binding and authoritative nature of the Hindu law books and demolish the position taken up by Mr. Nelson against the current views about these works. Mr. Innes' pamphlet is scarcely a "Judicial" pronouncement on the subject, seeing that Mr. Nelson's chief positions namely that these Sanskrit works are (1) speculative, are (2) meant primarily for Brahmans and were (3) never enforced, as they are being enforced to-day; has not even been touched. There is a great deal of clever fencing and intemperate language, more fit for an advocate than a Judge, than hard convincing reason in the pamphlet. Rightly or wrongly, Mr. Nelson's publications were taken to be an impertinant, contumacious attack on the dignity of the Madras High Court and hence deserving of censure seeing that he being a District judge was subordinate to the High Court, than of a well-reasoned reply.

The reasons for the marked divergence of views advocated by the respective protagonists to this famous Madras duel

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

are easy to surmise. Innes' lot was cast before his elevation to the High Court among the strongly Brahmanised, northern Telegu Districts of the Province, while Nelsons' fate was to serve out his official career among the less Brahmanised southern Districts of Madras, where the aboriginal Dravidian is still strongly holding on to its ethnic and social integrity and where the gulf between the Tamil Brahman and the non-Brahman is infinitely greater than among the Telegus. The Tamil non-Brahmans are Brahminised barely to the extent of calling themselves Hindus and taking on some of the Brahman practices and gods, continuing to be largely devil-worshippers and sticking to their usages. The sturdy Maraver peasant for instant, half-robber and half-cultivator has presistently avoided being encumbered with the dead-weight of Hindu ecclesiasticism. This fact of the totally different surroundings in which their official life was lead will help greatly to explain the antagonism of view between the two. One thing however must be said here, that Nelson's bad advocacy spoiled an otherwise good cause. His language too was not judicious and he suffered from the serious disability of being wholly ignorant of Sanskrit, and had no experience of other Provinces of India and their ways and u[illegible] all these things combined to betray him into some c[illegible] of which his opponents did not fail to take full adv[illegible] Both Nelson's books deserve careful perusal at the h[illegible] those interested in reforming the administration of [illegible] law in the country.

११०८६

Printed by Pt. Baijnath Jijja, Manager, Tara Printing Works, Benares City.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu